वैयाकरणसिद्धान्तकौमुदी

बालमनोरमा-तत्त्वबोधिनीसहिता

(भ्वादिप्रभृतिलकारार्थप्रकरणान्ता)

(तृतीयो भागः)

म. म. पं. गिरिधरशर्मा चतुर्वेदः
म. म. पं. परमेश्वरानन्दशर्मा विद्याभास्करः

मोतीलाल बनारसीदास
दिल्ली :: वाराणसी :: पटना

श्रीः

श्रीमद्भट्टोजिदीक्षितविरचिता

वैयाकरणसिद्धान्तकौमुदी

(भ्वादिप्रभृतिलकारार्थप्रकरणान्ता)

श्रीमद्वासुदेवदीक्षितप्रणीतया बालमनोरमाख्यव्याख्यया
श्रीमज्ज्ञानेन्द्रसरस्वतीविरचितया तत्त्वबोधिन्याख्यया व्याख्यया च सनाथिता

जयपुर-राजकीय-संस्कृत-कालेजाध्यक्षेण महामहोपाध्यायव्याकरणाचार्य-
न्यायशास्त्र्याद्यनेकबिरुदभाजा चतुर्वेदोपाह्वेन
श्रीमद्गिरिधरशर्मणा
तदन्तेवासि-जालन्धरस्थ-राजकीयप्राच्य-विद्यालयाध्यापक-
महामहोपाध्याय-विद्याभास्कर-ऋषिकुलस्नातक
श्रीपरमेश्वरानन्दशर्मणा
च संशोध्य सम्पादिता ।

मोतीलाल बनारसीदास

दिल्ली :: वाराणसी :: पटना

© मोतीलाल बनारसीदास
भारतीय संस्कृति साहित्य के प्रमुख प्रकाशक एवं पुस्तक विक्रेता
मुख्य कार्यालय : बंगलो रोड, जवाहर नगर, दिल्ली-७
शाखाएँ : १. चौक, वाराणसी-१ (उ० प्र०)
२. अशोक राजपथ, पटना-४ (बिहार)

पुनर्मुद्रण : दिल्ली, १९६५, १९७१, १९७७, १९८२

मूल्य : रु० ४० (सजिल्द)
२५ (अजिल्द)

भारत सरकार द्वारा उपलब्ध किए गये
रियायती मूल्य के कागज पर मुद्रित ।

श्री नरेन्द्रप्रकाश जैन, मोतीलाल बनारसीदास, बंगलो रोड, जवाहर नगर, दिल्ली-७ द्वारा प्रकाशित तथा श्री शान्तिलाल जैन, श्री जैनेन्द्र प्रेस, ए-४५, फेज-१, इंडस्ट्रियल एरिया, नारायणा, नई दिल्ली-२८ द्वारा मुद्रित ।

वैयाकरणसिद्धान्तकौमुद्याः

उत्तरार्धम् ।

श्रौत्रार्हन्तीचणैर्गुणपर्यैर्महर्षिभिरहर्दिवम् ।
तोष्टूयमानोऽप्यगुणो विभुर्विजयतेतराम् ॥ १ ॥

अस्तु नमः पाणिनये भूयो मुनये तथास्तु वररुचये ।
किंचास्तु पतञ्जलये श्रौत्रे विश्वेश्वराय गुरवे च ॥ १ ॥
व्याख्याता बहुभिः प्रौढैरेषा सिद्धान्तकौमुदी ।
वासुदेवस्तु तद्व्याख्यां वष्टि बालमनोरमाम् ॥ २ ॥

ॐ मङ्गलादीनि मङ्गलमध्यानि मङ्गलान्तानि च शास्त्राणि प्रथन्ते, वीरपुरुषाणि भवन्त्यायुष्मत्पुरुषाणि चाध्येतारश्च मङ्गलयुक्ताः स्युरिति भाष्यप्रमाणकं ग्रन्थमध्ये विघ्नविघातादिप्रयोजनाय कृतं मङ्गलं शिष्यशिक्षायै ग्रन्थतो निबध्नाति **श्रौत्रेति**। वेदाध्येता श्रोत्रियः । 'श्रोत्रियंश्छन्दोऽधीते' इति वेदपर्यायात् छन्दश्शब्दाद् द्वितीयान्तादधीत इत्यर्थे घन्प्रत्ययः । प्रकृतेः श्रोत्रादेशश्च निपातितः । श्रोत्रियस्य भावः श्रौत्रम् । श्रोत्रियस्य यलोपश्चेत्यणि इकारादुत्तरस्य यकाराकारसंघातस्य लोपे इकारस्य 'यस्येति च' इति लोपः । अर्हति आर्यैः प्रशस्यमानेषु वेदविहितकर्मसु योग्यो भवतीत्यर्हन् । 'अर्हः प्रशंसायाम्' इति शतृप्रत्ययः । अर्हतो भाव आर्हन्ती । 'अर्हतो नुम् च' इति ष्यञि आदिवृद्धौ प्रकृतेर्नुमागमे षित्त्वान्ङीषि 'हलस्तद्धितस्य' इति यकारलोपे 'यस्येति च' इत्यकारलोपः । स्त्रीत्वं लोकात् । श्रौत्रं च आर्हन्ती च श्रौत्रार्हन्त्यौ ।

अज्ञाननाशने दक्षं दीक्षितं भक्तरक्षणे ।
वटमूलाश्रयं[1] त्र्यक्षं दक्षिणामूर्तिमाश्रये ॥ १ ॥

ग्रन्थमध्ये विघ्नविघाताय कृतं मङ्गलं शिष्यशिक्षार्थं निबध्नाति **श्रौत्रेत्यादिना**। श्रोत्रियस्य भावः श्रौत्रम् । 'हायनान्तयुवादिभ्योऽण्' इति सूत्रे 'श्रोत्रियस्य यलोपश्च' इति वार्तिकाद्यलोपे अणप्रत्यये च 'यस्येति च' इतीकारलोपः । अर्हतो भाव आर्हन्ती । 'गुणवचनब्राह्मणादिभ्यः–' इति सूत्रे 'अर्हतो नुम् च' इत्युक्तेर्नुम् ष्यञ् च । षित्वाद्

---

१ 'शब्दब्रह्मात्मने च धूर्जटये' इति पाठः क ।

ताभ्यां वित्ताः श्रोत्रार्हन्तीचणाः, तैरिति विग्रहः। 'तेन वित्तश्चुञ्चुप्चणपौ' इति चणप्। वेदाध्येतृत्वेन वेदविहितकर्मयोग्यतया च प्रसिद्धैरिति यावत्। **गुण्यैरिति।** नित्यानित्यवस्तुविवेकः, इहामुत्रार्थफलभोगविरागः, शमदमादिसम्पत्तिः, मुमुक्षुत्वमित्यादिप्रशस्तगुणसम्पन्नैरित्यर्थः। 'रूपादाहतप्रशंसयोः—' इति सूत्रे 'अन्येभ्योऽपि दृश्यते' इति वार्तिकेन यप् प्रत्ययः, तद्भाष्ये 'गुण्या ब्राह्मणाः' इत्युदाहरणात्। **महर्षिभिरिति।** महान्तश्च ते ऋषयश्चेति कर्मधारयः। 'आन्महतः—' इत्यात्वम्। अतितपस्विभिरित्यर्थः। **अहर्दिवमिति।** अहश्च दिवा चेति वीप्सायाम् 'अचतुर—' इत्यादिना द्वन्द्वो निपातितः। अहन्यहनीत्यर्थः। **तोष्टूय्यमानोऽपीति।** 'ष्टुञ् स्तुतौ' सकर्मकः। गुणवत्त्वेनाभिधानं स्तुतिः। अभिधानक्रियानिरूपितं कर्मत्वमादाय देवान् स्तौतीत्यादौ द्वितीया। न तु गुणाभिधानमेव स्तुतिः, तथा सति गुणस्य धात्वर्थोपसंगृहीतत्वेनाकर्मकत्वापत्तेः। 'धात्वादेः षः सः' इति षकारस्य सकारे ष्टुत्वनिवृत्तौ, 'धातोरेकाचः—' इति भृशार्थे यङि, 'अकृत्सार्वधातुकयोः—' इति दीर्घे, 'सन्यङोः' इति द्वित्वे, 'शर्पूर्वाः खयः' इति सकारस्याभ्यासगतस्य लोपे, 'गुणो यङ्लुकोः' इत्यभ्यासोकारस्य गुणे, ततः परस्य सस्य 'आदेशप्रत्यययोः' इति षत्वे, ष्टुत्वेन तकारस्य टकारे, तोष्टूयेति यङन्तात् 'सनाद्यन्ताः—' इति धातुसंज्ञकात् कर्मणि लटश्शानचि 'आने मुक्' इति मुगागमे, 'सार्वधातुके यक्' इति यकि, यङोऽकारस्य 'अतो लोपः' इति लोपे, तोष्टूय्यमान इति रूपम्। भृशं स्तूयमानोऽपीत्यर्थः।

ङीषि 'हलस्तद्धितस्य' इति यलोपः। ताभ्यां वित्तैः श्रोत्रार्हन्तीचणैः। 'तेन वित्तः—' इति चणप्। श्रोत्रियत्वयोग्यत्वाभ्यां प्रसिद्धैरित्यर्थः। किं च गुण्यैर्गुणवद्भिः। प्रशस्तगुणयुक्तैरिति यावत्। 'रूपादाहतप्रशंसयोः—' इति सूत्रे 'अन्येभ्योऽपि दृश्यते' इत्युक्त्वा 'गुण्या ब्राह्मणाः' इत्यस्य भाष्यादावुदाहृतत्वात्। **अहर्दिवमिति।** अहन्यहनि, प्रत्यहमित्यर्थः। 'अचतुर—' इत्यादिना निपातनात्साधुः। **तोष्टूय्यमान इति।** स्तौतेर्यङन्तात्कर्मणि शानच्, 'सार्वधातुके यक्' इति धातोर्यक्, 'आने मुक्' इति मुक्। अपिशब्देन आपाततो विरोधं द्योतयति। वस्तुतस्तु न विरोधः। स्तुतिप्रयोजकीभूतानामनन्तकल्याणगुणानां श्रुतिस्मृतिसिद्धत्वेऽपि वियदादिवद्व्यावहारिकत्वात्तदभावस्य पारमार्थिकत्वात्। एतच्चोत्तरमीमांसायां स्पष्टमेव। विभुर्व्यापकः परमेश्वरः। अतिशयेन विजयते विजयतेतराम्। सर्वोत्कर्षेण वर्तत इति फलितोऽर्थः। 'विपराभ्यां जेः' इति तङ्। तदन्ताद् 'द्विवचनविभज्य—' इत्यादिना तरपि 'किमेत्तिङव्ययघादामु—' इत्यामु। नन्विह तरब् दुर्लभ एव, विजयत इत्यस्य अप्रातिपदिकत्वादतिङन्तत्वाच्च। न च 'सह सुपा' इत्यत्र सहेति योगविभागात्तिङन्तेन विशब्दस्य समासे प्रातिपदिकत्वं

पूर्वार्धे कथितास्तुर्यपञ्चमाध्यायवर्तिनः ।
प्रत्यया अथ कथ्यन्ते तृतीयाध्यायगोचराः ॥ २ ॥

अचिन्त्यजगद्रचनाद्यनन्तगुणसम्पन्नतया भृशङ्कीर्त्यमानोऽपीति यावत् । **अगुण इति ।** निर्गुण इत्यर्थः । 'साक्षी चेता केवलो निर्गुणश्च' इत्यादिश्रुतेरिति भावः । निर्गुणस्य गुणवत्त्वेन कथनात्मिका स्तुतिर्विरुद्धेत्यापातप्रतिपन्नं विरोधमपिशब्दो द्योतयति । गुणानां व्यावहारिकसत्यत्वेऽपि पारमार्थिकत्वाभावान्न विरोध इत्युत्तरमीमांसायां स्पष्टम् । **विभुरिति ।** सर्वव्यापकः परमेश्वर इत्यर्थः । **विजयतेतरामिति ।** 'जि जये' अकर्मकः । उत्कर्षेण वर्तनं जयः । 'विपराभ्यां जेः' इत्यात्मनेपदम् । 'तिङश्च' इत्यतिशायने तरप् । 'किमेत्तिङव्यय-' इति तरबन्तात् स्वार्थे आम्प्रत्ययः । 'तद्धितश्चासर्वविभक्तिः' इत्यत्र तसिलादिषु परिगणनादामन्तमव्ययम् । सर्वोत्कर्षेण वर्तत इत्यर्थः । न च विजयते इति समुदायस्यातिङन्तत्वात् कथं ततस्तरबिति वाच्यम् । वि इति हि भिन्नं पदम्, तिङन्तोत्तरपदसमासस्य छन्दोमात्रविषयत्वात् । ततश्च जयत इत्यस्मादेव तरप् । न च जयत इत्यस्य 'विपराभ्यां जेः' इति कृतात्मनेपदस्य विशब्दसापेक्षत्वादसामर्थ्यं शङ्क्यम् । वीत्युपसर्गस्य द्योतकत्वेन पृथगर्थविहीनतया तत्सापेक्षत्वाभावात् तिङन्तस्य प्रधानतया तस्य विशब्दापेक्षत्वेऽपि बाधकाभावाच्चेत्यलम् । वृत्तकथनपूर्वकं वर्तिष्यमाणनिरूपणं प्रतिजानीते **पूर्वार्धे इति ।** तुर्यश्चतुर्थः । 'चतुरश्छयतावाद्यक्षरलोपश्च' इति चतुर्शब्दाद्यत्प्रत्ययः, प्रकृतेश्चकाराकारसंघातलोपश्च । पूर्वार्धे चतुर्थपञ्चमाध्यायवर्तिनः प्रत्ययाः कथिता इत्यन्वयः । 'स्पृशोऽनुदके क्विन्' इत्यादितार्तीयीककतिपयप्रत्ययोपन्यासस्तु प्रासङ्गिक इति भावः । **अथेति ।**

स्यादेवेति वाच्यम्, स च छन्दस्येवेति तत्रत्यग्रन्थेन सह विरोधापत्तेः । किं च प्रातिपदिकत्वाभ्युपगमे सोरुत्पत्तिः स्यात्, लिङ्गसर्वनामताभ्युपगमेन नपुंसकत्वात्सोर्लुक्यपि 'ह्रस्वो नपुंसके-' इति ह्रस्वो दुर्वारः स्यात् । समुदायान्तर्गतस्य 'जयते' इत्यस्य तिङन्तत्वेऽपि विशब्देन साकाङ्क्षत्वेनासामर्थ्यात्ततोऽपि भवितुं नार्हति । 'समर्थः पदविधिः' इति परिभाषितत्वात् । 'आमन्तेन विशब्दो युज्यते' इति कल्पनायां त्वन्तरङ्गत्वात् परस्मैपदप्रवृत्तौ विजयतितरामिति स्यादिति चेत् । अत्राहुः—समुदायान्तर्गताज्जयत इत्यस्मादेव तरप् । न च तस्य विशब्देन सह साकाङ्क्षत्वेनासामर्थ्यं शङ्क्यम्, तिङन्तस्य प्रधानत्वेन सापेक्षत्वेऽपि दोषाभावात्, उपसर्गस्य द्योतकत्वेन प्रत्येकमर्थ एव नास्तीति साकाङ्क्षतया वक्तुमशक्यत्वाच्चेति । वृत्तकथनपूर्वकं वर्तिष्यमाणमाह **पूर्वार्धे इति ।** हलन्तेषु 'स्पृशोऽनुदके क्विन्' 'ऋत्विग्दधृक्स्रग्-' इत्यादिना क्विन्नादिव्युत्पादनं प्रासङ्गिकमिति भावः । **तुर्यश्चतुर्थः ।** 'चतुरश्छयतावाद्यक्षरलोपश्च' इत्युक्तत्वात् ।

अथ भ्वादिप्रकरणम् ।

तत्रादौ दश लकाराः प्रदर्श्यन्ते—लट्, लिट्, लुट्, लृट्, लेट्, लोट्, लङ्, लिङ्, लुङ्, लृङ्। एषु पञ्चमो लकारश्छन्दोमात्रगोचरः। २१५१ **वर्तमाने लट्।** (३-२-१२३) वर्तमानक्रियावृत्तेर्धातोर्लट् स्यात्। अटाविती।

चतुर्थपञ्चमाध्यायवर्तिप्रत्ययनिरूपणानन्तरं तृतीयाध्यायगोचराः प्रत्ययाः कथ्यन्त इत्यन्वयः। तृतीयाध्यायस्य गोचराः प्रतिपाद्यतया विषयाः। तृतीयाध्यायविहिता इति यावत्। कृत्सु 'णवः स्त्रियामञ्' इत्यादितद्धितव्युत्पादनं तु प्रासङ्गिकमिति भावः।

तत्रेति। निर्धारणसप्तम्यन्तात्त्रल्। तेषु तृतीयाध्यायवर्तिप्रत्ययेष्वित्यर्थः। **दशेति।** अनुबन्धभेदाल्लकारभेद इति भावः। **पञ्चम इति।** लेडित्यर्थः। **छन्दोमात्रेति।** 'लिङर्थे लेट्' इत्यत्र 'छन्दसि लुङ्लङ्लिटः' इति पूर्वसूत्रात् 'छन्दसि' इत्यनुवृत्तेरिति भावः। एतेन लेड्रूपाणि इह कुतो न प्रदर्श्यन्त इति शङ्का निरस्ता। **वर्तमाने लट्।** धातोरिति सूत्रमातृतीयाध्यायसमाप्तेरधिकृतम्। वर्तमाने इति तत्रान्वेति। वर्तमानेऽर्थे विद्यमानाद्धातोः लडिति लभ्यते। फलितमाह **वर्तमानक्रियावृत्तेरिति।** धात्वर्थक्रियाया वर्तमानत्वं तु वर्तमानकालवृत्तित्वम्। कालस्य तु वर्तमानत्वम् अतीतानागतभिन्नकालत्वम्। 'भूतभविष्यतोः प्रतिद्वन्द्वी वर्तमानः कालः' इति भाष्यम्। वर्तमानत्वं च न प्रत्ययार्थभूतकर्त्रादिविशेषणम्, अतीतपाकादिक्रिये कर्तरि वर्तमाने पचति इत्याद्यापत्तेः। किंतु धात्वर्थविशेषणमेव वर्तमानत्वम्। लट् तु तस्य द्योतक एव। **अटाविताविति।** न च अकार टकारयोः एवास्त्विति

अथेति। इहापि कृत्सु 'णवः स्त्रियामञ्' 'अणिनुणः' इत्यत्रादिव्युत्पादनं प्रासङ्गिकं बोध्यम्, प्राधान्येन तु तृतीयाध्यायस्था एवेहोच्यन्त इति भावः। अनुबन्धभेदेन भेदमाश्रित्याह **दश लकारा इति। प्रदर्श्यन्त इति।** यद्यपि पञ्चमलकाररूपाण्यधुना न व्युत्पाद्यन्ते तथापि लकारः स्वरूपेण प्रदर्श्यते 'लः कर्मणि च भावे चाकर्मकेभ्यः' 'लस्य' इत्यादिसूत्रविषयतां व्युत्पादयितुमिति भावः। **पञ्चम इति।** लेडित्यर्थः। लट्लिडिति श्लोकक्रमापेक्षयैव लेटः पञ्चमत्वम्, न तु सूत्रोक्तक्रमेणेति बोध्यम्। **वर्तमाने लट्।** वर्तमान इत्येतत्प्रकृत्यर्थविशेषणमित्याह **वर्तमानक्रियावृत्तेर्धातोरिति।** धातोरिति सूत्रमातृतीयाध्यायान्तमधिक्रियत इति भावः। **लट् स्यादिति।** तस्य वाच्यं त्वमनुपदमेव स्फुटीभविष्यति। वर्तमानकालस्तु न तद्वाच्यः, किंतु द्योत्य एव। लिडादिष्वपि भूतादिकालो यथायथं द्योत्य एवेत्यवगन्तव्यम्। वस्तुतस्तु वाच्यत्वाभ्युपगमोऽपि सुगम इति विध्यादिसूत्रे वक्ष्यामः। **अटाविता-**

२१५२ लः कर्मणि च भावे चाकर्मकेभ्यः । (३-४-६९) लकाराः सकर्मकेभ्यः कर्मणि कर्तरि च स्युरकर्मकेभ्यो भावे कर्तरि च । २१५३

वाच्यम् । लिङादिवैलक्षण्याय तस्यावश्यकत्वात् । तथा च तस्य इत्संज्ञां विना निवृत्त्युपायाभावाद् इत्संज्ञैवादर्तव्येति भावः । **लः कर्मणि च** । वाक्यद्वयमिदं सूत्रम् । 'लः कर्मणि च–' इति प्रथमं वाक्यम् । ल इति प्रथमाबहुवचनान्तम् । चकारेण 'कर्तरि कृत्' इत्यतः 'कर्तरि' इत्यनुकृष्यते । 'धातोः' इत्यधिकृतम् । लकाराः कर्मणि कर्तरि च धातोः स्युरिति लभ्यते । सकर्मकधातुविषयमेवेदम् । अकर्मकेषु कर्मणीत्यस्य बाधितत्वात् । तदाह **लकाराः सकर्मकेभ्यो (धातुभ्यः) कर्मणि कर्तरि च स्युरिति** । एवं च सकर्मकेभ्यो भावे लकारा न भवन्ति । सकर्मकेभ्योऽपि भावलकारप्रवृत्तौ तु देवदत्तेन घटं क्रियत इत्यादौ भावलकारेण कर्मणोऽनभिहितत्वाद् द्वितीया स्यादिति भावः । 'भावे चाकर्मकेभ्यः' इति द्वितीयं वाक्यम् । अत्रापि चकारेण कर्तैवानुकृष्यते । न तु कर्म, असंभवात् । तदाह **अकर्मकेभ्यो भावे कर्तरि चेति** । अत्राकर्मकग्रहणेन अविवक्षितकर्मका अपि गृह्यन्ते । तेन देवदत्तेन भुज्यत इत्यत्र सतोऽप्योदनरूपकर्मणः अविवक्षायां भावे लकारोऽस्त्येवेत्यन्यत्र विस्तरः ।

विति । अकार उच्चारणार्थ इति तु नोक्तम्, लिङादिवैलक्षण्यसम्पादनाय तस्यावश्यवक्तव्यत्वात् । **लः कर्मणि च** । चकारात् 'कर्तरि कृत्' इत्यतः कर्तरीत्यनुकृष्यते, सकर्मकविषयं चेदम् । अकर्मकेषु कर्मणीत्यंशस्य बाधितत्वात्, भावे चेत्युत्तरवाक्येन तत्र विशेषविधानाच्च तदेतदाह **सकर्मकेभ्य इति** । **भावे चेति** । चकारेण कर्तैवानुकृष्यते न तु कर्म, असम्भवात्तदाह **भावे कर्तरि चेति** । ननु भावकर्मणोरात्मनेपदविधानात् 'शेषात्कर्तरि–' इति परस्मैपदविधानाच्च ज्ञापकाल्लकाराणां भावकर्मकर्तारोऽर्था अनुमातुं शक्यन्त इति किमनेन सूत्रेण । मैवम्, असत्यस्मिन्सूत्रे सकर्मकेभ्योऽपि घञादिवद्भावे लकारापत्तौ घटं क्रियते देवदत्तेनेत्यादिप्रयोगः प्रसज्येत, तन्माभूदित्येतदर्थमेतत्सूत्रस्यावश्यकत्वात् । न चैवम् 'अकर्मकेभ्यो भावे लः' इत्येव सूत्र्यताम्, भावे अकर्मकेभ्य एवेति नियमार्थमिति वाच्यम्, अकर्मकेभ्यो भाव एवेति विपरीतनियमापत्त्या कर्तरि तेभ्यो लकारानापत्तेः । तस्माद्भावे चेति चकार आवश्यकः । न चैवं 'भावे चाकर्मकेभ्यः' इत्येवास्त्विति वाच्यम्, भावे इव कर्तर्यप्यकर्मकेभ्य एवेति नियमापत्तौ सकर्मकेभ्यो भाव इव कर्तर्यपि लकारानापत्तेः । नन्वेवमपि 'लश्च भावे चाकर्मकेभ्यः' इत्येवास्तु चकारेण कर्तरीत्यनुकर्षणाल्लकाराः सकर्मकेभ्यः कर्तरि स्युरकर्मकेभ्यो भावे कर्तरि च स्युरित्यर्थे पर्यवसिते कर्मणि तूक्तज्ञापकाद्भविष्यन्तीति किमनेन कर्मणीत्यनेनेति चेत् । मैवम्, उत्तरसूत्रे तयोरित्यनेन कर्मणोऽपि परामर्शो

तस्यावश्यकतया ज्ञापकानुसरणक्लेशस्य वैयर्थ्यात्। तस्माद्यथा न्यासमेव रमणीयम्। अत्र नैयायिकाः—'लकाराणां कृतावेव शक्तिर्लाघवान्न तु कर्तरि कृतिमतः कर्तृत्वेन तत्र शक्तौ गौरवात्, देवदत्त इत्यादिप्रथमान्तपदेन तल्लाभाच्च। देवदत्तः पचतीत्यत्र हि देवदत्तो विशेष्यः, यत्नो विशेषणम्, आश्रयत्वं तु संसर्गः। तथा च पाकानुकूलकृत्याश्रयो देवदत्त इत्यादिशाब्दबोधोऽपि सुष्टूपपद्यते' इति। तन्न, पचतीत्युक्ते पाककर्ता क इत्याकाङ्क्षानुरोधेन लकाराणां कर्तरि शक्तिरित्यभ्युपगन्तुमुचितत्वात्। पाकानुकूला कृतिरिति शाब्दबोधाभ्युपगमे तु कस्मिन्नित्याकाङ्क्षा स्यात्, कस्येति वा। न चैककर्तृका पचिक्रियेति शाब्दबोधाभ्युपगमेऽपि क इत्याकाङ्क्षा नोपपद्यत एवेति शङ्क्यम्, कर्तृसामान्यबोधे सति क इति कर्तृविशेषाकाङ्क्षायां बाधकाभावात्। नापि देवदत्तकर्तृका पचिक्रियेत्युक्तेऽपि कस्मिन्नस्ति कस्य वेत्याकाङ्क्षा दुर्वारैवेति शङ्क्यम्, विक्लित्त्यनुकूलव्यापारस्यैव पचिक्रियात्वात् तदाश्रयस्य देवदत्तस्य कर्तृत्वात् क्रियाश्रयत्वे निश्चिते कस्मिन्नित्याकाङ्क्षाया अप्रवृत्तेः। किंच पचन्तं देवदत्तं पश्य, पचते देवदत्ताय देहि, पचमानस्य देवदत्तस्य द्रव्यम् इत्यादौ शतृशानजादीनामपि तिबादिवल्लादेशत्वाविशेषेण तेभ्योऽपि कृतिमात्रबोधापत्तेः। न चेष्टापत्तिः, आश्रयत्वं संसर्ग इत्युक्तत्वेन पाकानुकूलकृत्याश्रयं देवदत्तं पश्येत्याद्यर्थस्वीकारे दोषाभावादिति वाच्यम्, नामार्थयोर्भेदान्वयस्य स्वपरसिद्धान्तविरुद्धत्वात्। न चैवं नामार्थयोरभेदसंसर्गव्युत्पत्त्यनुरोधेन शतृशानजादीनां कर्तरि शक्तिस्तिबादीनां तु कृतावेवेति वैषम्यं स्वीक्रियते, प्रामाणिकगौरवस्यादोषत्वादिति वाच्यम्, स्थान्येव वाचको लाघवान्न त्वादेशो गौरवादिति स्वसिद्धान्तस्य परित्यागापत्तेः। रामः, ज्ञानम्, कतरत्, इत्यादौ सोर्विसर्गे सोरमि सोरदड्डि च कृते लाघवात्सुत्वेनैव शक्तिर्न तु तत्तद्रूपेणेत्यादिभवदीयव्यवहारस्यासांगत्यापत्तेश्च। एवं च तिबादीनां शत्रादीनां च स्मारकतया लिपिस्थानीयत्वम्, बोधकस्तु लकार एवेति स्थितम्। स च शत्राद्यन्ते कर्तरि शक्त इत्यभ्युपगमे तिङन्ते कथं कृतिं बोधयेत्। 'अन्याय्यश्चानेकार्थत्वम्' इति न्यायात्। यदि तु वैयाकरणरीतिमाश्रित्य सर्वत्रादेशा एव वाचका इत्याद्यभ्युपगम्यते, तर्हि घटम्, घटेन, हरेऽव, विष्णोऽवेत्यादिषु 'सर्वे सर्वपदादेशाः–' इति न्यायेन पदस्फोटो वाक्यस्फोटश्च सिध्येदिति भवतां तन्महदेवानिष्टम्। किं च 'कर्तरि कृत्' इति यत्कर्तृग्रहणं तदेव 'लः कर्मणि–' इति सूत्रे चकारेणानुकृष्यत इति कथं ण्वुलादीनां लकाराणां च शक्तौ वैलक्षण्यम्। न च नामार्थयोरभेदान्वयसंसर्गाभ्युपगम एव ण्वुलादौ कर्तुर्वाच्यत्वे बीजमिति वाच्यम्, पचतिरूपं पचतिकल्पं देवदत्त इत्याद्यनुरोधेन तिङ्ष्वपि कर्तुरेव वाच्यतौचित्यात्। ननु समुदायस्य नामत्वेऽपि तिङ्प्रत्ययो न नामेति चेत्पाचक इत्यत्राप्यक इत्येतन्न नामेति तुल्यम्। अकारान्तं नामेति चेद् रूपबाद्यन्त-

मपि नामेति तुल्यम्। ततश्चात्रप्रशस्तपाककर्ता देवदत्त इत्याद्यभेदान्वयो भवद्भिरभ्युपगन्तव्य इति तिङ्क्ष्वपि कर्तुर्वाच्यता स्वीकर्तव्यैव। किं च कर्तुर्वाच्यत्वानभ्युपगमे 'युष्मदि समानाधिकरणे मध्यमः' 'अस्मद्युत्तमः' इति सामानाधिकरण्यप्रयुक्ता पुरुषव्यवस्था 'अभिहिते कर्तरि प्रथमा' इत्यादिकं च भवन्मते कथं संगच्छताम्। यत्तु अनभिहित इत्यस्यानभिहितसंख्याक इत्यर्थवर्णनेन 'देवदत्तः पचत्योदनम्, ओदनः पच्यते देवदत्तेन' इत्यादौ प्रथमाद्वितीयादिव्यवस्थापनमुक्तम्। तन्न, कृत्तद्धितसमासेषु संख्याभिधानस्याप्रसिद्धत्वात्। ततश्च पक्वव्यस्तण्डुलः, शत्यः शतिकोऽश्वः, प्राप्तोदको ग्रामः, इत्यादिषु 'कर्मणि द्वितीया' इत्यस्य प्रवृत्तौ प्रथमा न स्यात्। न च तिष्ठतीत्यध्याहारेण संख्याभिधानमिहाप्यस्तीति वाच्यम्, स्थित इत्याद्यध्याहारे तदभावात्। शाब्दिकोऽयं देवदत्तो न तु नैयायिक इत्यादिषु नीलमिदं न तु रक्तमित्यत्रेव क्रियापदाध्याहारस्यानावश्यकतया आख्यातेन 'शब्ददर्दुरं करोति' इति ठक्प्रत्ययेन वा कर्तृसंख्याया अनुक्तत्वाद्देवदत्ते कर्तरि तृतीयोत्पत्तिप्रसङ्गाच्च। तस्मादनभिहिते कर्तरीत्यादिव्याख्यानमेवाभ्युपेतव्यम्। अपि च धातूपात्तव्यापाराश्रयः कर्ता, तत्राश्रयमात्रं कृतां लकाराणां चार्थः, न तु व्यापारोऽपि, तस्य धातुनैव लब्धत्वात्। अत एव कर्ता कारक इत्यादौ प्रकृतिप्रत्ययार्थयोर्नानन्वयः, व्यापाराश्रयस्य प्रत्ययार्थत्वे तु तस्य प्रकृत्यर्थेन व्यापारेणान्वयः क्लिष्टः स्यात्। यस्तु वदति—'कृधातोः' कृतिरर्थः, कृत्प्रत्ययस्यापि कृतावेव शक्तिर्न तु कर्तरि। 'कर्तरि कृत्' इत्यत्र हि कर्तरीति भावप्रधानो निर्देशः। कर्तृत्वं कृतिमत्त्वम्। तच्च कृतिरेव। यत्र तु देवदत्तादिपदसमभिव्याहारस्तत्र तृजादौ कृतिमति लक्षणेत्यादि, तन्मते पूर्वोक्तकर्त्रादौ सुतरामनन्वयः। 'कर्मवत्कर्मणा—' इति सूत्रे करोतिरुत्पादनार्थः, उत्पत्तिश्च कर्मस्था, यत्नार्थकत्वे तु करिष्यते घट इत्यादि न सिध्येदिति वक्ष्यमाणदूषणं च दुरुद्धरम्। आश्रयमात्रस्य प्रत्ययार्थत्वे तु रथो गच्छतीत्यत्र रथस्याचेतनस्य यत्नाभावेऽपि गमनानुकूलचक्रभ्रमणादिव्यापाराश्रयत्वान्न काचिदनुपपत्तिः। एवं स्थिते कृतौ शक्तिरित्यस्योक्तिसंभव एव नास्ति, कृतेरपि व्यापारविशेषतया प्रायेण धातुत एव लाभात्, जानातीत्यादावाश्रयत्वं प्रत्ययस्यार्थ इति स्वीकृत्य यत्नार्थत्वस्य त्वयाऽपि वक्तव्यत्वात्। न हि यत्नमन्तरेण ज्ञानं नोदेतीति कश्चिदभ्युपैति। तस्मात्कृतां तिङां च वैलक्षण्यं दुर्लभमिति कर्त्रर्थकत्वमभ्युपेयम्। एतेन कर्त्रधिकरणे आख्यातवाच्यत्वं कर्तुर्निरस्य जङ्गम्यमानाधिकरणे यङन्ताद्विहितस्य जङ्गम्यमान इति शानचः कर्तृवाचकत्वं स्वीकुर्वन्तो मीमांसका अपि प्रत्युक्ताः। यत्तु तैरुक्तं शानजंशे 'कर्तरि कृत्' इति व्याकरणं शक्तिग्राहकमस्तीति। तन्न, कृद्वाक्यशेषो ह्ययमर्थाकाङ्क्षायामनिर्दिष्टार्थेषु ण्वुलादिष्वेवोपतिष्ठते 'आकाङ्क्षि-

तविधानं ज्यायः' इति न्यायात्, न तु शत्रादिषु । स्थानिभूतलकारार्थेनैवैतेषां निराकाङ्क्षत्वात्, अन्यथा भावे कर्मणि च शानचो दौर्लभ्यापत्तेः । ततश्च शय्यमाने आस्यमाने चायं गत इत्यादिप्रयोगो भावे न स्यात् । कर्मणि तु क्रियमाण इत्यादिप्रयोगो न स्यात् । यत्तु **भट्टपादा** आहुः—कर्तरि यदेकत्वं तत्र तिप्, कर्तरि यद् द्वित्वं तत्र तस्, इत्यादिक्रमेण 'लः कर्मणि–' इत्यस्य 'द्व्येकयोः–' इत्यादिभिरेकवाक्यतया व्याख्यानात्त्र कर्तृवाच्यता सूत्रादायातीति । तच्चिन्त्यम्, 'तान्येकवचनद्विवचन–' इति विहितद्विवचनादिसंज्ञा हि तिबाद्यादेशनिष्ठा । ततश्च द्विवचनादिसंज्ञकतिबादिविधिना 'द्व्येकयोः–' इत्यस्यैकवाक्यताऽस्तु । न च तिबादिविधौ कर्तरीत्यस्ति, यद् द्वित्वैकत्वादिविशेषणतया कथंचिन्नीयेत । ननु 'लः कर्मणि–' इति सूत्रे 'कर्तरि कृत्' इत्यतोऽनुवृत्तं कर्तृग्रहणं तिबादिविधावस्त्येव, लविधितिबादिविध्योरप्येकवाक्यतास्वीकारादिति चेत् । सत्यम्, वाक्यैकवाक्यता हि सा, न तु पदैकवाक्यता, 'लः कर्मणि–' इति विहितलकारानुवादेन तिबाद्यादेशविधेः प्रवृत्तत्वात् । तथा च लविधौ श्रूयमाणं कर्तृग्रहणं कथं संख्यां विशिनष्टु । न हि यत्र कर्तृग्रहणं तत्र संख्योपस्थापकमस्ति, लकारस्य द्विवचनादिसंज्ञाविनिर्मुक्तत्वात् । ततश्च 'कर्तरि यदेकत्वम्' इति व्याख्या कथमपि न संभवत्येव । स्यादेतत्, 'लः कर्मणि' इति सूत्रे ल इत्यकारानुबन्धकयोर्लङ्लृङोः सामान्यग्रहणं न भवति किंत्वस्पष्टानुबन्धकलकाराणां सामान्यग्रहणमिति निर्विवादम् । तत्र 'लः' इति जसन्तं मा भूत् किंतु ङसन्तमस्तु 'लः परस्मैपदम्' इतिवदादेशापेक्षा चेयं षष्ठी, लस्य य आदेशः स कर्मणि चेत्यादि । न चाविहितस्य लस्यानुवादो न संभवतीति वाच्यम्, 'वर्तमाने लट्' इत्यादिभिरेव लविधानात् । तथा च लस्य स्थाने य आदेशः स सकर्मकात्कर्मणि कर्तरि च स्यादकर्मकाद्भावे कर्तरि चेत्यर्थः सुलभ इति भट्टपादोक्तयोजनिका निर्बाधैवेति चेत् । अत्राहुः—ल इत्यस्य षष्ठ्यन्तत्वे आदेशानामेवार्थ उक्तः स्यात् । सोऽपि तिबादीनामेव न तु शत्रादीनाम्, तेषां द्विवचनादिसंज्ञाविरहात् । 'द्व्येकयोः–' इत्यादिनाऽस्यैकवाक्यताया भवद्भिरुक्तत्वात् । न च भवदुक्तरीत्या 'कर्तरि कृत्' इत्यनेनैव निर्वाहः, भावे कर्मणि च शानचो दौर्लभ्यापत्तेरुक्तत्वात् । न च शानज्विधिना सहात्मनेपदव्यवस्थापकानामेकवाक्यतया 'भावकर्मणोः' इत्यनेनेष्टसिद्धिः, सकर्मकादपि भावे शानजापत्तेः । किंच, जसन्तत्वे श्रुतेनैव संबन्धः, षष्ठ्यन्तत्वे त्वादेश इत्यध्याहाराद्गौरवमित्यादि । अत्रेदं बोध्यम्—'भावे चाकर्मकेभ्यः' इत्यकर्मकग्रहणेनाविवक्षितकर्माणोऽपि गृह्यन्ते । अत एव 'णेरणौ–' इति सूत्रे 'नेह पच्यते, नेह भुज्यते' इति भावे लकार इति हरदत्तः । अत्यन्ताविद्यमानकर्मकाणामेव ग्रहणम्, 'नेह पच्यते' इत्यादौ तु कर्मण्येव लकारः । गम्यमान-

लस्य। (३-४-७७) अधिकारोऽयम्। २१५४ **तिप्तस्झिसिप्थस्थमिब्वस्म-**

लस्य। 'धातोः' इत्यधिकृतम्। अकारो न विवक्षितः। तेन लिडादीनामपि संग्रहः। चूडाल इत्यादौ च नातिप्रसङ्गः। **तिप्तस्।** तिप्, तस्, झि, सिप्, थस्, थ, मिप्,

त्वाच्च कर्म न प्रयुज्यत इति मतान्तरम्। एतच्च 'गतिबुद्धि-' इत्यादिसूत्रे हरदत्तग्रन्थे स्पष्टम्। यत्तु कैश्चिदुक्तम्—'अविवक्षितकर्मणां भावे लकार इति प्रसादकृतोक्तं भाष्यादि-विरोधादयुक्तम्' इति तच्चिन्त्यम्, पक्षद्वयस्यापि भाष्यकैयटादिग्रन्थारूढत्वात्। प्रत्युत 'अविवक्षितकर्माणोऽप्यकर्मकाः' इति पक्ष एव प्रबलः। तथा हि 'समानकर्तृकेषु तुमुन्' इति सूत्रे इच्छता क्रियत इति भावे लडुक्तो हरदत्तेन, 'णेरध्ययने वृत्तम्' इति सूत्रे कैयटहरदत्तादिभिरपि नपुंसके भावे क्तोऽप्यकर्मकेभ्य एव, 'तयोरेव कृत्यक्त-' इत्यत्र क्तमात्रस्य ग्रहणात्तत्र भावे चाकर्मकेभ्य इत्यनुवर्तनात्, अन्यथा घटं कृतमिति प्रसज्येतेति सिद्धान्तितम्। एवं स्थिते यद्यविवक्षितकर्माणोऽपीह सूत्रेऽकर्मकग्रहणेन गृह्येरन्, तर्हि पीता गावो भुक्ता ब्राह्मणा इत्यादौ भावे क्तान्तादर्शआद्यजित्यादि निष्ठादि-प्रकरणे स्वयमेव वक्ष्यमाणम्, 'आदिकर्मणि क्तः' इति सूत्रे हरदत्तेन वक्ष्यमाणं कृतपूर्वीत्यत्र भावे क्त इति कैयटाद्युक्तं च कथं संगच्छेत, कथं च 'गतं तिरश्चीनम्' इत्यादिप्रयोगाः संगच्छेरन्। 'गतिबुद्धि-' इति सूत्रे त्वकर्मकग्रहणेनाविवक्षितकर्माणो न गृह्यन्त इत्युक्तम्, तेनाणौ यः कर्ता स ण्यन्ते कर्म न भवतीति देवदत्तेन पाचयतीति सिद्धम्। 'गत्यर्थाकर्मक-' इति सूत्रेऽपि न गृह्यन्ते, तेन हि सूत्रेण कर्तर्यपि क्तो विधीयत इति दत्तवान् पक्वान् इत्याद्यर्थे दत्तः पक्व इत्याद्यापत्तेः, इह सूत्रे त्वविवक्षित-कर्मणामकर्मकत्वेन ग्रहणे न कोऽपि दोष इत्यास्तां तावत्। **लस्य।** वर्णग्रहणे प्रत्ययग्रहणपरिभाषा, अर्थवद्ग्रहणपरिभाषा च न प्रवर्तते इति लुनाति, चूडाल इत्यादौ तिबाद्यादेशः कुतो न भवतीति चेद् अत्राहुः—'लः कर्मणि-' इति सूत्रे निर्दि-ष्टानां कर्त्राद्यर्थानामनुवृत्तेः कर्त्राद्यर्थे विहितस्य लकारस्य ग्रहणमिति। अतोऽपि तिबाद्यादेशानुवादेन कर्त्राद्यर्थविधिरिति कल्पना निरस्ता। लस्थानिकतिबादीनां कर्त्रा-द्यर्थविधानम्, कर्त्राद्यर्थे विहितस्य लस्य तिबादिविधानमित्यन्योन्याश्रयापत्तेः। यद्वा धातोरित्यधिकाराद्धातोर्विहितस्यैव लस्येह ग्रहणमिति नोक्तातिप्रसङ्गः। लस्येत्संज्ञा तु न भवति, फलाभावात्। च लित्स्वरः फलम्, णलो लित्त्वेन तदभावस्य ज्ञापनात्। नाप्यश्रवणमेव फलम्, तदुच्चारणस्यानर्थक्यापत्तेरादेशविधिनैवाश्रवणलाभाच्च। लस्य तिबादिस्थानित्वाभ्युपगमे तु 'लः परस्मैपदम्' इत्यादिस्वरसतः संगच्छत इति दिक्। **तिप्तस्झि।** समाहारे द्वन्द्वः। इटष्टकार आगमलिङ्गं न भवति, सप्तदशभिरादेशैः समभिव्याहारात्। किंतु 'इटोऽत्' इति विशेषणार्थः। एरदित्युच्यमाने **एधेवहि**

स्तातांझथासाथांध्वमिड्वहिमहिङ्। (३-४-७८) एतेऽष्टादश लादेशाः स्युः। २१५५ **लः परस्मैपदम्** । (१-४-९९) लादेशाः परस्मैपदसंज्ञाः स्युः। २१५६ **तङानावात्मनेपदम्** । (१-४-१००) तङ् प्रत्याहारः- तादिनवकं शानच्कानचौ चैतत्संज्ञानि स्युः। पूर्वसंज्ञापवादः। २१५७ **अनुदात्तङित आत्मनेपदम्** । (१-३-१२) अनुदात्तेत उपदेशे यो ङित्

वस्, मस्, त, आताम्, झ, थास्, आथाम्, ध्वम्, इट्, वहि, महिङ्। एषां समाहारद्वन्द्वात् प्रथमैकवचनम्। 'लस्य' इति स्थानषष्ठ्यन्तमधिकृतम्। तेन आदेश इति लभ्यते। फलितमाह **एत इति** । तसादौ रुत्वाभाव आर्षः। तिबादौ पकारानुबन्धयोजनं तु द्वेष्टीत्यादौ सार्वधातुकमपिदिति ङित्त्वनिवृत्त्यर्थम्। तदुदाहरणेषु स्पष्टीभविष्यति। **लः पर** । 'लः' इति स्थानषष्ठी। आदेश इत्यध्याहार्यम्। तदाह **लादेशा इति** । **तङानौ** । तङ् च आनश्चेति द्वन्द्वः। **प्रत्याहार इति** । त आतामिति तशब्दमारभ्य महिङिति ङकारेणेति शेषः, तदाह **तादिनवकमिति** । इह पूर्वसूत्राल्ल इत्यनुवर्तते। ततश्च आनग्रहणेन शानच्कानचावेव गृह्येते। न तु 'ताच्छील्यवयोवचनशक्तिषु चानश्' इति विहितश्चानशपि, तस्य लादेशत्वाभावात्। तेन परस्मैपदिभ्योऽपि चानश् सिध्यति निघ्नाना इत्यादौ। तदाह **शानच्कानचौ चेति** । **एतत्संज्ञानीति** । आत्मनेपदसंज्ञकानीत्यर्थः। **पूर्वसंज्ञेति** । परस्मैपदसंज्ञापवाद इत्यर्थः। एवं च तिबादिनवके परस्मैपदसंज्ञा पर्यवस्यति। अथ कस्माद्धातोः परस्मैपदम्, कस्मादात्मनेपदमित्याकाङ्क्षायामाह **अनुदात्तङितः** ।

एधेमहीत्यत्रापि स्यात्, वर्णग्रहणे प्रत्ययग्रहणार्थवद्ग्रहणपरिभाषयोरप्रवृत्तेः। केचित्तु—'इटोऽत्' इत्यत्र लिङ इत्यनुवर्तनाल्लिङादेशस्येवर्णस्येति सामानाधिकरण्येन व्याख्याने एधेवहि एधेमहीत्यादावतिप्रसङ्गो नास्त्येव। न हि तत्र इकारमात्रमादेशो भवति। तेन 'इटोऽत्' इत्यत्र टकारः स्पष्टप्रतिपत्त्यर्थ एवेत्याहुः। तच्चिन्त्यम्, इकारस्य विशेषणत्वे विशेषणेन तदन्तग्रहणादिवर्णान्तस्य लिङोऽत्स्यादित्यर्थप्रसक्त्या उक्तातिप्रसङ्गस्य तदवस्थत्वात्, वहिमहीत्यस्यापि स्थानिवत्त्वेन लिङ्त्वात्। महिङो ङकारस्तङ् तिङिति प्रत्याहारार्थः। स च समुदायानुबन्धो न त्ववयवानुबन्धो व्याख्यानात्। तेनेषेः कर्मणि आशीर्लिङि एषिषीमहीत्यत्र गुणनिषेधो न, तथा च व्रश्चेः पृच्छतेश्च कर्मणि लिटि च वव्रश्चिमहे पप्रच्छिमहे इत्यत्र 'ग्रहिज्या-' इति संप्रसारणं न। **तङानौ** । लस्येत्यस्यानुवृत्तेर्लादेश एवानो गृह्यते इत्याशयेनाह **शानच्कानचौ चेति** । तेन परस्मैपदिभ्योऽपि 'ताच्छील्यवयोवचन-' इति चानश् भवत्येव, कतीह निघ्नानाः। **अनुदात्तङितः** । अनुदात्तश्च ङश्च अनुदात्तङौ, तौ

तदन्ताच्च धातोर्लस्य स्थाने आत्मनेपदं स्यात्। **२१५८ स्वरितञितः कर्त्रभि-**

अनुदात्तश्च ङ् च अनुदात्तङौ, ताविती यस्य सः अनुदात्तङित्, तस्माद् अनुदात्तङितः। द्वन्द्वान्ते श्रूयमाण इच्छब्दः प्रत्येकं सम्बध्यते, अनुदात्तेतो ङितश्चेति लभ्यते। 'उपदेशेऽजनुनासिक इत्' इत्यस्माद् मण्डूकप्लुत्या 'उपदेशे' इत्यनुवृत्तं 'ङितः' इत्यनेन सम्बध्यते, न तु 'अनुदात्तेत' इत्यनेन। उपदेशादन्यत्र अनुदात्तस्येत्संज्ञाया अप्रसक्तत्वेनाव्यभिचारात्। 'भूवादयो धातवः' इत्यस्मान्मण्डूकप्लुत्या 'धातवः' इत्यनुवृत्तं पञ्चम्यां विपरिणतम् अनुदात्तेता ङिता च विशेष्यते। तत्रानुदात्तेदंशे तदन्तविधिः प्रयोजनाभावाद् ङिदंशे तदन्तविधिः। तदाह **अनुदात्तेत इत्यादिना। लस्य स्थान इति।** आत्मनेपदग्रहणलभ्यमिदम्, तिङां लादेशत्वनियमात्। 'उपदेशे' किम्? चुकुटिषति। अत्र 'गाङ्कुटादिभ्यः–' इति सन आतिदेशिकमेव

इतौ यस्य सोऽनुदात्तङित्। द्वन्द्वान्ते श्रूयमाण इच्छब्दः प्रत्येकं संबध्यते। तत्रानुदात्तांशे तदन्तविधिः फलाभावाद् अंशान्तर एव तदन्तग्रहणमित्याशयेनाह **अनुदात्तेत इत्यादि**। 'उपदेशेऽजनुनासिक–' इत्यतोऽनुवृत्तमुपदेशग्रहणमपि ङिदंश एव संबध्यते नान्यत्र, अव्यभिचारात्तदाह **उपदेशे यो ङिदिति। विशेष्यमन्तरेण** तदन्तविधिरिह दुर्लभ इत्यत आह **धातोरिति। लस्येति।** नन्विहानुवृत्तेरभावादुभयमपि दुर्लभं 'भूवादयः' इति सूत्रान्मण्डूकप्लुत्यानुवृत्तस्य धातव इत्यस्य विभक्तिविपरिणामात्कथंचिद्धातोरिति पदे लब्धेऽपि लस्येत्येतन्न लभ्यत इति चेत्। अत्राहुः—'इको झल्' इत्यत्र सना धातोरिवेहात्मनेपदेन लकारधात्वोराक्षेपो बोध्यः, तिङां लादेशत्वाल्लस्य च धातोर्विधानादिति। उपदेशे इति किम्, चुकुटिषति। 'गाङ्कुटादिभ्यः–' इति सन आतिदेशिकं ङित्त्वम्। धातोः किम्, चङ्क्रम्यां माभूत्, अदुद्रुवत्, अवोचत्। ननु लावस्थायामेव वृतादिभ्यः 'स्यतासी–' इत्यादिना स्यप्रत्यये कृते व्यवधानादात्मनेपदपरस्मैपदरूपनियमाप्रवृत्तावपि लकारसामान्याश्रयत्वेनान्तरङ्गत्वात्स्यप्रत्ययात्पूर्वमेव लस्य तिबादिषु सत्सु पक्षे परस्मैपदं पक्षे चात्मनेपदं सिध्यत्येवेति 'वृद्भ्यः स्यसनोः' इति सूत्रे स्यग्रहणं व्यर्थं सत् तेनैव स्यग्रहणेन 'विकरणेभ्यो नियमो बलीयान्' इति ज्ञापितम्। तेनानुदात्तेत्त्वाद्वर्तिष्यत इत्येवं नित्यमात्मनेपदे प्राप्ते 'वृद्भ्यः स्यसनोः' इति परस्मैपदमपि पक्षे भवति। तथा च विकरणेभ्यो नियमस्य बलीयस्त्वाच्चङ्क्रोर्न दोषो विकरणात्प्रागेवपरस्मैपदप्रवृत्तेरिति चेत्। सत्यम्, स्यग्रहणं विकरणव्यवधानेऽपि नियमप्रवृत्तिं ज्ञापयतीति पक्षे चङ्क्रोर्दोषः स्यादेव। अयं च पक्षः 'शदेः शितः' इति सूत्रे भाष्यकैयटयोः स्पष्टः। किं च तदन्तविधिलाभार्थमपि धातुग्रहणमावश्यकम्, तत्फलं तु 'धातोरेकाचः–' इत्यादिना यङि बोभूयते। ऋतेरीयङि ऋतीयते। शेते ह्नुते इत्यत्र

प्राये क्रियाफले। (१-३-७२) स्वरितेतो ञितश्च धातोरात्मनेपदं स्यात्कर्तृगामिनि क्रियाफले। २१५९ **शेषात्कर्तरि परस्मैपदम्।** (१-३-७८) आत्मनेपदनिमित्तहीनाद्धातोः कर्तरि परस्मैपदं स्यात्। २१६० **तिङस्त्रीणि त्रीणि प्रथममध्यमोत्तमाः।** (१-४-१०१) तिङ उभयोः पदयोस्त्रयस्त्रिकाः

ङित्त्वम्, नत्वौपदेशिकम्। 'धातोः' किम्? अदुदुवत्। अत्र णिश्रीति चङन्तान्नात्मनेपदम्। ङिर्देशे तदन्तविध्यभावे तु बोभूयत इत्यादौ 'सनाद्यन्ताः--' इति धातुसंज्ञकाद् यङन्तादात्मनेपदं न स्यात्। ङित इत्येवोक्तौ यङो ङित्त्वेऽपि तदन्तस्य धातोर्ङित्वाभावादात्मनेपदं न स्यात्। **स्वरितञितः।** स्वरितश्च ञ् च स्वरितञौ, तौ इतौ यस्य तस्मादिति बहुव्रीहिः। इच्छब्दः प्रत्येकं सम्बध्यते। तदाह **स्वरितेतो ञितश्चेति।** धातोरित्यनन्तरं लस्य स्थान इति शेषः। कर्तारमभिप्रैति गच्छतीति कर्त्रभिप्रायम्। कर्मण्यण्। तदाह **कर्तृगामिनीति।** एवं च 'होता याज्यया यजति, इत्यादौ यागफलस्य स्वर्गस्य यजमानगामित्वेन होतृगामित्वाभावाद् नात्मनेपदम्। तथा वेतनेन यज्ञदत्तभृतो देवदत्तः पचतीत्यत्रापि पाकफलस्य भोजनस्य पक्तृगामित्वाभावान्नात्मनेपदम्। दक्षिणादिलाभस्तु न फलम्, लोकतो वेदतो वा यदुद्देशेन क्रियाप्रवृत्तिः तस्यैवात्र क्रियाफलशब्देन विवक्षितत्वात्। कर्तृगामिफलकक्रियाव्रत्तेर्धातो रेत्यर्थः। आत्मनेपदं तु धात्वर्थफलस्य कर्तृगामित्वं द्योतयतीत्यलम्। **शेषात्कर्तरि।** 'अनुदात्तङित-' इति 'स्वरितञित-' इति चोक्ताद् आत्मनेपदविषयादन्यः शेषः, तदाह **आत्मनेपदनिमित्तहीनादिति।** अनेन भूधातोः कर्तरि लस्य परस्मैपदं सिद्धम्। तत्र तिबादिनवके युगपत् पर्यायेण एकद्वित्र्यादिकतिपयरूपेण वा प्राप्ते 'युष्मद्युपपदे समानाधिकरणे स्थानिन्यपि मध्यमः' 'अस्मद्युत्तमः' 'शेषे प्रथमः' इति व्यवस्थां वक्ष्यन् प्रथमादिसंज्ञां तावदाह **तिङस्त्रीणि त्रीणि।** तिङः षट् त्रिकाः, संज्ञास्तु तिस्रः इति यथासंख्यासम्भवादेकैकस्य त्रिकस्य तिसृषु संज्ञासु प्राप्तास्वाह **तिङ उभयोः पदयोरिति।** 'लः परस्मैपदम्' इत्यतः परस्मैपदमिति, 'तङानावात्मनेपदम्' इत्यत आत्मनेपदमिति

तु व्यपदेशिवद्भावेन ङिदन्तत्वम्। 'नमोवरिवश्चित्रङः-' इति क्यचि चित्रीयते इत्येतत्कथमिति चेत्, अत्राहुः—**अवयवेऽचरितार्थो** ङकारः क्यजन्तस्य विशेषणं भवति। तथा च समुदायानुबन्धो ङकार इति व्यपदेशिवद्भावेन ङिदन्तत्वं बोध्यमिति। **स्वरितञितः।** पूर्ववदिच्छब्दः प्रत्येकं संबध्यते। कर्तारमभिप्रैति गच्छतीति कर्त्रभिप्रायम्, कर्मण्यण्। **धातोरिति।** धातोर्लस्येत्यर्थः। लकारधात्वोराक्षेपः पूर्ववद्बोध्यः। **तिङस्त्रीणि त्रीणि।** तिङः षट् त्रिकाः संज्ञास्तु तिस्र इति यथासंख्यं न प्राप्नोतीत्यत आह **उभयोरिति।** परस्मैपदमात्मनेपदमिति चानुवर्तते।

क्रमादेतत्संज्ञाः स्युः । **२१६१ तान्येकवचनद्विवचनबहुवचनान्येकशः । (१-४-१०२)** लब्धप्रथमादिसंज्ञानि तिङस्त्रीणि त्रीणि वचनानि प्रत्येकमेक-

---

चानुवृत्तं षष्ठ्यन्ततया विपरिणम्यते। ततश्च परस्मैपदात्मनेपदयोरुभयोरपि प्रत्येकं त्रयस्त्रिकाः सन्तीति यथासंख्यं प्रथमादिसंज्ञाः प्रवर्तन्त इति भावः । प्रथमादिषु पुरुषसंज्ञा तु प्राचीनाचार्यशास्त्रसिद्धेति बोध्यम्। अथ प्रथमादिपुरुषेषु एकैकस्मिन् पुरुषे प्रत्ययत्रिकात्मके युगपत् पर्यायेण वा एकैकप्रत्यये प्राप्ते 'द्व्येकयोर्द्विवचनैकवचने' 'बहुषु बहुवचनम्' इति व्यवस्थार्थमेकवचनादिसंज्ञामाह **तान्येक** । तच्छब्देन पूर्व-सूत्रोपात्तानि प्रथममध्यमोत्तमाख्यानि तिङस्त्रीणि त्रीणि परामृश्यन्ते, तदाह **लब्ध प्रथमादिसंज्ञानीति**। एकश इत्यस्य विवरणं प्रत्येकमिति। 'संख्यैकवचनाच्च

तेन पदद्वये प्रत्येयं त्रयस्त्रिका इति यथासंख्यं संज्ञाः प्रवर्तन्त इति भावः। ननु प्रथमश्च प्रथमश्च प्रथमौ, मध्यमश्च मध्यमश्च मध्यमावित्येवं कृतैकशेषाणां प्रथमादीनां प्रथमौ च मध्यमौ च उत्तमौ च प्रथममध्यमोत्तमा इति द्वन्द्वेऽभ्युपगते त्रिकद्वयस्य त्रिकद्वयस्य यथासंख्यं प्रथममध्यमोत्तमसंज्ञाः स्युर्न त्वेकैकस्येति। एवं 'णलुत्तमो वा' इति सूत्रं विरुध्येत णल उत्तमसंज्ञकत्वालाभात्, ततश्च प्रथममध्यमोत्तमा इत्यत्र कृतद्वन्द्वानां प्रथममध्यमोत्तमाश्च प्रथममध्यमोत्तमाश्चेत्येकशेष आश्रीयताम्, तथा हि सति संज्ञा अपि षडिति परस्मैपदात्मनेपदग्रहणानुवृत्तिक्लेशं विनैवेष्टसिद्धिरिति चेत्। मैवम्, एकशेषाश्रयणे गौरवाद्वैयर्थ्याच्च त्वयापि परस्मैपदात्मनेपदग्रहणमनुवर्त्यमेव। अन्यथा शतृक्वस्वोः सावकाशा परस्मैपदसंज्ञा प्रथमादिसंज्ञया बाध्येत। ततश्च क्राम्यति क्रामती-त्यादौ 'क्रमः परस्मैपदेषु' इति दीर्घो न स्यात्। आक्रामन्नित्यादौ तस्य सावकाशत्वात्। यदि तु 'परस्मैपदानाम्–' इति विहितस्य णलो 'णलुत्तमो वा' इति णित्त्वविकल्प-विधानाज्ज्ञापकात्परस्मैपदसंज्ञा प्रथमादिसंज्ञया न बाध्यत इति ब्रूषे, तर्हि सुतरां प्रति-पत्तिगौरवम्। **तान्येकवचन**। तानीत्यस्य व्याख्यानं तु लब्धेत्यादि। अन्यथैक-संज्ञाधिकारात्प्रथमादिसंज्ञानामेकवचनादिसंज्ञानां च पर्यायः स्यात्। इष्टापत्तौ तु अत्तेर्लोटो 'मेर्निः' इति कृते एकत्वविवक्षायामुत्तमसंज्ञाभावाद् 'आडुत्तमस्य–' इत्यस्या-प्रवृत्त्या आन्नीत्यादिप्रयोगोऽपि साधुः स्यादिति भावः। **प्रत्येकमिति**। यत्तु प्राचा एकैकश इत्युक्तं तदयुक्तम्। शसैव वीप्साया उक्तत्वेन द्विर्वचनायोगात्, येन नाप्राप्ति-न्यायेन द्विर्वचनापवादः शसिति सिद्धान्तात्। तथा 'सुपः' इति सूत्रेऽप्येकैकश इति प्राचोक्तमयुक्तमेव। एतच्च मनोरमाग्रन्थानुरोधेनोक्तम्। अन्ये तु एकैकमेवैकैकशः स्वार्थे शस्, न त्वत्र वीप्सायाम्। न च स्वार्थे यः शस् स आकरग्रन्थान्नावगम्यत इति वाच्यम्, एकां कपिलामेकैकशः सहस्रकृत्वो दत्त्वेति भाष्यात् शसन्तस्य प्रत्येकमित्यर्थ-

वचनादिसंज्ञानि स्युः। **२१६२ युष्मद्युपपदे समानाधिकरणे स्थानिन्यपि मध्यमः।** (१-४-१०५) तिङ्वाच्यकारकवाचिनि युष्मदि अप्रयुज्यमाने प्रयुज्यमानेऽपि मध्यमः स्यात्। **२१६३ प्रहासे च मन्योपपदे मन्यतेरुत्तम एकवच्च।** (१-४-१०६) मन्यधातुरुपपदं यस्य धातोस्तस्मिन्प्रकृतिभूते सति मध्यमः स्यात्परिहासे गम्यमाने। मन्यतेस्तूत्तमः स्यात्स चैकार्थस्य वाचकः

वीप्सायाम्' इति शसिति भावः। **युष्मदि।** उपोच्चारितं पदमुपपदम्। युष्मदि समीपोच्चारिते सतीत्यर्थः। समानमेकमधिकरणं वाच्यं यस्येति विग्रहः। सामानाधिकरण्यं च युष्मदस्तिङः स्थानीभूतलकारेण विवक्षितम्। 'लः परस्मैपदम्' इत्यतस्तदनुवृत्तेः। तथा च फलितमाह **तिङ्वाच्यकारकवाचिनि युष्मदीति।** स्थानं प्रसङ्गः अस्यास्तीति स्थानी, तस्मिन् प्रसक्ते सतीत्यर्थः। प्रसङ्गश्च तदर्थविगतौ सत्यां वक्त्रा अप्रयोग एव भवति। तथा च स्थानिनीत्यनेन उपपदभूते युष्मदि प्रयोगं विना स्वार्थं बोधयति सतीत्यर्थः पर्यवस्यति, तदाह **अप्रयुज्यमान इति।** स्थानिनीत्यनुक्तौ युष्मद्युपपदे प्रयुज्यमान एव मध्यमः स्यात्। ततश्च राम पाहीत्यादौ अव्याप्तिः स्यात्। अपिना लब्धमाह **प्रयुज्यमानेऽपीति।** 'युष्मद्युपपदे स्थानिनि' इत्येवोक्तौ राम त्वं पाहीत्यादौ युष्मत्प्रयोगे मध्यमो न स्यात्। अतोऽपिग्रहणमिति भावः। अत्वं त्वं संपद्यत इत्यत्र तु न मध्यमपुरुषः, तत्र युष्मच्छब्दस्य गौणत्वात्। भवानागच्छतीत्यादौ भवच्छब्दयोगे तु न मध्यमपुरुषः, युष्मच्छब्दस्य संबोध्यैकविषयत्वात्, भवच्छब्दस्य तु स्वभावेन संबोध्यासंबोध्यसाधारणत्वादित्यलम्। **प्रहासे च।** वाक्यद्वयमिदं सूत्रम्। 'प्रहासे च मन्योपपदे' इति प्रथमं वाक्यम्। 'मध्यम' इत्यनुवर्तते। मनधातुः श्यन्विकरण उपपदं यस्येति बहुव्रीहिः। मन्यपदश्रवणबलाद् धाताविति विशेष्यं लभ्यते, तदाह **मन्यधातुरित्यादिना। तस्मिन् प्रकृतिभूते सतीति।** तस्माद्धातोर्लस्य स्थाने इत्यर्थः। **मध्यमः स्यादिति।** 'अस्मद्युपपदे–' इति शेषः। अस्मद्युत्तम इत्युत्तरसूत्रात्तदनुवृत्तेः। एवं च उत्तमपुरुषापवादोऽयं मध्यमविधिः। 'मन्यतेरुत्तम एकवच्च' इति द्वितीयं

कत्वेन कैयटेन व्याख्यानाच्च स्वार्थिकस्यापि शसोऽवगम्यमानत्वात्। ततश्चैकैकश इति प्राचोक्तमयुक्तमिति यदुक्तं तदेवायुक्तमित्याहुः। **युष्मदि।** समानाधिकरण इत्यस्य व्याख्यानं तिङ्वाच्यकारकवाचिनीति भिन्नप्रवृत्तिनिमित्तानां शब्दानामेकस्मिन्नर्थे वृत्तिः सामानाधिकरण्यम्। स्थानिनीत्यस्य व्याख्यानमप्रयुज्यमान इति। समानाधिकरणे किम्, त्वां पश्यति, त्वया क्रियते, तुभ्यं ददाति। **प्रहासे।** मन्योपपद इति सप्तम्यन्तस्यानुगुणत्वेन व्याचष्टे **तस्मिन्प्रकृतिभूते सतीति।** तस्माद्धातोर्लस्य स्थान

स्यात् । २१६४ अस्मद्युत्तमः । (१-४-१०७) तथाभूतेऽस्मद्युत्तमः स्यात् । २१६५ शेषे प्रथमः । (१-४-१०८) मध्यमोत्तमयोरविषये प्रथमः स्यात् । भू१ सत्तायाम् । कर्तृविवक्षायां भू ति इति स्थिते । २१६६ तिङ्शित्सार्वधातुकम् । (३-४-११३) तिङः शितश्च धात्वधिकारोक्ता एतत्संज्ञाः स्युः । २१६७ कर्तरि शप् । (३-१-६८) कर्त्रर्थे सार्वधातुके परे धातोः शप्

वाक्यम् तद्याचष्टे **मन्यतेरुत्तम, स्यादिति** । 'युष्मद्युपपदे' इति शेषः, पूर्वसूत्रात्तदनुवृत्तेः । **स चेति** । स मन्यतेरुत्तमपुरुषो द्वित्वबहुत्वयोरपि एकवचनं लभते इत्यर्थः । मध्यमोत्तमयोर्व्यत्यासार्थमिदम् । एतत्सर्वमनुपदमेवोदाहरणे स्पष्टीभविष्यति । **अस्मद्युत्तमः । तथाभूत इति** । तिङ्वाच्यकारकवाचिनि प्रयुज्यमाने अप्रयुज्यमाने चेत्यर्थः । **शेषे** । उक्तान्मध्यमोत्तमविषयादन्यः शेषः, तदाह **मध्यमोत्तमयोरविषय इति** । त्वम् अहं च पचाव इत्यत्र तु परत्वादुत्तमपुरुष एव । न तु मध्यमः । देवदत्तस्त्वं च पचथ इत्यत्रापि न प्रथमपुरुषः । युष्मदस्सत्त्वेन शेषत्वाभावादित्यलम् । **भू सत्तायामिति** । वर्तत इति शेषः । भ्वादिगणे प्रथमो धातुरयम् । तत्र भू इत्येव गणे पाठः । अर्थनिर्देशस्त्वाधुनिक इति वक्ष्यते । यद्यपि सत्ता जातिः, न क्रिया, तथापि आत्मधारणं सत्तेत्युच्यते । स्वरूपेणावस्थानमिति यावत् । **कर्तृविवक्षायामिति** । वर्तमानसत्तावृत्तेर्भूधातोः कर्तरि लटि आत्मनेपदनिमित्तहीनतया परस्मैपदे तिबादिनवके तत्रापि युष्मदस्मत्सामानाधिकरण्याभावात् प्रथमपुरुषत्रिके तत्रापि कर्तुरेकत्वविवक्षायां तिपि सति, भू ति इति स्थिते प्रक्रिया वक्ष्यत इत्यर्थः । तत्र सार्वधातुककार्यं वक्ष्यन् सार्वधातुकसंज्ञामाह **तिङ्शित्** । 'धातोः' इत्यधिकृतम्, तदाह **धात्वधिकारोक्ता इति** । तेन हरीनित्यत्र शसः सार्वधातुकत्वं न । अन्यथा 'तिङ्शित्सार्वधातुकम्' इति शसः सार्वधातुकत्वात् सार्वधातुकमपिदिति ङित्वे 'घेर्ङिति' इति गुणः स्यात् । **कर्तरि शप्** । 'सार्वधातुके यक्' इत्यस्मात् सार्वधातुक इत्यनुवर्तते । 'धातोरेकाचो हलादेः—' इत्यस्माद्धातोरिति । तदाह **कर्त्रर्थे इत्यादिना** । तिङि परे धातोर्विहितानां प्रत्ययानां शबादीनां विकरणसंज्ञा प्राची-

---

इत्यर्थः । **तथाभूत इति** । तिङ्वाच्यकारकवाचिनि प्रयुज्यमानेऽप्रयुज्यमाने चेत्यर्थः । **तिङ्शित्** । धात्वधिकारोक्ता इति किम्, हरीन् । शसः 'सार्वधातुकमपित्' इति ङित्वे 'घेर्ङिति' इति गुणः स्यात्, लिह्वः श्रिय इत्यादिशसन्तेषु 'सार्वधातुके यक्' इति यक् च स्यात् । केचित्तु वारिणीत्यत्र नुमि कृतेऽपि लघूपधगुणः स्यादित्याहुः । तन्न, क्ङितीति निषेधात्, इगन्तत्वप्रयुक्तस्य नुमो गुणाप्रयोजकत्वे सन्निपातपरिभाषाविरोधाच्च । **कर्तरि शप्** । 'सार्वधातुके यक्' इत्यतः सार्वधातुक इत्यनुवर्तते, 'धातो-

स्यात् । शपाविती । २१६८ सार्वधातुकार्धधातुकयोः। (७-३-८४) अनयोः परयोरिगन्तस्याङ्गस्य गुणः स्यात् । अवादेशः । भवति । भवतः । २१६९ झोऽन्तः । (७-१-३) प्रत्ययावयवस्य झस्यान्तादेशः स्यात् । 'अतो

नाचार्यसिद्धा । **शपाविताविति** । शकारपकारौ 'लशक्वतद्धिते' इति 'हलन्त्यम्' इति चेत्संज्ञकावित्यर्थः। ततश्च शपि शकारपकारयोः लोपे अकारमात्रं शिष्यत इत्यर्थः। भू अ ति इति स्थिते **सार्वधातुकार्ध** । 'इको गुणवृद्धी' इति परिभाषया 'इक' इत्युपस्थितेन 'अङ्गस्य' इत्यधिकृतं विशेष्यते । तदन्तविधिः । 'मिदेर्गुणः' इत्यस्माद् 'गुण' इत्यनुवर्तते, तदाह **अनयोरित्यादिना** । तथा च ऊकारस्य गुण ओकारः। **अवादेश इति** । ओकारस्येति शेषः । तथा च परिनिष्ठितं रूपमाह **भवतीति** । **भवत इति** । कर्तृद्वित्वविवक्षायां भूधातोर्लटः तसादेशे शपि गुणे अवादेशे सकारस्य रुत्वविसर्गाविति भावः । कर्तृबहुत्वविवक्षायां भूधातोर्लटो झि इत्यादेशे शपि गुणे अवादेशे च कृते **झोऽन्तः** । झः अन्त इति च्छेदः । झः इति षष्ठ्यन्तम् । आदेशे तकाराद् अकार उच्चारणार्थः । 'आयनेयी–' इति सूत्रात् प्रत्ययग्रहणमनुवर्तते, न त्वादिग्रहणमपि, अस्वरितत्वात् । अनुवृत्तं च प्रत्ययग्रहणमवयवषष्ठ्यन्तमाश्रीयते, तदाह **प्रत्ययावयवस्येति** । **झस्य** । झकारस्येत्यर्थः । **अन्तादेशः स्यादिति** ।

रेकाचः–' इति सूत्राद्धातोरिति च, तदाह **कर्त्रर्थे इत्यादि** । **झोऽन्तः** । तकारदकार उच्चारणार्थः । 'आयनेयीनी–' इति सूत्रात्प्रत्ययग्रहणमनुवर्तते न त्वादिग्रहणम्, एकदेशे स्वरितत्वप्रतिज्ञानात् । तस्याप्यनुवृत्तौ तु शयान्ते इति न सिध्येत् । शीङो 'लेटोऽडाटौ' इत्यन्तरङ्गत्वादन्तादेशात्प्रागाटि कृते झस्यादित्वाभावात्, तदेतदाह **प्रत्ययावयवस्येति** । प्राचा तु प्रत्ययादेर्झस्येत्युक्तं तदनेन प्रत्युक्तम् । इह मनोरमायामादिग्रहणं निवृत्तमित्युक्तम्, तदापाततः, अन्यत्राप्रवृत्तस्यादिग्रहणस्य निवृत्तत्वयोगात्, निवृत्तमित्यस्यानुवृत्तमित्यर्थ इति वा कथंचिद्व्याख्येयम् । यत्तु प्रत्ययादेरिति ग्रन्थसमर्थनाय व्याचक्षते—आडागमे कृते तत्सहितोऽपि प्रत्ययोऽस्तु नाम, न तु तत्सहित एव प्रत्यय इति नियमोऽस्तीति । तन्न, अवयवविनिर्मुक्तस्यावयवित्वायोगात् । अन्यथा भूयास्तामित्यादौ तामादीनामिडागमापत्तेः । ननु अङ्गात्परस्य प्रत्ययस्येटो यासुडन्तं तु नाङ्गमिति चेत् । न, आगमविनिर्मुक्तस्यापि प्रत्ययत्वमिति वदतां मते भवामि भविष्यामीत्यादौ विकरणान्तस्येव तदादिग्रहणबलेन यासुडन्तस्याप्यङ्गताया दुर्वारत्वात्। किं च लविषीयेत्यत्र विशेषविहितत्वात्सीयुटि कृते लिङः स्थाने इट् तस्यागमेनादित्वविघातात्प्रत्ययाद्युदात्तत्वं न प्राप्नोतीत्याशङ्क्य प्रत्ययस्वरे कर्तव्ये आगमा अविद्यमानवदित्यतिदेशः 'आद्युदात्तश्च' इति सूत्रे भाष्यादौ स्वीकृतः। न चैत केवलस्यापि प्रत्ययत्वे

गुणे' (सू १११)। भवन्ति । भवसि भवथः भवथ। **२१७० अतो दीर्घो यञि । (७-३-१०१)** अदन्तस्याङ्गस्य दीर्घः स्याद्यञादौ सार्वधातुके परे । भवामि भवावः भवामः। स भवति। तौ भवतः। ते भवन्ति। त्वं भवसि।

अन्त् इत्ययमादेशः स्यादित्यर्थः। 'प्रत्ययावयवस्य' इति किम् ? उज्झिता । अत्र धात्ववयवस्य झकारस्य न भवति। आदिग्रहणानुवृत्तौ तु शयान्तै इति न सिध्यति। अन्तादेशात्प्रागेवान्तरङ्गत्वाल्लेटोऽडाटावित्याटि कृते झकारस्य प्रत्ययादित्वाभावाद् इति भाष्ये स्पष्टम्। एवं च भव झि इत्यत्र झकारस्य अन्त् इत्यादेशे, भव अन्ति इति स्थिते, 'अतो गुणे' इति द्वयोरकारयोः सवर्णदीर्घापवादे पररूपे कृते, भवन्तीति रूपमित्यर्थः। अन्तादेशे प्रथमाकारोच्चारणं तु लुग्विकरणे द्विषन्तीत्यादौ अकारश्रवणार्थम्। **भवसीति**। मध्यमपुरुषैकवचने सिपि शपि गुणे अवादेशे रूपम्। **भवथ इति**। मध्यमपुरुषद्विवचने थसि शपि गुणे अवादेशे रुत्वविसर्गयोश्च रूपम्। 'न विभक्तौ तुस्माः' इति सस्य नेत्वम्। **भवथेति**। मध्यमपुरुषबहुवचने थादेशे शपि गुणे अवादेशे रूपम्। उत्तमपुरुषैकवचनेऽपि शपि गुणे अवादेशे भव मि इति स्थिते **अतो दीर्घो यञि**। 'अङ्गस्य' इत्यधिकृतम् अता विशेष्यते। तदन्तविधिः। 'तुरुस्तुशम्यम–' इत्यतः सार्वधातुके इत्यनुवृत्तं यञा विशेष्यते। तदादिविधिः। तदाह **अदन्तस्येत्यादिना। भवामीति**। न च भूधातोर्विहितलादेशं प्रति

युज्यते, न च तन्मते आगमसहितस्यापि प्रत्ययत्वादिकारस्याप्युदात्तः स्यात्, तद्वारणाय प्रत्ययस्वरे कर्तव्य इत्यादिग्रन्थः स्वीकर्तव्य एवेति नास्त्येवाकरग्रन्थविरोध इति वाच्यम्, 'आगमा अनुदात्ताः' इति विशेषवचनेनागमस्याप्यनुदात्तत्वे कृते आद्युदात्तत्वस्य तत्राप्रवृत्तेरिति दिक्। **झस्येति**। झकारादकार उच्चारणार्थः। **अतो गुण इति**। 'अतो दीर्घो यञि' इति तु न प्रवर्तते, स्थान्यलादेशविधौ स्थानिवत्त्वनिषेधादिति भावः। **अतो दीर्घो**। 'तुरुस्तुशम्यमः–' इति सूत्रात्सार्वधातुक इत्यनुवर्तते सार्वधातुके किम्, केशवः, अङ्गना। अत आत् इति वक्तव्ये दीर्घग्रहणं दीर्घ एव यथा स्यादित्येवमर्थम्। अन्यथाऽपात्तीरोदनं देवदत्त, ननु पचामि भोरित्यत्रानन्त्यस्यापि प्रश्नाख्यानयोरिति प्लुतः स्यात्। केचित्तु— अत आदिति सुवचम्, तपरकरणसामर्थ्याद् विकारनिवृत्तिर्भवेदिति प्लुतस्यापि प्रसङ्गात्, उदात्तस्थाने उदात्त आकारः, अनुदात्तस्थानेऽनुदात्त आकार इत्यादि तु 'स्थानेऽन्तरतमः' इत्यनेनैव सिद्धम्। अतएव 'वृषाकप्यग्नि–' इति सूत्रे वृषाकपिशब्दो मध्योदात्त एक एवोदात्तत्वं प्रयोजयति, अन्यादिषु तु 'स्थानेऽन्तरतमः' इत्येव सिद्धमिति मनोरमादावुक्तम्। ततश्च प्रयोजनाभावात्तपरकरणमनणि विध्यर्थमिति नाशङ्कनीयमेव। यदि तु 'हल्ङ्याब्भ्यः–' इत्यत्र आ

युवां भवथः। यूयं भवथ। अहं भवामि। आवां भवावः। वयं भवामः। एहि मन्य ओदनं भोक्ष्यस इति भुक्तः सोऽतिथिभिः। एतमेत वा मन्ये ओदनं भोक्ष्येथे भोक्ष्यध्व इत्यादि। भोक्ष्ये, भोक्ष्यावहे, भोक्ष्यामहे। मन्यसे, मन्येथे, मन्यध्वे इत्यादिरर्थः। 'युष्मद्युपपदे-' (सू २१६२) इत्याद्यनुवर्तते। तेनेह न — एतु भवान्मन्यते ओदनं भोक्ष्य इति भुक्तः सोऽतिथिभिः। 'प्रहासे' किम्–यथार्थकथने मा भूत्। एहि मन्यसे ओदनं भोक्ष्य इति भुक्तः सोऽतिथिभिः।

२१७१ परोक्षे लिट्। (३-२-११५) भूतानद्यतनपरोक्षार्थवृत्तेर्धातोर्लिट्

भूधातुरेवाङ्गम्, न तु भवेति विकरणान्तमिति वाच्यम्, 'यस्मात्प्रत्ययविधिस्तदादि प्रत्ययेऽङ्गम्' इत्यत्र तदादिग्रहणेन विकरणविशिष्टस्यापि अङ्गत्वात्। **भवावः भवाम इति**। लस्य वसि मसि च शपि गुणे अवादेशे अतो दीर्घे रुत्वे विसर्गे च रूपे। न विभक्ताविति सस्य नेत्त्वम्। अथ प्रथममध्यमोत्तमपुरुषव्यवस्थामुक्तां स्मारयितुमाह **स भवतीत्यादि**। अथ 'प्रहासे च–' इति सूत्रस्योदाहरति **एहीति**। सर्वेषु भुक्तवत्सु भोक्तुमागतं जामातरं प्रति परिहासाय प्रवृत्तमिदं वाक्यम्। भो जामातः, एहि आगच्छ, ओदनं भोक्ष्ये इति त्वं मन्यसे, नैतद्युक्तमित्यर्थः। कुत इत्यत आह **भुक्तः सोऽतिथिभिरिति**। स ओदनः अतिथिभिर्भक्षित इत्यर्थः। अथ भुजेरुत्तमपुरुषे प्राप्ते मध्यमः पुरुषः। मन्यतेस्तु मध्यमपुरुषे प्राप्ते उत्तमः पुरुषः। **एतं एत वेति**। हे जामातरौ आगच्छतम् ओदनं भोक्ष्यावह इति मन्येथे इति, भो जामातरः ओदनं भोक्ष्यामह इति मन्यध्वे इति चार्थः। अत्रोभयत्रापि भुजेरुत्तमे प्राप्ते मध्यमः। मन्यतेस्तु मध्यमे प्राप्ते उत्तमः। द्वित्वबहुत्वयोरेकवचनं च। **इत्यादीति**। एहि एतं एत वा मन्ये जलं पास्यसि पास्यथः पास्यथ इत्यादिसंग्रहः। मन्ये इत्युत्तमपुरुषैकवचनान्तं व्याचष्टे **मन्यस इत्यादिना। अनुवर्तत इति**। 'प्रहासे च' इति सूत्र इति शेषः। **एतु भवानिति**। युष्मद्भवतोः पर्यायत्वाभावस्यानुपदमेवोक्तत्वादिति भावः। इति लट् प्रक्रिया। **परोक्षे लिट्**। 'अनद्यतने लङ्' इत्यस्मादनद्यतन इत्यनुवर्तते। 'भूते' इत्यधिकृतम्। परोक्षत्वं धात्वर्थविशेषणम्। तदाह **भूतान-**

आबिति वदत आ इत्यत्र आ आ इति प्रश्लेषः क्रियते तदा तपरकरणं विनापीष्टसिद्धिरित्याहुः। 'प्रहासे च–' इति सूत्रस्योदाहरणमाह **एहि मन्य इति**। ओदनं भोक्ष्य इति त्वं मन्यस इत्यर्थः। **एतं एत वेति**। एतं मन्ये ओदनं भोक्ष्येथे, एत मन्ये ओदनं भोक्ष्यध्वे इत्यन्वयः। भोक्ष्यावहे इति युवां मन्येथे, भोक्ष्यामह इति यूयं मन्यध्वे इति क्रमेणार्थः। **परोक्षे लिट्**। यद्यप्यधिश्रयणादिव्यापाररूपा क्रिया सर्वा परोक्षैव। उक्तं हि भाष्ये 'क्रिया नामेयमत्यन्तापरिदृष्टा पूर्वापरीभूतावयवा न

स्यात् । लस्य तिबादयः । **२१७२ लिट् च । (३-४-११५)** लिडादेश-स्तिङार्धधातुकसंज्ञ एव स्यान्न तु सार्वधातुकसंज्ञः । तेन शबादयो न । **२१७३ परस्मैपदानां णलतुसुस्थलथुसणल्वमाः । (३-४-८२)** लिटस्तिबादीनां नवानां णलादयो नव स्युः । भू अ इति स्थिते । **२१७४ भुवो वुग्लुङ्-**

द्यतनेत्यादिना । अतीतरात्रेरन्त्ययामेन आगामिरात्रेराद्ययामेन सहितो दिवसः अद्यतन इति लुङ्सूत्रभाष्ये कैयटे स्थितम् । परोक्षत्वं तु वर्षशतवृत्तत्वमित्येके । वर्षसहस्रवृत्तत्वमित्यपरे । द्व्यहवृत्तत्वं त्र्यहवृत्तत्वं चेत्यन्ये । कुड्यकटाद्यन्तरितत्वमितीतरे । एते पक्षा भाष्ये स्थिताः । तत्र प्रयोक्तुरिन्द्रियागोचरत्वं परोक्षत्वमित्येव सर्वसम्मत-मित्यलम् । **लस्य तिबादय इति ।** तिबादिनवकमित्यर्थः । **लिट् च ।** लिडिति लुप्तस्थानषष्ठ्यन्तम् । 'तिङ्शित्सार्वधातुकम्' इत्यस्मात् तिङित्यनुवर्तते । 'आर्धधातुकं शेषः' इत्यस्मादार्धधातुकमिति । तदाह **लिडादेशस्तिङिति ।** एकसंज्ञाधिकारबहि-र्भूतत्वात् सार्वधातुकसंज्ञाया अपि समावेशे प्राप्ते आह **आर्धधातुकसंज्ञ एवेति ।** 'लङ्शाकटायनस्यैव' इति सूत्रादेवकारानुवृत्तेरिति भावः । **तेनेति ।** सार्वधातु-कत्वाभावेन तन्निमित्ताः शप्श्यन्नादयो न भवन्तीत्यर्थः । **परस्मैपदानाम् ।** 'लिटस्तझयोः–' इत्यस्माद् लिट इत्यनुवृत्तिमभिप्रेत्याह **लिटस्तिबादीनामिति ।**

शक्या पिण्डीभूता निदर्शयितुमिति, तथापि तदनुकूलशक्तिमतां व्यापाराविष्टानां साधनानां पारोक्ष्यमिह विवक्षितम्, तेन क्रियानाविष्टसाधनमात्रप्रत्यक्षेऽपि लिड् भवत्येव, अयं पपाच त्वं पेचिथ । ननु क्रियाशब्दवाच्यधिश्रयणाधः-श्रयणादिव्यापाराणां युगपत्प्रत्यक्षाविषयत्वेऽपि क्रमशः प्रत्यक्षविषयत्वमस्ति, यत्र तु क्रमशोऽपि प्रत्यक्षविषयत्वं नास्ति तत्र हि पारोक्ष्यं क्रियायाः । ततश्च लिडुत्तमपुरुषो दुर्लभ इति चेत् । अत्राहुः—स्वव्यापारस्यापि वर्तमानतादशायां व्यासङ्गादिना स्वयमप्रतिसंधाने ततः कार्येणानुमितौ भवत्येव—'बहु जगद पुरस्तात्तस्य मत्ता किला-हम्' इतिवदिति । **लिट् च । आर्धधातुकसंज्ञ एवेति ।** 'लङः शाकटायनस्य–' इति सूत्रादेवकारोऽनुवर्तत इति भावः । **परस्मैपदानाम् ।** अत्र थशब्दस्याकारो विधीयमानोऽन्तस्य प्राप्नोति । न चाकारस्याकारविधौ निरर्थकत्वमिति वाच्यम्, यथासंख्यसंपादनेन कृतार्थत्वात् । अत्राहुः—धातोरित्यधिकाराद् 'आदेः परस्य' इति व्यञ्जनमात्रस्य कृते, द्वयोः 'अतो गुणे' इति पररूपम् । यद्वा द्वयोरकारयोः पररूपेण सूत्रे निर्देशस्तथा चानेकाल्त्वात्सर्वादेशे सिद्धमिष्टमिति । ननु सुबन्तानामेव द्वन्द्वस्तत्र त्वकारद्वयकल्पनायां सवर्णदीर्घ एव स्यादिति चेत् । मैवम्, आदेशानां स्थान्यर्थेनैवार्थ-वत्त्वात् थशब्दस्य विधीयमानमकारद्वयं प्रत्येकमर्थवन्न भवतीति समुदितस्य प्रातिपदि-

लिटोः । (६-४-८८) भुवो वुगागमः स्यात् लुङ्लिटोरचि । नित्यत्वाद्

णलादय इति । णल्, अतुस्, उस्, थल्, अथुस्, अ, णल्, व, म, इत्येते नव यथासंख्यं स्युरित्यर्थः । तत्र तिपो णल् सर्वादेशः । न च णकारलकारयोः 'चुटू' इति 'हलन्त्यम्' इति च इत्संज्ञकत्वाल्लोपे कथमनेकाल्त्वमिति वाच्यम्, सर्वादेशत्वात्प्राग् णलः प्रत्ययत्वाभावेन 'चुटू' इत्यस्याप्रवृत्तेः । णित्वं तु जुहावेत्यादौ वृद्ध्यर्थम् । लित्वं तु लित्स्वरार्थम् । ननु मध्यमपुरुषबहुवचनथस्य विधीयमानः अकारः 'अलोऽन्त्यस्य' इत्यन्त्यस्य स्यात् । अकारस्य अकारविधिस्तु यथासंख्यापादनार्थ इति चेत्, सत्यम् । द्वयोरकारयोः पररूपेण अ इति सूत्रे निर्देशादनेकाल्त्वात् सर्वादेशत्वमिति भाष्ये स्पष्टम् । न च अतुसादीनामादेशत्वात् पूर्वं विभक्तित्वाभावेन 'न विभक्तौ-' इति निषेधाभावात् सकारस्येत्वं दुर्वारमिति वाच्यम्, सकारादुपरि सकारान्तरस्य संयोगान्तलोपेन लुप्ततया श्रूयमाणसकारस्योपदेशेऽन्त्यत्वाभावादित्यलम् । **भुवो वुक् । अचीति** । 'अचि श्नुधातु-' इत्यतस्तदनुवृत्तेरिति भावः । 'अचि' इति किम् ? अभूत् । ननु णलि परत्वाद् वुकं बाधित्वा 'अचो ञ्णिति' इति वृद्धिः स्यात् । बभूविथेत्यत्र तु 'सार्वधातुकार्धधातुकयोः' इति गुणः स्यादित्यत आह **नित्यत्वादिति** । कृतयोरपि गुणवृद्ध्योरेकदेशविकृतन्यायाद् वुक् प्रवर्तते । अकृतयोरपि प्रवर्तते । ततश्च

कत्वे न 'अतो गुणे' इति पररूपस्यैव प्रवृत्तेः । **भुवो वुक्** । 'अचि श्नुधातु-' इति सूत्रादचीत्यनुवर्तते तदाह **लुङ्लिटोरचीति** । अचीति किम्, अभूत्, अभूः इत्यत्र वुकि सति 'लोपो व्योः-' इति लोपं बाधित्वा परत्वाद्धल्ङ्यादिलोपः स्यात् । ननु हल्ङ्यादिलोपादन्तरङ्गत्वाद् 'लोपो व्योः-' इति लोप एव भविष्यति । तथा च मव्यतेर्यङ्लुगन्ताल्लङि तिप्सिपोः अमामन् अमाम इत्यत्र व्योर्लोप एव माधवादिभिः स्वीकृतः । एवं चाज्ग्रहणम् 'ऊदुपधाया-' इत्युत्तरार्थमनुवर्तमानमिहाप्युपरञ्जकतया वृत्तिकारादिभिर्योजितम्, न त्वावश्यकतयेत्येव निष्कर्ष उचित इति चेत् । अत्राहुः— 'भुवो वुक्-' इत्यस्याङ्गत्वाद्बह्वपेक्षत्वेन हल्ङ्यादिलोपस्येव वुकोऽपि बहिरङ्गतया असिद्धत्वे सति वलिलोपस्य प्राप्तेरेवाभावादज्ग्रहणमिहार्थमपीत्येव युक्तमिति । अयं च शङ्काग्रन्थः समाधानग्रन्थश्च मनोरमायां स्थितः । अत्र नव्याः—मव्यतेर्यङ्लुगन्त एव नास्ति, अमामदित्यादि रूपं तु दूरादपास्तमेव, यकारवकारान्तानामूठ्भाविनां यङ्लुग् नास्तीति 'च्छ्वोः शूड्-' इति सूत्रे भाष्ये ध्वनितम्, कैयटेन स्पष्टीकृतम् । इदं च च्छ्वोरिति यत्रोठ् तद्विषयकं 'ज्वरत्वर-' इत्यूठ्भाविनोः स्रिविमव्योस्तु यङ्लुगस्त्येवेति न्याय्यं माधवादिसंमतं च । 'मव्य बन्धने' अयं यान्त ऊठ्भावीति मूले वक्ष्यमाणत्वात् । तथा च तद्ग्रन्थेन सहात्रत्यमनोरमाग्रन्थो विरुध्यत इत्याहुः । यदि

कुग्गुणवृद्धी बाधते । **२१७५ एकाचो द्वे प्रथमस्य । (६-१-१) २१७६ अजादेर्द्वितीयस्य । (६-१-२)** इत्यधिकृत्य । **२१७७ लिटि धातोरनभ्यासस्य । (६-१-८)** लिटि परेऽनभ्यासधात्ववयवस्यैकाचः प्रथमस्य द्वे स्तः, आदिभूतादचः परस्य तु द्वितीयस्य । भूव् भूव् अ इति स्थिते । २१७८

'कृताकृतप्रसङ्गी यो विधिः स नित्यः' इति न्यायेन वुक् नित्यः सन्, गुणवृद्धी बाधते इत्यर्थः । वुकि ककार इत्, उकार उच्चारणार्थः । कित्त्वादन्तावयवः । भूव् अ इति स्थिते । **एकाचः । अजादेः । इत्यधिकृत्येति ।** षष्ठाध्यायारम्भे द्वे इमे सूत्रे । ते च न विधायके, अतिप्रसङ्गात् । किन्तु 'ष्यङः सम्प्रसारणम्' इत्यतः प्राग् अनुवर्तेते एवेति भावः । **लिटि धातोः ।** 'एकाचो द्वे प्रथमस्य' इत्यधिकृतम् । धातोरित्यवयवषष्ठी । तदाह **धात्ववयवस्येति ।** एकाच इति प्रथमस्येति च धात्ववयवस्य विशेषणम् । एकः अच् यस्येति तद्गुणसंविज्ञानो बहुव्रीहिः । तथा च लिटि परे अभ्यासभिन्नस्यैकाच्कस्य प्रथमस्य धात्ववयवस्य द्वे उच्चारणे स्त इत्यर्थः । एकाच इत्यत्र कर्मधारयाश्रयणे तु पपाचेत्यादि न सिध्येदिति भाष्ये स्पष्टम् । 'अजादेर्द्वितीयस्य' इत्यप्यधिकृतम् । तत्राचासावादिश्च अजादिः, तस्मादिति कर्मधारयात् पञ्चमी, तदाह **आदिभूतादचः परस्य तु द्वितीयस्येति ।** एकाच इति शेषः । अजादिधात्ववयवस्य एकाचश्चेद् द्वित्वम्, तर्हि द्वितीयस्यैवैकाचो द्वित्वम्, न तु प्रथमस्येति यावत् । अत्र द्वे इत्यनन्तरमुच्चारणे इत्यध्याहृत्यैकाचः प्रथमस्येति कृद्योगलक्षणषष्ठीं चाश्रित्य द्विः प्रयोग एवात्र विधीयते । न स्थानषष्ठीमाश्रित्यादेशपक्ष इति प्रकृतसूत्रभाष्ये प्रपञ्चितम् । 'आदेशप्रत्यययोः' इति सूत्रभाष्येऽपि द्विः प्रयोगपक्ष एवोक्तः । तदिह विस्तरभयान्न लिखितम् । पपाच इयायेत्यादौ प्रथमत्वमेकाच्कत्वं च व्यपदेशिवत्त्वेन बोध्यम् । अजादेरिति बहुव्रीह्याश्रयणे तु, इन्द्रमात्मन इच्छति इन्द्रीयति इन्द्रीयितुमिच्छति इन्दिद्रीयिषतीत्यादौ 'न न्द्राः संयोगादयः' इति दकारस्य द्वित्वनिषेधश्च स्यात्, तत्राजादेरित्यनुवृत्तेः । 'धातोः' इति किम्? तदभावे हि लिटि परे यः प्रथम एकाच् तस्य द्वे इत्यर्थः स्यात् । एवं सति पपाचेत्यादावेव स्यात् । न तु जजागारेत्यादाविति भाष्ये स्पष्टम् । न च पपाचेत्यादौ 'लिटि धातोः–' इति द्वित्वे कृते लक्ष्ये लक्षणस्येति न्यायेन पुनर्द्वित्वस्याप्रसक्तेरनभ्यासग्रहणं व्यर्थमिति वाच्यम्,

तु भवतेर्वुक्लुगन्तादिति मनोरमायां पठ्येत तदा तत्र पूर्वापरग्रन्थविरोधो नास्तीति दिक् । **अजादेरिति ।** यदि बहुव्रीहिः षष्ठी तदा इन्द्रमात्मन इच्छति इन्द्रीयति, इन्द्रीयितुमिच्छति इन्दिद्रीयिषति इत्यत्र दकारस्य 'न न्द्राः–' इति द्वित्वनिषेधः स्यात्, किंतु अचासावादिश्चाजादिस्तस्मादिति कर्मधारयादेषा पञ्चमी, तदाह **आदिभूतादचः**

पूर्वोऽभ्यासः । (६-१-४) अत्र ये द्वे विहिते तयोः पूर्वोऽभ्याससंज्ञः स्यात्। २१७९ **हलादिः शेषः** । (७-४-६०) अभ्यासस्यादिर्हल् शिष्यतेऽन्ये हलो लुप्यन्ते। इति वलोपः। २१८० **ह्रस्वः** । (७-४-५९) अभ्यासस्याचो

यङन्तात् 'सन्यङोः' इति यङ्निमित्तकद्वित्वविशिष्टात् सनि सन्निमित्तकद्वित्वनिवृत्तये सन्नन्तात् 'सन्यङोः' इति कृतद्वित्वाण्णिचि लुङि चङि कृते 'चङि' इति द्वित्वनिवृत्तये चानभ्यासग्रहणस्यावश्यकत्वात्। भाष्ये तु 'कृष्णो नोनाव वृषभो यदीदम्' इत्यादौ नुधातोर्यङन्तात् 'सन्यङोः' इति कृतद्वित्वाद् नोनूय इत्यस्माद् लिटि 'कास्प्रत्ययादाममन्त्रे लिटि' इति मन्त्रपर्युदासादामभावे 'यस्य हलः' इति यकारलोपे अतो लोपे तिपो णलि वृद्धावावादेशे नोनावेत्यत्र 'लिटि धातोः-' इति द्वित्वनिवृत्तये अनभ्यासग्रहणमित्युक्त्वा 'अनभ्यासग्रहणमनर्थकं छन्दसि वा वचनात्' इत्युक्तम्। यङन्तात् सनि सन्नन्ताण्णिचि चङि च प्रयोगो लोके नास्त्येवेति तदाशय इति शब्देन्दुशेखरे स्पष्टम्। प्रकृते च भूव् अ इत्यत्र चत्वार एकाचः। तत्र भू इति प्रथमः, ऊव् इति द्वितीयः, ऊ इति व्यपदेशिवद्भावेन तृतीय एकाच्, भूव् इति समुदायस्तु चतुर्थः। तत्र समुदाये द्विरुच्यमाने सर्वे अवयवा द्विरुच्यन्त इति भूव् इति समुदायस्यैव द्विर्वचनमिति भाष्ये स्पष्टम्। तदाह **भूव् भूव् अ इति स्थित इति**। अत्र भूव् इत्यस्य एकाचो धात्ववयवत्वं प्रथमत्वं च व्यपदेशिवत्त्वाद्बोध्यम्। **पूर्वः। अत्रेति**। 'एकाचो द्वे प्रथमस्य' इति षाष्ठद्वित्वप्रकरण इत्यर्थः। तेन 'सर्वस्य द्वे' इत्यादिविहितस्य द्वित्वस्य न संग्रहः। कस्य पूर्व इत्याकाङ्क्षायां द्वे इत्यनुवृत्तं षष्ठ्या विपरिणतं संबध्यते, तदाह **ये द्वे विहिते तयोरिति। हलादिः शेषः**। 'अत्र लोपोऽभ्यासस्य' इत्यस्मादभ्यासस्येत्यनुवर्तते। शिष्यत इति शेषः, कर्मणि घञ्। शिषधातुरितरनिवृत्तिपूर्वकावस्थितौ, तदाह **अभ्यासस्येत्यादिना। इति वलोप इति**। भूव् भूव् इत्यत्र अभ्यासवकारस्य लोप इत्यर्थः। भू भूव् अ इति स्थिते **ह्रस्वः**। 'अत्र लोपोऽभ्यासस्य' इत्यतः अभ्यासस्येत्यनुवर्तते। ह्रस्वश्रवणाद् 'अचश्च' इति परिभाषया अच

परस्य त्विति। भूव्भूव् इति। यद्यप्यत्र धात्ववयवत्वं प्राथम्यं च न संगच्छते, तथापि व्यपदेशिवद्भावेन तद्बोध्यम्। नन्विह चत्वार एकाचस्तत्रावयवास्त्रयः, तत्र भू ऊ ऊव् इति भूविति समुदायश्चतुर्थः, तथा चानियमेन यस्य कस्यचिद् द्वित्वं स्यात्। मैवम्, समुदायस्यैकाच एव द्विर्वचनस्य न्याय्यत्वात्तस्मिन्हि द्विरुच्यमाने अवयवा अपि द्विरुच्यन्त एव, वृक्षचलनेन सर्वावयवचलनवत्। **अत्रेति**। एकाचो द्वे इति प्रकरणे। **हलादिः**। अभ्यासस्येति जातिपरो निर्देशस्तेन आटतुः आटुरित्यादौ तकारादिनिवृत्तिः *सिध्यति, कश्चिदभ्यासे आदेर्हलः सत्त्वमाश्रित्य सर्वत्रानादेर्लोप-*

ह्रस्वः स्यात्। **२१८१ भवतेरः।** (७-४-७३) भवतेरभ्यासोकारस्य अः

इत्युपस्थितम्, तदाह **अभ्यासस्याच्च इति**। भुभूव् अ इति स्थितम्। यद्यपि 'भवतेरः' इति वक्ष्यमाणाकारविधिनैव सिद्धमिदम्, तथापि लुलावेत्याद्यर्थमावश्यकमिदम् अत्रैव न्याय्यत्वादुपन्यस्तम्। **भवतेरः**। 'भवतेः' 'अः' इति छेदः। भवतेरिति शितपा निर्देशः। भूधातोरित्यर्थः। 'इक्श्तिपौ धातुनिर्देशे' इत्युक्तेः। 'अत्र लोपोऽभ्यासस्य' इत्यस्मादभ्यासस्येनुवर्तते। 'व्यथो लिटि' इत्यस्माद् लिटीति। भू·

विधानात्। **भवतेरः**। 'अत्र लोपोऽभ्यासस्य' इति सूत्रादभ्यासपदमनुवर्तते। अत्र प्राचोक्तम्—भवतेरिति कर्तृनिर्देशाद् भावकर्मणोर्नत्वमिति, व्याख्यातं च तत्पौत्रेण कर्त्रर्थयोः शितप्शपोर्निर्देशादित्यर्थ इति। तन्न, धातुनिर्देशमात्रे शितपो विधानात्, शपश्च विकरणत्वेनानर्थकत्वात् कर्त्रर्थके परे विहितस्यापि तस्य शितपः शित्त्वसामर्थ्यादेवेह प्रवृत्तेः, अन्यथा त्वदुक्तरीत्या 'उपसर्गात्सुनोतिसुवति–' इत्यादीनामपि भावकर्मणोरप्रवृत्तौ सर्वोपप्लव एव स्यात्, अपसिद्धान्तश्चायमिति स्पष्टमेवाकरदृशाम्। प्रयुञ्जते च कर्मण्यप्यकारं कवयः 'तस्यातपत्रं बिभरांबभूवे' 'विभावरीभिर्बिभरांबभूविरे' इत्यादि। एतच्च प्रक्रियाप्रसादग्रन्थदूषणं मनोरमायां स्थितम्। अत्र नव्याः—शितपः शित्त्वसामर्थ्यादिहेह शपः प्रवृत्तिरिति यदुक्तं तन्न। पिबतिः ग्लायतिरित्यादौ पिबाद्यादेशप्रवृत्त्या आत्त्वनिवृत्त्या च शित्त्वस्य चरितार्थत्वात्। एवं च 'उपसर्गात्सुनोतिसुवति–' 'भवतेरः' 'ध्यायतेः संप्रसारणं च' इत्यादिनिर्देशादकर्तृवाचिन्यपि परे शबादय इत्येव व्याख्येयम्। अन्यथा 'इक्श्तिपौ–' इति सूत्रे वक्ष्यमाणस्वग्रन्थेन सह विरोधापत्तेः। केचित्तु—शित्त्वात्तिपः सार्वधातुकत्वेन भवतिरित्यादौ 'आर्धधातुकस्येड् वलादेः' इतीडागमनिवृत्त्या, ब्रवीतिरित्यत्र 'ब्रुव ईट्' इतीडागमप्रवृत्त्या च शित्त्वं चरितार्थमिति व्याचख्युः, तच्चिन्त्यम्। 'तितुत्र–' इत्यनेनेण्निषेधादार्धधातुकत्वेऽपि क्षत्यभावात्। 'ब्रुव ईट्' इत्यत्र ब्रुवः परस्य हलादेः पित ईडागम इत्येतन्मात्रस्य मूले व्याख्यातत्वात्सार्वधातुकस्येति विशेषणाभावेऽपि क्षत्यभावात्। न च हलादेः पित्प्रत्ययस्य सार्वधातुकस्येति विशेषणाभावे ब्रुवो लिटि वच्यादेशे सिपस्थलि उवकथेत्यत्रातिप्रसङ्गः स्यादिति वाच्यम्, थलोऽत्र पित्त्वाभावात्। न च स्थानिवद्भावेन पित्त्वम्, श्नः शानचः शित्त्वेन लिङ्गेन क्वचिदनुबन्धकार्येऽप्यनल्विधाविति तन्निषेधात्। तस्मात्पूर्वोक्तरीत्यैव शितपः शित्त्वसामर्थ्यादकर्तर्यपि शपः प्रवृत्तिरिति ग्रन्थो निराकर्तव्य इत्याहुः। तदपरे न क्षमन्ते। थलः पित्त्वाभावे हि 'असंयोगाल्लिट् कित्' इति कित्त्वाद् 'वचिस्वपि–' इति संप्रसारणे सत्युवचिथ उवक्थेति न सिध्येत् किंतु ऊचिथ ऊक्थेति स्यात्। तस्मात्स्थानिवत्त्वेन थलः कित्त्वेऽभ्युपगते उवक्थेत्यादा·

स्याल्लिटि । २१८२ **अभ्यासे चर्च** । (८-४-५४) अभ्यासे झलां चरः स्युर्जशश्च । झशां जशः । खयां चरः । तत्रापि प्रकृतिजशां प्रकृतिजशः, प्रकृतिचरां प्रकृतिचर इति विवेकः, आन्तरतम्यात् । २१८३ **असिद्धवदत्राभात्** ।

धातोरभ्यासस्य भवत्यकारः 'अतोऽन्त्यस्य' इत्यन्त्यस्योकारस्य भवति, तदाह **अभ्यासोकारस्येति** । 'नानर्थकेऽलोन्त्यविधिः–' इति तु नेह प्रवर्तते । अनभ्यासविकार इत्युक्तेः । भ भूव् अ इति स्थिते **अभ्यासे चर्च** । 'झलां जश् झशि' इत्यस्माद् झलामित्यनुवर्तते । चकारेण जश् समुच्चीयते, तदाह **अभ्यासे झलामित्यादिना** । झलश्चतुर्विंशतिः । तत्र शषसाः शरः । तेषामभ्यासे लोपो वक्ष्यते 'शर्पूर्वाः खयः' इति । हकारस्य त्वभ्यासे 'कुहोश्चुः' इति चुत्वं वक्ष्यते । एवं च झल्सु झयो विंशतिरिहाभ्यासगताः स्थानिनो लभ्यन्ते । तेषां मध्ये कस्य चरः कस्य जश इत्याकाङ्क्षायामाह **झशां जश इति** । वर्गाणां तृतीयचतुर्था झशः । तेषां जशो जबगडदा इत्यर्थः । यद्वर्ग्याः स्थानिनः तद्वर्ग्या आदेशा इत्यपि बोध्यम् । **खयां चर इति** । वर्गाणां प्रथमद्वितीयाः खयः, तेषां चरः चटतकपा इत्यर्थः । अत्रापि यद्वर्ग्याः स्थानिनः तद्वर्ग्या **आदेशा** इत्यपि बोध्यम् । **तत्रापीति** । तेष्वपि वर्ग्येषु प्रकृत्या स्वभावेन जशामेव सतां प्रकृत्या स्वभावेन जश एव सन्तः तत्तद्वर्ग्या आदेशाः स्युः । एवं प्रकृत्या स्वभावेन चरामेव सतां प्रकृत्या स्वभावेन चर एव सन्तः तत्तद्वर्ग्या आदेशाः स्युरित्यर्थः । पर्जन्यवल्लक्षणप्रवृत्तेरिति भावः । कुत इयं व्यवस्थेत्यत आह **आन्तरतम्यादिति** । झशां जशां च घोषसंवारनादप्रयत्नसाम्यम् । खयां चरां च श्वासाघोषविवारप्रयत्नसाम्यम् । तत्तद्वर्ग्याणां तत्तद्वर्ग्या आदेशा इत्यत्र तु स्थानसाम्यं नियामकं बोध्यम् । तथा च प्रकृतेः अभ्यासभकारस्य बकारे सति बभूव् अ इति स्थिते 'अचि श्नुधातु–' इत्युवङादेशमाशङ्कितुमाह **असिद्धवदत्र** । षष्ठस्य चतुर्थपादे इदं सूत्रम् । 'श्नसोरल्लोपः' इति सूत्रात् पूर्वं पठितम् । आभादित्यभिविधावाङ् । भस्येत्यधिकारमभिव्याप्येत्यर्थः । भाधिकारश्च आ पादपरिसमाप्तेरिति सिद्धान्तः । तथा च आ पादपरिसमाप्तेरिति लभ्यते । विहितं कार्यमिति शेषः ।

वतिप्रसङ्गवारणाय पितः सार्वधातुकस्येडागम इति व्याख्यानव्यर्थमेव, तथा च ब्रवीतिरित्यत्र ईडागमप्रवृत्त्या शित्वं चरितार्थमिति कैश्चिद्यदुक्तं तदपि सम्यगेवेति । **असिद्धवदत्राभात्** । वत्करणं प्रतिपत्तिलाघवाय, अन्यथा सिद्धे असिद्ध इति प्रयुज्यमानमनुपपन्नं सत्सामर्थ्यादसिद्धवदिति कल्पनीयं स्यात् । यथा राजभिन्ने पुरोहिते राजायमिति प्रयोगो राजवदिति कथंचित्कल्पयति, राजवदयं पुरोहित इत्युक्ते तु लघुप्रतिपत्तिर्भवति, तथा चागत्या 'षत्वतुकोरसिद्धः' इत्यत्रासिद्धवदिति कल्प्यते ।

(६-४-२२) इत ऊर्ध्वमापादपरिसमाप्तेराभीयम्। समानाश्रये तस्मिन्कर्तव्ये

किमारभ्येत्याकांक्षायामुपस्थितत्वादस्मादेव सूत्रादूर्ध्वमिति लभ्यते। ततश्च 'श्नान्नलोपः' इत्यारभ्यापादसमाप्तेः विहितं यदाभीयं कार्यं तदसिद्धवद्भवति। प्रवृत्तमप्यप्रवृत्तवद् भवतीत्यर्थः। अधिकारसूत्रमिदमुत्तरत्र 'श्नान्नलोपः' इत्यादौ प्रतिसूत्रमुपतिष्ठते। तथा च यत्तत्सूत्रे इदमनुवर्तते तत्तदाभीयकार्ये कर्तव्ये इति लभ्यते। एवं च 'श्नान्नलोपः' इत्यादि तत्तदाभीयं कार्यं 'श्नान्नलोपः' इत्याद्याभीये कार्ये कर्तव्ये असिद्धवदित्यर्थः पर्यवस्यति। अत्रानेन निमित्तसप्तम्यन्तेन त्वसिद्धीभवतः कार्यस्य यन्निमित्तं तन्निमित्तके कार्ये कर्तव्ये सतीत्यर्थलाभात् समानाश्रये कार्ये कर्तव्ये सतीति लभ्यते। एतत्सर्वं भाष्ये स्थितम्, तदाह **इत ऊर्ध्वमित्यादिना। तस्मिन्निति।** आभीये कर्तव्ये सतीत्यर्थः। एधि शाधीत्युदाहरणम्। अत्र 'घ्वसोरेद्धावभ्यासलोपश्च' इत्यत्वस्य 'शा हौ' इति शाभावस्य चाभीयत्वेनासिद्धत्वाद् 'हुझल्भ्यो हेर्धिः' इति हेर्धित्वमाभीयं प्रवर्तते। तथा जहीत्याद्यप्युदाहरणम्। हनधातोर्यङ्लुगन्ताद्

'असंयोगाल्लिट् कित्' इत्यत्रापि किद्वदित्यस्यैव कल्प्यत इति ज्ञेयम्। आ भादित्यभिविधावाङ्। भाधिकारमभिव्याप्येत्यर्थः। अधिकारश्चायम्। अत्रग्रहणं समानाश्रयप्रतिपत्त्यर्थम्। आभाद्ग्रहणं विषयनिर्देशार्थम्। भाधिकारस्यावधिलाभस्तु 'अङ्गस्य', 'प्रत्ययः' 'परश्च' इत्यादाविव व्याख्यानेनैव सिध्यति। एवं च 'अनुदात्तोपदेश–' इत्यत्रास्योपस्थाने सत्ययमर्थो भवति—एषामनुनासिकस्य लोपः स्याज्झलादौ क्ङिति परे, स चासिद्धो भवति। अत्र झलादिक्ङिदाश्रित्यैव यदाभीयं प्राप्नोति तस्मिन्कृते सति जहिहि जहिहि 'अतो हेः' इति लुग् न भवति, अनुनासिकलोपस्य हिशब्दाश्रितत्वेनासिद्धत्वात्। नन्वस्याधिकारत्वे यत्र यत्रोपस्थानं तत एवारभ्य यदाभीयं तस्मिन्नेव कर्तव्येऽसिद्धत्वं स्यान्न तु ततः पूर्वस्मिन्नपि। ततश्च 'घ्वसोः–' इत्येत्वं पूर्वस्मिन्नपि धित्वे कर्तव्ये नासिद्धं स्यादिति चेत्। भवेदयं दोषः शब्दाधिकारे। अर्थाधिकारस्त्वयम्। ततश्चेह 'श्नान्नलोपः' इत्यवधिर्निर्णीतः स एव प्रतिसूत्रमुपतिष्ठते, तदेतत्सकलमभिप्रेत्याह **इत ऊर्ध्वमिति।** अत्रापि शास्त्रासिद्धत्वमेवाकरे स्थितम्। तेन एधि शाधीत्यत्र स्थानिनो झलन्तत्वबुद्धेरनिवर्तितत्वात्तन्निबन्धनं 'हुझल्भ्यो हेर्धिः' इति धित्वं सिद्धयति। प्राचोक्तकार्यासिद्धत्वपक्षे तु न सिद्धयति। देवदत्तस्य हन्तरि हते देवदत्तस्य जीवनं नेति न्यायेन एत्वविधिना झल्बुद्धौ निवर्तितायां पश्चादेत्वबुद्धिनिवर्तनेऽपि धित्वकार्यस्याप्रवृत्तेरित्याहुः। समानाश्रये इति किम्, पपुषः। चिच्युषः। लुलुवुषः। इह पाधातोश्चिञो लूञश्च परस्य वसोर्यत्संप्रसारणं तत् 'आतो लोप इटि च' इत्यालोपे 'एरनेकाचः–' इति यण्युवङि च कर्तव्ये नासिद्धम्, आलोपादीनि हि क्वसौ, संप्रसारणं तु

तदसिद्धं स्यात् । इति वुकोऽसिद्धत्वादुवङि प्राप्ते—'वुग्युटावुवङ्यणोः सिद्धौ

लोएमध्यमपुरुषैकवचने सिपो हिभाव 'अनुदात्तोपदेश–' इति नलोपस्याभीयस्यासिद्धत्वाद् 'अतो हेः' इत्याभीयो लुङ् न भवति। 'समानाश्रये' इति किम्? पपुष इत्यत्र पाधातोर्लिटः क्वसौ 'लिटि धातोः–' इति द्वित्वे अभ्यासह्रस्वे क्वस्वन्ताद् द्वितीयाबहुवचने शसि 'वसोः संप्रसारणम्' आभीयम् 'आतो लोप इटि च' इत्याल्लोपे आभीये कर्तव्ये असिद्धं न भवति। आल्लोपः क्वसौ, संप्रसारणं तु शसीति भिन्नाश्रयत्वात्। 'आभीये कर्तव्ये' इति किम्? अभाजि राग इत्यत्र भञ्जेश्चिणि, रञ्जेर्घञि च कृते, 'भञ्जेश्च चिणि' 'घञि च भावकरणयोः' इति नलोपस्याभीयस्यानाभीयायामुपधावृद्धौ कर्तव्यायां नासिद्धत्वम्। 'आभादित्यभिविधिः' किम्? भाधिकारात् प्रागित्युक्ते भूयानित्यत्र 'बहोर्लोपो भू च बहोः' इति बहोर्भूभावस्य ओर्गुणे कर्तव्ये असिद्धत्वं न स्यात्, भस्येति सूत्रादूर्ध्वभावित्वादित्यलम्। **इति वुकोऽसिद्धत्वादिति** । वुक आभीयस्य अचि श्नुधात्वित्युवङि आभीये कर्तव्ये असिद्धतया ऊकारस्योवङि लघूपधगुणे बभोवेति प्राप्ते सतीत्यर्थः। वुग्विधिस्तु गुणवृद्धिबाधकत्वेन चरितार्थ इति भावः। **वुग्युटावुवङ्यणोरिति** । यथासंख्यमन्वयः । **बभूवेति** । णलो णित्त्वं तु

विभक्ताविति व्याश्रयत्वात् । न च बहिरङ्गत्वेनासिद्धताऽस्त्विति शङ्क्यम्, 'नाजानन्तर्ये–' इति निषेधात्, 'वाह ऊठ्' सूत्रस्थबहिरङ्गपरिभाषाया अप्याभीयत्वेनाऽऽलोपादिषु कर्तव्येष्वसिद्धत्वाच्च । न चोक्तपरिभाषाया आलोपादीनां च समानाश्रयत्वं नेति शङ्क्यम्, वसोः संप्रसारणे कृते ह्यजाद्याश्रयेणाऽऽलोपादीनि प्रवर्तन्ते, तेषु कर्तव्येषु संप्रसारणस्यासिद्धत्वाय तद्विषये बहिरङ्गपरिभाषाऽपि प्रवर्तत इति तेषां तत्सत्त्वादिति दिक् । विषयलाभार्थमाभाद्ग्रहणं किम्, आभीयं प्रत्येवाभीयमसिद्धं नान्यं प्रतीति यथा स्यादित्येवमर्थम् । तेन अभाजि राग इत्यत्र 'भञ्जेश्च चिणि' 'रञ्जेश्च' 'घञि च भावकरणयोः' इति नलोपे कृते तस्यासिद्धत्वाभावाद् 'अत उपधायाः' इति वृद्धिर्भवतीत्याहुः । स्यादेतत्, देभतुः देभुरित्यत्र 'श्रन्थिग्रन्थिदम्भि–' इति वक्ष्यमाणवचनेन लिटः कित्त्वान्नलोपेऽप्येत्वाभ्यासलोपौ न स्याताम्, नलोपस्यासिद्धत्वात् । अत्राहुः—'श्नसोरल्लोपः' इति तपरकरणाल्लिङ्गादाभीयासिद्धत्वमनित्यमिति नास्त्यत्र दोषः । तपरकरणं हि आस्तामित्यत्राडागमस्य लोपो मा भूदित्येतदर्थम् । यद्याडागमः श्नसोरल्लोपं प्रत्याभीयत्वेनासिद्धः स्यात्तर्हि किं तेन तपरकरणेन । एवं च 'दम्भेश्च' इति वक्ष्यमाणं नापूर्वं वार्तिकं किं त्वनित्यत्वबललभ्यमेवेति । **वुक इति** । 'भुवो वुक्–' शास्त्रस्य । एवमग्रेऽपि । युट उदाहरणं दिदीपे । **बभूवेति** । अत्र प्राञ्चः 'इन्धिभवतिभ्यां च' इति सूत्रं पितोऽपि लिटः कित्त्वार्थमिति व्याख्याय 'अचोऽञ्णिति'

वञ्च्यौ' । बभूव बभूवतुः बभूवुः । २१८४ आर्धधातुकस्येड्वलादेः ।

जगादेत्यादौ वृद्ध्यर्थम् । **बभूवतुरिति** । तसः अतुसादेशे वुगादि पूर्ववत् । सकारस्य रुत्वविसर्गौ । **बभूवुरिति** । झेरुसादेशे वुगादि पूर्ववत् । सिपः थलि बभू थ इति स्थिते **आर्धधातुकस्येट्** । 'नेड्वशिकृति' इत्यस्मादनुवृत्त्यैव सिद्धेरिड्ग्रहणं

इति वृद्धिप्राप्तौ 'क्ङिति च' इति निषेध इत्युक्तं तदुपेक्षितम् । इग्लक्षणयोरेव गुणवृद्ध्योर्निषेध इति सिद्धान्तात् । अन्यथा इक्स्थानिकयोर्निषेधे लैगवायन इत्यत्रापि वृद्धिर्न स्यात् । न चात्र कित्त्वसामर्थ्यादनिग्लक्षणाया अपि वृद्धेर्निषेध इति वाच्यम् , थलि उत्तमे णलि च गुणनिषेधेन कित्त्वस्य चरितार्थत्वात् । सूत्रं तु प्रत्याख्यातमेवाकरे । तथा च वार्तिकम् 'इन्धेश्छन्दोविषयत्वाद् भुवो वुको नित्यत्वात्ताभ्यां लिटः किद्वचनानर्थक्यम्' इति । यद्यपीह शब्दान्तरप्राप्त्या वुको नित्यत्वं नास्ति, तथापि कृताकृतप्रसङ्गित्वमात्रेणापि क्वचिन्नित्यता स्वीक्रियत इति पक्षोऽप्यस्मादेव वार्तिकादवगम्यते, तेन रधेर्णिचि परामप्युपधावृद्धिं बाधित्वा नित्यत्वाद् 'रधिजभोरचि' इति नुमि कृते रन्धयतीति सिद्धम् । नन्वेमपि संयोगात्परस्य लिटः कित्त्वार्थमिन्धेश्चेत्यंशोऽपेक्षित एव । अन्यथा 'समीधे दस्यु हन्तमम्' इत्यत्रेन्धेर्नलोपो न स्यात् । मैवम् , 'छन्दस्युभयथा' इति सूत्रेण हि सार्वधातुकसंज्ञा आर्धधातुकसंज्ञा च विधीयते, तेन 'सार्वधातुकमपित्' इति लिटो ङित्त्वे स्यादेव नलोप इति वार्तिकाशयात् । अत्र नव्याः—बभूवेत्यत्र 'द्विर्वचनेऽचि' इत्यजादेशस्य निषेधाद् गुणवृद्धिभ्यां प्रागेव वुकः प्रवृत्त्या भुवो वुको नित्यत्वादिति वार्तिके नित्यत्वादिति हेतूपन्यासो निष्प्रयोजनः, शब्दान्तरस्य प्राप्त्या वुको नित्यत्वं नास्तीत्याशङ्क्य कृताकृतप्रसङ्गित्वमात्रेणापि क्वचिन्नित्यत्वं स्वीक्रियत इत्यादिसमाधानमपि व्यर्थमेवेत्याक्षिप्य स्वयमेव समादधुः । षाष्ठद्वित्वप्रकरणान्ते हि वार्तिककृता पूर्वविप्रतिषेधः पठ्यते, 'द्विर्वचनं यणयवायावादेशाल्लोपोपधालोपणिलोपकिकिनोरुत्वेभ्यः' इति । तथा च 'द्विर्वचनेऽचि' इति सूत्रं नारम्भणीयमित्याशयेन नित्यत्वादिति हेतुरुपन्यस्त इति । 'द्विर्वचनेऽचि' इति सूत्रेणाजादेशस्य स्थानिवद्भावो विधीयत इति पक्षे तु द्वित्वात्प्रागेव वृद्ध्याद्यादेशस्य स्वीकृतत्वादादेशानन्तरमपि वुकः प्रवृत्तिरस्तीति भुवो वुको नित्यत्वादित्यादिग्रन्थः सम्यगेव । न चैवमपि नामधातुषु स्वापयति मापयतीत्यत्र मपर्यन्तस्य त्वमौ पररूपात्पूर्वं नित्यत्वाट्टिलोप इति ग्रन्थः कथं सङ्गच्छेतेति वाच्यम् , 'प्रकृत्यैकाच्' इति सूत्रं भाष्ये प्रत्याख्यातमित्याशयेन तत्प्रवृत्तेः । अतएव त्वादयति मादयतीत्येव न्याय्यमिति तत्रोक्तमिति दिक् । **आर्धधातुकस्येड्वलादेः** । 'नेड्वशिकृति' इत्यत इडित्यनुवर्तमाने पुनरिड्ग्रहणं निषेधसम्बद्धस्येटो निवृत्त्यर्थम् । वस्तुतस्तु 'समर्थानां प्रथमाद्वा' इत्यनु-

(७-२-३५) वलादेरार्धधातुकस्येडागमः स्यात् । बभूविथ बभूवथुः बभूव ।

न कार्यमिति 'नेड्वशि–' इति सूत्रभाष्ये प्रत्याख्यातम् । 'आर्धधातुकस्य' इति किम् ? जुगुप्सते । अत्र 'गुप्तिज्किद्भ्यः–' इति सनो धातोरित्यविहितत्वाभावादार्धधातुकत्वम् । **बभूविथेति** । सिपः थलि तस्य इडागमे वुगादि पूर्ववत् । बभूवथु-

---

श्रुतस्य पदत्रयस्य मध्ये 'प्राग्दिशः–' इत्यनन्तरं 'समर्थानां प्रथमात्–' इति सूत्रे 'वा' इति त्वनुवर्तत इति व्याख्यानमिव नेति निवृत्तम्, इडित्यनुवर्तत इति व्याख्यातुं शक्यत्वादिड्ग्रहणं त्यक्तुं शक्यम्, तथापि स्पष्टप्रतिपत्त्यर्थं तत्स्वीकृतमिति बोध्यम् । आर्धधातुकस्येति किम्, आस्ते, शेते । वलादेः किम्, एधनीयम् । ननु 'रुदादिभ्यः सार्वधातुके' इत्यनेन सार्वधातुकस्य यदीड् भवति तर्हि रुदादिभ्य एवेति नियमादास्ते शेत इत्यत्र इट् न भवेदित्यार्धधातुकस्येति ग्रहणं व्यर्थम् । न च रुदादिभ्यः सार्वधातुक एवेति विपरीतनियमाद्रोदितीत्यत्र न स्यात्, आस्ते शेत इत्यत्र तु स्यादिति शङ्क्यम्, 'रुदविदमुषग्रहिस्वपिप्रच्छः संश्च' इति क्त्वासनोः कित्त्वस्य वैयर्थ्यप्रसङ्गात्, त्वदुक्तरीत्या रुदादेः क्त्वासनोरिडागमाभावेन 'न क्त्वा सेट्' इति निषेधाप्रवृत्त्या क्त्वाप्रत्यये औपदेशिककित्त्वस्य सुस्थत्वात् । 'हलन्ताच्च' इति झलादिसनः कित्त्वाच्च । तस्माद्विपरीतनियमासम्भवेनार्धधातुकग्रहणं व्यर्थमेव । ननु तद्ग्रहणाभावे वलादेरित्यस्याङ्गस्येति यदधिकृतं तद्विशेष्यं स्यात्, ततश्च अङ्गादावेवेडागमोऽप्यङ्गस्य स्यात् । मैवम्, कृतेऽप्यार्धधातुकग्रहणे वलाद्यार्धधातुकस्य यदङ्गं तस्येडागम इति व्याख्यानापत्त्योक्तदोषतादवस्थ्यादकृतेऽपि तद्ग्रहणेऽङ्गस्य यो वलादिरङ्गनिमित्तं तस्येडिति व्याख्यानादिष्टसिद्धेश्च । तस्मादुभयथापि व्याख्याने शरणीकर्तव्ये 'आर्धधातुकस्य–' इत्यस्य त्याग एव श्रेयान् । नन्वेवं केशवः, अङ्गना, वृत्तत्वमित्यत्रेट् स्यात्, 'ऋत इद्धातोः' इत्यतो धातोरित्यनुवर्तनादधातोः परस्य न भवतीति परिहारसम्भवेऽपि लूभ्यां पूभ्यामित्यत्र दुर्वार एवेडागमो विहितविशेषणेनाप्ययं वारयितुमशक्यः, क्विबन्ता धातुत्वं न जहतीति पूभ्यां पूभिरित्यत्र भ्यामादेर्धातोर्विहितत्वानपायात् । किं च जुगुप्सते इत्यादौ 'गुप्तिज्किद्भ्यः–' इति धातोर्विहितस्य सन इट् दुर्वारः । न चेह धातोः परत्र विहितस्य वलादेरिति व्याख्यानलाभाय धातोरिति पञ्चम्यन्तमपेक्षितं तच्च दुर्लभम् 'ऋत इद्धातोः' इत्यत्र धातोरित्यस्य षष्ठ्यन्तत्वात्, तथा च वृत्तत्वमित्यादावपीडागमप्रसङ्ग इति वाच्यम्, *शब्दाधिकारपक्षे स्वरितत्वेन* तत्सदृशशब्दोऽनुमीयत इति पञ्चम्यन्तलाभात् । अस्तु वा षष्ठ्यन्तत्वम्, विहितत्वं षष्ठ्यर्थ इति व्याख्यायामिष्टसिद्धेः । तस्माज्जुगुप्सत इत्यादावतिप्रसङ्गवारणार्थमार्धधातुकस्येति ग्रहणम् । केचित्तु—धातोरित्यावर्त्य धातोरित्युच्चार्य विहितो यः प्रत्यय-

बभूव बभूविव बभूविम । **२१८५ अनद्यतने लुट्** । (३-३-१५) भविष्यत्यनद्यतनेऽर्थे धातोर्लुट् स्यात् । **२१८६ स्यतासी लृलुटोः** । (३-१-३३) 'लृ' इति लृङ्लृटोर्ग्रहणम् । धातोः स्यतासी एतौ प्रत्ययौ स्तो लृलुटोः परतः । शबाद्यपवादः । **२१८७ आर्धधातुकं शेषः** । (३-४-११४) तिङ्शिद्भ्योऽन्यो धातोरिति विहितः प्रत्यय एतत्संज्ञः स्यात् । इट् । **२१८८ लुटः प्रथमस्य डारौरसः** । (७-४-८५) डा, रौ, रस् एते क्रमात्स्युः । डित्वसामर्थ्यादभस्यापि

रिति । थसः अथुसादेश वुगादि पूर्ववत् । सकारस्य रुत्वविसर्गौ । **बभूवेति** । मध्यमपुरुषबहुवचनस्य अकारः सर्वादेश इति 'परस्मैपदानां णलतुस्–' इत्यत्रोक्तम् । वुगादि पूर्ववत् । **बभूवेति** । मिपो णलि वुगादि पूर्ववत् । **बभूविवेति** । वसो वादेशे वलादित्वादिडागमे वुगादि पूर्ववत् । नचात्र 'श्र्युकः किति' इतीडागमनिषेधः शङ्क्यः, 'कृसृभृवृस्तुद्रुस्रुश्रुवो लिटि' इति क्रादिनियमादिट्सिद्धेः । **बभूविमेति** । मसो मादेशे इडागमे वुगादि पूर्ववत् । इति लिट्प्रक्रिया । **अनद्यतने लुट्** । धातोरित्यधिकृतम् । 'भविष्यति गम्यादयः' इत्यतो भविष्यतीत्यनुवर्तते । भविष्यत्यनद्यतन इति धात्वर्थेऽन्वेति । तदाह **भविष्यत्यनद्यतन इति** । अनद्यतनशब्दस्तु परोक्षे लिडित्यत्र व्याख्यातः । उदात्तेतौ । लुटस्तिबादयः । भू ति इति स्थिते 'कर्तरि शप्' इति शपि प्राप्ते **स्यतासी लृ** । स्यश्च तासिश्चेति द्वन्द्वात् प्रथमाद्विवचनम् । तासेरिकार उच्चारणार्थः । लृ लुट् अनयोर्द्वन्द्वात् सप्तमीद्विवचनम् । **ग्रहणमिति** । लृस्वरूपस्योभयत्राविशिष्टत्वादिति भावः । 'धातोः' इत्यधिकृतम् , तदाह **धातोरिति** । भू तास् ति इति स्थिते **आर्धधातुकं शेषः** । 'तिङ्शित्सार्वधातुकम्' इति पूर्वसूत्रोपात्ततिङ्शिदन्यः शेषः, तदाह **तिङ्शिद्भ्योऽन्य इति** । **विहित इति** । धातोरित्यधिकृतं विहितविशेषणमाश्रीयत इति भावः । एवं च जुगुप्सत इत्यादौ 'गुप्तिज्किद्भ्यः–' इत्यादिविहितसनादीनां धातोरित्युच्चार्य विहितत्वाभावेन आर्धधातुकत्वाभावादिडागमो न भवति । **एतत्संज्ञः स्यादिति** । आर्धधातुकसंज्ञक इत्यर्थः । **इडिति** । तास्प्रत्ययस्योक्तसूत्रेणार्धधातुकत्वात् स्वतो वलादित्वाच्च 'आर्धधातुकस्येड्वलादेः' इतीडागम इत्यर्थः । भू इ तास् इति स्थिते, ऊकारस्य गुणे अवादेशे च भविता स्

त्स्येडिति यदि व्याख्यायेत तदा लूभ्यां जुगुप्सत इत्यत्रातिप्रसङ्गाभावादार्धधातुकस्येति व्यर्थमित्याहुः । **बभूविवेति** । न चात्र 'श्र्युकः किति' इतीण्निषेधे वुगागमोऽपि न स्यादिति शङ्क्यम् , क्रादिनियमादिटः प्रवृत्तेः । **अनद्यतने** । अतीताया रात्रेः पश्चार्धेनागामिन्याः पूर्वार्धेन सहितो दिवसोऽद्यतन इति 'कालोपसर्जने च तुल्यम्' इत्यत्र स्थितम् । **आर्धधातुकम्** । **धातोरिति** । 'धातोरेकाच–' इत्यतो धातो-

टेर्लोपः। २१८९ **पुगन्तलघूपधस्य च।** (७-३-८६) पुगन्तस्य लघूपधस्य चाङ्गस्येको गुणः स्यात्सार्वधातुकार्धधातुकयोः। येन नाव्यवधानं तेन व्यवहितेऽपि, वचनप्रामाण्यात्। तेन भिनत्तीत्यादावनेकव्यवहितस्येको न गुणः। भवित् आ, अत्रेको गुणे प्राप्ते। २१९० **दीधीवेवीटाम्।** (१-१-६) दीधीवेव्योरिटश्च

इति स्थिते **लुटः प्रथमस्य डा।** डा रौ रस् एषां द्वन्द्वात् प्रथमाबहुवचनम्। लुट इति स्थानषष्ठी लुडादेशस्य प्रथमपुरुषस्येत्यर्थः। **क्रमादिति।** यथासंख्यलभ्यम्। ननु परस्मैपदस्य त्रयः प्रथमा आत्मनेपदस्य च त्रयः प्रथमा इति स्थानिनः षट्, आदेशास्तु त्रय इति कथं यथासंख्यमिति चेन्न। डाश्च रौश्च रस् चेति कृतद्वन्द्वानां डारौरसश्च डारौरसश्चेति एकशेषमाश्रित्य भाष्ये समाहितत्वात्। डाभावस्य चादेशात्वात् प्राक् प्रत्ययत्वाभावेन 'चुटू' इत्यस्याप्रवृत्त्या सर्वादेशत्वम्। सति च तस्मिन् प्रत्ययत्वाच्चुटू इति टकारस्येत्संज्ञेति भाष्ये स्पष्टम्। एवं च भू तास् आ इति स्थिते प्रक्रियां दर्शयति **डित्त्वसामर्थ्यादिति।** डाभावस्य कप्रत्ययावधिषु स्वादिष्वनन्तर्भूतत्वेन तस्मिन् परे भत्वाभावेऽपि डित्त्वसामर्थ्यात् टेरिति टिलोप इत्यर्थः। तथा च भवित् आ इति स्थिते **पुगन्तलघू।** 'मिदेर्गुणः' इत्यतो 'गुणः' इत्यनुवर्तते। 'अङ्गस्य' इत्यधिकृतमवयवषष्ठ्यन्तमाश्रीयते। पुगन्तलघूपधस्येति तद्विशेषणम्। पुक् अन्तो यस्य तत् पुगन्तम्। लघ्वी उपधा यस्य तल्लघूपधम्। पुगन्तं च लघूपधं चेति समाहारद्वन्द्वात् षष्ठी। 'इको गुणवृद्धी' इति परिभाषया 'इकः' इत्युपस्थितं स्थानषष्ठ्यन्तमाश्रीयते। तदाह **पुगन्तस्येत्यादिना। अङ्गस्येक इति।** अङ्गावयवस्येत्यर्थः। द्वेष्टि द्वेष्टा इत्याद्युदाहरणम्। नन्वत्राङ्गावयवस्येकः तदुपरितनहला व्यवधानात् सार्वधातुकपरत्वाभावात् कथमिह इको गुण इत्यत आह **येन नेति।** येन स्थान्युत्तरवर्णेन परनिमित्तस्य नाव्यवधानं व्यवधानं अवर्जनीयमिति यावत्। तेन वर्णेन व्यवहितेऽपि परनिमित्तं कार्यं भवतीत्यर्थः। कुत इत्यत आह **वचनप्रामाण्यादिति।** तथाविधवर्णव्यवधानेऽपि कार्यप्रवृत्तौ वचनारम्भस्यैव प्रमाणत्वादित्यर्थः। लघूपधस्य हीको गुणो विधीयते। उपधात्वं चान्त्यादलः पूर्वस्यैव भवति। ततश्चेक उपर्यन्त्यस्य वर्णस्याभावे इक उपधात्वाभावाल्लघूपधस्याङ्गस्य गुणविधानं निर्विषयमेव स्यात्। अतस्तद्व्यवधानं सोढव्यमिति भावः। ननु व्यवहितस्यापीको गुणप्रवृत्त्यभ्युपगमे भिनत्ति छिनत्तीत्यादौ इकारस्यापि गुणः स्यादित्यत आह **तेनेति।** अवर्जनीयव्यवधानस्यैवाश्रयणेनेत्यर्थः। उपधात्वस्यैकमेव वर्णमुपरितनमादाय

रित्यनुवर्तमाने पुनर्धातोरित्यधिकारसूत्रारम्भादिदं लभ्यते। एतच्च तत्रैव मनोरमायां स्पष्टम्। धातोरितिविहित इति किम्, लूभ्याम्, जुगुप्सते। **अनेकव्यवहितस्येति।**

गुणवृद्धी न स्तः। भविता। २१६१ तासस्त्योर्लोपः। (७-४-५०) तासेरस्तेश्च लोपः स्यात्सादौ प्रत्यये परे। २१६२ रि च। (७-४-५१) रादौ प्रत्यये प्राग्वत्। भवितारौ। भवितारः। भवितासि भवितास्थः भवितास्थ। भवितास्मि भवितास्वः भवितास्मः। २१६३ लृट् शेषे च। (३-३-१३) भवि-

संभवादनेकवर्णाव्यवधानं नादर्तव्यमिति भावः। **गुणे प्राप्त इति**। भवित् आ इति स्थिते डाभावसंपन्नस्याकारस्य स्थानिवत्त्वेन सार्वधातुकतया तस्मिन् परे भवित् इत्यङ्गावयवस्योपधाभूतस्येकारस्य गुणे प्राप्ते सतीत्यर्थः। न च भूधातोर्विहितं सार्वधातुकं प्रति भूधातुरेवाङ्गम्, न तु भवित् इति विकरणविशिष्टमिति वाच्यम्। अङ्गसंज्ञासूत्रे तदादिग्रहणेन विकरणविशिष्टस्याप्यङ्गत्वात्। **दीधीवेवी**। दीधीङ् दीप्तिदेवनयोः 'वेवीङ् वेतिना तुल्ये'। दीधीश्च वेवीश्च इट् चेति द्वन्द्वात् षष्ठी। 'इको गुणवृद्धी' इत्यतो 'गुणवृद्धी' इति 'न धातुलोप—'इत्यतो 'न' इति चानुवर्तते, तदाह **दीधीवेव्योरित्यादिना**। अथ प्रथमपुरुषद्विवचने तसि परे शबपवादे तासि इडागमे ऊकारस्य गुणे अवादेशे तसो रौभावे भवितास् रौ इति स्थिते रि चेति सकारस्य लोपं वक्ष्यन् तत्रानुवृत्तिप्रतिपत्तये तत्पूर्वसूत्रमुपन्यस्यति **तासस्त्योः**। तास् चास्तिश्चेति द्वन्द्वात् षष्ठी। 'सस्यार्धधातुके' इत्यतोऽनुवृत्तेन सीति सप्तम्यन्तेनाधिकृताङ्गाक्षिप्तप्रत्ययस्य विशेषणात् तदादिविधिः, तदाह **तासेरित्यादि**। अस्तेरिति श्तिपा निर्देशः। अस्धातोरित्यर्थः। 'अलोऽन्त्यस्य' इत्यन्त्यस्य लोपः। भवितासीत्यनुपदमेवोदाहरणं वक्ष्यते। **रि च**। 'तासस्त्योर्लोपः' इति सूत्रम्, अस्तिवर्जमनुवर्तते। रीत्यनेनाङ्गाक्षिप्तप्रत्ययस्य विशेषणात्तदादिविधिः, तदाह **रादाविति**। **प्राग्वदिति**। तासेर्लोप इत्यर्थः। अस्तिस्तु नानुवर्तते। ततो रादिप्रत्ययस्यासंभवात्। आर्धधातुके तस्य भूभावविधानात्। एवं च भवितास् रावित्यत्र सलोपे सति रूपमाह **भवितारावित्ति**। **भवितार इति**। झौ तासि इडागमे ऊकारस्य गुणे अवादेशे झेः रस् इत्यादेशे तासः सकारस्य लोपे रसः सकारस्य रुत्वविसर्गाविति भावः। **भवितासीति**। सिपि तासि इडागमे उकारस्य गुणे अवादेशे 'तासस्त्योः—' इति सकारस्य लोप इति भावः। **भवितास्थ इति**। थसि तासि इडागमे गुणे अवादेशे थसः सस्य रुत्वविसर्गाविति भावः। **भवितास्थेति**। बहुवचने थे तासि इटि गुणावादेशौ। **भवितास्मीति**। मिपि तासि इटि गुणावादेशौ। **भवितास्व इति**। वसि तासि इटि गुणे अवादेशे रुत्वविसर्गौ। एवं

सार्वधातुकादिकमिको विशेषणं न त्वङ्गस्येति भावः। **तासस्त्योः**। 'सः स्यार्धधातुके' इत्यतः सीत्यनुवर्तते, अङ्गाक्षिप्तस्य प्रत्ययस्य सीत्यनेन विशेषणात्। 'यस्मिन्विधिः—' इति तदादिविधिस्तदिदमाह **सादाविति**। एवं रादावित्यत्राप्यूह्यम्। **प्राग्वदिति**।

ष्यदर्थाद्धातोर्लृट् स्यात्क्रियार्थायां क्रियायामसत्यां सत्यां च । स्य इट् । भविष्यति भविष्यतः भविष्यन्ति । भविष्यसि भविष्यथः भविष्यथ । भविष्यामि भविष्यावः भविष्यामः । २१९४ **लोट् च ।** (३-३-१६२) विध्यादिष्वर्थेषु धातोर्लोट् स्यात् । २१९५ **आशिषि लिङ्लोटौ ।** (३-३-१७३) २१९६

स्मसि भवितास्म इति रूपम् । इति लुट्प्रक्रिया । **लृट् शेषे च ।** 'धातोः' इत्यधिकृतम् । 'भविष्यति गम्यादयः' इत्यतो 'भविष्यति' इत्यनुवृत्तं धात्वर्थेऽन्वेति, तदाह **भविष्यदर्थाद्धातोः लृट् स्यादिति ।** 'तुमुन्ण्वुलौ क्रियायां क्रियार्थायाम्' इति पूर्वसूत्रे 'क्रियार्थायां क्रियायाम्' इत्यर्थनिर्देशः स्थितः, ततोऽन्यः शेषः । क्रियार्थायां क्रियायाम् असत्यामिति लभ्यते । चकारात् क्रियार्थायां क्रियायां सत्यामित्यपि लभ्यते, तदाह **क्रियार्थायां क्रियायामसत्यां सत्यां चेति ।** ननु 'लृट्' इत्येव सूत्रमस्तु । 'शेषे च' इति मास्तु । भविष्यदर्थाद्धातोः लृट् इत्येतावतैव क्रियार्थायां क्रियायामसत्यां सत्यां च लृटो लाभ इति चेन्नैवम् । 'शयिष्यते इति स्थीयते' इत्यादौ भावकर्त्रोः तुमुन्ण्वुल्भ्यां लृटो बाधाभावार्थत्वात् । न च वासरूपविधिना तत्सिद्धिः शङ्क्या, 'क्त्ल्युट्तुमुन्खलर्थेषु वासरूपविधिर्नास्ति' इति तन्निषेधादित्यास्तां तावत् । **स्य इडिति ।** लृटस्तिपि 'स्यतासी लृलुटोः' इति स्यप्रत्ययः । तस्य वलाद्यार्धधातुकत्वाद् इडागम इत्यर्थः । **भविष्यतीति ।** स्यप्रत्ययस्य इटि ऊकारस्य गुणे अवादेशे प्रत्ययावयवत्वात् सकारस्य षत्वे भविष्यतीति रूपमित्यर्थः । तसादौ भविष्यत इत्याद्यप्येवं योज्यम् । भविष्यामीत्यादौ 'अतो दीर्घो यञि' इति दीर्घः इति लृट्प्रक्रिया । **लोट् च ।** 'विधिनिमन्त्रणामन्त्रणाधीष्टसंप्रश्नप्रार्थनेषु' इत्यनुवर्तते, तदाह **विध्या-**

तासेर्लोप इत्यर्थः । अस्तिस्तु नेह संबध्यते, ततो रादिप्रत्ययस्य सम्भवात् । **लृट् शेषे च ।** 'तुमुन्ण्वुलौ क्रियायां क्रियार्थायाम्' इति प्रागुक्तं ततोऽन्यः शेष इत्याह **असत्यामिति ।** चार्थमाह **सत्यामिति ।** हरदत्तस्त्वाह—स्वरितत्वादेव क्रियार्थायां क्रियायामिति नानुवर्तते । एवं च शेषे चेति सुत्यजमिति तच्चिन्त्यम् । शयिष्यत इति स्थीयत इत्यादौ तुमुना लृटो बाधापत्तेः । क्त्ल्युट्तुमुन्खलर्थेषु वासरूपविधेरभावात् । अत्र च ज्ञापकं 'प्रैषातिसर्गप्राप्तकालेषु कृत्याश्च' इत्यत्र लोटा बाधा माभूदिति पुनः कृत्यविधिरित्यादि कृदन्ते वक्ष्यते । इदमपि ज्ञापकमित्यन्यदेतत् । यत्तु प्राञ्चः भविष्यतीति व्रजतीत्युदाहृतं तदापाततः । तुमुन्विषयेऽपि लृट् भवति तुमुना लृट् न बाध्यत इत्येतत्प्रतिपादनार्थं तस्यानुपयोगात् । न हि भविष्यतीत्यत्र कर्तरि तुमुनः प्राप्तिरस्ति, भावे हि सः । समानकर्तृकेष्वेवेति च वक्ष्यते । लृडित्येतावत्सूत्रकरणेऽपि भविष्यतीति व्रजतीत्ययं सिध्यत्येवेत्यास्तां तावत् । **लोट् च ।**

एरुः । (३-४-८६) लोट इकारस्य उः स्यात्। भवतु। २१९७ तुह्योस्तातङ्ङाशिष्यन्यतरस्याम् । (७-१-३५) आशिषि तुह्योस्तातङ् वा स्यात् । अनेकाल्त्वात्सर्वादेशः । यद्यपि 'ङिच्च' (सू ४३) इत्ययमपवादस्तथाप्यनन्यार्थङित्त्वेष्वनङादिषु चरितार्थ इति गुणवृद्धिप्रतिषेधसंप्रसारणाद्यर्थतया संभवत्प्रयोजन-

---

दिष्विति । विध्यादिशब्दा अनुपदमेव लिङ्विधौ व्याख्यास्यन्ते । आशिषि लिङ् । आशिष्यपीत्यर्थः । आशासनमाशीः इष्टप्राप्तीच्छा । लोटस्तिपि विशेषमाह एरुः । 'एः' 'उः' इति च्छेदः । एरिति षष्ठ्यन्तम् । इवर्णस्येति लभ्यते । 'लोटो लङ्वत्' हिश्च इत्यतो 'लोटः' इत्यनुवर्तते, तदाह लोट इति । भवत्विति । तिपि शपि गुणे अवादेशे तिप इकारस्य उकारः । अथाशिषि लोटो विशेषमाह तुह्योस्तातङ् । तुश्च तुही, तयोरिति विग्रहः । तातङि ङकार इत् । अकार उच्चारणार्थः । तादित्यादेशः शिष्यते । ननु किमस्य अनेकाल्त्वात्सर्वादेशता उत ङित्वादन्तादेशतेत्यत आह अनेकाल्त्वात् सर्वादेश इति । ननु 'ङिच्च' इत्यस्य सर्वादेशापवादतया अनङादेरिव तातङोऽप्यन्त्यादेशत्वमेवोचितमित्याशङ्कते यद्यपि ङिच्चेत्ययमपवाद इति। परिहरति तथापीति । परेण बाध्यत इति । तातङादेशे 'ङिच्च' इत्ययं विधिः 'अनेकाल्शित् सर्वस्य' इति परेण बाध्यत इत्यर्थः । ननु 'परनित्यान्तरङ्गापवादानामुत्तरोत्तरं बलीयः' इति परापेक्षया अपवादस्य प्रबलत्वाद् ङिच्चेत्यन्तादेशत्वमेव तातङि युक्तमित्यत आह तातङि मन्थरं प्रवृत्त इति । 'ङिच्च' इति विधिरिति शेषः । तातङ्विषये 'ङिच्च' इति विधिर्मन्थरं प्रवृत्त इति हेतोः परेण सर्वादेशविधिना बाध्यत इत्यर्थः । कुतो मन्दप्रवृत्तिकत्वमित्यत आह अनन्यार्थेत्यादिना । अन्तादेशत्वादन्योऽर्थो यस्य ङित्त्वस्य न विद्यते तदनन्यार्थम् । तथाविधं ङित्त्वं येषां तेषु अनङादिषु 'ङिच्च' इति विधिः चरितार्थो लब्धप्रयोजनक इति कृत्वा मन्दं प्रवृत्त इत्यर्थः । तातङो ङित्त्वं तु अन्तादेशत्वापेक्षया अनन्यार्थं नेत्याह सम्भवत्प्रयोजनङकार इति । सम्भवन्ति प्रयोजनानि अन्यानि यस्य स सम्भवत्प्रयोजनः । तथाविधो ङकारो यस्य तथाविधे तातङीत्यर्थः । कथं सम्भवत्प्रयोजनकत्वमित्यत आह

'विधिनिमन्त्रणा-' इत्याद्यनुवर्तते तदाह विध्यादिष्विति । आशिषि लिङ्लोटौ। ननु विध्यादिसूत्र एव संप्रश्नप्रार्थनाशीःष्वित्युच्यतां किमनेन पृथक्सूत्रकरणेनेति चेत् । अत्राहुः—इह हि 'क्तिच्क्तौ च-' इत्युत्तरसूत्रार्थमाशिषीति तावदावश्यकम् । लिङ्लोटावपीहैव विधेयौ । विध्यादिसूत्रे आशीर्ग्रहणे हि 'स्मे लोट्' इत्यादिना स्वविषये परत्वाद्बाधः स्यात् । सिद्धान्ते तु परत्वादेष विधिः 'स्मे लोट्' इत्यादेर्बाधक इति महान्विशेष इति । तुह्योस्तातङ् । यद्यपि तिह्योस्तातङिति वक्तुं शक्यं तथापि

ङकारे तातङि मन्थरं प्रवृत्तः परेण बाध्यते। इहोत्सर्गापवादयोरपि समबलत्वात्। भवतात्। २१९८ **लोटो लङ्वत्।** (३-४-८५) लोटो लङ इव कार्यं स्यात्। तेन तामादयः सलोपश्च। तथाहि—२१९९ **तस्थस्थमिपां तांतं-**

गुणवृद्धिप्रतिषेधसम्प्रसारणाद्यर्थतयेति। द्विष्टादित्यादौ लघूपधादिगुणनिषेधः। स्तुतात् युतादित्यादौ 'उतो वृद्धिर्लुकि हलि' इति विहिताया वृद्धेर्निषेधः। 'वश कान्तौ' उष्टादित्यत्र 'ग्रहिज्यावयि–' इति सम्प्रसारणम्। आदिना ब्रूतादित्यत्र 'ब्रुव ईट्' इतीटोऽभावस्य संग्रहः। ननु तातङ्विषये 'ङिच्च' इति विधिर्मन्दं प्रवर्तताम्। अथापि 'परनित्यान्तरङ्गापवादानामुत्तरोत्तरं बलीयः' इति न्यायेन परस्यापि सर्वादेशविधेरपवादभूतेन 'ङिच्च' इत्यनेन बाध एवोचित इत्यत आह **इहेति**। इह तातङ्विषये 'अनेकाल्शित्सर्वस्य' इति सामान्यशास्त्रस्य 'ङिच्च' इति विशेषशास्त्रस्य च समबलत्वात् सामान्यशास्त्रं विशेषशास्त्रेण न बाध्यत इत्यर्थः। अयं भावः—अपवादशास्त्रस्य परनित्यान्तरङ्गापेक्षया प्राबल्ये निरवकाशत्वमेव बीजम्। प्रकृते च 'ङिच्च' इति विधिः अनन्त्यादेशेऽपि ङित्त्वमन्त्यादेशत्वैकप्रयोजनकं प्रयोजनान्तरविरहेण निरवकाशत्वाद् झटिति परिगृह्णन् कृतार्थतामनुभवन्, तातङो ङित्त्वं प्रयोजनान्तसत्त्वेन सावकाशत्वादुपेक्षत इति। तदुक्तं भाष्ये—'ङित्त्वस्य सावकाशत्वाद्विप्रतिषेधात्तातङ् सर्वादेशः' इति। अधिकन्तु विस्तरभिया विरम्यते। **भवतादिति**। आशिषि लोटस्तिपि शपि गुणे अवादेशे ङकारे तोस्तातङ् सर्वादेशः। ङकार इत्। द्वितीयतकारादकार उच्चारणार्थः। **लोटो लङ्वत्**। लङ इव लङ्वत्। 'तत्र तस्येव' इति षष्ठ्यन्ताद्वतिः, तदाह **लोटो लङ इवेति**। ननु तर्हि 'लुङ्लङ्लृङ्क्ष्वडुदात्तः' इत्यडागमोऽपि स्यादित्यत आह **तेनेति**। लङ इति स्थानषष्ठ्यन्ताद् वतिप्रत्ययाश्रयणेनेत्यर्थः। अडागम-

---

लाघवाभावादतिप्रसङ्गवारणाय हिशब्दस्याद्यर्थाश्रयणे लोट् इत्यनुवर्तमाने वा गौरवाच्च तुह्योरित्युक्तम्। **लोटो लङ्वत्**। लोट इत्युपमेये षष्ठीदर्शनादुपमानादपि षष्ठ्यन्तादेव वतिस्तदाह **तेनेति**। अडाटौ तु नातिदिश्येते। न हि तौ लङः क्रियेते, किं तु लङि अङ्गस्येति भावः। नन्वेमपि यान्तु वान्तु इत्यत्र 'लङः शाकटायनस्य' इति जुस् स्यात्, जुह्वतु विदन्त्वित्यत्र तु 'सिजभ्यस्त–' इति जुस्स्यात्। अत्राहुः—'विदो लटो वा' इति वाग्रहणमिहानुवर्त्य व्यवस्थितविभाषाश्रयणान्न जुस्। यद्वा 'लङः शाकटायनस्य' इति सूत्रे 'नित्यं ङितः' इत्यतो ङित इत्यनुवर्त्यैवेष्टसिद्धेर्लङ्ग्रहणमतिरिच्यते, लुङि सिचा लृङि स्यप्रत्ययेन च व्यवधानात्, लिङि तु 'झेर्जुस्' इति जुसो विहितत्वाच्च। ङित इत्यस्य लङ्येव पर्यवसानात्ततो लङ्ग्रहणं विभज्यते। नियमार्थं 'लङेव यो लङ् तस्यैव झेर्जुस्, न तु लङ्वद्भावेन यो लङ् तस्ये'त्यतो

तामः। (३-४-१०१) ङितश्चतुर्णामेषां तामादयः क्रमात्स्युः। २२०० नित्यं ङितः। (३-४-९९) सकारान्तस्य ङिदुत्तमस्य नित्यं लोपः स्यात्। 'अलोऽन्त्यस्य' (सू ४२) इति सस्य लोपः। भवताम् भवन्तु। २२०१ सेर्ह्यपिच्च। (३-४-८७) लोटः सेर्हिः स्यात्सोऽपिच्च। २२०२ अतो हेः।

मस्तु न लङो विधीयते। किन्तु लङि अङ्गस्येति भावः। केन तामादयः, केन वा सलोप इत्यत आह **तथा हीति**। तामादयः सलोपश्च यथा ज्ञायन्ते तथा स्पष्टमुच्यन्त इत्यर्थः। **तस्थस्थमिपाम्**। तस् थस्, थ मिप् एषां द्वन्द्वात् षष्ठीबहुवचनम्। ताम् तम् त अम् एषां द्वन्द्वात् प्रथमाबहुवचनम्। 'नित्यं ङितः' इत्यस्माद् 'ङितः' इत्यनुवर्तते, तदाह **ङितश्चतुर्णामिति**। ङितो लकारस्य आदेशभूतानामित्यर्थः। **क्रमादिति**। यथासंख्यसूत्रलभ्यमिदम्। **नित्यं ङितः**। उत्तमपुरुष एवास्य सूत्रस्य प्रयोजनम्। प्रसङ्गादिहोपन्यस्तम्। 'स उत्तमस्य' इति सूत्रमनुवर्तते। तत्र 'सः' इति षष्ठ्यन्तम्। तेन उत्तमो विशेष्यते। तदन्तविधिः। 'इतश्च लोपः–' इत्यतो 'लोपः' इत्यनुवर्तते, तदाह **सकारान्तस्य ङिदुत्तमस्येति**। ङितो लकारस्य य आदेश उत्तमपुरुषः तस्येत्यर्थः। 'वैतोऽन्यत्र' इत्यस्माद्वाग्रहणानुवृत्तिनिवृत्तये नित्यग्रहणम्। 'अलोऽन्त्यस्य, इत्यन्त्यलोपः। **भवतामिति**। लोटस्तस्, तस्य तामादेशः। शप् गुणावादेशौ। न च तामादेशस्य सर्वादेशत्वात् प्राग् विभक्तित्वाभावाद् 'न विभक्तौ तुस्माः' इति निषेधाभावाद् मकारस्येत्संज्ञा शङ्क्या, संयोगान्तलोपेन मकारान्तरप्रश्लेषेण उपदेशेऽन्त्यत्वाभावात्। **भवन्त्विति**। लोटो झेः अन्तादेशे शपि गुणे अवादेशे द्वयोरकारयोः पररूपे एरुरितीकारस्य उकारे भवन्त्विति रूपम्। अथ लोटः सिपि शपि गुणावादेशयोः भव सि इति स्थिते। **सेर्ह्यपिच्च**। 'हि' इति

नोक्तदोषः' इति। तच्चिन्त्यम्, अदुरित्यत्र 'सिजभ्यस्त–' इति नित्यजुसं बाधित्वा परत्वाच्छाकटायनस्येति विकल्पप्रसङ्गात्। तस्माल्लङ्ग्रहणं शाकटायनसूत्रे कर्तव्यमेव, न तु तदतिरिच्यते। न च 'आतः' इति सूत्रेणादुरित्यत्र नित्यं जुस्स्यादिति वाच्यम्, तस्य नियमार्थत्वेन विध्यर्थत्वायोगात्, अन्यथा अभूवन्नित्यत्र 'सिजभ्यस्त–' इति जुस् दुर्वार एव स्यादिति नव्याः। यदि त्विह 'आतः' इति सूत्रमावर्त्य विध्यर्थता नियमार्थता च व्याख्यायेत तदा तूक्तदोषाभावाद्वेति समाधानमपि सम्यगेव, शाकटायनस्येति जुसो वैकल्पिकत्वात्, तदभावपक्षे पुनःप्रसङ्गविज्ञानात्। 'सिजभ्यस्त–' इति जुसि स्वीकृते तु सुतरां सम्यगेव, परं तु जुहतु बिन्दत्त्वित्यत्र जुस्वारणाय व्यवस्थितविभाषा त्वाश्रयणीयैवेति दिक्। **सकारान्तस्येति**। ङित्सकारोत्तमसकारस्येति प्राचो व्याख्यानं त्वयुक्तम्, भूयासमित्यादावतिप्रसङ्गः स्यादिति भावः। **ङिदुत्तम-**

(६-४-१०५) अतः परस्य हेर्लुक्स्यात्। भव-भवतात् भवतम् भवत। २२०३ मेर्निः। (३-४-८९) लोटो मेर्निः स्यात्। २२०४ आडुत्तमस्य पिच्च। (३-४-९२) लोडुत्तमस्याडागमः स्यात्स पिच्च। हिन्योरुत्वं न। इकारोच्चारणसामर्थ्यात्। भवानि भवाव भवाम। २२०५ अनद्यतने लङ्।

लुप्तप्रथमाकम्। 'लोटो लङ्वत्' इत्यतो लोट इत्यनुवर्तते। तदाह **लोटः सेरिति**। स्तुहीत्यादौ सिप्स्थानिकस्य हेः पित्त्वात्सार्वधातुकमपिदिति ङिद्वत्त्वाभावाद् गुणे प्राप्ते अपिद्वचनम्। एवं च ङिद्वत्त्वात् 'क्ङिति च' इति गुणो न। 'सेर्हि ङिच्च' इत्येव तु न सूत्रितम्। पितस्सिपः अनुदात्तस्य स्थाने हेरप्यनुदात्तत्वापत्तेः। भव हि इति स्थिते। **अतोहेः**। 'अतः' इति पञ्चमी। हेरिति षष्ठी। 'चिणो लुक्' इत्यतो लुगित्यनुवर्तते, तदाह **अतः परस्येति**। **भवेति**। हिविधानं तु स्तुहीत्याद्यर्थमिति भावः। **भवतादिति**। आशिषि लोटः सिपि तस्य 'सेर्ह्यपिच्च' इति हिभावे शपि गुणावादेशयोः 'अतो हेः' इति लुकं परत्वाद् बाधित्वा 'तुह्योः–' इति पक्षे तातङिति भावः। **भवतमिति**। थसि शपि गुणे अवादेशे च भव थस् इति स्थिते 'लोटो लङ्वत्' इति लङ्वत्त्वात्तस्थस्थमिपामिति थसः तमादेशे रूपम्। एवं भवतेति। थस्य तादेश इति विशेषः। लोटो मिपि शपि गुणे अवादेशे मिपः तस्थस्थमिपामित्यमादेशे प्राप्ते **मेर्निः**। 'लोटो लङ्वत्' इत्यतः 'लोटः' इत्यनुवर्तते, तदाह **लोटो मेरिति**। भव नि इति स्थिते। **आडुत्तमस्य**। 'लोटो लङ्वत्' इत्यतः 'लोटः' इत्यनुवर्तते, तदाह **लोडुत्तमस्येति**। स्तवानि स्तवावेत्यादौ 'सार्वधातुकमपित्' इति ङित्त्वनिवृत्त्यर्थं पिद्वचनम्। यद्यपि मिप्स्थानिकस्य नेः पित्त्वात्तदागमस्यापि सिद्धं पित्त्वं तथापि वास्मसोराडागमस्याङित्त्वार्थं पिदिति वचनम्। ननु स्तुहि भवानीत्यत्र 'एरुः' इत्युत्वं कुतो न स्यादित्यत आह **हिन्योरुत्वं नेति**। **सामर्थ्यादिति**। अन्यथा 'हु' 'नु' इत्येव विदध्यादिति भावः। **भवानीति**। आडागमे सवर्णदीर्घः। नचात्र लङ्वद्भावादितश्चेति लोपः शङ्क्यः, इकारोच्चारणसामर्थ्यात्। अन्यथा मो न इत्येव विदध्यात्। एवं हेरपि बोध्यम्। यद्यपि भवानीत्यादौ 'अतो दीर्घो यञि' इत्येव दीर्घसिद्धेराडागमविधिर्व्यर्थः। तथापि स्तवानीत्याद्यर्थमावश्यकमिहापि

स्येति। ङित्लकारोत्तमस्येत्यर्थः। तेन भवावः भवाम इत्यादौ नातिप्रसङ्गः। **सोऽपिच्चेति**। एवं च पित्त्वेनानुदात्तस्य सिपः स्थाने यो हिरादेशः स तु 'स्थानेऽन्तरतमः' इत्यनुदात्तो न भवति। 'जहि शत्रून्' 'स्तुहि श्रुतम्'। **भवतादिति**। लुगपेक्षया परत्वाद्धेस्तातङ्, अन्तरङ्गमेव लुग् बाधते न तु परमिति भावः। **स पिच्चेति**। स इति तच्छब्देन यस्याडागमः स परामृश्यत इत्याहुः। **इतश्च**। 'इतश्च लोपः–'

(३-२-१११) अनद्यतनभूतार्थवृत्तेर्धातोर्लङ् स्यात् । २२०६ लुङ्लङ्लृङ्क्ष्वडुदात्तः । (६-४-७१) एषु परेष्वङ्गस्याडागमः स्यात्, स चोदात्तः । २२०७ इतश्च । (३-४-१००) ङितो लस्य परस्मैपदमिकारान्तं यत्तदन्तस्य लोपः स्यात् । अभवत् अभवताम् अभवन् । अभवः अभवतम् अभवत । अभवम् अभवाव अभवाम । २२०८ विधिनिमन्त्रणामन्त्रणाऽधीष्टसंप्रश्नप्रार्थनेषु

न्याय्यत्वादुपन्यस्तम् । **भवावेति** । लोटो वस् गुणावादेशौ आडागमः सवर्णदीर्घः । लङ्वद्भावाद् 'नित्यं ङितः' इति सकारलोपः । एवं मसि भवामेति रूपम् । इति लोट्प्रक्रिया । **अनद्यतने लङ्** । 'धातोः' इति 'भूते' इति चाधिकृतम् । भूत इति धात्वर्थे अन्वेति, तदाह **अनद्यतनभूतार्थवृत्तेरिति** । **लुङ्लङ्लृङ्क्षु** । 'अङ्गस्य' इत्यधिकृतम्, तदाह **एषु परेष्वङ्गस्येति** । अन्तरङ्गत्वाद् नित्यत्वात्परत्वाच्च यथायथं तिपि शपि विकरणे गुणे अवादेशे विकरणविशिष्टस्याङ्गस्य अडागमः । लावस्थायामेवाडागम इति तु पक्षान्तरं भाष्ये स्थितम् । **इतश्च** । 'लस्य' इत्यधिकृतम् । 'इतश्च लोपः परस्मैपदेषु' इत्यस्माद् 'लोपः' इति 'परस्मैपदेषु' इति चानुवर्तते । परस्मैपदेष्वित्येतत् षष्ठ्या विपरिणम्यते, तदाह **ङितो लस्येत्यादिना** । 'अलोऽन्त्यस्य' इत्यन्त्यस्य लोपः, तदाह **अभवदिति** । **अभवतामिति** । लङस्तसः तामादेशः शप् गुणावादेशौ अट् । **अभवन्निति** । झेरन्तादेशः । शप् गुणावादेशौ अट् 'इतश्च' इति इकारलोपः । तकारस्य संयोगान्तलोपः । **अभव इति** । सिपि शपि गुणे अवादेशे अटि इकारलोपे रुत्वविसर्गौ । **अभवतमिति** । थसस्तमादेशः । शप् गुणावादेशौ अट् । **अभवतेति** । थस्य तादेशे शपि गुणे अवादेशे अटि । **अभवमिति** । मिपः अमादेशे शपि गुणे अवादेशे पूर्वरूपम् । **अभवावेति** । वसि शपि गुणावादेशौ अट् । 'अतो दीर्घो यञि' इति दीर्घः । 'नित्यं ङितः' इति सकारलोपः । एवं मसि अभवामेति रूपम् । इति लङ्प्रक्रिया । **विधिनिमन्त्रण** । ननु विध्यादयो हि न लिङो वाच्याः । 'लः कर्मणि च भावे च–' इति सूत्रेण कर्तृकर्मभावानां लकारवाच्यत्वबोधनात् । नच 'लः कर्मणि च–' इति शास्त्रं लिङ्व्यतिरिक्तलकारविषयकमेवास्त्विति वाच्यम्, तथा सति यजेतेत्यादौ कर्तृवाचकत्वाभावेन शबाद्यनापत्तेरित्यत

इति सूत्रात्परस्मैपदेष्वित्यनुवृत्तं षष्ठ्येकवचनान्ततया विपरिणमय्य इत इत्यनेन विशेष्यते तदाह **परस्मैपदमिकारान्तं यत्तस्येति** । प्राचा तु परस्मैपदेष्विकारस्य लोप इत्युक्तम्, तदयुक्तम्, भवेदित्यादावतिव्याप्तेः । ननु 'अतो येयः' इत्यत्र ईय् दीर्घादिरस्तु, एवं च नोक्तातिव्याप्तिः 'इतश्च' इति तपरकरणात् । अतएव अबोभवीदित्यादावपि न दोष इति चेत् । मैवम्, रुदेर्लङि अरुदितामित्यादौ दोषध्रौव्यादिति

लिङ् । (३-३-१६१) एष्वर्थेषु द्योत्येषु वाच्येषु वा लिङ् स्यात् । विधिः प्रेरणम्, भृत्यादेर्निकृष्टस्य प्रवर्तनम् । निमन्त्रणं नियोगकरणम्, आवश्यके श्राद्धभोजनादौ दौहित्रादेः प्रवर्तनम् । आमन्त्रणं कामचारानुज्ञा । अधीष्टः सत्कारपूर्वको व्यापारः । प्रवर्तनायां लिङ् इत्येव सुवचम् । चतुर्णां पृथगुपादानं

आह **द्योत्येष्विति** । 'लः कर्मणि च-' इति सूत्रं सामान्यविषयं सदपि विधिनिमन्त्रणेति विशेषशास्त्रेण न बाध्यते, अविरोधात् । तथा च विध्यादिविशिष्टकर्त्रादिषु लिङिति फलतीति मत्वाह **वाच्येषु वेति** । पक्षद्वयमपीदं भाष्ये स्थितम् । 'विधिः प्रेरणम्' इति भाष्यम् अर्थतस्संगृह्णाति **विधिः प्रेरणमिति** । ननु निमन्त्रणादीनामपि प्रेरणान्तर्भावात्पौनरुक्त्यमित्यतो व्याचष्टे **भृत्यादेर्निकृष्टस्य प्रवर्तनमिति** । तद्यथा भृत्यं स्वामी वदति—भवान् वस्त्रं क्षालयेदिति । आमन्त्रणाद् भेदं दर्शयितुं निमन्त्रणशब्दं व्याचष्टे **निमन्त्रणं नियोगकरणमिति** । नियोगशब्दस्य प्रेरणशब्दपर्यायत्वभ्रमं वारयति **आवश्यके श्राद्धभोजनादौ दौहित्रादेः प्रवर्तनमिति** । 'त्रीणि श्राद्धे पवित्राणि दौहित्रः कुतपस्तिलः' इत्यादिवचनादिति भावः । तद्यथा दौहित्रादीन् प्रति इह श्राद्धे भवान् भुञ्जीतेति । **आमन्त्रणं कामचारानुज्ञेति** । यथेच्छं क्रियतामित्यभ्यनुज्ञानमित्यर्थः । **अधीष्टः सत्कारपूर्वको व्यापार इति** । भाष्यवाक्यमिदम् । सत्कृत्य प्रवर्तनमित्यर्थ । अधिपूर्वकस्येषधातोर्भावे क्तान्तस्योपसर्गवशादस्मिन्नर्थे वृत्तिः । अत एव भाष्यप्रयोगादधीष्टशब्दस्य

मनोरमायां स्थितम् । **विधिनिमन्त्रणा । द्योत्येषु वाच्येषु वेति** । पक्षद्वयस्याप्याकरे स्थितत्वादिति भावः । अत्राद्ये त्वित्थमुपपत्तिः—विध्यादीनां प्रत्ययार्थत्वमनुचितम् । तथाहि सति कर्त्रादीनामर्थानां लकारान्तरे चारितार्थानां विध्यादयोऽर्था बाधकाः स्युः, तथा च लिङः कर्त्राद्यभिधायकत्वं न स्यात्, ततश्च द्विवचनबहुवचने न स्याताम्, शबादयश्च न स्युः, पुरुषव्यवस्था च न स्यात्, अनभिहितत्वप्रयुक्तस्तृतीयादिविरहश्च न सिध्येदिति । द्वितीये त्वित्थमुपपत्तिः—विध्यादिभिः कर्त्रादयो न बाध्यन्ते परस्परविरोधाभावात् । तथा च 'लः कर्मणि—' इत्यत्र लः इति बहुवचननिर्देशेन सर्वलकाराणां संग्रहाल्लिङादीनामपि कर्त्रादयोऽर्था भवेयुः किं च कर्त्रादयोऽपि निरवकाशाः । न च लडादयोऽवकाशाः । न्यायसाम्येन विध्यादिवद्वर्तमानत्वभूतत्वादेरपि तत्तल्लकारवाच्यत्वात् । न चैवं पचतीत्यादौ धात्वर्थं प्रति वर्तमानत्वादेः प्रत्ययार्थतया विशेष्यत्वं स्यात् । तथा चैककर्तृका वर्तमाना पचिक्रियेत्यादिशाब्दबोधवर्णनमयुक्तं स्यादिति वाच्यम्, प्रत्ययार्थतया विशेष्यत्वापादनस्य कर्त्रादिष्वपि तुल्यत्वात् । ननु प्रत्ययार्थः प्रधानं प्रकृत्यर्थो विशेषणमित्यौत्सर्गिकमाख्याते त्यज्यते 'भावप्रधानमा-

पुंस्त्वम्। अधीष्टमित्येव क्वचित्पाठः, माणवकं भवानध्यापयेदित्युदाहरणम्। इदं कार्यं न वेति विचार्य निर्धारणं संप्रश्नः, यथा—किं भोः व्याकरणं भवानधीयीतेति। प्रार्थनं याच्ञा, यथा भवानन्नं मे दद्यादिति। **सुवचमिति**। प्रवर्तनात्वस्य विध्यादिचतुर्षु अनुस्यूतत्वादिति भावः। प्रवृत्त्यनुकूलव्यापारः प्रवर्तना। 'तत्र प्रवृत्तिः शिष्यादिनिष्ठा। तदनुकूलव्यापारस्तु प्रेरणात्मकः प्रवर्तयितृगुर्वादिनिष्ठः। विस्तरस्तु मञ्जूषायां द्रष्टव्यः। **चतुर्णामिति**। विधिनिमन्त्रणामन्त्रणाधीष्टानामित्यर्थः।

ख्यातम्' इति सिद्धान्तानुरोधादिति चेत्तर्हि तत एव नोक्तदोष इति दिक्। **प्रवर्तनायामिति**। प्रवर्तना त्वस्य विध्यादिषु चतुर्ष्वनुस्यूतत्वादिति भावः। अत्र वदन्ति—प्रवृत्तिः प्रवर्तना चोभयमपि व्यापारः, स च धात्वर्थः। फलव्यापारयोर्धातुवाच्यत्वस्वीकारात्। तदाश्रयस्तु लकारार्थः, व्यापारत्वेन प्रवर्तनाया धात्वर्थत्वेऽपि (प्रवृत्तत्वात्) प्रवर्तना तु लिङ्त्वादिरूपेण लकारवाच्या द्योत्या चेति पक्षद्वयम्। प्रवृत्तिः पुरुषनिष्ठा आर्थी भावनेत्युच्यते। प्रवर्तना तु विधिः, मां प्रेरयतीत्यनुभवाल्लिङादिनिष्ठा शाब्दी भावनेत्युच्यते। वेद एव लिङादिनिष्ठा वक्तुरभावात्, लोके तु पुरुषनिष्ठेति केचिदभ्युपगच्छन्ति। प्रवर्तनाया अस्याः पुरुषप्रवृत्तिरेव भाव्या। पुरुषप्रवृत्तेस्तु यजनदानादि भाव्यम्, एवं च धातूपात्तव्यापारस्य विषयविषयिभावेन द्वेधान्वये तात्पर्यग्राहका लिङादय इति द्योतकतापक्ष एव ज्यायान्। लिङ्त्वादिरूपेण लकारस्य प्रवर्तनायां शक्त्यन्तरकल्पने गौरवात्। **एवं** णिच्यपि। इयांस्तु विशेषः—णिच्प्रत्ययद्योत्या प्रेरणा सर्वस्मिन्नपि मते पुरुषादिनिष्ठैव न तु णिज्निष्ठा, लिङादिद्योत्या तु मतभेदेन लिङ्निष्ठा वा पुरुषनिष्ठा वेति। स्यादेतत्—लिङादिद्योत्या प्रवर्तना लोके पुरुषनिष्ठेति मते पाचयत्योदनं देवदत्तेन यज्ञदत्त इतिवत् पचेदोदनं देवदत्तेन यज्ञदत्त इति प्रयोगः स्यात्। प्रवृत्त्याश्रयः प्रवर्तनाश्रयश्च लकारेणोक्त इति कर्तरि तृतीया न भवति किं तु प्रथमैवेति चेत्। तर्हि ओदनं देवदत्तो यज्ञदत्तः पचेदिति प्रयोगः स्यात्। अत्राहुः—पुरुषनिष्ठेति मते प्रवर्तना लिङादिवाच्यैव, न तु धातुवाच्या। तथा च लिङुपात्तव्यापाराश्रयस्य पुरुषस्य कर्तृत्वाभावान्नोक्तदोषः। देवदत्तेन पाचयति यज्ञदत्त इत्यादौ तु णिजन्तस्य धातुत्वाद्धातूपात्तव्यापाराश्रयत्वेन प्रयोज्यप्रयोजकयोरुभयोरपि कर्तृत्वाल्लकारेणानुक्ते प्रयोज्ये कर्तरि तृतीयेति वैषम्यमिति। कौस्तुभादौ तु—'हेतुमति च' इति सूत्रे प्रयोजकव्यापारस्य णिज्वाच्यत्वपक्ष एव मुख्यत्वेन स्थापितः। व्यापारद्वयस्यापि णिच्प्रकृत्यर्थत्वे त्वभीत्यस्य णिजर्थविशेष्यकत्वे अभिषावयति, प्रकृत्यर्थविशेष्यकत्वे तु 'उपसर्गात्सुनोति–' इति षत्वमभिषावयतीति सिद्धान्तस्य स्वारस्यभङ्गापत्तेरिति। तथा च 'गतिबुद्धि–' इति सूत्रे अणिकर्तेति विशेषणमव्या-

प्रपञ्चार्थम् । २२०६ **यासुट् परस्मैपदेषूदात्तो ङिच्च ।** (३-४-१०३) लिङः परस्मैपदानां यासुडागमः स्यात् स चोदात्तो ङिच्च । ङित्त्वोक्तेर्ज्ञायते क्वचिदनुबन्धकार्येऽप्यनल्विधाविति प्रतिषेध इति । श्नः शानचः शित्त्वमपीह लिङ्गम् ।

अथ लिङस्तिपि इतश्चेतीकारलोपे शपि गुणे अवादेशे भव त् इति स्थिते **यासुट् पर** । 'लिङः सीयुट्' इत्यतो लिङ इत्यनुवर्तते । षष्ठ्यर्थे सप्तमी, तदाह **लिङः परस्मैपदानामिति** । सीयुटोऽपवादः । यासुटि टकार इत् उकार उच्चारणार्थः । टित्वात् तिबादीनामाद्यवयवः । अवयवे ङित्वं च 'आनर्थक्य तदङ्गेषु' इति न्यायेन समुदाये आगमविशिष्टतिबादौ विश्राम्यति । 'आगमा अनुदात्ताः' इति यासुटः अनुदात्तत्वे प्राप्ते उदात्तवचनम् । इदमेव वचनम् 'आगमा अनुदात्ताः' इत्यत्र ज्ञापकमिति भाष्यम् । स्तुयात् स्तुयातामित्यादौ गुणादिनिषेधार्थं यासुटो ङित्त्ववचनम् । ननु 'यदागमा–' इति न्यायेन यासुडागमो लिङादेशपरस्मैपदावयवः । ततश्च स्थानिवत्त्वेनैव ङित्त्वसिद्धेः यासुटो ङित्त्वविधिर्व्यर्थः । न च स्थानिभूतलिङो लकारस्याल इत्त्वेन गुणनिषेधविधावाश्रयणादनल्विधाविति निषेधः शङ्क्यः, 'घुमास्थागापाजहातिसां हलि' इति क्ङिति विहितस्य ईत्वस्य 'न ल्यपि' इति निषेधेन लिङ्गेनानुबन्धकार्ये अनल्विधाविति निषेधाभावज्ञापनादित्यत आह **ङित्त्वोक्तेरिति । क्वचिदनुबन्धकार्येऽपि अनल्विधाविति निषेध इति** । यासुटो ङित्वेन ज्ञायत इत्यन्वयः । तथा च एतज्ज्ञापनार्थमेव यासुटो ङित्त्वमिति भावः । ज्ञापनफलं तु वक्ष्यमाणेत्यत्र ङीबभावः । अन्यथा लृडादेशस्य शानचः स्थानिवत्त्वेन टित्त्वात् ङीप् स्यात् । ननु 'क्वचिदनुबन्धकार्येऽप्यनल्विधाविति निषेधः' इत्यत्र यासुटो ङित्त्ववचनं न ज्ञापकम् । अनुबन्धकार्ये सर्वत्र अनल्विधाविति निषेधाभावे सत्यपि यासुटो ङित्त्वस्य तिप्सिप्मिबागमयासुटो ङित्त्वार्थमावश्यकत्वात् । नहि लिङादेशत्वेऽपि तिप्सिप्मिपां ङित्त्वं स्थानिवत्त्वलभ्यम् । हलश्श्नश्शानज्झाविति सूत्रभाष्ये 'ङिच्च पिन्न, पिच्च ङिन्न' इति प्रपञ्चितत्वादित्यस्वरसादाह **श्नः शानचः शित्त्वमपीह लिङ्गमिति** । इह अनुबन्धकार्येऽपि क्वचिदनल्विधाविति निषेधोऽस्तीत्यस्मिन्नर्थे श्नः–श्नप्रत्ययस्य यः शानजादेशः 'हलः श्नश्शानज्झौ' इति विहितः, तस्य शित्त्वमपि लिङ्गम्, ज्ञापकमित्यर्थः ।

वर्तकं स्यात् । त्वन्मते प्रयोजकव्यापारस्यापि णिच्प्रकृत्यर्थत्वेन प्रयोजकस्याप्यणौ कर्तृत्वमिति दिक् । प्रार्थनं याच्ञा । **क्वचिदिति** । ज्ञापनफलं तु वक्ष्यमाणेत्यादौ टिदुगिल्लक्षणङीबभाव इति 'टिड्ढा–' इति सूत्र एवोक्तम् । रुयादित्यादौ 'उतो वृद्धिर्लुकि हलि' इति न प्रवर्तते, भाष्ये 'पिच्च ङिन्न, ङिच्च पिन्न' इति व्याख्यानाद्विशेषविहितेन ङित्त्वेन पित्त्वस्य बाधादित्यादौ वक्ष्यमाणतया यासुटो ङित्त्वं न

२२१० सुट् तिथोः। (३-४-१०७) लिङस्तकारथकारयोः सुट् स्यात्। सुटा यासुट् न बाध्यते, लिङो यासुट् तकारथकारयोः सुडिति विषयभेदात्। **२२११ लिङः सलोपोऽनन्त्यस्य।** (७-२-७९) सार्वधातुकलिङोऽनन्त्यस्य सस्य लोपः स्यात्। इति सकारद्वयस्यापि निवृत्तिः। सुटः श्रवणं त्वाशीर्लिङि। स्फुटतरं तु तत्राप्यात्मनेपदे। **२२१२ अतो येयः।** (७-२-८०) अतः परस्य

अन्यथा स्थानिवत्त्वेनैव तस्य शित्त्वसिद्धेस्तद्वचनं व्यर्थं स्यादिति भावः। अत्र च यद्वक्तव्यं तत् स्त्रीप्रत्ययप्रकरणे वक्ष्यमाणेऽत्यत्र प्रपञ्चितम्। तथा च प्रकृते भव यास् त् इति स्थिते। **सुट्तिथोः।** 'लिङस्सीयुट्' इत्यतो 'लिङ' इत्यनुवर्तते। तिश्च थ् चेति द्वन्द्वात् षष्ठीद्विवचनम्। इकार उच्चारणार्थः, तदाह **लिङस्तकारेति।** सुटि टकार इत्, उकार उच्चारणार्थः। भव यास् स् त् इति स्थितम्। नन्विह परेण सुटा यासुटः कथं न बाधः, भवेयुरित्यादौ परस्मैपदेषु यासुड्विधिः चरितार्थत्वादित्याशङ्क्य निराकरोति **सुटा यासुट् न बाध्यत इति।** तत् कुत इत्यत आह **लिङो यासुडिति।** लिङः सीयुड् यासुडागमश्च। लिङादेशैकदेशस्य तकारस्य सुडागम इति विषयभेदादित्यर्थः। तथा च यौगपद्यसम्भवाभावात् विप्रतिषेधाभावाच्च परेणापि सुटा यासुटो बाध इति भावः। **लिङः स।** 'स' इति लुप्तषष्ठीकं पदम्। 'रुदादिभ्यः सार्वधातुके' इत्यतः सार्वधातुक इत्यनुवृत्तं षष्ठ्या विपरिणम्यते, तदाह **सार्वधातुक लिङ इति। सकारद्वयस्यापीति।** अविशेषात् सकारद्वयस्यापि युगपल्लोपः प्रवर्तते। लक्ष्ये लक्षणस्य सकृदेव प्रवृत्तिरिति तु पर्यायेण पुनःप्रवृत्तिपरमिति भावः। यद्यपि भव यास स् त् इत्यत्र स्कोरित्येव सिध्यति, तथापि भवेयुरित्याद्यर्थं सूत्रम्। ननु सुटो लोपे किमर्थस्सुड्विधिरित्यत आह **सुटः श्रवणं त्वाशीर्लिङीति।** भूयास्तामित्यादौ 'लिङाशिषि' इत्यार्धधातुकत्वेन तत्र सकारलोपस्याप्रसक्तेरिति भावः। व्यञ्जनपरस्यैकस्यानेकस्य वोच्चारणे विशेषाभाव इति भाष्यादाह **स्फुटतरं त्विति।**

ज्ञापकमित्यपरितोषादाह **श्नः शानचः शित्त्वमिति। सुट् तिथोः।** तकारादिकार उच्चारणार्थः। **लिङः सलोपो।** 'रुदादिभ्यः–' इति सूत्रात्सार्वधातुक इत्यनुवर्तते, सेति लुप्तषष्ठीकमनन्त्यस्येत्यनेन विशेष्यते तदाह **सार्वधातुकलिङोऽनन्त्यस्येति। सकारद्वयस्यापीति।** अवयवावयवोऽपि समुदायं प्रत्यवयव इत्याश्रयणात्सुटोऽपि लिङ्भक्तत्वादिति भावः। **आशीर्लिङीति।** भूयास्तामित्यादौ। ननु सुटि कृते 'अनचि च' इति द्वित्वस्यासिद्धत्वात्ततः प्रागेव 'स्कोः–' इति यासुटः सकारो लुप्यते, झलि परे यः संयोगस्तदादित्वात्। तथा चैकसकारकं रूपं तुल्यम्। सुडभावे यासुटः सकारस्य द्वित्वे कृते तु सुटि 'स्कोः–' इति सलोपात्सुट एव सकारस्य

सार्वधातुकावयवस्य या इत्यस्य इय् स्यात्। गुणः। यलोपः। भवेत्। 'सार्वधातुके' किम्—चिकीर्ष्यात् । मध्येऽपवादन्यायेन हि 'अतो लोपः' एव बाध्येत। भवेदित्यादौ तु परत्वाद्दीर्घः स्यात्। भवेताम्। २२१३ झेर्जुस् ।

तत्रापि आशिषि लिङ्यपि एधिषीष्टेत्यादावात्मनेपदं स्फुटतरं सकारद्वयस्य श्रवणमित्यर्थः। तत्र यासुटोऽभावेन सलोपाभावेन च सुट एव सकारस्य पृथक् स्पष्टं श्रवणसम्भवादिति भावः। तथा च भव यात् इति स्थिते। **अतो येयः।** या इति लुप्तषष्ठीकं पदम्। अत इति पञ्चमी। परस्येत्यध्याहार्यम्। इय इत्यत्राकार उच्चारणार्थः। 'रुदादिभ्यः—' इत्यस्मात् 'सार्वधातुके' इत्यनुवृत्तम् अवयवषष्ठ्या विपरिणम्यते। तदाह **अतः परस्येत्यादिना।** भव इय् त् इति स्थितम्। **गुण इति।** 'आद् गुणः' इत्यनेनेति शेषः। भवेय् त् इति स्थितम्। **यलोप इति।** 'लोपो व्योः—' इत्यनेनेति शेषः। **भवेदिति।** यलोपात् प्राग् हल्ङ्यादिलोपः संयोगान्तलोपश्च न शङ्क्यः, अन्तरङ्गत्वेन यलोपस्य पूर्वं प्रवृत्तेः, संयोगान्तलोपस्य त्रैपादिकत्वेनासिद्धत्वाच्चेति भावः। **सार्वधातुके किमिति।** 'रुदादिभ्यः—' इत्यतस्सार्वधातुक इत्यनुवृत्तिलभ्यं सार्वधातुकावयवस्येति किमर्थमित्यर्थः। भूयादित्यादावाशीर्लिङि आर्धधातुके अतः परत्वाभावादेव इयादेशाभावसिद्धेः सार्वधातुकग्रहणानुवृत्तिर्व्यर्थेत्याशयः। **चिकीर्ष्यादिति।** कृञ्धातोः सन्नन्ताद् आशीर्लिङि तिबादौ चिकीर्ष यादिति स्थिते 'अतो लोपः' इत्यकारलोपे चिकीर्ष्यादिति रूपम्। तत्र 'अतो येयः' इत्यत्र सार्वधातुकग्रहणाननुवृत्तौ चिकीर्ष यादिति स्थिते 'अतो येयः' इति इयादेशे आद्गुणे यलोपे चिकीर्षेदिति स्यात्। सार्वधातुकग्रहणानुवृत्तौ तु न दोषः, आशीर्लिङादेशस्य तिङो लिङाशिषीत्यार्धधातुकताया वक्ष्यमाणत्वादिति भावः। ननु आशिषि लिङि चिकीर्ष यादिति स्थिते नित्यत्वाद् 'अतो लोपः' इति अकारलोपे सति अतः परत्वाभावादेव अतो येय इत्यस्याप्रवृत्तेः, तत्र सार्वधातुकग्रहणानुवृत्तिर्व्यर्थैवेत्यत आह **मध्येऽपवादन्यायेन ह्यतो लोप एव बाध्येतेति।** षष्ठस्य चतुर्थपादे 'अतो लोपः' इति सूत्रम्, सप्तमस्य द्वितीयपादे 'अतो येयः' इति सूत्रम्, सप्तमस्य चतुर्थपादे तु 'अतो दीर्घो यञि' इति सूत्रमिति स्थितिः। तत्र आशीर्लिङि आर्धधातुके चिकीर्ष यादित्यत्राल्लोपप्राप्त्या विधिलिङि तु भव यादित्यत्र अतो दीर्घप्राप्त्या च इयादेशस्य निरवकाशत्वेन बाध्यसामान्यचिन्तामाश्रित्यापवादतया तेन अन्यतरस्मिन् बाध्ये सति 'मध्येऽपवादाः पूर्वान् विधीन् बाधन्ते नोत्तरान्' इति न्यायेन 'अतो लोपः' एव बाध-

---

द्वित्वे च द्विसकारकमपि रूपं तुल्यमेवेति सुटो विधानं व्यर्थमित्यपरितोषादाह **स्फुटतरं त्विति।** एधिषीष्टेत्यादाविति भावः। **मध्येऽपवादन्यायेनेति।** 'रुदादिभ्यः—'

(३-४-१०८) लिङो झेर्जुस् स्यात्। ज इत्। २२१४ उस्यपदान्तात्। (६-१-९६) अपदान्तादवर्णादुसि परे पररूपमेकादेशः स्यात्। इति प्राप्ते। परत्वान्नित्यत्वाच्च 'अतो येयः' (सू २२१२) इति प्राप्तः। यद्यप्यन्तरङ्गत्वात्पर-रूपं न्याय्यम्, तथापि 'यास्' इत्येतस्य इय् इति व्याख्येयम्। एवं च सलोपस्या-

---

महति। न तु 'अतो दीर्घः–' इत्यर्थः। एवं चार्धधातुके चिकीर्ष यादिति स्थिते अतः परत्वादियादेशः प्रसज्येतेत्यतिव्याप्तिः स्यादिति स्थितम्। एवं चाव्याप्तिरपीत्याह **भवेदित्यादाविति**। अतः परस्य इयादेशविधौ सार्वधातुकग्रहणाननुवृत्तौ विधिलिङ्-स्तिपि सार्वधातुके भव यादिति स्थिते इयादेशं परत्वाद् बाधित्वा 'अतो दीर्घो यञि' इति यञादौ सार्वधातुके परे अतो विधीयमानो दीर्घः स्यात्। ततश्च अतः परत्वाभावादियादेशो न स्यादित्यव्याप्तिः स्यादित्यर्थः। नच इयादेशस्य निरवकाशत्वाद् दीर्घबाधकत्वं शङ्क्यम्, चिकीर्ष्यादित्यार्धधातुके दीर्घप्राप्त्ययोग्ये इयादेशस्य सावकाशत्वादिति भावः। **भवेतामिति**। तसः तामादेशे शपि गुणे अवादेशे यासुडागमे सुटि सकारद्वयलोपे या इत्यस्य इयादेशे आद्गुणे यलोपः। अथ लिङो झ 'झोऽन्तः' इति प्राप्ते **झेर्जुस्**। 'लिङस्सीयुट्' इत्यतो लिङ इत्यनुवर्तते। तदाह **लिङो झेरिति**। अनेकाल्त्वा-त्सर्वादेशः। **ज इदिति**। जुसः स्थानिवत्त्वेन प्रत्ययत्वात् 'चुटू' इति जकार इत्संज्ञक इत्यर्थः। उसि शपि गुणे अवादेशे यासुटि सकारलोपे भव या उसिति स्थिते इयादेशं बाधित्वा पररूपप्रवृत्तिं शङ्कितुमाह **उस्यप**। 'एकः पूर्वपरयोः' इत्यधिकृतम्। 'आद्गुणः' इत्यस्मादादित्यनुवर्तते। 'एङि पररूपम्' इत्यस्मात्पररूपमिति, तदाह **अप-दान्तादिति। उसीति**। उसि यः अच् उकारः तस्मिन् परत इत्यर्थः। 'इको यणचि' इत्यतः अचीत्यनुवृत्तेः। यद्यपि उसः कृत्स्नस्याकारस्य च उसित्येकादेशेऽपि रूपं तुल्यम्, तथापि 'अकः सवर्णे दीर्घः' इत्यादावुत्तरत्राचीत्यावश्यकमत्राप्यनुवर्तत इति बोध्यम्। भिन्द्युरित्याद्युदाहरणम्। **इति प्राप्ते इति**। भव या उसित्यत्रा-कारस्योकारस्य चाद्गुणं बाधित्वा एकस्मिन्नुकारे पररूपे प्राप्ते सतीत्यर्थः। सति च पररूपे या इत्यस्याभावाद् इय् न स्यादिति मन्यते **परत्वादिति**। पररूपापेक्षया इयादेशः परो नित्यश्च, अकृते कृते च प्रवृत्तेः। कृते पररूपे य् इत्यस्यैकदेशविकृत-न्यायेन एकादेशस्य पूर्वान्तवत्त्वेन वा इयादेशस्य निर्बाधत्वात्। ततश्च पररूपं

इति सूत्रात्सार्वधातुक इत्यननुवृत्तावयं न्यायः प्रवर्तत इति भावः। **अन्तरङ्गत्वादिति**। प्रत्ययमात्रापेक्षत्वात्, 'अतो येयः' इत्यस्य त्वाङ्गत्वात्प्रकृतिप्रत्ययोभयसापेक्षत्वेन बहिरङ्ग-त्वादिति भावः। नन्वपदान्ताकारस्य जुसश्चाश्रयणात्पररूपस्याप्युभयसापेक्षत्वमस्त्येवेति चेत्। नैवम्, अनेकाश्रयणेऽपि प्रत्ययमात्राश्रयतया प्रकृतेरनाश्रयणात्। **व्याख्येय-**

पवाद इय्' (सू २२१२) इत्यत्र तु सन्धिरार्षः। भवेत्। भवेः। भवेतम्
भवेत। भवेयम् भवेव भवेम। २२१५ लिङाशिषि। (३-४-११६)
आशिषि लिङस्तिङार्धधातुकसंज्ञः स्यात्। २२१६ किदाशिषि। (३-४-१०४)

बाधित्वा इयादेशे भवेयुरिति रूपमिति प्राचीना मन्यन्त इत्यर्थः। ननु परकृ्त्यसंज्ञा-धिकारस्थत्वाभावाद् अङ्गानपेक्षत्वाद् अन्तरङ्गम्, इयादेशस्तु आः स्थान् प्रकृतिप्रत्ययो-भयसापेक्षत्वाद् बहिरङ्गः। ततश्च पराश्रित्यादपीयादेशात् पररूपस्यान्तरङ्गतया बलवत्त्वात् पररूपमेव इह स्यादिति शङ्कते **यद्यपीति**। परिहरति **तथापीति**। 'अतः' 'यास्' 'इयः' इति पदच्छेदः। यासिति लुप्तषष्ठीकं पदम्। ततश्च अतः परस्य यासित्येतस्य इय् स्यादिति *व्याख्येयमित्यर्थः। ननु लिङः स लोपोऽनन्त्यस्येति सकारस्य* लोप इयादेशं बाधित्वा नित्यत्वात् प्राप्नोतीति ततश्च यास् इत्यस्य इय् इति कथमित्यत आह **एवं चेति**। यासिति सकारान्तस्य इयादेशविधिसामर्थ्यादेव सकारलोपं बाधित्वा प्रागेव यासिति सकारान्तस्य इयादेशो भवतीत्यर्थः। तथा च सकारावस्थाया-मवर्णात्परत्वाभावेन पररूपस्याप्रवृत्तिरिति भावः। ननु यदि यास इय इतिच्छेदः, तदा सकारस्य रुत्वे, 'भोभगो–' इति यत्वे, 'लोपः शाकल्यस्य' इति तस्य लोपे अतो या इय इति स्यात्। आद्गुणे कर्तव्ये यलोपस्यासिद्धत्वादित्यत आह **सन्धिरार्ष इति**। 'आने मुक्' इति सूत्रे भाष्ये तु 'अतो या इय.' इत्येव सूत्रपाठो लक्ष्यते। **भवेरिति**। सिपि, शपि गुणः। अवादेशः। 'इतश्च' इति इकारलोपः। यासुडागमः। सकारस्य लोपः। इयादेशः। आद्गुणः। यलोपः। रुत्वविसर्गौ। एवं थसः तमादेशे थस्य तादेशे च, भवेतम् भवेतेति च रूपम्। **भवेयमिति**। मिपि अमादेशः। शप्। गुणः। अवादेशः। यासुट्। सलोपः। इयादेशः। आद्गुणः। **भवेवेति**। वस् शप् गुणावादेशौ। 'नित्यं ङितः' इति सकारलोपः। यासुट्। सलोपः। इयादेशः। आद्गुणः। यलोपः। एवं मसि भवेमेति रूपम्। इति विधिलिङ्प्रक्रिया। अथाशीर्लिङि विशेषमाह **लिङाशिषि**। लिङिति लुप्तषष्ठीकं पदम्। 'तिङ्शित्सार्वधातुकम्' इत्यतस्तिङित्यनुवर्तते, तदाह **आशिषि लिङस्तिङिति**। सार्वधातुक-*संज्ञापवादोऽयम्। ततश्च सार्वधातुकसंज्ञाकार्यं शबादि न भवति।* **किदाशिषि**। 'लिङः सीयुट्' इत्यतो लिङ इत्यनुवर्तते। 'यासुट् परस्मैपदेषु–' इत्यतः यासुडिति च।

मिति। एतच्च विप्रतिषेधसूत्रे भाष्ये स्पष्टम्। **आर्धधातुकसंज्ञ इति**। 'लङः शाकटायनस्यैव' इत्यत एवकारोऽनुवर्तनीयः। अन्यथा एकसंज्ञाधिकारबहिर्भूतत्वेन सार्वधातुकसंज्ञापि स्यात्ततश्च पक्षे शबादिः स्यात्। **किदाशिषि**। ङित्त्वेनैव गुणवृद्धि-प्रतिषेधे सिद्धे किद्वचनमिज्यादित्यादौ संप्रसारणार्थं जागर्यादित्यत्र गुणार्थं च।

आशिषि लिङो यासुट् किस्स्यात् । 'स्कोः-' (सू ३८०) इति सलोपः । २२१७ क्क्ङिति च । (१-१-५) गित्किन्ङिन्निमित्ते इग्लक्षणे गुणवृद्धी न स्तः ।

तदाह **आशिषि लिङ इति** । 'यासुट् परस्मैपदेषु-' इति ङित्त्वस्यापवादः । यद्यपि ङित्त्वेनैव गुणनिषेधः सिध्यति, तथापि इज्यादित्यादौ 'वचिस्वपियजादीनां किति' इति संप्रसारणार्थं कित्त्वमावश्यकम् इह न्याय्यत्वादुपन्यस्तम् । अथ आशिषि लिङस्तिपि आर्धधातुकत्वात् शबभावे 'इतश्च' इतीकारलोपे यासुडागमे अतः परत्वाभावात् सार्वधातुकत्वाभावाच्च इयादेशाभावे सुटि भूयास् स् त् इति स्थिते प्रक्रियामाह **स्कोरिति सलोप इति** । लिङस्सलोप इत्यस्य सार्वधातुकविषयत्वात् स्कोरिति सुटः पदान्तसंयोगादित्वाद् लोपः । ततो यासुटः सस्यापि पदान्तसंयोगादित्वादेव लोपः । न तु झल्परसंयोगादित्वेन यासुटः सस्य लोपे सुटः सस्य पदान्तसंयोगादित्वाल्लोप इति युक्तम् । तथा सति झल्परसंयोगादिलोपस्यासिद्धत्वेन संयोगान्तलोपापत्तेः । भ्रष्ट इत्यादौ सावकाशस्य झल्परसंयोगादिलोपस्य संयोगान्तलोपाबाधकत्वादिति शब्दरत्ने विस्तरः । एवं च भूयास् स् त् इति स्थिते सकारद्वयस्य निवृत्तौ भूयादिति रूपम् । तत्र 'सार्वधातुकार्धधातुकयोः' इति गुणे प्राप्ते । **क्क्ङिति च** । ग्क्ङ् एषां समाहारद्वन्द्वः कात्पूर्वं गकारस्य चर्त्वेन निर्देशाद् ग्क्ङ् च इद् यस्येति विग्रहः । द्वन्द्वान्ते श्रूयमाण इच्छब्दः प्रत्येकमन्वेति । तथा च गिति किति ङिति चेति लभ्यते । निमित्तसप्तम्येषा । 'इको गुणवृद्धी' इत्यनुवर्तते । चकार इत्यर्थे । इक इत्युच्चार्य विहिते इति लभ्यते । 'न धातुलोप आर्धधातुके' इत्यतो नेत्यनुवर्तते । तदाह **गित्किन्ङिन्निमित्ते इत्यादिना** । गितीत्यनुक्तौ तु 'ग्लाजिस्थश्च ग्स्नुः' इति ग्स्नुप्रत्यये जिष्णुरित्यत्र गुणनिषेधो न स्यात् । न च ग्स्नुप्रत्ययः किदेव क्रियतामिति वाच्यम्, तथा सति 'घुमास्था-' इति किति विहितस्य ईत्वस्य प्रसङ्गात् । यदि तु गिति किति ङिति परतो

जागर्तेर्गुणो हि ङिति पर्युदस्यते, ङित्त्वं चेह विशेषविहितेन कित्त्वेन बाध्यते । **सलोप इति** । झल्परसंयोगादित्वेन यासुटः सस्य लोपः सुटस्तु पदान्तसंयोगादित्वेनेति भाव इति मनोरमायां स्थितम्, तदसम्बद्धमिति मत्वात्र निष्कर्षमाहुः—भूयास्तां भूयास्तं भूयास्तेत्यत्र झल्परसंयोगादित्वेन यासुटः सस्य लोपः । भूयादित्यत्र तु सुट इव यासुटोऽपि सस्य लोपः पदान्तसंयोगादित्वेनैव । अन्यथा झल्परसंयोगादिलोपस्यासिद्धत्वात्संयोगान्तलोप एव स्यात् । मृष्ट इत्यादौ सावकाशस्य झल्परसंयोगादिलोपस्य संयोगान्तलोपाबाधकत्वादिति । **ङिन्निमित्त इति** । किति ङिति परे इको गुणवृद्धी न स्त इति न व्याख्यातम्, छिन्नंभिन्नमित्यत्र लघूपधगुणस्यानिषेधप्रसङ्गात् । नचारम्भसामर्थ्यं शङ्क्यम्, चितं स्तुतमित्यादावव्यवहिते किति चरितार्थत्वादिति

भूयात् भूयास्ताम् भूयासुः। भूयाः भूयास्तम् भूयास्त। भूयासम् भूयास्व

गुणवृद्धी न स्त इति व्याख्यायेत, तदा चिछन्नं भिन्नमित्यत्र क्तप्रत्यये परे लघूपधगुणनिषेधो न स्यात्, स्थानिभूतस्येको हला व्यवधानात्। न च येन नाव्यवधानन्यायः शङ्क्यः, चितं स्तुतमित्यादावव्यवहिते चरितार्थत्वात्। यदि च इको न गुणवृद्धी इत्येव व्याख्यायेत न त्विग्लक्षणे इति, तदा लिगोरपत्यं लैगवायनः, नडादित्वात् फक्, इह आदिवृद्धेरोर्गुणस्य च वस्तुगत्या इक्स्थानिकत्वाद् निषेधः स्यादित्यलम्। **भूयादिति**। इहार्धधातुकत्वाद् 'लिङः सलोप–' इत्यस्याप्रवृत्तेः 'स्कोः–' इति सलोप इत्युक्तं न विस्मर्तव्यम्। न चैवमपि संयोगादिलोपस्यासिद्धत्वाद्धल्ङ्यादिलोपः स्यादिति वाच्यम्, सुटि यासुटि च सति ताभ्यां विशिष्टस्यैव प्रत्ययत्वेनापृक्तत्वाभावादित्यलम्। **भूयास्तामिति**। आशिषि लिङस्तसस्तामादेशे आर्धधातुकत्वात् शबभावे यासुडागमे अतः परत्वाभावादियादेशाभावे सुटि झलपरसंयोगादित्वेन यासुटः सकारस्य लोपो गुणनिषेधश्च। **भूयासुरिति**। झेर्जुसि यासुडागमे गुणनिषेधे रूपम्। **भूया इति**। आशीर्लिङः सिपि 'इतश्च' इतीकारलोपः, यासुटः 'स्कोः' इति सलोपः, गुणनिषेधः, रुत्वविसर्गौ। **भूयास्तमिति**। थसस्तमादेशे यासुटि गुणनिषेधः। एवं थस्य

भावः। अन्ये तु— क्ङितीति प्रत्ययग्रहणात् प्रत्ययेन संनिधापितस्याङ्गस्य क्ङिति पर इति व्याख्याने तु छिन्नं भिन्नमित्यादि सिध्यत्येव। न चवं भवावो भवाम इत्यादावतिप्रसङ्ग इति वाच्यम्, अन्तरङ्गगुणं प्रति बहिरङ्गनिषेधस्याप्रवृत्तेरित्याहुः। 'क्ङिति च' इति सूत्रे चर्त्वेन गकारोऽपि प्रश्लिष्यत इत्याशयेन गित्किन्ङिन्निमित्त इत्युक्तम्। गितीति किम्, 'ग्लाजिस्थश्च ग्स्नुः' जिष्णुः। किति त्वस्मिन्स्थास्नुरित्यत्र 'घुमास्था–' इतीत्वं प्रसज्येत। न च ग्नोर्गित्त्वे भूष्णुरित्यत्रेग्निषेधो न स्यात् 'ग्लाजिस्थश्च–' इति चकाराद् भुवश्च ग्स्नुर्भवतीति स्वीकारादिति वाच्यम्, 'श्र्युकः क्किति' इत्यत्रापि चर्त्वेन गकारं प्रश्लिष्य गित्किनोरिरण स्यादिति व्याख्यानात्। न चैवं चर्त्वस्यासिद्धतया 'श्र्युकः–' इत्यत्र विसर्जनीयो न लभ्यत इति 'हशि च' इत्युत्वमेव स्यादिति वाच्यम्, सौत्रत्वात्। 'न मु ने' इत्यत्र नेति योगविभागेनासिद्धत्वाभावाद्विष्टसिद्धेः। वामनस्तु— 'ग्लाजिस्थश्च–' इति सूत्रे स्था आ इति प्रश्लेषात्स्थास्नुरित्यत्र 'घुमास्था–' इतीत्वं न भविष्यतीति गकारप्रश्लेषाभावाच्च 'श्र्युकः क्किति' इत्यत्र चर्त्वस्यासिद्धत्वाभावसमर्थनक्लेश इत्याह **इग्लक्षण इति**। इक इत्येवं विहिते इत्यर्थः। इग्लक्षणे किम्, लैगवायनः। लिगोर्नडादित्वात्फक्। इहादिवृद्धेरोर्गुणस्य च वस्तुगत्या इक्स्थानिकत्वेऽपि न निषेधः। न चेक इत्युक्तेऽपि 'क्ङिति च' इत्यारम्भसामर्थ्यादत्र निषेधो न भवेदिति शङ्क्यम्, नाडायनादौ तस्य चरितार्थत्वात्। **भूयादिति**। इह 'स्कोः–'

भूयास्म । २२१८ लुङ् । (३-२-०११) भूतार्थवृत्तेर्धातोर्लुङ् स्यात् । २२१९ माङि लुङ् । (३-३-१७५) सर्वलकारापवादः । २२२० **स्मोत्तरे लङ् च ।** (३-३-१७६) स्मोत्तरे माङि लङ् स्याल्लुङ् च । २२२१ च्लि लुङि । (३-१-४३) शबाद्यपवादः । २२२२ चलेः सिच् । (३-१-४४) इचावितौ । २२२३

तादेशेऽपि भूयास्तेति रूपम् । **भूयासमिति** । मिपः अमादेशे यासुटि गुणनिषेधः । **भूयास्वेति** । लिङो वस् 'नित्यं ङितः' इति सकारलोपः । यासुट् । गुणनिषेधः । एवं मसि भूयास्मेति रूपम् । इत्याशीर्लिङ्प्रक्रिया । **लुङ्** । 'धातोः' इति 'भूते' इति चाधिकृतम् । तदाह **भूतार्थवृत्तेरिति । माङि लुङ् ।** माङि प्रयुज्यमाने धातोर्लुङ् स्यादित्यर्थः । ननु 'लुङ्' इत्युदाहृतसूत्रेणैव सिद्धेः किमर्थमिदमित्यत आह **सर्वलकारापवाद इति** । मास्त्वित्यादौ तु मा इत्यव्ययान्तरं प्रतिषेधार्थकमित्याहुः । 'आङ्माङोश्च' इति सूत्रभाष्ये तु ङितो माशब्दस्य निर्देशात् प्रमाछन्द इत्यत्र तुक् न भवतीत्युक्तम् । माशब्दस्याव्ययान्तरस्य सत्त्वे तु तदेवोदाह्रियेत । मास्त्वित्यत्र तु अस्त्विति विभक्तिप्रतिरूपकमव्ययमित्यन्ये । **स्मोत्तरे लङ् च ।** चकाराद् 'माङि लुङ्' इत्यनुकृष्यते । स्म इत्यव्ययम् उत्तरं यस्मादिति विग्रहः, तदाह **स्मोत्तरे माङीति** । अयमपि सर्वलकारापवादः । **च्लि लुङि** । च्लि इति लुप्तप्रथमाकम् । लुङि परे धातोः च्लिप्रत्ययः स्यादित्यर्थः । **शबाद्यपवाद इति** । आदिना श्यनादिविकरणसंग्रहः । **च्लेः सिच् । इचाविति** । चित्स्वरश्चित्त्वस्य प्रयोजनम् । इदित्त्वस्य तु अमंस्तेत्यत्र 'अनिदितां हल उपधायाः-' इत्युपधालोपस्याप्रवृत्तिः

इति लोपस्यासिद्धत्वात्तकारस्य संयोगान्तलोपः प्राप्तः पदान्तसंयोगादिलोपेनानवकाशेन बाध्यते । नन्वेमपि संयोगादिलोपस्य 'पूर्वत्रासिद्धम्' इत्यसिद्धत्वाद्धल्ङ्यादिलोपः स्यात्, पदान्ते संयोगादिलोपस्य भृट् भृडित्यादौ सावकाशत्वादिति चेत् । अत्राहुः—सुड्या-सुटोः सतोस्ताभ्यां विशिष्टस्यैव प्रत्ययत्वेनापृक्तत्वाभावात्, हलन्तायाः प्रकृतेः परत्वा-भावाच्चोक्तदोषशङ्कैव नास्तीति । **सर्वलकारापवाद इति** । मास्त्वित्यादौ निषेधार्थ-कमाशब्दोऽन्य एव न तु माङित्याहुः । **च्लि लुङि** । इकार उच्चारणार्थ इति मनोरमा । न च 'मन्त्रे घस-' इति सूत्रे लेरिति स्थाने ल इत्युच्यमाने च्लिभिन्न-स्यापि लकारस्य लुक् स्यादिति शङ्क्यम्, 'गातिस्था-' इति सूत्रात्सिच इत्यनुवर्त्य सिच्स्थानिनः स्थान्यर्हस्य लस्य लुगिति व्याख्यायमतिप्रसङ्गाभावाद्विभाषानुवृत्तेर्लुको वैकल्पिकतया छन्दसि रूपान्तरस्यानापाद्यतया च सिजनुवृत्तिं विनापि नातिप्रसङ्ग इत्याहुः । **शबाद्यपवाद इति** । आदिशब्दात्सन्निहितप्रयुक्तानां श्यनादीनां ग्रहणम् । **इचावितावित्ति** । तत्रेदित्त्वे प्रयोजनममंस्तेत्यत्र 'अनिदिताम्-' इत्युपधालोपा-

गातिस्थाघुपाभूभ्यः सिचः परस्मैपदेषु । (२-४-७७) एभ्यः सिचो लुक्स्यात्। गापाविहेणादेशपिबती गृह्येते। २२२४ **भूसुवोस्तिङि** । (७-३-८८) भू सू एतयोः सार्वधातुके तिङि परे गुणो न स्यात्। २२२५ **अस्तिसिचो-ऽपृक्ते** । (७-३-९६) सिच् च अस् चेति समाहारद्वन्द्वः । सिज्लुक्दस्य

प्रयोजनम् । **गातिस्थाघु** । गाति स्था घु पा भू एषां द्वन्द्वः, पञ्चमीबहुवचनम्। परस्येति शेषः। सिच इति षष्ठी। गातीति श्तिपा निर्देशात् गाधातोर्ग्रहणम्। घु इत्यनेन 'दाधाघ्वदाप्' इति घुसंज्ञकयोः दाधातोर्धाधातोश्च ग्रहणम्। 'ण्यक्षत्रियार्ष-ञितो यूनि लुगणिञोः' इत्यस्माद्व्यवहितादपि लुगित्यनुवर्तते। 'जुहोत्यादिभ्यः श्लुः' इत्यव्यवहितमपि श्लुग्रहणं नानुवर्तते, व्याख्यानात्, तदाह **एभ्यः सिच** इत्यादिना। **गापाविहेति** । इह 'गातिस्था-' इति सूत्रे गातीत्यनेन पाग्रहणेन च 'इणो गा लुङि' इति लुग्विकरणस्येणो गादेशः, शब्विकरणः पिबादेशयोग्यः पाधातुश्च गृह्येते इत्यर्थः। गापोर्ग्रहणे इणपिबत्योर्ग्रहणमिति भाष्यादिति भावः। तथा च लुङस्तिबादेशे 'इतश्च' इति इकारलोपे शबपवादे च्लिप्रत्यये तस्य सिचि तस्य लुकि अडागमे अभूत् इति स्थिते पित्वाद् ङित्त्वाभावे 'सार्वधातुकार्धधातुकयोः' इति गुणे प्राप्ते **भूसुवोस्तिङि** । 'मिदेर्गुणः' इत्यतो गुण इति, 'नाभ्यस्तस्याचि पिति-' इत्यतो नेति सार्वधातुक इति चानुवर्तते। तदाह **एतयो रिति** । भू सू इत्य-नयोरित्यर्थः। इह 'षूङ् प्राणिगर्भविमोचने' इति लुग्विकरणस्य ग्रहणम्। न तु सुवतिसूयत्योः शविकरणश्यन्विकरणयोरपि, तत्र तिङो विकरणेन व्यवधानात्। अथ अभूत् इत्यत्र तकारस्येडागममाशङ्कितुमाह **अस्तिसिचोऽपृक्ते** । अस्तेश्च सिचश्चेति समाहारद्वन्द्वात् पञ्चमी। 'ब्रुव ईट्' इत्यत ईडित्यनुवर्तते। 'तस्मादित्युत्तरस्य' इति परिभाषया 'अस्तिसिचः-' इति पञ्चमी अपृक्तस्येति षष्ठीं प्रकल्पयति। ततश्च अस्तेः सिचश्च परस्यापृक्तस्य ईडागमः स्यादिति प्राचीना व्याचक्षते। तथा सति लुङि

भावः। **गातिस्था** । इह व्यवहितोऽपि लुगनुवर्तते न तु श्लुः, व्याख्यानादित्याशये-नाह **लुगिति** । **गापाविति** । गातीति श्तिपा विकरणशून्यस्य निर्देशाल्लुग्विकरण इणादेशो गृह्यते, 'लुग्विकरणालुग्विकरणयोरलुग्विकरणस्य ग्रहणम्' इति परिभाषया पिबतिर्गृह्यते न तु पातिरित्यर्थः। **भूसुवोः** । 'षूङ् प्राणिगर्भविमोचने' इत्यादादिकस्येह ग्रहणम्, सुवतिसूयत्योस्तु न ग्रहणम्, तिङो विकरणेन व्यवधानात्। **अस्तिसिचोऽ-पृक्ते** । *अत्र प्राञ्चः—अस्तिश्च सिच्चेति समाहारद्वन्द्वे अस्तिसिच्, तस्मादिति विग्रहं मत्वा* अस्तेः सिचश्च परस्येति व्याचख्युः । तच्चिन्त्यम्, तत्र समासान्तस्यानित्यत्वाश्रयणे 'द्वन्द्वाच्चुदषहान्ताद्-' इति प्राप्तस्य टचः परिहारेऽपि 'समुदाश्राङः' इति निर्देशाद्

सौत्रं भत्वम् । अस्तीत्यव्ययेन कर्मधारयः । ततः पञ्चम्याः सौत्रो लुक् । विद्यमानात्सिचोऽस्तेश्च परस्यापृक्तस्य हल ईडागमः स्यात् । इति ईट् नेह, सिचो लुका

अस्तेर्भूभावे अभूदिति न स्यात् । भूभावस्य स्थानिवत्त्वेन अस्तितया तत्रापृक्तस्य हल ईडागमस्य दुर्वारत्वात् । तथा अगात् अस्थात् अपादित्यादावपि 'गातिस्था–' इति सिचो लुक्यपि स्थानिवत्त्वेन सिचः परत्वादीडागमः स्यात् । अतः प्रकारान्तरेण व्याचष्टे **सिच अस् चेत्यादिना** । ननु सिचस्शब्दे सिच्शब्दस्य पूर्वखण्डस्यान्तर्वर्तिविभक्त्या पदत्वात् 'चोः कुः' इति कुत्वप्रसङ्ग इत्यत आह **सिच्शब्दस्य सौत्रं भत्वमिति** । तथा च भत्वेन पदत्वस्य बाधान्न कुत्वमिति भावः । ननु सिचस्शब्दे अस् इत्यनेनैवास्तेर्लाभाद् अस्तिग्रहणं किमर्थमित्यत आह **अस्तीत्यव्ययेन कर्मधारय इति** । अस्तीति विभक्तिप्रतिरूपकमव्ययं लुप्तसुब्विभक्तिकं विद्यमानार्थकम् । तेन सिचस्शब्दस्य कर्मधारय इत्यर्थः । तथा च अस्तिसिचस् इत्येकं पदमिति स्थितम् । **ततः पञ्चम्याः सौत्रो लुगिति** । 'सुपां सुलुक्–' इत्यनेनेति शेषः । तथा च अस्तिसिच इति पदाद् लब्धार्थमाह **विद्यमानात्सिचोऽस्तेश्च परस्येति** ।

'अल्पाच्तरम्' इत्येतदनित्यमित्याश्रित्य सिच्छब्दस्य परत्वसमर्थनेऽपि 'अस्तेर्भूः' इति भूभावस्य स्थानिवत्त्वेनास्तितया तत्रापृक्तस्य हल ईडागमस्य दुर्वारत्वात्, तथा गातिस्थाघुपाभूभ्यः सिचो लुक्यपि स्थानिवद्भावेन सिचः परत्वात्पायादगादस्थादभूदित्यादावतिप्रसङ्गाच्च । तदेतद् ध्वनयन्व्याचष्टे **सिच अस् चेति** । **सौत्रं भत्वमिति** । तेनात्र कुत्वजश्त्वे न भवत इति भावः । **विद्यमानादिति** । सिचोऽस्तेश्च विद्यमानविशेषणेन लुप्तात्सिचः कृतभूभावादस्तेश्च नेति भावः । भाष्यकारास्त्वाहुः—'अस्तिसिचोऽपृक्ते' इति द्विसकारकोऽयं निर्देश इति । अत्र माधवः—अस् स् इति समुदायस्याधातुतया 'इक्श्तिपौ धातुनिर्देशे' इति श्तिप् प्रत्ययो न स्यादिति । अत्र वदन्ति—द्विसकारकनिर्देशे श्तिप् न स्यादिति यदुक्तं तदभसोक्तिमात्रम् । इत्थं हि भाष्याशयः—सिच इत्यस्यानन्तरं सकारः प्रश्लिष्यते न तु श्तिपः प्राक्, अत एव 'सिचोऽपृक्ते' इति द्विसकारकोऽयं निर्देश इत्युक्तं भाष्ये । अन्यथा अस्तीति निर्देशो द्विसकारक इत्येव ब्रूयात्, एवं च सान्तादस्तेः सान्तात्सिच इति चार्थो निर्बाध एव । द्वितीयश्च सकारो लुप्यते 'संयोगान्तस्य पदान्तस्य' इति व्याख्यानात्, व्यपदेशिवद्भावेन पदान्तत्वाद् द्वितीयसकारस्य । न च संयोगान्तलोपस्यासिद्धत्वाद् 'अतो रोः–' इत्युत्वं दुर्लभमिति वाच्यम्, 'संयोगान्तलोपो रोरुत्वे' इति वार्तिकेनासिद्धत्वनिषेधात्, संयोगान्तं यत्पदमिति व्याख्याने तु नेह संयोगान्तलोपः, किंतु सकारद्वयस्यापि रुत्वे कृते 'अतो रोः–' इत्यनेनैक एवोकारो भविष्यति, विधेयविशेषणस्यैकत्वस्य पशोरेकत्ववद्विवक्षितत्वात् ।

लुप्तत्वात्। अभूत्। 'हलः' किम्-ऐधिषि। 'अपृक्तस्य' इति किम्-ऐधिष्ट। अभूताम्। २२२६ सिजभ्यस्तविदिभ्यश्च। (३-४-१०९) सिचोऽभ्यस्ताद्विदेश्च परस्य ङित्संबन्धिनो झेर्जुस् स्यात्। इति प्राप्ते २२२७ आतः।

हल इति। 'उतो वृद्धिर्लुकि हलि' इत्यतोऽनुवृत्तस्य हलीत्यस्य षष्ठ्या विपरिणाम इति भावः। इतीट् नेहेति। अनेन सूत्रेण अभूत् इत्यत्र ईडागमो नेत्यर्थः। कुत इत्यत आह सिचो लुका लुप्तत्वादिति। विद्यमानत्वविशेषणेन लुप्तात्सिचः परस्य नेति भावः। एवं च अगादित्यादावपि लुप्तात्सिचः परस्य, अस्तेर्लुङि कृतभूभावात्परस्य च नेत्युक्तप्रायम्। ऐधिषीति। एधधातोर्लुङि उत्तमपुरुषैकवचनम्, इट्। अत्र इकारस्य सिचः परत्वेऽपि हल्त्वाभावाद् ईडागमो नेति भावः। ऐधिष्टेति। एधधातोर्लुङि प्रथमपुरुषैकवचनम्। अत्र त इत्यस्य सिचः परत्वेऽपि एकाल्प्रत्ययत्वाभावेनापृक्तत्वाभावाद् ईडागमो नेति भावः। अभूतामिति। लुङस्तसि तस्य तामादेशः, च्लिः, सिच्। अट्। गुणनिषेधः। सिजभ्यस्तविदि। 'झेर्जुस्' इति सूत्रमनुवर्तते। 'नित्यं ङितः' इत्यतो ङित इति च तदाह सिचोऽभ्यस्तादित्यादिना। इति प्राप्त इति। लिङो झेर्जुसीति शेषः। आतः। 'झेर्जुस्' इति सूत्रमनुवर्तते। 'आतः सिज्लुगन्तादिति वक्तव्यम्' इति वार्तिकं भाष्ये पठितम्। ततश्च सिज्लुकि यदाकारान्तं तस्मात्परस्य झेर्जुसिति लभ्यते 'सिजभ्यस्त-' इति

---

*न च स्थानिभेदेन उकारद्वये सत्यपि न क्षतिः, सवर्णदीर्घानन्तरमाद्गुणे सति समी-*हितरूपसिद्धेरिति वाच्यम्, एकपदाश्रयत्वेनान्तरङ्गत्वाद् गुणे पश्चादवादेशप्रवृत्त्या 'अस्तिसिचोऽपृक्ते' इति रूपासिद्धेः, तस्मादुक्तरीत्या एक एवोकार इति स्वीकर्तव्यम्। अतएव विधेयगतैकत्वस्य विवक्षितत्वाद् 'एकः पूर्वपरयोः' इत्यत्रैकग्रहणं भाष्यादौ प्रत्याख्यातम्। नन्वति परे यो रुः स ततः परो न भवति, अतः परस्तु अतिपूर्वो न भवतीति रुद्वयस्थाने कथमुकारः स्यात्। मैवम्, 'रोः' इति जातिपरनिर्देशेनातः परत्वस्य पूर्वत्वस्य च सम्भवात्। न चैवमपि परत्वाद् 'हशि च' इति प्रथमस्यैव रोरुः स्यादिति वाच्यम्, रुत्वस्यासिद्धतया हश्परत्वाभावात्। न चाश्रयासिद्धत्वमिति वाच्यम्, स्थान्यंशे तथात्वेऽपि निमित्तभूतहशंशे तदसंभवात्। यद्यपि सत्व जातेरेकत्वादुभयोरपि एक एव रुर्भवतीति व्याख्याया नायं क्लेशस्तथापि रुत्वविधौ पदस्येत्यनुवर्तमानादेकपदान्तत्वं न संभवति, द्वितीयसकारस्य पृथक्पदत्वादित्याहुः। अपृक्तहल इति। अपृक्तसार्वधातुकस्येति प्राचोक्तं त्वयुक्तम्। ऐधिषि इत्यादावतिव्याप्तेः, सार्वधातुकग्रहणव्यावर्त्यालाभाच्च। आतः। सिज्ग्रहणमनुवर्तते 'झेर्जुस्' इति च। सिच आकाराच्च परस्य झेर्जुस्। तत्र प्रत्ययलक्षणेन सिचः परत्वमाकारात्तु श्रुत्या। एवं स्थिते फलितमाह

(३-४-११०) सिज्लुक्यादन्तादेव झेर्जुस् स्यात्। अभूवन्। अभूः अभूतम् अभूत। अभूवम् अभूव अभूम। २२२८ न माङ्योगे। (६-४-७४) अडाटौ न स्तः। मा भवान् भूत्। मा स्म भवत् भूद्वा। २२२९ लिङ्निमित्ते लृङ् क्रियातिपत्तौ। (३-३-१३९) हेतुहेतुमद्भावादि लिङ्निमित्तं तत्र भविष्यत्यर्थे लृङ् स्यात्क्रियाया अनिष्पत्तौ गम्यमानायाम्। अभविष्यत्

पूर्वसूत्रेणैव सिद्धे नियमार्थमिदम्। तदाह **सिज्लुक्यादन्तादेवेति**। **अभूवन्निति**। झिः, च्लिः, सिच्, लुक्, अट्, झोऽन्तः 'इतश्च' इति इकारलोपः। तकारस्य संयोगान्तलोपः। 'भुवो वुग्लुङ्लिटोः' इति वुक्। सिज्लुकि आतः परस्यैवेति नियमात् 'सिजभ्यस्त-' इति न जुसिति भावः। **अभूरिति**। सिप्, च्लिः, सिच्, लुक्, अट्, इकारलोपो रुत्वविसर्गौ। **अभूतमिति**। थसस्तम् च्लिः, सिच्, लुक्, अट्, गुणनिषेधः। एवं थस्य तादेशे अभूतेति रूपम्। **अभूवमिति**। मिप्, अम्, च्लिः, सिच्, लुक्, अट्, वुक्। **अभूवेति**। वस्, च्लिः, सिच्, लुक्, अट्, 'नित्यं ङितः' इति सकारलोपो गुणनिषेधः। एवं मसि अभूमेति रूपम्। अथ माङि लुङि विशेषमाह **न माङ्योगे**। शेषपूरणेन सूत्रं व्याचष्टे **अडाटौ न स्त इति**। 'लुङ्लङ्लृङ्क्ष्वडुदात्तः' इत्यतः 'आडजादीनाम्' इत्यतश्च तदनुवृत्तेरिति भावः। **मा भवान् भूदिति**। मा भूदित्यत्र अडागमे सति असति च विशेषाभावाद् भवत्पदस्य मध्ये प्रयोगः। अथ 'स्मोत्तरे लङ् च' इत्यस्य उदाहरति **मा स्म भवद् भूद्वेति**। एवं बहुवचने मा स्म भवन् मा स्म भूवन्निति चोदाहरणं बोध्यम्। इति लुङ्प्रक्रिया। **लिङ्निमित्ते**। **हेतुहेतुमद्भावादीति**। 'हेतुहेतुमतोर्लिङ्', 'इच्छार्थेषु लिङ्लोटौ, इत्यादि लिङ्निमित्तं लकारार्थप्रक्रियायां स्पष्टीभविष्यति। **भविष्यत्यर्थ इति**। 'भविष्यति मर्यादावचने' इत्यतः तदनुवृत्तेरिति भावः। क्रियातिपत्तिपदं व्याचष्टे **क्रियाया अनिष्पत्ताविति**। सुवृष्टिश्चेदभविष्यत् तदा सुभिक्षमभविष्यत् इत्यु-

---

सिज्लुकीति। 'गातिस्था-' इति सूत्रेणेत्यर्थः। 'सिजभ्यस्त-' इति पूर्वसूत्रेणैवादन्तादपि झेः जुसि सिद्धे नियमार्थोऽयमित्याह **आदन्तादेवेति**। **हेतुहेतुमद्भावादीति**। अत्र केचिद् आदिशब्देनाशंसावचनं गृह्यत इति व्याख्याय आशंसावचनं लिङो यन्निमित्तं तत्रापि क्रियातिपत्तौ भविष्यति लृङ्, गुरुश्चेदायास्यत् आशंसे अहमध्येष्ये इत्युदाहरन्ति। अन्ये तु—'भविष्यति मर्यादा-' इत्यादिना भविष्यतीत्युपक्रम्य यो यो लिङ् विहितस्तन्निमित्त एव क्रियातिपत्तौ लृङ् भवति नान्यत्रेत्याहुः। **लिङ्निमित्तमिति**। 'हेतुहेतुमतोर्लिङ्', 'इच्छार्थेषु लिङ्लोटौ' इत्यादिलकारार्थप्रक्रियायां स्फुटीभविष्यति। **अनिष्पत्ताविति**। सुवृष्टिश्चेदभवि-

अभविष्यताम् अभविष्यन्। अभविष्यः अभविष्यतम् अभविष्यत। अभविष्यम् अभविष्याव अभविष्याम। २२३० ते प्राग्धातोः। (१-४-८०) ते गत्युपसर्गसंज्ञका धातोः प्रागेव प्रयोक्तव्याः। २२३१ आनि लोट्। (८-४-१६) उपसर्गस्थान्निमित्तात्परस्य लोडादेशस्यानीत्यस्य नस्य णः स्यात्। प्रभवाणि। 'दुरः षत्वणत्वयोरुपसर्गत्वप्रतिषेधो वक्तव्यः'। दुःस्थितिः। दुर्भवानि। 'अन्तः-

---

दाहरणं बोध्यम्। **अभविष्यदिति**। लृङ्, तिप्, 'इतश्च' इतीकारलोपः। 'स्यतासी लृलुटोः' इति शबपवादः स्यप्रत्ययः। अट्, वलादिलक्षण इट् गुणावादेशौ। षत्वम्। **अभविष्यतामिति**। तसस्तामादेशः। स्यः, अट्, इट्, गुणावादेशौ, षत्वम्। **अभविष्यन्निति**। झिः, स्यः, अट्, इट्, गुणावादेशौ। 'झोऽन्तः' इति झेरन्तादेशः 'इतश्च' इतीकारलोपः। तकारस्य संयोगान्तलोपः। षत्वम्। **अभविष्य इति**। सिप्, स्यः, अट्, इट्, गुणः, अवादेशः, 'इतश्च' इतीकारलोपः, षत्वम्, रुत्वविसर्गौ। **अभविष्यतमिति**। थसः तमादेशः, स्यः, अट्, इट्, गुणावौ, षत्वम्। एवं थस्य तादेशादि पूर्ववत्। **अभविष्यमिति**। मिपः अम्, स्यः, अट्, इट्, गुणावौ, पूर्वरूपम्, षत्वम्। **अभविष्यावेति**। वस्, स्यः, अट्, 'नित्यं ङितः' इति सकारलोप। अतो दीर्घः। षत्वम्। एवं मसि अभविष्यामेति रूपम्। इति लृङ्प्रक्रिया। अथ प्रसङ्गादाह **ते प्राग्धातोः**। ते इत्यस्य विवरणम् **गत्युपसर्गसंज्ञा इति**। 'उपसर्गाः क्रियायोगे' 'गतिश्च' इति प्रकृतत्वादिति भावः। **प्रागेवेति**। न परतो नापि व्यवहिता इत्यर्थः। इह धातोः प्रागेव प्रयुज्यमाना गत्युपसर्गाः स्युरिति संज्ञानियमपक्षोऽपि भाष्ये स्थितः। **आनि लोट्**। लोडिति आनीति च लुप्तषष्ठीकं पदम्। 'रषाभ्यां नो णः' इत्यनुवर्तते। 'उपसर्गादसमासेऽपि' इत्यत उपसर्गादिति च। तदाह **उपसर्गस्थान्निमित्तादिति**। रेफषकारात्मकादित्यर्थः। असमानपदत्वार्थ आरम्भः। 'अट्कुप्वाङ्नुम्व्यवायेऽपि' इति सूत्रं णत्वप्रकरणे सर्वत्र भवतीति भाष्यम्। **दुरः षत्वेति**। षत्वणत्वयोः कर्तव्ययोः दुर उपसर्गत्वप्रतिषेध इत्यर्थः। **दुःस्थितिरिति**।

ष्यत्तदा सुभिक्षमभविष्यदिति तत्रैवोदाहरिष्यति। **प्रागेवेति**। न परतः, नापि व्यवहिता इत्यर्थः। अतएव 'छन्दसि परेऽपि' 'व्यवहिताश्च' इति सूत्रितम्। **आनि लोट्**। नि लोडित्येव वक्तव्ये आनिग्रहणमागमशासनस्यानित्यता ज्ञापयितुम्। तेन 'सागरं तर्तुकामस्य जप्त्वा स्तोत्रम्' इत्यादि सिध्यति। लोड्ग्रहणं स्पष्टप्रतिपत्त्यर्थम्। न च प्रकृष्टा वपा येषां तानि प्रवपानि मांसानीत्यत्राप्यनेन नित्यं णत्वं स्यादिति वाच्यम्, उपसर्गग्रहणादर्थवद्ग्रहणाच्चास्याप्रवृत्तेः। 'प्रातिपदिकान्त--' इति वैकल्पिकत्वं

शब्दस्याङ्किविधि णत्वेषूपसर्गत्वं वाच्यम्' । अन्तर्धा । अन्तर्धिः । अन्तर्भवाणि ।

२२३२ शेषे विभाषाऽकखादावषान्त उपदेशे । (८-४-१८) उपदेशे कादिखादिषान्तवर्जे गदनदादेरन्यस्मिन्धातौ परे उपसर्गस्थान्निमित्तात्परस्य नेर्नस्य णत्वं वा स्यात् । प्रणिभवति, प्रनिभवति । इहोपसर्गाणामसमस्तत्वेऽपि संहिता नित्या । तदुक्तम्—

'संहितैकपदे नित्या नित्या धातूपसर्गयोः ।
नित्या समासे वाक्ये तु सा विवक्षामपेक्षते ॥' इति ।

सत्ताद्यनिर्देशश्चोपलक्षणम् । याणास्त्वार्गो भवतीत्यादावुत्पद्यत इत्या-

---

अत्र 'उपसर्गादसमासेऽपि णोपदेशस्य' इति पत्वं न भवति । दुर्भवानीति । अत्र 'आनि लोट्' इति णत्वं न भवति । अन्तःशब्दस्येति । अङ्विधौ किविधौ णत्वे च कर्तव्ये अन्तर् इत्यस्य उपसर्गत्वमित्यर्थः । प्रादित्वाभावादप्राप्ते वचनम् । अन्तर्धेति । 'स्त्रियाम्' इत्यधिकारे धाधातोः 'आतश्चोपसर्गे' इत्यङ् । टाप् । अन्तर्धिरिति । 'उपसर्गे घोः किः' । अन्तर्भवाणीति । 'आनि लोट्' इति णत्वम् । शेषे विभाषा । अकखादाविति च्छेदः । 'नेर्गदनद–' इति पूर्वसूत्रोक्तधातुभ्योऽन्यः शेषः । तदाह गदनदादेरन्यस्मिन्निति । ननु णत्वप्रकरणं संहिताधिकारस्थम् । ततश्चाविवक्षितायां संहितायाम् उपसर्गात्परत्वाभावाद् णत्वाभावः । विवक्षितायां तु णत्वमिति विकल्पसिद्धेः किमनेन विभाषाग्रहणेनेत्यत आह इहोपसर्गाणामिति । उक्तमिति। हरिणेति शेषः । अत्र एकपद इत्यनेन अखण्डं पदं विवक्षितम् , 'नित्या समासे' इति लिङ्गात् । अखण्डत्वं च पदभिन्नोत्तरखण्डकत्वम् । अन्यथा राजीयतीत्यादौ 'अतो

न्विष्यत एव । दुरः षत्वेति । 'दुरः परस्य णत्वं नेति केचित्' इति प्राचोक्तं त्वयुक्तम् । एवं हि सिद्धान्ते णत्वं स्यात् तच्चाकरविरुद्धमिति भावः । अन्तर्धेति । 'आतश्चोपसर्गे' इत्यङ् टाप् । अन्तर्धिरिति । 'उपसर्गे घोः किः' । अच्छब्दस्याङ्विधावुपसर्गत्वमुपसंख्यायते, तत्तु प्रकृतानुपयोगादुपेक्षितम् । भिदादिपाठेन 'प्रज्ञाश्रद्धा–' इति निपातनेन च गतार्थत्वाच्च । शेषे विभाषा । 'नेर्गदनद–' इति सूत्रोक्तापेक्षया शेष इत्याह गदनदादेरन्यस्मिन्निति । उपदेशे किम् , प्रनिचकार प्रनिचखादेत्यत्रापि निषेधो यथा स्यात् । अषान्तेति किम् , प्रनिपिनष्टि । उपदेशग्रहणात् प्रनिद्वेक्ष्यति । 'न लुकः स्यात्' प्रनिचक्शे इत्यत्रापि निषेधः । शेषग्रहणं स्पष्टार्थम् । णत्वशास्त्रे संहितायामित्यधिकारात् संहितायामविवक्षितायां णत्वाभावः, संहितायां तु णत्वमिति विकल्पसिद्धेः किमनेन विभाषाग्रहणेनेत्याशङ्का न कार्येत्याह इहोपसर्गाणामित्यादि । एकपद इत्यनेनैव सिद्धे समासग्रहणं गोबलीवर्दन्यायेनेति बोध्यम् ।

थर्यात् । उपसर्गास्त्वर्थविशेषस्य द्योतकाः । प्रभवति पराभवति संभवति अनुभवति अभिभवति उद्भवति परिभवतीत्यादौ विलक्षणार्थावगतेः । उक्तं च—

'उपसर्गेण धात्वर्थो बलादन्यत्र नीयते ।
प्रहाराहारसंहारविहारपरिहारवत् ॥' इति ।

एध २ वृद्धौ । कत्थन्ताः षट्त्रिंशदनुदात्तेतः । २२३३ टित आत्मने-

---

गुणे' इति शपा पररूपम् एकादेशः पक्षे न स्यात् । **अर्थनिर्देशश्चेति** । धातुपाठे 'भू सत्तायाम्' इत्याद्यर्थनिर्देश इत्यर्थः । **उपलक्षणमिति** । प्रदर्शनमात्रमित्यर्थः । नन्वर्थान्तरपरिसंख्या कुतो न स्यादित्यत आह **यागादिति** । न च यागात् स्वर्गो भवतीत्यादौ उत्पत्त्यादौ लक्षणा कुतो न स्यादिति वाच्यम्, प्रयोगप्राचुर्यसत्त्वात्। पाणिनिर्हि धातुपाठे धातून् कांश्चिदर्थसहितान् कांश्चिदर्थरहितान् पठतीति 'चुट्' इति सूत्रभाष्ये स्थितम्। न चातिप्रसङ्गः शङ्क्यः, अनेकार्था अपि धातवो भवन्तीति भाष्ये अपिशब्देन प्रयोगानुसारित्वावगतेः । सर्वेषु धातुष्वर्थनिर्देशस्त्वाधुनिकः । एवं च 'सेधतेर्गतौ' इति सूत्रे गताविन्युपादानात् 'षिध गत्याम्' इत्यर्थनिर्देशः अपाणिनीय एवेति दिक् । ननु भूधातोः केवलस्योत्पत्त्याद्यर्थकत्वे उद्भवतीत्यादौ उपसर्गा व्यर्था इत्यत आह **उपसर्गास्त्विति** । उपसर्गं विनापि भूधातोरुत्पत्त्याद्यर्थप्रतीतेः । उद्भवतीत्यादौ प्रयुज्यमाना अप्युपसर्गा द्योतका एव, न तु वाचका इति भावः । द्योतकत्वं वा तेषां किमर्थं स्वीकार्यमित्यत आह **प्रभवतीत्यादि** । प्रभवः प्रकाश उत्पत्तिः शक्तिर्वा । पराभवः पराजयः । सम्भवः सम्भावना । अनुभव उपभोगः । अभिभवो हिंसा । उद्भव उत्पत्तिः । परिभवः तिरस्कारः । **उक्तं चेति** । हरिणेति शेषः । प्रहारः कशाद्याघातः । आहारो भक्षणम् । संहारो वधः । विहारः क्रीडा । परिहारः परित्यागः । इति भूधातुप्रक्रिया । **एध वृद्धाविति** । जायते, अस्ति, विपरिणमते, वर्धते, अपक्षीयते, विनश्यतीति षड् भावविकाराः । तत्र चतुर्थावस्था वृद्धिः उपचयः । **कत्थ-**

वाक्ये त्विति । सा संहिता विवक्षाधीना न त्वत्र नित्येत्यर्थः । **उपलक्षणमिति** । एतच्च सत्ताद्यर्थनिर्देशं कृतवतो भीमसेनस्यापि संमतमित्यत्र 'कुर्द खुर्द गुर्द गुद क्रीडायामेव' इत्येवकारो ज्ञापकः । 'सेधतेर्गतौ' इति सूत्रे गताविति तदपि 'षिध गत्याम्' इत्याद्यर्थनिर्देशस्योपलक्षणत्व एव घटते नान्यथेति दिक् । **उत्पद्यत इत्याद्यर्थादिति** । एवं च उपसर्गं विनाप्युत्पत्त्यर्थप्रतीतेरुद्भवतीत्यादौ प्रयुज्यमानोऽप्युपसर्गो द्योतक एव न तु वाचक इति भावः । **उपसर्गेण धात्वर्थ इति** । अत एवाऽमरेणाप्युक्तम्—'स्यादाभाषणमालापः प्रलापोऽनर्थकं वचः । अनुलापो मुहुर्भाषा विलापः परिदेवनम् । विप्रलापो विरोधोक्तिः संलापो भाषणं मिथः ।

पदानां टेरे। (३-४-७९) टितो लस्यात्मनेपदानां टेरेत्वं स्यात् । एधते। २२३४ सार्वधातुकमपित् । (१-२-४) अपित्सार्वधातुकं ङिद्वत्स्यात्। २२३५ आतो ङितः। (७-२-८१) अतः परस्य ङितामाकारस्य इय् स्यात्। एधेते एधन्ते। २२३६ थासः से । (३-४-८०) टितो लस्य थासः से स्यात्। एधसे एधेथे एधध्वे। 'अतो गुणे' (सू १९१)। एधे एधावहे

न्ता इति। 'कत्थ श्लाघायाम्' इत्यन्ता इत्यर्थः। अनुदात्तेत इति। ततश्च एतेभ्य आत्मनेपदमेवेति भावः। तत्र एध् इत्यस्मात् कर्तरि लटि तस्यात्मनेपदप्रथमपुरुषैकवचने तादेशे शपि एध त इति स्थिते टित आत्म। 'टेः' 'ए' इति च्छेदः। लस्येत्यधिकृतम्। तदाह टितो लस्येति। आदेशानामिति शेषः। अत्रात्मनेपदशब्देन तङेव गृह्यते नत्वानोऽपि। तेन पचमानो यजमान इत्यादावेत्वं नेति भाष्ये स्पष्टम्। एधत इति। अत्र तकारादकारस्य व्यपदेशिवद्भावेनान्त्यादित्वेन टित्वादेत्वम्। अथ लटः प्रथमपुरुषद्विवचने आतामित्यादेशे टित आत्मनेपदानाम्–' इति आम एत्वे शपि एध आते इति स्थिते ङित्कार्यं वक्ष्यन् ङित्त्वमाह सार्वधातुकमपित्। 'गाङ्कुटादिभ्यः–' इत्यतो ङिदित्यनुवर्तते। अङितो ङित्त्वं वास्तवं न संभवतीति ङिद्वदिति लभ्यते। तदाह ङिद्वदिति। आतो ङितः। ङित इत्यवयवषष्ठी। 'अतो येयः' इत्यस्माद् अत इति पञ्चम्यन्तम्, इय इति प्रथमान्तं चानुवर्तते। यकारादकार उच्चारणार्थः। तदाह अतः परस्येति। ङितामित्यनन्तरं अवयवस्येति शेषः। एधेते इति। एध आते इति स्थिते, आकारस्य इय्, आद् गुणः, 'लोपो व्योर्वलि' इति यकारलोप इति भावः। एधन्त इति। लटः प्रथमपुरुषबहुवचने झादेशे परे शपि झकारस्य अन्तादेशे पररूपे टेरेत्वमिति भावः। अथ लटो मध्यमपुरुषैकवचने थासादेशे कृते टित आत्मनेपदानामित्येत्वे प्राप्ते। थासः से। 'से' इति लुप्तप्रथमाकम्। एधस इति। थासि शपि थासः सेभावः। एधेथ इति। लटो मध्यमपुरुषद्विवचने आथामादेशे शपि आम एत्वे आकारस्य इयादेशे गुणे यलोप इति भावः। एधध्व इति। लटो मध्यमपुरुषबहुवचने ध्वमादेशे शपि टेरेत्वे रूपम्। लट उत्तमपुरुषैकवचने इडादेशे एत्वे शपि एध ए इति स्थिते प्रक्रियां दर्शयति अतो गुण इति। 'अतो

सुप्रलापः सुवचनमपलापस्तु निह्नवः' इति। टित आत्मने। ननु शानचोऽपि लस्थानिकात्मनेपदत्वात्पचमानो यजमान इत्यत्र टेरेत्वेन भवितव्यमिति चेत्। अत्राहुः— प्रकृतेस्तिबादिभिरात्मनेपदानां विशेषणान्न दोषः। एवं च 'टितस्तङां टेरे' इत्येव वक्तुमुचितमिति। थासः से। एकारोच्चारणं ज्ञापनार्थमिति 'लिटस्तझयोः–' इत्यत्र स्फुटीभविष्यति। अतो गुण इति। इट एत्वे कृते आद्गुणं बाधित्वा वृद्धौ

एधामहे। २२३७ **इजादेश्च गुरुमतोऽनृच्छः।** (३-१-३६) इजादिर्यो धातुर्गुरुमाननृच्छत्यन्यस्तत आम्स्याल्लिटि। 'आमो मकारस्य नेत्वम्'। आस्कासोराम्विधानाज्ज्ञापकात्। २२३८ **आमः।** (२-४-८१) आमः परस्य लेर्लुक्स्यात्। २२३९ **कृञ्चानुप्रयुज्यते लिटि।** (३-१-४०) आमन्तााल्लिट्-

---

गुणे' इति पररूपे वृद्ध्यपवादे कृते सति एध इति रूपमित्यर्थः। **एधावहे इति।** लट उत्तमपुरुषद्विवचने वहि इत्यादेशे टेरेत्वे शपि अतो दीर्घः। **एधामहे इति।** लट उत्तमपुरुषबहुवचने महि इत्यादेशे टेरेत्वे शपि अतो दीर्घः। महिङिति ङकारस्तङ्-प्रत्याहारार्थः। इति लट्प्रक्रिया। **इजादेश्च।** नञः अृच्छ इत्यनेन समासे अनृच्छ इत्यस्मात् पञ्चमी। 'धातोरेकाचः–' इत्यतो धातोरित्यनुवर्तते। 'कास्प्रत्ययात्–' इत्यत आमिति लिटीति चानुवर्तते। तदाह **इजादिरित्यादिना। आस्कासोरिति।** 'कास्प्रत्ययादाममन्त्रे लिटि' इति 'दयायासश्च' इति च, कास्धातोः, आस्धातोश्च लिटि आम् विहितः। तत्र मकारस्य इत्संज्ञकत्वे 'मिदचोऽन्त्यात् परः' इति आकारादाकारान्तरं स्यात्। ततश्च सवर्णदीर्घे कृते कास् आस् इत्येव भवतीति आम्विधिरनर्थकः स्यात्। अत आमो मकारस्य नेत्संज्ञेति विज्ञायत इत्यर्थः। तथा च एध् आम् ल इति स्थिते **आमः।** 'मन्त्रे घसह्वर–' इत्यतो लेरिति, 'ण्यक्षत्रियार्षञितः–' इत्यतो लुगिति चानुवर्तते, तदाह **आमः परस्य लेरिति।** अत्रेदमवधेयम्। 'कृन्मेजन्तः' इत्यत्र कृद्यो मान्तस्तदन्तमव्ययमिति व्याख्याने एधामित्यादि नाव्ययम्, लिट एव कृत्त्वात् तस्य च मान्तत्वाभावात्। तथा च प्रत्ययलक्षणेन कृदन्तत्वात् प्रातिपदिकत्वे स्वाद्युत्पत्तौ 'आमः' इति लुक्। लेरिति तु नानुवर्तते। मान्तं कृदन्तमव्ययमिति व्याख्याने तु प्रत्ययलक्षणेन कृदन्तत्वाद् एधामिति मान्तमव्ययम्। ततः सुबुत्पत्तौ 'अव्ययादाप्सुपः' इति लुक्। 'आमः' इत्यनेन तु परिशेषाल्लेरेव लुक्सिद्धेर्लेरिति नानुवर्तनीयम्। आमः परस्य लेरिति विवरणवाक्ये तु लेरिति स्पष्टार्थमेव। एवं च एधामित्यव्ययं न वेति पक्षद्वयम्, उभयथापि सुबन्तं पदमिति भाष्ये स्पष्टम्।

प्राप्तायामनेन पररूपमित्यर्थः। **इजादेश्च।** 'धातोरेकाचः–' इत्यतो धातुग्रहणं 'कास्प्रत्ययात्–' इत्यत आम् लिटीति चानुवर्तते इत्याह **इजादिर्यो धातुरि-त्यादि।** गुरुमान् किम्, इयेष। अृच्छेस्त्वानर्च्छ। **आमः।** 'लक्षणप्रतिपदोक्त–' परिभाषया, 'प्रत्ययग्रहण–' परिभाषया च नेह—आम, आमतुः। **परस्य लेर्लुगिति।** 'मन्त्रे घस–' इति सूत्राल्लेरित्यनुवर्त्य 'लेर्लुक्' इति काशिकादौ व्याख्यातं तदत्रो-पेक्षितं व्यावर्त्यालाभात्। तिङाद्यपवादत्वाल्लावस्थायामेवायं लुक्। तेन आमन्तस्या-तिङन्तत्वाद्देवदत्तादिपदात्परत्वेऽपि 'तिङ्ङतिङः' इति न निघातः। आमन्तात्परस्य

पराः कृभ्वस्तयोऽनुप्रयुज्यन्ते। 'आम्प्रत्ययवत्कृञोऽनुप्रयोगस्य' (सू २२४०) इति सूत्रे कृञ्ग्रहणसामर्थ्यादनुप्रयोगोऽन्यस्यापीति ज्ञायते। तेन 'कृभ्वस्तियोगे–' (सू २११७) इत्यतः 'कृञो द्वितीय–' (सू २१२६) इति ञकारेण प्रत्याहाराश्रयणात्कृभ्वस्तिलाभः। तेषां क्रियासामान्यवाचित्वादाम्प्रकृतीनां विशेषवाचित्वात्तदर्थयोरभेदेनान्वयः। सम्पदिस्तु प्रत्याहारेऽन्तर्भूतोऽप्यनभिवितार्थत्वान्न प्रयुज्यते।

कृञ्चानु। 'कास्प्रत्ययादाम्–' इत्यत आमित्यनुवृत्तं पञ्चम्या विपरिणम्यते। प्रत्ययग्रहणपरिभाषया तदन्तं गृह्यते। लिटि परे यः कृञ् सः अनुप्रयुज्यत इत्यन्वयः। फलितमाह **आमन्ताल्लिट्परा इति**। लिट्शिरस्का इत्यर्थः। **कृभ्वस्तय इति**। कृञित्यनेन कृभ्वस्तीनां ग्रहणमिति भावः। **अनुप्रयुज्यन्त इति**। प्रशब्दादनुशब्दाच्चाव्यवहिताः पश्चात्प्रयुज्यन्त इत्यर्थः। विपर्यासनिवृत्त्यर्थं व्यवहित निवृत्त्यर्थं चेति वार्तिकाद् भाष्याच्च। एवं च 'तं पातयां प्रथममास पपात पश्चात्' 'प्रभ्रंशयां यो नहुषं चकार' इत्यादिप्रयोगाः प्रामादिका एव। धातोराम् स्यात्, कृञ्चानुप्रयुज्यत इत्युक्तसमुच्चयार्थश्चकारः। ननु कृञ एवानुप्रयोगश्रवणात् कथं भ्वस्त्योरप्यनुप्रयोग इत्यत आह **आम्प्रत्ययवदित्यादिना**। 'कृञ्चानुप्रयुज्यते–' इत्यत्र कृञ एकस्यैवानुप्रयोगविधौ सति 'आम्प्रत्ययवत्–' इति सूत्रे अनुप्रयुज्यमानस्येत्यस्य कृञ इति विशेषणं व्यर्थं स्यात्। धात्वन्तरस्यानुप्रयोगाप्रसक्तेः। ततश्च कृञ इति विशेषणादन्यस्यापि अनुप्रयोगो विज्ञायत इत्यर्थः। ननु कृञोऽन्यस्याप्यनुप्रयोगो विज्ञायताम्, भ्वस्त्योरपीत्येव कुत आयातमित्यत आह **तेनेति**। कृञ्ग्रहणेनेत्यर्थः। **प्रत्याहाराश्रयणादिति**। एतच्च भाष्ये स्पष्टम्। नन्वनुप्रयुज्यमानानां कृभ्वस्तीनां आम्प्रकृतिभूतानां च कथमन्वय इत्यत आह **तेषामित्यारभ्या**-

---

निघातश्च तिङन्तस्येत्यर्थः। न चातिङन्तत्वे पदत्वाभावादामन्तात्परस्य निघातो न सिध्यतीति शङ्क्यम्, लिटः कृत्त्वात्प्रत्ययलक्षणेन कृदन्ततया प्रातिपदिकत्वे सोरुत्पत्तावामन्तस्याव्ययत्वात्सुपो लुक्यपि प्रत्ययलक्षणेन सुबन्ततया पदत्वात्। **कृञ्चानुप्रयुज्यते**। कथं तर्हि 'तं पातयां प्रथममास पपात पश्चात्'। 'प्रभ्रंशयां यो नहुषं चकार' इति। प्रमाद एवायम्। न च विपरीतप्रयोगनिवृत्तिमात्रे सूत्रस्य तात्पर्यात् पश्चात्प्रयोगो व्यवहितोऽपि न दुष्यतीति वाच्यम्, विपर्यासनिवृत्त्यर्थं व्यवहितनिवृत्त्यर्थं चेति वार्तिकविरोधात्। **अन्यापीति**। यदीह कृञ्शब्देन एक एव धातुर्गृह्येत तदा धात्वन्तरस्य प्राप्त्यभावाद् 'आम्प्रत्ययवत्–' इति सूत्रेऽनुप्रयुज्यमानस्य कृञ इति विशेषणं व्यर्थं स्यादिति भावः। न चात्र 'कृञ् च–' इति चकारेणैवानुप्रयोगोऽन्यस्यापीति ज्ञायत इति शङ्क्यम्, धातोराम् स्यात्, अनुप्रयुज्यते च

कृञस्तु क्रियाफले परगामिनि परस्मैपदे प्राप्ते। २२४० आम्प्रत्ययवत्कृञोऽनुप्रयोगस्य। (१-३-६३) आम्प्रत्ययो यस्मादित्यतद्गुणसंविज्ञानो बहुव्रीहिः।

भेदेनान्वय इत्यन्तेन। सामान्यविशेषयोरभेदान्वयस्य न्याय्यत्वादिति भावः। कृञ इव भ्वस्त्योरपि क्रियासामान्यवाचित्वाद् धातूनामनेकार्थत्वादिति ज्ञेयम्। ननु 'कृभ्वस्तियोगे–' इत्यस्य 'कृञो द्वितीय–' इत्यस्य च सूत्रस्य मध्ये 'अभिविधौ संपदा च' इति पठितम्। एवं च कृञ्प्रत्याहारे संपदोऽपि कुतो न ग्रहणमित्यत आह **संपदिस्त्विति। अनन्वितार्थत्वादिति।** सिद्धस्य वस्तुनो रूपान्तरापत्तिः सम्पदेरर्थः। एधादिधातोस्त्वाम्प्रकृतिभूतस्य वृद्ध्यादिरर्थः। तयोरुभयोरपि विशेषरूपत्वेन सामान्यविशेषभावाभावेन अभेदान्वयासंभवादित्यर्थः। अत एव 'कृभ्वस्तीनां ग्रहणम्' इति भाष्यं संगच्छत इति भावः। ननु 'आम्प्रत्ययवत्–' इति कृञ आत्मनेपदविधायकसूत्रं वक्ष्यमाणं व्यर्थम्। 'स्वरितञितः' इत्येव तत्सिद्धेरित्याशङ्क्याह **कृञस्त्विति। आम्प्रत्ययवत्कृञः।** 'अनुदात्तङितः–' इत्यत आत्मनेपदमित्यनुवर्तते। तत्राम्प्रत्ययस्यात्मनेपदाभावादाह **आम् प्रत्ययो यस्मादित्यतद्गुणसंविज्ञानो बहुव्रीहिरिति।** तस्य अन्यपदार्थस्य गुणा विशेषणानि वर्तिपदार्थरूपाणि तेषां संविज्ञानं क्रियान्वयितया ज्ञानं न विद्यते यस्य बहुव्रीहेः सः अतद्गुणसंविज्ञानः। यथा

लिट्परः कृञ् इत्यर्थसमर्पकतया तस्योपक्षीणत्वात्। **अभेदान्वय इति।** सामान्यविशेषयोरभेदान्वयो लोकसिद्ध इति भावः। एवं च एधांचक्रे एधांबभूवे इत्यादौ एककर्तृकभूतानद्यतनपरोक्षा वृद्ध्यभिन्ना क्रियेति तुल्यो बोधः। ननु करोतिः सकर्मकः भवतिस्त्वकर्मक इति कथमिह तुल्यतेति चेत्। अत्राहुः—यदा हि करोतिरुत्पादनार्थकः स्वातन्त्र्येण प्रयुज्यते घटं चक्रे राज्यं चकारेति तदा नियमेन सकर्मकत्वम्। यदा तु क्रियान्तरसमानाधिकरणः करोतिः प्रयुज्यते जुहवांचकारेत्यादौ तदा यत्समानाधिकरणः करोतिस्तस्य सकर्मकत्वाकर्मकत्वाभ्यां स्वयमपि तथाभावं भजते। एवं भ्वस्त्योरप्याम्प्रकृतिसामानाधिकरण्येन क्वचित्सकर्मकत्वं बोध्यम्। अतएवानुप्रयुज्यमानाद्भवतेः सकर्मकत्वात्कर्मणि लिट्। तथा च माघः—'तस्यातपत्रं बिभरांबभूवे' इति, श्रीहर्षश्च 'तपर्तुपूर्तावपि मेदसां भरा विभावरीभिर्बिभरांबभूविरे' इति। अत्रेदमवधेयम्—जुहाव जुहवांचकार जुहवांबभूव इत्यादौ केवलो होमो गम्यते इतरत्र तु होमरूपा क्रियेति बोधः। फले तु न कश्चिद्विशेषः, घटमानय द्रव्यंघटमानयेत्यत्र यथा। एवं चाम्प्रकृत्यर्थगतकारकसंख्यादिविशेषाभिव्यक्तिरनुप्रयोगस्य फलमिति। **अनन्वितेति।** संपदर्थस्याम्प्रकृत्यर्थस्य चाभेदान्वयो न संभवति, उभयोरपि विशेषरूपत्वादिति भावः। **आम्प्रत्ययवत्।** आम्प्रत्ययान्तस्यात्मनेपदाभावादाह **अतद्गुण**

आम्प्रकृत्या तुल्यमनुप्रयुज्यमानात्कृञोऽप्यात्मनेपदं स्यात्। इह पूर्ववद् इत्यनुवर्त्य वाक्यभेदेन संबध्यते। पूर्ववदेवात्मनेपदं न तु तद्विपरीतमिति। तेन कर्तृगेऽपि फले इन्दांचकारेत्यादौ न तङ्। २२४१ लिटस्तझयोरेशिरेच्। (३-४-८१)

चित्रगुमानयेति। अत्र हि पुरुषस्यैवान्यपदार्थस्य क्रियान्वयः। न तु चित्राणां गवामपि। तथा च प्रकृते आम्प्रत्ययविनिर्मुक्त आम्प्रत्ययप्रकृतिभूत एधादिधातुरेव आम्प्रत्ययशब्देन लभ्यत इति भावः। आम्प्रत्ययवदिति तृतीयान्ताद्वतिः। अनुप्रयुज्यत इत्यनुप्रयोगः। कर्मणि घञ्। पञ्चम्यर्थे षष्ठी, तदाह **आम्प्रकृत्येत्यादिना।** आम्प्रकृतेर्भवितुं योग्यं यदात्मनेपदं तद् अनुप्रयुज्यमानात् कृञोऽपि स्यादिति यावत्। अत्र न प्रत्याहारग्रहणम्। 'अनुप्रयोगस्येत्येव सिद्धे कृञ्ग्रहणादिह न प्रत्याहारग्रहणम्' इति भाष्यम्। परगामिन्यपि क्रियाफले कृञ्धातोरात्मनेपदार्थोऽयमारम्भः। इन्दांचकारेत्यादौ तु परगामिनि क्रियाफले नानेनात्मनेपदम्। आम्प्रकृतेः 'इदि परमैश्वर्ये' इति धातोरात्मनेपदाभावात् तस्य परस्मैपदित्वात्। एतदर्थमेव आम्प्रत्ययवदित्युपात्तम्। नन्विन्दांचकारेत्यादौ मास्त्वनेन सूत्रेण परगामिनि क्रियाफले आत्मनेपदम्। आत्मगामिनि तु क्रियाफले 'स्वरितञितः–' इत्यात्मनेपदं दुर्वारम्। अस्य सूत्रस्य एधांचक्र इत्यादौ परगामिनि क्रियाफले आत्मनेपदस्याप्राप्तस्य विधान एव समर्थतया आत्मगामिनि क्रियाफले 'स्वरितञितः–' इति प्राप्तस्यात्मनेपदस्य निवारणे सामर्थ्याभावादित्यत आह **इहेति।** इह 'आम्प्रत्ययवत् कृञोऽनुप्रयोगस्य' इति सूत्रे 'पूर्ववत् सनः' इति पूर्वसूत्रात् पूर्ववदित्यनुवर्त्य आम्प्रत्ययवत् कृञोऽनुप्रयोगस्येत्येकं वाक्यम्, पूर्ववत् कृञोऽनुप्रयोगस्येति अन्यद्वाक्यमिति वाक्यद्वयं संपाद्यम्। तत्र पूर्ववदिति तृतीयान्ताद्वतिः। पूर्वेण पूर्वप्रयुक्तेन एधादिधातुना तुल्यमित्यर्थः। तत्र वाक्यद्वयस्य समानार्थकत्वे वैयर्थ्याद् द्वितीयं वाक्यं नियमार्थं संपद्यते। पूर्ववदेव आत्मनेपदं न तु तद्विपरीतमिति। एवं च पूर्ववाक्येन एधांचक्रे इत्यादौ कृञः परगामिन्यपि क्रियाफले आत्मनेपदविधिः, द्वितीयवाक्येन तु इन्दांचकारेत्यादौ कर्तृगामिनि क्रियाफले 'स्वरितञितः–' इत्यात्मनेपदस्य निवृत्तिः फलति, तदाह **तेनेति।** द्वितीयवाक्येनेत्यर्थः। **न तङिति।** न आत्मनेपदमित्यर्थः। एवं चानुप्रयुज्यमानात्कृञो लिटस्तङि

इति। **आम्प्रकृत्या तुल्यमनुप्रयुज्यमानादिति।** तृतीयान्ताद्वतिः। अनुप्रयोगस्येत्यत्र कर्मणि घञिति भावः। 'अनुदात्तङित–' इत्यतोऽनुवर्तनादाह **आत्मनेपदं स्यादिति।** एवमप्राप्तस्य विधानेऽपि प्राप्तस्य निवारणमनेनैव सूत्रेण न संभवतीत्यत आह **वाक्यभेदेनेति।** अत्र च प्रमाणमाम्प्रत्ययवदिति वचनमेव। अन्यथा पूर्ववदित्यनुवृत्त्यैवानुप्रयोगस्य कृञ आमः पूर्वेण तुल्यमित्यर्थलाभादिष्टसिद्धेः किं तेन

लिडादेशयोस्तझयोः एश् इरेच् एतौ स्तः। एकारोच्चारणं ज्ञापकं 'तङादेशानां टेरेत्वं न' इति। तेन डारौरसां न। कृ ए इति स्थिते। २२४२ असंयोगाल्लिट् कित्। (१-२-५) असंयोगात्परोऽपिल्लिट् कित्स्यात्। 'क्ङिति च' (सू २२१७) इति निषेधात् 'सार्वधातुकार्धधातुकयोः' (सू २१६८) इति गुणो न। द्वित्वात्परत्वाद्यणि प्राप्ते। २२४३ द्विर्वचनेऽचि। (१-१-५९) द्वित्वनिमित्तेऽचि परे अच आदेशो न स्याद् द्वित्वे कर्तव्ये। २२४४ उरत्। (७-४-६६)

प्रथमपुरुषैकवचने तादेशे एधाम् कृ त इति स्थिते। **लिटस्तझयोरेशि**। ननु लिटस्तझयोरिशिरिजित्येवास्तु। आदेशयोरेकारोच्चारणं व्यर्थम्, 'टित आत्मनेपदानाम्—' इत्येत्वेनैव सिद्धेरित्यत आह **एकारोच्चारणमिति**। ज्ञापनस्य फलमाह **तेन डारौरसां नेति**। डा रौ रस् एषां लुडादेशभूतात्मनेपदादेशानां टेरेत्वं नेत्यर्थः। वस्तुतस्तु परत्वादेत्वे कृते पुनः प्रसङ्गविज्ञानेन डादिषु कृतेषु लक्ष्ये लक्षणस्येति न्यायाद् एत्वं नेति 'लुटः प्रथमस्य—' इति सूत्रभाष्ये स्पष्टम्। **कृ ए इति स्थित इति**। तकाराकारसंघातस्य एकारः शित्त्वात् सर्वादेश इति भावः। **असंयोगाल्लिट्**। **अपिदिति**। 'सार्वधातुकमपित्' इत्यतस्तदनुवृत्तेरिति भावः। 'सार्वधातुकमपित्' इति ङित्त्वं तु नात्र प्रवर्तते। लिडादेशानामार्धधातुकत्वादिति बोध्यम्। कित्त्वस्य फलमाह **क्ङिति चेति**। **द्वित्वादिति**। कृ ए इति स्थिते लिटि धातोरिति द्वित्वात् परत्वाद् 'इको यणचि' इति ऋकारस्य यणादेशे रेफे प्राप्ते सतीत्यर्थः। कृते तु यणि एकाच्त्वाभावाद् 'लिटि धातो—' इति द्वित्वं न स्यादिति भावः। **द्विर्वचनेऽचि**। द्विरुच्यते येन परनिमित्तेन तद् द्विर्वचनं द्वित्वनिमित्तमिति यावत्। अचीत्यस्य विशेषणमिदम्। 'अचः परस्मिन्—' इत्यतः अच इति 'स्थानिवदादेशः—' इ यत आदेश

'आम्प्रत्ययवत्—' इत्यनेन। **लिटस्तझयोः**। एशिति शकारकरणमकारविशिष्टतकारस्यादेशत्वाय। **असंयोगात्**। असंयोगादिति किम्, ममन्थे। अत्र नलोपो न। **द्विर्वचनेऽचि**। अचा सामानाधिकरण्यलाभाय द्विर्वचनशब्दस्य तन्निमित्ते लक्षणा स्वीक्रियते। यद्वा उच्यत इति वचनम्, द्विर्वचनं यस्मिन्नचि तद् द्विर्वचनम्। अथवा द्विर्वचनमस्मिन्नस्तीत्यर्शआद्यच्, तदेतदाह **द्वित्वनिमित्तेऽचीति**। इह 'अचः परस्मिन्—' इत्यतोऽच इति, 'स्थानिवदादेशः—' इत्यस्मादादेश इति, 'न पदान्त—' इत्यतो नेति चानुवर्तते तदाह **अच आदेशो न स्यादिति**। यद्यपीह वृत्त्यादौ अजादेशः स्थानिवत्स्यादिति रूपातिदेशपक्षः स्वीकृतः, फलं चोभयत्र तुल्यम्, तथाप्यादेशनिषेधपक्षोऽपि भाष्यारूढ इति स एवात्र स्वीकृतः। किं च आदेशमङ्गीकृत्य पुनः स्थानिरूपाश्रयणापेक्षया निषेधपरतया व्याख्यानमेव लघु। 'प्रक्षालनाद्धि

इति 'न पदान्त–'इत्यतो नेति चानुवर्तते। द्विर्वचन इत्यावर्तते। एवं च द्वित्वे कर्तव्ये सतीत्यपि लभ्यते, तदाह **द्वित्वनिमित्ते अचीत्यादिना।** द्वित्वे कर्तव्ये सतीत्युक्तेः कृते द्वित्वे चक्रे इत्यादौ यणादयो भवन्ति। अन्यथा तु न स्युः। द्वित्वनिमित्तस्य अचः सत्त्वात्। 'द्वित्वनिमित्ते' इति किम्? दुद्यूषति। दिव् धातोः सनि द्वित्वात्परत्वाद् ऊठि कृते द्वित्वात्प्राग्यण् भवत्येव। तथा च द्यू इत्यस्य द्वित्वे दुद्यूषतीति सिध्यति। द्वित्वे कर्तव्ये यणो निषेधे तु दिद्यूषतीत्यभ्यासे इकार एव श्रूयेत। न

पङ्कस्य दूरादस्पर्शनं वरम्' इति न्यायात्। 'न पदान्त–' इति निषेधानन्तरं पाठोऽप्येवं सत्यनुगृहीत इति श्रेयानयं पक्षः। इष्टानुरोधेन द्विर्वचन इत्यावर्त्य कालावधारणपरतयापि व्याचष्ट **द्वित्वे कर्तव्य इति।** कृते तु द्वित्वे यथायथमादेशः स्यादेवेति भावः द्वित्वनिमित्ते किम्, दुद्यूषतीत्यत्र द्वित्वात्परत्वादूठि कृते यदि यणः पूर्वमेव द्वित्वं स्यात् तदा दिद्यूषतीत्यनिष्टं रूपं स्यात्तन्माभूदिति द्वित्वनिमित्त इत्युक्तम्। नह्यूठ् द्वित्वनिमित्तम्। अचीति किम्, जेघ्रीयत। देध्मीयत। शाशय्यते। इह 'ई घ्राध्मोः' इति ईकारः, 'अयङ् यि क्ङिति' इत्ययङादेशश्च निषिध्येत, स माभूदिति प्राञ्चः। अन्ये त्वाहुः—अचीति व्यर्थं घ्रीयृध्मीयृशय्य इति द्वितीयाजवधिकस्यैकाचः कार्यितया यङो द्वित्वनिमित्तत्वाभावादिति। अचः किम्, असूषुपत्। इह 'स्वापेश्चङि' इति यत्सम्प्रसारणं तस्मिन्निषिद्धेऽभ्यासे उवर्णो न श्रूयेत। न च द्वित्वे कृते पुनः संप्रसारणेन स्वापेरवयवत्वाविशेषादभ्यासे तदुत्तरखण्डे च उकारश्रवणं भवेदिति वाच्यम्, परस्य संप्रसारणे कृते यून इत्यत्रेव 'न संप्रसारणे–' इति पूर्वस्य यणः संप्रसारणनिषेधात्। स्यादेतत्—चक्रतुरित्यत्र अच आदेशस्य निषेधाप्रवृत्त्या यण् स्यादेव। अतुसो द्वित्वनिमित्तत्वेऽप्यकारस्यातथात्वात्। नच 'द्विर्वचनेऽचि' इत्यस्य वैयर्थ्यम्, चक्र इत्यादौ सावकाशत्वात्। तथा चैकाच्त्वाभावाद् 'लिटि धातोः–' इतीह द्वित्वं न स्यादिति चेत्। मैवम्, इह द्वित्वनिमित्तशब्देन साक्षाद्वा समुदायघटकतया वा यद् द्वित्वप्रयोजकं लक्ष्यानुरोधेन तस्य सर्वस्य ग्रहणात्। एतच्च 'ठस्येकः' इति सूत्रे कैयटे स्पष्टम्। तथा च ऊर्णोतेः सनि 'सनीवन्त–' इतीट्पक्षे 'विभाषोर्णोः' इति ङित्त्वविरहे ऊर्णुनविषतीति सिद्धम्। सन्नन्तस्य द्वित्वविधानेऽपि सनो द्वित्वप्रयोजकत्वेन तस्मिन्परे प्राप्तयोर्गुणावादेशयोर्द्वित्वे कर्तव्ये निषेधात्। अत एवाहुस्तद्भावभावितामात्रेणेह निमित्तत्वमिति। एवं च द्वित्वनिमित्तघटकतया सन इडागमोऽतुसोऽकारश्च द्वित्वनिमित्तमिति स्थितम्। नन्वेवम् ऋधातोः सनि 'स्मिपूङ्रञ्ज्वशां सनि' इति इटि कृते इस्शब्दनिमित्तकस्य गुणस्य 'द्विर्वचनेऽचि' इति निषेधे 'अजादेर्द्वितीयस्य' इति द्वित्वप्रसङ्गादरिरिषतीति न सिध्येत्। रिस्शब्दस्य द्वित्वे तु

अभ्यासऋवर्णस्यात्स्यात्प्रत्यये परे। रपरत्वम्। 'हलादिः शेषः' (सू २१७९)। 'प्रत्यये' किम्-वव्रश्च। २२४५ कुहोश्चुः। (७-४-६२) अभ्यासकवर्ग-

---

तूकारः। द्वित्वनिमित्त इत्युक्तौ तु ऊठि परे द्वित्वात् प्राग् यणो न निषेधः। ऊठो द्वित्वनिमित्तत्वाभावात्। 'अचि' इति किम्? जेघ्रीयते। अत्र घ्राधातोर्यङि द्वित्वात् प्राग् 'ई घ्राध्मोः' इति ईकारादेशो न निषिध्यते। ईत्वस्य द्वित्वनिमित्तयङ्निमित्तकत्वेऽपि द्वित्वनिमित्ताज्निमित्तकत्वाभावात्। 'अचः' किम्? असूषुपत्। इह स्वापेश्चङि द्वित्वात् प्राक् 'स्वापेश्चङि' इति वकारस्य सम्प्रसारणं न निषिध्यते। तस्याजादेशत्वाभावात्। ततश्च कृते सम्प्रसारणे सुप् इत्यस्य द्वित्वे अभ्यासे उकारस्य श्रवणं सम्भवति। सम्प्रसारणे निषिद्धे तु स्वप् इत्यस्य द्वित्वे अभ्यासे उकारो न श्रूयेत। एवं च कृते यणादेशात् प्राग् 'लिटि धातोः-' इति द्वित्वे कृ कृ ए इति स्थिते **उरत्**। उः अत् इति छेदः। ऋ इत्यस्य उरिति षष्ठ्येकवचनम्। 'अत्र लोपोऽभ्यासस्य' इत्यस्मादभ्यासस्येत्यनुवर्तते। 'अङ्गस्य' इत्यधिकृतम्। तद्वशात् प्रत्यये परत इति लभ्यते। प्रत्यये परत एव अङ्गसंज्ञाविधानात्, तदाह **अभ्यासऋवर्णस्येत्यादिना**। **रपरत्वमिति**। अभ्यासऋवर्णादेशस्याकारस्य 'उरण्रपरः' इति रपरत्वमित्यर्थः। तथा च कर् कृ ए इति स्थिते। **हलादिः शेष इति**। रेफस्य निवृत्तिरिति भावः। **प्रत्यये किमिति**। अङ्गेनैव प्रत्ययस्याक्षिप्तत्वात् प्रत्यये परत इति किमर्थमित्यर्थः। **वव्रश्चेति**। 'ओव्रश्चू छेदने', लिटि णल् द्वित्वं 'लिट्यभ्यासस्य-' इति अभ्यासरेफस्य सम्प्रसारणम् ऋकारः। उरत्। रपरत्वम्। हलादिः शेषः। वव्रश्चेति रूपम्। अत्र अभ्यासऋवर्णस्य रेफस्थानिकस्य सम्प्रसारणस्य य उरदत्वसम्पन्नः अकारः, तस्य 'अचः परस्मिन्-' इति स्थानिवत्त्वेन सम्प्रसारणतया तस्मिन् परे वकारस्य 'न सम्प्रसारणे सम्प्रसारणम्' इति निषेधान्न सम्प्रसारणमिति स्थितिः। 'उरत्' इत्यत्र प्रत्यये परत इत्यनुक्तौ तु सम्प्रसारणभूतऋकारस्थानिकस्य अकारस्य परनिमित्तकत्वाभावेन स्थानिवत्त्वाप्रसक्तेः सम्प्रसारणत्वाभावात्तस्मिन् परतो 'न सम्प्रसारणे सम्प्रसार-

---

यद्यपि सिध्यति, तथापि गुणनिषेधे रिस्शब्द एव दुर्लभ इति चेत्। अत्राहुः—गुणे रपरे कृते रिस्शब्दस्यैव द्वित्वम्। न च द्वित्वनिमित्ते ह्यचि गुणस्य निषेधः। इस्शब्दस्तु नेह निमित्तं कार्यित्वात्। न हि कार्यी निमित्ततयाऽऽश्रीयते, 'स्थण्डिलाच्छयितरि व्रते' इति ज्ञापकात्। अन्यथा शीङो ङित्त्वेन 'क्ङिति च' इति गुणनिषेधाच्छयितरीति रूपस्यासिद्ध्यापत्तेः। न च किति ङिति परे गुणवृद्धी नेति व्याख्याया मुक्तेऽर्थे शयितरीति न ज्ञापकमिति वाच्यम्, तद्व्याख्यायां छिन्नं भिन्नमित्यत्र गुणनिषेधो न स्यादित्यादिदोषस्य 'क्ङिति च' इति सूत्र एवोपपादितत्वात्। न चैवं कार्यिणो

हकारयोश्चवर्गादेशः स्यात् । एधांचक्रे एधांचक्राते एधांचक्रिरे । २२४६

णम्' इति निषेधो न स्यादिति भावः । एवं च क कृ ए इति स्थिते **कुहोश्चुः** । कु ह् इत्यनयोर्द्वन्द्वात् षष्ठीद्विवचनम् । 'अत्र लोपोऽभ्यासस्य' इत्यतः अभ्यासस्ये-त्यनुवर्तते, तदाह **अभ्यासेति** । यद्यपि स्थानिनां कवर्गीयाणां हकारस्य च षट्त्वात् चवर्गीयाणां पञ्चत्वान्न यथासंख्यम्, नापि स्थानत आन्तर्यम्, कण्ठतालुस्थान-भेदात् । आभ्यन्तरप्रयत्नसाम्यं तु कवर्गचवर्गयोरविशिष्टम् । हकारचवर्गयोस्तु नास्त्येव तत् । अतो बाह्यप्रयत्नत एवान्तर्यमिह व्यवस्थापकमाश्रयणीयम् । तत्र प्रथमस्य कवर्गीयस्य प्रथम एव चवर्गीयो भवति, अघोषश्वासविवाराल्पप्राणप्रयत्न-साम्यात् । नतु द्वितीयः, महाप्राणत्वात् । नापि तृतीयपञ्चमौ, घोषसंवारनादप्रयत्नत्वात् । नापि चतुर्थः, घोषसंवारनादमहाप्राणप्रयत्नत्वात् । तथा द्वितीयस्य कवर्गीयस्य द्वितीय एव चवर्गीयो भवति, अघोषश्वासविवारमहाप्राणप्रयत्नत्वात् । नतु प्रथमः, अल्पप्राण-त्वात् । नापि तृतीयपञ्चमौ, घोषसंवारनादाल्पप्राणप्रयत्नत्वात् । नापि चतुर्थः, घोषसंवारनादप्रयत्नत्वात् । तथा तृतीयस्य कवर्गीयस्य तृतीय एव चवर्गीयो भवति । घोषसंवारनादाल्पप्राणप्रयत्नत्वात् । न तु प्रथमः, अघोषश्वासविवारप्रयत्नत्वात् । अत एव न द्वितीयोऽपि, महाप्राणप्रयत्नत्वाच्च । नापि चतुर्थः, महाप्राणत्वात् । नापि पञ्चमः, घोषसंवारनादाल्पप्राणसाम्येऽपि अनुनासिकतया भेदात् । तथा चतुर्थस्य कवर्गीयस्य चतुर्थ एव चवर्गीयो भवति, घोषसंवारनादमहाप्राणप्रयत्नत्वात् । न तु प्रथमः, अघोष श्वासविवाराल्पप्राणप्रयत्नत्वात् । नापि द्वितीयः, अघोषविवारश्वासप्रयत्नत्वात् । नापि तृतीयपञ्चमौ, अल्पप्राणत्वात् । पञ्चमस्य तु कवर्गीयस्य अनुनासिकत्वाद् ञकार एव । हकारस्य तु घोषसंवारनादमहाप्राणवतः तादृशो वर्गचतुर्थ एव झकार इति विवेकः । प्रकृते तु क कृ ए इति स्थिते अभ्यासककारस्य चकारे ऋकारस्य यणि रेफः । तदाह **एधांचक्र इति** । एककर्तृका भूतानद्यतनपरोक्षा वृद्धिरूपा क्रियेत्यर्थः । **एधांचक्रात इति** । कृञो लिट आतामि टेरेत्वम् । 'द्विर्वचनेऽचि' इति यणि निषिद्धे कृ इत्यस्य द्वित्वं उरदत्वम् । हलादिः शेषः । चर्त्वम् । यण् । न च आतामित्यस्य द्वित्वनिमित्तत्वेऽपि आकारस्याचो द्वित्वनिमित्तत्वाभावात् कथमिह 'द्विर्वचनेऽचि' इति यणनिषेध इति वाच्यम्, साक्षाद्वा समुदायघटकतया वा द्वित्वप्रयोजकस्यैव द्वित्व-निमित्तशब्देन विवक्षितत्वादिति भावः । **एधांचक्रिर इति** । झस्य इरेच् । कृ

निमित्तत्वानाश्रयणे सन्नन्तस्य कार्यित्वात्सनि परतः प्राप्तयोर्गुणावादेशयोरनिषेधाद्-गुणविपत्तीत्यपि न स्यादिति वाच्यम्, मत्वर्थीयेनेनिना कार्यमनुभवत एव कार्यित्व-लाभात् । ऊर्णोतेर्हि नुशब्द एव द्वित्वरूपं कार्यमनुभवति, न तु सन् । अरिरिषती-

एकाच उपदेशेऽनुदात्तात्। (७-२-१०) उपदेशे यो धातुरेकाजनुदात्तश्च ततः परस्य वलादेरार्धधातुकस्येट् न स्यात्। उपदेशे इत्युभयान्वयि। 'एकाच' इति किम्-यङ्लुग्व्यावृत्तिर्यथा स्यात्। स्मरन्ति हि—

इत्यस्य द्वित्वादि पूर्ववत्। अथ लिटि थासः सेभावे कृ इत्यस्य द्वित्वादौ एधां चकृ से इति स्थिते आर्धधातुकस्येड्वलादेरिति इडागमे प्राप्ते **एकाच उपदेशेऽनुदात्तात्।** 'ऋत इद्धातोः' इत्यत धातोरित्यनुवर्तते। 'नेड्वशिकृति' इत्यतो नेति च। तदाह **उपदेशे यो धातुरेकाजिति।** एकः अच् यस्येति बहुव्रीहिः। **आर्धधातुकस्येति।** यद्यपीदं न श्रुतम्, नाप्यनुवृत्तिलभ्यम्, तथाप्यार्थिकमिदम्, आर्धधातुकस्यैवेटः प्राप्तेः। वृत्तिग्रन्थे तु आर्धधातुकस्येति नोपात्तम्। ननु 'एकाच उपदेशेऽनुदात्तात्' इत्यत्र यदि उपदेश इत्येतदेकाच इत्यत्रान्वेति तदा कर्तुमित्यत्र इण्निषेधो न स्यात्। कृञ्धातोरूद्दृदन्तैरित्यादिना अनुदात्तत्वस्य वक्ष्यमाणत्वेऽपि तुमुन्प्रत्यये कृते 'ञ्नित्यादिर्नित्यम्' इत्याद्युदात्तत्वात्। यदि तु उपदेशे इत्येतद् अनुदात्तादित्यनेनान्वेति। तदा यद्यपि नायं दोषः, कृते तुमुन्प्रत्यये उदात्तत्वेऽपि धातूपदेशकाले अनुदात्तत्वेन तत्र इण्निषेधस्य निर्बाधत्वात्। तथापि एधांचकृषे इत्यादौ इण्निषेधो न स्यात्। द्वित्वे कृते अनेकाच्त्वादित्यत आह **उपदेश इत्युभयान्वयीति।** 'उपदेशे' इत्येतद् 'एकाच्' इत्यत्र 'अनुदात्तात्' इत्यत्र चान्वेति। मध्यमणिन्यायादिति भावः। ननु ऊद्दृदन्तैरित्यादिना परिगणितानामनुदात्तोपदेशधातूनामेकाच्त्वाव्यभिचारादेकाज्ग्रहणं मास्तु। उपदेशेऽनुदात्तादित्येवास्तु। एतावतैव कर्तुं चकृष इत्यादाविण्निषेधसिद्धेरिति पृच्छति **एकाचः किमिति। यङ्लुग्व्यावृत्तिरिति।** यङ्लुकि चर्करितेत्यादौ इण्निषेधव्यावृत्तये एकज्ग्रहणमित्यर्थः। ननु कृतेऽप्येकाज्ग्रहणे कथं यङ्लुग्व्यावृत्तिः। कृते द्वित्वे अनेकाच्त्वेऽपि धातूपदेशे एकाच्त्वादित्यत आह **स्मरन्ति हीति।** प्राचीनाचार्या निबध्नन्तीत्यर्थः। शितपा शपेत्यादेरुदाहरणानि यङ्लुङ्निरूपणे स्पष्टीभविष्यन्ति। नन्विह एकाज्ग्रहणाद्यङ्लुकि इण्निषेधस्य व्यावृत्तावपि श्तिबादिनिर्दिष्टानां यङ्लुकि व्यावृत्तिः प्राचीनाचार्यसंमताऽपि

त्यत्र तु श्तिस्शब्दः कार्यभागिति वैषम्यादिति। **उभयान्वयीति।** मध्ये पाठाद्देहलीदीपन्यायेन पूर्वोत्तराभ्यां संबध्यत इत्यर्थः। तत्रोत्तरान्वयस्य कर्तुं गन्तुमित्यादाविण्निषेधः फलम्। नित्स्वरेण संप्रत्युदात्तत्वात्। पिपक्षति बिभित्सतीत्यादाविण्निषेधस्तु पूर्वान्वयस्य फलम्। द्वित्वे कृते अनेकाच्त्वात्। नन्वेकाच इत्युक्ते ह्युपदेशपदेनाप्यन्वयः स्वीकर्तव्यस्तदेव मास्तु उपदेशेऽनुदात्तादित्यनेनैवेष्टसिद्धेरिति शङ्कते **एकाचः किमिति।** पिपक्षतीत्यादाविव यङ्लुक्यपीण्निषेधः स्यादेवेत्याशङ्कायामाह **स्मरन्ति**

'शितपा शपाऽनुबन्धेन निर्दिष्टं यद्गणेन च ।
यत्रैकाज्ग्रहणं चैव पञ्चैतानि न यङ्लुकि ॥' इति ।

एतच्चेहैवैकाज्ग्रहणेन ज्ञाप्यते । 'अचः' इत्येवैकत्वविवक्षया तद्गुणो ग्रहणेन च सिद्धे एकग्रहणसामर्थ्यादनेकाच्कोपदेशो व्यावर्त्यते । तेन वधंहन्स्युप-

---

पाणिनेरसंमतैवेत्यत आह एतच्चेति । एतत् शितपाशपेति श्लोकसिद्धं सर्वमपि, इह सूत्रे एकाज्ग्रहणेनैव एकदेशानुमत्या ज्ञाप्यत इत्यर्थः । ननु 'हनो वध लिङि' 'लुङि च' इति हनधातोर्वधादेशे कृते अवधीदित्यत्र इडागमो न स्यात् । वधादेशे कृते अनेकाच्त्वेऽपि धातूपदेशे हन्तेरेकाच्त्वादित्यत आह **अच इत्येवैकत्वेत्यादि व्यावर्त्यते**

हीति । शितपेत्यादि । शितपा यथा—स्यतिहन्तियातिवातिद्रातीत्यादि । तेन प्रन्यजङ्घनीदित्यादौ 'नेर्गद–' इति णत्वं न । शपा यथा—भरेति । तेन बिभर्तेः भरतेः (यङ्लुगन्तात्) सनि बिभरिषतीत्यत्र 'सनीवन्तर्ध–' इतीड्विकल्पो न, किंतु नित्यमेवेट् । 'एकाच–' इति निषेधाप्रवृत्तेः । अनुबन्धेन निर्देशो द्विधा स्वरूपेणेत्संज्ञकत्वेन च । स्वरूपेण यथा—'शीङः सार्वधातुके गुणः' 'दीङो युडचि–' इति । शेशीतः । देदीतः । तसि क्तप्रत्यये चेमे क्रमेणोदाहरणे । इत्संज्ञकत्वेन यथा—'अनुदात्तङितः–' इति । तेन स्पर्धशीङादिभ्यः 'अनुदात्तङितः–' इत्यात्मनेपदं न । पास्पर्धीति । शेशयीति । गणेन यथा—बेभिदीति । 'रुदादिभ्यः–' इति श्नम न । एकाच्ग्रहणं प्रकृतसूत्रे । तेन बेभेदिता चेच्छेदितेत्यादाविण्निषेधो न । **एतच्चेति ।** न च शितपाशपाद्यंशे कथमिदं ज्ञापकमिति शङ्क्यम् , एकादेशानुमतिद्वारा सर्वत्र ज्ञापनस्य 'उपपदमतिङ्' इत्यादौ दृष्टत्वात् । अतएव तत्र 'गतिकारकोपपदानां कृद्भिः सह समासवचनं प्राक् सुबुत्पत्तेः' इति सिद्धमित्युक्तम् । अनन्यार्थैः स्यतिहन्तिभरेत्यादिभिः शितप्शबादिभिरेव ज्ञापनसंभवाच्च । 'अपरस्पराः–' इति सूत्रे सातत्यग्रहणेन एकदेशानुमत्या 'लुम्पेदवश्यमः कृत्ये' इत्यादिपूर्वाचार्यश्लोको ज्ञापित इति तु तत्रैवावोचाम । मनोरमायां त्वेकदेशानुमतिद्वारा पूर्वाचार्यपठितपरिभाषाया ज्ञापनस्य 'गतिकारकोपपदानाम्–' इत्यादौ दृष्टत्वादित्युक्तम्, तदयुक्तमिति नव्याः । 'गतिकारकोपपदानाम्–' इत्याद्येव हि पूर्वाचार्याणां परिभाषा, न च तज्ज्ञापनं तत्रैव दृष्टमिति युज्यते वक्तुमिति । **तद्गुंत इति ।** न च मत्वर्थलक्षणायां मानाभावः । वसत्यादीनामनुदात्तपाठस्यैव तत्र मानत्वात् । न चेदानीमनुदात्तपाठः परिभ्रष्टः, आधुनिकानां वसतिशक्त्यादिपाठस्त्वनार्षत्वान्न मानमिति शङ्क्यम्, पाणिनिना पठितानामेवानुदात्तधातूनामाधुनिकैर्व्याख्यातृपरम्परया संगृहीतत्वात् । अन्यथा एकः अच् यस्येति बहुव्रीहिलाभार्थमेकग्रहणे कृतेऽप्यनुदात्तपाठस्य परिभ्रष्टत्वाद् वसतिशक्त्यादयोऽनुदात्ताः, न तु भेधादय इति निर्धारणं न स्यात् । **एकग्रहणेति ।**

देश एकाचोऽपि न निषेधः। आदेशोपदेशेऽनेकाच्कत्वात्। अनुदात्ताश्चानुपदमेव संग्रहीष्यन्ते। एधांचकृषे एधांचक्राथे। २२४७ **इणः षीध्वंलुङ्लिटां धोऽङ्गात्।** (८-३-७८) इण्यन्तादङ्गात्परेषां षीध्वंलुङ्लिटां धस्य मूर्धन्यः

इत्यन्तम्। 'एकाच उपदेशेऽनुदात्तात्' इत्यत्र हि एकग्रहणमपनीयाच इत्युक्तेऽपि एकाच्कादिति लभ्यते। एकवचनोपात्तस्यैकत्वस्य त्यागे प्रमाणाभावात्। न चैवं सति एकत्वविशिष्टादचः परस्येत्येव लभ्येत, नत्वेकाच्कादिति बहुव्रीह्यर्थ इति वाच्यम्, अनुदात्तोपदेशपरिगणने शक्लृपचिमुच्यादीनां परिगणनसामर्थ्येन अच इत्यस्य मत्वर्थलक्षणामाश्रित्य एकाज्वतो ग्रहणसंभवात्। तदेवमच इत्यनेनैव एकाच्कादिति सिद्धे यदेकग्रहणं करोति तत्सामर्थ्यादुपदेशे सर्वत्र एकाजेव, न तु कस्मिंश्चिदप्युपदेशे अनेकाजित्यर्थकल्पनया कदाचिदनेकाच्कोपदेशधातुर्व्यावर्त्यत इत्यर्थः। **तेनेति**। उपदेशे सर्वत्र एकाजेवेत्यर्थलाभेन, हन्त्युपदेशे—हनिति स्थान्युपदेशे—एकाचोऽपि सतो हनिति धातोरादेशस्य वधेः परस्य इण्निषेधो नेत्यर्थः। कुत इत्यत आह **आदेशोपदेश इति**। अवधीदित्यत्र 'अतो हलादेर्लघोः' इति वृद्धिनिवृत्तये हनो वधादेशस्य अदन्ततायाः भाष्ये उक्तत्वादिति भावः। ननु के ते अनुदात्ता धातव इत्यत आह **अनुदात्तास्त्वनुपदमेवेति**। पदस्य पश्चादनुपदम्, पदमात्रे अतीते सतीत्यर्थः। अनन्तरमेवेति यावत्। **एधांचकृष इति**। इडभावे प्रत्ययावयवत्वात् षत्वम्। **एधांचक्राथ इति**। लिट आथामादेशः। टेरेत्वम्। द्वित्वादि पूर्ववत्। लिटो ध्वमष्टेरत्वे द्वित्वादौ एधांचकृध्वे इति स्थिते **इणः षीध्वंलुङ्लिटाम्**। षीध्वं लुङ् लिट् एषां द्वन्द्वः। 'धः' इति षष्ठ्येकवचनम्। इण इत्यङ्गविशेषणम्। तदन्तविधिः। 'अपदान्तस्य मूर्धन्यः' इत्यधिकृतम्, तदाह **इण्णन्तादित्यादिना**।

नन्वेकाज्ग्रहणं यङ्लुग्व्यावृत्त्यर्थमित्युक्त्वा पुनरेकग्रहणसामर्थ्यादित्युक्तौ परस्परव्याघातः स्यादिति चेत्। अत्राहुः—एकाच्शब्देनैकाज्ग्रहणं यङ्लुग्व्यावृत्त्यर्थमिति नार्थः, किं तु वस्तुगत्यैवैकाज्ग्रहणम्, तच्चैकग्रहणं विनैव लभ्यत इत्यदोष इति। **वधेरिति**। यस्तु तद्व्यावृत्तयेऽनिट्कारिकास्वदन्तपर्युदास उक्तो व्याघ्रभूतिना स एव प्राचाऽनुसृतः। 'अदृदृदन्तरुलुदणुशीयुनुक्षुश्विडीङ्श्रिभिः। वृङ्वृञ्भ्यां च विनैकाचः स्वरान्ता धातवोऽनिटः' इति। स चादन्तपर्युदास इहोपेक्षितः। सूत्राननुगुणत्वात्। तथापि—'सर्वे सर्वपदादेशाः' इति न्यायेन कृइत्यादेः करित्यादिरादेशस्तस्य यथा स्थान्युपदेशं गृहीत्वा कर्ता हर्तेत्यादौ निषेधः प्रवर्तते तथैव वधादेशेऽपि प्रवर्तमानः केन वार्यताम्। अदन्तपर्युदाससामर्थ्यादिति चेत्। न, सूत्रकारेणाऽपर्युदस्तत्वादिति भावः। **इणः षीध्वम्**। 'इणकोः' इत्यधिकारेऽपि पुनरिण्ग्रहणं कवर्गात्परस्य

स्यात्। एधांचकृढ्वे। एधांचक्रे एधांचकृवहे एधांचकृमहे। एधांबभूव। अनुप्रयोगसामर्थ्यादस्तेर्भूभावो न। अन्यथा हि 'कस्चानुप्रयुज्यते' इति 'कृभु-'

धकारस्य ढकारो मूर्धन्यः। घोषसंवारनादमहाप्राणप्रयत्नसाम्यात्, तदाह **एधांचकृढ्व इति**। उत्तमपुरुषैकवचने इटि एत्वे पूर्ववद् द्वित्वादौ कृते रूपमाह **एधांचक्रे इति। एधांचकृवह इति**। लिटो वहिभावे एत्वे द्वित्वादि पूर्ववद्। एवं लिटो महिभावे द्वित्वादि पूर्ववत्। सर्वत्र 'असंयोगाल्लिट् कित्' इति कित्त्वाद् गुणाभावः। अथ भूधातोः लिडन्तस्यानुप्रयोगे उदाहरति **एधांबभूवेति**। एधांचक्र इत्यनेन समानार्थकम्। अनुप्रयुज्यमानस्य भूधातोः क्रियासामान्यार्थकत्वात्। नन्वस्तेरनुप्रयोगे लिडादेशस्यार्धधातुकत्वाद् अस्तेर्भूरित्यार्धधातुके विहितो भूभावः कुतो न स्यादित्यत आह **अनुप्रयोगेति**। 'कृञ्चानुप्रयुज्यते-' इत्यत्र प्रत्याहारमाश्रित्य कृभ्वस्तीनामनुप्रयोगविधिसामर्थ्यादस्धातोर्भूभावो नेत्यर्थः। तदेवोपपादयति **अन्यथेति**। अनुप्रयुज्यमानस्यास्तेर्भूभावाभ्युपगमे 'कृञ्चानुप्रयुज्यते-' इत्यनुप्रयोगविधौ 'कस्चानुप्रयुज्यते-' इति वा 'कृभुचानुप्रयुज्यते-' इति वा ब्रूयात्। तावता एधांबभूवेति सिद्धेरित्यर्थः। यद्यपि कृभित्युक्तौ लाघवमस्ति। तथापि एकस्यैव भवतेरधिकस्य लाभाय कृञिति प्रत्याहारक्लेशो न कर्तव्य इति भावः। अत एव 'अत उत्सार्वधातुके' इति सूत्रभाष्येऽनुप्रयोगे भूभावेन अस्तेरबाधनमिति भाष्यं सङ्गच्छते। ततश्च अनुप्रयुज्यमानादस्धातोर्लिटि भूभावनिवृत्तौ णलि एधाम् अस् अ इति स्थिते द्वित्वे हलादिशेषे अ अस् इति स्थिते सवर्णदीर्घं बाधित्वा 'अतो गुणे' इति पररूपे प्राप्ते

माभूदित्येतदर्थम्। तेनेह—पक्षीध्वम्। **अङ्गात्परेषामिति**। विहितानामित्युक्तौ तु दाञो लुङि अदिढ्वमित्यत्राव्याप्तिः स्यात्, लिड्दुहनहां तु ढत्वघत्वधत्वेषु लिक्षीध्वं धुक्षीध्वं नत्सीध्वमित्यत्रातिव्याप्तिश्च स्यादिति बोध्यम्। अङ्गात् किम्, वेविषीध्वम्। यद्यप्यर्थवतः षीध्वमित्यस्य ग्रहणात् कृषीढ्वमित्यादावेव भवेद् नत्वत्र, तथाप्यर्थवद्ग्रहणपरिभाषा क्वचिन्न प्रवर्तत इति ज्ञापनार्थमिदमुक्तम्। तेन 'अनिनस्मन्ग्रहणानि-' इति सिद्धम्। **एधांबभूवेत्यादि**। 'आम्प्रत्ययवत्-' इति सूत्रे कृञ्ग्रहणादनुप्रयोगान्तरे तङ् नेति 'शेषात्कर्तरि-' इति परस्मैपदमेव, भावकर्मणोस्तु स्यादेव एधांबभूवे ईक्षांबभूवे। इति। अस्तेस्तु भावकर्मणोस्तङि कृते एशि इटि च रूपे विप्रतिपद्येते। तथाहि—उभयत्रापि 'ह एति' इति हादेशे कृते एधामाहे ईक्षामाहे इति केचित्। तासिसाहचर्यादिटोऽत्र हत्वं न त्वेशीत्यन्ये। तत्साहचर्यादेव सार्वधातुक एव एति हत्वम्। तथा च कर्मव्यतिहारे तङि व्यतिहे इत्यत्रैव भवति न तूक्तद्वयेऽपि। तेन एधामासे ईक्षामासे इत्येव रूपमित्यपरे। **कृभ्वस्तीति**। यद्यपि कृञ् इत्युक्तौ लाघवमस्ति, तथापि धातुद्वयस्यैव लाभार्थं

इति वा भयात्। २२४८ अत आदेः। (७-४-७०) अभ्यासस्यादेरतो दीर्घः स्यात्। पररूपापवादः। एधामास एधामासतुरित्यादि। एधिता एधितारौ एधितारः। एधितासे एधितासाथे। २२४९ धि च। (८-२-२५) धादौ प्रत्यये परे सलोपः स्यात्। एधिताध्वे। २२५० ह एति। (७-४-५२) तासस्त्योः सस्य हः स्यादेति परे। एधिताहे एधितास्वहे एधितास्महे। एधिष्यते

अत आदेः। 'अत्र लोपः–' इत्यस्मादभ्यासस्येत्यनुवर्तते। 'दीर्घ इणः–' इत्यतो दीर्घ इति च, तदाह अभ्यासस्येति। अत्र यद्वक्तव्यं तन्नामधातुप्रक्रियायाम् अ इवाचरति अतीत्यादिग्रन्थस्य व्याख्यानावसरे वक्ष्यते। एधामासेति। नचात्रानुप्रयुज्यमानाभ्यामस्तिभूभ्यामाम्प्रत्ययवदित्यात्मनेपदं शङ्क्यम्, तत्र कृञ्ग्रहणेन प्रत्याहारग्रहणाभावस्य भाष्ये उक्तत्वात्। एधामासतुरित्यादीति। एधामासुः। एधामासिथ एधामासथुः एधामास। एधामास एधामासिव एधामासिम। इति लिट्प्रक्रिया। एधितेति। लुटः तादेशे एध् त इति स्थिते शबपवादस्तास् इट्। 'लुटः प्रथमस्य–' इति डा टिलोपः, एधितेति रूपम्। 'दीधीवेवीटाम्' इति लघूपधगुणो न। एधिताराविति। लुट्, आताम्, तास्, इट्, आत मित्यस्य रौभावः। 'रि च' इति सलोपः। एधितार इति। झस्य रस्, तास्, इट्, 'रि च' इति सलोपः, रुत्वविसर्गौ। एधितास इति। थासः से, तास्, इट्, 'तासस्त्योः–' इति सलोपः। एधितासाथ इति। आथाम्, टेरेत्वम्, तास्, इट्। अथ ध्वमि टेरेत्वे तासि इटि एधितास् ध्वे इति स्थिते। धि च। 'सस्यार्धधातुके' इत्यतः स इत्यनुवर्तते। 'तासस्त्योः–' इत्यतो लोप इति। अङ्गाक्षिप्तप्रत्ययो धीत्यनेन विशेष्यते। तदादिविधिः, तदाह धादाविति। तासः सलोपे एधिताध्वे इति रूपम्। अथ लुट इडादेशे एत्वे तासि इटि एधितास् ए इति स्थिते ह एति। ह इति प्रथमान्तम्। अकार उच्चारणार्थः। 'सस्यार्धधातुके' इत्यतः स इति 'तासस्त्योर्लोपः' इत्यतः तासस्त्योरिति चानुवर्तते, तदाह तासस्त्योरिति। तासः सस्य हकारे एधिताहे इति रूपम्। एधितास्वह इति। लुटो वहिभावः, टेरेत्वम्, तास्, इट्। एवम् एधितास्महे इति। तत्र महिभावो विशेषः। इति लुट्प्रक्रिया। एधिष्यत इति। लृटः तादेशे टेरेत्वम्। 'स्यतासी–' इति शबपवादः, स्यः, इट्, प्रत्ययावयवत्वात् षत्वम्। एधिष्येते इति। आताम्, टेरेत्वम्, स्यः, इट्, 'आतो ङितः' इत्याकारस्य इय्, 'लोपो व्योः–' इति

प्रत्याहाराश्रयणे क्लेश इति भावः। पररूपापवाद इति। अपवाद इत्ययं ग्रन्थो नामधातुप्रक्रियास्थः स्वग्रन्थेन सह विरुध्यते। तत्र हि अ इवाचरति अति। प्रत्ययग्रहणमपनीय कास्यनेकाज् इत्युक्तेर्नाम्। औ। अतुः। उः। द्वित्वम् 'अतो गुणे'.

एधिष्येते एधिष्यन्ते । एधिष्यसे एधिष्येथे एधिष्यध्वे । एधिष्ये एधिष्यावहे एधिष्यामहे । **२२५१ आमेतः ।** (३-४-९०) लोट एकारस्यामस्यात् । एधताम् एधेताम् एधन्ताम् । **२२५२ सवाभ्यां वामौ ।** (३-४-९१) सकारवकाराभ्यां परस्य लोडेतः क्रमाद् व अम् एतौ स्तः । एधस्व एधेथाम् एधध्वम् । **२२५३ एत ऐ ।** (३-४-९३) लोडुत्तमस्य एत ऐ स्यात् । आमोऽपवादः । एधै एधावहै एधामहै । **२२५४ आडजादीनाम् ।** (६-४-७२)

यलोपः, 'आद्गुणः' षत्वम् । **एधिष्यन्त इति ।** झस्य टेरेत्वम् , झकारस्य अन्तादेशः, स्यः, इट् , पररूपम् , षत्वम् । थासादावपि लटीव सुयोजमिति मत्वा रूपाणि न प्रदर्शितानि । तत्र थासः से, स्यः, इट्, षत्वम्, एधिष्यसे इति रूपम् । एधिष्येते इतिवदाथामि एधिष्येथे इति रूपम् । ध्वम एत्वे, स्यः, इट्, षत्वम्, एधिष्यध्वे इति रूपम् । इट एत्वे, स्यः, इडागमः, षत्वम्, 'अतो गुणे' इति पररूपम् , एधिष्ये इति रूपम् । वहिमहोष्टेरेत्वम् , स्यः, इट्, अतो दीर्घः, एधिष्यावहे एधिष्यामहे इति रूपे । इति लृट्प्रक्रिया । **आमेतः ।** 'आम्' 'एतः' इति च्छेदः । 'लोटो लङ्वत्' इत्यतो लोट इत्यनुवर्तते, तदाह **लोट एकारस्येति** । लोडादेशावयवस्य एकारस्येत्यर्थः । **एधतामिति ।** लोटः तादेशे टेः एत्वे आमादेशे शपि रूपम् । **एधेतामिति ।** आताम् । टेरेत्वं शप् 'सार्वधातुकमपित्' इति ङित्त्वाद् 'आतो ङितः' इत्याकारस्य इय् , गुणः, यकारलोपः, 'आमेतः' इत्येकारस्य आम् । **एधन्तामिति ।** झस्य टेरेत्वे शपि झकारस्य अन्तादेशे एकारस्य आम् । अथ लोटः थासः सेभावे शपि एधसे इति स्थिते । **सवाभ्याम् ।** सश्च वश्च सवौ । ताभ्यामिति विग्रहः । अकारावुच्चारणार्थौ । वश्च अम् च वामौ । 'लोटो लङ्वत्' इत्यस्माद् लोट इति 'आमेतः' इत्यस्मादेत इति चानुवर्तते, तदाह **सकारेति** 'आमेतः' इत्यस्यापवादः । **एधस्वेति ।** एधसे इत्यत्र एकारस्य व इति वकाराकारसंघात आदेशः । **एधेथामिति ।** आथाम् , टेरेत्वम्, शप्, 'आतो ङितः' इत्याकारस्य इय् , गुणः, यलोपः, 'आमेतः' इत्याम् । **एधध्वमिति ।** ध्वमि शप् टेरेत्वे कृते 'सवाभ्याम्–' इति वकारात् परस्यैकारस्य अम् । उत्तमपुरुषैकवचने इटि टेरेत्वे शपि 'आमेतः' इत्येकारस्य आमि प्राप्ते । **एत ऐ ।** ऐ इति लुप्तप्रथमाकम् । 'लोटो लङ्वत्' इत्यस्माल्लोट इति 'आडुत्तमस्य पिच्च' इत्यस्मादुत्तमस्येति चानुवर्तते, तदाह **लोडुत्तमस्येति । एधै इति ।** एध ए इति स्थिते एकारस्य ऐत्वे 'आडुत्तमस्य–' इत्याडागमे 'आटश्च' इति वृद्धौ

'अत आदेः' इति दीर्घः । णल औ वृद्धिरित्युक्तत्वात् । हलादिःशेषात् प्रागेव परत्वाद् 'अत आदेः' इति दीर्घे कृते तु पररूपशङ्कापि तत्र नास्तीति चिन्त्योऽयं ग्रन्थ इति

आजादीनामाट् स्याल्लुङादिषु। अटोऽपवादः। 'आटश्च' (सू २६९) ऐधत ऐधेताम् ऐधन्त। ऐधथाः ऐधेथाम् ऐधध्वम्। ऐधे ऐधावहि ऐधामहि। २२५५

'वृद्धिरेचि' इति वृद्धिः। **एधावहै, एधामहै इति**। वहिमह्योष्टेरेत्वे शपि एकारस्य ऐत्वे आटि सवर्णदीर्घः। इति लोट्प्रक्रिया। अथ एधधातोर्लङि 'लुङ्लङ्लृङ्क्ष्वडुदात्तः' इत्यडागमे वृद्धिं बाधित्वा परत्वाद् 'अतो गुणे' इति पररूपे प्राप्ते। **आडजादीनाम्। लुङादिष्विति**। लुङ्लङ्लृङ्क्ष्वित्यनुवृत्तेरिति भावः। **अटोऽपवाद इति**। अटि सति पररूपं स्यादिति भावः। 'आटश्च' इत्यनन्तरं वृद्धिरिति शेषः। यद्यपि 'वृद्धिरेचि' इति 'एत्येधति–' इति वा वृद्धौ इदं सिध्यति, तथापि ऐक्षतेत्याद्यर्थं सूत्रमिहापि न्याय्यत्वादुपन्यस्तम्। **ऐधतेति**। लङस्तादेशे शपि आडागमे 'आटश्च' इति वृद्धिः। लङादेशानां टिदादेशत्वाभावाद् एत्वं न भवति। 'आडजादीनाम्' इति सूत्रं भाष्ये प्रत्याख्यातम्। **ऐधेतामिति**। आतामि शपि आटि

नव्याः। **आडजादीनाम्**। एतच्चाजादीनामटा सिद्धमिति वार्तिककृता प्रत्याख्यातम्। ननु अटि सति 'वृद्धिरेचि' इत्यनेन ऐधतेत्यादिसिद्धावपि ऐन्ददित्यादि न सिध्येत्। किं च 'अतो गुणे' इति पररूपप्रवृत्त्या ऐधतेत्याद्यपि न सिध्येत्। यदि तु 'आटश्च' इति सूत्रं 'अटश्च' इति क्रियेत तर्हि अस्वपोऽहसत् इत्यत्र वृद्धिः स्यात्। 'रुदश्च पञ्चभ्यः' 'अड्गार्ग्यगालवयोः' इति अडागमस्य सत्त्वाद् 'अतो रोरप्लुतात्–' इति रोरुत्वे सति अच्परत्वाच्चेति चेत्। न, 'उपसर्गादृति धातौ' इत्यतो धाताविल्यपकृष्याजादौ धाताविति व्याख्यानात्। न च अस्वपोऽस्तीत्यादावोकारस्यान्तवद्भावेनाट्त्वात्परत्राजादिधातुसत्त्वाच्चोक्तदोषस्तदवस्थ इति वाच्यम्, आदित्यनुवर्त्य अकाररूपादटोऽचि परे वृद्धिरिति व्याख्यानात्। एतेन अटश्चेत्युक्तौ 'अट गतौ' इत्यस्माल्ल्युटि अटनमित्यत्रातिप्रसङ्गः स्यादित्येतदपि निरस्तम्। न चैवमपि आतत् आतीत् इत्यादि न सिध्यति। 'अटश्च' इत्यस्य ऐन्ददित्यादौ सावकाशतया परत्वादिह 'अतो गुणे' इत्यस्यैव प्रवृत्तेरिति वाच्यम्, चकारोऽत्र पुनर्वृद्धिविधानार्थ इत्यभ्युपगमादन्तरङ्गत्वाद्वा 'अटश्च' इत्यस्यैव प्रवृत्तेः। स्यादेतत्—'आडजादीनाम्' इति सूत्राभावे आस्ताम् आसन् इति कथमटा सिध्यति। 'श्नसोः–' इत्यल्लोपेन 'अटश्च' इति तत्र वृद्ध्यप्रवृत्तेः। मैवम्, अन्तरङ्गत्वात्प्रागेवाडागमे कृते वृद्धौ च कृतायां पश्चात् श्नसोरल्लोपस्याप्रसक्तेः। न च 'वार्णादाङ्गं बलीयः' इति वृद्धेः प्रागल्लोप एव स्यादिति शङ्क्यम्, व्याश्रयत्वाद् 'वार्णादाङ्गम्–' इति परिभाषाया अनित्यत्वाद्वा। तत्र हि 'श्नसोरल्लोपः' इति तपरकरणमेव लिङ्गम्, यदि वृद्धेः प्रागेवाल्लोपः स्यात्तर्हि किं तेन तपकरणेनेति। यद्यपि वैदिकप्रक्रियायामानट् आव् इत्यादौ 'छन्दस्यपि दृश्यते' इत्याडागमस्य वक्ष्यमाणत्वात्तदर्थ-

लिङः सीयुट्। (३-४-१०२) लिङात्मनेपदस्य सीयुडागमः स्यात्। सलोपः। एधेत एधेयाताम्। **२२५६ झस्य रन्।** (३-४-१०५) लिङो झस्य रन्स्यात्। एधेरन्। एधेथाः एधेयाथाम् एधेध्वम्। **२२५७ इटोऽत्।** (३-४-१०६) लिङादेशस्यटोऽस्यात्। एधेय एधेवहि एधेमहि। आशीर्लिङि आर्धधातुकत्वाल्लिङः सलोपो न। सीयुट्सुटोः प्रत्ययावयवत्वात्षत्वम्। एधिषीष्ट

वृद्धिः। 'आतो ङितः' इत्याकारस्य इय्, 'आद् गुणः' यलोपः। **ऐधन्तेति।** झेरन्तादेशः, शप्, आट्, वृद्धिः। **ऐधथा इति।** थास्, शप्, आट्, वृद्धिः। **ऐधेथामिति।** आथाम्, शप्, आट्, वृद्धिः, इय्, आद्गुणः, यलोपः। **ऐधध्वमिति।** ध्वम्, शप्, आट्, वृद्धिः। **ऐधे इति।** इट्, शप्, 'आद्गुणः', आटो वृद्धिः। **ऐधावहि ऐधामहि इति।** वहिमह्योः शप्, आट्, वृद्धिः, अतो दीर्घः। इति लङ्प्रक्रिया। **लिङः सीयुट्।** स्पष्टम्। परस्मैपदानां लिङादेशानां यासुडागमविधानादात्मनेपदविषयमिदम्। सीयुटि टकार इत्। उकार उच्चारणार्थः। **सलोप इति।** 'लिङः सलोपः–' इत्यनेनेति शेषः। **एधेतेति।** लिङस्तादेशः, सीयुट्, शप्, सलोपः, आद्गुणः, यलोपः। **एधेयातामिति।** आतामि सीयुट्, शप्, सलोपः, आद्गुणः। **झस्य रन्।** 'लिङः सीयुट्' इत्यतो लिङ इत्यनुवर्तते, तदाह **लिङो झस्येति।** लिङादेशस्य झस्येत्यर्थः। अनेकाल्त्वात्सर्वादेशः। **एधेरन्निति।** झस्य रन, शप्, सीयुट्, सलोपः, आद्गुणः, यलोपः। **ऐधेथा इति।** थास्, सीयुट्, शप्, सीयुटस्सस्य लोपः, आद्गुणः, यलोपः, थासस्सस्य रुत्वविसर्गौ। **एधेयाथामिति।** आथाम्, सीयुट्, सलोपः, शप्, आद्गुणः। **एधेध्वमिति।** ध्वम्, सीयुट्, शप्, सलोपः, आद्गुणः, यलोपः। **इटोऽत्।** इटः अत् इति च्छेदः। 'लिङस्सीयुट्' इत्यतो लिङ इत्यनुवर्तते, तदाह **लिङादेशस्येति।** 'अच्च घेः' इत्यत्रेव आदेशे तकार उच्चारणार्थ एव, नत्वित्संज्ञक इति शब्देन्दुशेखरे 'दिव औत्' इत्यत्र प्रपञ्चितम्। इत्संज्ञक एवेत्यन्ये। 'न विभक्तौ–' इति निषेधस्तु न। आदेशत्वात् प्राग् विभक्तित्वाभावात्। 'झस्य रन्' इत्यत्र तु लक्ष्यानुरोधेन संयोगान्तलोपमाश्रित्य नकारान्तरप्रश्लेषादुपदेशे अन्त्यत्वाभावान्नकारस्य नेत्संज्ञेत्यलम्। **एधेयेति।** इट् तस्य अकारादेशः। सीयुट्, शप्, सलोपः, आद्गुणः। **एधेवहि एधेमहीति।** वहिमह्योः सीयुट्, सलोपः, शप्, आद्गुणः, यलोपः। इति विधिलिङ्प्रक्रिया। **आर्धधातुकत्वादिति।** 'लिङाशिषि' इत्यनेनेति भावः। **सलोपो नेति।** सार्वधातुकग्रहणस्य 'लिङः सलोपः–' इत्यत्रानुवृत्तेरिति भावः। **सीयुट्-**

माटसूत्रं कर्तव्यं तथाप्यादं विनैवाङ्व्यत्ययेन आङ्पूर्वकत्वेन वा तत्र कथंचिद्व्याख्येय·

एधिषीयास्ताम् एधिषीरन्। एधिषीष्ठाः एधिषीयास्थाम् एधिषीध्वम्। एधिषीय एधिषीवहि एधिषीमहि। ऐधिष्ट ऐधिषाताम्। **२२५८ आत्मनेपदेष्वनतः।** (७-१-५) अनकारात्परस्यात्मनेपदेषु झस्य 'अत्' इत्यादेशः स्यात्। ऐधिषत। ऐधिष्ठाः। ऐधिषाथाम्। 'इणः षीध्वलुङ्लिटां धोऽङ्गात्' (सू २२५७)।

सुटोरिति। लक्ष्यभेदात्पुनः प्रवृत्तिरिति भावः। युगपदेवोभयोः षत्वमित्यन्ये। **एधिषीष्टेति**। आशिषि लिङः तादेशः। आर्धधातुकत्वाद् न शप्, सीयुट्, तकारस्य सुट्, सीयुटस्सकारात् प्रागिडागमः, यलोपः, सीयुटः सुटश्च सकारस्य षत्वम्, तकारस्य ष्टुत्वेन टकारः। **एधिषीयास्तामिति**। आताम्, सीयुट्। आकारादुपरि तकारात्प्राक् सुट्। सीयुटः प्रागिट्। तत उत्तरस्य सकारस्य षत्वम्। **एधिषीरन्निति**। 'झस्य रन्'। सीयुट्, इडागमः, यकारलोपः, षत्वम्। **एधिषीष्ठा इति**। थास्, सीयुट्, थकारस्य सुट्, सीयुटः प्रागिट्, सकारद्वयस्य षत्वम्। थकारस्य ष्टुत्वेन ठकारः, रुत्वविसर्गौ। **एधिषीयास्थामिति**। आथाम्, सीयुट्। आकारादुपरि थकारात् प्राक् सुट्, सीयुटः प्रागिट्। तत उत्तरस्य सकारस्य षत्वम्। **एधिषीध्वमिति**। ध्वम्, सीयुट्, यलोपः, सीयुटः प्रागिट्, षत्वम्। इणः परत्वेऽपि इणन्तादङ्गात्परत्वं नास्ति। इटः प्रत्ययभक्तत्वात्। ततश्च 'इणः षीध्वम्–' इति ढत्वं न भवति। **एधिषीयेति**। इटः अत्, सीयुट्, इट्, षत्वम्। **एधिषीवहि एधिषीमहीति**। वहिमह्योस्सीयुट् इट् षत्वम्। इत्याशीर्लिङ्प्रक्रिया। **ऐधिष्टेति**। लुङः तादेशः, च्लिः, सिच्, इट्, धातोराट्, वृद्धिः, षत्वम्, ष्टुत्वम्। **ऐधिषातामिति**। आताम्, च्लिः, सिच्, इट्, आट्, वृद्धिः, षत्वम्। अथ झस्य आदेर्झकारस्य 'झोऽन्तः' इत्यन्तादेशे प्राप्ते **आत्मनेपदेषु**। 'झोऽन्तः' इत्यतो झ इति षष्ठ्यन्तमनुवर्तते। आत्मनेपदेष्विति षष्ठ्यर्थे सप्तमी। आत्मनेपदावयवस्य झकारस्येति लभ्यते। 'अदभ्यस्तात्' इत्यतः अदित्यनुवर्तते। न अत् अनत्, तस्मादिति विग्रहः। तदाह **अनकारादित्यादिना**। **ऐधिषतेति**। झावयवझकारस्य अत् इत्यादेशः, च्लिः, सिच्, इट्, आट्, वृद्धिः, षत्वम्। **ऐधिष्ठा इति**। थास्, च्लिः, सिच्, इट्, आट्, वृद्धिः, षत्वम्, थकारस्य ष्टुत्वेन ठकारः, रुत्वविसर्गौ। **ऐधिषाथामिति**। आथाम्, च्लिः, सिच्, इट्, आट्, वृद्धिः, षत्वम्। अथ ध्वमो धस्य ढत्वं

मिति स्थितस्य गतिमाहुः। **सलोप इति**। 'लिङः सलोपोऽनन्त्यस्य' इत्यनेन। **एधेयातामिति**। सीयुटः सलोपे आद्गुणः। **एधिषीध्वमिति**। इणः परत्वेऽपि इणन्तादङ्गात्परत्वाभावाद् 'इणः षीध्वम्–' इति ढत्वं न भवति। **आत्मने**। 'झोऽन्तः' इत्यतो झ इति 'अदभ्यस्तात्' इत्यस्माद् अदिति चानुवर्तते। तदाह **झस्य**

ऐधिढ्वम् । इड्भिन्न एव इणिह गृह्यत इति मते तु ऐधिध्वम् । ढधयोर्वस्य मस्य च द्वित्वविकल्पात्षोडश रूपाणि । ऐधिषि ऐधिष्वहि ऐधिष्महि । ऐधिष्यत ऐधिष्येताम् ऐधिष्यन्त । ऐधिष्यथाः ऐधिष्येथाम् ऐधिष्यध्वम् । ऐधिष्ये ऐधिष्यावहि ऐधिष्यामहि । उदात्तत्वाद्धलादेरिट् । प्रसङ्गादनुदात्ताः संगृह्यन्ते—

स्मारयति इणः षीध्वमिति । **ऐधिढ्वमिति** । ध्वम्, च्लिः, सिच्, इट्, आट्, वृद्धिः, 'धि च' इति सस्य लोपः । 'इणः षीध्वम्–' इति धकारस्य ढत्वम् । इटो लुङ्सिजङ्गभक्ततया सिजन्ताङ्गान्तर्भूतत्वेन इडन्तस्य इणन्ताङ्गत्वादिति भावः । **इड्भिन्न एवेति** । उत्तरसूत्रे 'विभाषेटः' इत्यत्र इड्ग्रहणात् पूर्वसूत्रे 'इणः षीध्वम्–' इत्यत्र इड्भिन्न एव इण् गृह्यत इति केचिदाहुः । तन्मते तु प्रकृते इटः परत्वाद् धकारस्य ढत्वाभावे ऐधिध्वमित्येव रूपमित्यर्थः । इदं तु मतान्तरं भाष्यानारूढमिति सूचयितुं तुशब्दः । **ढधयोरिति** । मतभेदमाश्रित्येदम् । तत्र ढत्वाभावपक्षे धकारस्य 'अनचि च' इति द्वित्वविकल्पाद् द्विधमेकधमिति रूपद्वयम् । एवं ढत्वे द्विढम् एकढमिति रूपद्वयम् । रूपचतुष्टयेऽपि 'यणो मयो द्वे वाच्ये' इत्यत्र मय इति पञ्चमीमाश्रित्य वकारस्य द्वित्वविकल्पादेकवकाराणि द्विवकाराणि च प्रागुक्तानि चत्वारि रूपाणि भवन्ति । तथा च अष्टौ रूपाणि संपन्नानि । मकारस्य द्वित्वविकल्पादेतान्यष्टौ रूपाणि एकमकाराणि द्विमकाराणि चेति षोडश रूपाणि संपन्नानीत्यर्थः । **ऐधिषीति** । लुङ इडादेशः, च्लिः, सिच्, इडागमः, आट्, वृद्धिः । वहिमहोस्तु च्लेः सिचि इडागमे आटि वृद्धौ ऐधिष्वहि ऐधिष्महीति रूपे । इति लुङ्प्रक्रिया । **ऐधिष्यतेति** । लृङः तादेशः, स्यः, इट्, आट्, वृद्धिः, षत्वम् । **ऐधिष्येतामिति** । आतां स्यः, इट्, आकारस्य इय्, आद्गुणः, यलोपः, आट्, वृद्धिः, षत्वम् । **ऐधिष्यन्तेति** । झावयवझकारस्यान्तादेशः, स्यः, इट्, आट्, वृद्धिः, षत्वम् । **ऐधिष्यथा इति** । थास्, स्यः, इट्, आट्, वृद्धिः, रुत्वविसर्गौ । **ऐधिष्येथामिति** । आथाम्, स्यः, इट्, आकारस्य इय्, 'आद्गुणः,' यलोपः, आट्, वृद्धिः, षत्वम् । **ऐधिष्यध्वमिति** । ध्वम्, स्यः, इट्, आट्, वृद्धिः, षत्वम् । **ऐधिष्य इति** । इडादेशः, स्यः, इडागमः, षत्वम्, आद्गुणः । वहिमहोस्तु स्यः, इट्, अतो दीर्घः, आट्, वृद्धिः, षत्वम् । ऐधिष्यावहि ऐधिष्यामहि इति रूपे । नन्वेधधातोरनुदात्तेत्त्वाद् एकाच उपदेशेऽनुदात्तात्, इतीण्निषेधः कुतो न स्यादित्यत आह **उदात्तत्वादिति** । एधधा-

---

अदिति । आत्मनेपदेषु किम्, अदन्ति । सुन्वन्ति । अनतः किम्, एधन्ते । प्लवन्ते । **इड्भिन्न एवेणिति** । 'विभाषेटः' इति इटो विशिष्यग्रहणाद्गोबलीवर्दन्यायेन केचि-

ऊदृदन्तैर्यौतिरुक्ष्णुशीङ्स्नुनुक्षुश्विडीङ्श्रिभिः।
वृङ्वृञ्भ्यां च विनैकाचोऽजन्तेषु निहताः स्मृताः॥
शक्लृपच्मुच्रिच्वच्विच्सिच्प्रच्छ्त्यज्निजिर्भजः।

तुर्यद्यपि अनुदात्तेत्, तथापि अनुदात्तस्येतो लोपे सति परिशिष्टो धातुर्नानुदात्त इति भावः। ननु कतिपये धातवः पाणिनिना अनुदात्ता उच्चरिता इति कथमिदानींतनैरवगन्तव्यमित्यत आह **प्रसङ्गादिति**। स्मृतस्योपेक्षानर्हत्वं प्रसङ्गः। पाणिनिपठितानामनुदात्तधातूनां तदानींतनशिष्यपरम्परया आनुनासिक्यवदिदानीं ज्ञानं संभवतीति भावः। **ऊदृदन्तैरिति**। अजन्तेषु धातुषु ऊदन्तैः ॠदन्तैश्च धातुभिः विना यु रु क्ष्णु शीङ् स्नु नु क्षु श्वि डीङ् श्रि एतैश्च धातुभिर्विना वृङ् वृञ् आभ्यां च विना अन्ये एकाचः अजन्तधातवो निहता अनुदात्ताः स्मृताः। पाणिनिशिष्यपरम्परया ज्ञाता इत्यर्थः। अथ हलन्तेषु अनुदात्तान् धातून् परिगणयति **शक्लृ पच् मुचिति**।

दिड्भिन्न एवेणिह गृह्यत इति भावः। **ऊदृदन्तैरिति**। ऊदृदन्तैर्विना यौत्यादिभिर्विना वृङ्वृञ्भ्यां च विना अन्ये ये एकाचोऽजन्तास्ते निहताः। अनुदात्ता इत्यर्थः। तथा च दाता धाता चेता स्तोतेत्यादिषु इण् न भवति। ऊदन्ता भूलूप्रभृतयः। ॠदन्ताः कॄतॄदॄप्रभृतयः। 'यु मिश्रणादौ'। 'रु शब्दे', 'रुङ् गतिरेषणयोः' इत्युभयोर्ग्रहणम्, निरनुबन्धपरिभाषया, 'लुग्विकरणाऽलुग्विकरणयोः—' इति परिभाषया वा। न च साहचर्याल्लुग्विकरणस्यैव ग्रहणमिति शङ्क्यम्, तस्यानित्यत्वात्। 'क्ष्णु तेजने'। 'शीङ् स्वप्ने'। 'ष्णु प्रस्रवणे'। 'णु स्तुतौ'। 'टुक्षु शब्दे'। 'टुओश्वि गतिवृद्ध्योः'। 'डीङ् विहायसा गतौ'। 'श्रिञ् सेवायाम्'। 'वृङ् संभक्तौ'। 'वृञ् वरणे'। नन्वेतद्भिन्नानामेकाचामेवानुदात्तत्वे ऊर्णुतः ऊर्णुतवानित्यादि न सिध्येदिति चेत्। मैवम्, 'ऊर्णोतेर्णुवद्भावो वाच्यः' इति वक्ष्यमाणवार्तिकेनेष्टसिद्धेः। तेन ऊर्णोनूयते इत्यत्र तु 'धातोरेकाचः—' इति यङ्। ऊर्णुनावेत्यत्रानेकाच्त्वेन प्रवृत्तस्याऽमोऽभावश्च सिध्यति। उक्तं च भाष्ये—'वाच्य ऊर्णोर्णुवद्भावो यङ्प्रसिद्धिः प्रयोजनम्। आमश्च प्रतिषेधार्थमेकाचश्चेडुपग्रहात्' इति। 'विभाषा गुणेऽस्त्रियाम्' इति हेतावियं पञ्चमी। हेतुरिह फलम्। एतच्च कैयटे स्पष्टम्। उपग्रहः प्रतिषेधः। इट्प्रतिषेधार्थमित्यर्थः। एवं च णुवद्भावेनैकाच्त्वात् 'श्र्युकः किति' इति निषेधप्रवृत्तेः ऊर्णुत इत्यादि सिध्यति। 'एकाच उपदेशे—' इतीण्निषेधस्तु न प्रवर्तते, णुवद्भावेनैकाच्त्वेऽप्यनुदात्तत्वाभावात्, ऊर्णुधातोर्णुधातोश्चोदात्तत्वात्, तथा चोर्णविता और्णवीदित्याद्यपि सिद्धम्। 'वसतिशक्लृघस्लृभ्यः' इति प्राचो ग्रन्थस्थं पाठमुपेक्ष्य हलन्तेषु कादिक्रमेणाह **शक्लृ इति**। कान्त एकः। चान्तेषु पच्मुच्रिच्वच्विच्सिचः षट्। 'डुपचष् पाके' 'पचि व्यक्ती-

भञ्ज्भुज्भ्रस्ज्मस्जियज्युज्रुज्रञ्ज्विजिरस्वञ्जिसञ्ज्सृजः ॥
अद्क्षुद्खिद्छिद्तुदनुदः पद्यभिद्विद्यतिर्विनद् ।
शद्सदिस्विद्यतिस्कन्दिहदिक्रुध्क्षुधिबुध्यती ॥

शक्लृ पच् मुच् रिच् वच् विच् सिच् प्रच्छि त्यज् निजिर् भज् एषां द्वन्द्वः । तत्र कान्तेषु शक्लृ इत्येकः । लृकार इत् । भाष्ये तु अनुबन्धरहितः पाठो दृश्यते। चान्तेषु पच् मुच् रिच् वच् विच् सिच् इति षट् । अत्र 'डुपचष्' इत्यस्यैव ग्रहणं प्रसिद्धत्वात् । न तु 'पचि व्यक्तीकरणे' इत्यस्येत्याहुः । 'मुच्लृ मोक्षणे' इत्यस्यैव ग्रहणम्, न तु 'मुचि कल्कने' इति भौवादिकस्य । अविशेषात्सर्वस्येत्यन्ये । छान्तेषु प्रच्छ् एकः । प्रच्छेरकार उच्चारणार्थः । णिजिरित्यत्र इर इत्संज्ञा वक्ष्यते । भञ्ज् भुजित्यादि सृज इत्यन्तमेकं पदम्। जान्तेषु त्यज् निज् भज् भञ्ज् भुज् भ्रस्ज् मस्ज् यज् युज् रुज् रञ्ज् विज् स्वञ्ज् सञ्ज् सृज् इति पञ्चदश । अद्क्षुदित्यादि नुद इत्यन्तमेकं पदम् । तत्र तुदेत्यकार उच्चारणार्थः । पद्यभिदित्येकं पदम् । समाहारद्वन्द्वः । पद्येति श्यना निर्देशः । विद्यतिरिति श्यना निर्देशः । विनदिति श्नमा निर्देशः । शद्सदीत्यादि बुध्यतीत्यन्तमेकं पदम् । समाहार द्वन्द्वः । सदि स्कन्दि हदि क्षुधि इति इका निर्देशः । स्विद्यति बुध्यतीति शितपा श्यन्विकरणयोर्निर्देशः । ततश्च दान्तेषु अद्

करणे' द्वावपि पचित्यनेन गृह्येते । 'मुच्लृ मोक्षणे' । रिचित्यनेन 'रिचिर् विरेके' 'रिच वियोजनसंपर्चनयोः' इति चौरादिकश्च गृह्यते । वचित्यनेन तु 'वच परिभाषणे' ब्रुवो वचिरपि । वचिर्चौरादिकोऽपि गृह्यते । विचिर् पृथग्भावे' । 'षिच क्षरणे' । छान्तेषु प्रच्छ्येकः । जान्तेषु त्यज्निजिर्भज्भञ्ज्भुज्भ्रस्ज्मस्ज्यज्युज्रुज्रञ्ज्विजिर्स्वञ्ज्सञ्ज्सृजः पञ्चदश । भुजित्यनेन 'भुज पालनाभ्यवहारयोः' 'भुजो कौटिल्ये' इति च गृह्यते । युजित्यनेन 'युजिर् योगे' । 'युज समाधौ' इति च गृह्यते । केचित्तु व्याघ्रभूतिश्लोके भाष्ये च युजित्येतद् 'युजिर् योगे' इत्यस्यैकदेशोच्चारणमित्याहुस्तन्मते 'युज् समाधौ' सेट् । सृजित्यनेन तु 'सृज विसर्गे' दिवादिस्तुदादिश्च गृह्यते । दान्तेषु अद्क्षुद्खिद्छिद्तुद्नुद्पद्यभिद्विद्यतिविनद्शद्सद्स्विद्यस्कन्दहदः पञ्चदश। खिदित्यनेन 'खिद दैन्ये' खिद्यतिः, खिन्दतिः खिनत्तिश्च गृह्यते । विद्यतीति । 'विद सत्तायाम्' । विनदिति । 'विद विचारणे'। धान्तेषु क्रुध्क्षुध्बुध्यबन्धयुध्रुध्राध्व्यध्शुध्साध्सिध्यतय एकादेश । रुधित्यनेन 'रुधिर् आवरणे' । 'अनो रुध कामे' इति दिवादिश्च गृह्यते । नान्तेषु मन्यहनौ द्वौ । 'मन ज्ञाने' दिवादिः । पान्तेषु आप्क्षिप्छुप्तप्तिप्तृप्यदृप्यलिप्लुप्वप्शप्स्वप्सृपस्त्रयोदश। क्षिपित्यनेन 'क्षिप प्रेरणे' क्षिप्यतिः, क्षिपतिश्च गृह्यते । 'छुप स्पर्शे' । तपित्यनेन 'तप संतापे' 'तप ऐश्वर्ये' दिवादिः, 'तप

बन्धिर्युधिरुधी राधिव्यधशुधः साधिसिध्यती।
मन्यहन्नाप्क्षिप्छुपितप्तिपस्तृप्यतिदृप्यती॥
लिप्लुप्वप्शप्स्वप्सृपियभ्रभ्लभ्गम्नम्यमो रमिः।
क्रुशिर्दंशिदिशिदृशमृशरिशरुशलिशविशस्पृशः कृषिः॥
त्विषतुषद्विषदुषपुष्यपिषविषशिषशुषश्लिष्यतयो घसिः।

क्षुद् खिद् छिद् तुद् नुद् पद् (श्यन्विकरणः) भिद् विद् (श्यन्विकरणः) विद् (श्नम्विकरणः) शद् सद् स्विद् (श्यन्विकरणः) स्कन्द् हद् इति पञ्चदश। बन्धिरिति इका निर्देशः। युधिरुधी इत्येकं पदम्, इका निर्देशः। राधिव्यधशुध इत्येकं पदम्। राधीति इका निर्देशः। साधिसिध्यती इति द्वन्द्वः। साधीति इका निर्देशः। ततश्च धान्तेषु क्रुध् क्षुध् बुध् (श्यन्विकरणः) बन्ध् युध् रुध् राध् व्यध् शुध् साध् सिध् (श्यन्विकरणः) इत्येकादश। मन्येत्यादि तिप इत्यन्तमेकं पदम्। मन्येति श्यना निर्देशः। क्षुपीति इका निर्देशः। तृप्यतिदृप्यती इति द्वन्द्वः, श्यना निर्देशः। लिपित्यादि यम इत्यन्तमेकं पदम्। सृपीति इका निर्देशः। रमिरिति भिन्नं पदम्, इका निर्देशः। तथा च नान्तेषु मन हन्निति द्वौ। मनिः श्यन्विकरणः। पान्तेषु आप् क्षिप् छुप् तप् तिप् तृप् दृप् लिप् लुप् वप् शप् स्वप् सृप् इति त्रयोदश। भान्तेषु यभ् रभ् लभ् इति त्रयः। मान्तेषु गम् नम् यम् रम् इति चत्वारः। क्रुशिरित्यादि स्पृश इत्यन्तमेकं पदम्। दशिरिति च इरित्। कुशि दिशि दंशीति इका निर्देशः। तथा च शान्तेषु क्रुश् दंश् दश् दिश् मृश् रिश् रुश् लिश् विश् स्पृश् इत्येते दश। कृषिरिति पृथक्पदम्, इका निर्देशः। त्विषित्यादि श्लिष्यतय इत्यन्तमेकं पदम्, पुष्येति श्यना निर्देशः, श्लिष्यतीति श्यन्विकरणस्य श्तिपा

दाहे' इत्यपि णिजभावपक्षे गृह्यते। 'तिपृ क्षरणे'। तृप्यतिदृप्यत्योर्वेट्कत्वेऽपि 'अनुदात्तस्य चर्दुपधस्य–' इत्यमर्थोऽयं पाठः। भान्तेषु यभ्रभ्लभस्त्रयः। मान्तेषु गम्नम्यम्रमश्चत्वारः। शान्तेषु क्रुश्दंश्दिश्दृश्मृश्रिश्रुश्लिश्विश्स्पृशो दश। 'रिश् रुश् हिंसायाम्'। लिशित्यनेन 'लिश अल्पीभावे' दिवादिः, 'लिश गतौ' तुदादिश्च गृह्यते। षान्तेषु कृष्त्विष्तुष्द्विष्दुष्पुष्यपिष्विष्शिष्शुष्श्लिष्य एकादश। कृषिति भौवादिकतौदादिकौ गृह्येते। विषित्यनेन 'विष्लृ व्याप्तौ', तिष्विष्मिषिति दण्डकस्थोऽपि गृह्यते। शिषित्यनेन तु 'शिष्लृ विशेषणे' कष खष शिषेति दण्डकस्थश्च गृह्यते। विषिति 'विष्लृ व्याप्तौ' इति जौहोत्यादिक एव गृह्यते न तु दण्डकस्थः। शिषित्येनेनापि 'शिष्लृ विशेषणे' इति रौधादिक एव न तु दण्डकस्थ इति बोपदेवादयः। सान्तेषु घस्लृवसती द्वौ। 'घस्लृ अदने'। 'लुङ्सनोर्घस्लृ' इत्यत्तेरादेशस्य तु स्थान्यनु-

वसतिर्दहदिहिदुहो नहमिहरुहलिहवहिस्तथा ॥
अनुदात्ता हलन्तेषु धातवो द्व्यधिकं शतम् ।
तुदादौ मतभेदेन स्थितौ यौ च चुरादिषु ॥
तृपदृपी तौ वारयितुं श्यना निर्देश आदृतः ।
किं च—स्विद्यपद्यौ सिध्यबुध्यौ मन्यपुष्यश्लिषः श्यना ॥
वसिः शपा लुका यौतिर्निर्दिष्टोऽन्यनिवृत्तये ।

निर्देशः । तथा च षान्तेषु कृष् त्विष् तुष् द्विष् दुष् पुष् (श्यन्विकरणः) पिष् विष् शिष् शुष् श्लिष् (श्यन्विकरणः) इत्येकादश । घसिरिति पृथक्पदम् । इका निर्देशः । वसतिरिति पृथक्पदं शितपा निर्देशः । सान्तेषु घस् वस् इति द्वौ । दहदिहिदुह इति द्वन्द्वः । दिहीति इका निर्देशः । नह् मिह् रुह् लिह् इति समाहारद्वन्द्वः । वहिरिति पृथक्पदम्, इका निर्देशः । तथेति चकारपर्यायः । हान्तेषु दह् दिह् दुह् नह् मिह् रुह् लिह् वह् इत्यष्टौ । **द्व्यधिकं शतमिति** । भाष्ये मृषेः षान्तेषु पाठस्तु लेखकप्रमादकृत इति भावः । अथ पान्तेषु द्वयोः श्यना निर्देशस्य फलमाह **तुदादाविति** । यौ तृपदृपी तुदादौ चुरादौ च मतान्तरीयत्वेन धातुपाठे स्थितौ, तौ अनुदात्तेभ्यो वारयितुं श्यना निर्देशः अभ्युपगत इत्यर्थः । अत एव 'शे मुचादीनाम्' इति सूत्रभाष्ये तृपितो दृपित इत्युदाहृतं सङ्गच्छत इति भावः । **किं चेति** । अन्यदपि वक्ष्यत इत्यर्थः । **अन्यनिवृत्तय इति** । विकरणान्तर-

---

दात्तत्वेनापि सिद्धम् । हान्तेषु दहदिहदुहमिहनहरुहलिहवहयोऽष्टौ । दुहित्यनेन दुहिरिति, भौवादिको न गृह्यते, किं तु 'दुह प्रपूरणे' इति आदादिक एवेति प्राञ्चः । इह मनोरमायां संग्रहश्लोक उक्तः—'कचच्छजा दधनपा भमशाः षसहाः क्रमात् । कचका णणटाः खणडो गघजाष्टखजाः स्मृताः' इति । तत्र पूर्वार्धोपात्ता ये चतुर्दश वर्णास्तदन्ता धातव उत्तरार्धोपात्तकादिक्रमेण ये वर्णास्तत्संख्याका बोध्या इत्यर्थः । अत एव कान्त एकः, चान्ताः षट्, छान्त एकः, जान्ताः पञ्चदशेत्यादि व्याख्यातम् । क इत्येकस्य, च इति षण्णाम्, ण इति पञ्चदशानां संज्ञेत्याद्यभ्युपगमात् । पान्तेषु द्वयोः श्यनाः निर्देशस्य फलमाह **तुदादाविति** । तृपदृपी मतभेदेन तुदादौ स्थितौ । चुरादौ तु तृपिः सर्वमतेन स्थितः, दृपिस्त्वेकीयमतेनेति विवेकः । अतएव वक्ष्यति—'तृप तृम्फ तृप्तौ' । द्वावपि द्वितीयान्तावित्यन्ये । 'दृप दृम्फ उत्क्लेशे' । प्रथमः प्रथमान्तः द्वितीयो द्वितीयान्त इत्येके इति च तुदादौ । चुरादौ तु 'तृप तृप्तौ' । 'तृप दृप संदीपने' इत्येके इति च । **अन्यनिवृत्तय इति** । निवर्तनीयास्तु 'ष्विदा स्नेहनमोचनयोः' । 'पद स्थैर्ये' । 'षिध गत्याम्' । 'षिधू शास्त्रे माङ्गल्ये च' । 'बुधिर् बोधने'

निजिर्विजिशक्लृ इति सानुबन्धा अमी तथा ॥
विन्दतिश्चान्द्रदौर्गादेरिष्टो भाष्येऽपि दृश्यते ।
व्याघ्रभूत्यादयस्त्वेनं नेह पेठुरिति स्थितम् ॥
रञ्जिमस्जी अदिपदी तुद्[1] क्षुध् शुषिपुषी शिषिः ।
भाष्यानुक्ता नवेहोक्ता व्याघ्रभूत्यादिसंमतेः ॥

स्पर्ध १ संघर्षे । संघर्षः पराभिभवेच्छा । धात्वर्थेनोपसंग्रहादकर्मकः । स्पर्धते ।

निवृत्तय इत्यर्थः । तच्चाग्रे तदार्धधातुकनिरूपणे स्पष्टीभविष्यति । **अमी तथेति** । उक्तानुबन्धरहितानां व्यावृत्तय इत्यर्थः । एतदपि तत्तदार्धधातुकनिरूपणे स्पष्टीभविष्यति । **विन्दतिरिति** । 'विद्लृ लाभे' इति तौदादिकः । चान्द्रदौर्गादिव्याकरणसम्मतः । **भाष्येऽपि दृश्यत इति** । विन्दतिविनत्तिविद्यतीति तत्र पाठादिति भावः । **एनमिति** । विन्दतिमित्यर्थः । **नेह पेठुरिति** । तथापि भाष्यप्रामाण्यादस्यानिट्कत्वमिति भावः । रञ्जिमस्जी इत्येकं पदम् । तुद् क्षुध् इति पृथक्कृते पदे । शुषिपुषी इत्येकं पदम् । शिषिरित्यनन्तरम् इत्येते इति शेषः । **नवेहेति** । नव धातवो भाष्यानुक्ता अपि इहानुदात्तेषु परिगणिता इत्यर्थः । कुत इत्यत आह **व्याघ्रभूत्यादिसम्मतेरिति** । भाष्ये त्वेभ्यो नवभ्योऽन्येषां परिगणनं नवानामप्येषामुपलक्षणमिति भावः । तेन रक्तं रागात्, तदस्मिन्नन्नं प्रायेण, क्रोऽकृतमितप्रतिपन्नाः, शुष्कधृष्टौ, क्तेन नञ्विशिष्टेनेत्यादिसौत्रप्रयोगाः—तुन्नः, मग्नः, पुष्टः, मद्क्त्वा, मद्क्तव्यमित्यादिभाष्यप्रयोगाश्चात्र लिङ्गम् । इत्यनिट्कारिकाः । **स्पर्ध संघष इति**।

इति भौवादिकाः । 'मनु अवबोधने' तानादिकः । 'पुष पुष्टौ' भौवादिकः क्रैयादिकश्च । 'श्लिष दाहे' भौवादिकः । 'वस आच्छादने' आदादिकः । एते अनुदात्तत्वराहित्यात् सेटः । 'युञ् बन्धने' क्रैयादिकोऽयमनुदात्त इत्यनिट् । श्यना निर्देशेन संभाव्यास्तु 'ष्विदा गात्रप्रक्षरणे' । 'पद गतौ' । 'षिधु संराद्धौ' । 'बुध अवगमने' । 'मन ज्ञाने' । 'पुष पुष्टौ' । 'श्लिष आलिङ्गने' । 'वस निवासे' । एतेऽनिटः । 'यु मिश्रणामिश्रणयोः' अयं सेट् । **अमी तथेति** । 'णिजिर् शुद्धौ' । 'ओविजी भयचलनयोः' । 'शक मर्षणे' इत्येषां क्रमेण आदादिकतौदादिकदैवादिकानां व्यावृत्तये सानुबन्धा निर्दिष्टा इत्यर्थः । विन्दतिरिति 'विद्लृ लाभे' । **इष्ट इति** । अनिट्त्वेनेति शेषः । **भाष्यानुक्ता इति** । भाष्यकृताऽनुक्ताः, न तु प्रत्याख्याता इति नास्तीह तद्विरोधः । ततश्च व्याघ्रभूत्यादिग्रन्थानुरोधात् 'शुष्कधृष्टौ' 'क्तेन नञ्विशिष्टे-

---

१ अत्र 'तुद्' इति पाठो बालमनोरमानुरोधेन । परन्तु 'तुद्' इति बहुसम्मतः पाठः ।

२२५९ शर्पूर्वाः खयः। (७-४-६१) अभ्यासस्य शर्पूर्वाः खयः शिष्यन्ते। 'हलादिः शेषः' (सू २१७९) इत्यस्यापवादः। पस्पर्धे। स्पर्धिता। स्पर्धिष्यते। स्पर्धताम्। अस्पर्धत। स्पर्धेत। स्पर्धिषीष्ट। अस्पर्धिष्ट। अस्पर्धिष्यत। गाधृ

वर्तते इति शेषः। **पराभिभवेति**। परस्याभिभवः पराजयः। तद्विषयकेच्छेत्यर्थः। नन्वत्रेच्छायां पराभिभवस्य कर्मतया स्पर्धधातोः सकर्मकत्वाद् देवदत्तो यज्ञदत्तं स्पर्धयतीत्यादौ 'गतिबुद्धिप्रत्यवसानार्थशब्दकर्माकर्मकाणाम्—' इत्यकर्मककार्यं कथमित्यत आह **धात्वर्थेनोपसंग्रहादकर्मक इति**। धात्वर्थबहिर्भूतकर्मकत्वमेव सकर्मकत्वमिति 'सुप आत्मनः क्यच्' इति सूत्रभाष्ये प्रपञ्चितत्वादिति भावः। नचैवं सति पदव्यवस्थायां 'स्पर्धायामाङः' इत्यत्र कृष्णश्चाणूरमाह्वयते स्पर्धत इत्यर्थ इति मूलग्रन्थविरोध इति वाच्यम्, तत्र स्पर्धेरभिभवपूर्वकाह्वाने वृत्तेरित्यलम्। **स्पर्धत इति**। कत्थन्ताः षट्त्रिंशदनुदात्तेत इत्युक्तेरात्मनेपदम्। एधधातुवद् लटि रूपाणीति भावः। धातोरिजादित्वाभावाद् 'इजादेश्च—' इति लिट्याम् न। अत एव नानुप्रयोगोऽपि। किन्तु लिटस्तादेशे 'लिटस्तझयोः—' इति तस्यैशि 'लिटि धातोः—' इति द्वित्वे 'हलादिः शेषः' इत्यभ्यासे प्रथमहल्व्यतिरिक्तहलां निवृत्तौ सस्पर्धे इति प्राप्ते। **शर्पूर्वाः खयः। अभ्यासस्येति**। 'अत्र लोपोऽभ्यासस्य' इत्यतस्तदनुवृत्तेरिति भावः। 'शर्पूर्वाः—' इत्यत्र शर् पूर्वो येभ्य इत्यतद्गुणसंविज्ञानो बहुव्रीहिः। तेन शर् न शिष्यते। **शिष्यन्त इति**। 'हलादिः शेषः' इत्यतः शेष इत्यनुवृत्तं कर्मणि घञन्तं बहुवचनान्ततया विपरिणम्यत इति भावः। तथा च प्रकृते अभ्यासे खय् पकारः शिष्यते। 'न न्द्राः संयोगादयः' इति रेफस्य द्वित्वनिषेधो न शङ्क्यः। द्वितीयैकाजवयवस्यैव तन्निषेधात्, तदाह **पस्पर्धे इति**। नच वव्रश्चेत्यत्राभ्यासे चकार एव शिष्येतेति वाच्यम्, 'हलादिः शेषः' इत्यतो हि आदिरित्यप्यनुवर्तते। शर्व्यतिरिक्तवर्णापेक्षया धात्वादिभूता इत्यर्थः। पस्पर्धाते पस्पर्धिरे, पस्पर्धिषे पस्पर्धाथे पस्पर्धिध्वे, पस्पर्धे पस्पर्धिवहे पस्पर्धिमहे, इति लिटि रूपाणि सुगमानि। **स्पर्धितेति**। लुटि एधधातुवद् रूपाणि सुगमानीति भावः। **स्पर्धिष्यत इति**। लृटि एधधातुवद्रूपाणीति

नानञ्' इत्यादि सौत्रप्रयोगादत्तुं प्रतिपत्तुमित्यादिसार्वलौकिकव्यवहाराच्च उपलक्षणतयैव भाष्यं नेयमिति भावः। **अकर्मक इति**। अत्र केचित्—अभिभवेच्छा धात्वर्थस्तथा च स्पर्धार्थकस्य सकर्मकता दृश्यते 'आह्वास्त मेरावमरावतीं या' इति। उदाहरिष्यते च 'स्पर्धायामाङः' इत्यत्र स्वयमेव 'कृष्णश्चाणूरमाह्वयते स्पर्धत इत्यर्थः' इति। श्रीहर्षोऽपि प्रायुङ्क्त—'तन्नासत्ययुगान्तं वा त्रेधा स्पर्धितुमर्हति' इति। अतोऽस्य सकर्मकत्वं न्याय्यमित्याहुः। **शर्पूर्वाः**। अतद्गुणसंविज्ञानोऽयं बहुव्रीहिः। तेन शरो न

४ प्रतिष्ठालिप्सयोर्ग्रन्थे च। गाधते। जगाधे। बाधृ ५ लोडने। लोडनं प्रति· घातः। बाधते। नाथृ ६ नाधृ ७ याच्ञोपतापैश्वर्याशीःषु। 'आशिषि नाथ इति वाच्यम्'। अस्याशिष्येवात्मनेपदं स्यात्। नाथते। अन्यत्र नाथति। नाधते। दध ८ धारणे। दधते। २२६० अत एकहल्मध्येऽनादेशादेर्लिटि।

भावः। स्पर्धतामिति। लोटि एधिवद्रूपाणीति भावः। अस्पर्धतेति। लङि एधिवद्रूपाणीति भावः। हलादित्वादडेव न त्वाडिति विशेषः। स्पर्धेतेति। विधि· लिङि एधिवद्रूपाणि। स्पर्धिषीष्टेति। आशिषि लिङि एधिवद्रूपाणि। अस्पर्धि- ष्टेति। लुङि एधिवद्रूपाणि। अडागमः, न त्वाड् इति विशेषः। अस्पर्धिष्यतेति। लृङि एधिवद्रूपाणि। अडागमो विशेषः। न त्वाट्। गाधृ प्रतिष्ठेति। चतुर्थान्तो धातुः। ऋकारो 'नाग्लोपिशास्वृदिताम्' इति निषेधार्थः। अजगाधत्। प्रतिष्ठा आधारे स्थितिः। ग्रन्थो ग्रन्थनं रचनम्। जगाध इति। लिटि द्वित्वादि। अभ्यासस्य ह्रस्वः, चुत्वम्। बाधृ इति। प्रतिघातः पीडनम्। नाथृ नाधृ इति। द्वितीय· चतुर्थान्तौ धातू। उपतापो ज्वरप्रयुक्ता पीडा। आशीराशासनम्। द्वितीयान्तस्य नाथृधातोर्विशेषमाह आशिषि नाथ इति। अत्र नाथ इति षष्ठी। 'अनुदात्तङित–' इत्यत आत्मनेपदमित्यनुवर्तते। अनुदात्तेत्त्वादेव सिद्धे नियमार्थमिदं वार्तिकम्। तदाह अस्याशिष्येवेति। आशासनार्थवृत्तेरेव नाथधातोरात्मनेपदम्। याच्ञाद्यर्थवृत्तेस्तु 'शेषात् कर्तरि–' इति परस्मैपदमेवेत्यर्थः। नाथत इति। आशास्ते इत्यर्थः। अन्य- त्रेति। याच्ञाद्यर्थे विद्यमानस्येत्यर्थः। अथ चतुर्थान्तस्य नाधधातोरुदाहरति नाधत इति। दधेति। चतुर्थान्तोऽयम्। तस्य लटि एधिवद्रूपाणि सिद्धवत्कृत्य लिटस्ता- देशे तस्यैशि द्वित्वे दध् दध् ए इति स्थिते। अत एकहल्मध्ये। आदेश आदिर्य- स्येति बहुव्रीहिः। 'अङ्गस्य' इत्यधिकृतम् अन्यपदार्थः। लिटीति निमित्तसप्तमी अना· देशादेरित्यस्यैकदेशे आदेशेऽन्वेति। लिटि परे निमित्ते य आदेशः स आदिर्यस्य न भवति तथाविधस्याङ्गस्येति लभ्यते। अङ्गस्येत्यवयवषष्ठी। तथा च तथाविधाङ्गावयव- स्याऽत इति लभ्यते। एकशब्दः असहायवाची। 'एके मुख्यान्यकेवलाः' इत्यमरः। एकौ असंयुक्तौ हलौ एकहलौ, तयोर्मध्य एकहल्मध्यः, तत्रेति विग्रहः। अत इत्यस्यैव

शेषः किं तु स्वयमेव। इह स्पर्ध इत्यत्र रेफस्यापि द्वित्वं भवति, द्वितीयस्यैकाचः सन्निधेरेफस्यैव 'नन्द्राः–' इति निषेधादिति बोध्यम्। गाधृ। ऋकारो 'नाग्लोपि- शास्वृदिताम्' इति निषेधार्थः। अजगाधत्। आस्पदं स्थापनम् अवस्थानं वा। प्रतिष्ठा एकत्र स्थापनं संदर्भो वा ग्रन्थः। नाथृ नाधृ। उपतापो रोगः। अनुदात्तेत्त्वादेव सिद्धे नियमार्थं वार्तिकमित्याह आशिष्येवेति। अत एकहल्मध्ये। एकशब्दोऽ-

(६-४-१२०) लिण्निमित्तादेशादिकं न भवति यदङ्गं तदवयवस्यासंयुक्तहल्मध्यस्थस्याकारस्यैकारः स्यादभ्यासलोपश्च किति लिटि । २२६१ **थलि च सेटि** । (६-४-१२१) प्रागुक्तं स्यात् । आदेशश्चेह वैरूप्यसंपादक एवाश्रीयते, शसिदद्योः प्रतिषेधवचनाज्ज्ञापकात् । तेन प्रकृतिजश्चरां तेषु सत्स्वपि एत्वाभ्यासलोपौ स्त एव । देधे देधाते देधिरे । 'अतः' किम्–दिदिवतुः । 'तपरः' किम्–ररासे । 'एक—इत्यादि' किम्–तत्सरतुः । 'अनादेशादेः' किम्–चकणतुः । लिटा

विशेषणमिदम् । 'घ्वसोरेद्धौ–' इत्यत एदिति अभ्यासलोप इति चानुवर्तते । 'गमहन–' इत्यतः किलीत्यनुवर्तते, न तु ङितीति, लिडादेशानां ङित्त्वासंभवात् । लिटीत्येत्वविधौ परनिमित्तं च । आवृत्त्या उभयार्थलाभः, तदाह **लिण्निमित्तेत्यादिना** । **थलि च । प्रागुक्तमिति** । 'अत एकहल्मध्ये–' इति यत् प्रागुक्तं एत्वादि तत् सेटि थलि च स्यादित्यर्थः । थलः कित्त्वाभावात् पूर्वसूत्रेणाप्राप्तौ वचनम् । ननु देधे पेततुरित्यादौ 'अभ्यासे चर्च' इति जशां चरां च जशि चरि च लिण्निमित्तादेशादित्वात् कथमेत्वाभ्यासलोपावित्यत आह **आदेशश्चेति** । इह 'अत एकहल्मध्ये–' इति सूत्रे आदेशशब्देन स्थान्यपेक्षया विरूप एवादेशो विवक्षितः । तथा च तथाविधादेशादेरेव एत्वाभ्यासलोपौ न भवतः स्थानिसरूपादेशादेस्तु न पर्युदास इत्यर्थः । **शसिदद्योरिति** । 'न शसददवादिगुणानाम्' इति शसिदद्योरेत्वाभ्यासलोपयोः प्रतिषेध उच्यते । यदीह यथाकथंचिदादेशादेः पर्युदासः स्यात्, तर्हि शसिदद्योरभ्यासे शकारदकारयोश्चर्जशोः शकारदकारादेशे सति आदेशादित्वादेव एत्वाभ्यासलोपयोः अभावसिद्धौ 'न शसददवा–' इति तत्प्रतिषेधोऽनर्थकः स्यात् । अतो वैरूप्यसंपादकादेशादेरेव पर्युदासो विज्ञायत इत्यर्थः **तेनेति** । स्थानिसरूपादेशादेः पर्युदासाभावादित्यनेनेत्यर्थः । **सत्स्वपीति** । देधे पेततुरित्यादौ दकाराद्यादेशेषु सत्स्वपीत्यर्थः । **देध इति** । दध् दध् ए इति स्थिते दकारादकारस्य एत्वेऽभ्यासलोपे च रूपम् । 'असंयोगाल्लिट्कित्' इति कित्त्वमिह बोध्यम् । **देधिर इति** । देधिषे देधाथे देधिध्वे, देधे देधिवहे देधिमहे इति रूपाणि संभवन्तीति भावः । **दिदिवतुरिति** । दिव्धातोरतुसि द्वित्वे हलोर्मध्ये अतोऽभावादेत्वाभ्यासलोपौ नेति भावः । **तपरः किमिति** । अत इति तपरकरणं किमर्थमित्यर्थः । **ररास इति** । राष्ट्र शब्दे' भ्वादिरात्मनेपदी । अत्र हल्मध्यस्थावर्णस्य ह्रस्वत्वाभावादेत्वाभ्यासलोपौ नेति भावः । **एकेत्यादि**

त्रासहायवचनः । एकयोर्हलोर्मध्य इत्यर्थः । तथापष्टे **असंयुक्तेति** । इष्टानुरोधेन लिटीत्यावर्त्य आदेशविशेषणमेत्वस्य निमित्तं च क्रियत इत्याह **लिण्निमित्तेति** । **किति लिटीति** । यद्यपि 'गमहन–' इति सूत्रे ङितीति वर्तते तथापि प्रयोजना-

आदेशाविशेषणादिह स्यादेव–नेमिथ, सेहे ॥ स्कुदि ९ आप्रवणे। आप्रवण-मुत्प्लवनमुद्धरणं च। २२६२ इदितो नुम्धातोः। (७-१-५८) स्कुन्दते। चुस्कुन्दे। श्विदि १० श्वैत्ये। अकर्मकः। श्विन्दते। शिश्विन्दे। वदि ११ अभिवादनस्तुत्योः। वन्दते। ववन्दे। भदि १२ कल्याणे सुखे च। भन्दते। बभन्दे।

किमिति। एकहल्मध्यस्थस्येति किमर्थमित्यर्थः। **तत्सरतुरिति**। 'त्सर छद्मगतौ'। लिटोऽतुसि द्वित्वे अभ्यासाकारस्य नासंयुक्तहल्मध्यस्थत्वमिति भावः। **चकणतुरिति**। 'कण शब्दे'। लिटोऽतुसि द्वित्वे 'कुहोश्चुः' इति ककारस्य चुत्वेन चकारः। तथा च वैरूप्यसंपादकादेशादित्वादेत्वाभ्यासलोपौ नेति भावः। अथ लिण्निमित्तादेशादिकमित्यत्र लिण्निमित्तेत्यस्य प्रयोजनमाह **लिटेति**। **नेमिथेति**। 'णमु प्रह्वत्वे शब्दे च'। 'णो नः' इति नत्वम्। थलि इटि द्वित्वे नत्वसंपन्ननकारादेशादित्वेऽपि नत्वस्य लिण्निमित्तकत्वाभावाल्लिण्निमित्तकादेशादित्वाभावादेत्वाभ्यासलोपौ निर्बाधाविति भावः। **सेह इति**। 'षह मर्षणे'। 'धात्वादेः षः सः' इति सत्वे लिटि द्वित्वे सत्वसंपन्नसकारादेशादित्वेऽपि सत्वस्य लिण्निमित्तकत्वाभावाद् लिण्निमित्तकादेशादित्वविरहादेत्वाभ्यासलोपौ निर्बाधाविति भावः। दधिता। दधिष्यते। दधताम्। अदधत। दधेत। दधिषीष्ट। अदधिष्ट। अदधिष्यत। **स्कुदीति**। उत्प्लवनमुत्प्लुत्य गमनम्। **इदितः**। इद् ह्रस्व इकारः, इत् इत्संज्ञकः यस्य स इदित्, तस्येति विग्रहः। इत्संज्ञकेदन्तधातोरित्यर्थः। तेन चिक्लिदादौ न दोषः। नुमि मकार इत्। उकार उच्चारणार्थः। मित्त्वादन्त्यादचः परः। **स्कुन्दत इति**। 'नश्चापदान्तस्य–' इत्यनुस्वारः परसवर्णः। **चुस्कुन्द इति**। लिटि द्वित्वे 'शर्पूर्वाः खयः' इत्यभ्यासे ककारः शिष्यते। 'कुहोश्चुः' इति तस्य कुत्वेन चकारः। **श्विदीति**। श्वैत्यं श्वैत्यकरणम्। **अकर्मक इति**। श्वैत्यस्य धात्वर्थोपसंग्रहादिति भावः। ततश्च श्विन्दयति देवदत्तं यज्ञदत्त इत्यादौ 'गतिबुद्धिप्रत्यवसान–' इत्यादिना अकर्मककार्यं द्वितीया भवति। श्वेतीभवनं वा श्वैत्यम्। **श्विन्दत इति**। श्वेतीभवतीत्यर्थः। इदित्वान्नुम्। अनुस्वारपरसवर्णौ। **शिश्विन्द इति**। नुमि कृते गुरुमत्त्वेऽपि इजादित्वाभावादाम् नेति भावः। **वदीति**। अभिवदनम् आशीर्वादः, तत्कारणभूतो व्यापारः प्रणामादिरभिवादनम्। **वन्दत इति**। इदित्वान्नुम्।

भावाद् ङितीत्येतन्नानुवर्तत इति भावः। किति किम्, ननाद। लिटि किम्, पापच्यात्। **चकणतुरिति**। न चैवमपि बभणतुरित्यत्र 'अभ्यासे चर्च' इत्यस्यासिद्धत्वादेत्वाभ्यासलोपौ स्त एवेति वाच्यम्, फलभजग्रहणेन एत्वविधिं प्रति तत् सूत्रस्य सिद्धत्वज्ञापनात्। एवं चादेशश्चेह वैरूप्यसंपादक एव गृह्यत इति व्याख्यानम-

मदि १३ स्तुतिमोदमदस्वप्नकान्तिगतिषु । मन्दते । ममन्दे । स्पदि १४ किञ्चिच्चलने । स्पन्दते । पस्पन्दे । क्लिदि १५ परिदेवने। शोक इत्यर्थः । सकर्मकः । क्लिन्दते चैत्रम् । चिक्लिन्दे । मुद १६ हर्षे । मोदते । मुमुदे । दद १७ दाने । ददते । २२६३ न शसददवादिगुणानाम् । (६-४-१२६) शसेर्ददेर्वकारादीनां गुणशब्देन भावितस्य च योऽकारस्तस्यैत्वाभ्यासलोपौ न । ददे ददाते

भदीति । कल्याणं शुभक्रिया, सुखं सुखीभावः । भन्दत इति । इदित्वान्नुम् । बभन्द इति । अभ्यासे भकारस्य जश्भावेन बकारः । मदीति । मोदः सन्तोषः । मदो गर्वः । मन्दत इति । इदित्वान्नुम् । ममन्द इति । नुमि सति संयुक्तहल्मध्यस्थत्वादेत्त्वाभ्यासलोपौ नेति भावः । स्पदीति । अकर्मकः । स्पन्दत इति । इदित्वान्नुम् । पस्पन्द इति । 'शर्पूर्वाः खयः' इत्यभ्यासे पकारः शिष्यते । क्लिदीति । परिदेवनशब्दं व्याचष्टे शोक इति । स्मृत्वा क्लेशः शोकः, तदाह सकर्मक इति । क्लिन्दते चैत्रमिति । अतीतं चैत्रं स्मृत्वा क्लिश्नातीत्यर्थः । इदित्वान्नुम् । चिक्लिन्द इति । अभ्यासे ककारस्य चुत्वेन च इति भावः । मुदेति । हर्षस्तुष्टिः । मोदत इति । शपि लघूपधगुणः । मुमुद इति । 'असंयोगाल्लिट्कित्' इति कित्वान्न गुणः । ददेति । न ममेति त्यागो दानम्, न तु द्रव्यत्यागः, तथा सति धात्वर्थोपसंग्रहादकर्मकत्वापत्तेः । न शसदद । शस दद वादि गुण एषां द्वन्द्वः । अवयवषष्ठी । गुणशब्देन विहित एव गुणोऽत्र गुणशब्देन विवक्षितः, अन्यथा शसिददिग्रहणवैयर्थ्यात् । 'अत एकहल्मध्ये–' इत्यस्माद् अत इति, 'घ्वसोरेद्धौ–' इत्यत एदिति, अभ्यासलोप इति चानुवर्तते, तदाह शसेरित्यादिना । गुणशब्देनेति किम् ? पेचे । अत्र पचेरकारस्य गुणत्वेऽपि गुणशब्देन विहितत्वाभावान्नायं निषेधः । पॄधातोः पपरतुरिति तु गुणस्योदाहरणम्, गुणशब्देन विहितो यः अर् तदवयवत्वादकारस्येति बोध्यम् । ददद इति । ददेर्लिटस्तादेशस्य एशि द्वित्वे 'अत एकहल्मध्ये–' इति प्राप्तावेत्वाभ्यासलोपौ न

वश्यं कर्तव्यमेवेति दिक् । मदि स्तुतीति । मोदः संतोषः । मदो गर्वः । स्वप्न आलस्यम् । न शसदद । 'शसु हिंसायाम्' दन्त्यान्तः । सूत्रेऽवयवावयविभावः षष्ठ्यर्थः । तथा च—शसददवादीनां योऽकार इत्यन्वयसंभवेऽपि अकारस्य गुणरूपत्वाद्भेदनिबन्धना षष्ठी न संभवतीत्याशङ्क्य तन्निर्वाहार्थं व्याचष्टे गुणशब्देन भावितस्येति । भावितत्वं च साक्षात्परम्परासाधारणम् । तथा च शशरतुः पपरतुरित्यादौ गुणशब्देन क्रियमाणो योऽर् तदवयवोऽकारः । लुलविथेत्यादौ तु गुणशब्देन क्रियमाणो य ओकारस्तत्स्थानिकस्यावादेशस्यावयवोऽकार इत्यर्थान्नास्त्यत्रानुपपत्तिः ।

ददिरे । ष्वद १८ स्वर्द ११ आस्वादने । अयमनुभवे सकर्मकः । रुचावकर्मकः । **२२६४ धात्वादेः षः सः ।** (६-१-६४) धातोरादेः षस्य सः स्यात् । 'सात्पदाद्योः' (सू २१२३) इति षत्वनिषेधः । अनुस्वदते । सस्वदे । स्वर्दते । सस्वर्दे । उर्द २० माने क्रीडायां च । **२२६५ उपधायां च ।** (८-२-७८) धातोरुपधाभूतयो रेफवकारयोर्हल्परयोः परत इको दीर्घः स्यात् । ऊर्दते ।

भवतः । **ष्वद स्वर्देति** । आस्वादनम् अनुभवः । प्रीतिविषयीभावात्मिका रुचिर्वा, तदाह **अयमिति** । प्रत्येकाभिप्रायमेकवचनम् । **धात्वादेः** । ष इति षष्ठ्यन्तम्, तदाह **धातोरादेः षस्य सः स्यादिति** । षकारस्य सः स्यादित्यर्थः । धातुग्रहणं किम् ? षट् । अत्र धात्वादित्वाभावान्न सकारः । आदिग्रहणं किम् ? लषति । न चैवमपि षकारीयतीत्यादौ सुब्धात्वादेरपि षस्य सकारः स्यादिति वाच्यम्, 'आदेच उपदेशेऽशिति' इत्यत उपदेश इत्यनुवृत्तेः । एवं च षडित्यादावपि उपदेशग्रहणानुवृत्त्यैव व्यावृत्तिसिद्धेर्धातुग्रहणं भाष्ये प्रत्याख्यातम् । ननु धातुपाठे स्वद स्वर्देत्येवं सकार एव उपदिश्यताम् । एवं च 'धात्वादेः षः सः' इत्यपि मास्तु इति चेन्मैवम्, ण्यन्ताद् लुङि असिष्वददित्यत्र षकारश्रवणार्थकत्वाद् धातुपाठे सकारस्यैवोपदेशे तु असिष्वददित्यत्र सकारस्य आदेशसकारत्वाभावेन षत्वासंभवात् । नन्वेवं सति अनुस्वदत इत्यत्रादेशसकारत्वात् षत्वापत्तिरित्यत आह **सात्पदाद्योरिति** । **सस्वद इति** । लिटि द्वित्वे संयुक्तहलमध्यस्थत्वादित्वाभ्यासलोपौ नेति भावः । **उर्देति** । चकारादास्वादनेऽपीति केचित् । **उपधायां च** । 'सिपि धातोः–' इत्यतो धातोरिति, 'र्वोरुपधायाः–' इत्यतो र्वोरिक इति, 'हलि च' इत्यतो हलीति चानुवर्तते । उपधयोरित्यर्थे उपधायामित्यार्षम् तदाह **धातोरित्यादि** । **ऊर्दत इति** । अत्र धातो रेफ-

---

ददद इति । शशसतुः । शशसुः । ववमतुः । ववमुरित्यादावपि निषेधो बोध्यः । **ष्वद स्वर्द** । **अयमिति** । प्रत्येकाभिप्रायेणोक्तमित्याहुः । **सकर्मक इति** । स्वदस्व हव्यानि । हव्यान्यनुभवेत्यर्थः । **अकर्मक इति** । 'अपां हि तृप्ताय न वारिधारा स्वादुः सुगन्धिः स्वदते तुषारा' इति श्रीहर्षः । न स्वदते । न रोचत इत्यर्थः । **धात्वादेः** । धातुग्रहणं किम्, षट् षड् । आदेः किम्, लषति । **उपधायां च** । 'सिपि धातोः–' इत्यतो धातोरित्यनुवर्तते । 'र्वोरुपधायाः–' इत्यतो र्वोरिको दीर्घ इति । 'हलि च' इत्यतो हलीति च, तदाह **धातोरित्यादि** । धातोः किम्, 'ऊड्डुतः' । कुरुः कुर्वौ कुर्व इत्यत्रैको दीर्घो मा भूत् । न चात्र रेफस्य प्रातिपदिकोपधात्वेऽपि पदोपधात्वाभावादेव दीर्घो न भवेदिति धातोरित्यनुवर्तनमिहानावश्यकमिति वाच्यम्, पदस्येत्यनुवृत्तौ तु कूर्दते खूर्दत इत्याद्यसिद्धिप्रसङ्गात् । वस्तुतस्तु पूर्वत्रासिद्धे न स्थानि-

ऊर्दांचक्रे। कुर्द २१ खुर्द २२ गुर्द २३ गुद २४ क्रीडायामेव। कूर्दते। चुकूर्दे। खूर्दते। गूर्दते। गोदते। जुगुदे। षूद २५ क्षरणे। सूदते। सुषूदे।

वान्तत्वाभावाद् 'र्वोरुपधायाः—' इत्यस्य 'हलि च' इत्यस्य चाप्राप्तौ उपधायां चेत्यारम्भः। धातोरित्यभावे पदाधिकारस्थत्वात् पदस्य उपधाभूतयोरित्यर्थः स्यात्। ततश्च क्विबन्ते ऊर्द् इत्यत्रैव स्याद् ऊर्दत इत्यादौ न स्यात्। 'रफवकारयोः' किम्? पुष्यति। 'हल्परयोः' किम्? चिरिणोति। 'इकः' किम्? नर्दति। **ऊर्दांचक्र इति**। इजादित्वादाम्। 'कृञ्चानुप्रयुज्यते—' इत्यनुप्रयोगः। **कुर्देति**। गुर्देत्यपि पृथग्धातुः। क्रीडायामेवेत्यर्थनिर्देशः। एवकारस्तु इतोऽन्यत्र धात्वर्थनिर्देशस्य उपलक्षणत्वं ज्ञापयति **कूर्दत इति**। 'उपधायां च' इति दीर्घः। **चुकूर्द इति**। 'कुहोश्चुः' इति चुत्वम्। **खूर्दत इति**। 'उपधायां च' इति दीर्घः। एवं गूर्दत इति। **गोदत इति**। शपि लघूपधगुणः। **जुगुद इति**। 'असंयोगात्—' इति कित्वान्न गुणः। **षूदेति**। क्षरणं प्रस्रवणम्। **सूदत इति**। प्रस्रवतीत्यर्थः। 'धात्वादेः—' इति षस्य सः। अलघूपधत्वान्न गुणः। **सुषूद इति**। 'धात्वादेः—' इति षस्य सत्वे लिटि द्वित्वादौ इणः परस्यादेशसकारत्वात् षत्वम्। यदि धातुपाठे सकारस्यैव पाठः, तर्हि इहादेशसकारत्वाभावात् षत्वं न स्यात्। षोपदेशे तु षस्य सत्वे सति आदेशसकारत्वात् षत्वं सूपपादमिति भावः। ननु धातुपाठे के धातवः षादयः पठिताः, के वा सादयः, पाणिनिकृतषोपदेशपाठस्य इदानीं परिभ्रष्टत्वादित्याशङ्क्य पाणिनीयपरम्परा-

---

वदिति स्वीकाराद् 'अचः परस्मिन्—' इति स्थानिवत्त्वस्य निषेधाभ्युपगमेऽपि कार्यकालपक्षे 'असिद्धं बहिरङ्गम्—' इति परिभाषायाः प्रवृत्तेर्बहिरङ्गस्य यणोऽसिद्धत्वात् कुर्वौ कुर्व इत्यत्र 'उपधायां च' इति दीर्घो न भवेदिति धातुग्रहणानुवर्तनस्य नात्यन्तावश्यकता, पदस्येत्यनुवृत्त्या कूर्दत इत्यादौ दीर्घः सिद्धयत्येवेत्याहुः। रेफवकारयोः किम्, 'पुष्प विकसने' पुष्प्यति। हल्परयोः किम्, चिरिणोति जिरिणोति। इकः किम्, अर्वते। नर्दति। ननु 'हलि च' इत्यत्र रेफवकारयोर्हल्परयोरिको दीर्घः स्यादिति व्याख्यायां कूर्दते गूर्दते इत्यादि सिद्धयत्येवेति सूत्रमिदं व्यर्थमिति चेत्, अत्राहुः—'हलि च' इत्यत्र धातुग्रहणमनुवर्तनीयमेव, अन्यथा दिवमिच्छति दिव्यतीत्यादावतिप्रसङ्गः स्यात्। तथा च 'उपधायां च' इति सूत्राभावे उपधाभूतयोः र्वोः परतो दीर्घो न स्यात्, किं तु रेफवान्तयोरेव धात्वोः 'हलि च' इति सूत्रेण स्यादित्येतत्सूत्रमावश्यकमेवेति। **सूदत इति**। स्रवतीत्यर्थः। ननु स्वदेतिवत् स्वद सूदेति दन्त्यादय एव धातवः पठ्यन्ताम्, षोपदेशान् पठित्वा सत्वविधौ गौरवात्। मैवम्, तथाहि सति ण्यन्ताच्चङि असिष्वदत् असुषुदत् इत्यादौ लिटि सुषूदे सिषेधेत्यादौ च 'आदेश-

सेकसृप्सृस्तृसृजस्तृस्त्यान्ये दन्त्याजन्तषादयः ।
एकाचः षोपदेशाः स्युः ष्वष्क्स्विद्स्वद्स्वञ्जस्वप्स्मिङः ॥

सिद्धान् षोपदेशान् पठति **सेगिति श्लोकेन**। दन्त्याजन्तषादय एकाचः षोपदेशाः स्युरित्यन्वयः। दन्त्यश्च अच्च दन्त्याचौ, तौ अन्तौ अव्यवहितपरौ यस्य स दन्त्याजन्तः, तथाविधः षः षकार आदिर्येषां ते दन्त्याजन्तषादयः। दन्त्यपरकः अच्परकश्च यः षकारः तदादय एकाचो धातव इदानीं कृतसत्वाः सकारादित्वेन परिदृश्यमाना अपि षकारादित्वेन पाणिनिना उपदिष्टाः प्रत्येतव्या इत्यर्थः। सादय इति पाठेऽप्येवमेव व्याख्येयम्। 'अज्दन्त्यपराः षादयः षोपदेशाः' इति भाष्यम्। षृद क्षरणे इत्यादयः अच्परकषोपदेशाः। ष्ठा गतिनिवृत्तावित्यादयस्तु दन्त्यपरकषोपदेशाः। 'दन्त्याजन्त' इति किम्? 'स्कुदि आप्रवणे'। चुस्कुन्दे। अत्र सकारो न दन्त्यपरकः नाप्यच्परकः। 'एकाचः' किम्? सोसूत्र्यते। सूत्र वेष्टने, चुरादिरजन्तः अनेकाच्। यद्यप्येकाच इति भाष्ये न दृश्यते, तथापि यङ्विधौ 'सोसूच्यते' इति भाष्यं तत्र मानमिति बोध्यम्। एवं च 'साध संसिद्धौ' इत्यादौ सकारपाठस्यैव दृश्यमानत्वेऽपि षोपदेशत्वमेव। ननु 'सेकृ गतौ' 'सृप्लृ गतौ' 'सृ गतौ' 'सृज विसर्गे' एते चत्वारः अच्परकसादयः। 'स्तृञ् आच्छादने', ऋदन्तः श्नुविकरणः। 'स्तॄञ् आच्छादने' ॠदन्तः श्नाविकरणः, 'स्त्यै शब्दसंघातयोः' एते त्रयो दन्त्यपरकसादयः। एतेषां सप्तानामपि षोपदेशत्वं स्यादित्यतिव्याप्तिमाशङ्क्य तद्भिन्नत्वं विशेषणमाह **सेकृ सृप् सृ स्तृ सृज स्तॄ स्त्यान्य इति**। स्त्यैधातोः कृतात्वस्य निर्देशः श्लोके समावेशार्थः। स्त्यै इत्यैकारान्तस्य निर्देशे स्त्यायन्य इत्येकस्याक्षरस्याधिक्यापत्तेः। नन्वेवमपि 'ष्वष्क् गतौ' 'ञिष्विदा गात्रप्रस्रवणे' 'ष्वद आस्वादने' 'ष्वञ्ज परिष्वङ्गे' 'ञिष्वप् शये' 'ष्मिङ् ईषद्धसने' इत्येतेषु सकारस्य दन्त्यपरकत्वाभावाद् अच्पर-

---

प्रत्यययोः' इति षत्वं न स्यात्। इणः परस्य सकारमात्रस्य षत्वविधौ तु सुपिसौ सुपिस इत्यादावपि स्यादिति धातुपाठे पाणिनिना तालव्यदन्त्यादिपाठवत् षोपदेशा अपि व्यवस्थयैव पठिताः, स च पाठ इदानीं परिभ्रष्टः। साधादिषु सादिपाठस्यैव दृश्यमानत्वात्। अतो लक्षणमुखेन तान्व्यवस्थापयति **सेगित्यादि**। दन्त्यश्च अच्च दन्त्याचौ तौ अन्तौ अव्यवहितपरौ यस्य स दन्त्याजन्तः, दन्त्याजन्तश्चासौ सश्च दन्त्याजन्तसः, स आदिर्येषां धातूनां ते दन्त्यान्तसादयोऽजन्तसादयश्चैकाचः षोपदेशा बोध्याः। तथा च साधादौ सांप्रतं पठ्यमानः सकार उपदेशे न स्थित इत्यनुमेयमिति भावः। दन्त्येत्यादि किम्, चुस्कुन्दे। एकाचः किम्, सोसूच्यते। सोसूत्र्यते। सुचिसूत्री चुरादावदन्तौ। उक्तलक्षणस्यातिव्याप्तिं वारयितुमाह **सेगिति**। 'सेकृ गतौ'। 'सृप्लृ गतौ'।

दन्त्यः केवलदन्त्यो न तु दन्तोष्ठजोऽपि । ष्वष्कादीनां पृथग्ग्रहणाज्ज्ञापकात् । ह्राद २६ अव्यक्ते शब्दे । ह्रादते । जह्रादे । ह्लादी २७ सुखे च । चादव्यक्ते शब्दे । ह्लादते । स्वाद २८ आस्वादने । स्वादते । पर्द २९ कुत्सिते शब्दे । पर्दते । यती ३० प्रयत्ने । यतते । येते । युतृ ३१ जुतृ ३२ भासने । योतते । युयुते । जोतते । जुजुते । विथृ ३३ वेथृ ३४ याचने । विविथे । विवेथे । श्रथि ३५ शैथिल्ये । श्रन्थते । ग्रथि ३६ कौटिल्ये । ग्रन्थते । कत्थ ३७ श्लाघायाम् ।

कत्वाभावाच्च षोपदेशेष्वसंग्रहः स्यादित्यव्याप्तिमाशङ्क्य तानपि संगृह्णाति **ष्वष्क् स्विद् स्वद् स्वञ्ज स्वप् स्मिङ इति** । अपीति शेषः । ननु 'स्तृ शब्दोपतापयोः' इत्यादीनामपि दन्त्यवकारपरकत्वात् षोपदेशत्वं स्यादित्यत आह **दन्त्यः केवलदन्त्य इति** । कुत इत्यत आह **ष्वष्कादीनामिति** । अन्यथा दन्त्यपरकत्वादेव सिद्धे ष्वष्कादिग्रहणं व्यर्थं स्यादिति भावः । यद्यपि ष्वष्कतिरत्र भाष्ये न दृश्यते तथापि 'सुब्धातुष्ठिवुष्वष्कतीनां सत्वप्रतिषेधः' इति वार्तिकात्सल्लाभ इति भावः । **ह्रादेति** । रेफवानयम् । अव्यक्तशब्दः अमनुष्यवाक् । **जह्राद इति** । अभ्यासस्य ह्रस्वः, चुत्वम् । **ह्लादीति** । लकारवानयम् । 'श्वीदितो निष्ठायाम्' इति इण्निषेधार्थमीत्वम् । **स्वादेति** । केवलदन्त्यपरकत्वाभावान्नायं षोपदेशः । असिस्वदत् । **पर्देति** । गुदरव इत्यर्थः । **यतीति** । ईदित्त्वमिण्निषेधार्थम् । **येत इति** । 'अत एकहल्मध्ये–' इत्येत्वाभ्यासलोपौ । **युतृ जुतृ इति** । ऋदित्त्वं 'नाग्लोपिशास्वृदिताम्' इत्याद्यर्थम् । **योतत इति** । शपि लघूपधगुणः । **युयुत इति** । 'असंयोगात्–' इति कित्त्वान्न गुणः । **विथृ वेथृ इति** । द्वितीयान्ताविमौ । ननु विथृ इत्येवास्तु, लघूपधगुणे सति वेथत इत्यस्याविशिष्टत्वादित्यत आह **विविथे विवेथ इति** । वेथृधातोर्विवेथे इति रूपम् । विथृधातोस्तु 'असंयोगात्–' इति कित्त्वाद् गुणाभावे विविथ इति रूपमिति भावः । **श्रथीति** । द्वितीयान्तः । शैथिल्यं स्रंसनम् । श्रन्थते इति इदित्त्वान्नुम् । **ग्रथीति** । द्वितीयान्तः ।

'सृ गतौ' । 'स्तृञ् आच्छादने' । 'सृज विसर्गे' । 'स्तॄञ् आच्छादने' । 'स्त्यै शब्दसंघातयोः' । एभ्योऽन्ये । पूर्वेण केषांचिदसंग्रहादाह **ष्वष्केति** । 'ष्वष्क गतौ' । 'ञिष्विदा गात्रप्रक्षरणे' । 'स्वद आस्वादने' । 'ष्वञ्ज परिष्वङ्गे' । 'ञिष्वप् शये' । 'स्मिङ् ईषद्धसने' । एते षोपदेशा इत्यन्वयः । 'स्वाद आस्वादने' इत्यादावतिव्याप्तिमाशङ्क्याह **दन्त्यः केवलदन्त्य इति** । तथा च असिस्वददित्यादौ षत्वं नेति भावः । **ह्लादी** सुखे च । चादव्यक्ते शब्दे । ईकारः 'श्वीदितो निष्ठायाम्' इतीण्निषेधार्थः ।

१ अन्यत्र पुस्तकेषु मूल एवायं पाठो दृश्यते ।

कत्थते। एधादयोऽनुदात्तेतो गताः।

अथाष्टात्रिंशत्तवर्गीयान्ताः परस्मैपदिनः। अत ३८ सातत्यगमने। अतति। 'अत आदेः' (सू २२४८)। आत आततुः आतुः। लुङि आतिस् ई त् इति स्थिते। २२६६ इट ईटि। (८-२-२८) इटः परस्य सस्य लोपः स्यादीटि परे। 'सिज्लोप एकादेशे सिद्धो वाच्यः'। आतीत् आतिष्टाम् आतिषुः। २२६७ वदव्रजहलन्तस्याचः। (७-२-३) वदेर्व्रजेर्हलन्तस्य चाङ्गस्याचः

कौटिल्यं वक्रीभवनम्। ग्रन्थत इति। इदित्त्वान्नुम्। कत्थेति। अविद्यमानगुणज्ञापनं श्लाघा। अथाष्टात्रिंशदिति। अष्टौ च त्रिंशदिति द्वन्द्वः, अष्टाधिका त्रिंशदिति वा। 'अष्टनः संख्यायाम्–' इत्यात्वम्। अष्टत्रिंशदिति पाठे तु अष्टेति पृथक्पदम्। परस्मैपदिन इति। अनुदात्तस्वरितङित्त्वाभावात् 'शेषात् कर्तरि–' इति परस्मैपदिन एवेति भावः। अतेति। सातत्यगमनं संततगमनम्। लिटि णलि द्वित्वे हलादिशेषे अ अत् अ इति स्थिते पररूपे प्राप्ते आह अत आदेरिति। इति दीर्घ इति शेषः। तथा च अभ्यासाकारस्य दीर्घे सति सवर्णदीर्घः, तदाह आतेति। अकारस्य हलमध्यस्थत्वाभावादेत्वाभ्यासलोपौ न। लुङीति। अतधातोर्लुङस्तिपि 'इतश्च' इति इकारलोपे, च्लेः सिचि, तस्य इडागमे 'अस्तिसिचोऽपृक्ते' इति ईडागमे आटि वृद्धौ आतिस् ई त् इति स्थिते सतीत्यर्थः। इट ईटि। इट इति पञ्चमी। 'रात्सस्य' इत्यतः सस्येति 'संयोगान्तस्य -' इत्यतो लोप इति चानुवर्तते, तदाह इटः परस्येति। एवं च आति स् ई त् इति स्थिते सकारस्य लोपे आति ई त् इति स्थिते सवर्णदीर्घे आतीदिति रूपं वक्ष्यति। तत्र सलोपस्यासिद्धत्वात् कथं सवर्णदीर्घ इत्यत आह सिज्लोप एकादेशे सिद्धो वक्तव्य इति। आतिष्टामिति। लुङस्तस्। तस्य ताम्। च्लेः सिच्। तस्य इटि आटि वृद्धौ षत्वम्। अपृक्तत्वाभावेन ईडभावात् सलोपो न। आतिषुरिति। लुङो झिः। च्लेः सिच्। जुस्, इट्, आट्, वृद्धिः, षत्वम्, रुत्वविसर्गौ। आतीः आतिष्टम् आतिष्ट। आतिषम् आतिष्व आतिष्म। अत्र वृद्धिमा-

---

प्रह्लः, प्रह्लवान्। इह 'ह्लादो निष्ठायाम्' इत्युपधाह्रस्वः। श्लाघायामिति। अविद्यमानगुणसम्बन्धज्ञापनं श्लाघा। आततुरिति। हलमध्यस्थत्वाभावादेत्वं न। इट ईटि। 'संयोगान्तस्य लोपः' इत्यतो लोप इति 'रात्सस्य' इत्यतः सस्येति चानुवर्तते, तदाह लोपः स्यादिति। इटः किम्, अहार्षीत्। ईटि किम्, आतिष्टाम्। आतिषुः। सिज्लोप इति। अत्र वदन्ति—सलोप इति वक्तव्ये सिज्ग्रहणं 'झलो झलि' इत्यादिसूत्रत्रयं सिज्विषयकमिति ज्ञापनार्थम्। तेनेह न—सोमसुत्। स्तोता। द्विष्टराम्। द्विष्टमाम्। 'धि च' इति सूत्रे तु वामनमते सिचो लोपः। भाष्य-

स्थाने वृद्धिः स्यात्सिचि परस्मैपदेषु। इति प्राप्ते। २२६८ **नेटि।** (७-२-४)
इडादौ सिचि प्रागुक्तं न स्यात्। मा भवानतीत्। अतिष्टाम्। अतिषुः। चिती ३९
संज्ञाने। चेतति। चिचेत। अचेतीत्। अचेतिष्टाम्। अचेतिषुः। च्युतिर् ४०
आसेचने। आ सेचनमार्द्रीकरणम्। आङीषदर्थेऽभिव्याप्तौ च। 'इर इत्संज्ञा
वाच्या'। च्योतति। चुच्योत। २२६९ **इरितो वा।** (३-१-५७) इरितो

शङ्कितुमाह **वदव्रज**। वद व्रज हलन्तः, एषां समाहारद्वन्द्वात् षष्ठ्येकवचनम् 'अङ्गस्य'
इत्यधिकृतम्। 'सिचि वृद्धिः परस्मैपदेषु' इत्यनुवर्तते। तदाह **वदेरित्यादिना।**
हलन्तत्वादेव सिद्धे वदव्रजग्रहणं तु अवादीदव्राजीदित्यत्र 'अतो हलादेर्लघोः' इति
वृद्धिविकल्पबाधनार्थम्। **नेटि। प्रागुक्तं नेति।** 'वदव्रजहलन्तस्याचः' इत्युक्तं नेत्यर्थः।
तत्र वदव्रजयोर्विशिष्य विधानाद् हलन्तलक्षणाया एव वृद्धेर्निषेधोऽयम्। हलन्त-
लक्षणा वृद्धिस्तु अभात्सीदित्यादावनिडादौ सिचि चरितार्था। नन्वातीदित्यादौ
अकारस्य वृद्धौ सत्यामसत्यां च आटा एकादेशे सति रूपे विशेषाभावात् किं तन्निषेधे-
नेत्याशङ्क्याह **मा भवानतीदिति।** माङ्योगे आडभावे सति वृद्धिनिषेधः सफल
इति भावः। **चितीति।** ईदित्वं 'श्वीदितो निष्ठायाम्' इति इण्निषेधार्थम्। **चेत-
तीति।** शपि लघूपधगुणः। **चिचेतेति।** तिबादेशणलः पित्त्वेन 'असंयोगात्–'
इति कित्त्वस्याप्रवृत्तेः न गुणनिषेधः। चिचिततुरित्यादौ तु कित्त्वान्न गुणः। **अचेती-
दिति।** 'इट ईटि' इति सलोपः। **अचेतिष्टामिति।** अपृक्तत्वाभावादीडभावान्न
सिज्लोपः। 'नेटि' इति निषेधान्न हलन्तलक्षणा वृद्धिः। **च्युतिरिति।** अत्र
इकारस्य रेफस्य च प्रत्येकमित्संज्ञायामिदित्त्वान्नुमि प्राप्ते आह **इर इत्संज्ञेति।**
तथा च इर् इति समुदायस्य इत्संज्ञकत्वादिदित्त्वाभावान्न नुमिति भावः। **च्योत-
तीति।** लघूपधगुणः। **चुच्योतेति।** णलः पित्त्वेन कित्त्वाभावान्न गुणनिषेध
इति भावः। चुच्युततुरित्यादौ तु कित्त्वान्न गुणः। लुङि च्लेः सिचि प्राप्ते।

मते तु सत्येति भेदो बोध्य इति। **वदव्रज।** अवादीत्। अव्राजीत्। 'अतो हलादेः–'
इति विकल्पं बाधित्वा अनेन नित्यं वृद्धिः। हलन्तस्योदाहरणमपाक्षीत्, अधाक्षीत्।
तदन्तविधिनैव सिद्धे अन्तग्रहणं स्पष्टप्रतिपत्त्यर्थम्। 'हलोऽचः' इत्युक्ते त्वजन्ताङ्गस्य
हलः स्थाने वृद्धिरिति कदाचिदाशङ्क्येत। अच इति तु इक्परिभाषाया अनुपस्था-
नार्थम्। अन्यथा अभैत्सीदित्यत्र स्यान्न त्वपाक्षीदित्यादौ। **नेटि। प्रागुक्तं नेति।**
हलन्तत्वादेव सिद्धे वदव्रजोर्विशिष्य विधानान्न निषेधः, किंतु हलन्तलक्षणाया एव
वृद्धेर्निषेधः, तस्या अनिडादौ सिचि चरितार्थत्वात्। अमुमेवार्थं मनसि निधाय कश्चित्
पुस्तकेषु हलन्तलक्षणा वृद्धेर्नेत्येव पठ्यते। **इर इत्संज्ञेति।** इकारस्य 'उपदेशेऽ-

धातोश्च्लेरङ् वा स्यात्परस्मैपदे परे । अच्युतत्, अच्योतीत् । श्च्युतिर् ४१ क्षरणे । श्च्योतति । चुश्च्योत । अश्च्युतत्, अश्च्योतीत् । यकाररहितोऽप्ययम् । श्चोतति । मन्थ ४२ विलोडने । विलोडनं प्रतिघातः । मन्थति । ममन्थ । यासुटः 'किदाशिषि' (सू २२१६) इति कित्त्वाद् 'अनिदिताम्–' (सू ४१५) इति नलोपः । मथ्यात् । कुथि ४३ पुथि ४४ लुथि ४५ मथि ४६ हिंसासंक्लेशनयोः । इदित्त्वान्नलोपो न । कुन्थ्यात् । पुन्थ्यात् । लुन्थ्यात् । मन्थ्यात् । षिध ४७ गत्याम् । सेधति । सिषेध । सेधिता । असेधीत् । 'सात्पदाद्योः' (सू २१२३)

इरितो वा । 'धातोरेकाचः–' इत्यतो धातोरिति 'च्लेः सिच्' इत्यतः च्लेरिति 'अस्यतिवक्तिख्यातिभ्यः–' इत्यतः अङिति 'पुषादिद्युतादि–' इत्यतः परस्मैपदेष्विति चानुवर्तते, तदाह इरितो धातोरित्यादिना । अच्युतदिति । अङि सति ङित्त्वान्न गुणः । अच्युतताम् अच्युतन् । अच्युतः अच्युततम् अच्युतत । अच्युतम् अच्युताव अच्युताम । अङभावे त्वाह अच्योतीदिति । 'इट ईटि' इति सिज्लोपः । अच्योतिष्टामित्यादि । श्च्युतिरिति । च्युतिवद्रूपाणि । चुश्च्योतेति । 'शर्पूर्वाः–' इति चकारः शिष्यते । यकाररहितोऽपीति । 'मधुश्चुतं घृतमिव सुपूतम्' इत्यादौ तथा दर्शनादिति भावः । मन्थेति । विलोडनमास्फालनम् । मन्थतीत्यादि । सुगमम् । आशीर्लिङि विशेषमाह यासुट इति । कुथीति । चत्वारोऽपि द्वितीयान्ताः । इदित्त्वान्नुमि कुन्थतीत्यादि सुगमम् । आशीर्लिङि यासुटः कित्त्वेऽपि इदित्त्वेन 'अनिदिताम्–' इति पर्युदासाद् नलोपो नेत्याह इदित्त्वादिति । कुन्थ्यादिति । पुन्थ्यात् लुन्थ्यात् मन्थ्यात् एतदर्थमेव मन्थधातोः पृथक् मथीति निर्देशः । षिध गत्यामिति । अच्परकषकारादित्वात् षोपदेशोऽयम् । ततश्च 'धात्वादेः–' इति सः । तदाह सेधतीति । सिषेधेति । आदेशसकारत्वात् षत्वम् । अनिट्सु श्यन्विकरणस्यैव सिधेर्ग्रहणात् सेट्कोऽयम् । असेधीदिति । 'इट ईटि' इति सिज्लोपः । 'नेटि' इति निषेधाद् न हलन्तलक्षणा वृद्धिः । असेधिष्टामित्यादि । अथ

अनुनासिकः–' इति, रेफस्य तु 'हलन्त्यम्' इति प्रत्येकमित्संज्ञायाम् 'इदित–' इति नुम् स्यादिति भावः । एतस्य वैयर्थ्यं 'चक्षिङ् व्यक्तायां वाचि' इत्यत्र स्फुटीभविष्यति । चुश्च्योतेति । 'शर्पूर्वाः खयः' । यकाररहितोऽप्ययमिति । तथा च प्रयुज्यते 'मधुश्च्युतं घृतमिव सुपूतम्' इति । मन्थ । अयं क्र्यादावपि । 'षिध गत्याम्' । अयमुदिदिति केचित् । तन्न सिध्यतिबुध्यत्योः श्यना निर्देशात् सिधितं बुधितमिति वृत्तिग्रन्थविरुद्धम् । उदित्त्वे तु 'उदितो वा' इति क्त्वायामिड्विकल्पान्निष्ठायामिण् न स्यात्, 'यस्य विभाषा' इति निषेधात् । सिषेधेति ।

इति षत्वनिषेधे प्राप्ते। २२७० **उपसर्गात्सुनोतिसुवतिस्यतिस्तौतिस्तोभतिस्थासेनयसेधसिचसञ्जस्वञ्जाम्।** (८-३-६५) उपसर्गस्थान्निमित्तादेषां सस्य षः स्यात्। २२७१ **सदिरप्रतेः।** (८-३-६६) प्रतिभिन्नादुपसर्गात्सदेः सस्य षः स्यात्। २२७२ **स्तन्भेः।** (८-३-६७) सौत्रस्य सस्य षः

निषधतीत्यादौ 'उपसर्गात्सुनोति–' इति षत्वं वक्ष्यति। तत्किमर्थम् 'आदेशप्रत्यययोः' इत्येव सिद्धेरित्याशङ्क्याह **सात्पदाद्योरिति। उपसर्गात्सुनोति। उपसर्गस्थादिति।** उपसर्गशब्द उपसर्गस्थे लाक्षणिक इति भावः। **निमित्तादिति।** इण्रूपादित्यर्थः। 'इण्कोः' इत्यधिकारेऽपि कोरिति नात्र संबध्यते, असंभवात्। **सस्येति।** 'सहेः साडः सः' इत्यतः स इति षष्ठ्यन्तमनुवर्तत इति भावः। **षः स्यादिति।** 'अपदान्तस्य मूर्धन्यः' इत्यधिकारादिति भावः। अत्र सुनोतीत्यादिः श्तिपा निर्देशो यङ्लुङ्निवृत्त्यर्थ इति प्राञ्चः। स्पष्टार्थ इति प्रौढमनोरमायाम्। सेनयेति णिजन्तो नामधातुः। सेधतीति शपा निर्देशात् सिध्यतेर्न ग्रहणम्। अभिषुणोतीत्याद्युदाहरणम्। प्रकृते निषधतीत्याद्यर्थमिह सूत्रोपन्यासः। प्रसङ्गादाह **सदिरप्रतेः। उपसर्गादिति।** उपसर्गस्थादिणः परस्येत्यर्थः। सदिरिति षष्ठ्यर्थे प्रथमेत्यभिप्रेत्याह **सदेः सस्येति।** निषीदतीत्युदाहरणम्। **स्तन्भेः।** नकारोपधनिर्देशस्य प्रयोजनमाह **सौत्रस्येति।** 'स्तन्भुस्तुन्भु–' इति सूत्रनिर्दिष्टस्य नोपधस्येत्यर्थः।

'आदेशप्रत्यययोः' इति षत्वम्। **उपसर्गात्।** 'सुनोति सुवति–' इत्यादि श्तिपा निर्देशो यङ्लुङ्निवृत्त्यर्थस्तेन अभिसोषवीति अभिसोषोतीत्यादौ षत्वं नेति प्राञ्चः। स्थादिष्वेवाभ्यासस्य षत्वं न सुनोत्यादिष्विति नियमान्नेह षत्वप्राप्तिरिति व्यर्थः प्रतिषेध इति मनोरमादौ स्थितम्। सेनयेति णिजन्तो नामधातुः। सेनयाऽभियाति अभिषेणयति। सेधेति शपा निर्देशाद्भौवादिकस्य ग्रहणं न तु सिध्यतेः, परिसिध्यति। गृहा दारा इत्यत्रेव तात्स्थ्यात्ताच्छब्द्यमित्याह **उपसर्गस्थादिति। निमित्तादिति।** इण्रूपात्। कवर्गस्तु नेह सम्बध्यते, असम्भवात्। न च निःषुणोति निःषेधति निःषिञ्चतीत्यादौ व्यवधानेन इणः परत्वाभावात् सस्य षत्वं न स्यादिति शङ्क्यम्, षत्वविधौ 'नुम्विसर्जनीयशर्व्यवायेऽपि' इत्यधिकारात्। इणन्तादुपसर्गादिति व्याख्याने तु स्यादेवात्राव्याप्तिः। 'दुरः षत्वणत्वयोः–' इत्युपसर्गत्वप्रतिषेधाद् दुःसुनोति दुःसेधतीत्यादौ तु षत्वेन न भवितव्यमिति दिक्। मूर्धन्यादेशे फलितमाह **सस्य षः स्यादिति।** स्थादिषु 'प्राक् सितात्–' इत्यत्र क्रमज्ञानस्यापेक्षितत्वात्तेनैव क्रमेण षत्वसूत्राणि व्याचष्टे **सदिरप्रतेः।** अप्रतेः किम्, प्रतिसीदति। षष्ठ्यर्थे प्रथमेत्याह **सदेरिति। स्तन्भेः सौत्रस्येति।** 'स्तन्भुस्तुन्भु–' इति सूत्रे निर्दिष्टस्य

स्यात् । योगविभाग उत्तरार्थः । किं च अप्रतेः इति नानुवर्तते । 'बाहुप्रतिष्टम्भविवृद्धमन्युः' इति । २२७३ अवाच्चालम्बनाविदूर्ययोः । (८-३-६८) अवात्स्तन्भेरेतयोरर्थयोः षत्वं स्यात् । २२७४ वेश्च स्वनो भोजने । (८-३-६९) व्यवाभ्यां स्वनतेः सस्य षः स्याद्भोजने ।

स हि प्रतिपदोक्तः । 'ष्टभि प्रतिबन्धे' इत्यस्य तु धातोरिदित्त्वान्नुमि लाक्षणिकत्वान्न ग्रहणम् । तेन विस्तम्भत इत्यादौ न षत्वम् । 'उदः स्थास्तम्भोः–' इति सूत्रे तु मोपधग्रहणादुभयोरपि ग्रहणम्, मकारस्य उभयत्रापि लाक्षणिकत्वात् । ननु 'सदिस्तन्भ्योरप्रतेः' इत्येकमेव सूत्रं कुतो न कृतमित्यत आह **योगविभाग उत्तरार्थ इति** । 'अवाच्चालम्बनाविदूर्ययोः' इत्युत्तरसूत्रे सदेरननुवृत्त्यर्थ इत्यर्थः । ननु सदेरस्वरितत्वादालम्बनाविदूर्ययोर्वृत्त्यभावादेव च अनुवृत्त्यभावः सिद्ध इत्यस्वारस्यादाह **किं चेति । नानुवर्तत इति** । 'स्तन्भेः' इत्यत्र अप्रतेरित्यस्य अनुवृत्तिर्नेष्टा । एकसूत्रत्वे तु अप्रतेरित्यस्य स्तन्भिनाऽपि संबन्धः स्यादिति भावः । अप्रतेरित्यस्य स्तन्भावनन्वयो वृद्धप्रयोगानुगत इत्याह **बाहुप्रतिष्टम्भेति । अवाच्च** । आलम्बनं च आविदूर्यं चेति द्वन्द्वात्सप्तमीद्विवचनम् । **एतयोरिति** । आलम्बनाविदूर्ययोरर्थयोर्विद्यमानस्य अवात्परस्य स्तन्भेरित्यन्वयः । अपूर्वविधिरयम्, इणः परत्वाभावादप्राप्तेः । आलम्बने यथा—यष्टिमवष्टभ्य तिष्ठतीति । आश्रित्येत्यर्थः । आविदूर्यं

रोधनार्थस्य, न तु 'ष्टभि प्रतिबन्धे' इत्यस्येति भावः । एवं 'जृस्तन्भु–' इत्यङ्विधायकसूत्रेऽपि सौत्रस्यैव ग्रहणमिति बोध्यम् । एतच्च 'लक्षणप्रतिपदोक्त–' परिभाषया लभ्यते । सौत्रो हि धातुर्नकारोपध इति प्रतिपदोक्तः । इदित्त्वान्नुमि ष्टभिर्लाक्षणिकः । तेन विस्तम्भते इत्यादौ षत्वं न । 'उदःस्थास्तम्भोः–' इति सूत्रे मकारोपधग्रहणेनोभयोरपि ग्रहणादुत्तम्भते इति द्वयोरपि रूपं तुल्यम्, मकारस्योभयत्रापि लाक्षणिकत्वात् । **उत्तरार्थ इति** । उत्तरसूत्रे स्तन्भेरेवानुवृत्त्यर्थ इति भावः । ननु 'सदिस्तन्भ्योः' इति सूत्रितेऽपि एकदेशे स्वरितत्वप्रतिज्ञानात्कथंचिदनुवृत्तिर्भविष्यतीत्यत आह **किं चेति । नानुवर्तत इति** । तथा च 'स्तन्भेः' इत्यत्राऽननुवृत्तये योगविभाग आवश्यक इति भावः । **अवाच्च** । चकारश्चिन्त्यप्रयोजन इत्याहुः । आलम्बनमाश्रयणम् । यथा यष्टिमवष्टभ्य आस्ते । तामाश्रित्य तिष्ठतीत्यर्थः । आविदूर्यं सामीप्यम् । तच्च प्रयोगोपाधिः । अवष्टब्धा गौः । निरुद्धा सती समीपे आस्त इत्यर्थः । एतयोः किम्, अवस्तब्धो वृषलः शीतेन । केचिदिह अविदूरशब्दात्स्वार्थे ष्यञ् । आविदूर्यमनतिदूरम् । ईषद्दूरमित्यर्थः । तथा च अविदूरशब्दात् 'न नञ्पूर्वात्तत्पुरुषात्' इति निषेधे प्राप्ते अतएव निपातनाद्भावे प्रत्यय इति मनोरमाग्रन्थोक्तिर्नातीवोपयुज्यत

२२७५ **परिनिविभ्यः सेवसितसयसिवुसहसुट्स्तुस्वञ्जाम्।** (८-३-७०) परिनिविभ्यः परेषामेषां सस्य षः स्यात्। निषेधति। २२७६ **प्राक्सितादड्व्यवायेऽपि।** (८-३-६३) 'सेवसित-' (सू २२७५) इत्यत्र सितशब्दात् प्राक् ये सुनोत्यादयस्तेषामड्व्यवायेऽपि षत्वं स्यात्। न्यषेधत्। न्यषेधीत्। न्यषेधिष्यत्। २२७७ **स्थादिष्वभ्यासेन चाभ्यासस्य।** (८-३-६४) प्राक्सितात्स्था-

---

सामीप्यम्। अवष्टभ्या गौः। निरुद्धा सती समीपे आस्त इत्यर्थः। **वेश्च।** अवादित्यनुकर्षणार्थश्चकारः, तदाह **व्यवाभ्यामिति।** विष्वणति। अवष्वणति। सशब्दं भुङ्क्ते इत्यर्थः। 'अट्कुप्वाङ्-' इति णत्वम्। **परिनिविभ्यः।** सेवेत्यकार उच्चारणार्थः। 'षेञ् सेवायाम्' इति धातोर्ग्रहणम्। परिषेवते। निषेवते। विषेवते। सितेत्यनेन 'षिञ् बन्धने' इति क्तान्तस्य ग्रहणम्। अस्यैव धातोः एरजन्तो वा पचाद्यजन्तो वा सयशब्दः। विषितः विषयः। 'षिवु तन्तुसन्ताने'। परिषीव्यति। 'षह मर्षणे' परिषहते। सुट् आगमः। परिष्करोति। स्तुस्वञ्जोः 'उपसर्गात् सुनोति-' इत्येव सिद्धे 'सिवादीनां वा-' इति विकल्पार्थं पुनर्वचनम्। **प्राक्सितात्। सुनोत्यादय इति।** 'उपसर्गात्सुनोति-' इत्यादिसूत्रोपात्ता इति शेषः। **तेषामिति।** पञ्चदशानामित्यर्थः। **न्यषेधदिति।** अकारेण व्यवहितत्वादिणः परत्वाभावादप्राप्तौ वचनम्। अभ्यषुणोदित्यप्युदाहार्यम्। **स्थादिषु।** अभ्यासेनेति तृतीयान्तम्। प्राक्सितादित्यनुवर्तते, तदाह **प्राक्सितादिति।** 'उपसर्गात्सुनोति-' इति सूत्रे स्थाधातुमारभ्य 'परिनिविभ्यः सेवसित-' इत्यत्र सितशब्दात्प्राग् ये धातव उपात्ताः

इत्याहुः। **वेश्च।** विष्वणति। सशब्दं भुङ्क्ते इत्यर्थः। 'अट्कुप्वाङ्-' इति णत्वम्। एवमवष्वणति। व्यष्वणत्। विषष्वाण। 'स्थादिष्वभ्यासेन-' इति षत्वम्। भोजने किम्, विस्वनति वीणा। **परिनिविभ्यः।** सेवेत्यत्र अकार उच्चारणार्थः। न च यङ्लुङ्निवृत्तये शपा निर्देश एवास्त्विति शङ्क्यम्, षकारान्तानामूठ्भाविनां यङ्लुङ् नास्तीति वक्ष्यमाणत्वात्। 'षेञ् सेवायाम्' परिषेवते। 'षिञ् बन्धने', क्तान्तः सितशब्दः, एरजन्तः पचाद्यन्तो वा सयशब्दः। विषितः। विषयः। प्रत्ययविशिष्टग्रहणं किम्, विसिनोति। 'षिवु तन्तुसन्ताने', परिषीव्यति। 'षह मर्षणे' परिषहते। सुडागमः, परिष्करोति, विष्करोति। स्तुस्वञ्जोः 'उपसर्गात्सुनोति-' इत्येव सिद्धे परिनिविभ्यः परयोरेतयोः 'सिवादीनां वाड्व्यवायेऽपि' इति विकल्पार्थं पुनर्वचनम्। **प्राक्सितात्।** 'उपसर्गात्सुनोति-' इत्यादिना विहितं षत्वम् अड्व्यवाय एवेति भ्रमनिवारणार्थमपिशब्दस्योपादानम्। **तेषामिति।** पञ्चदशानामित्यर्थः। अभ्यषुणोदित्यादीन्युदाहर्तव्यानि। **स्थादिषु।** इह द्वे वाक्ये, आद्यं षत्वविध्यर्थं

दिष्वभ्यासेन व्यवायेऽपि षत्वं स्यात्। एषामेव चाभ्यासस्य न तु सुनोत्यादीनाम्। निषिषेध। निषिषिधतुः। **२२७८ सेधतेर्गतौ।** (८-३-११३) गत्यर्थस्य सेधतेः षत्वं न स्यात्। गङ्गां विसेधति। षिधू ४८ शास्त्रे माङ्गल्ये च। शास्त्रं शासनम्। **२२७९ स्वरतिसूतिसूयतिधूञूदितो वा।** (७-२-४४) स्वरत्यादेरूदितश्च

तेषु दशस्वित्यर्थः। निषिषेधेत्यादौ अभ्यासात्परस्य सस्य अभ्यासव्यवहितत्वेन उपसर्गात्परत्वाभावादप्राप्तौ वचनम्। ननु निषिषेधेत्यादौ अभ्यासस्थसकारस्य 'उपसर्गात्सुनोति–' इत्यनेनैव सिद्धत्वादभ्यासस्येति व्यर्थमित्याशङ्क्य नियमार्थमित्याह **एषामेवेति**। अभ्यासस्थसकारस्य चेत् षत्वं तर्हि स्थादिदशानामेवेत्यर्थः। एवं च 'षू प्रेरणे' अभिसुसूषति। अत्राभ्यासस्य न षत्वम्। अभ्यासात्परस्य तु सस्य 'स्तौतिण्योरेव–' इति नियमान्न षत्वम्। **सेधतेः। न षत्वमिति।** 'न रपर–' इत्यतो नेत्यनुवृत्तेरिति भावः। **गङ्गां विसेधतीति।** गच्छतीत्यर्थः। इह 'उपसर्गात्सुनोति–' इति षत्वं न भवति। अनन्तरस्येति न्यायेन 'उपसर्गात्सुनोति–' इत्यस्यैवायं निषेधः, न त्वादेशप्रत्यययोरित्यस्यापि। तेन सिषेधेत्यादौ आदेशप्रत्यययोरिति षत्वं भवत्येव। **षिधू इति।** ननु वाक्यसङ्घविशेषात्मकस्य शास्त्रस्य अक्रियारूपत्वात्कथं धात्वर्थत्वमित्यत आह **शास्त्रं शासनमिति।** माङ्गल्यं तु शुभकर्म। 'षिध गत्याम्' इतिवदस्यापि रूपाणि। तत्र वलादावार्धधातुके नित्यमिटि प्राप्ते। **स्वरति।** 'आर्धधातुक-

---

द्वितीयं तु नियमार्थमित्याशयेनाह **व्यवायेऽपीति, षत्वमेषामेव चेति।** स्थादीनां दशानामेवाभ्यासस्य षत्वमित्यर्थः। तत्फलं तु 'षू प्रेरणे' अभिसुसूषति। अत्रोक्तनियमादभ्याससकारस्य न षत्वम्, द्वितीयस्य तु 'स्तौतिण्योः' इति नियमान्न भवति। अभिसिषासतीत्यत्र तु षणोऽभावादभ्यासात्परस्य षत्वं पूर्वस्य तूक्तनियमान्नेति बोध्यम्। स्यादेतत्—निषिषेधेत्यादौ अभ्यासस्य 'उपसर्गात्सुनोति–' इत्यनेन सिद्धम्, अभ्यासात्परस्य तु 'आदेशप्रत्यययोः' इत्यनेनेति किमाद्यवाक्येन। अत्राहुः—फलत्रयार्थमाद्यं वाक्यम्, अषोपदेशार्थम्। तथाहि—सेनया अभियातुमिच्छति अभिषिषेणयिषति। अवर्णान्ताभ्यासार्थं च—'अधीषनं गोत्रभिदोऽधितष्ठौ'। षणि प्रतिप्रसवार्थं च—अभिषिषिक्षति। 'षिच क्षरणे'। 'स्तौतिण्योरेव–' इति नियमात् षभूते सनि निवर्तितमपि षत्वमुपसर्गमाश्रित्यात्र भवतीति। **सेधतेर्गतौ।** श्तिपा निर्देशाद्यङ्लुकि न निषेधः, तेनोपसर्गमाश्रित्य षत्वं भवत्येव। **विसेधतीति।** न च सेधेति शपा निर्देशाद्यङ्लुकि 'उपसर्गात्सुनोति–' इति षत्वं न भवेदिति शङ्क्यम्, दैवादिकनिवृत्त्यर्थतया शपा निर्देशस्य चारितार्थ्यात्। अन्यथा सेधतेरिति श्तिपा निर्देशस्य वैयर्थ्यापत्तेरिति दिक्। **षिधू शास्त्रे।** माङ्गल्यं मङ्गलक्रिया। स्वार्थे ष्यञ्।

परस्य वलादेरार्धधातुकस्येड्वा स्यात्। **२२८० झषस्तथोर्धोऽधः।** (८-२-४०) झषः परयोस्तथोर्धः स्यान्न तु दधातेः। जश्त्वम्। सिषेद्ध-सिषेधिथ। सेद्धा, सेधिता। सेत्स्यति, सेधिष्यति। असैत्सीत्। **२२८१ झलो झलि।**

स्येड्वलादेः' इत्यनुवर्तते। स्वरति सूति सूयति धूञ् ऊदित् एषां समाहारद्वन्द्वात्पञ्चम्येकवचनम्। फलितमाह **स्वरत्यादेरिति।** स्वरतीति स्वृधातोः शपा निर्देशः। सूतीति सूयतीति च लुग्विकरणस्य श्यन्विकरणस्य च सूधातोर्निर्देशः। एवं च 'षू प्रेरणे' इति तौदादिकस्य न ग्रहणम्। 'धूञ् कम्पने' स्वादिः क्रयादिश्च। ञकारानुबन्धनिर्देशाद् 'धू विधूनने' इत्यस्य न ग्रहणम्। 'इट्सनि वा' इत्यतो वेत्यनुवर्तमाने वाग्रहणं लिङ्सिचोर्विकल्पनिवृत्त्यर्थमिति भाष्यम्। एवं च थलि इडभावपक्षे द्वित्वादौ सिसेध् थ इति स्थिते। **झषस्तथोः।** झष इति पञ्चमी। तश्च थ् चेति द्वन्द्वः। तकारादकार उच्चारणार्थः। तकारथकारयोरिति लभ्यते। धः इति प्रथमैकवचनम्। अकार उच्चारणार्थः। धकार इति लभ्यते। अध इति षष्ठ्यन्तम्। धाधातुभिन्नस्येति लभ्यते। तदाह **झषः परयोरिति। जश्त्वमिति।** सिसेध् ध इति स्थिते 'झलां जश् झशि' इति प्रथमधकारस्य दकारे सिषेद्धेति रूपमित्यर्थः। सिषिधिव-सिषिध्व, सिषिधिम-सिषिध्म। क्रादिनियमस्तु नेड्वशीति प्रकमाज्ञप्रापितस्यैवाभावस्य निवर्तकः, नतु विभाषादिप्रापितस्यापि, अनन्तरस्येति न्यायात्। इट्पक्षे आह **सिषेधिथेति। सेद्धेति।** लुट्, तास्, इडभावः, डा, टिलोपः, गुणः, धत्वम् जश्त्वम्। सेद्धारौ सेद्धार इत्यादि। **सेधितेति।** इट्पक्षे रूपम्। **सेत्स्यति सेधिष्यतीति।** लृटि स्यः, इड्विकल्पः। **असैत्सीदिति।** लुङ्स्तिप्, इकारलोपः, च्लिः, सिच्, इडभावः, 'अस्तिसिचः-' इति

स्वरतिसूति। 'स्वृ शब्दोपतापयोः' भ्वादिः। ननु 'स्वरतिसूधूदितो वा' इति सूत्र्यतां किमनेन सूतिसूयत्योः पृथग्ग्रहणेन। मैवम्, तथाहि सति निरनुबन्धकपरिभाषया 'षू प्रेरणे' इति तौदादिकस्यैव ग्रहणं स्यान्न त्वादादिकदैवादिकयोरेतयोः। न चैवं षूङ् इति पठ्यतामिति वाच्यम्, 'लुग्विकरणाऽलुग्विकरणयोः-' इति परिभाषया अलुग्विकरणस्य सूयतेरेव ग्रहणप्रसङ्गात्। अस्याश्च परिभाषायाः सूतिसूयत्योः पृथग्ग्रहणमेव ज्ञापकमित्याहुः। 'धूञ् कम्पने' स्वादिः क्रयादिश्च। सानुबन्धनिर्देशो 'धू विधूनने' इत्यस्य निवृत्त्यर्थः। 'इट् सनि वा' इत्यतो वेति वर्तमाने पुनर्वाग्रहणं लिङ्सिचोर्विकल्पनिवृत्त्यर्थम्। अन्यथा लिङ्सिज्विशिष्टं वापदमत्रापि लिङ्सिचोरेव विकल्पं कुर्यात्। पुनर्वाग्रहणे तु वलाद्यार्धधातुकमात्रस्य विकल्पः सिद्ध इति भावः। **झषस्तथोः।** अध इति किम्, धत्तः। **असैत्सीदिति।** 'अस्तिसिच-' इति

(८-२-२६) झलः परस्य सस्य लोपः स्याज्झलि । असैद्धाम् असैत्सुः । असैत्सीः असैद्धम् असैद्ध । असैत्सम् असैत्स्व असैत्स्म । पक्षे असेधीत् असेधिष्टामित्यादि । खाद ४९ भक्षणे । ऋकार इत् । खादति । चखाद । खद ५० स्थैर्ये हिंसायां च । चाद्भक्षणे । स्थैर्येऽकर्मकः खदति । २२८२ अत उपधायाः । (७-२-११६) उपधाया अतो वृद्धिः स्याद् ञिति णिति च प्रत्यये परे । चखाद । २२८३ णलुत्तमो वा । (७-१-९१) उत्तमो णल्वा णित्स्यात् । चखाद, चखद । २२८४ अतो हलादेर्लघोः । (७-२-७)

ईट्, 'वदव्रज–' इति वृद्धिः । धकारस्य चर्त्वम् । असैध् स तामिति स्थिते, अपृक्तत्वाभावादीडभावादिडभावाच्च 'इट ईटि' इति सिचो लोपे अप्राप्ते । झलो झलि । झल इति पञ्चमी । 'संयोगान्तस्य–' इत्यतो लोप इति, 'रात्सस्य' इत्यतः सस्येति चानुवर्तते, तदाह झलः परस्य सस्य लोपः स्यादिति । असैद्धामिति । असैध स् तामिति स्थिते सलोपे धत्वे जश्त्वे च रूपम् । पक्ष इति । इट्पक्ष इत्यर्थः । असेधीदिति । 'इट ईटि' इति सलोपः । 'नेटि' इति वृद्धिप्रतिषेधः । लघूपधगुणः । खाद इति । अत्र ऋदित्वं 'नाग्लोपि–' इत्याद्यर्थमित्यभिप्रेत्याह ऋकार इदिति । खदेति । स्थैर्ये स्थिरीभवनम् । णलि अजन्तत्वाभावाद् 'अचो ञ्णिति' इति वृद्धेरप्राप्तौ । अत उपधायाः । वृद्धिः स्यादिति । 'मृजेर्वृद्धि' इत्यतः तदनुवृत्तेरिति भावः । ञिति णिति चेति । अचो ञ्णिति' इत्यतः तदनुवृत्तेरिति भावः । चखादेति । एत्वाभ्यासलोपौ तु नात्र भवतः । पित्त्व अकित्वाद् आदेशादित्वात् तदपेक्षया वृद्धेः परत्वाच्च । णलुत्तमः । णित् स्यादिति । गोतो णित्' इत्यतस्तदनुवृत्तेरिति भावः । चखाद चखदेति । णित्त्वे उपधावृद्धिः । तदभावे न । अतो हलादेः । 'सिचि वृद्धिः परस्मैपदेषु' इत्यनुवर्तते । 'नेटि' इत्यस्मादिटीति

ईडागमः । वदव्रज– इति वृद्धिः । ततश्चर्त्वम् । झलो झलि । संयोगान्तस्य–' इत्यतो लोप इति, 'रात्सस्य' इत्यतः सस्येति चानुवर्तते तदाह सस्य लोपः स्यादिति । पदस्येत्यधिकारात्प्रत्यासत्तेर्झलो झलि सस्येति निर्दिष्टानां त्रयाणामेकपदसम्बन्धित्वे लोपोऽयम् । तेन सोमसुत्स्थानमित्यत्र न भवति । झलः किम्, अनैष्टाम् । झलि किम्, असैत्सीत् । असेधीदिति । 'नेटि' इति वृद्धिप्रतिषेधः । गुणः । खाद भक्षणे । ऋकार इदिति । तेन 'नाग्लोपि–' इति निषेधे अचखादत् । अत उप । अतः किम्, तुतोद । उपधायाः किम्, गणयति । इह अतो लोपं बाधित्वा परत्वाद् वृद्धिः स्यात् । अतो हलादेः । इह 'सिचि वृद्धिः–' इति सूत्रमनुवर्तते । 'नेटि' इति सूत्रादिटि इति 'ऊर्णोतेर्विभाषा' इत्यतो विभाषाग्रहणं च

हलादेर्लघोरकारस्येडादौ परस्मैपदपरे सिचि वृद्धिर्वा स्यात्। अखादीत्, अखदीत्। बद ५१ स्थैर्ये। पवर्गीयादिः। बदति। बबाद। बेदतुः। बेदिथ। बबाद, बबद। अबादीत्, अबदीत्। गद ५२ व्यक्तायां वाचि। गदति। २२८५ **नेर्गदनदपतपदघुमास्यतिहन्तियातिवातिद्रातिप्सातिवपतिवहतिशाम्यतिचिनोतिदेग्धिषु च। (८-४-१७)** उपसर्गस्थान्निमित्तात्परस्य नेर्णः स्याद्गदादिषु।

'ऊर्णोतेर्विभाषा' इत्यतो विभाषेति च। तदाह **हलादेरिति**। हलाद्यङ्गावयवस्येत्यर्थः। आदिग्रहणं स्पष्टार्थम्, हलः परस्येत्येव सिद्धेः। **अखादीत् अखदीत् इति**। वृद्धौ तदभावे च 'इट ईटि' इति सिज्लोपः। अखादिष्टाम्, अखदिष्टामित्यादि। **बदेति**। स्थैर्यं स्थिरीभवनम्। **पवर्गीयादिरिति**। पवर्गतृतीयादिरित्यर्थः। ननु दन्त्योष्ठ्यादिरिति भावः। **बबादेति**। 'अत उपधायाः' इति वृद्धिः। **बेदतुरिति**। अभ्यासजश्त्वेन आदेशादित्वेऽपि जश्त्वस्य वैरूप्यापादकत्वाभावादेत्त्वाभ्यासलोपाविति भावः। बबादित्यत्र तु पित्त्वेन कित्त्वाभावादेत्त्वाभ्यासलोपौ न। **बेदिथेति**। अकित्त्वेपि 'थलि च सेटि' इत्येत्वाभ्यासलोपौ, बेदथुः बेद। अथ उत्तमपुरुषणलि 'णलुत्तमो वा' इति णित्त्वविकल्पादुपधावृद्धिविकल्प इत्याह **बबाद बबदेति**। बेदिव बेदिम। **अबादीत्, अबदीत् इति**। 'अतो हलादेः—' इति वृद्धिविकल्पः। **गदेति**। व्यक्तवाङ् मनुष्यकृतशब्दप्रयोगः। **जगादेति**। चुत्वजश्त्वे। उपधावृद्धिः। वैरूप्यापादकादेशादित्वादेत्त्वाभ्यासलोपौ न। जगदतुः जगदुरित्यादि। **नेर्गद**। 'रषाभ्यां नो णः' इत्यनुवर्तते। 'उपसर्गादसमासेऽपि—' इत्यत उपसर्गादिति च। तच्च

तदाह **इडादावित्यादि**। अतः किम्, अदवीत्। हलादेः किम्, मा भवानतीत्, अशीत्। लघोः किम्, अगर्दीत्, अरक्षीत्। इडादौ किम्, अपाक्षीत्। परस्मैपदे किम्, अयतिष्ट, अयतिषाताम्। अचकासीदित्यत्र चकारादकारस्य वृद्धिवारणाय 'येन नाव्यवधानम्—' इति न्यायेन यद्येकवर्णव्यवधानमेवाश्रीयते तदा त्वरक्षीदित्यत्रापि प्रसक्त्यभावाल्लघोरिति शक्यमकर्तुमित्याहुः। तपरकरणं स्पष्टार्थम्। **पवर्गीयादिरिति**। दन्त्योष्ठ्यादित्वे तु 'न शसदद—' इत्येत्वाभ्यासलोपनिषेधाद् बेदतुः बदिथेत्यादि न सिध्येदिति भावः। **नेर्गदनद**। गदादीनां चतुर्णां शपा निर्देशः स्यत्यादीनामेकादशानां श्तिपा निर्देशश्च यङ्लुङ्निवृत्त्यर्थः। तेन प्रनिजागदीति, प्रनिनानदीति, प्रनिसासेत्ति, प्रनिजङ्घनीति इत्यादौ णत्वं न। घुशब्देन घुसंज्ञका दाधादयः षड् गृह्यन्ते। डुदाञ् प्रणिददाति। दाण् प्रणियच्छति। दो प्रणिद्यति। देङ् प्रणिदयते। धेट् प्रणिधयति। डुधाञ् प्रणिदधाति। माशब्देन मेङ्माङोरेव ग्रहणम्। घुप्रकृतिमाङिति पठित्वा भाष्यादौ तथा व्याख्या-

प्रणिगदति। जगाद। रद ४३ विलेखने। विलेखनं भेदनम्। रराद। णद ४४ अव्यक्ते शब्दे। २२८६ णो नः। (६-१-६५) धातोरादेर्णस्य नः स्यात्। नदति। 'णोपदेशास्त्वनर्द्नाटिनाथ्नाध्नन्द्नक्कनॄनृतः।' नाटेर्दीर्घोहस्य पर्युदासाद्घटादिर्णोपदेश एव। तवर्गचतुर्थान्तनाधतेः नृनन्द्योश्च केचिण्णोपदेशतामाहुः। २२८७ उपसर्गादसमासेऽपि णोपदेशस्य। (८-४-१४) उपसर्गस्थान्निमित्तात्परस्य णोपदेशस्य धातोर्नस्य णः स्यात्समासेऽसमासेऽपि।

उपसर्गस्थे लाक्षणिकम्, तदाह **उपसर्गस्थादिति** श्तिपा शपा च निर्देशा यङ्लुङ्निवृत्त्यर्थाः। **प्रणिगदतीति**। भिन्नपदस्थत्वादप्राप्तौ वचनम्। **रदेति**। णलि उपधावृद्धिमभिप्रेत्याह **ररादेति**। रेदतुरित्यादि। अरादीत्, अरदीत्। **णदेति**। अव्यक्तशब्दः अमनुष्यपशुपक्ष्यादिकृतशब्दप्रयोगः। **णो नः**। ण इति षष्ठ्यन्तम्। 'धात्वादेः षः सः' इत्यतोऽनुवर्तनादाह **धातोरादेरिति**। तेन अणतीत्यादौ न नत्वम्। **नः स्यादिति**। नकारः स्यादित्यर्थः। **नदतीति**। मेघादिरिति शेषः। 'णो नः' इति नत्वस्यानैमित्तकतया लिटिनिमित्तादेशादित्वाभावादेत्त्वाभ्यासलोपौ स्त एव—नेदतुरित्यादि। अथ 'नृत्नर्द्नन्द्नक्क्नाट्नाथ्नाधृनॄवर्जं णोपदेशाः' इति भाष्यं श्लोकार्धेन सङ्गृह्णाति **णोपदेशास्त्विति**। 'नर्द शब्दे'। 'नट अवस्कन्दने' चुरादिः। नाथृ नाधृ याच्ञादौ। द्वितीयचतुर्थान्तौ। 'टु नदि समृद्धौ'। 'नक्क नाशने'। 'नॄ नये'। 'नृती गात्रविक्षेपे'। एभ्योऽष्टभ्योऽन्ये णकारादिधातव इदानीं नकारादित्वेन दृश्यमाना अपि नत्वसंपन्ननकारादितया णोपदेशाः प्रत्येतव्या इत्यर्थः। नाटीति ण्यन्तस्य प्रयोजनमाह **नाटेरिति**। **घटादिरिति**। 'नट नृत्तौ' इति घटादिपठित इत्यर्थः। तत्फलं घटादौ वक्ष्यते। मतान्तरमाह **तवर्गेति**। तवर्गचतुर्थान्तनाधधातोः नृनन्द्योश्च णोपदेशेषु पर्युदासाभावमङ्गीकृत्य तेषामपि णोपदेशत्वमाहुरित्यर्थः। अत्र मते पञ्चभ्यो भिन्ना णोपदेशा इति फलितम्। भाष्यविरोधोऽत्रारुचिबीजम्। ननु णकारमुपदिश्य तस्य किमर्थं नकारो विधीयते। नकार एवोपदिश्यतामित्याशङ्क्य तत्प्रयोजनमाह **उपसर्गात्**। 'रषाभ्यां नो णः' इत्यधिकृतम्।

नात्। **णो नः**। **धातोरिति**। 'धात्वादेः षः सः' इत्यतोऽनुवर्तनाद्धात्वादेरित्येव। नेह अणति। णोपदेशात्पर्युदासमुखेनाह **णोपदेशास्त्विति**। 'नर्द शब्दे'। 'नट अवस्यन्दने' चुरादिः। यस्तु नट नृत्ताविति घटादिः, स नेह गृह्यते, नाटीति दीर्घनिर्देशात्। 'नाथृ नाधृ याच्ञादौ'। 'टुनदि समृद्धौ'। 'नक्क नाशने'। 'नॄ नये'। 'नृती गात्रविक्षेपे'। एभ्योऽष्टाभ्यो भिन्ना इत्यर्थः। **तवर्गेति**। तेषां मते पञ्चभ्यो भिन्ना णोपदेशाः। **उपसर्गाद्**। 'समासेऽङ्गुलेः सङ्गः' इत्यतोऽनुवर्तनात्समास

प्रणदति। प्रणिनदति। अर्द ५५ गतौ याचने च। 'अत आदेः' (सू २२४८) २२८८ तस्मान्नुड् द्विहलः। (७-४-७१) द्विहलो धातोर्दीर्घीभूतादकारात् परस्य नुट् स्यात्। आनर्द। आर्दीत्। नर्द ५६ गर्द ५७ शब्दे। णोपदेशत्वाभावान्न णः। प्रनर्दति। गर्दति। जगर्द। तर्द ५८ हिंसायाम्। तर्दति। कर्द ५६ कुत्सिते शब्दे। कुत्सिते कौक्षे। कर्दति। खर्द ६० दन्दशूके। दंशनहिंसादिरूपायां दन्तशूकक्रियायामित्यर्थः। खर्दति। चखर्द। अति ६१ अदि ६२ बन्धने। अन्तति। आनन्त। अन्दति। आनन्द। इदि ६३ परमैश्वर्ये। इन्दति।

तदाह उपसर्गस्थादिति। 'समासेऽङ्गुलेः सङ्गः' इत्यतः समास इत्यनुवृत्तेरसमासे न स्यादित्यसमासग्रहणम्। तथा सति प्रणाम इत्यादौ समासे न स्यादित्यपिग्रहणम्, तदाह समासे असमासेऽपीति। णस्योपदेशो यस्मिन्निति विग्रहः। प्रणदतीति। भिन्नपदत्वादप्राप्तिः। प्रणिनदतीति। 'नेर्गद–' इति णत्वम्। नचात्र 'उपसर्गादसमासे–' इति धातुनकारस्य णत्वं शङ्क्यम्, अट्कुप्वाङ्भिन्नेन व्यवधानात्। अर्देति। 'उपधायां च' इत्यत्र इक इत्यनुवर्तनाद् अर्दतीत्यादौ न दीर्घः। लिटि णलि द्वित्वे हलादिशेषे 'अत आदेः' इत्यभ्यासाकारस्य दीर्घे आ अर्देति स्थिते तस्मान्नुट्। द्वौ हलौ यस्य तस्येति विग्रहः। तच्छब्देन 'अत आदेः' इति कृतदीर्घः परामृश्यते, तदाह दीर्घीभूतादिति। टकार इत्, उकार उच्चारणार्थः। टित्वादाद्यवयवः, तदाह आनर्देति। आर्दीदिति। 'इट ईटि' इति सिज्लोपः। नर्देत्यादि स्पष्टम्। कर्देति। कुत्सितशब्देन कुत्सितविशेषो विवक्षित इत्याह कुत्सिते कौक्ष इति। कुक्षिभवे इत्यर्थः। खर्देति। दन्दशूको दंशनस्वभावः सर्पः। 'दन्दशूको बिलेशयः' इत्यमरः। ननु सर्पस्य क्रियात्वाभावात कथं धात्वर्थत्वमित्यत आह दंशनेति। अति अदीति। इदित्वान्नुम्, तदाह अन्ततीति। आनन्तेति। 'अत आदेः' इति दीर्घः। 'तस्मान्नुड्द्विहलः' इति नुट्। एवम् अन्दति। आनन्देति। नुट्। आन्दीत्। इदीति। परमैश्वर्यं परमेश्वरीभवनम्।

एव स्यादित्यसमाग्रहणम्, कृते तु तस्मिन्नसमास एव स्यादित्यपेर्ग्रहणं कृतम्। प्रणिनदतीति। 'नेर्गद–' इति णत्वम्। धातुनकारस्य तु 'उपसर्गादसमास–' इति णत्वं न भवत्यडादिभिन्नेन व्यवधानात्। तस्मात् तच्छब्देन कृतदीर्घाकारः परामृश्यत इत्याह दीर्घीभूतादिति। खर्द दन्दशूके। दन्दशूकस्य सर्पत्वात्तद्वाचित्वे धातुत्वं न संगच्छत इत्यत आह दन्दशूकक्रियायामिति। दन्दशूककर्तृकायामित्यर्थः। आन-

---

१ 'निर्गलिताम्बुगर्भं शरद्घनं नार्दति चातकोऽपि' इति पञ्चमे रघुवंशे।

इन्दांचकार। बिदि ६४ अवयवे। पवर्गतृतीयादिः। बिन्दति। अवयवं करोतीत्यर्थः। भिदि इति पाठान्तरम्। गडि ६५ वदनैकदेशे। गण्डति। अन्तत्यादयः पञ्चैते न तिङ्विषया इति काश्यपः। अन्ये तु तिङमपीच्छन्ति। णिदि ६६ कुत्सायाम्। निन्दति प्रणिन्दति। टुनदि ६७ समृद्धौ। २२८६ आदिर्ञिटुडवः। (१-३-५) उपदेशे धातोराद्या एते इतः स्युः। नन्दति। इदित्वान्नलोपो न। नन्द्यात्। चदि ६८ आह्लादे। चन्दति। चचन्द। त्रदि ६९ चेष्टायाम्। त्रन्दति। तत्रन्द। कदि ७० क्रदि ७१ क्लदि ७२ आह्वाने रोदने च। चकन्द। चक्रन्द। चक्लन्द। क्लिदि ७३ परिदेवने। चिक्लिन्द। शुन्ध ७४ शुद्धौ।

इन्दतीति। इदित्वान्नुम्। **इन्दांचकरेति**। 'इजादेश्च–' इत्याम्। **बिदीति**। इदित्वान्नुमित्याह **बिन्दतीति**। नन्ववयवस्य अक्रियारूपत्वात् कथं धात्वर्थत्वमित्यत आह **अवयवं करोतीत्यर्थ इति**। अबिन्दीत् अबिन्दिष्टामित्यादि। **पाठान्तरमिति**। पवर्गीयचतुर्थादिरित्यर्थः। **गडीति**। **वदनैकदेश इति**। तत्क्रियायामित्यर्थः। गण्डति। अगण्डीत्। **अन्तत्यादय इति**। अति अदि बन्धने, इदि परमैश्वर्ये, बिदि अवयवे, गडि वदनैकदेशे इति पञ्च धातवः तिङ्प्रकृतयो न भवन्तीति काश्यपमतमित्यर्थः। **अन्य इति**। काश्यपादन्ये मुनयः तिङमपि एभ्य इच्छन्तीत्यर्थः। **णिदीति**। इदित्वान्नुम्, णोपदेशत्वाद् णस्य नत्वम्, तदाह **निन्दतीति**। **प्रणिन्दतीति**। 'उपसर्गादसमासेऽपि–' इति णत्वम्। **टुनदीति**। समृद्धिः प्रजापश्वादिसम्पत्तिः। **आदिः**। 'भूवादयो धातवः' इत्यस्माद् धातव इत्यनुवृत्तं षष्ठ्या विपरिणम्यते। 'उपदेशेऽजनुनासिकः–' इत्यस्माद् उपदेश इति, इदिति चानुवर्तते। आदिरिति इदिति च बहुत्वे एकवचनम्, तदाह **उपदेश इति**। ट्वित्करणं 'ट्वितोऽथुच्' इत्येतदर्थम्। **नन्दतीति**। इदित्वान्नुम्। **इदित्वादिति**। आशीर्लिङि यासुटः कित्त्वेऽपि इदित्वाद् 'अनिदिताम्–' इति नलोपो नेत्यर्थः। **नन्द्यादिति**। अन्त्याद् अन्द्यादित्यस्याप्युपलक्षणम्। **चदीति**। इदित्वान्नुमित्याह **चन्दतीति**। **त्रदीति**। अदुपधोऽयम्। इदित्वान्नुमित्याह **त्रन्दतीति**। **क्रदि क्लदीति**। अदुपधौ। **क्लिदि परिदेवन इति**। अनुदा-

---

त्तेति। इदित्वान्नुम्, 'तस्मान्नुड् द्विहलः' इति नुट्। **वदनैकदेश इति**। तत्क्रियायामित्यर्थः। '**आदिर्ञिटुडवः**'। 'उपदेशेऽजनुनासिक–' इत्यतोऽनुवर्तनादाह **उपदेश इति**। उपदेशे किम्, भिकारीयति। ञिष्वप्, 'ञीतः क्तः', सुप्तः। 'ट्वितोऽथुच्', नन्दथुः। 'ड्वितः क्त्रिः, कृत्रिमम्। **क्लिदि** परिदेवने। अनुदात्तेत्सु पठितस्येह पाठः परस्मैपदार्थः। क्रियाफलस्य कर्तृगामित्वेऽपि परस्मैपदार्थं स्वरितेत्त्वं

शुन्धति। शुशुन्ध। नलोपः शुध्यात्।

अथ कवर्गीयान्ता अनुदात्तेतो द्विचत्वारिंशत्। शीकृ ७५ सेचने। तालव्यादिः। दन्त्यादिरित्येके। शीकते। शिशीके। लोकृ ७६ दर्शने। लोकते। लुलोके। श्लोकृ ७७ संघाते। संघातो ग्रन्थः। स चेह ग्रथ्यमानस्य व्यापारो ग्रन्थितुर्वा। आद्येऽकर्मको द्वितीये सकर्मकः। श्लोकते। द्रेकृ ७८ ध्रेकृ ७९ शब्दोत्साहयोः। उत्साहो वृद्धिरौद्धत्यं च। 'एच इग्घ्रस्वादेशे' इति ह्रस्वः। दिद्रेके। दिध्रेके। रेकृ ८० शङ्कायाम्। रेकते। सेकृ ८१ स्रेकृ ८२ स्रकि ८३ श्रकि ८४ श्लकि ८५ गतौ। त्रयो दन्त्यादयः। द्वौ तालव्यादी। अषोपदेशत्वान्न षः। सिसेके। शकि ८६ शङ्कायाम्। शङ्कते। शशङ्के। अकि ८७ लक्षणे। अङ्कते। आनङ्के। वकि ८८ कौटिल्ये। वङ्कते। मकि ८९ मण्डने। मङ्कते।

त्तेत्सु पठितस्येह पाठः परस्मैपदार्थः। **शुन्ध शुद्धाविति**। अकर्मकोऽयम्। **शुन्धतीति**। शुद्धिर्भवतीत्यर्थः। ननु शुधीत्येवमिदिदेवायं कुतो न पठित इत्यत आह **नलोप इति**। आशीर्लिङि 'अनिदिताम्—' इति नलोपे शुध्यादिति रूपमिष्टम्। इदित्त्वे तु नलोपो न स्यादिति भावः। **अथ कवर्गीयान्ता इत्यादि लोकृ इत्यन्तम्**। स्पष्टम्। **श्लोकृ इति**। संघातशब्दं व्याचष्टे **ग्रन्थ इति**। ननु वाक्यसमुदायात्मकस्य ग्रन्थस्य अक्रियात्वात् कथं धात्वर्थत्वमित्याशङ्क्याह **स चेहेति**। ग्रन्थनं ग्रन्थः—संघीभावः संघीकरणं वा। तत्र संघीभवनं संघनिष्ठम्, संघीकरणं तु संघीकर्तृनिष्ठम्। तत्र संघीभवनार्थकत्वे अकर्मकः, संघीकरणार्थत्वे सकर्मक इत्यर्थः। **श्लोकत इति**। संघीभवतीत्यर्थः, संघीकरोतीति वा। **द्रेकृ ध्रेकृ इति**। शब्दनं शब्दः। **एच इति**। लिट एशि द्वित्वे हलादिशेषे देद्रेक ए इति स्थिते अभ्यासे एकारस्य ह्रस्वो भवन् 'एच इग्घ्रस्वादेशे' इति इकारो भवतीत्यर्थः। **दिध्रेक इति**। अभ्यासे धकारस्य जश्त्वेन दकारः। एकारस्य तु ह्रस्व इकारः। **रेकृ इति**। शङ्का संशयः आक्षेपो वा। 'शीकृ सेचने' इत्यारभ्य एतत्पर्यन्ता ऋदितः। **सेकृ इति**। आद्यौ एकारमध्यौ ऋदितौ। इतरे त्रयः अदुपधा इदितः। **त्रय इति**। पञ्चसु आद्यास्त्रय इत्यर्थः। **अषोपदेशत्वादिति**। सेकृधातोः पर्युदासान्न षोपदेशत्वम्। द्वितीयतृतीययोस्तु दन्त्याच्परकसादित्वाभावान्न षोपदेशत्वम्। ततश्च सकारस्यादेशसकारत्वाभावान्न षत्वमिति भावः। एच इग्घ्रस्वादेश इत्यभिप्रेत्याह **सिसेक इत्यादि**। सस्रङ्के इत्यादाविदित्त्वान्नुम्। **शकीति**। इदित्त्वान्नुमित्याह **शङ्कत इति**। **शशङ्क इति**। **अकीति**। लक्षणं चिह्नीकरणम्। **अङ्कत इति**।

न पठितः। **शुन्ध शुद्धौ**। अयं शौचकर्मणि युजादौ माङ्गलिकः। एधतिरुक्तस्तवर्गी-

कक ९० लौल्ये । लौल्यं गर्वश्चापल्यं च । ककते । चकके । कुक ९१ वृक ९२ आदाने । कोकते । चुकुके । वर्कते । ववृके । 'ऋदुपधेभ्यो लिटः कित्त्वं गुणात्पूर्वविप्रतिषेधेन ।' चक ९३ तृप्तौ प्रतिघाते च । चकते । चेके । ककि ९४ वकि ९५ श्वकि ९६ त्रकि ९७ ढौकृ ९८ त्रौकृ ९९ [१]ष्वष्क १०० वस्क १०१ मस्क १०२ टिकृ १०३ टीकृ १०४ तिकृ १०५ तीकृ १०६ रघि १०७ लघि १०८ गत्यर्थाः । कङ्कते । डुढौके । तुत्रौके । 'सुब्धातुष्ठिवुष्वष्कतीनां सत्वप्रतिषेधो वक्तव्यः ।' ष्वष्कते । षष्वष्के । अत्र तृतीयो दन्त्यादिरित्येके । टेकते । टीकते । एवं तेकते । तीकते । लघिर्भोजननिवृत्तावपि । अघि १०९ वघि

इदित्त्वान्नुम् । **आनङ्क इति** । 'तस्मान्नुड्द्विहलः' इति नुट् । 'वकि कौटिल्ये' इत्यादि स्पष्टम् । **कुक वृकेति** । द्वितीय ऋदुपधः । शपि लघूपधगुणं मत्वा आह **कोकत इति** । **चुकुक इति** । 'असंयोगात्–' इति कित्त्वाद् न लघूपधगुणः । अभ्यासे चुत्वम् । लघूपधगुणे रपरत्वं मत्वाह **वर्कत इति** । लिटि 'असंयोगात्–' इति कित्त्वान्न गुण इति मत्वाह **ववृक इति** । उरदत्वं 'हलादिश्शेषः' । ननु कित्त्वात् परत्वाद् गुणः स्यात्, कृते गुणे रपरत्वे संयोगात्परत्वेन कित्त्वस्याप्रवृत्त्या अनित्यत्वादित्यत आह **ऋदुपधेभ्यो लिटः कित्त्वं गुणात् पूर्वविप्रतिषेधेनेति** । **चकेति** । तृप्तावकर्मकः । प्रतिघाते सकर्मकः । एत्वाभ्यासलोपौ मत्वाह **चेक इति** । **ककीति** । एते पञ्चदश धातवः । आद्याश्चत्वार इदितः । द्वितीयो वकारादिः । तृतीयस्तालव्यादिः । पञ्चमषष्ठौ दशमाद्याश्चत्वारश्च ऋदितः । दशमद्वादशौ इदुपधौ । रघिलघी इदितौ चतुर्थान्तौ । कङ्कत इत्यादाविदित्त्वान्नुम् । **डुढौके तुत्रौक इति** । अभ्यासे ढस्य जश्त्वेन डकार ओकारस्य ह्रस्व उकारः । अथ ष्वष्कधातोः षोपदेशपरिगणनाद् 'धात्वादेः–' इति सत्वे प्राप्ते आह **सुब्धात्विति** । **षष्वष्क इति** । संयुक्तहल्मध्यस्थत्वादेत्त्वाभ्यासलोपौ न, संयोगात्परत्वेन लिटः कित्त्वाभावाच्च । **तृतीय इति** । तथा च स्वष्कत इति रूपम् । केवलदन्त्यपरकसादित्वाभावेन षोपदेशत्वाभावः । **टेकत इति** । लघूपधगुणः । **टीकत इति** । दीर्घोपधत्वान्न गुणः । **एवं तेकते तीकत इति** । रङ्घते लङ्घते । इदित्त्वान्नुम् । **लघिर्भोजननिवृत्तावपीति** । निवृत्तिः विमुखीभवनम् । लङ्घते न भुङ्क्ते

यान्तस्तदनुरोधेन कतिचित् तवर्गीयान्ताः पठिताः । इदानीं लोकप्रसिद्धकादिपाठक्रमेणाह **अथेत्यादि** । **चुकुक इति** । परमपि गुणं बाधित्वा नित्यत्वाद् 'असंयोगात्–' इति कित्त्वम् । **सुब्धात्वित्यादि** । सुब्धातोरुदाहरणानि । षड् दन्ता अस्य षोडन्, तमाचष्टे णिचि टिलोपः षोडयति । एवं षण्ढं करोत्याचष्टे वा षण्ढयति ।

---

१ 'ष्वक्क' इति क्वचित् पाठः ।

११० मघि १११ गत्याक्षेपे। आक्षेपो निन्दा। गतौ गत्यारम्भे च इत्यन्ये। अङ्घते। आनङ्घे। वङ्घते। मङ्घते। मघि कैतवे च। राघृ ११२ लाघृ ११३ द्राघृ ११४ सामर्थ्ये। राघते। लाघते। ध्राघृ इत्यपि केचित्। द्राघृ आयामे च। आयामो दैर्घ्यम्। द्राघते। श्लाघृ ११५ कत्थने। श्लाघते।

अथ परस्मैपदिनः पञ्चाशत्। फक्क ११६ नीचैर्गतौ। नीचैर्गतिर्मन्दगमनमसद्व्यवहारश्च। फक्कति। पफक्क। तक ११७ हसने। तकति। तकि ११८ कृच्छ्रजीवने। तङ्कति। बुक्क ११९ भषणे। भषणं श्वरवः। बुक्कति। कख १२० हसने। प्रनिकखति। ओखृ १२१ राखृ १२२ लाखृ १२३ द्राखृ १२४ ध्राखृ १२५ शोषणालमर्थयोः। ओखति। ओखांचकार। शाखृ १२६ श्लाखृ १२७ व्याप्तौ। शाखति। उख १२८ उखि १२९ वख १३० वखि १३० मख १३२ मखि १३३ णख १३४ णखि १३५ रख १३६ रखि १३७ लख १३८ लखि १३९ इख १४० इखि १४१ ईखि १४२ वल्ग १४३ रगि १४४ लगि १४५ अगि १४६ वगि १४७ मगि १४८ तगि १४९ त्वगि १५० श्रगि १५१ श्लगि १५२ इगि १५३ रिगि १५४ लिगि १५५ गत्यर्थाः। द्वितीयान्ताः पञ्चदश। तृतीयान्तास्त्रयोदश। इह खान्तेषु रिख त्रख त्रिखि शिखि इत्यपि चतुरः केचित्

इत्यर्थः। अघीति। त्रयोऽपि चतुर्थान्ता इदितः। आनङ्घ इति। 'तस्मान्नुड्द्विहलः' इति नुट्। वङ्घत इति। इदित्वान्नुम्। लिटि तु ववङ्घ इति रूपम्। वादित्वात्संयुक्तहल्मध्यस्थत्वात् संयोगात्परत्वेन लिटः कित्त्वाभावाच्च एत्त्वाभ्यासलोपौ न। मघि कैतवे चेति। कैतवं वञ्चना। राघृ इति। त्रयोऽपि ऋदितः। सामर्थ्यं कार्यक्षमीभवनम्। ध्राघृ इत्यपीति। चतुर्थादिमपि केचित् पठन्तीत्यर्थः। द्राघृ इति। आयामो दीर्घीभवनम्। श्लाघृ कत्थन इति। कत्थनं स्तुतिः। शीङ् इत्यादयो द्विचत्वारिंशदात्मनेपदिनो गताः।

फक्क नीचैरित्यादि स्पष्टम्। प्रनिकखतीति। 'शेषे विभाषा–' इत्यत्र अककखादाविति पर्युदासान्नेर्णत्वं नेति भावः। ओखृ इति। अलमर्थो भूषणक्रिया, पर्याप्तिः, वारणं वा। ओखति। ओखांचकार। शाखृ श्लाखृ इति। श्लाघृ इति चतुर्थान्त आत्मनेपदेषु गतः। उख उखीति। पञ्चदशेति। ईखि इत्यन्ता इति

षण्ढीयतीत्यत्र षण्ढशब्दात् क्यचि ईत्वं बोध्यम्। एतच्च वार्तिकं भाष्ये प्रत्याख्यातम्। तथाहि 'धात्वादेः–' इति सूत्रे उपदेश इति वर्तते। न च सुब्धातूनामुपदेशोऽस्ति। ष्ठिवुष्वष्कतौ तु यकारादी। 'लोपो व्योः–' इति यलोपः। प्रनिकखतीति। 'शेषे विभाषा–' इत्यत्र अककखादाविति पर्युदासान्नेर्णत्वं नेति भावः। असवर्णेऽचीति।

पठन्ति। ओखति। २२६० अभ्यासस्यासवर्णे। (६-४-७८) इवर्णोवर्णान्तस्य अभ्यासस्येयङुवङौ स्तोऽसवर्णेऽचि। उवोख। संनिपातपरिभाषया 'इजादेः—' (सू २२३७) इत्याम् न। ऊखतुः। ऊखुः। इह सवर्णदीर्घस्याभ्यासग्रहणेन ग्रहणाद्ध्रस्वः प्राप्तो न भवति। सकृत्प्रवृत्तत्वात्। आङ्ग्स्वाद्वि

शेषः। **त्रयोदशेति**। वल्गादय इति शेषः। तत्र इदित्वान्नुम्। आशीर्लिङि नलोपाभावश्च। **पठन्तीति**। तेषां मते खान्ता एकोनविंशतिरिति बोध्यम्। **ओखतीति**। शपि लघूपधगुणः। लिटि णलः पित्त्वेन कित्त्वाभावात् प्राप्तस्यापि लघूपधगुणस्य 'द्विर्वचनेऽचि' इति निषिद्धतया गुरुमत्त्वाभावादामभावे सति पूर्वं द्वित्वे कृते हलादिशेष पश्चाद् 'वार्णादाङ्गं बलीयः' इति परिभाषया अन्तरङ्गमपि सवर्णदीर्घं बाधित्वा लघूपधगुणे कृते उ ओख् अ इति स्थिते, उवर्णस्य यणि प्राप्ते **अभ्यासस्य**। 'अचि श्नुधातु-' इत्यतः अचीति, य्वोरियङुवङाविति चानुवर्तते। इश्च उश्च यू, तयोरिति विग्रहः। अभ्यासविशेषणमिदं तदन्तविधिः, तदाह **इवर्णोवर्णान्तस्येति**। ङित्त्वादन्तादेशौ। **उवोखेति**। 'अचि श्नुधातु—' इत्यस्य तु नात्र प्राप्तिः, अजादौ प्रत्यये परत एव तत्प्रवृत्तेः, अभ्यासस्य अङ्गत्वाभावाच्च। ननु द्वित्वे कृते लघूपधगुणे सति इजादिगुरुमत्त्वादाम् स्यादित्यत आह **संनिपातेति**। णलि परे विहितगुणसंपन्नमिजादिगुरुमत्त्वमाश्रित्य आमं गुणो न प्रवर्तयति, आमि सति धातोर्णल्परकत्वव्याघातादिति भावः। **ऊखतुरिति**। अपित्त्वेन कित्त्वाद् लघूपधगुणाभावे द्वित्वे हलादिशेषे सवर्णपरकत्वादभ्यासस्यासवर्ण इति इयङभावे सवर्णदीर्घे रूपमिति भावः। ननु ऊखतुरित्यत्र ऊकारस्य सवर्णदीर्घसंपन्नस्य एकादेशतया पूर्वान्तत्वेनाभ्याससंबन्धित्वाद् 'ह्रस्वः' इत्यभ्यासस्याचो विधीयमानो ह्रस्वः प्राप्नोतीत्याशङ्कते **इह सवर्णदीर्घस्य अभ्यासग्रहणेन ग्रहणाद्ध्रस्वः प्राप्त**

असवर्णे किम्, ऊखतुः। अचि किम्, इयाज, उवाय। **उवाखेति**। 'द्विर्वचनेऽचि' इति निषेधात्पूर्वं द्वित्वं पश्चादुकारस्य लघूपधगुणे कृते अभ्यासस्योवङ्। एवमियेषेत्यत्रेयङ्। असवर्णग्रहणसामर्थ्यादियङादौ कर्तव्ये गुणोऽत्र न स्थानिवदिति बोध्यम्। **संनिपातपरिभाषयेति**। आमि सति लिट्परत्वं धातोर्न सिध्येदिति भावः। अन्ये तु—'इजादेः-' इति सूत्रे गुरुमानिति नित्ययोगे मतुप्। ततश्च नित्यं यो गुरुमान् 'एध वृधौ' इत्यादिस्तत्रैव स्यादिति नात्र आमः प्रसक्तिरित्याहुः। ऊखतुरित्यत्र कित्त्वाद् गुणाभावे 'अभ्यासस्यासवर्णे' उवङ् न भवति। ननु इयेष उवोखेत्यत्राप्यन्तरङ्गत्वात्सवर्णदीर्घे कृतेऽच्परत्वाभावादियङुवङौ न स्त इतीष्टरूपासिद्धेः किं तत्रासवर्णग्रहणेनेति चेत्। अत्राहुः—'वार्णादाङ्गं बलीयः' इति परिभाषाज्ञापनार्थमवा-

पर्जन्यवल्लक्षणप्रवृत्त्या ह्रस्वे कृते ततो दीर्घः। 'वार्णादाङ्गं बलीयः' इति न्यायात् परत्वाच्च। उङ्खति। उवाख। ववखतुः। वङ्खति। मेखतुः। (मङ्खति। ममङ्ख।

इति। अथ परिहरति न भवतीति। कुत इत्यत आह सकृत्प्रवृत्तत्वादिति। तदेवोपपादयति आङ्गत्वादिति। उ उखतुरिति स्थिते पर्जन्यवल्लक्षणप्रवृत्त्या अभ्यासह्रस्वे सवर्णदीर्घे ऊखतुरिति स्थितिः। तत्र ऊकारस्य पुनरभ्यासह्रस्वो न भवति। 'लक्ष्ये लक्षणस्य सकृदेव प्रवृत्तिः' इति न्यायादित्यर्थः। (ननु वर्णमात्रापेक्षत्वेन अन्तरङ्गतया प्रथमं सवर्णदीर्घ एव स्यादिति ह्रस्वस्य प्रथमं प्रवृत्तिर्दुरुपपादेत्यत आह वार्णादिति। तथा चानया परिभाषया बहिरङ्गोऽपि ह्रस्व एव प्रथमं प्रवर्तेत इति भावः। परत्वाच्चेति। नन्विदमनुपपन्नम्, उक्तरीत्या अन्तरङ्गं सवर्णदीर्घं प्रति ह्रस्वस्य परत्वकथनानौचित्यादिति चेद् न, परत्वादित्यपरकालप्राप्तिकत्वादित्यर्थात्। अभ्यासविकारेषु परस्परं बाध्यबाधकभावाभावेन युगपदेव) हलादिशेषे ह्रस्वे च कृते पश्चात्प्रवर्तमानस्य सवर्णदीर्घस्य पूर्वं पूर्वमन्तरङ्गं परं परं बहिरङ्गमिति न्यायेन बहिरङ्गत्वादित्यलम्। उङ्खतीति। इदित्वान्नुम्। उवाखेति। वखधातोर्णलि उपधावृद्धिः। ववखतुरिति। वादित्वादेत्वाभ्यासलोपौ न। वङ्खतीति। वखिधातोरिदित्वान्नुम्, ववङ्ख। मेखतुरिति। एत्वाभ्यासलोपौ। मङ्खतीति। मखि-

सवर्णग्रहणं कृतम्। तेन भवतीत्यत्रान्तरङ्गमपि यणं बाधित्वा गुणो भवति। तथा किरोतेर्घञि कार इत्यत्र यणं बाधित्वा वृद्धिर्भवति। न चैवं सिवेरौणादिके नप्रत्यये स्योन इत्यत्र 'च्छ्वोः शूठ्—' इत्यूठि कृते लघूपधगुणं बाधित्वा यण् न स्यादिति वाच्यम्, समानाश्रय एव वार्णादाङ्गस्य बलीयस्त्वात्। इह तु निमित्तभेदेन व्याश्रयत्वमिति। अभ्यासग्रहणेनेति। पूर्वस्यान्तवर्त्त्वेनेत्यर्थः। पर्जन्यवल्लक्षणेति। उपयोगानुपयोगाविचारेण प्रवर्तमानं शास्त्रं ह्रस्वस्थानेऽपि ह्रस्वं प्रवर्तयतीत्यर्थः। तथा चैकस्मिँल्लक्ष्ये लक्षणं सकृदेव प्रवर्तत इति न तस्य पुनः प्रवृत्तिरिति भावः। आङ्गं बलीय इति। नन्वत्र ह्रस्वसवर्णदीर्घयोर्निमित्तभेदात्समानाश्रयत्वाभावे कथमाङ्गस्य बलीयस्त्वमिति चेत्। सत्यम्, इष्टानुरोधेन स्थानिनमादाय क्वचित्समानाश्रयत्वाभ्युपगमात्। अत एवोङ्शब्दे इत्यस्माल्लिटि ऊवे ऊवाते इत्यादीष्टं सिध्यति। उवङः प्राक् सवर्णदीर्घप्रवृत्तौ तन्न सिध्येदिति दिक्। परत्वाच्चेति। आपाततोऽयं हेतुः, ह्रस्वस्याङ्गत्वेन बहिरङ्गत्वादन्तरङ्गं सवर्णदीर्घं प्रति परत्वोपन्यासस्यायुक्तत्वात्। उङ्खतीति। इदित्वान्नुम्। लिटि उङ्खांचकार। आशिषि उख्यात्। ववखतुरिति। वादित्वादेत्वाभ्यासलोपौ न। एखति। इङ्खति, इङ्खांचकार। ईङ्खति, ईङ्खांचकार। इङ्गति, इङ्गांचकार।

१ कोष्ठान्तर्गतः पाठः 'क' पुस्तके नास्ति।

नखति। नङ्खति । रखति । रेखतुः । रङ्खति । एखति । इङ्खति । ईङ्खति । वल्गति । रङ्गति । लङ्गति । अङ्गति । वङ्गति । मङ्गति । तङ्गति। त्वङ्गति । श्रङ्गति । श्लङ्गति । इङ्गति । रिङ्गति । लिङ्गति । रेखति । त्रखति । त्रिङ्खति । शिङ्खति) । त्वगि कम्पने च । युगि १५६ जुगि १५७ बुगि १५८ वर्जने । युङ्गति । घघ १५९ हसने । घघति । जघाघ । मघि १६० मण्डने । मङ्घति । शिघि १६१ आघ्राणे । शिङ्घति ।

अथ चवर्गीयान्ताः । तत्रानुदात्तेत एकविंशतिः । वर्च १६२ दीप्तौ । वर्चते । षच १६३ सेचने सेवने च । सचते । सेचे । सचिता । लोचृ १६४

धातोरिदित्त्वान्नुम् । **ममङ्खेति** । संयुक्तहलमध्यस्थत्वादेत्वाभ्यासलोपौ न । **नखति नङ्खतीति** । 'णो नः' इति नत्वम् । **रखतीति** । णलि तु उपधावृद्धिः, रराख । अतुसादावेत्वाभ्यासलोपौ **रेखतुरित्यादि** । **रङ्खतीति** । इदित्त्वान्नुम् । ररङ्ख । **एखतीति** । इखधातोः शपि लघूपधगुणः । इयेख । ईखतुः । **इङ्खतीति** । इदित्त्वान्नुम्, इङ्खांचकार । **ईङ्खतीति** । अलघूपधत्वान्न गुणः ईङ्खांचकार । **वल्गतीति** । लिटि ववल्ग ववल्गतुः । **रङ्गति लङ्गतीति** । ररङ्गतुः । **अङ्गतीति** । लिटि आनङ्ग । **वङ्गतीति** । लिटि ववङ्ग ववङ्गतुः । **मङ्गतीति** । लिटि ममङ्ग ममङ्गतुः । **तङ्गतीति** । लिटि ततङ्ग ततङ्गतुः । **त्वङ्गतीति** । लिटि तत्वङ्ग तत्वङ्गतुः । **श्रङ्गतीति** । लिटि शश्रङ्ग शश्रङ्गतुः । **श्लङ्गतीति** । लिटि शश्लङ्ग शश्लङ्गतुः । **इङ्गतीति** । लिटि इङ्गांचकार । **रिङ्गतीति** । लिटि रिरिङ्ग रिरिङ्गतुः । **लिङ्गतीति** । लिटि लिलिङ्ग लिलिङ्गतुः । अथ खान्तेषु रिखादिचतुर्णां मतान्तरसिद्धानामुदाहरणमाह **रेखतीति** । शपि लघूपधगुणः । रिरेख रिरिखतुः । **त्रखतीति** । लिटि तत्राख तत्रखतुः । **त्रिङ्खतीति** । लिटि तित्रिङ्ख तित्रिङ्खतुः । **शिङ्खतीति** । लिटि शिशिङ्ख शिशिङ्खतुः । **त्वगि कम्पने चेति** । चाद्गतौ । त्वङ्गति तत्वङ्ग । **युगीति** । त्रयोऽपि इदितः । युङ्गति बुङ्गति जुङ्गति । **घघ हसने इति** । घघति । णलि उपधावृद्धिः, जघाघ जघघतुः । लिण्निमित्तादेशादित्वादेत्वाभ्यासलोपौ न । **मघि मण्डन इति** । इदित्त्वान्नुमित्याह **मङ्घतीति** । ममङ्घ ममङ्घतुः । **शिघि आघ्रण इति** । शिङ्घति शिशिङ्घ । फकादयः पञ्चाशद्गताः ।

वर्च दीप्ताविति । दीप्तिः प्रकाशः । **षच सेचन इति** । अच्परकसादित्वात्

त्वगि कम्पन इति । अयं 'उख उखि' इति दण्डके गतौ पठितस्य गतिविशेषे वृत्तिं बोधयितुं पठ्यते । अतएवानतिप्रयोजनत्वाद्बहुषु पुस्तकेषु न पठितः । **सेवने चेति** । 'यं पूरवो वृत्रहणं सचन्ते' इत्यादौ सेवन्ते इत्यभियुक्तैर्व्याख्यातत्वात् । स्वरितेत्सु षच

दर्शने। लोचते। लुलोचे। शच १६५ व्यक्तायां वाचि। शेचे। श्वच १६६ श्वचि १६७ गतौ। श्वचते। श्वञ्चते। कच १६८ बन्धने। कचते। कचि १६९ काचि १७० दीप्तिबन्धनयोः। चकञ्चे। चकाञ्चे। मच १७१ मुचि १७२ कल्कने। कल्कनं दम्भः शाठ्यं च। कथनम् इत्यन्ये। मेचे। मुमुञ्चे। मचि १७३ धारणोच्छ्रायपूजनेषु। ममञ्चे। पचि १७४ व्यक्तीकरणे। पञ्चते। ष्टुच १७५ प्रसादे। स्तोचते। तुष्टुचे। ऋज १७६ गतिस्थानार्जनोपार्जनेषु। अर्जते। नुड्विधौ ऋकारैकदेशौ रेफो हल्त्वेन गृह्यते। तेन द्विहल्त्वान्नुट्। आनृजे। ऋजि १७७ भृजी १७८ भर्जने। ऋञ्जते। 'उपसर्गादृति–' (सू ७४) इति वृद्धिः। प्रार्ञ्जते। ऋञ्जाञ्चक्रे। आर्ञ्जिष्ट। भर्जते। बभृजे। अभर्जिष्ट। एजृ १७९ भ्रेजृ

षोपदेशोऽयम्। स्वरितेत्सु 'षच समवाये' इति वक्ष्यते। सेच इति। सत्वस्य लिङ्निमित्तत्वाभावादादेशादित्वेऽपि एत्वाभ्यासलोपौ। दम्भः शाठ्यं चेति। परविस्रम्भार्थं धर्माद्याचरणं दम्भः कापट्यापरपर्यायः। 'कपटोऽस्त्री व्याजदम्भोपधयः' इत्यमरः। शाठ्यं कुटिलीभावः। 'निकृतस्त्वनृजुः शठः' इत्यमरः। पचि व्यक्तीकरण इति। 'पचि विस्तारे' इति चुरादौ वक्ष्यते। ष्टुच प्रसाद इति। ष्टुत्वसंपन्नः टकारः। ततश्च दन्त्यपरकसादित्वात् षोपदेशोऽयम्। स्तोचत इति। षस्य सत्वे सति ष्टुत्वं निवर्तत इति भावः। तुष्टुच इति। 'शर्पूर्वाः खयः' इति तकारशेषः। आदेशसकारत्वात् षत्वम्। ऋज गतीति। अर्जनं संपादनम्। उपार्जनं सेवनम्। अर्जत इति। शपि लघूपधगुणे रपरत्वम्। नुड्विधाविति। वार्तिकमिदम्। आनृज इति। लिटः 'असंयोगात्–' इति कित्त्वाद् गुणाभावे द्वित्वे उरदत्वे रपरत्वे हलादिशेषे 'अत आदेः' इति दीर्घे नुडिति भावः। ऋजि भृजी इति। ऋदुपधौ द्वौ। आद्य इदित्। द्वितीयस्य ईदित्त्वात् 'श्वीदितो निष्ठायाम्' इति नेट्। इदित्त्वान्नुम्। अनुस्वारपरसवर्णौ। ऋञ्जाञ्चक्र इति। नुमि सति 'संयोगे गुरु' इति ऋकारस्य गुरुत्वाद् 'इजादेश्च–' इत्याम्। ऋञ्जिता।

समवाय इति वक्ष्यते। लोचृ। ऋदित्त्वाद् 'नाग्लोपि–' इति ह्रस्वनिषेधः अलुलोचत्। 'पचि व्यक्तीकरणे'। 'पचि विस्तारवचने' इति चुरादौ। ऋज गति। अर्जनं प्राधान्येन, उपार्जनं तु प्रासङ्गिकम्। नुड्विधावित्यादि। 'नुड्विधिलादेशविनामेषु तु प्रतिविधेयम्' इति वचनान्नुडादिविधिषु वर्णैकदेशस्य वर्णत्वेन ग्रहणादिति भावः। यद्वा द्विहल्ग्रहणं भाष्यादौ प्रत्याख्यायते। न च आट आटतुरित्यत्रातिप्रसङ्गः। 'अश्नोतेश्च–' इत्यनेन अवर्णोपधस्य यदि भवति तर्ह्यश्नोतेरेवेति नियमात्सिद्धमिष्टमित्यन्यत्र विस्तरः। ऋजिभृजी। भर्जनं जलं विना तण्डुलादेः संतापविशेषः।

१८० अर्जृ १८१ दीप्तौ। एजांचक्रे। ईज १८२ गतिकुत्सनयोः। ईजांचक्रे।

अथ द्विसप्ततिर्वजयन्ताः परस्मैपदिनः। शुच १८३ शोके। शोचति। कुच १८४ शब्दे तारे। कोचति। कुञ्च १८५ क्रुञ्च १८६ कौटिल्याल्पीभावयोः। 'अनिदिताम्–' (सू ४१५) इति नलोपः। कुच्यात्। क्रुच्यात्। लुञ्च १८७

अर्जिष्यते। अर्जताम्। आर्जत। अर्जेत। अर्जिषीष्ट। अथ लुङि रूपं दर्शयति **आर्जिष्टेति**। लुङः तादेशः, च्लिः, सिच्, इट्, लघूपधत्वाभावान्न गुणः। आट्, वृद्धिः, षत्वम्, ष्टुत्वम्, लृङि आर्जिष्यत। **भर्जत इति**। शपि लघूपधगुणः, रपरत्वम्। बभृजे। भर्जिता। भर्जिष्यते। भर्जताम्। अभर्जत। भर्जेत। भर्जिषीष्ट। लुङि रूपमाह **अभर्जिष्टेति**। लुङस्तादेशः, च्लिः, सिच्, इट्, गुणः, रपरत्वम्, अडागमः षत्वं ष्टुत्वम्। लृङि अभर्जिष्यत। **एजृ भ्रेजृ भ्राजृ इति**। आद्ययोः, ऋदित्वम् 'नाग्लोपि–' इत्यर्थम्। तृतीयस्य तु अकारेत्त्वेऽप्यात्मनेपदं सिध्यति। ऋदित्वस्य न किञ्चित्फलमस्ति। न च 'नाग्लोपि–' इति चङ्परे णौ उपधाह्रस्वः फलं भवितुमर्हति, 'भ्राजभास–' इत्यादिना तत्र उपधाह्रस्वविकल्पस्य वक्ष्यमाणत्वात्। **ईज गतीति**। अलघूपधत्वान्न गुणः। ईजते। **ईजांचक्र इति**। 'इजादेश्च–' इत्याम्। वर्चादय एकविंशतिर्वृत्ताः। **द्विसप्ततिरिति**। चवर्गीयान्ता इति शेषः। **शुच शोक इति**। स्मृत्वा क्लेशः शोकः। **शोचतीति**। वियुक्तं पित्रादिकं स्मृत्वा क्लिश्नातीत्यर्थः। **कुच शब्द इति**। शब्दनं शब्दः। चुकोच चुकुचतुः। अकोचीत्। **कुञ्च क्रुञ्चेति**। उभावपि चवर्गपञ्चमोपधौ। कुञ्चतौ अनुस्वारपरसवर्णसंपन्नस्य नकारस्थानिकञकारस्य धातुपाठे निर्देशः। धातुपाठे 'नकारजावनुस्वारपञ्चमौ' इत्यभियुक्तवादात्, तदाह **अनिदितामिति**। अनुस्वारपरसवर्णयोरसिद्धतया नकारस्य सत्त्वेन आशीर्लिङि 'अनिदिताम्–' इति लोपे कुच्यादिति रूपमित्यर्थः। लिटि तु चुकुञ्च चुकुञ्चतुः इत्यादौ पित्त्वेन संयोगात्परत्वेन च कित्त्वाभावान्नलोपो न भवति। क्रुञ्चधातुस्तु स्वाभाविकञकारोपध एव। न त्वनुस्वारपरसवर्णसंपन्नञकारोपध इति 'परेश्च घाङ्कयोः' इति सूत्रे भाष्यकैयटयोः स्थितम्। अतस्तस्याशीर्लिङि अनिदितामिति नलोपस्य न प्रसक्तिरित्यभिप्रेत्योदाहरति **क्रुञ्च्यादिति**। ञकाररहितपाठस्तु प्रामादिक इति शब्देन्दुशेखरे स्थितम्। **लुञ्चेति**। अयमपि नोपधः। अनुस्वारपरसवर्णसंपन्नस्य ञकारस्य निर्देशः। तथा च आशीर्लिङि अनिदितामिति

इदित्त्वात् 'श्वीदितो निष्ठायाम्' इति नेट्। मृक्तः। मृक्तवान्। **एजृ भ्रेजृ भ्राजृ**। भ्राजेर्ऋदित्करणमनुदात्तेत्त्वमात्रफलम्। 'भ्राजभास–' इत्यादिना चङ्परे णौ उपधाह्रस्वस्य विकल्पितत्वात्। अबिभ्रजत्, अबभ्राजत्। **परस्मैपदिन इति**। चवर्गी-

अपनयने। लुच्यात्। अञ्चु १८८ गतिपूजनयोः। अच्यात्। गतौ नलोपः। पूजायां तु अञ्च्यात्। वञ्चु १८९ चञ्चु १९० तञ्चु १९१ त्वञ्चु १९२ म्रुञ्चु १९३ म्लुञ्चु १९४ म्रुचु १९५ म्लुचु १९६ गत्यर्थाः। वच्यात्। चच्यात्। तच्यात्। त्वच्यात्। अम्रुञ्चीत्। अम्लुञ्चीत्। **२२६१ जॄस्तम्भुम्रुचुम्लुचुग्रुचुग्लुचुग्लुञ्चुश्विभ्यश्च। (३-१-५८)** एभ्यश्च्लेरङ् वा स्यात्। अम्रुचत्, अम्रोचीत्। अम्लुचत्, अम्लोचीत्। ग्रुचु १९७ ग्लुचु १९८ कुजु १९९ खुजु २०० स्तेयकरणे। जुग्रोच। अग्रुचत्, अग्रोचीत्। जुग्लोच। अग्लुचत्, अग्लोचीत्। अकोजीत्। अखोजीत्। ग्लुञ्चु २०१ षस्ज २०२ गतौ। लुङि अङ् वा। अग्लुचत्, अग्लुञ्चीत्। सस्य श्चुत्वेन शः, तस्य जश्त्वेन जः, सज्जति। अयमात्मनेपद्यपि, सज्जते। गुजि २०३ अव्यक्ते शब्दे। गुञ्जति। गुञ्ज्यात्।

नलोपः, तदाह **लुच्यादिति**। एवमञ्चुधातोरपि द्रष्टव्यम्। **पूजायां त्विति**। 'नाञ्चेः पूजायाम्' इति निषेधादिति भावः। **वञ्चु चञ्चु तञ्चु इति**। आद्याः षड् नोपधाः। अनुस्वारपरसवर्णाभ्यां ञकारनिर्देशः। तथा च तेषामाशीर्लिङि अनिदितामिति नलोपः, तदाह **वच्यादिति**। लुङि अम्रुञ्चीत् अम्लुञ्चीदिति नोपधयो रूपम्। सिज्लोपः। **जॄस्तम्भु**। 'च्लेः सिच्' इत्यतः च्लेरिति, 'अस्यति वक्तिख्यातिभ्यः–' इत्यतः अङिति, 'इरितो वा' इत्यतः वेति चानुवर्तते। तदाह **एभ्यश्च्लेरङ् वेति**। 'जॄष् वयोहानौ', स्तम्भुः सौत्रो धातुः, 'म्रुचुम्लुचू गत्यर्थौ', 'ग्रुचु ग्लुचु स्तेयकरणे' 'ग्लुञ्चु गतौ' इत्येतेभ्य इत्यर्थः। **अम्रुचदिति**। च्लेरङि सति ङित्त्वान्न लघूपधगुणः। **अम्रोचीदिति**। अङभावे 'इट ईटि' इति सिज्लोपः। **ग्रुचु ग्लुचु इति**। 'जॄस्तम्भु–' इति अङ् वेत्याह **अग्रुचत्, अग्रोचीदिति**। आद्यस्य रूपे। अथ द्वितीयस्य अङ्विकल्पमुदाहरति **अग्लुचत्, अग्लोचीदिति**। अङि सति ङित्त्वान्न लघूपधगुणः। अङभावे सिज्लोपः। **ग्लुञ्चु षस्जेति**। आद्यो नोपधः, द्वितीयस्तु षोपदेशः, अच्परकसादित्वात्। तत्र आद्यस्य लुङि विशेषमाह **अङ् वेति**। 'जॄस्तम्भु–' इत्यनेनेति शेषः। ग्लुचुग्लुञ्च्वोः पृथग्ग्रहणसामर्थ्याद् नलोपो नेति वृत्तिकृत्। अग्लुचत्। **सस्येति**। धात्वादेः सत्वे सस्ज् इति स्थिते, द्वितीयस्य सकारस्य श्चुत्वेन शकार इत्यर्थः। **तस्येति**। शकारस्य 'झलां जश् झशि' इति जकार इत्यर्थः। **गुजीति**। इदि-

---

यान्ताः परस्मैपदिनः। **पूजायां त्विति**। 'नाञ्चेः पूजायाम्' इति निषेधादिति भावः। **जॄस्तम्भु**। स्तम्भुः सौत्रः। अजरत्, अजारीत्। अस्तभत्, अस्तम्भीत्। अश्वत्।

अर्च २०४ पूजायाम्। आनर्च। म्लेच्छ २०५ अव्यक्ते शब्दे। अस्फुटेऽपशब्दे चेत्यर्थः। म्लेच्छति। मिम्लेच्छ। लछ २०६ लाछि २०७ लक्षणे। ललच्छ। ललाञ्छ। वाछि २०८ इच्छायाम्। वाञ्छति। आछि २०९ आयामे। आञ्छति। 'अत आदेः' (सू २२४८) इत्यत्र तपरकरणं स्वाभाविकह्रस्वपरिग्रहार्थम्, तेन दीर्घाभावान्न नुट्, आञ्छ। तपरकरणं मुखसुखार्थमिति मते तु नुट्, आनाञ्छ। ह्रीच्छ २१० लज्जायाम्। जिह्रीच्छ। हुर्छा २११ कौटिल्ये। कौटिल्यमपसरणम् इति मैत्रेयः। 'उपधायां च' (सू २२६९) इति दीर्घः। हूर्छति। मुर्छा २१२ मोहसमुच्छ्राययोः। मूर्छति। स्फुर्छा २१३ विस्तृतौ। स्फूर्छति। युच्छ २१४ प्रमादे। युच्छति। उछि २१५ उञ्छे। 'उञ्छः कणश आदानं कणिशाद्यर्जनं शिलम्।' इति यादवः। उञ्छति। उञ्छांचकार। उच्छी

त्वादाशीर्लिङि नलोपो नेत्याह **गुञ्ज्यादिति**। **अर्चेति**। लिटि 'तस्मान्नुड्द्विहलः' इति नुटं मत्वाह **आनर्चेति**। म्लेच्छेत्यादि स्पष्टम्। तुकि लच्छतीति रूपम्। ललच्छ ललच्छतुः। **आञ्छीति**। लिटि णलि द्वित्वे हलादिशेषे अभ्यासह्रस्वे अ आञ्छ् अ इति स्थिते 'अत आदेः' इति दीर्घे 'तस्मान्नुड्द्विहलः' इति च नुटमाशङ्क्याह **अत आदेरिति**। तत्र हि दीर्घस्याकारस्य दीर्घविधौ प्रयोजनाभावादेव ह्रस्वाकारस्य दीर्घ इति सिद्धौ अत इति तपरकरणं स्वाभाविकस्यैव ह्रस्वाकारस्य परिग्रहार्थमित्यर्थः। ततः किमित्यत आह **तेनेति**। 'अत आदेः' इति दीर्घविधौ स्वाभाविकह्रस्वाकारस्यैव ग्रहणेन 'अत आदेः' इति दीर्घस्याभावान्न नुडित्यर्थः। **आञ्छेति**। द्वित्वे हलादिशेषे अभ्यासह्रस्वे सवर्णदीर्घ इति भावः। **मुखसुखार्थमिति**। तथा च ह्रस्वस्थानिकदीर्घाकारादपि परस्य नुड् भवत्येवेति भावः। ह्रीच्छ लज्जायामित्यादि स्पष्टम्। **युच्छ प्रमाद इति**। यकारादिरुदुपधोऽयम्। **युच्छतीति**। अन्तरङ्गत्वात् 'छे च' इति तुकि लघूपधत्वाभावाद् न गुणः। युयुच्छ। युयुच्छतुः। **उछि उञ्छ इति**। अयमप्युदुपधः। **उञ्छतीति**। इदित्वान्नुमि अलघूपधत्वान्न गुणः। **उञ्छाञ्चकारेति**। नुमि कृते 'संयोगे गुरु' इत्युकारस्य

अश्वताम्। अश्वन्। अश्वयीत्। 'विभाषा धेट्श्व्योः' इति चङि अशिश्वियत्। **'अर्च पूजायाम्'**। अयं पूजादौ स्वरितेत्। इह पाठस्तु कर्तृगेऽपि फलं परस्मैपदार्थः। **दीर्घाभावादिति**। स्वाभाविकह्रस्वस्थानिकदीर्घाभावादित्यर्थः। **मुखसुखार्थमिति**। कृतह्रस्वस्थानिकदीर्घाकारात्परस्यापि नुड् भवत्येवेति भावः। 'युच्छ प्रमादे'। **युच्छतीति**। अन्तरङ्गत्वात् 'छे च' इति तुकि लघूपधत्वाभावान्न गुणः। न च वार्णादाङ्गं बलीय इति वाच्यम्, आङ्गवार्णयोर्युगपत्प्रवृत्तावेव आङ्गस्य बलीयस्त्वात्। न च

२१६ विवासे । विवासः समाप्तिः । प्रायेणायं विपूर्वः । व्युच्छति । धृज २१७ धृजि २१८ ध्रज २१९ ध्रजि २२० ध्वज २२१ ध्वजि २२२ गतौ । धर्जति । धृञ्जति । ध्रजति । ध्रञ्जति । ध्वजति । ध्वञ्जति । कूज २२३ अव्यक्ते शब्दे । चुकूज । अर्ज २२४ षर्ज २२५ अर्जने । अर्जति । आनर्ज । सर्जति । ससर्ज । गर्ज २२६ शब्दे । गर्जति । तर्ज २२७ भर्त्सने । तर्जति । ततर्ज । कर्ज २२८ व्यथने । चकर्ज । खर्ज २२९ पूजने च । चखर्ज । अज २३० गतिक्षेपणयोः । अजति । **२२९२ अजेर्व्यघञपोः । (२-४-५६)** अजेर्वी इत्ययमादेशः स्यादार्धधातुकविषये घञमपं च वर्जयित्वा । 'वलादावार्धधातुके वेष्यते' विवाय

गुरुत्वाद् 'इजादेश्च–' इत्यामिति भावः । **धृजेति** । आद्यौ ऋदुपधौ । इतरे चत्वारः अदुपधाः । द्वितीयचतुर्थषष्ठा इदितः । **धर्जतीति** । शपि लघूपधगुणो रपरत्वम् । दधर्ज दधृजतुः । धृज्यात् । अधर्जीत् । **धृञ्जतीति** । इदित्त्वान्नुम् । दधृञ्ज । इदित्त्वान्नलोपो न, धृञ्ज्यात् । अधृञ्जीत् । **ध्रजतीति** । णलि दध्राज । दध्रजतुः । अध्राजीत्, अध्रजीत् । **ध्रञ्जतीति** । अदुपधोऽयम् । दध्रञ्ज । इदित्त्वान्नलोपो न, दध्रञ्जतुः । **ध्वजतीति** । दध्वाज । **ध्वञ्जतीति** । दध्वञ्ज । **कूज अव्यक्त इति** । स्पष्टम् । सर्जतीत्यत्र षोपदेशत्वात् सत्वम् । **अज गतीति** । लटि अजतीत्यादि सिद्धवत्कृत्य लिटि विशेषमाह **अजेर्व्यघञपोः** । वी इति दीर्घान्तं लुप्तप्रथमाकम् । 'आर्धधातुके' इत्यधिकृतम् । विषयसप्तम्येषा, नतु परसप्तमी । व्याख्यानात् । तदाह **आर्धधातुकविषय इत्यादि** । अजेरिति इका निर्देशः, अजधातोरित्यर्थः । आर्धधातुक इति परसप्तम्याश्रयेण तु वेवीयत इति न स्यात्, वीभावात्प्राग् अजादित्वाद् यङसंभवात् । विषयसप्तम्याश्रयणे तु यङि विवक्षिते वीभावे सति हलादित्वाद्यङ् निर्बाधः । 'अघञपोः' किम् ? घञि समाजः । 'समुदोरजः पशुषु' इत्यपि समजः । अत्र अघञोरिति न वक्तव्यम् , 'वा लिटि' इत्यतो वेत्यनुवर्तते । व्यवस्थितविभाषेयम् । घञि अपि च न भवति । ल्युटि वलादावार्धधातुके च विकल्पः । अन्यत्र तु आर्धधातुके नित्यमिति भाष्यकैयटयोः स्थितम् , तदाह **वलादावार्धधातुके वेष्यत इति** । उक्तव्यवस्थितविभाषोपलक्षणमिदम् ।

युच्छेति चकारछकारावुच्चार्येतां किमनेन तुग्विधिनेति शङ्क्यम् , बहुषु धातुरूपेषु चकारछकारयोरुच्चारणे गौरवात् , 'छे च' इत्यस्य शिवच्छायेत्यादावावश्यकत्वाच्च । **अजेर्व्य** । वी इति च्छेदः । तेन संवीतः संवीतिरित्यादि सिध्यति । **आर्धधातुकविषय इति** । तेन वीभावोत्तरं यङि वेवीयते इत्यादि सिध्यति, परसप्तम्यां तु हलादित्वाभावाद्यङ् न स्यादिति भावः । यङ्लुक् तु अस्मान्न भवति । लुका यङोऽपहारे

---

१ संयोगात् परत्वात् कित्त्वाभावादित्युचितम् ।

विव्यतुः विव्युः। अत्र वकारस्य हल्परत्वाद् 'उपधायां च' (सू २२६२) इति दीर्घे प्राप्ते 'अचः परस्मिन्–' (सू ५०) इति स्थानिवद्भावेनाच्परकत्वम्। न च 'न पदान्त–' (सू ५१) इति निषेधः। 'स्वरदीर्घयलोपेषु लोपाजादेश एव न स्थानिवत्' इत्युक्तेः। थलि 'एकाचः–' (सू २२४६) इतीण्निषेधे प्राप्ते।

२२६३ कृसृभृवृस्तुद्रुस्रुश्रुवो लिटि। (७–२–१३) एभ्यो लिट इण्न

विवायेति। लिटो णलि विवक्षिते वीभावे सति णलि द्वित्वे अभ्यासहस्वे 'अचो ञ्णिति' इति वृद्धौ आयादेश इति भावः। **विव्यतुरिति**। वीभावे सति अतुसि द्वित्वे अभ्यासहस्वे 'असंयोगात्–' इति कित्वाद् गुणाभावे इयङ्त्वादे 'एरनेकाचः–' इति यणि रूपम्। एवम् उसि विव्युरिति रूपम्। ननु विव्यतुः विव्युरित्यत्र द्वितीय-वकारस्य यकारात्मकहल्परकत्वाद् 'उपधायां च' इति इकारस्य दीर्घः स्यादित्याशङ्क्य ईकारस्थानिकस्य यकारस्य 'अचः परस्मिन्–' इति स्थानिवत्त्वेन द्वितीयवकारस्य हल्परकत्वाभावात् तस्मिन्वकारे परे इकारस्य न दीर्घ इति परिहरति **अत्र वकारस्ये-त्यादि अच्परकत्वमित्यन्तम्**। ननु दीर्घविधौ 'न पदान्त–' इति निषेधात्कथ-मिह यकारस्य स्थानिवत्त्वमित्याशङ्क्य निराकरोति **न च न पदान्तेति निषेध इति**। शङ्क्य इति शेषः। कुत इत्यत आह **स्वरदीर्घेति। इत्युक्तेरिति**। वार्तिककृतेति शेषः। **थलि एकाच इति**। अजधातोरनुदात्तोपदेशानन्तर्भावेऽपि वी इति तदादेशोऽनुदात्तः अजन्तेषु ऊदृदन्तादिचतुर्दशभिन्नधातूनामनुदात्तत्वाभ्युप-गमादिति भावः। **कृसृ**। कृ सृ भृ वृ स्तु द्रु स्रु श्रु इत्यष्टानां समाहारद्वन्द्वात्पञ्चमी। लिटीति षष्ठ्यर्थे सप्तमी। 'नेड्वशिकृति' इत्यतो नेति इडिति चानुवर्तते। तदाह **एभ्य इति**। ननु 'एकाच उपदेशेऽनुदात्तात्' इति 'श्र्युकः किति' इति च सिद्धे

आर्धधातुकविषयत्वाभावान्नार्धधातुकाभिव्यक्तिरिति वीभावस्यैवासक्तेः। एतच्च 'न लुमता–' इति सूत्रे कैयटे स्पष्टम्। अघञपोः किम्, समाजः। 'समुदोरजः पशुषु' इत्यप्। समजः। उदजः। **विव्यतुरिति**। 'एरनेकाचः–' इति यण्। **लोपाजा-देश एवेति**। एतच्च 'न पदान्त–' इति सूत्र एवास्माभिरुपपादितम्। **एकाच इतीति**। अजेरुदात्तत्वेऽपि वीभावोऽनुदात्तः, ऊदृदन्तादिभिन्ना एकाचोऽजन्ताः, सर्वेऽप्यनुदात्ता इत्यभ्युपगमात्। **कृसृभृ**। 'डुकृञ् करणे'। 'कृञ् हिंसायाम्'। इह निरनुबन्धग्रहणादेकानुबन्धद्व्यनुबन्धयोरुभयोर्ग्रहणम्। एवमग्रेऽपि 'भृञ् भरणे', 'डुभृञ् धारणपोषणयोः' इत्युभयोर्ग्रहणम्। 'सृ गतौ'। 'वृङ् सम्भक्तौ'। 'वृञ् वरणे'। इह निरनुबन्धकग्रहणाद्भिन्नानुबन्धयोरप्युभयोर्ग्रहणम्। कृ सृ भृ एषामनुदात्तत्वाद् 'एकाच उपदेश–' इति प्रकृत्याश्रये निषेधे प्राप्ते वृङ्वृञोस्तूदात्तत्वात् 'श्र्युकः किति'

स्यात् । क्रादीनां चतुर्णां ग्रहणं नियमार्थम् । प्रकृत्याश्रयः प्रत्ययाश्रयो वा यावानिण्निषेधः स क्रिटि चेत्तर्हि क्रादिभ्य एव नान्येभ्य इति । ततश्चतुर्णां थलि भारद्वाजनियमप्रापितस्य वमादिषु क्रादिनियमप्रापितस्य चेटो निषेधार्थम् ।

किमर्थमिदं सूत्रमित्यत आह **क्रादीनामिति** । कृ सृ भृ वृ इत्येतेषामित्यर्थः । नियमस्वरूपमाह **प्रकृत्याश्रय इत्यादि** । कृ सृ भृ इत्येषां त्रयाणाम् अनुदात्तोपदेशान्तर्भूतानाम् 'एकाच उपदेशे–' इति यः प्रकृत्याश्रयो निषेधः, यश्च वृधातोः 'श्र्युकः किति' इति प्रत्ययाश्रयो निषेधः, तदुभयमपि यदि लिटि स्यात् तर्हि कृसृभृवृ इत्येभ्य एव परस्य लिटो भवति, न तु तदन्येभ्यः परस्येत्यर्थः । तेन बिभिदिव बिभिदिमेत्यादौ 'एकाच उपदेशे–' इति निषेधः, बभूविव बभूविमेत्यादौ 'श्र्युकः किति' इति निषेधश्च न भवति । अथ स्तुद्रुस्रुश्रुवां ग्रहणस्य प्रयोजनमाह **तत इति।** अन्येषामिति शेषः । **चतुर्णामिति ।** ग्रहणमिति शेषः । ततः तेभ्यः कृसृभृवृ इत्येभ्यः अन्येषां स्तुद्रुस्रुश्रुवां ग्रहणं थलि तुष्टोथ दुद्रोथ सुस्रोथ शुश्रोथ इत्यत्र 'ऋतो भारद्वाजस्य' इति वक्ष्यमाणेन ऋदन्तस्यैव थलि नेट्, अन्यस्य तु स्यादेवेति नियमेन प्राप्तस्य इटो निषेधार्थम् । तथा तुष्टुव तुष्टुमेत्यादौ 'कृसृभृवृ–' इत्युक्तेन क्रादिभ्य एव परस्य लिट इण्निषेधः, अन्येभ्यस्तु परस्य इट् स्यादेवेति नियमेन प्राप्तस्य इटो निषेधार्थं चेत्यर्थः । तदेवम् अजेः थलि वीभावे 'एकाचः–' इति निषेधाभावादिडागमो निर्बाध इति स्थितम् । अथ तस्य थलि इडागमस्य भारद्वाजनियमाद्विकल्पं वक्ष्यन्

इति प्रत्ययाश्रये निषेधे प्राप्ते नियमोऽयमित्याह **क्रादीनां चतुर्णामिति** । इह स्तुद्र्वादीनां चतुर्णां ग्रहणस्य भारद्वाजनियमप्रापितनिषेधोऽपि प्रयोजनमिति बोधयितुमष्टानां ग्रहणमिति नोक्तम् । **इण्निषेध इति** । 'नेड्वशि–' इति प्रकमाज्ञापादितस्यैवाभावस्य नियमो न तु विभाषाबललभ्यस्यापि । 'अनन्तरस्य–' इति न्यायादपि संनिहितस्यैव नियम उचितः । तेन सिषेधिथ, सिषेद्ध । सिषिधिव, सिषिध्व इत्याद्युभयं भवति । **नान्येभ्य इति** । तेन पेचिव, बभूविवेत्यादि सिद्धम् । न चैवं क्रादिनियमेनैव 'नेड् वशि कृति' इति निषेधस्याप्यप्रवृत्तौ सेदिवान् अत्तिवानित्यादि सिध्यत्येवेति 'वस्वेकाजाद्घसाम्' इतीड्विधानं किमर्थमिति शङ्क्यम् , तस्य नियमार्थत्वेन व्याख्यास्यमानत्वात् । अन्यथा बभूवानित्यत्रापीडागमः स्यादिति । नन्विह क्रादिभ्यश्चेदिण् न स्यात्तर्हि लिट्येवेति विपरीतनियमः किं न स्यात् । तथा च कर्ता अकार्षीदित्यादाविडागमः स्यादिति चेत् । मैवम् , 'कृते ग्रन्थे' 'तमधीष्टो भृतः–' 'परिवृतो रथः' इत्यादिनिर्देशविरोधापत्तेः । **वमादिष्विति** । आदिशब्देन सेध्वेवहिमहीनां ग्रहणम् । तुष्टुवे, तुष्टुध्वे, तुष्टुवहे, तुष्टुमहे इत्यादि । स्यादेतत्—अस्तु प्रकृत्या-

२२६४ अचस्तास्वत्थल्यनिटो नित्यम्। (७-२-६१) उपदेशेऽजन्तो यो धातुः तासौ नित्यानिट् ततः परस्य थल इण्न स्यात्। **२२६५ उपदेशेऽत्वतः।**

तदुपयोगित्वेन सूत्रद्वयमुपन्यस्यति **अचस्तास्वत्** । अधातोस्थलोऽभावाद्धातोरिति लभ्यते। अच इति तद्विशेषणम्। तदन्तविधिः। 'उपदेशेऽत्वतः' इत्युत्तरसूत्रादुपदेश इत्यपकृष्यत इति 'ऋतो भारद्वाजस्य' इति सूत्रभाष्ये स्थितम्। उपदेशे अजन्तादित्यन्वयः। अनिट इति बहुव्रीहेः पञ्चमी। नित्यमिड्विहीनादित्यन्वयः। 'तासि च क्लृपः' इत्यतस्तासीत्यनुवर्तते। तासौ नित्यमनिट इत्यन्वयः। थलीति षष्ठ्यर्थे सप्तमी। 'गमेरिट् परस्मैपदेषु' इत्यत इडिति, 'न वृद्भ्यश्चतुर्भ्यः' इत्यतो नेति चानुवर्तते। तास्वदिति सप्तम्यन्ताद् वतिः, तदाह **उपदेशे योऽजन्त इत्यादि इण्न स्यादित्यन्तम्**। तास्वदिति शेषः। यथा तासि नेट् तथा थल्यपि नेड् इत्यर्थः। चिचेथ जुहोथेत्याद्युदाहरणम्। अत्र क्रादिनियमप्राप्त इण्न

श्रयनिषेधस्य नियमः, प्रत्ययाश्रयस्य तु न संभवति। वृग्रहणस्य ववर्थेत्यत्राप्राप्तनिषेधप्रापकत्वात्। न ह्यत्र प्रत्ययाश्रयो निषेधः प्राप्नोति थलोऽकित्त्वात्। नापि प्रकृत्याश्रयः, वृञ उदात्तत्वात्। न चैवमपि वृङो नियमार्थत्वमस्त्विति वाच्यम्, तस्य विशिष्याग्रहणात्। यद्यपि विशिष्य ग्रहणं वृञोऽपि नास्ति, तथाप्यप्राप्तनिषेधप्राप्तिफलकत्वाद् वृ इति वृञ एव ग्रहणं भवेत्, विधिनियमयोर्विधिरेव ज्यायानिति न्यायात्। एवं च बभूविवेत्यादौ 'श्र्युकः किति' इतीण्निषेधो दुर्वार इति चेत्। अत्राहुः—'बभूथाततन्थजगृभ्मववर्थ–' इति सूत्रेण छन्दसि ववर्थेति निपातनाद्भाषायां वृञस्थल इटः स्वीकर्तव्यतया वृग्रहणस्य थल्विषयत्वायोगाद्बभादीनां च कित्त्वेन नियमस्य सुस्थत्वादिति। **अचस्तास्वत्**। उत्तरसूत्रादुपदेश इत्यपकृष्यते, तच्चाजन्तस्य विशेषणमित्याह **उपदेशेऽजन्त इति**। धातुरित्याक्षेपाल्लभ्यते। न ह्यधातोस्थल् संभवति। नित्यग्रहणमनिटो विशेषणम्। क नित्यमनिडित्यपेक्षायां संनिधानात्तासावेवेति विज्ञायते। 'तासि च क्लृपः' इति सन्निहितं वाऽनुवर्तते। 'न वृद्भ्यः–' इत्यस्मान्नेत्यनुवर्तते, तदाह **तासौ नित्यानिट्, ततः परस्येति**। तासाविव तास्वदिति सप्तम्यन्ताद्वतिः। यथा तासौ न भवति एवं थल्यपीत्यर्थः। अच इति किम्, बिभेदिथ। रुरोदिथ। उपदेशे इति किम्, जहर्थ। इह परत्वान्नित्यत्वाच्च गुणे रपरत्वे च कृते अजन्तत्वाभावादेतस्याप्रवृत्ताविट् प्रसज्येतेत्युपदेशे इत्युक्तम्। थलीति किम्, पपिव पपिम। नित्यमनिटः किम्, सस्वरिथ, सस्वर्थ। नायं तासौ नित्यमनिट्। 'स्वरतिसूति–' इति विकल्पितेट्त्वात्। इह तासीति नेति चानुवृत्त्यैवेष्टसिद्धेस्तास्वदित्येतन्नातीवोपयुज्यत इति केचित्। अन्ये तु—यस्य तासौ विद्यमानत्वं तस्मादेव परस्य थल इण्निषेध इत्ये-

(७-२-६२) उपदेशेऽकारवतस्तासौ नित्यानिटः परस्य थल इण्न स्यात्।
२२९६ **ऋतो भारद्वाजस्य।** (७-२-६३) तासौ नित्यानिट ऋदन्तादेव

भवति। 'अजन्तात्' किम्? बिभेदिथ। 'उपदेशे' इति किम्? हृञ् जहर्थ। इह गुणे रपरत्वे अजन्तत्वाभावादिण्निषेधो न स्यादित्युपदेशग्रहणम्। नित्यग्रहणं किम् स्वृ गतौ, सस्वरिथ। स्वरतिसूतीति तासौ विकल्पितेट्कत्वान्न निषेधः। 'तासौ' किम्? लूत्वा लुलविथ। 'थलः' किम्? पपिव पपिम। इह तासीत्यनुवृत्त्यैव सिद्धेः 'तास्वत्' इति नातीवोपयुज्यत इति केचित्। वस्तुतस्तु यस्तासौ विद्यते तस्मादेव परस्य थल इण्निषेधार्थं तास्वदित्यावश्यकम्। तेन 'लिट्यन्यतरस्याम्' इत्यदो घस्लृभावे जघसिथेत्यत्र न निषेधः, घसस्तासावभावादिति 'अद भक्षणे' इति धातौ मूल एव वक्ष्यते। यस्तासावस्ति अनिट् चेति भाष्यम्। एवं वेञो वयादेशेऽपि। **उपदेशेऽत्वतः**। अत्वत इति च्छेदः। अत्-ह्रस्वाकारः, सः अस्य अस्तीति अत्वान् 'तसौ मत्वर्थे' इति भत्वान्न जश्त्वम्। अच इति वर्जं पूर्वसूत्रम्, तत्र यदनुवृत्तं तदप्यनुवर्तते, तदाह **उपदेशे अकारवत इति**। शक्लृ शशकथ, पच पपक्थेत्युदाहरणम्। अत्र क्रादिनियमप्राप्त इण्न भवति। 'उपदेशे' किम्? 'कृष विलेखने', चकर्षिथ। 'अत्वतः' इति किम्? बिभेदिथ। 'तपरः' किम्? रराधिथ। 'तासौ' किम्? जग्रहिथ। जिघृक्षतीत्यत्र 'सनि ग्रहगुहोश्च' इति सनि नित्यमनिट्, न तु तासौ। नित्येति किम्? अञ्ज, आनञ्जिथ। ऊदित्त्वात्तासौ वेडिति भाष्यम्। चकमिथेत्यप्युदाहरणम्, 'स्नुक्रमोः-' इति नियमेनात्मनेपदे तासावनिट्कत्वेऽपि परस्मैपदे सेट्कत्वात्। **ऋतो भारद्वाजस्य**। तासौ नित्यमनिट इति, थलीति, नेति, इडिति चानुवर्तते। भारद्वाजस्य मते ऋदन्ताद्धातोः परस्य थलो नेडिति फलितम्।

तल्लाभार्थं तत्। तेन उवयिथ, जघसिथेत्यत्र न निषेध इत्याहुः। **उपदेशेऽत्वतः।** पपक्थ। इयष्ठ। उपदेशे किम्, कर्ष्टा, चकर्षिथ। अकारवदिति किम्, भेत्ता, बिभेदिथ। तपरकरणं किम्, राद्धा, रराधिथ। तासौ किम्, जिघृक्षति, जग्रहिथ। 'सनि ग्रहगुहोश्च' इति सनि नित्यमनिट्। क्रान्तः। चकमिथ। उदित्त्वेन क्त्वायां वेट्कत्वाद् 'यस्य विभाषा' इति निष्ठायां नेट्। नित्यानिटः किम्, अङ्क्ता, अञ्जिता, आनञ्जिथ। किं च नित्यग्रहणानुवर्तनाच्चकमिथेत्यपि सिध्यति। नहि क्रमिस्तासौ नित्यानिट्, 'स्नुक्रमोरनात्मनेपदनिमित्ते' इति परस्मैपदे सेट्कत्वात्। **ऋतो भारद्वाजस्य।** तपरकरणात्कॄगॄप्रभृतिषु दीर्घान्तेषु नायं निषेधः प्रवर्तते। ह्रस्वान्तेषु हृञ्भृञादिषु 'अचस्तास्वत्-' इत्येव सिद्धम्, वृञ्वृङौ तु यद्यपि सेटौ तथापि वृङः थलेव नास्ति आत्मनेपदित्वात्, वृञस्तु छन्दसि 'ववर्थ' इति निपातनाद्ववरिथेति भाषाया-

---

१ एतद् वाक्यं क्वचिन्नास्ति।

थलो नेड् भारद्वाजस्य मतेन। तेनान्यस्य स्यादेव। अयमत्र संग्रहः—

अजन्तोऽकारवान्वा यस्तास्यनिट् थलि वेडयम्।
ऋदन्त ईदृङ् नित्यानिट् क्राद्यन्यो लिटि सेड् भवेत्॥

न च स्तुद्रुस्रुश्रुवामपि थलि विकल्पः शङ्क्यः, 'अचस्तास्वत्–' (सू२२६४)

हृभृञादौ 'अचस्तास्वत्–' इत्येव सिद्धम्। अतो नियमार्थमिदमित्याह **ऋदन्तादेव थलो नेडिति।** अनृदन्तात्परस्य तु थल इट् स्यादेवेत्येवकारार्थः, तदाह **अन्यस्य स्यादेवेति।** ऋदन्तभिन्नात्परस्य थल इट् स्यादेवेत्यर्थः। तथा च ऋदन्तभिन्नाद्धातोः परस्य थलो नेण्निवृत्तिरिति भारद्वाजमते फलतीति न वैयर्थ्यमिति भावः। तथा च अनृदन्ताद्धातोः परस्य थलो भारद्वाजमते इट्। मतान्तरे तु अचस्तास्वदिति उपदेशेऽत्वत इति च तत्र नेडिति विकल्पः फलतीति भावः। तद्यथा— पपिथ, पपाथ। पेचिथ, पपक्थ। **अयमत्रेति।** 'कृसृभृवृस्तुद्रुस्रुश्रुवो लिटि' इति 'अचस्तास्वत्थल्यनिटो नित्यम्' इति 'उपदेशेऽत्वतः' इति 'ऋतो भारद्वाजस्य' इति च सूत्रचतुष्टयस्य विषयाणां संग्रहो वक्ष्यत इत्यर्थः। **अजन्त इति।** यो धातुः ऋदन्तभिन्नाजन्तो ह्रस्वाकारवान् वा तासौ नित्यानिट् सोऽयं थलि विकल्पितेट्क इति पूर्वार्धस्यार्थः। अत्र 'ईदृग्' इत्यस्य तासौ नित्यानिडित्यर्थः। य ऋदन्तस्तासौ नित्यानिट् स थलि नित्यानिडित्यर्थः। 'अचस्तास्वत्–' इति पाणिनिमते 'ऋतो भारद्वाजस्य' इति भारद्वाजमतेऽपि तस्य अनिट्कत्वादिति भावः। **क्राद्यन्य इति।** क्रादिष्टभ्योऽन्यो धातुः लिटि नित्यं सेडित्यर्थः। क्रादिष्टभ्य एव परस्य लिटि नेडिति 'कृसृभृवृ–' इति सूत्रेण नियमितत्वादिति भावः। नन्वत्र क्राद्यन्य इत्युक्त्या क्रादीनाम् अष्टानां लिटि नित्यानिट्कत्वमवगतम्। तदनुपपन्नम्, स्तुद्रुस्रुश्रुवाम् ऋदन्तभिन्नत्वेन तेभ्यस्थलि अचस्तास्वदिति निषेधस्य भारद्वाजमते अप्रवृत्त्या इड्विकल्पस्य दुर्वारत्वात्। नचैवं सति 'कृसृभृवृ–' इति सूत्रे स्तुद्रुस्रुश्रुग्रहणमनर्थकमिति वाच्यम्। तुष्टुव तुष्टुमेत्यादौ वमादिषु क्रादिनियमप्राप्तस्य इटो निवृत्त्या चरितार्थत्वादित्याशङ्क्य निरा-

---

मिटा भाव्यम्। तस्मान्नियमोऽयमित्याह **ऋदन्तादेवेति।** जहर्थ। दधर्थ। **अन्यस्य स्यादेवेति।** एवं च भारद्वाजमते स्यादन्यमते न स्यादिति विकल्पः फलितः। पपिथ, पपाथ। पेचिथ, पपक्थ। इयजिथ, इयष्ठ। **अकारवानिति।** ह्रस्वाकारवानित्यर्थः। **ईदृगिति।** यस्तास्यनिट् स ऋदन्तः थलि नित्यानिड् भवतीत्यर्थः। ननु स्तुद्रुस्रुश्रुवामपि थलि भारद्वाजनियमादिट् स्यात्। न चैवं क्रादिसूत्रे तेषां पठनं निरर्थकं स्यादिति वाच्यम्, तत्पठनस्य वमादिष्विण्निवृत्त्यर्थतया सफलत्वात्।

इति 'उपदेशेऽत्वतः' (सू २२९९) इति च योगद्वयप्रापितस्यैव हि प्रतिषेधस्य भारद्वाजनियमो निवर्तकः, 'अनन्तरस्य-' इति न्यायात् । विवयिथ, विवेथ,

---

करोति **न च स्तुद्रुस्त्रुश्रुवामपि थलि विकल्पः शङ्क्य इति** । कुत इत्यत आह **अचस्तास्वदिति** । ऋदन्तादेव परस्य थल इण्निषेधः, अनृदन्तात्परस्य तु थल इण्निषेधो नेति भारद्वाजीयं मतम् । अयं च इण्निषेधस्य निषेधः 'अचस्तास्वत्-' इति 'उपदेशेऽत्वतः' इति च सूत्रद्वयप्राप्तस्यैव इण्निषेधस्य पक्षे निवर्तकः । न तु क्रादिसूत्रप्राप्तस्य इट्प्रतिषेधस्यापीत्यर्थः । कुत इत्यत आह **अनन्तरस्येति** । 'अचस्तास्वत्-' इति 'उपदेशेऽत्वतः' इति 'ऋतो भारद्वाजस्य' इति च सूत्रक्रमः । 'कृसृ-भृवृ-' इति सूत्रं तु ततः प्राग्बहुव्यवहितमिति भावः । किंच 'नेड् वशि कृति' इत्यादिप्रतिषेधकाण्डोत्तरम् 'आर्धधातुकस्येड्वलादेः' इति विधिकाण्डारम्भसामर्थ्यादपि स्तुद्रुस्रुश्रुवामिण्निषेधो भारद्वाजनियमं बाधत इति 'नेड् वशि कृति' इत्यत्र 'वस्वेकाजाद्घसाम्' इत्यत्र च भाष्ये स्पष्टम् । ततश्च प्रकृते अजेस्थलि वीभावे तस्य अजन्तत्वात्तासौ नित्यानिट्त्वाच्च इड्विकल्प इति सिद्धम् , तदाह **विवयिथ विवेथेति** । सिवादे-

---

अन्यथा क्रादिनियमात्तत्र इडागमो दुर्वारः स्यादित्याशङ्क्याह **न चेति । योगद्वयेति** । क्रादियोगप्रापितस्य तु न निवर्तक इति भावः । कुत इत्याकाङ्क्षायामाह **अनन्तरस्येति** । न चैवम् 'उपदेशेऽत्वतः' इत्यस्यैव बाधः स्यादिति वाच्यम् , अत्वत्सु धातुषु ऋदन्तत्वादर्शनेन यद्यत्वतः थलि इण्निषेधस्तर्हि ऋदन्तादेवेति नियन्तुमशक्यत्वात् । ननु तर्हि 'अचस्तास्वत्-' इत्यस्यैव बाधोऽस्तु, तत्कथं योगद्वयप्रापितस्येत्युक्तम् । अत्राहुः—उपदेशेऽचस्तास्वदित्येवं सूत्रे कृतेऽपि तास्वत्थलीत्यादिपदानामिवोपदेशपदस्याप्यनुवृत्तिसंभवे अत्वत इति सूत्रे उपदेशपदस्य, अच इति पूर्वसूत्रे तु तास्वत्थलीत्यादेश्चाकरणादुभयोः समानयोगक्षेम इति ज्ञायते । तस्मादिष्टानुरोधाच्च योगद्वयमपि भारद्वाजनियमेन बाध्यते । यदि तु 'उपदेशेऽत्वतोऽचस्तास्वत्थल्यनिटो नित्यम्' इति एको योगः स्वीक्रियते, तदात्र नास्त्येव शङ्कालेशोऽपीति बोध्यमिति । अन्ये तु व्याचक्षते—'अचस्तास्वत्-' इति सूत्रानन्तरमेव 'ऋतो भारद्वाजस्य' इति पठनीयम् , द्वयोरनन्तरमस्यारम्भादिह तास्वत्थल्यनिटो नित्यं तासीत्यनुवर्त्य योऽयं तासि नित्यानिटस्थलि इण्निषेधः स भारद्वाजमते ऋकारान्तस्यैवेति व्याख्यायते । अनेन सर्वेष्टसिद्धिः । यद्वा क्रादिसूत्रे स्तुप्रभृतीनां ग्रहणमेवेड्द्वयस्यापि बाधकमस्तु, पुरस्तात्प्रतिषेधकाण्डारम्भसामर्थ्यात् । अनाश्रितविधानविशेषमिण्मात्रमनारभ्याधीतेन प्रतिषेधेन यथा बाध्येतेत्येतदर्थो हि स आरम्भः । अमुमेवार्थं सिद्धवत्कृत्य ततश्चतुर्णां थलि भारद्वाजनियमप्रापितस्य वमादिषु क्रादिनियमप्रापितस्य चेटो निषेधार्थमिति

आजिथ विव्यथुः विव्य। विवाय, विवय विव्यिव विव्यिम। वेता, अजिता। वेष्यति, अजिष्यति। अजतु। आजत्। अजेत्। वीयात्। २२६७ **सिचि वृद्धिः परस्मैपदेषु। (७-२-१)** इगन्ताङ्गस्य वृद्धिः स्यात्परस्मैपदे परे सिचि। अवैषीत, आजीत्। अवेष्यत्, आजिष्यत्। तेज २३१ पालने। तेजति। खज २३२ मन्थे। खजति। खजि २३३ गतिवैकल्ये। खञ्जति। एजृ २३४ कम्पने। एजांचकार। टु ओ स्फूर्जा २३५ वज्रनिर्घोषे। स्फूर्जति। पुस्फूर्ज।

शस्य थलः पित्त्वाद् 'असंयोगात्-' इति कित्त्वाभावाद् गुणः। इट्पक्षे अयादेशः। **आजिथेति।** 'वलादावार्धधातुके वेष्यते' इति वीभावाभावपक्षे अजधातोरनुदात्तोपदेशबहिर्भूतत्वादिट्, द्वित्वम्, हलादिशेषः, 'अत आदेः' इति सवर्णदीर्घः। **विव्यथुरिति।** अथुसि वीभावे द्वित्वे अभ्यासह्रस्वे 'असंयोगात्–' इति कित्त्वाद् गुणाभावे इयङपवादे 'एरनेकाचः–' इति यणि रूपम्। **विव्येति।** थस्य अकारे वीभावादि। **विवाय, विवयेति।** 'णलुत्तमो वा' इति णित्त्वविकल्पाद् वृद्धिविकल्पः। **विव्यिव विव्यिमेति।** 'क्रादिन्यो लिटि सेड् भवेत्' इति नित्यमिटि यण्। **वेता अजितेति।** लुटि तासि वीभावविकल्पः। **वेष्यति अजिष्यतीति।** लृटि स्ये वीभावविकल्पः। **वीयादिति।** आशीर्लिङादेशस्य आर्धधातुकत्वाद् वीभावः। अथ लुङि सिचि वीभावे 'सार्वधातुकार्धधातुकयोः' इति गुणे प्राप्ते। **सिचि वृद्धिः। इगन्तस्येति।** वृद्धिश्रुत्या इक इत्युपस्थितम् 'अङ्गस्य' इत्यधिकृतस्य विशेषणम्, तदन्तविधिरिति भावः। एवं च अकोषीदित्यादौ व्यञ्जनस्य न वृद्धिः। **अवैषीदिति।** लुङस्तिप्, इकारलोपः, सिचि वीभावः, 'एकाच–' इति इण्निषेधः, वृद्धिः, अडागमः, षत्वम्। **आजीदिति।** सिज्लोपः। 'वदव्रज–' इति हलन्तलक्षणायां वृद्धौ 'नेटि' इति निषिद्धायामाडागमे 'आटश्च' इति वृद्धिः। लृङि अवेष्यत्, आजिष्यत्। **तेज पालन इत्यादि।** स्पष्टम्। **एजृ कम्पन इति।** दीप्तौ त्वात्मनेपदी गतः। **टु ओ स्फूर्जेति।** 'आदिर्ञिटुडवः' इति टुरित्। उपदेशेऽनुनासिकत्वादोकार आकारश्च इत्। 'ट्वितोऽथुच्' इत्यथुच्, 'ओदितश्च' इति निष्ठानत्वम्, 'आदि-

---

मूलेऽप्युपनिबद्धमिति। **विव्यिव। विव्यिमेति।** क्रादिनियमान्नित्यमिट्। **सिचि वृद्धिः।** 'इको गुणवृद्धी' इति परिभाषोपस्थानादाह **इगन्तेति।** परस्मैपदेष्विति किम्, अचविष्ट, अधोष्ट। सिचि किम्, एति। बिभर्ति। गुणं बाधित्वा वृद्धिः स्यात्। **खज** मन्थे। कजेति केचित्पठन्ति। **एजृ** कम्पने। दीप्तौ त्वात्मनेपदी गतः। **टुओस्फूर्जा।** 'ट्वितोऽथुच्'। स्फूर्जथुः। 'ओदितश्च' इति निष्ठानत्वार्थमोकारः। स्फूर्णः। स्फूर्णवान्। आकारस्तु 'आदितश्च' इति निष्ठायामिटो निषेधार्थः, 'विभाषा

क्षि २३६ क्षये। अकर्मकः। अन्तर्भावितण्यर्थस्तु सकर्मकः। क्षयति। चिक्षाय चिक्षियतुः चिक्षियुः। चिक्षयिथ, चिक्षेथ चिक्षियिव चिक्षियिम। क्षेता। २२९८ अकृत्सार्वधातुकयोर्दीर्घः। (७-४-२५) अजन्तस्याङ्गस्य दीर्घः स्याद्यादौ प्रत्यये परे, नतु कृत्सार्वधातुकयोः। क्षीयात्। अक्षैषीत्। क्षीज २३७ अव्यक्ते शब्दे। कूजिना सहायं पठितुं युक्तः। चिक्षीज। लज २३८ लजि २३९ भर्त्सने[1]।

तश्च' इति निष्ठायामिण्निषेधश्च तत्फलानि। 'उपधायां च' इति दीर्घस्यानित्यत्वज्ञापनार्थमिह दीर्घ ऊकारः पठितः। तेन हुर्छतीत्यादौ न दीर्घ इत्याहुः। स्फूर्जतीति। लिटि पुस्फूर्ज, अस्फूर्जीत्। क्षि क्षय इति। क्षयो नाशः। अन्तर्भावितण्यर्थ इति। नाशनार्थक इत्यर्थः। अजन्तेष्वेवास्य पाठो युक्तः। क्षयतीति। नश्यतीत्यर्थः, नाशयतीति वा। शपि गुणे अयादेशः। चिक्षायेति। णलि वृद्धिः आयादेशः। चिक्षियतुरिति। 'असंयोगात्-' इति कित्त्वान्न गुणः। इयङ्। चिक्षयिथ, चिक्षेथेति। पित्त्वेन कित्त्वाभावाद् गुणः। अजन्तत्वात्तासौ नित्यानिट्त्वाच्च भारद्वाजनियमात्थलि वेट्। इट्पक्षे अयादेशः। चिक्षियथुः, चिक्षिय। चिक्षाय, चिक्षय। वस्मसोस्तु क्रादिनियमाद् नित्यमिट्, तदाह चिक्षियिव चिक्षियिमेति। क्षेता। क्षेष्यति। क्षयतु। अक्षयत्। क्षयेत्। आशीर्लिङि विशेषमाह अकृत्सार्वधातुकयोः। 'अङ्गस्य' इत्यधिकृतम्। 'अयङ् यि क्ङिति' इत्यतो यीति सप्तम्यन्तमनुवृत्तमङ्गाक्षिप्तप्रत्ययविशेषणम्, तदादिविधिः। दीर्घश्रुत्या अच इत्युपस्थितमङ्गविशेषणम्, तदन्तविधिः, तदाह अजन्तस्येत्यादिना। 'अकृत्सार्वधातुकयोः' इति किम्? प्रकृत्य। तुकं बाधित्वा परत्वाद्दीर्घो न। चिनुयात्, सार्वधातुकत्वान्न दीर्घः। क्षीजति। ईदुपधः। कूजिनेति। 'कूज अव्यक्ते शब्दे' इत्यनुपदमेव पठितम्। तत्रैव 'कूज क्षीज अव्यक्ते शब्दे' इति पठितुं युक्तमित्यर्थः, अर्थ-

भावादिकर्मणोः' इति विकल्पार्थश्च, स्फूर्णः स्फूर्जितमनेनेत्यादि। 'उपधायां च' इति दीर्घस्यानित्यत्वज्ञापनार्थमिह दीर्घोपदेशः, तेन हुर्च्छति मुर्च्छति इत्यपि भवतीति केचित्। क्षि क्षये। अजन्तेष्वस्य पाठो युक्तः। 'क्षि निवासगत्योः' इति तुदादौ। अकृत्सार्व। दीर्घग्रहणेन 'अचश्च' इति परिभाषोपस्थानादाह अजन्तेति। याद्रौ प्रत्यय इति। 'अयङ् यि क्ङिति' इत्यतो यीत्यनुवर्त्य अङ्गाक्षिप्तप्रत्ययस्तेन विशेष्यते, विशेषणेन तदादिविधिः, 'यस्मिन्विधि-' इति परिभाषोपस्थानादिति भावः। न त्विति। क्त्वयकारे प्रकृत्य, प्रहृत्य, उच्चैःकृत्य। तुकं बाधित्वा परत्वाद् दीर्घः स्यात्। तुग्विधिस्तु अग्निचित् सोमसुत् इत्यादौ चरितार्थः। ल्यपः पित्त्वमप्यनुदात्तार्थतया चरितार्थमित्याहुः। सार्वधातुकयकारे तु चिनुयात्, सुनुयात्। कूजिनेति।

१ 'भर्जने' इति तत्त्वबोधिनीकारः।

लाज २४० लाजि २४१ भर्जने च । जज २४२ जजि २४३ युद्धे । तुज २४४ हिंसायाम् । तोजति । तुतोज । तुजि २४५ पालने । गज २४६ गजि २४७ गृज २४८ गृजि २४९ मुज २५० मुजि २५१ शब्दार्थाः । गज मदने च । वज २५२ व्रज २५३ गतौ । ववजतुः । 'वदव्रज-' (सू २२६७) इति वृद्धिः, अव्राजीत् ।

अथ टवर्गीयान्ताः शाडन्ता अनुदात्तेतः षट्त्रिंशत् । अट्ट २५४ अतिक्रमहिंसयोः । दोपधोऽयम् । तोपध इत्यन्ये । अट्टते । आनट्टे । वेष्ट

कत्वादिति भावः । लज लजि भर्त्सन इति । 'भर्त्सनं त्वपवादगीः' इत्यमरः । द्वितीय इदित् । आशीर्लिङि लज्यात् । लञ्ज्यात् । लाज लाजि भर्जन इति । आदुपधौ । द्वितीय इदित् । जज जजीत्यादि । स्पष्टम् । वज व्रजेति । आद्यस्य असंयुक्तहल्मध्यस्थाकारवत्त्वेऽपि 'न शसददवादिगुणानाम्' इत्येत्वाभ्यासलोपौ नेत्याह ववजतुरिति । अव्राजीत्, अवजीत् । द्वितीयस्य तु संयुक्तहलमध्यस्थाकारवत्त्वादेवैत्वाभ्यासलोपयोर्न प्रसक्तिः । अव्राजीदित्यत्र 'अतो हलादेः-' इति वृद्धिविकल्पमाशङ्क्याह वदव्रजेति वृद्धिरिति । हलन्तत्वादेव सिद्धे व्रजग्रहणस्य 'अतो हलादेः-' इति विकल्पनिरासार्थत्वादिति भावः । शुचादयो द्विसप्ततिर्वृत्ताः ।

शाडन्ता इति । शाडृ श्लाघायामित्यन्ता इत्यर्थः । शाडयन्ता इति क्वचित्पाठः । अट्टेति । तवर्गतृतीयोपधोऽयम् । चर्त्वष्टुत्वाभ्यां टोपधनिर्देशः, तदाह दोपधोऽयमिति । तथा च अट्टधातोः सनि इटि अट्टि स इति स्थिते ष्टुत्वचर्त्वयोरसिद्धत्वाद् 'अजादेर्द्वितीयस्य' इति प्रवर्तमानं द्वित्वं 'नन्द्राःसंयोगादयः' इति दकारं विहाय टिस् इत्यस्य भवति । ततो हलादिशेषे दकारस्य ष्टुत्वचर्त्वयोः अट्टिटिषत इतीष्टं सिध्यति । स्वाभाविकमूर्धन्योपधत्वे नन्द्रा इति निषेधाभावात् टकारद्वयसहितस्यैव द्वित्वे हलादिशेषेण द्वितीयटकारस्य निवृत्तौ अटिट्टिषते इत्यनिष्टं प्रसज्येतेति भावः । तोपध इत्यन्य इति । ष्टुत्वेन टोपधनिर्देश इति भावः । अस्मिन्पक्षे सनि

अर्थैक्यादेकत्र पाठ उचित इति भावः । लज लजि । लज्यात् । लञ्ज्यात् । 'लज प्रकाशने' इति कथादौ । भर्त्सने चेति । चाद् भर्जने । तुजि पालने । भाषार्थोऽयं युजादौ । गज गजि । 'गञ्जा तु मदिरागृहम्' । गज मदने च । मदनं मदः चित्तविकारः । वज व्रज । वादित्वादेत्वाभ्यासलोपौ न । ववजतुः । वव्रजतुः । शाडयन्ता इति । शाडृ श्लाघायामित्यन्ता इत्यर्थः । दोपधोऽयमिति । तथा च चर्त्वे ष्टुत्वशास्त्रस्यासिद्धत्वाद् 'न न्द्राः-' इति द्वित्वनिषेधेन दकारं विहाय टिशब्दस्य द्वित्वे पश्चाद्दकारस्य ष्टुत्वे चर्त्वे च अट्टिटिषते आट्टिटदित्यादि सिध्यति । टोपधत्वे तु अटिट्टिषते आटिट्टदिति स्यादिति भावः । तोपध इति । अस्मिंस्तु पक्षे अति-

---

१ 'भर्त्सने' इति तत्त्वबोधिनीकारः ।

२५५ वेष्टने । विवेष्टे । चेष्ट २५६ चेष्टायाम् । अचेष्टिष्ट । गोष्ट २५७ लोष्ट २५८ संघाते । जुगोष्टे । लुलोष्टे घट्ट २५९ चलने । जघट्टे । स्फुट २६० विकसने । स्फोटते । पुस्फुटे । अठि २६१ गतौ । अण्ठते । आनण्ठे । वठि २६२ एकचर्यायाम् । ववण्ठे । मठि २६३ कठि २६४ शोके । शोक इह आध्यानम् । मण्ठते । कण्ठते । मुठि २६५ पालने । मुण्ठते । हेठ २६६ विबाधायाम् । विबाधा शाठ्यम् । जिहेठे । एठ २६७ च । एठांचक्रे । हिडि २६८ गत्यनादरयोः । हिण्डते । जिहिण्डे । हुडि २६९ संघाते । जुहुण्डे । कुडि २७० दाहे । चुकुण्डे । वडि २७१ विभाजने । मडि २७२ च । ववण्डे । भडि २७३ परिभाषणे । परिहासः सनिन्दोपालम्भश्च परिभाषणम् । बभण्डे । पिडि २७४ संघाते । पिपिण्डे । मुडि २७५ मार्जने । मार्जनं शुद्धिर्न्यग्भावश्च । मुण्डते । तुडि २७६ तोडने । तोडनं दारणं हिंसनं च । तुण्डते । हुडि २७७ वरणे । वरणं स्वीकारः । हरणे इत्येके । हुण्डते । चडि २७८ कोपे । चण्डते । शडि २७९ रुजायां संघाते च । शण्डते । तडि २८० तण्डते । पडि २८१ गतौ । पण्डते । कडि २८२ मदे । कण्डते । खडि २८३ मन्थे । हेडृ २८४ होडृ २८५

द्वित्वे कर्तव्ये ष्टुत्वस्यासिद्धत्वेऽपि 'नन्द्राः—' इति निषेधाभावात्तकारविशिष्टस्य तत्टि स् इत्यस्य द्वित्वे हलादिशेषेण टकारस्य निवृत्त्या अतिट्टिषते इति रूपमिति भावः । **आनट्ट इति** । इह 'नन्द्राः—' इति निषेधो न, तत्र द्वितीयस्यैकाच इत्यनुवृत्तेः । **घट्ट चलन इति** । अयं चुरादावपि । **स्फुट विकसन इति** । अयं कुटादावपि । **अठि गताविति** । लिटि नुमि द्वित्वे हलादिशेषे 'अत आदेः' इति दीर्घे 'तस्मान्नुड्द्विहलः' इति नुडिति मत्वाह **आनण्ठ इति । वठि एकचर्यायामिति** । असहायचर्यायामित्यर्थः । **मडि चेति** । विभाजन इत्यनुषज्यते । मडि भूषायामिति परस्मैपदिषु

ट्टिषते आतिट्टदित्यादि बोध्यम् । हलादिःशेषेण टकारनिवृत्तौ तन्निमित्तस्यापि ष्टुत्वस्य निवृत्तत्वादिति नव्याः । मनोरमायां तु 'पूर्वत्रासिद्धीयमद्विर्वचने' इति ष्टुत्वस्यासिद्धत्वाभावाट्टकारद्वयसहितस्य द्वित्वे हलादिःशेषे अटिट्टिषते आटिट्टदित्यादि सिध्यतीत्युक्तम् । 'निमित्तापाये नैमित्तिकस्याप्यपायः' इति त्वनित्यमिति तदाशयः । **आनट्ट इति** । इह 'नन्द्राः-' इति निषेधो न, तत्र द्वितीयस्येत्यनुवर्तनाद् द्वितीयैकाच एव नदराणां निषेधात् । **घट्ट** चलने । अयं चुरादावपि । **स्फुट** । अयं कुटादावपि । **आनण्ठ इति** । 'तस्मान्नुड् द्विहलः' इति नुट् । **वण्ठत इति** । सहायं विना चरतीत्यर्थः । **मडि च** । पृथक्पाठादयं वेष्टनेऽपीत्याहुः । मडि भूषायामित्यपि परस्मैपदिषु । **भडि** । 'यः सनिन्द उपालम्भस्तत्र स्यात्परिभाषणम्' इत्यमरः ।

अनादरे। जिहेडे। जुहोडे। बाडृ २८६ आप्लाव्ये। बशादिः। आप्लाव्यमाप्लवः। बाडते। द्राडृ २८७ ध्राडृ २८८ विशरणे। द्राडते। ध्राडते। शाडृ २८९ श्लाघायाम्। शाडते।

अथ गड्यन्ताः परस्मैपादिनः। शौटृ २९० गर्वे। शौटति। शुशौट। यौटृ २९१ बन्धे। यौटति। म्लेटृ २९२ म्रेडृ २९३ उन्मादे। द्वितीयो डान्तः। टान्तमध्ये पाठस्त्वर्थसाम्यान्नाथतिवत्। म्लेटति। म्रेडति। कटे २९४ वर्षावरणयोः। चटे इत्येके। चकाट। सिचि 'अतो हलादेर्लघोः' (सू २२८४) इति वृद्धौ प्राप्तायाम्। २२९९ ह्म्यन्तक्षणश्वसजागृणिश्व्येदिताम्। (७-२-५) हमयान्तस्य क्षणादेर्ण्यन्तस्य श्वयतेरेदितश्च वृद्धिर्न स्यादिडादौ

वक्ष्यते। शाडृ श्लाघायामिति। डलयोरैक्यात् शालत इति कश्यपः। इत्यड्डादयः षट्त्रिंशद्गताः।

अथ गड्यन्ता इति। गडि वदनैकदेश इत्यन्ता इत्यर्थः। म्लेटृ म्रेडृ इति। एदुपधौ। द्वितीयो डान्त इति। टवर्गतृतीयान्त इत्यर्थः। ननु टान्तेष्वस्य कथं पाठः, चुड्ड भावकरण इत्यारभ्यानुक्रम्यमाणेष्वेवास्य पठितुं युक्तत्वादित्यत आह टान्तमध्य इति। नाथतिवदिति। एध वृद्धावित्यारभ्यानुक्रान्तेषु तवर्गचतुर्थान्तेषु यथा नाथृ नाधृ याच्ञेति तवर्गद्वितीयान्तस्यापि अर्थसाम्यात्पाठः, तद्वदित्यर्थः। कटे इति। कण्ठ्यादिः। चटे इति। तालव्यादिः। आद्यस्य लिटि अभ्यासस्य चुत्वमित्याह चकाटेति। चकटतुः। द्वितीयस्य चेटतुः, वैरूप्यापादकादेशादित्वाभावादेत्वाभ्यासलोपौ। प्राप्तायामिति। हलन्तलक्षणाया नित्यवृद्धेः 'नेटि' इति निषेधाद् 'अतो हलादेः–' इति वैकल्पिकवृद्धौ प्राप्तायामित्यर्थः। ह्म्यन्त। ह्म्यन्त क्षण श्वस जागृ णि श्वि एदित् एषां द्वन्द्वात्षष्ठी। ह् म् य् इत्येते वर्णा येषामन्ते ते ह्म्यन्ताः, तदाह हमयान्तस्येति। क्षणादेरिति। आदिना श्वस जागृ इत्यनयोर्ग्रहणम्। ण्यन्तस्येति। प्रत्ययग्रहणपरिभाषया णिग्रहणेन तदन्तग्रहणमिति भावः। श्वयतेरिति। श्विधातोरित्यर्थः। एदित इति। एत् इत् यस्येति विग्रहः। वृद्धिर्न स्यादिति। 'सिचि वृद्धिः–' इत्यतो 'नेटि' इत्यतश्च

शडि। 'शण्डोऽसुरपुरोहितः'। द्राडृ। विशरणमवयवविभागः। शाडृ। डलयोरैक्यात् शालते इति काश्यपः। शौटृ गर्वे। अस्योणादिषु ईरन्वक्ष्यते। 'तदेतदतिशौटीर्यमौड्डुलोमेर्न मृष्यति' इति कल्पतरुः। कटे। ह्म्यन्तक्षण। अग्रहीत्। टुवम्। अवमीत्। हय गतौ। अहयीत्। क्षणु हिंसायाम्। अक्षणीत्। श्वस प्राणेन। अश्वसीत्। जागृ निद्राक्षये। अजागरीत्। ण्यन्ते छन्दसि 'नोनयतिध्वन-

सिचि । अकटीत् । अट २९५ पट २९६ गतौ । आट आटतुः आटुः । पपाट पेटतुः पटुः । रट २९७ परिभाषणे । रराट । लट २९८ बाल्ये । ललाट । शट २९९ रुजाविशरणगत्यवसादनेषु । शशाट । वट ३०० वेष्टने । ववाट ववटतुः ववटुः । ववटिथ । किट ३०१ खिट ३०२ त्रासे । केटति । खेटति । शिट ३०३ षिट ३०४ अनादरे । शेटति । शिशेट । सेटति । सिषेट । जट ३०५ झट ३०६ संघाते । भट ३०७ भृतौ । तट ३०८ उच्छ्राये । खट ३०९ काङ्क्षायाम् । णट ३१० नृत्तौ । पिट ३११ शब्दसंघातयोः । हट ३१२ दीप्तौ । षट ३१३ अवयवे । लुट ३१४ विलोडने । डान्तोऽयमित्येके । चिट ३१५ परप्रेष्ये । विट ३१६ शब्दे । बिट ३१७ आक्रोशे । वशादिः । हिट इत्येके । इट ३१८ । किट ३१९ कटी ३२० गतौ । एटति । केटति । कटति । ईकारः 'श्वीदितो निष्ठायाम्'

तदनुवृत्तेरिति भावः । **इडादौ सिचीति** । 'सिचि वृद्धिः–' इत्यतः सिचीति 'नेटि' इत्यत इटीति चानुवर्तत इति भावः । **अकटीदिति** । एदित्वान्न वृद्धिः । **अट पटेति** । 'अत आदेः' इति दीर्घं मत्वा आह **आटेति** । **पेटतुरिति** । एत्त्वाभ्यासलोपौ । वट वेष्टने । **ववटतुरिति** । 'न शसददवादिगुणानाम्' इति निषेधः । **ववटिथेति** । अत्र 'थलि च सेटि' इति प्राप्तस्य 'न शसदद–' इति निषेधः । **किट खिट त्रास इति** । यद्यपि 'इट किट कटी गतौ' इति अग्रे किटधातुः पठ्यते, तथाप्यर्थभेदात् पुनरिह पाठः । खिट त्रासे किट गतौ चेति पठितुं युक्तम् । **शिट षिटेति** । आद्यस्तालव्यादिः, द्वितीयस्तु षोपदेशः । **जट झटेति** । आद्यस्य अवैरूप्यापादकादेशादित्वादेत्त्वाभ्यासलोपौ, द्वितीयस्य तु न । जेटतुः । जझटतुः । **णट नृत्ताविति** । णोपदेशः । चुरादेरेव नाटेः पर्युदासादयं णोपदेश एव । प्रणटति । **इट किट कटी गताविति** । कटे वर्षावरणयोरिति कटिः पूर्व-

---

यति–' इत्यादिना चङि निषिद्धे औनयीदिति उदाहरणम् । **टुओश्वि** । अश्वयीत् । **इडादौ सिचीति** । इडादौ किम्, दह भस्मीकरणे अधाक्षीत् । **किट खिट** । **इट किटेति** । किटिर्गतौ पठिष्यते । इह पाठस्त्वर्थभेदात् । **जट झट** । जेटतुः । जझटतुः । इह त्वादेशादित्वादेत्वाभ्यासलोपौ न । **खट** । 'अशूप्रुषिलटिखटिकणिविशिभ्यः क्वन्' । खट्वा । णट नृत्तौ । प्रणटति । णोपदेशपर्युदासे नाटीति सवृद्धिकनिर्देशेन 'नट अवस्यन्दने' इति चौरादिकस्यैव ग्रहणादयं णोपदेश एव । **हट** दीप्तौ । हाटकं सुवर्णम् । 'संज्ञायां च' इति ण्वुल् बाहुलकादस्त्रियामपि । **शट** । पचाद्यजन्ताट्टाप् । 'सटा जटाकेसरयोः' । **चिट** । 'सर्वधातुभ्यः–' इति औणादिक इन् । चेटिः । 'कृदिकारात्–' इति ङीष् । चेटी । **विट** । इगुपधलक्षणः कः । विटः ।

(सू २०३१) इतीयिनषेधार्थः। केचित्तु इदितं मत्वा नुमि कृते कण्टतीत्यादि वदन्ति। अन्ये तु इ ई इति प्रश्लिष्य, अयति। इयाय इयतुः इयुः। इययिथ,

---

मेदित्पठितः, इह ईदित्पठ्यते। एदित्वाभावाद् 'ह्ययन्त–' इति वृद्धिनिषेधो न भवति। अकटीत्, अकाटीत्। ननु तर्हि कटेत्येव कुतो न पठ्यत इत्यत आह **ईकार इति।** **केचित्त्विति।** कटि इति ह्रस्वान्तपाठं मत्वा इदित्त्वान्नुमि कृते अनुस्वारे परसवर्णे च कण्टतीति वदन्तीत्यर्थः। **अन्ये त्विति।** उदाहरन्तीत्यन्वयः। **प्रश्लिष्येति।** कटि इत्यनन्तरम् इ ई इति धातुद्वयं सवर्णदीर्घेण प्रश्लिष्य निर्दिष्टमिति भावः। **अयतीति।** इधातोर्लटि शपि गुणे अयादेशः। **इयायेति।** णलि द्वित्वे वृद्धौ आयादेशे 'अभ्यासस्याऽसवर्णे' इति इयङ्। **इयतुरिति।** इकारोऽत्र ह्रस्वः। तथाहि—इ अतुसिति स्थिते कित्त्वाद् गुणाभावे 'द्विर्वचनेऽचि' इति निषेधाद्यणभावे इ इत्यस्य द्वित्वे इ इ अतुसिति स्थिते सवर्णपरकत्वादभ्यासस्य इयङभावे सति 'वार्णादाङ्गं बलीयः' इति सवर्णदीर्घं बाधित्वा 'एरनेकाच–' इत्युत्तरखण्डस्य यणि इयतुरिति रूपम्। इधातोर्भारद्वाजनियमात्थलि वेट्। तत्र इट्पक्षे रूपमाह **इययिथेति।** थलि द्वित्वे इटि पित्त्वेन कित्वाभावाद् गुणे अयादेशे अभ्यासस्य इयङ्। नच 'अचः परस्मिन्–' इति गुणस्य स्थानिवत्त्वेन असवर्णपरत्वाभावात् कथमभ्यासस्य इयङिति वाच्यम्, असवर्णग्रहणसामर्थ्यादेव स्थानिवत्त्वाप्रसक्तेः। एवं णलि इयायेत्यत्रापि

इयायेति। द्वित्वे कृते णलि वृद्धौ सत्यामायादेशः। 'अभ्यासस्यासवर्णे' इति इयङ्। **ईयतुरिति।** द्वित्वे कृते 'एरनेकाच–' इति यणं बाधित्वा अन्तरङ्गत्वात्सवर्णदीर्घः। ततः 'अचि श्नुधातु–' इतीयङ्। एकादेशस्य पूर्वान्तत्वेन अभ्यासग्रहणेन ग्रहणात्। 'अभ्यासस्यासवर्णे' इत्यनेनेत्येके। केचित्तु—'वार्णादाङ्गं बलीयः' इति दीर्घं बाधित्वा यण्। न चेह समानाश्रयत्वं नेति वाच्यम्, अभ्यासोत्तरस्येकारस्य सवर्णदीर्घयणौ प्रति स्थानित्वेन तयोः समानाश्रयत्वात्। अतएव ईयतुरित्यत्र 'इणो यण्' इति यणि ततो 'दीर्घ इणः किति' इत्यभ्यासस्य दीर्घो विधीयते। अन्यथा सूत्रमिदं निर्विषयं स्यात्, अभ्यासाभावादित्याहुः। स्यादेतत्—णल्यलोस्त्वभ्यासस्येयङ् दुर्लभः। तस्मिन्कर्तव्ये 'अचः परस्मिन्–' इति वृद्धिगुणयोः स्थानिवद्भावेन असवर्णे इति प्रतिषेधादिति चेत्। मैवम्, असवर्णग्रहणसामर्थ्यादेव स्थानिवत्त्वस्याप्रवृत्तेः। ननु नास्ति सामर्थ्यम्। इयर्ति इयृत इत्यादौ सावकाशत्वादिति चेत्। अत्राहुः—न ह्येकमुदाहरणं योगारम्भं प्रयोजयति। अन्यथा हि 'अभ्यासस्यातौ' इति ब्रूयात्। एवं चान्तरङ्गत्वात्सवर्णदीर्घे कृते ततो वृद्धिगुणयोः सतोः णलि आय, थलि एथ, इट्पक्षे तु अयिथेति स्यादित्याशङ्कापि न कार्या। 'अभ्यासस्यासवर्णे' इत्यस्य वैयर्थ्यापत्तेरिति।

इयेथ। इय। इयाय, इयय। दीर्घस्य तु 'इजादेश्च-' (सू २२३७) इत्यामि अयांचकारेत्यादि उदाहरन्ति। मडि ३२१ भूषायाम्। कुडि ३२२ वैकल्ये। कुण्डति। कुण्डत इति तु दाहे गतम्। मुड ३२३ प्रुड ३२४ मर्दने। चुडि ३२५ अल्पीभावे। मुडि ३२६ खण्डने। मुण्डति। पुडि च इत्येके। पुण्डति। रुटि ३२७ लुटि ३२८ स्तेये। रुण्टति। लुण्टति। रुठि लुठि इत्येके। रुडि लुडि इत्यपरे। स्फुटिर् ३२९ विशरणे। इरित्वादङ् वा। अस्फुटत्, अस्फोटीत्। स्फुटि इत्यपि केचित्। इदित्वान्नुम्। स्फुण्टति। पठ ३३० व्यक्तायां वाचि। पेठतुः। पेठिथ। अपठीत्, अपाठीत्। वठ ३३१ स्थौल्ये। ववठतुः। ववठिथ। मठ ३३२ मदनिवासयोः। कठ ३३३ कृच्छ्रजीवने। रट ३३४ परिभाषणे। रठ इत्येके। हठ ३३५ प्लुतिशठत्वयोः। बलात्कारे इत्येके। हठति। जहाठ। रुठ ३३६ लुठ ३३७ उठ ३३८ उपघाते। ओठति। ऊठ इत्येके। ऊठति। ऊठांचकार। पिठ ३३९ हिंसासंक्लेशनयोः। शठ ३४० कैतवे च। शुठ ३४१ प्रतिघाते। शोठति। शुठि इति स्वामी। शुण्ठति। कुठि ३४२ च। कुण्ठति। लुठि ३४३ आलस्ये प्रतिघाते च। शुठि ३४४ शोषणे। रुठि ३४५ लुठि

वृद्धेर्न स्थानिवत्त्वम्। थलि इडभावपक्षे रूपमाह **इयेथेति**। थलि द्वित्वे गुणे अभ्यासस्येयङ्। अथुसि इयथुः। **इयेति**। थस्य अकारादेशे द्वित्वे उत्तरखण्डस्य 'एरनेकाचः'—इति यणि रूपम्। 'णलुत्तमो वा' इति णित्त्वपक्षे आह **इयायेति**। द्वित्वे पित्त्वेन कित्त्वाभावाद् वृद्धौ आयादेशे अभ्यासस्य इयङ्। णित्त्वाभावे आह **इययेति**। द्वित्वे पित्त्वेन कित्त्वाभावाद् गुणे अयादेशे अभ्यासस्य इयङ्। वसि मसि च क्रादिनियमान्नित्यमिटि द्वित्वे उत्तरखण्डस्य 'एरनेकाच-' इति यणि इयिव इयिमेति रूपम्। एता। एष्यति। अयतु। आयत्। अयेत्। आशीर्लिङि तु 'अकृत्सार्वधातुकयोः—' इति दीर्घाद् ईयात्। सिचि वृद्धिः ऐषीत्। ऐष्यत्। **दीर्घस्य त्विति**। दीर्घस्य ईधातोरित्यर्थः। तस्य लिटं वर्जयित्वा लडादिषु पूर्ववत्। लिटि विशेषमाह **अयाञ्चकारेति**। ईधातोरामि गुणे अयादेशः अनुप्रयोगश्च। **कुडि वैकल्य इति**। वैकल्यम् अविवेक इत्याहुः। अपूर्णभावो वा। **मुड प्रुड मर्दन इत्यादि**। स्पष्टम्। पठधातोर्लिटि अतुसादौ किति एत्वाभ्यासलोपौ, तदाह **पेठतुरिति**। **पेठिथेति**। पित्त्वेन अकित्त्वेऽपि 'थलि च सेटि' इत्येत्वाभ्यासलोपौ। **अपठीत्, अपाठीदिति**। 'अतो हलादेर्लघोः' इति वृद्धिविकल्पः। **वठ स्थौल्य इति**। स्थौल्यं स्थूलीभवनम्। 'न शसददवादिगुणानाम्' इत्येत्वाभ्यासलोपनिषेध इति मत्वा

एता। एष्यति। 'अकृत्सार्व-' इति दीर्घः। ईयात्। ऐषीत्। **कुडि**। वैकल्यम-

३४६ गतौ। चुड्ड ३४७ भावकरणे। भावकरणमभिप्रायसूचनम्। चुड्डति। चुचुड्ड। अड्ड ३४८ अभियोगे। अड्डति। आनड्ड। कड्ड ३४९ कार्कश्ये। कड्डति। चुड्डादयस्त्रयो दोपधाः। तेन क्विपि चुत् अत् कत् इत्यादि। क्रीडृ ३५० विहारे। चिक्रीड। तुडृ ३५१ तोडने। तोडति। तुतोड। तूडृ इत्येके। हुडृ ३५२ हूडृ ३५३ होडृ ३५४ गतौ। हुड्यात्। हूड्यात्। होड्यात्। रौडृ ३५५ अनादरे। रोडृ ३५६ लोडृ ३५७ उन्मादे। अड ३५८ उद्यमे। अडति। आड आडतुः आडुः। लड ३५९ विलासे। लडति। डलयोर्लरयोश्चैकत्वस्मरणाल्ललतीति स्वाम्यादयः। कड ३६० मदे। कडति। कडि इत्येके। कण्डति। गडि ३६१ वदनैकदेशे। गण्डति। इति टवर्गीयान्ताः।

अथ पवर्गीयान्ताः। तत्रानुदात्तेतः स्तोभत्यन्ताश्चतुस्त्रिंशत्। तिपृ ३६२ तेपृ ३६३ ष्टिपृ ३६४ ष्टेपृ ३६५ क्षरणार्थाः। आद्योऽनुदात्तः। क्षीरस्वामी स्वयं सेडिति बभ्राम। तेपते। तितिपे। क्रादिनियमादिट्। तितिपिषे। तेप्ता। तेप्स्यते। २३०० **लिङ्सिचावात्मनेपदेषु। (१-२-११)** इक्समीपाद्धलः

आह ववठतुः, ववठिथेति। **दोपधा इति**। ष्टुत्वेन डोपधनिर्देश इति भावः। **चुदिति**। चुड्डधातोः क्विपि हल्ङ्यादिना सुलोपे द्वितीयस्य डस्य संयोगान्तलोपे ष्टुत्वनिवृत्तौ 'वावसाने' इति चर्त्वे चुत् इति रूपम्। **अदिति**। अड्डधातोः क्विपि पूर्ववद् रूपम्। **कदिति**। कड्डधातोः क्विपि रूपम्। **इत्यादीति**। आदिना जश्त्वेन चुदित्यादिसंग्रहः। **एकत्वस्मरणादिति**। शिक्षादाविति शेषः। **गडि वदनेति**। तवर्गान्तेषु गडीति गतम्। परस्मैपदिनः शौटृ गर्व इत्यादयो गताः।

तिपृ इति। प्रथमतृतीयाविदुपधौ। द्वितीयचतुर्थौ एदुपधौ। तृतीयचतुर्थौ षोपदेशौ च, तकारस्य ष्टुत्वेन टकारस्य निर्दिष्टतया दन्त्यपरकसादित्वात्। **आद्य इति**। तिपृधातुरित्यर्थः, भाष्यादौ अनुदात्तोपदेशेष्वस्य पाठादिति भावः। **बभ्रामेति**। भाष्यविरुद्धत्वादिति भावः। आद्यस्योदाहरति **तेपत इति**। शपि लघूपधगुणः। **तितिप इति**। 'असंयोगात्–' इति कित्त्वान्न गुणः। अथ तितिपिष इत्यत्र 'एकाच उपदेशे–' इति निषेधमाशङ्क्याह **क्रादिनियमादिति**। **तेप्स्यत इति**। लोडादौ तु तेपताम्, अतेपत, तेपेत। अथाशीर्लिङि सीयुटि सुटि तिप्सीष्टेति रूपं वक्ष्यति। तत्र लघूपधगुणे प्राप्ते। **लिङ्**। 'इको झल्' इति, 'हल-

---

विवेकः। **तुडृ**। तोडनं दारणं हिंसनं च। **रोडृ लोडृ**। उन्मादश्चित्तविभ्रमः। **गडि** वदनैकदेशे। टवर्गीयप्रकरणादिह पाठस्तूचितः। अन्तत्यादिषु तु 'पर्मैते न तिङ्विषयाः' इति मतान्तरं बोधयितुं प्रसङ्गादुपन्यस्तः। **तिपृ तेपृ**। **लिङ्सिचावा-**

परौ झलादी लिङ्सिचावात्मनेपदपरः सिच्चेत्येतौ कितौ स्तः । कित्त्वान्न गुणः । तिप्सीष्ट तिप्सीयास्ताम् तिप्सीरन् । लुङि 'झलो झलि' (सू २२८१) इति सलोपः । अतिप्त अतिप्साताम् अतिप्सत । तेपते । तितेपे । तेपिता । तिष्टिपे तिष्टिपाते तिष्टिपिरे । तिष्टेपे तिष्टेपाते तिष्टेपिरे । तेपृ कम्पने च । ग्लेपृ ३६६ दैन्ये । ग्लेपते । टुवेपृ ३६७ कम्पने । वेपते । केपृ ३६८ गेपृ ३६९ ग्लेपृ ३७० च । चात्कम्पने गतौ च । सूत्रविभागादिति स्वामी । मैत्रेयस्तु चकारमन्तरेण पठित्वा कम्पने इत्यपेक्षत इत्याह । ग्लेपेरर्थभेदात्पुनः पाठः । मेपृ ३७१ रेपृ

न्ताच्च' इति च सूत्रमनुवर्तते । 'असंयोगात्–' इत्यतः किदिति च । इक इति सामीप्ये षष्ठी हलि अन्वेति, तदाह इक्समीपादित्यादिना । आत्मनेपदपरकत्वं सिच एव विशेषणम्, न तु लिङः, लिङादेशस्यात्मनेपदस्य लिङः परत्वासंभवात् । 'इकः' किम् ? वह् वक्षीष्ट । सति तु कित्त्वे 'वचिस्वपि–' इति संप्रसारणं स्यात् । 'आत्मनेपदेषु' किम् ? अद्राक्षीत् । इह कित्त्वे सति 'सृजिदृशोर्झल्यमकिति' इत्यम् न स्यात् । अतिप्तेति । लुङस्तादेशे, च्लिः, सिच् । 'झलो झलि' इति लोपः । आत्मनेपदपरकत्वेन सिचः कित्त्वाद् न लघूपधगुणः । अथ तेपृधातोरेदुपधत्वस्य प्रयोजनमाह तितेप इति । इदुदुपधत्वे तु कित्त्वाद् गुणो न स्यादिति भावः । सेट्कोऽयमिति सूचयति तेपितेति । तेपिषीष्ट । अतेपिष्ट । ष्टिपृधातोस्तु 'धात्वादेः षः सः' इति सत्वे ष्टुत्वनिवृत्त्या लटि स्तेपत इति रूपं सिद्धवत्कृत्य लिटि रूपमाह तिष्टिप इति । 'शर्पूर्वाः खयः' इति तकारः शिष्यते, षकारस्य निवृत्तौ ष्टुत्वनिवृत्तेः । कित्त्वान्न गुणः । तिष्टेप इति । ष्टेपृधातोः रूपम् । तेपृ कम्पने चेति । चात्क्षरणे । वस्तुतस्तु चकारेण क्षरणार्थस्य लाभात् पूर्वत्रास्य पाठस्त्यक्तुं शक्यः । केचित्तु देपृ इति वर्गतृतीयादिं पठन्ति । चात्कम्पने गतौ चेति । अनुक्तसमुच्चयार्थश्चकार इति भावः । एतच्च टुवेपृ केपृ गेपृ ग्लेपृ कम्पन इत्येव सिद्धे पृथक्पाठाल्लभ्यते । अर्थभेदादिति । 'ग्लेपृ दैन्ये' इति पूर्वं पठितम् । इह तु अर्थभेदात्

त्मनेपदेषु । 'इको झल्' 'हलन्ताच्च' इति वर्तते । 'असंयोगाल्लिट् कित्' इत्यतः किदिति च, तदाह इक्समीपादित्यादि । इकः किम्, यक्षीष्ट । सति कित्त्वे संप्रसारणं स्यात् । आत्मनेपदेति किम्, अद्राक्षीत् । कित्त्वे सति 'सृजिदृशोर्झल्यमकिति' इत्यम् न स्यात् । आत्मनेपदपरत्वं सिच एव विशेषणं न तु लिङ्स्थानिकस्यात्मनेपदस्य, लिङः परत्वासंभवात् । तेपृ कम्पने च । चकारात्क्षरणार्थस्य लाभादस्य पूर्वत्र पाठस्त्यक्तुं शक्यः । केचित्तु तिपृ तेपृ इति पठन्ति । टुवेपृ । वेपथुः । केपृ गेपृ ग्लेपृ च । योगविभागात्पूर्वोत्तरार्थौ चकारेणानुकृष्येते, तदाह चात्कम्पने ।

३७२ क्षेपृ ३७३ गतौ । त्रपूष् ३७४ लज्जायाम् । त्रपते । २३०१ तृफलभजत्रपश्च । (६-४-१२२) एषामत एकारोऽभ्यासलोपश्च स्यात्किति लिटि सेटि थलि च । त्रेपे त्रेपाते त्रेपिरे । ऊदित्त्वादिड्वा । त्रपिता, त्रप्ता । त्रपिषीष्ट, त्रप्सीष्ट । कपि ३७५ चलने । कम्पते । चकम्पे । रबि ३७६ लबि ३७७ अबि ३७८ शब्दे । ररम्बे । ललम्बे । आनम्बे । लबि ३७९ अवस्रंसने च । कबृ ३८० वर्णे । चकबे । क्लीबृ ३८१ अधार्ष्ट्ये । चिक्लीबे । क्षीबृ ३८२ मदे । क्षीबते । शीभृ ३८३ कत्थने । शीभते । चीभृ ३८४ च । रेभृ ३८५ शब्दे । रिरेभे । अभिरभी क्वचित्पठ्येते । अम्भते । रम्भते । ष्टभि ३८६ स्कभि ३८७ प्रतिबन्धे । स्तम्भते । नुम्यनुस्वारः । उत्तम्भते । 'उदः स्थास्तम्भोः–' (सू ११८) इति पूर्वसवर्णः । विस्तम्भते । 'स्तम्भेः' (सू २२७२) इति षत्वं तु न भवति ।

पुनः पाठः । अन्यथा ग्लेपृ दैन्ये कम्पने गतौ चेति गौरवं स्यादिति भावः । त्रपूषिति । ऊकारः षकारश्च इत् । अदुपधः । संयुक्तहल्मध्यस्थत्वादेत्त्वाभ्यासलोपयोरप्राप्तावाह तृफल । 'अत एकहल्मध्ये–' इत्यतः अत इति लिटीति चानुवर्तते । 'घ्वसोः–' इत्यत एदिति अभ्यासलोपश्चेति च, 'गमहन–' इत्यस्मात् कितीति, 'थलि च सेटि' इति सूत्रं च, तदाह एषामिति । गुणशब्देन भाविताकारवत्त्वाद्विरूपादेशादित्वादेकहल्मध्यस्थत्वाभावाच्चाप्राप्ते विधिरयम् । आनम्ब इति । द्विहल्त्वान्नुट् । ष्टभि स्कभीति । आद्यः षोपदेशः, ष्टुत्वेन तकारस्य टकारनिर्देशेन दन्त्यपरकसादित्वात्, ततः षस्य सत्वे ष्टुत्वस्य निवृत्तिः, तदाह स्तम्भत इति । नुम्यनुस्वार इति । इदित्त्वान्नुमि 'नश्चापदान्तस्य–' इति तस्यानुस्वारः । 'अनुस्वारस्य ययि–' इति तस्य परसवर्णो मकारः । ष्टम्भ इत्येव पाठे तु प्रतिपदोक्तत्वाद् 'उदः स्था–' इत्यत्र अस्यैव ग्रहणं स्यादिति भावः । पूर्वसवर्ण इति । सकारस्य थकारः ।

गतौ चेति । योगविभागसामर्थ्यादेवार्थद्वयलाभे चकारो व्यर्थ इत्यन्ये । पुनः पाठ इति । दैन्ये पठितस्य कम्पनाद्यर्थलाभार्थमिति भावः । तृफल । तरतेरकारस्य गुणशब्देन भावितत्वात्फलभजोर्वैरूप्यसंपादकादेशादित्वात् त्रपतेस्त्वेकहल्मध्यस्थत्वाभावादप्राप्ते विधिरयम् । तेरतुः, तेरुः । फेलतुः, फेलुः । भेजतुः, भेजुः । अबि शब्दे । अस्माद् 'गुरोश्च हलः' इति अप्रत्यये अम्बाशब्दः । तिस्रः अम्बा अकारोकारमकारात्मकाः शब्दा यस्य इति बहुव्रीहौ 'शेषाद्विभाषा' इति कप्रत्यये त्र्यम्बक इत्येके । केचित्तु त्रीणि अम्बकानि नेत्राणि यस्येति विगृह्णन्ति । अभिरभी इति । 'सर्वधातुभ्योऽसुन्' इत्यधिकारे 'उदके नुम्भौ च' इति वक्ष्यमाणत्वाद् धात्वन्तरेणापि अम्भःशब्दः सिध्यतीति बोध्यम् । अम्भस्तोयम्, तस्यापत्यमाम्भिः भीष्मः । 'अम्भसो

श्नुविधौ निर्दिष्टस्य सौत्रस्यैव तत्र ग्रहणात्। तद्बीजं तु '-स्थास्तम्भोः-' (सू ११८) इति पवर्गीयोपधपाठः, 'स्तन्भेः' (सू २२७२) इति तवर्गीयोपधपाठश्चेति माधवः। केचिदस्य टकार औपदेशिक इत्याहुः, तन्मते विष्टम्भते, ष्टम्भते, टष्टम्भे। जभी ३८८ जृभि ३८९ गात्रविनामे। **२३०२ रधिजभोरचि।** (७-१-६१) एतयोर्नुमागमः स्यादचि। जम्भते। जजम्भे। जम्भिता। अजम्भिष्ट। जृम्भते। जजृम्भे। शल्भ ३९० कत्थने। शशल्भे। वल्भ ३९१ भोजने। दन्त्योष्ठ्यादिः। ववल्भे। गल्भ ३९२ धार्ष्ट्ये। गल्भते। श्रम्भु ३९३ प्रमादे। तालव्यादिर्दन्त्यादिश्च। श्रम्भते। स्रम्भते वा। ष्टुभु

तस्य 'खरि च' इति चर्त्वे तकार इत्यर्थः। अत्र यद्वक्तव्यं तत् 'उदःस्थास्तम्भोः-' इत्यत्र हल्सन्धौ प्रपञ्चितम्। **विस्तम्भत इति।** सात्पदाद्योरिति षत्वनिषेध इति भावः। नन्वेवमपि 'स्तन्भेः' इति षत्वं कुतो न स्यादित्यत आह **स्तन्भेरिति षत्वं तु न भवतीति।** कुत इत्यत आह **श्नुविधाविति।** 'स्तन्भुस्तुन्भुस्कन्भुस्कुन्भुस्कुञ्भ्यः श्नुश्च' इति सूत्रे निर्दिष्टस्यैव प्रतिपदोक्तस्य षत्वविधौ ग्रहणादित्यर्थः। नन्वेवं सति 'उदःस्थास्तम्भोः-' इति पूर्वसवर्णविधावपि सौत्रस्यैव ग्रहणं स्यादित्यत आह **तद्बीजं त्विति।** षत्वविधौ सौत्रस्यैव ग्रहणम्, पूर्वसवर्णविधौ तु तदन्यस्यापीत्यत्र प्रमाणमित्यर्थः। ननु पूर्वसवर्णविधौ मोपधस्य, षत्वविधौ तु नोपधस्य पाठ इत्यत्र किं प्रमाणमित्यत आह **इति माधव इति।** पाणिनिशिष्यपरम्परैव तत्र प्रमाणमिति भावः। लिटि 'शर्पूर्वाः खयः' इति षकारस्य निवृत्तौ ष्टुत्वनिवृत्त्या तकारः शिष्यते। तस्तम्भे। **टकार औपदेशिक इति।** स्वाभाविक एव टकारो न तु ष्टुत्वसंपन्न इत्यर्थः। **तन्मते विष्टम्भत इति।** तथा च षकारस्यापि स्वाभाविकत्वात् षत्वविधौ स्तन्भेरेव ग्रहणेऽपि षकारो निर्बाध इति भावः। **टष्टम्भ इति।** 'शर्पूर्वाः-' इति टकार एव शिष्यत इति भावः। **जभी जृभि गात्रविनाम इति।** गात्रस्य विनामः वक्रभावः। आद्य ईदित्। द्वितीय इदित्। आद्यस्य ईदित्त्वं 'श्वीदितो निष्ठायाम्' इति इण्निषेधार्थम्। **रधिजभोः।** 'रध हिंसायाम्' इति श्यन्विकरणस्य चतुर्थ्यन्तस्य इका निर्देशः। 'इदितो नुम् धातोः' इत्यतो नुमित्यनुवर्तते, तदाह **एतयोरिति।** अनिदित्त्वाद् नुंविधिः। **जम्भत इति।** शपि नुम्। जम्भितेत्यादाविटि अच्परकत्वान्नुम्। 'अचि' किम्? रद्धा, जब्धम्। **श्रम्भु इति।** अकारमध्यः। **ष्टुभु स्तम्भ इति।** ष्टुत्वेन तकारस्य टः। षोपदेशोऽयम्।

लोपश्च' इति बाह्वादिपाठादिञि सलोपः। **तद्बीजं त्विति।** पूर्वसवर्णप्रवृत्तेः षत्वाप्रवृत्तेश्च बीजमित्यर्थः। **रधिजभोरचि।** रन्धयति। परापि वृद्धिर्नित्येन नुमा

२१४ स्तम्भे। स्तोभते। विष्टोभते। तुष्टुभे। व्यष्टोभिष्ट।

अथ परस्मैपदिनः। गुपू २१५ रक्षणे। २३०३ **गुपूधूपविच्छिपणिपनिभ्य आयः।** (३-१-२८) एभ्य आयप्रत्ययः स्यात् स्वार्थे। 'पुगन्त-' (सू २१८९) इति गुणः। २३०४ **सनाद्यन्ता धातवः।** (३-१-३२) सनादयः कमेर्णिङन्ताः प्रत्यया अन्ते येषां ते धातुसंज्ञाः स्युः। धातुत्वाल्लडादयः। गोपायति। २३०५ **आयादय आर्धधातुके वा।** (३-१-३१)

विष्टोभत इति। 'उपसर्गात्सुनोति-' इति। षत्वम्। **व्यष्टोभिष्टेति।** 'प्राक्सितादड्व्यवायेऽपि' इति षत्वम्। तिपृ इत्यादयः स्तोभत्यन्ता अनुदात्तेतो गताः।

गुपू रक्षण इति। ऊदिदयम्। **गुपूधूप। एभ्य इति।** गुपू धूप विच्छि पणि पनि इत्येभ्य इत्यर्थः। अर्थनिर्देशाभावादाह **स्वार्थ इति।** आयप्रत्ययः अकारान्तः। तत्फलं तु 'गोपायतं नः सुमनस्यमानः' इत्यत्र गोपायेत्यस्य धातुस्वरेणान्तोदात्तत्वेन शबकारेण एकादेशस्यापि 'एकादेश उदात्तेनोदात्तः' इत्युदात्तत्वे, तमित्यस्य अदुपदेशात् परलसार्वधातुकत्वेन अनुदात्तस्य 'उदात्तादनुदात्तस्य स्वरितः' इति स्वरितत्वमिति बोध्यम्। 'धातोरेकाचः-' इत्यतो धातोरित्यनुवृत्त्या धातोरिति विहितत्वादायप्रत्ययस्यार्धधातुकत्वात् तत्कार्यं गुणादि भवति, तदाह **पुगन्तेति गुण इति।** नन्वायप्रत्ययान्तस्य भ्वादिषु पाठाभावेन धातुत्वाभावात् कथमस्माल्लडादय इत्यत आह **सनाद्यन्ताः।** 'गुप्तिज्किद्भ्यः सन्' इत्यारभ्य 'कमेर्णिङ्' इत्यन्तैः सूत्रैः सनादिप्रत्ययान्विधाय सूत्रमिदं पठितम्। सन् आदिर्येषां ते सनादयः णिङ्प्रत्ययपर्यन्ताः, ते अन्ते येषां ते सनाद्यन्ता इति विग्रहः, तदाह **सनादयः कमेर्णिङन्ता इति।** 'सन्क्यच्काम्यच्क्यङ्क्यषोऽथाचारक्विब्णिज्यङौ तथा। यगाय ईयङ् णिङ् चेति द्वादशामी सनादयः॥' इति संग्रहः। संज्ञाविधौ प्रत्ययग्रहणे तदन्तग्रहणप्रतिषेधादिह तदन्तग्रहणम्। **धातुत्वादिति।** आयप्रत्ययान्तस्येत्यर्थः। **गोपायतीति।** शपि 'अतो गुणे' इति पररूपम्। **आयादयः।** आय आदिर्येषां ते आयादयः।

बाध्यते। अचीति किम्, रद्धा, जम्भा। **सनाद्यन्ताः। सनादय इति।** 'सन्क्यच्काम्यच्क्यङ्क्यषोऽथाचारक्विप्णिज्यङौ तथा। यगाय ईयङ् णिङ् चेति द्वादशामी सनादयः'। **धातुत्वादिति।** प्रत्ययविशिष्टस्य धातुत्वादित्यर्थः। सुप्तिङन्तमित्यनेन 'संज्ञाविधौ प्रत्ययग्रहणे तदन्तग्रहणं नास्ति' इति ज्ञापितत्वाद्विशिष्टस्य धातुसंज्ञालाभाय अस्मिन् सूत्रे अन्तग्रहणं कृतम्। 'भूवादयो धातवः' इत्यस्यानन्तरं सनाद्यन्ताश्चेति न सूत्रितम्। सनादयो द्वादशैवेति निर्धारणाभावापत्तेः। 'सनाद्यन्ता धातवः' इत्यस्यानन्तरं तु 'भूवादयश्च' इति पठित्वा धातव इत्येतत्तत्र त्यक्तुं शक्यम्।

आर्धधातुकविवक्षायामायादयो वा स्युः । २३०६ **कास्प्रत्ययादाममन्त्रे लिटि ।** (३-१-३५) कास्धातोः प्रत्ययान्तेभ्यश्चाम्स्याल्लिटि न तु मन्त्रे। 'कास्यनेकाज्ग्रहणं कर्तव्यम्'। सूत्रे प्रत्ययग्रहणमपनीय तत्स्थानेऽनेकाच इति वाच्यमित्यर्थः। २३०७ **आर्धधातुके ।** (६-४-४६) इत्यधिकृत्य। २३०८ **अतो लोपः ।** (६-४-४८) आर्धधातुकोपदेशकाले यदकारान्तं तस्याकारस्य

आय ईयङ् णिङ् चेति त्रय आयादयो मताः। 'गुपूधूपविच्छिपणिपनिभ्य आयः', 'ऋतेरीयङ्' 'कर्मणिङ्' इत्युत्तरमस्य सूत्रस्य पाठात्। **विवक्षायामिति** । 'आर्धधातुके' इति विषयसप्तमीति भावः। परसप्तमीत्वे तु गोपायितेत्यत्र अतो लोपो न स्यात्, आर्धधातुकोपदेशकाले अदन्तत्वाभावादिति भावः। तथा च लिटि आयप्रत्ययस्य विकल्पः स्थितः। तत्र आयप्रत्ययपक्षे आह **कास्प्रत्ययात्** । आम् अमन्त्रे इति च्छेदः। 'चकासृ दीप्तौ' 'जागृ निद्राक्षये' इत्यादिभ्योऽपि लिटि आमिष्यते, तदर्थमाह **कास्यनेकाजिति** । ननु यद्यस्मिन् वार्तिके सूत्रस्थं प्रत्ययग्रहणमपि संबध्यते। तदा कासृधातोश्च अनेकाचश्च प्रत्ययान्ताच्चेति लभ्यते। ततश्च अ इवाचरति अति क्विबन्ताल्लडादयः। लिटि औ अतुरित्यादीष्टं न सिध्येत्, प्रत्ययान्तत्वेन आमः प्रसङ्गात्। यदि तु कासृधातोश्च अनेकाचः प्रत्ययान्ताच्चेति व्याख्यायेत, तदा चकासृजागृादिभ्यो न स्यादित्यत आह **प्रत्ययग्रहणमपनीयेति** । तथा च कासृधातोरनेकाचश्च आमित्येतावदेव लभ्यत इति नोक्तदोषद्वयमिति भावः। वस्तुतस्तु अ इवाचरति अतीत्यादि नास्त्येवेति सुब्धातुनिरूपणे वक्ष्यते। तथा च गोपाय आमिति स्थितम्। **अतो लोपः** । 'अनुदात्तोपदेशवनति–' इत्यत उपदेशग्रहणमनुवर्तते।

आयादयः । आयेयङ्णिङ इत्यर्थः। **विवक्षायामिति** । परसप्तम्यां तु आर्धधातुकोपदेशकाले यददन्तमित्यनुपदं वक्ष्यमाणं न संगच्छेतेति भावः। अन्ये तु 'गुपू रक्षणे' इत्यस्मात् क्तिनि पश्चादाय्प्रत्यये गोपायतिरित्यनिष्टं प्रसज्येत, विवक्षायामित्युक्ते तु आय्प्रत्यये कृते क्तिनं बाधित्वा 'अप्रत्ययात्' इत्यकारप्रत्यये टापि च गोपाया धूपायेति सिध्यतीत्याहुः। **कास्प्रत्ययात्** । अमन्त्रेति किम्, कृष्णं नोनाव। अच्छन्दसीति तु नोक्तम्। मन्त्रभिन्ने छन्दसि आम इष्टत्वात्। यथा 'पुत्रमामन्त्रयामास', प्रत्ययान्तत्वादाम्। 'अथ ह शुनःशेप ईक्षांचक्रे', 'इजादेश्च–' इत्याम्। इह चुलुम्पचकासृदरिद्रादिभ्य आमोऽप्राप्तौ 'कास्यनेकाच–' इति वार्तिकमारभ्यते। **प्रत्ययग्रहणमपनीयेति** । अन्यथा अ इवाचरति अति। अस्य लिटि औ अतुरित्यादि वक्ष्यमाणं न सिध्येदिति भावः। अन्ये तु भाष्यवार्तिकयोः प्रत्ययग्रहणमपनीयेत्यनुक्त्या प्रत्ययान्तादेकाचोप्याम् भवत्येव। अ इवाचरति इत्याचारे क्विपि लिटि आंचकार

लोपः स्यादार्धधातुके परे । गोपायांचकार, गोपायांबभूव, गोपायामास । जुगोप जुगुपतुः । ऊदित्त्वाद्वेट् । जुगोपिथ, जुगोप्थ । गोपायिता, गोपिता, गोप्ता । गोपाय्यात्, गुप्यात् । अगोपायीत्, अगोपीत्, अगौप्सीत् । धूप ३९६

'आर्धधातुके' इत्यधिकृतम् । तदिह आवर्तते । एकमुपदेशे अन्वेति । द्वितीयं तु लोपे परनिमित्तम्, तदाह **आर्धधातुकोपदेश इत्यादिना** । 'आर्धधातुकोपदेशे' इति किम् ? अय वय गतौ, आभ्यां क्विपि, 'लोपो व्योः–' इति लोपे, 'ह्रस्वस्य पिति–' इति तुकि, अपृक्तलोपे अत् वत् इतीष्यते । अत्र यलोपे सति अतो लोपो न भवति, आर्धधातुकोपदेशकाले धातोर्यकारान्तत्वात् । 'आर्धधातुकोपदेशे' इत्यत्र आर्धधातुकग्रहणाभावे चिकीर्षितमित्यत्र अल्लोपो न स्यात्, सन उपदेशकाले नकारान्तत्वात् । आर्धधातुकग्रहणे तु न दोषः, अनुबन्धविनिर्मुक्तात् सन्प्रत्ययादेव क्तप्रत्ययस्य आर्धधातुकस्योत्पत्तेः । 'आर्धधातुके परे' इति किम् ? कथयति । चुरादावदन्तोऽयम् । अत्र उपधावृद्धिर्न भवति, 'अचः परस्मिन्–' इत्यल्लोपस्य स्थानिवत्त्वात् । आर्धधातुके पर इत्यनुक्तौ तु अल्लोपस्य परनिमित्तकत्वाभावात् स्थानिवत्त्वं न स्यात् । तथा च प्रकृते गोपाय आमिति स्थिते अतो लोपे गोपायामिति सिध्यति । यद्यपि सवर्णदीर्घेणाप्येतत्सिद्धम्, तथापि न्याय्यत्वादतो लोप उपन्यस्तः । आयप्रत्ययाभावपक्षे आह **जुगोपेति** । पित्त्वेन कित्त्वाभावाल्लघूपधगुणः । **जुगुपतुरिति** । कित्त्वान्न गुणः । **ऊदित्त्वाद्वेडिति** । थलादाविति शेषः । जुगुपिव, जुगुप्व । जुगुपिम, जुगुप्म । क्रादिनियमस्तु नञ्प्राप्तस्यैवाभावस्य, नतु विभाषादिलभ्यस्येति षिधू शास्त्र इत्यत्रोक्तम् । **गोपायितेति** । लुटि आयप्रत्ययपक्षे नित्यमिट् । आयप्रत्ययाभावपक्षे इड्विकल्पः । ऊदित्त्वस्य केवले चरितार्थत्वात्, तदाह **गोपिता, गोप्तेति** । गोपायिष्यति, गोपिष्यति, गोप्स्यति । गोपायतु । अगोपायत् । गोपायेत् । आशीर्लिङि आयप्रत्ययपक्षे अतो लोपे रूपमाह **गोपाय्यादिति** । आयप्रत्ययाभावे आह **गुप्यादिति** । लुङि सिचि आयप्रत्ययपक्षे आह **अगोपायीदिति** । आयप्रत्ययाभावपक्षे इटि रूपमाह **अगोपीदिति** । 'इट ईटि' इति सिज्लोपः ।

आंचकतुरित्यादीत्याहुः । **अतो लोपः** । 'अनुदात्तोपदेश–' इति सूत्रादुपदेश इत्यनुवर्तते, तदाह **आर्धधातुकोपदेशेत्यादि** । उपदेशे इति किम्, अय पय[1] गतौ । आभ्यां क्विपि 'वेरपृक्तलोपाद्वलि लोपः पूर्वविप्रतिषेधेन' इति वार्तिकाद् 'लोपो व्योः–' इति यलोपे 'अतो लोपः' इति लोपो माभूत् । अत्, पत् । इह 'ह्रस्वस्य पिति–' इति तुक् । आर्धधातुके पर इति किम्, कथयति । वृद्धौ कर्तव्यायां 'अचः परस्मिन्–' इति स्थानिवत्त्वं यथा स्यात् । **गोपायामिति** । नन्विह आयप्रत्ययस्यादन्ततामाश्रित्य

---

१ 'पय' इति तत्त्वबोधिन्याम् ।

संतापे । धूपायति । धूपायांचकार, दुधूप । धूपायितासि, धूपितासि । जप ३९७ जल्प ३९८ व्यक्तायां वाचि । जप मानसे च । चप ३९९ सान्त्वने । षप ४०० समवाये । समवायः संबन्धः सम्यगवबोधो वा । सपति । रप ४०१ लप ४०२ व्यक्तायां वाचि । चुप ४०३ मन्दायां गतौ । चोपति । चुचोप । चोपिता । तुप ४०४ तुम्प ४०५ त्रुप ४०६ त्रुम्प ४०७ तुफ ४०८ तुम्फ ४०९ त्रुफ ४१० त्रुम्फ ४११ हिंसार्थाः । तोपति । तुतोप । तुम्पति । तुतुम्प । तुतुम्पतुः । संयोगात्परस्य लिटः कित्त्वाभावान्नलोपो न । 'किदाशिषि' (सू २२१६) इति कित्वान्नलोपः । तुप्यात् । 'प्रात्तुम्पतौ गवि कर्तरि' इति पारस्करादिगणे पाठात्सुट् । प्रस्तुम्पति गौः । श्तिपा निर्देशाद्यङ्लुकि न, प्रतोतुम्पीति । त्रोपति । त्रुम्पति । तोफति । तुम्फति । त्रोफति । त्रुम्फति । इहाद्यौ द्वौ पञ्चमषष्ठौ च नीरेफाः । अन्ये सरेफाः । आद्याश्चत्वारः प्रथमान्ताः । ततो द्वितीयान्ताः । अष्टावप्युकारवन्तः । पर्प ४१२ रफ ४१३ रफि ४१४ अर्ब ४१५ पर्ब ४१६ लर्ब ४१७ बर्ब ४१८ मर्ब ४१९ कर्ब ४२० खर्ब ४२१ गर्ब ४२२ शर्ब ४२३ षर्ब ४२४ चर्ब ४२५ गतौ । आद्यः प्रथमान्तः । ततो द्वौ द्वितीयान्तौ । तत एकादश तृतीयान्ताः । द्वितीयतृतीयौ मुक्त्वा सर्वे रोपधाः । पर्पति । पपर्प । रफति । रम्फति । अर्बति । आनर्ब । पर्बति । लर्बति । बर्बति । पवर्गीयादिरयम् । मर्बति । कर्बति । खर्बति । गर्बति । शर्बति । सर्बति । चर्बति । कुबि ४२६ आच्छादने । कुम्बति । लुबि ४२७ तुबि ४२८ अर्दने । लुम्बति । तुम्बति । चुबि ४२९

'नेटि' इति हलन्तलक्षणवृद्धेर्निषेधः । इडभावे तु इटः परत्वाभावाद् न सिज्लोप इत्याह **अगौप्सीदिति** । 'वदव्रज-' इति वृद्धिः । अगोपायिष्यत्, अगोपिष्यत्, अगोप्स्यत् । **धूप संताप इति** । 'गुपूधूप-' इत्याद्यः । आर्धधातुके तद्विकल्पः । **षप समवाय इति** । षोपदेशोऽयम् । **चुप मन्दायामिति** । चवर्गप्रथमादिरयम् । च्छवर्गद्वितीयादिस्त्वनिरुक्तः । **तुप तुम्पेति** । अष्टावप्युदुपधाः तृतीयचतुर्थौ सप्तमाष्टमौ च रेफवन्त इति मूले स्पष्टीभविष्यति । तुतुम्पतुरित्यत्र नलोपमाशङ्क्याह **संयोगादिति** । आशीर्लिङि विशेषमाह **किदाशिषीति** । **प्रात्तुम्पताविति** । श्तिपा निर्देशोऽयम् । प्रात् तुम्पधातौ परे सुट् स्याद् गवि कर्तरि सतीत्यर्थः । तुम्पधातोः सुड् आद्यवयवः । सुड्विधावस्मिन् तुम्पताविति श्तिपा निर्देशस्य प्रयोजनमाह **श्तिपा निर्देशाद्यङ्लुकि नेति** । श्तिपा शपाऽनुबन्धेनेत्युक्तेरिति भावः ।

लोपकरणे फलाभावादुच्चारणार्थ एव तत्राकारोऽस्त्विति चेत् । अत्राहुः—'गोपायतं नः' इत्यत्र गोपायशब्दस्य धातुत्वाद् धातोरन्त उदात्तो भवति । ततः शबकारेणैका-

वकारसंयोगे। जुम्बति। षृभु ४३० षृम्भु ४३१ हिंसार्थौ। सर्भति। ससर्भ। सर्भिता। सृम्भति। ससृम्भ। सृम्भ्यात्। षिभु षिम्भि इत्येके। सेभति। सिम्भति। शुभ ४३२ शुम्भ ४३३ भाषणे। भासने इत्येके। हिंसायाम् इत्यन्ये।

अथानुनासिकान्ताः। तत्र कम्यन्ता अनुदात्तेतो दश। घिणि ४३४ घुणि ४३५ घृणि ४३६ ग्रहणे। नुम्। घुण्तम्। घिण्णते। जिघिण्णे। घुण्णते। जुघुण्णे। घृण्णते। जघृण्णे। घुण ४३७ घूर्ण ४३८ भ्रमणे। घोणते। घूर्णते। इमौ तुदादौ परस्मैपदिनौ। पण ४३९ व्यवहारे स्तुतौ च। पन ४४० च। स्तुतावित्येव संबध्यते पृथङ् निर्देशात्। पनिसाहचर्यात्पणेरपि स्तुतावेवायप्रत्ययः। व्यवहारे तु पणते, पेणे, पणितेत्यादि। स्तुतावनुबन्धस्य केवले चरितार्थत्वादायप्रत्ययान्तान्नात्मनेपदम्। पणायति। पणायांचकार, पेणे। पणायितासि,

---

षृभु षृम्भु इति। ऋदुपधौ षोपदेशौ। **सृम्भ्यादिति**। आशीर्लिङि अनिदित्त्वान्नलोपः। **षिभु षिम्भि इत्येक इति**। आद्य इदुपधो द्वितीय इदित्। **शुभ शुम्भेति**। द्वितीयस्य आशीर्लिङि अनिदित्त्वान्नलोपः। इति गुपू इत्यादयः पवर्गीयान्ताः परस्मैपदिनो गताः।

कम्यन्ता इति। कमु कान्तौ इत्येतत्पर्यन्ता इत्यर्थः। **घुण घूर्णेति**। द्वितीयस्य दीर्घपाठः स्पष्टार्थः, 'उपधायां च' इत्येव दीर्घसिद्धेः। केचित्तु घुर्णेति ह्रस्वमेव पठन्ति। **स्तुतावित्येवेति**। न तु व्यवहार इत्येवकारार्थः। **पृथङ्निर्देशादिति**। अन्यथा पण पन व्यवहारे स्तुतौ चेत्येव निर्दिशेदिति भावः। यद्यपि पृथङ्निर्देशो यथासंख्यनिवृत्त्यर्थ इत्यपि वक्तुं शक्यम्, तथापि संप्रदायानुरोधादेवमुक्तम्। **पनिसाहचर्यादिति**। पनधातुः स्तुतावेव वर्तते तत्साहचर्याद् 'गुपूधूपविच्छि–' इत्यत्र पणधातुरपि स्तुत्यर्थक एव गृह्यते, नतु व्यवहारार्थकः। अतः स्तुतावेव पणधातोरायप्रत्ययः। न तु व्यवहारे इत्यर्थः। क्रेतव्यद्रव्यस्य मूल्यनिर्धारणाय प्रश्नप्रतिवचनात्मको व्यवहारः। ननु स्तुतौ पणायतीति रूपं वक्ष्यमाणमनुपपन्नं पणधातोरनुदात्तेत्त्वेनात्मनेपदापत्तेः। न च आयप्रत्ययान्तस्यानुदात्तेत्त्वं नेति शङ्क्यम्, पणधातौ श्रुतस्यानुदात्तेत्त्वस्य 'आनर्थक्यात्तदङ्ग–' न्यायेन आयप्रत्ययान्ते अन्वयोपपत्तेरित्यत आह **स्तुताविति**। अनुबन्धस्य अनुदात्तात्मकस्य इत

देशेऽपि 'एकादेश उदात्तेन–' इत्युदात्त एव, तकाराकारस्तु तास्यनुदात्तेन्ङिददुपदेशात्' इत्यनुदात्तः। ततश्च 'उदात्तादनुदात्तस्य–' इति स्वरितो भवति। 'स्वरितात्संहितायामनुदात्तानाम्' इति न इत्यस्य एकश्रुतिः। आयप्रत्ययस्य अनदन्तत्वे नेदमिष्टं सिध्यतीति। **स्तुतावेवेति**। भट्टिस्तु व्यवहारेऽपि आयं प्रायुङ्क्त। 'न चोपलेभे वणिजं पणायाम्'

पणितासे । पणाय्यात्, पणिषीष्ट । पनायति । पनायांचकार, पेने । भाम ४४१ क्रोधे । भामते । बभामे । क्षमूष् ४४२ सहने । क्षमते । चक्षमे । चक्षमिषे, चक्षंसे । चक्षमिध्वे, चक्षन्ध्वे । चक्षमिवहे । २३०९ **म्वोश्च** । (८-२-६५) मान्तस्य धातोर्मस्य नकारादेशः स्यान्मकारे वकारे च परे । णत्वम् । चक्षण्वहे । चक्षमिमहे, चक्षण्महे । क्षमिष्यते, क्षंस्यते । क्षमेत । आशिषि क्षमिषीष्ट, क्षंसीष्ट । अक्षमिष्ट, अक्षंस्त । कमु ४४३ कान्तौ । कान्तिरिच्छा । २३१० **कमेर्णिङ्** । (३-१-३०) स्वार्थे । ङित्वात्तङ् । कामयते । २३११ **अयामन्ताल्वाय्ये-**

आर्धधातुकविषये कदाचिदायप्रत्ययविनिर्मुक्ते चरितार्थत्वादायप्रत्ययान्तादात्मनेपदं नेत्यर्थः । एवं च तुल्यन्यायत्वाद् 'एकाच उपदेशे–' इति निषेधोऽपि नेति सूचितम् । **क्षमूष् सहन इति** । 'षिद्भिदादिभ्योऽङ्' इत्यर्थं[1] षित्त्वम् । ऊदित्त्वादिड्विकल्पं मत्वाह **चक्षमिषे, चक्षंस इति** । इडभावपक्षे 'अनुनासिकस्य क्विझलोः–' इति दीर्घस्तु न भवति, क्विसाहचर्येण तिङ्भिन्नस्यैव झलादेः तत्र ग्रहणात् । वहिमह्योरिडभावपक्षे विशेषमाह **म्वोश्च** । 'मो नो धातोः' इत्यनुवर्तते, तदाह **मान्तस्येति** । **णत्वमिति** । षात्परत्वाद् 'अट्कुप्वाङ्–' इति नकारस्य णत्वमित्यर्थः । **कमु कान्ताविति** । 'उदितो वा' इति क्त्वायाम् इड्विकल्पार्थमुदित्त्वम् । कान्तिशब्दस्य प्रभापरत्वभ्रमं वारयति **कान्तिरिच्छेति** । स्वर्गकाम इत्यादौ कमेरिच्छायां प्रयोगबाहुल्यदर्शनादिति भावः । 'कामोऽभिलाषस्तर्षश्च' इत्यमरः । **कमेर्णिङ्** । शेषपूरणेन सूत्रं व्याचष्टे **स्वार्थ इति** । अर्थविशेषानिर्देशादिति भावः । णङावितौ । 'णेरनिटि' इत्यत्र उभयोर्ग्रहणाय अनुबन्धकरणम् । **ङित्त्वात्तङिति**। अनुदात्तेत्त्वं तु णिङभावे चकम इत्यादौ चरितार्थमिति भावः । **कामयत इति**। णिङि 'अत उपधायाः' इति वृद्धौ कामि इति णिङन्तम् । 'क्ङिति च' इति निषेधस्तु न, अनिग्लक्षणत्वात् । णिङन्तस्य धातुत्वाद् लडादयः । तत्र लटि शपि गुणे अयादेशे कामयत इति रूपम् । कामयेते इत्यादि सुगमम् । लिटि 'कास्यनकाचः–' इत्यामि, 'आमः' इति लिटो लोपे, कामि आम् इति स्थिते, 'सार्वधातुक–' इति गुणं बाधित्वा 'णेरनिटि' इति वक्ष्यमाणे णिलोपे प्राप्ते **अयामन्त** । अय्

इति । वणिजां व्यवहारमित्यर्थः । 'अ प्रत्ययात्' इति आयप्रत्यान्तादकारप्रत्यये टाप् । **चक्षंस इति** । इह 'अनुनासिकस्य क्विझलोः–' इत्युपधादीर्घो न कृतः, संज्ञापूर्वकविधेरनित्यत्वादिति स्थितस्य गतिमुत्प्रेक्षयन्ति । **कमु** कान्तौ । अस्य णिङभावे 'उदितो वा' इति क्त्वायामिड्विकल्पः । कमित्वा, कान्त्वा । निष्ठायां तु 'यस्य

---

1 'इत्याद्यर्थम्' इति क ।

त्विष्णुषु । (६-४-५५) आम् अन्त आलु आय्य इत्नु इष्णु एषु णेरया-देशः स्यात् । वक्ष्यमाणलोपापवादः । कामयांचक्रे । 'अयादय आर्धधातुके वा' (सू २३०५) । चकमे । कामयिता, कमिता । कामयिष्यते, कमिष्यते । **२३१२ णिश्रिद्रुस्रुभ्यः कर्तरि चङ् । (३-१-४८)** ण्यन्तात् श्र्यादि-भ्यश्च च्लेश्चङ् स्यात्कर्त्रर्थे लुङि परे । अकाम् इ अ त इति स्थिते । **२३१३ णेरनिटि । (६-४-५१)** अनिडादावार्धधातुके परे णेर्लोपः स्यात् । पर-त्वाद् 'एरनेकाचः-' (सू २७२) इति यणि प्राप्ते । णयल्लोपावियङ्यण्गुण-

---

इति छेदः । 'णेरनिटि' इत्यतो णेरित्यनुवर्तते, तदाह **णेरयादेशः स्यादिति** । तथा च कामयामित्यामन्तं स्थितम् । ततः 'कृञ्चानुप्रयुज्यते-' इत्यनुप्रयोगाल्लिडिति मत्वाह **कामयांचक्र इति** । णिङ आयादिष्वन्तर्भावाल्लिडादावार्धधातुके तद्वि-कल्पमुक्तं स्मारयति **आयादय इति । चकम इति** । सेट्कोऽयम् । चकमिषे । चकमिध्वे । चकमिवहे । चकमिमहे । **कामयितेति** । लुटि णिङ्पक्षे तासि इटि वृद्धौ गुणे अयादेशे रूपम् । कामयताम् । अकामयत । कामयेत । कामयिषीष्ट, कमि-षीष्ट । अथ णिङन्तात् कामि इत्यस्माल्लुङः तादेशे च्लेः सिजादेशे प्राप्ते **णिश्रि** । णि श्रि द्रु स्रु एषां द्वन्द्वः । प्रत्ययग्रहणपरिभाषया णीति तदन्तस्य ग्रहणम् । 'च्लि लुङि' इत्यतो लुङीति, 'च्लेः सिच्' इत्यतः च्लेरिति चानुवर्तते, तदाह **ण्यन्तादित्या-दिना** । चङावितौ । **णेरनिटि** । 'आर्धधातुके' इत्यधिकृतम् । 'अतो लोपः' इत्यस्माद् लोप इत्यनुवर्तते । अनिटीत्यस्य आर्धधातुकविशेषणत्वात् तदादिविधिः, तदाह **अनि-डादाविति** । तथा च णिलोपे काम् अ त इति स्थिते **परत्वादिति** । 'एरनेकाचः-'

विभाषा' इति निषेधात्कान्तः । **अयामन्ता** । नामन्तेति सूत्रितेऽपि 'णेरनिटि' इति वक्ष्यमाणलोपस्य निषेधे गुणायादेशयोः सतोः कामयांचक्रे इत्यादिरूपाणि सिध्यन्त्येव, तथापि 'ल्यपि लघुपूर्वात्' इत्येवमर्थमयादेशवचनम् । प्रस्तनय्य, सङ्गमय्य । नह्यत्र गुणायादेशौ लभ्येते । आम् , कारयामास । अन्त, गण्डयन्तो मण्डयन्तः । 'तृभूवहिव-सिभासिसाधिगडिमण्डिजिनन्दिभ्यश्च' इत्यौणादिको झच् । 'झोऽन्तः' । 'स्पृहिगृहि-' इत्यालुच् , स्पृहयालुः । 'श्रुदक्षिस्पृहिगृहिभ्यः-' इत्यौणादिक आय्यः, 'स्पृह-याय्यः' । 'स्तनिहृषिपुषि-' इत्यौणादिक एव इत्नुच् , स्तनयित्नुः, 'णेश्छन्दसि' इति इष्णुच् , 'वीरुधः पारयिष्णवः' । **णिश्रिद्रु** । च्लेः सिचोऽपवादः । **णेरनिटि** । णेरिति णिङ्णिचोर्ग्रहणम् । एवमन्यत्रापि बोध्यम् । अनिटीत्यनेनाधिकृतमार्धधातुक इत्येतद्विशेष्यते । 'यस्मिन्विधिः-' इति तदादिविधिः । 'अतो लोपः' इत्यस्माल्लोप इति चानुवर्तते, तदाह, **अनिडादावित्यादि । यणि प्राप्त इति** । ननु परत्वादि-

वृद्धिदीर्घेभ्यः पूर्वविप्रतिषेधेन' इति वार्तिकम्। णिलोपस्य तु पाचयतेः पाक्तिरित्यादि क्तिजन्तमवकाश इति भावः। वस्तुतस्तु 'अनिटि' इति वचनसामर्थ्यादार्धधातुकमात्रमस्य विषयः। तथा चेयङादेरपवाद एवायम्। इयङ् अततक्षत्।

इत्यस्य 'णेरनिटि' इत्यपेक्षया परत्वाण्णिलोपं बाधित्वा यणि प्राप्ते सतीत्यर्थः। कृते तु यणि लोपो दुर्लभो णेरभावात्। स्थानिवत्त्वेऽपि यणा बाधितस्य पुनरुन्मेषो दुर्लभः। वस्तुतस्तु स्थानिवत्त्वमेवेह दुर्लभम्। यणस्थानिनमिकारम् अल्रूपं णित्वरूपेणाश्रित्य प्रवर्तमानस्य णिलोपस्यालिवधित्वेन तत्र स्थानिवत्त्वासंभवात्। स्पष्टा चेयं रीतिः 'भोभगो-' इति सूत्रभाष्ये इति शब्देन्दुशेखरे विस्तरः। **णयल्लोपाविति।** णिलोप इयङ्यणगुणवृद्धिदीर्घेभ्यः, अल्लोपस्तु वृद्धिदीर्घाभ्यां पूर्वविप्रतिषेधेनेति विवेकः। तथा च पूर्वविप्रतिषेधादिह यणं बाधित्वा णिलोपो भवतीति स्थितम्। ननु अततक्षत्, आटिटत्, कारणा, कारकः, कार्यते इति वक्ष्यमाणेषु वार्तिकोदाहरणेषु क्रमेण इयङ्यणगुणवृद्धिदीर्घाणामवश्यं प्राप्तेर्णिलोपस्य निरवकाशत्वादेव इयङादिबाधकत्वसंभवादिदं वार्तिकं व्यर्थम्। सुधियौ, प्रध्यौ, कर्ता, चिकाय, सूयात् इत्यादौ इयङ्यणगुणवृद्धिदीर्घाणां सावकाशत्वादित्यत आह **णिलोपस्य त्विति।** पचधातोर्णिचि उपधावृद्धौ पाचि इति णयन्तात् 'स्त्रियां क्तिन्' इति क्तिनि, 'तितुत्रतथसिसुसरकसेषु च' इति इण्निषेधे 'णेरनिटि' इति णिलोपे कुत्वे पाक्तिरिति स्थितिः। क्तिजन्तमिति पाठे तु 'क्तिच् क्तौ च संज्ञायाम्' इति क्तिच् बोध्यः। पाक्तिरिति कस्यचित्संज्ञा। अत्र इयङादीनाम् अप्रसक्तेर्णिलोपस्यापि सावकाशत्वं तुल्यम्। तत्र अततक्षदित्यादौ परत्वादियङादिप्राप्तौ तन्निवृत्त्यर्थं वार्तिकमिदमारम्भणीयमिति भावः। वार्तिकं व्यर्थमेवेत्याह **वस्तुतस्त्विति।** **आर्धधातुकमात्रमिति।** कृत्स्नमनिडार्धधातुकमस्य णिलोपस्य विषय इत्यर्थः। तथा च अततक्षदित्यादौ

यङ्यणादिविधयो यथासंभवमत्र सन्तु नाम, तेषु स्थानिवद्भावाण्णिग्रहणेन ग्रहणाल्लोपो भविष्यतीति चेत्। नैवं शङ्क्यम्, इयङादेशे अन्त्यलोपः प्रसज्येतेति दोषः स्यात्। एतच्च 'अतो लोपः' इति सूत्रे भाष्ये स्थितम्। न चात्र कारणा कारक इत्यादौ गुणवृद्ध्योः कृतयोरन्तरङ्गत्वादयादेशयोः कृतयोरन्त्यस्य लोपः प्राप्नोतीति कथमियङादेश एव दोष उक्त इति शङ्क्यम्, 'वार्णादाङ्गं बलीयः' इत्ययायौ बाधित्वा णिलोपो भविष्यतीति भाष्याशयात्। **णयल्लोपाविति।** णिलोप इयङ्यणगुणवृद्धिदीर्घेभ्यः पूर्वविप्रतिषेधेन, अल्लोपस्तु वृद्धिदीर्घाभ्यामिति विवेकः। णिलोपस्य निरवकाशत्वेन वार्तिकस्योक्तिसंभव एव नास्तीत्यत आह **पाक्तिरित्यादि क्तिजन्तमिति।** तत्र 'तितुत्र-' इतीण्निषेधादिति भावः। **वचनसामर्थ्यादिति।** अयं भावः—

यण् आटिटत् । गुणः कारणा । वृद्धिः कारकः । दीर्घः कार्यते । २३१४ **णौ चङ्युपधाया ह्रस्वः** । (७-४-१) चङ्परे णौ यदङ्गं तस्योपधाया

परानपि इयङादीन् णिलोपः अपवादत्वाद् बाधते, परापेक्षया अपवादस्य प्रबलत्वात् परत्वादियङादीनां णिलोपबाधकत्वाभ्युपगमे हि णेरनिटीत्यत्र अनिटीति व्यर्थम्। कारयितेत्यादाविडाद्यार्धधातुके गुणेनैव णिलोपस्य बाधसिद्धेः। ततश्च अनिटीति वचनसामर्थ्यादनिडादावार्धधातुके सर्वस्मिन्परे णिलोप इति विज्ञायते । एवं च अततक्षदित्यादावियङादिप्रवृत्तियोग्येऽप्यार्धधातुके सर्वत्र णिलोप इत्यस्य निरवकाशत्वादपवादत्वादेव णिलोपेन इयङादिबाधसिद्धेर्वार्तिकमिदं व्यर्थमिति भावः। **अपवाद एवायमिति**। णिलोप इत्यर्थः। अतो लोपस्तु चिकीर्षक इत्यत्र वृद्धिं चिकीर्ष्यादित्यत्र 'अकृत्सार्वधातुकयोः' इति दीर्घं च बाधित्वा पूर्वविप्रतिषेधाद्भवति। नह्यतो लोपो वृद्धिदीर्घयोरपवादः, गोपायितेत्यादौ वृद्धिदीर्घयोरप्राप्तयोरप्यतो लोपस्यारम्भादित्यलम्। **इयङिति**। उदाहरणसूचनमिदम्। **अततक्षदिति** । तक्षधातोर्ण्यन्तात्लुङि तिपि इकारलोपे चङि द्वित्वे संयोगपूर्वकत्वाद् 'एरनेकाचः–' इति यणभावे इयङि प्राप्ते पूर्वविप्रतिषेधाद् णिलोपे हलादिशेषे अडागमे अततक्षदिति रूपम्। **यणिति**। उदाहरणसूचनम् । **आटिटदिति** । अटधातोर्ण्यन्ताद् आटि इत्यस्माद् लुङि तिपि इकारलोपे चङि टि इत्यस्य द्वित्वे 'एरनेकाचः–' इति यणं बाधित्वा पूर्वविप्रतिषेधाण्णिलोपे आटि वृद्धौ रूपम्। **गुण इति**। उदाहरणसूचनम्। **कारणेति**। 'स्त्रियाम्' इत्यधिकारे कृञ्धातोर्ण्यन्तात् कारि इत्यस्माद् 'ण्यासश्रन्थो युच्' इति युचि अनादेशे 'सार्वधातुकार्धधातुकयोः' इति गुणं बाधित्वा पूर्वविप्रतिषेधाण्णिलोपे णत्वाट्टापि कारणेति रूपम्। **वृद्धिरिति**। उदाहरणसूचनम्। **कारक इति** । कृञ्धातोर्ण्यन्तात्कारि इत्यस्माण्ण्वुलि अकादेशे वृद्धिं बाधित्वा पूर्वविप्रतिषेधाण्णिलोपे रूपम्। **दीर्घ इति**। उदाहरणसूचनम्। **कार्यत इति**। कृञ्धातोर्ण्यन्तात्कारि इत्यस्मात् कर्मणि लटि यकि 'अकृत्सार्वधातुकयोः' इति दीर्घं बाधित्वा पूर्वविप्रतिषेधाण्णिलोपः। तथा च प्रकृते काम् इ अ त इत्यत्र 'एरनेकाचः–' इति यणं बाधित्वा णिलोपे काम् अ त इति

णेरित्येतावति सूत्रे कृतेऽप्यार्धधातुक इत्यनुवृत्त्या आर्धधातुके परतो वर्तमानो णिलोप इयङ्यणादिभिर्बाधितः सन् परिशेषात् क्विप्येव स्यादित्यनिटीत्यस्य वैयर्थ्यं प्रसज्येत, तथा चानिडाद्यार्धधातुकं सर्वमप्यस्य विषयो न तु क्विजन्तमेवेति। **अयमिति**। णिलोप इत्यर्थः । अल्लोपांशे तु वचनमपेक्षितमेव। तेन चिकीर्षक इत्यत्र वृद्धिं चिकीर्ष्यादित्यत्र 'अकृत्सार्व–' इति दीर्घं बाधित्वा पूर्वविप्रतिषेधेन 'अतो लोपः' इति लोपो भवतीत्याहुः। **णौ चङ्युपधाया ह्रस्वः**। उपधायाः किम् , अचकाङ्क्षत्।

ह्रस्वः स्यात् । २३१५ **चङि** । (६-१-११) चङि परेऽनभ्यासधात्ववयवस्यैकाचः प्रथमस्य द्वे स्तोऽजादेस्तु द्वितीयस्य । २३१६ **सन्वल्लघुनि चङ्परेऽनग्लोपे** । (७-४-९३) चङ्परे इति बहुव्रीहिः । अन्यपदार्थो णिः । स च 'अङ्गस्य' इति च द्वयमप्यावर्तते । अङ्गसंज्ञानिमित्तं यच्चङ्परं णिरिति यावत् तत्परं यल्लघु तत्परो योऽङ्गस्याभ्यासस्तस्य सनीव कार्यं स्याण्णावग्लोपेऽ-

---

स्थितम् । णौ चङि । अङ्गाधिकारादाह **यदङ्गमिति** । 'उपधायाः' किम्? अचकाङ्क्षत् । 'चङि' किम्? कारयति । 'णौ' किम्? 'चङ्युपधाया' ह्रस्व इत्युच्यमाने अदीदपदित्यत्र दाधातोः ण्यन्ताद् लुङि चङि दा इ अ त् इति स्थिते आकारस्य ह्रस्वे सति पुग् न स्यात् । णावित्युक्तौ तु आकारस्य णौ परत उपधात्वाभावान्न ह्रस्वः । 'द्विर्वचनेऽचि' इति निषेधस्तु न शङ्क्यः, द्वित्वनिमित्तचङ उपधया व्यवहितत्वात् । तथा च प्रकृते कम् अ त इति स्थितम् । **चङि** । 'एकाचो द्वे प्रथमस्य' इति 'अजादेर्द्वितीयस्य' इति चाधिकृतम् । 'लिटि धातोरनभ्यासस्य' इति सूत्रं लिटि इति वर्जमनुवर्तते, तदाह **चङि पर इत्यादिना** । तथा च कम् इत्यस्य द्वित्वे हलादिशेषे क कम् अ त इति स्थितम् । **सन्वल्लघुनि** । अनग्लोप इति च्छेदः । **बहुव्रीहिरिति** । चङ् परो यस्मादिति विग्रह इति भावः । कर्मधारयमाश्रित्य चङि परे इति नार्थः, परग्रहणवैयर्थ्यात् । ननु बहुव्रीह्याश्रयणेऽपि 'अत्र लोपोऽभ्यासस्य' इत्यतः अभ्यासस्येत्यनुवृत्तौ चङ्परके लघुनि परे अभ्यासः सन्वदित्यर्थो लभ्यते । तथा सति अण्यन्तेभ्यो णिश्रिद्रुस्रुभ्यश्चङि द्वित्वे अशिश्रियत् अदुद्रुवत् असुस्रुवदित्यत्रापि सन्वत्त्वं स्यात् । ततश्च 'दीर्घो लघोः' इति सन्वद्भावविषये अभ्यासस्य वक्ष्यमाणो दीर्घः स्यादित्यत आह **अन्यपदार्थो णिरिति** । तथा च चङ्परे णौ इति लभ्यते । अशिश्रियदित्यादौ च णेरभावाद् न सन्वत्त्वमिति भावः । **स चाङ्गस्येति चेति** । बहुव्रीहिगम्यो णिः 'अङ्गस्य' इत्यनुवृत्तं चेत्यर्थः । तत्र णावित्यावृत्तौ एकं लघुनीत्यत्रान्वेति । तथा च चङ्परे णौ यल्लघु तस्मिन्परत इति लभ्यते । द्वितीयं तु अनग्लोपे इत्यत्रान्वेति । तथा च णौ परतो यः अग्लोपः तस्याभावे सतीति लभ्यते । अङ्गस्येत्यावृत्तौ एकं चङ्परे इत्यत्रान्वेति । निमित्तनिमित्तिभावे षष्ठी । तथा च अङ्गसंज्ञानिमित्तभूते चङ्परके वर्णे परे इति लभ्यते । चङ्परकश्च वर्णः अर्थाद् णेरिकार एव । न तु श्रिद्रुस्रुवामन्त्यवर्णः, तस्य अप्रत्ययत्वेन अङ्गसंज्ञाप्रापकत्वाभावात् । एतदर्थमेव अङ्गस्येत्यस्य निमित्तषष्ठ्य-

---

सन्वल्लघुनि । चङ्पर इत्येतावतैव णिरिति न लभ्यते, श्रिद्रुस्रुवामपि चङ्परत्वादत आह **अङ्गसंज्ञानिमित्तमिति** । **अङ्गस्याभ्यास इति** । अङ्गस्य ये द्वे विहिते

---

१ वाक्यमिदं प्रायोऽन्यत्र नोपलभ्यते ।

सति। अथवा अङ्गस्य इति नावर्तते। चङ्परे णौ यदङ्गं तस्य योऽभ्यासो लघुपरस्तस्येत्यादि प्राग्वत्। २३१७ सन्यतः। (७-४-७६) अभ्यासस्यात इकारः स्यात्सनि। २३१८ दीर्घो लघोः। (७-४-६४) अभ्यासस्य

न्ततामाश्रित्य चङ्पर इत्यनेनान्वयोऽभ्युपगतः। चङ्पर इत्येतावतैव तु णाविति न लभ्यते, श्रिद्रुस्रुषु व्यभिचारात्। द्वितीयं त्वङ्गस्येत्येतद् अभ्यासस्येत्यनुवृत्तेन अन्वेति। सन्वदिति सप्तम्यन्ताद्वतिः, तदाह **अङ्गसंज्ञानिमित्तमित्यादिना। अथवेति।** अस्मिन्व्याख्याने चङ्परे इत्येतद् अङ्गस्येत्यत्रान्वेति, न तु लघुनि। अङ्गस्य च प्रत्ययनिमित्तत्वादेव णेरन्यपदार्थस्य लाभः। लघुनीति तु अभ्यासस्येत्यत्रैवान्वेति, तदाह **चङ्परे णौ यदङ्गमित्यादिना। प्राग्वदिति।** सनीव कार्यं स्याण्णाग्लोपे असतीत्यर्थः। अत्र प्रथमपक्ष एव भाष्यसंमतः, अजजागरदित्यत्र चङ्परे णौ यल्लघु तदभ्यासव्यवहितमिति न सन्वत्त्वमिति भाष्योक्तेः। एवं च प्रथमपक्षे उन्देर्ण्यन्ताच्चङि द्वित्वे उन्दिदि अ त् इत्यत्र अभ्यासोत्तरखण्डे चङ्परे णौ लघोरभावेनाभ्यासस्य तथाविधलघुपरकत्वविरहात् सन्वत्त्वाभावान्नाभ्यासदीर्घः। द्वितीयपक्षे तु चङ्परे णौ यदङ्गम् उन्दिद् इत्येतत् तदीयोऽभ्यासश्चङ्मादाय लुप्तं णिमादाय वा लघुपर इति सन्वत्त्वसत्त्वादभ्यासदीर्घ इति भेदः। एवं च प्रकृते ककम् अ त इत्यत्र व्याख्याद्वयेऽपि सन्वत्त्वं स्थितम्। **सन्यतः।** सनि अत इति च्छेदः। 'अत्र लोपः–' इत्यतः अभ्यासस्येत्यनुवर्तते। 'भृञामित्' इत्यस्माद् इदिति, तदाह **अभ्यासस्येति।** किकम् अ त इति स्थितम्। **दीर्घो लघोः।** 'अत्र

तयोः पूर्वोऽभ्यास इत्यर्थः। **अङ्गस्येति नावर्तत इति।** अस्मिंस्तु व्याख्याने चङ्परे इत्येतावतैव णिरिति लभ्यते, श्रिद्रुस्रुषु परेषु अङ्गत्वासम्भवादतो व्याचष्टे **चङ्परे णौ यदङ्गमिति।** चङ्परे इत्यस्यैव व्याख्यानं णाविति ज्ञेयम्। अनग्लोपे किम्, अचकथत्। **सन्यतः।** 'अत्र लोपोऽभ्यासस्य' इत्यतोऽभ्यासस्येति 'भृञामित्' इत्यत इद्ग्रहणं चानुवर्तते, तदाह **अभ्यासस्येत्यादि।** तपरकरणं किम्, पापच्यतेः सन्। पापचिषते। न च सनि योऽभ्यासः सन्निमित्त इति विज्ञानात्तपरकरणाभावेऽपि नोक्तातिप्रसङ्गः अभ्यासस्येह यङ्निमित्तत्वादिति वाच्यम्, तादृशविवक्षायामधीषिषति प्रतीषिषतीत्यादावव्याप्तेः। न हि कार्यी निमित्तत्वेनाश्रीयते। यथाश्रीयेत तर्हि 'द्विर्वचनेऽचि' इति निषेधेन रिस्शब्दस्य द्वित्वाप्रवृत्तावरिरिषतीत्यादि न सिध्येत्। नन्वेवं पिपक्षतीत्यादावव्याप्तिः। अभ्यासस्य सन्परत्वाभावात्। न च 'येन नाव्यवधान–' न्यायेन सन्प्रवृत्त्या व्यवहितेऽप्यभ्यासस्येत्वं स्यादेवेति वाच्यम्, प्रतीषिषतीत्यादावभ्यासस्याव्यवहितसन्परत्वसंभवादुक्तन्यायस्याप्रवृत्तिरिति चेत्। अत्राहुः—सना धातु-

लघोर्दीर्घः स्यात्सन्वद्भावविषये। अचीकमत। णिङभावपक्षे तु 'कमेश्च्लेश्चङ् वक्तव्यः'। णेरभावान्न दीर्घसन्वद्भावौ। अचकमत।

लोपोऽभ्यासस्य' इत्यतः अभ्यासस्येत्यनुवर्तते, तदाह **अभ्यासस्य लघोर्दीर्घ इति**। अभ्यासावयवस्य लघोरित्यर्थः। 'सन्वल्लघुनि चङ्परे–' इति सूत्रं सन्वच्छब्दवर्जमनुवर्तते। तच्च प्राग्वदेव द्वेधा व्याख्येयम्। तथा च फलितमाह **सन्वद्भावविषय इति**। 'सन्यतः' इत्यत्र तपरत्वं स्पष्टार्थमिति 'दीर्घोऽकितः' इति सूत्रे भाष्ये स्पष्टम्। तथा च कि कम् अ तेत्यत्र अभ्यासेकारस्य दीर्घे अभ्यासचुत्वे अडागमे परिनिष्ठितं रूपमाह **अचीकमतेति**। अत्र लघोर्णिपरत्वं येन नाव्यवधानन्यायाद्बोध्यम्। **णिङभावपक्षे त्विति**। 'आयादय आर्धधातुके वा' इति णिङो वैकल्पिकत्वादिति भावः। **कमेश्च्लेश्चङ् वक्तव्य इति**। अण्यन्तत्वादप्राप्तौ वचनम्। **णेरभावादिति**। णिङभावपक्षे कमिधातोरनुदात्तेत्त्वात्तङि प्रथमपुरुषैकवचने च्लेश्चङि द्वित्वे हलादिशेषे अभ्यासचुत्वे अडागमे अचकमतेति रूपं वक्ष्यते। तत्र णेरभावाद् 'दीर्घो लघोः' इत्यभ्यासलघोर्दीर्घो न भवति, तत्र लघुनि चङ्परेऽनग्लोप इत्यनुवर्त्य चङ्परे णावेव तद्विधानोक्तेः। अत एव सन्वत्त्वाभावात् 'सन्यतः' इत्यभ्यासाकारस्य इत्त्वं च न भवतीत्यर्थः। 'दीर्घो लघोः' इति दीर्घविधौ

माक्षिप्य सनि सति यो धातुः सन्नन्तस्तदीयाभ्यासस्येति व्याख्यानान्नोक्तदोषः। न च सनि परे अभ्यासस्येति यथाश्रुतं परित्यज्योक्तव्याख्याने किं मानमिति वाच्यम्, तपरकरणस्यैव तत्र मानत्वात्। किं च अकारग्रहणमपि तत्र मानम्। अन्यथा सन इत्येव ब्रूयात्। तावताप्यधीषिषति प्रतीषिषतीत्यादावित्त्वप्रवृत्तिसिद्धेरिति। **दीर्घो लघोः। लघोरभ्यासस्येति**। ननु अज्झल्समुदायस्याभ्यासस्य लघुसंज्ञा दुर्लभा 'ह्रस्वं लघु' इति सूत्रितत्वात्। नैष दोषः। इमे हि न समानाधिकरणे षष्ठ्यौ किं तु व्यधिकरणे, तथा चाभ्यासावयवस्य लघोर्दीर्घ इत्यर्थः। 'लघुनि चङ्परेऽनग्लोपे' इति सर्वमिहानुवर्तते। तच्च प्राग्वदेव द्वेधा व्याख्येयम्, तदाह **सन्वद्भावविषय इति**। हलादेरिति प्राचोक्तमिहोपेक्षितं निष्प्रमाणत्वात्। न हि मुनित्रयोक्तिं विना हलादेरिति व्याख्यातुमुचितम्। न चैवमौन्दिदत् आट्टिटदित्यादौ दीर्घः स्यादिति शङ्क्यम्, अङ्गलघ्वोरुभयोरपि णिचं प्रति विशेष्यत्वे दीर्घस्य तत्राप्राप्तेः। चङ्परं हि यदङ्गम् उन्द इति न तदीयोऽभ्यासो न वा चङ्परणिच्परं यल्लघु तत्परः। एतेन आट्टिटदित्यादिभाष्योदाहरणमेव 'हलादेः' इति व्याख्याने प्रमाणमिति केषांचिदुत्प्रेक्षापि प्रत्युक्ता। दीर्घाप्राप्त्यैवोदाहरणसौष्ठवस्योक्तत्वात्। लघोः किम्, 'क्षणु हिंसायाम्, अचिक्षणत्। शास्त्रेऽस्मिन् 'कार्यकालं संज्ञापरिभाषम्' 'यथोद्देशं संज्ञा-

संज्ञायाः कार्यकालत्वादङ्गं यत्र द्विरुच्यते।
तत्रैव दीर्घः सन्वच्च नानेकाचिवति माधवः ॥ १ ॥
चकास्त्यर्थापयत्यूर्णोत्यादौ नाङ्गं द्विरुच्यते।

सन्वत्त्वं न निमित्तम्। किंतु लघुनि चङ्पर इत्यस्य तत्रानुवृत्त्या सन्वद्भावविषये तत्प्रवृत्तिः। अतो दीर्घसन्वद्भावाविति पृथगुक्तिः।

अथ पञ्चभिः श्लोकैः सन्वद्भावसूत्रं 'दीर्घो लघोः' इति सूत्रं च विशदयति **संज्ञाया इत्यादिना**। अस्मिन् शास्त्रे कार्यकालं संज्ञापरिभाषमित्येकः पक्षः। कार्यकालमित्यस्य कार्यप्रदेशकमित्यर्थः। अस्मिन्पक्षे तत्तत्कार्यविधिप्रदेशेषु संज्ञाशास्त्रस्य परिभाषाशास्त्रस्य च उपस्थितिः। यथोद्देशं संज्ञापरिभाषमिति पक्षान्तरम्। उद्देशाः संज्ञापरिभाषाशास्त्राम्नानप्रदेशाः, तान् अनतिक्रम्य यथोद्देशम्। संज्ञाशास्त्रं परिभाषाशास्त्रं च स्वप्रदेशे स्थितमेव तत्तद्विध्यपेक्षितं स्वं स्वमर्थं समर्पयतीति यावत्। अस्मिन्पक्षे कार्यप्रदेशेषु संज्ञापरिभाषाभ्यां तदर्थस्यैवोपस्थितिः, न तु संज्ञापरिभाषाशास्त्रयोरिति स्थितिः। 'सन्वल्लघुनि–' इति सूत्रे 'दीर्घो लघोः' इति सूत्रे च अङ्गस्येति अभ्यासस्येति चानुवृत्तम्। तत्र कार्यकालपक्षे 'पूर्वोऽभ्यासः' इति सूत्रं संनिहितम्। ततश्च अङ्गस्य ये द्वे उच्चारणे तयोः पूर्वः अभ्याससंज्ञः, स सन्वद्भवतीति फलितम्। तत्र कृदन्तोच्चारणशब्दयोगादङ्गस्येति कर्मणि षष्ठी, न त्ववयवषष्ठी, कारकषष्ठ्या बलवत्त्वात्। अङ्गं च प्रत्यये परतः कृत्स्नमेव प्रकृतिरूपम्, न तु तदेकदेशः। ततश्च कृत्स्नमङ्गं यत्र द्विरुच्यते न तु तदेकदेशमात्रं तत्रैव 'दीर्घो लघोः' इति दीर्घः 'सन्वल्लघुनि–' इति सन्वद्भावश्च भवति। एवं च अङ्गस्य एकाच्कत्वे सत्येव तयोः प्रवृत्तिः, तत्र कृत्स्नस्याङ्गस्य द्विरुक्तेः। अनेकाच्केषु तु अङ्गेषु न तयोः प्रवृत्तिः, तत्र एकस्यैव एकाचः अङ्गैकदेशस्य द्विरुक्तेरिति माधवो मन्यत इति प्रथमश्लोकस्यार्थः।

परिभाषम्' इति पक्षद्वयमप्यस्ति जातिव्यक्तिपक्षवत्। तथा च 'पूर्वोऽभ्यासः' इत्यस्य 'सन्वल्लघुनि–' इत्यादिना सह पक्षद्वयेऽपि एकवाक्यता समानैव, तथापि कार्यकालपक्षे पदैकवाक्यता, यथोद्देशपक्षे तु वाक्यैकवाक्यतेत्यस्ति विशेषः। तत्रेदानीं कार्यकालपक्षपाति माधवमतं तावद्व्याचष्टे **संज्ञाया** इत्यादिना श्लोकद्वयेन। **अङ्गं यत्रेति**। अयं भावः—'सन्वल्लघुनि–' 'दीर्घो लघोः' इति सूत्रद्वये अङ्गस्येत्यनुवर्तते, अभ्यासस्येति च। तेनाङ्गस्य ये द्वे तयोः पूर्वोऽभ्याससंज्ञकस्तस्येति फलितम्। द्वे इत्यत्र च उच्चारणे इति विशेष्यसमर्पकमध्याहियते, तच्च कृदन्तम्, तद्योगादङ्गस्येति कर्मणि षष्ठी। तेन यत्राङ्गं द्विरुच्यते तत्रैव पूर्वस्य दीर्घसन्वद्भावौ स्त इति। अचीकरत्। अपीपचत्। युक्तं चैतत्। अङ्गस्येति षष्ठ्या कारकविभक्तित्वसम्भवे तदुपेक्ष्य शेषषष्ठी-

किं त्वस्यावयवः कश्चित्तस्मादेकाच्चिवद् द्वयम् ॥ २ ॥
वस्तुतोऽङ्गस्यावयवो योऽभ्यास इति वर्णनात् ।
ऊर्णौ दीर्घोऽर्थापयतो द्वयं स्यादिति मन्महे ॥ ॥ ३ ॥

नानेकाच्चिवत्युक्तं विशदयति **चकास्तीति श्लोकेन** । 'चकासृ दीप्तौ' । अर्थमाचष्टे इत्यर्थे णिचि 'अर्थवेदयोः–' इति प्रकृतेरापुगागमे अर्थापिधातुः । 'ऊर्णुञ् आच्छादने'। एते त्रयः अनेकाच्का धातवः । आदिना 'जागृ निद्राक्षये' इत्यादिसंग्रहः । एभ्यो णयन्तेभ्यश्चङि अङ्गं कृत्स्नं न द्विरुच्यते, किंतु अङ्गस्य कश्चिदेकाजवयव एव द्विरुच्यते । तस्माद् अनेकाच्केषु कृत्स्नस्याङ्गस्य द्विरुक्त्यभावाद् एकाच्केष्वेवाङ्गेषु 'दीर्घो लघोः' इति दीर्घः, 'सन्वल्लघुनि–' इति सन्वद्भावश्चेत्येतद्द्वयं भवति, नत्वनेकाच्काङ्गेष्वित्यर्थः । नन्वेवं सति दिदरिद्रासति इत्यादौ 'हलादिः शेषः' इत्याद्यभ्यासकार्यमनेकाच्केष्वङ्गेषु न स्यात् कृत्स्नाङ्गस्य द्विरुक्त्यभावात् । किंच अजजागरदित्यत्र सन्वत्त्वमाशङ्क्य णिपरकलघोर्गकाराकारस्य जा इत्यनेन व्यवहितत्वादभ्यासस्य न सन्वत्त्वमिति समाहितं भाष्ये । तदेतद् अनेकाच्काङ्गेषु सन्वत्त्वस्याप्रवृत्तौ विरुध्येत, कृत्स्नस्याङ्गस्य द्विरुक्त्यभावादेव तत्र सन्वत्त्वस्याप्राप्तौ तच्छङ्काया एवानुन्मेषादित्यस्वारस्याद्यथोद्देशपक्षमालम्ब्याह **वस्तुत इति** । अङ्गस्येत्यवयवषष्ठी । अङ्गावयवस्याभ्यासस्येति लभ्यते । ततश्च ऊर्णुञि णयन्ते चङि नु इत्येकदेशस्य द्वित्वेऽपि और्णूनुवदित्यत्र 'दीर्घो लघोः' इत्यभ्यासलघुर्दीर्घीभवति । सन्वत्त्वं तु प्रयोजनाभावादुपेक्षितम्, अभ्यासे अकाराभावेन 'सन्यतः' इत्यस्यासंभवात् । अर्थमाचष्टे इत्यर्थे णिचि प्रकृतेरापुकि अर्थापिधातोश्चङि णिलोपे उपधाह्रस्वे थप् इत्यस्य द्वित्वेऽपि आर्तीथपदित्यत्र सन्वद्भावात् 'सन्यतः' इत्यभ्यासस्य इत्त्वम् अभ्यासदीर्घश्चेति द्वयं भवतीति

त्वकल्पनाया अन्याय्यत्वात् । **नाङ्गं द्विरुच्यत इति** । एवं च, अचचकासत् । आर्तथपत्, और्णुनवत्, इत्येव भवतीति भावः । **अवयवः कश्चिदिति** । हलादेः प्रथमावयवो द्विरुच्यते अजादेस्तु द्वितीयावयव इत्यर्थः । अङ्गं यत्र द्विरुच्यते तत्र पूर्वस्य दीर्घसन्वद्भावौ विधीयमानौ एकाच्ष्वेवेति च फलितम् । किं च अस्मिन्पक्षे एकाच इत्यङ्गस्य विशेषणं शब्दतोऽपि सुलभम्, 'एकाचो द्वे–' इत्यधिकारादित्याशयेनाह **तस्मादेकाच्चिवति** । स्यादेतत्—उक्तरीत्या ह्रस्वहलादिःशेषचुत्वादीन्यपि अनेकात्सु न स्युः । न चेष्टापत्तिः, दिद्रासति, दिदरिद्रासति, जिगणयिषतीत्यादिलक्ष्यस्य सर्वसंमतत्वात् । तन्निर्वाहार्थं यथोद्देशपक्ष आश्रीयत इति चेत्, तर्हि इहापि स एवोचितः । अर्थाधिकारपक्षस्यैवाभ्यर्हितत्वात्, वृत्त्यादिषु स्वीकृतत्वाच्चेत्यभिप्रेत्याह **वस्तुत इति** । **ऊर्णौ दीर्घ इति** । स्यादित्यपकृष्यते ।

चकास्तौ तूभयमिदं न स्यात्स्याच्च व्यवस्थया।

जानीम इति तृतीयश्लोकार्थः। अङ्गस्यावयव इति पक्षेऽपि चकास्तौ विशेषमाह **चकास्तौ त्विति।** चतुर्थश्लोकोऽयम्। अवस्था वस्तुस्थितिः। व्यवस्थया पक्ष-द्वयेनेति यावत्। चङ्परे इत्यनेन अन्यपदार्थतया लब्धस्य णावित्यस्य संनिहितं लघुनीत्येतद् विशेष्यम्। तथा च चङ्परे णौ यल्लघु इति प्रथमव्याख्यानं फलितम्। अङ्गमेव वा णेर्विशेष्यम्। तथा च चङ्परे णौ यदङ्गमिति द्वितीयं व्याख्यानं फलि-तम्। इति व्यवस्थया पक्षद्वयेन सन्वत्त्वं दीर्घश्चेत्युभयमिदं चकासधातौ णयन्ते चङि णिलोपे द्वित्वे अचचकासत् इत्यत्र न स्यात्, स्याचेत्यन्वयः। तत्र चङ्परे णौ यल्ल-घ्विति व्याख्याने सति नैव उभयं स्यात्। चङ्परस्य णेः काम् इत्यनेन व्यवहित-त्वात्। अचीकमतेत्यादौ त्वेकव्यवधानं येन नाव्यवधानन्यायात्सोढव्यमेव। चङ्परे णौ यदङ्गमिति व्याख्याने तु अचीचकासदित्यत्र उभयं स्यादेव, अङ्गस्य णिपरकत्व-सत्त्वादिति बोध्यम्। ननु चङ्परे णौ यल्लघ्विति, चङ्परे णौ यदङ्गमिति च

और्णुनवत्। इह सन्वद्भावस्तु नोपयुज्यते, णौ कृतस्यादेशस्य स्थानिवद्भावेन निषेधेन वा नुशब्दस्य द्वित्वे सति अभ्यासे अवर्णाभावादिति भावः। **अर्थापयताविति।** अर्थमाचष्टे इत्यर्थे णिच्यापुगागमे ततश्च चलेश्चङि दीर्घस्य 'सन्यतः' इतीत्वस्य च प्रवृत्तौ आर्तीथपदित्येव भवतीति भावः। अर्थ उपयाच्ञायामित्यस्य तु चङ्परे णौ आर्तथतेति भवति, न तु तत्र दीर्घसन्वद्भावयोः प्रवृत्तिरिति चुरादिषु स्फुटीभविष्यति। **उभयमिति।** दीर्घः सन्वच्चेत्येतद्द्वयमित्यर्थः। **न स्यात्स्याच्च व्यवस्थयेति।** चङ्परे णौ यल्लघ्विति व्याख्याने न स्यात्। चङ्परे णौ यदङ्गमिति व्याख्याने तु स्यात्। एवं च अचचकासत् अचीचकासदिति व्याख्याभेदेन रूपद्वयमित्यर्थः। ननु यथा चङ्परे णौ यल्लघ्विति व्याख्याने 'येन नाव्यवधान-' न्यायेन अपीपचदित्यादावेवोभयं भवति न त्वनेकव्यवाये। अचचकासदित्यादौ, तथा न्यायसाम्येन लघुनि योऽभ्यास इत्यत्राप्येकेनैव व्यवायस्य स्वीकार्यत्वादचिक्षणदित्यादौ सन्वदितीत्वं न स्यादिति चेत्। अत्राहुः—'अत्स्मृदृत्वर-' इतीत्वापवादेन अत्ववचनेन तुल्यजातीयापेक्षेण संयोगस्य व्यवधानेऽपीत्वस्य ज्ञापितत्वान्नोक्तदोषः। अतएव 'दीर्घो लघोः' इति सूत्रे लघोरिति सार्थकम्। माधवोऽपि जागृधातावित्थमेवाह। एवं च वदन् यथोद्देशपक्षमेवाशिश्रियत्। तथाच ऊर्णुधातौ यत्तेनोक्तमौर्णुनवदित्यत्र 'दीर्घो लघोः' इत्यभ्यासस्य दीर्घो न भवति चाङ्परे णौ यदङ्गं तस्य योऽभ्यास इति सूत्रार्थात्। अत्र त्वङ्गावयवस्या-भ्यासो न त्वङ्गस्येत्यादि। तत्र तस्याप्याग्रहो नास्तीति गम्यते। अतएव चकास्तावची-चकासदित्युदाजहार। तथा च मतभेदाभिप्रायेण पूर्वापरग्रन्थविरोधः समाधेय इति।

णेर्विशेष्यं सन्निहितं लघुनीत्यक्रमेव वा ॥ ४ ॥
इति व्याख्याविकल्पस्य कैयटेनैव वर्णनात् ।
णेरग्लोपेऽपि संबन्धस्त्वगितामपि सिद्धये ॥ ५ ॥

अथ क्रम्यन्तास्त्रिंशत्परस्मैपदिनः । अण ४४४ रण ४४५ वण ४४६ भण ४४७ मण ४४८ कण ४४९ क्वण ४५० व्रण ४५१ भ्रण ४५२ ध्वण ४५३ शब्दार्थाः । अणति । रणति । वणति । वकारादित्वादेत्वाभ्यासलोपौ न । ववणतुः । ववणिथ । धणिरपि कैश्चित्पठ्यते । धणति । ओणृ ४५४ अपनयने । ओणति । ओणांचकार । शोणृ ४५५ वर्णगत्योः । शोणति । शुशोण । श्रोणृ ४५६ संघाते । श्रोणति । श्लोणृ ४५७ च । शोणादयस्त्रयोऽमी तालव्योष्मादयः । पैणृ ४५८ गतिप्रेरणश्लेषणेषु । प्रैणृ इति क्वचित्पठ्यते । पिपैण । ध्रण ४५९ शब्दे । उपदेशे नान्तोऽयम् । 'रषाभ्याम्–' (सू २३५) इति

व्याख्याभेदे किं प्रमाणमित्यत आह **इति व्याख्याविकल्पस्य कैयटेनैव वर्णनादिति** । आदर्तव्यतेति शेषः । ननु णौ इत्यस्यावृत्तिमभ्युपगम्य अग्लोपेऽपि तदन्वयः किमर्थ इत्यत आह **णेरग्लोपेऽपीति** । **अगितामिति** । कमु कान्तावित्यादीनामपीत्यर्थः । **सिद्धय इति** । दीर्घसन्वत्त्वसिद्ध्यर्थमित्यर्थः । अन्यथा कमुप्रभृतीनामुकाराद्यनुबन्धलोपमादाय अग्लोपित्वाद् दीर्घसन्वद्भावौ न स्यातामित्यर्थः । इति घिणिप्रभृतयः कम्यन्ता दश गताः ।

क्रम्यन्ता इति । 'क्रमु पादविक्षेपे' इत्येतत्पर्यन्ता इत्यर्थः । अनुनासिकान्ता इति शेषः । **अण रणेति** । इतः प्रभृति कन दीप्तावित्यतः प्राग् मूर्धन्यान्ताः । **ओणृ इति** । ऋदित्त्वं 'नाग्लोपि–' इति निषेधार्थम् । **ध्रण शब्द इति** । अदुपधोऽयम् । **उपदेश इति** । धातूपदेशे नकारान्तोऽयम् । अकारस्य उच्चारणार्थस्य निवृत्तौ तवर्गपञ्चमान्त इत्यर्थः । तर्हि णकारस्य कथं श्रवणमित्यत आह **रषाभ्या-**

कातन्त्रपरिशिष्टे त्वित्वदीर्घयोः अजीजागरदित्युदाहृतम्, तन्मतद्वयेऽप्यसंभवादुपेक्ष्यम् । व्यवस्थामेव विवृणोति **णेरिति** । सन्निहितमिति हेतुगर्भविशेषणम्, लघुनीत्येतद् णेर्विशेष्यं भवति सन्निहितत्वादित्यर्थः । **अक्रमेवेति** । अस्य चङ्परे इत्यत्र आदेशरूपचङंशे आकाङ्क्षाभावेऽपि णाविति प्रत्ययांशे उत्थिताकाङ्क्षत्वादिति हेतुः स्पष्ट एवेति भावः । **कैयटेनैवेति** । तथा च एकं हरदत्तमतम्, अपरं तु कैयटमतमिति विषयविभागेन व्याचक्षाणा उपेक्ष्या इति भावः । चङ्परे इत्यावर्त्य अग्लोपविशेषणतयापि योजितं तस्य फलमाह **णेरिति** । णिश्चिद्लघु परतोऽग्लोपित्वासंभवादिहापि चङ्पर इत्येतावतैव णाविति लभ्यत इति बोध्यम् । **अगितामपीति** । पचिकमिशकिप्रभृतीनामित्यर्थः । नहीत्संज्ञकानां लोपो णिचं

णत्वम्। प्रणति। णोपदेशफलं यङ्लुकि। दन्प्रन्ति। बण इत्यपि केचित्। बेणतुः। बेणिथ। कनी[1] ४६० दीप्तिकान्तिगतिषु। चकान। ष्टन ४६१ वन ४६२ शब्दे। स्तनति। वनति। वन ४६३ षण ४६४ संभक्तौ। वनेरर्थभेदात् पुनः पाठः। सनति। ससान सेनतुः। २३१६ ये विभाषा। (६-४-४३) जनसनखनामात्वं वा स्याद्यादौ क्ङिति। सायात्, सन्यात्। अम ४६५ गत्यादिषु। कनी दीप्तिकान्तिगति-इत्यत्र गतेः परयोः शब्दसंभक्त्योरादिशब्देन संग्रहः। अमति। आम। द्रम ४६६ हम्म ४६७ मीमृ ४६८ गतौ। द्रमति। दद्राम। 'ह्म्यन्त-' (सू २२९९) इति न वृद्धिः। अद्रमीत्। हम्मति। जहम्म। मीमति। मिमीम। अयं शब्दे च। चमु ४६९ छमु ४७० जमु ४७१

मिति णत्वमिति। ननु स्वाभाविक एव णकार इत्यस्तु, किं नकारस्य कृतणत्वस्य निर्देश इति कल्पनयेत्यत आह णोपदेशेति। नकारस्थानिकणोपदेशस्य 'नश्च' इत्यनुस्वारात्मकं फलं यङ्लुकि प्रत्येतव्यमित्यर्थः। दन्प्रन्तीति। प्रणधातोर्यङ्लुकि द्वित्वे हलादिशेषे 'नुगतोऽनुनासिकान्तस्य' इत्यभ्यासस्य नुकि उत्तरखण्डे णकारस्यासिद्धत्वेन अनुस्वारे परसवर्णे तस्यासिद्धत्वाद् णत्वाभावे नकारस्यैव श्रवणम्। स्वाभाविकणकारोपदेशे तु उत्तरखण्डे णकार एव श्रूयेतेति भावः। बणेत्यपीति। पवर्गतृतीयादिरिति भावः। कन दीप्तीत्यारभ्य अम गत्यादिष्वित्यतः प्राक् तवर्गपञ्चमान्ताः। ष्टन वनेति। आद्यः षोपदेशः। ष्टुत्वसंपन्नः टकारः, तदाह स्तनतीति। वन षणेति। द्वितीयः षोपदेशः। ननु ष्टन वन शब्दे इति वनेः पठितस्य पुनः पाठो व्यर्थ इत्यत आह अर्थभेदादिति। वनेः शब्दे संभक्तौ च वृत्तिरिष्टा। ष्टनेस्तु शब्द एव वृत्तिरिष्टा। तत्र ष्टन वन शब्दे संभक्तौ चेत्युक्तौ ष्टनेरपि संभक्तौ वृत्तिः स्यात्। ष्टन शब्दे इत्युक्त्वा वन संभक्तौ चेति पाठे तु गौरवमिति भावः। आशीर्लिङि विशेषमाह ये विभाषा। 'जनसनखनां सञ्झलोः।' इत्यतो जनसनखनामित्यनुवर्तते। 'अनुदात्तोपदेश-' इत्यतः क्ङितीति। ये इति तद्विशेषणम्। अकार उच्चारणार्थः। तदादिविधिः। 'विड्वनोरनुनासिकस्यात्' इत्यत आदित्यनुवर्तते, तदाह जनसनखनामित्यादिना। सायादिति। नकारस्य आत्वे सवर्णदीर्घः। द्रम हम्म मीमृ गताविति। आद्योऽदुपधः। न वृद्धिरिति। अद्रमीदित्यत्र हलन्तलक्षणायां वृद्धौ 'नेटि' इति निषिद्धायां 'ह्म्यन्त-' इत्यतः प्रतीक्षत इति भावः।

णोपदेशफलमिति। अनुस्वार इत्यर्थः। दंध्रन्तीति। 'नुगतोऽनुनासिकान्तस्य' इत्यभ्यासस्य नुक्। गत्यादिष्विति। गतिशब्दसंभक्तिष्वित्यर्थः। मीमृ। ऋदित्फलं तु 'नाग्लोपि-' इति निषेधः। अमिमीमत्।

---

१ बालमनोरमाकृत्तु 'कन' इति ईकाररहितं पाठं मनुते।

क्षमु ४७२ अदने । २३२० **ष्ठिवुक्लमुचमां शिति ।** (७-३-७५) एषामचो दीर्घः स्याच्छिति । 'आङि चम इति वक्तव्यम्' आचामति । 'आङि' किम्-चमति । विचमति । अचमीत् । जिमिं केचित्पठन्ति । जेमति । क्रमु ४७३ पादविक्षेपे । २३२१ **वा भ्राशभ्लाशभ्रमुक्रमुक्लमुत्रसित्रुटिलषः ।** (३-१-७०) एभ्यः श्यन्वा स्यात्कर्त्रर्थे सार्वधातुके परे । २३२२ **क्रमः परस्मैपदेषु ।** (७-३-७६) क्रमेर्दीर्घः स्यात्परस्मैपदे परे शिति । क्राम्यति, क्रामति । चक्राम । क्राम्यतु, क्रामतु । २३२३ **स्नुक्रमोरनात्मने-**

'अतो हलादेः-' इति वृद्धिर्नेत्यर्थः । **जहम्मेति** । अभ्यासचुत्वेन हस्य झः । तस्य 'अभ्यासे चर्च' इत्यनेन जः । **मिमीमेति** । मीमृधातोर्णलि द्वित्वे अभ्यासह्रस्वः । **अयं शब्दे चेति** । मीमृधातुरित्यर्थः । **ष्ठिवुक्लमु** । 'शमामष्टानां दीर्घः श्यनि' इत्यतो दीर्घ इत्यनुवर्तते । दीर्घश्रुत्या अच इत्युपस्थितम् , तदाह **एषामचो दीर्घ इति** । ष्ठिवु क्लमु चम् एषां द्वन्द्वः । चम् इत्यनेन आङ्पूर्वकस्य चमेर्ग्रहणम् । **अचमीदिति** । 'ह्ययन्त-' इति न वृद्धिः । **क्रमु पादेति** । उदित्त्वम् 'उदितो वा' इति विकल्पार्थम् । **वा भ्राश** । 'दिवादिभ्यः श्यन्' इत्यतः श्यन्निति, 'कर्तरि शप्' इत्यतः कर्तरीति, 'सार्वधातुके यक्' इत्यतः सार्वधातुके इति चानुवर्तते, तदाह **एभ्यः श्यन्वेत्यादि** । **क्रमः** । **दीर्घः स्यादिति** । 'शमामष्टानाम्-' इत्यतः तदनुवृत्तेरिति भावः । **शितीति** । 'ष्ठिवुक्लमुचमाम्-' इत्यतस्तदनुवृत्तेरिति भावः । **क्रामत्विति** । मध्यमपुरुषैकवचने क्रामेत्यत्र तु 'क्रमः परस्मैपदेषु' इति दीर्घो भवत्येव । नच दीर्घस्याङ्गाधिकारस्थत्वाद् नलुमतेति निषेधः शङ्क्यः, लुमता लुप्ते प्रत्यये यदङ्गं तस्य कार्य एव तस्य प्रवृत्तेः । शिति परतः क्रमेरङ्गस्य दीर्घस्तु न लुप्तप्रत्यये परस्मैपदे परे अङ्गस्य कार्यम्, किंतु शिति परे अङ्गस्य कार्यमिति बोध्यम् । **स्नुक्रमोः** । पञ्चम्यर्थे षष्ठी आत्मनेपदनिमित्तस्याभावः अनात्मनेपदनिमित्तम्,

---

ष्ठिवुक्लमु । ष्ठीवति । क्लाम्यति । **आङि चम इति** । 'ष्ठिवुक्लम्वाचमाम्' इति वृत्तिकारकोक्तपाठो ऽयुक्त इति भावः । **जिमिं केचिदिति** । तथा च जेमनमिति भोजने प्रयुञ्जते । **वा भ्राश** । उभयत्र विभाषेयम् । अनवस्थानार्थो भ्रमिः । क्लमित्रसी च दिवादी, तेभ्यो नित्यं प्राप्ते इतरेषामप्राप्ते चारम्भात् । भ्राश्र भ्लाश्र दीप्तौ । फणादावेतौ । भ्रमु चलने भ्वादिः, ज्वलादिः फणादिरपि मनोरमायां पठ्यते, तद्भ्रसादिति नव्याः । भ्रमु अनवस्थाने दिवादिः, पुषादिः, शमादिः, तत्र भ्वादेः भ्रम्यति भ्रमति । शमादेस्तु श्यनि दीर्घे भ्राम्यतीति त्रैरूप्यम् । क्लमु ग्लानौ, त्रसी उद्वेगे,

---

१ 'ष्ठिवु क्लम्वाचमाम्' इति क्वचित् पाठः । २ वार्तिकमिदं बालमनोरमाकृतोऽसम्मतमिति भाति । ३ 'आचम्' इति क्वचित् ।

पदनिमित्ते। (७-२-३६) अत्रैवेट्। अक्रमीत।

अथ रेवत्यन्ता अनुदात्तेतः। अय ४७४ वय ४७५ पय ४७६ मय ४७७ चय ४७८ तय ४७९ णय ४८० गतौ। अयते। २३२४ दयायासश्च। (३-१-३७) दय अय आस् एभ्य आम् स्याल्लिटि। अयाचक्रे। अयिता। अयिषीष्ट। २३२५ विभाषेटः। (८-३-७९) इणः परो य इट् ततः परेषां षीध्वंलुङ्लिटां धस्य वा मूर्धन्यः स्यात्। अयिषीढ्वम्, अयिषीध्वम्।

आर्यभावे अव्ययीभावेन सह नञ्तत्पुरुषो विकल्प्यत इत्युक्तेः समासः। आत्मनेपदनिमित्ताभावे सति स्नुक्रम्भ्यां परस्य वलाद्यार्धधातुकस्य इट् स्यादित्यर्थः। स्नुक्रमोरनुदात्तोपदेशानन्तर्भावादिटि सिद्धे वचनमिदं नियमार्थमित्याह **अत्रैवेडिति**। एवं च भावकर्मलकारेषु इरान भवति। उपस्नोष्यते जलेन। भावलकारोऽयम्। उपक्रंस्यते। कर्मणि लृट्। स्यः। प्रस्नुतमित्यत्र तु श्र्युकः कितीति निषेधान्नेट्, आर्धधातुकस्येड्वलादेरिति इड्विधेः पुरस्तात्प्रतिषेधकाण्डारम्भसामर्थ्यात्। 'स्नुक्रमोरनात्मनेपदे' इति तु न सूत्रितम्, आत्मनेपदभिन्ने परस्मैपदे परे इत्यर्थे चिक्रमिष्यतीत्यसिद्धेः स्येन व्यवधानात्। आत्मनेपदे परे नेडित्यर्थे तु प्रचिक्रंसिष्यत इत्यसिद्धिः। अतो निमित्तग्रहणमित्यलम्। **अक्रमीदिति**। 'ह्म्यन्त–' इति न वृद्धिः। इति क्रम्यन्ताः परस्मैपदिनो गताः। **रेवत्यन्ता इति**। रेवृ प्लवगताविलेतत्पर्यन्ता इत्यर्थः। अयपयेत्यारभ्य शल चलने इत्यतः प्राग् यकारान्ताः। **दयायासश्च**। दय अय आस् एषां समाहारद्वन्द्वात्पञ्चम्येकवचनम्। कास्प्रत्ययादित्यत आम् लिटीत्यनुवर्तते, तदाह **एभ्य आम् स्याल्लिटि इति**। **विभाषेटः**। 'इणः षीध्वंलुङ्लिटां धः–' इत्यनुवर्तते। 'अपदान्तस्य–' इत्यतो मूर्धन्य इति च, तदाह **इणः परो य इडित्यादि**। इणन्तादङ्गादित्यर्थः। **अयिषीढ्वमिति**। आशीर्लिङो ध्वमः सीयुट्। यलोपः। आर्धधातुकत्वान्न सलोपः। इट्। यकारादिणः परो य इट् ततः परत्वाद् धस्य मूर्धन्यो ढः। इटः परभक्तत्वाद्यकारान्तादङ्गात्

त्रुट छेदने, लष कान्तौ। **क्रमः**। 'ष्ठिवुक्लमुचमाम्–' इत्यतोऽनुवर्तनादाह **परस्मैपदे शितीति**। परस्मैपदे किम्, उपक्रमते। पराक्रमते। **स्नुक्रमोः। अनात्मनेपदनिमित्ते इति**। आत्मनेपदनिमित्ताभावे इत्यर्थः। अन्ये तु द्विवचनस्थाने व्यत्ययेन एकवचनम्, अनात्मनेपदनिमित्तयोरित्यर्थ इत्याहुः। उभयोरपि भावकर्मकर्मव्यतिहारास्तङो निमित्तम्, क्रमेस्तु वृत्तिसर्गादयोऽपीति बोध्यम्। स्नुक्रमोरुदात्तत्वादिटि सिद्धे नियमार्थोऽयमित्याह **अत्रैवेडिति**। अनात्मनेपदेति किम्, उपस्नोष्यते जलेन। उपक्रंस्यते। निमित्त इति किम्, स्नौतीति स्नविता, स इवाचरति स्नवित्रीयते। इह क्यङ् आत्मनेपदनिमित्तं न तु स्नौतिरित्याहुः। **लुङ्लिटां धस्येति**।

आयिढ्वम्। आयिढ्वम्, आयिध्वम्। २३२६ **उपसर्गस्यायतौ।** (८-२-१९) अयतिपरस्योपसर्गस्य यो रेफस्तस्य लत्वं स्यात्। प्लायते, पलायते। निस्दुसो रुत्वस्यासिद्धत्वान्न लत्वम्। निरयते। दुरयते। निर्दुरोस्तु निलयते दुलयते। प्रत्यय इति त्विणो रूपम्। अथ कथम् 'उदयति विततोर्ध्वरश्मिरज्जौ' इति माघः। इट किट कटी इत्यत्र प्रश्लिष्टस्य भविष्यति। यद्वा 'अनुदात्तेत्त्वलक्षणमात्मनेपदमनित्यम्' (प १७)। चक्षिङो ङित्करणाज्ज्ञापकात्। वादित्वाद् ववये। पेये। मेये। चेये। तेये। प्रणयते। नेये। दय ४८१ दानगतिरक्षणहिंसादानेषु। आदानं ग्रहणम्। दयांचक्रे। रय ४८२ गतौ। ऊयी ४८३ तन्तुसन्ताने। ऊयांचक्रे। पूयी ४८४ विशरणे दुर्गन्धे च। पूयते। पुपूये। क्नूयी

परस्य इषीध्वम इएणन्तादङ्गात्परत्वान्नित्ये प्राप्ते विकल्पोऽयम्। **आयिढ्वमिति।** लुङो ध्वमि, च्लेः सिचि, आटि वृद्धौ, सिच इटि, 'धि च' इति सलोपः। ध्वम इवर्णान्तादङ्गात्परत्वान्नित्ये प्राप्ते विकल्पः। अङ्गादिति निवृत्तमिति केचित्। **उपसर्गस्यायतौ।** अयताविति श्तिपा निर्देशः। 'कृपो रो लः' इत्यतो रो ल इत्यनुवर्तते, तदाह **अयतिपरस्येत्यादिना। प्लायत इति।** प्र इत्युपसर्गः। **पलायत इति।** परा इत्याकारान्त उपसर्गः। ननु निरयते दुरयत इत्यत्रापि लत्वं स्यादित्यत आह **निस्दुसोरिति।** तर्हि निलयते दुलयत इति कथमित्यत आह **निर्दुरोस्त्विति।** एतदर्थमेव प्रादिषु सान्तयो रेफान्तयोश्च निर्देश इति भावः। तर्हि प्रत्यय इत्यत्रापि प्रतेरयतिपरत्वाद् रस्य लत्वं स्यादित्यत आह **प्रत्यय इति त्विति।** प्रतिपूर्वकादिणधातोरच्प्रत्यये प्रत्यय इति रूपम्। अयतिपरत्वाभावान्न लत्वमित्यर्थः। अयधातुमादाय प्लत्यय इति न, अनभिधानादिति कैयटः। **कथमुदयतीति।** उत्पूर्वकादयधातोः शत्रन्तात्सप्तम्यन्तमिति मत्वा आक्षेपः। अनुदात्तेत्त्वेन लटः शानच्प्रसङ्गादिति भावः। **प्रश्लिष्टस्येति।** इधातोरिति शेषः। तस्य अनुदात्तत्वाभावाच्छतृप्रत्ययो निर्बाध इति भावः। **ज्ञापकादिति।** चक्षिङ्धातौ इकारस्य अनुदात्ततया अनुदात्तेत्त्वादेव आत्मनेपदसिद्धौ ङित्करणं अनुदात्तेत्त्वप्रयुक्तात्मनेपदस्य अनित्यतां ज्ञापयति। तस्य अनित्यत्वे तु नित्यात्मनेपदार्थं ङित्करणमर्थवदिति भावः। इदं तु भाष्ये न दृश्यते। **वादित्वादिति।** वयधातोर्लिटि वादित्वादेत्वाभ्यासलोपयोरभावे सति ववये इति रूपमित्यर्थः। णयधातुर्णोपदेश इति मत्वा आह **प्रणयत इति।** 'उपसर्गादसमासेऽपि–' इति णत्वमिति भावः। **दयांचक्र इति।** 'दयायासश्च' इत्याम्। **ऊयांचक्र इति।** इजादि-

---

लिटि लिलिहिढ्वे लिलिहिध्वे। **अथ कथमिति।** शानचा भाव्यमिति शङ्कितुराशयः।

४८२ शब्दे उन्दे च। चुक्नूये। क्ष्मायी ४८६ विधूनने। चक्ष्माये। स्फायी ४८७ ओ प्यायी ४८८ वृद्धौ। स्फायते। पस्फाये। प्यायते। २३२७ **लिड्यङोश्च।** (६-१-२९) लिटि यङि च प्यायः पीभावः स्यात्। पुनः प्रसङ्गविज्ञानात् पीशब्दस्य द्वित्वम्। 'एरनेकाचः-' (सू २७२) इति यण्। पिप्ये पिप्याते पिप्यिरे। २३२८ **दीपजनबुधपूरितायिप्यायिभ्योऽन्यतरस्याम्।** (३-१-६१) एभ्यश्च्लेश्चिण्वा स्यादेकवचने तशब्दे परे। २३२९ **चिणो लुक्।** (६-४-१०४) चिणः परस्य तशब्दस्य लुक्स्यात्। अप्यायि, अप्यायिष्ट। तायृ ४८९ सन्तानपालनयोः। सन्तानः प्रबन्धः। तायते। तताये। अतायि, अतायिष्ट। शल ४९० चलनसंवरणयोः। वल ४९१ वल्ल ४९२ संवरणे संचरणे च। ववले। ववल्ले। मल ४९३ मल्ल ४९४ धारणे।

त्वादाम्। **उन्दने चेति।** क्लेदने चेत्यर्थः। **स्फायी ओ प्यायीति।** ओदित्त्वम् 'ओदितश्च' इति निष्ठानत्वार्थम्। ईदित्त्वं तु 'श्वीदितो निष्ठायाम्' इति इण्निषेधार्थम्। **लिड्यङोश्च।** लिट् च यङ् चेति द्वन्द्वात्सप्तमी। 'प्यायः पी' इति सूत्रमनुवर्तते, तदाह **लिटि यङि चेति।** ननु प्यायेर्लिटि द्वित्वं बाधित्वा परत्वात् पीभावे द्वित्वे 'एरनेकाचः-' इति यणि पिप्ये इति रूपमिष्यते। तत्र द्वित्वं बाधित्वा परत्वात् पीभावे कृते पुनर्द्वित्वं न संभवति, 'विप्रतिषेधे यद्बाधितं तद्बाधितमेव' इति न्यायादित्यत आह **पुनः प्रसङ्गेति।** 'पुनः प्रसङ्गविज्ञानात् सिद्धम्' इति परिभाषा। विप्रतिषेधे बाधितस्यापि पुनः प्रवृत्तेरभ्युपगमात्कृतेऽपि पीभावे द्वित्वादिकं सिद्धमिति तदर्थः। **दीपजन।** 'च्लेः सिच्' इत्यतः च्लेरिति, 'चिण् ते पदः' इत्यस्मात् चिण् ते इति चानुवर्तते, तदाह **एभ्यश्च्लेरिति। एकवचन इति।** दीपादीनामात्मनेपदित्वेन तेभ्यस्तशब्दस्य एकवचनत्वनियमादिति भावः। **चिणो लुक्।** चिण इति पञ्चमी, तदाह **चिणः परस्येति।** चिणः परश्च अर्थात् तशब्द एव भवति। चिण्भावे च्लेः सिचि रूपमाह **अप्यायिष्टेति। तायृ संतानेति।** लुङि 'दीपजन-' इति च्लेश्चिणि तलोपे रूपमाह **अतायीति।** चिणभावे सिचि अतायिष्टेति रूपम्। शल चलनेत्यारभ्य तेवृ इत्यतः प्राग् लान्ताः। तेवृ इत्यारभ्य रेवत्यन्ता वकारान्ताः। षेवृधातोः षोपदेशत्वात्सत्वे सेवत इत्यादि

क्नूयी शब्दे उन्दे च। उन्दः क्लेदनम्। **लिड्यङोश्च।** यङि पेपीयते। **दीपजन।** दीपी दीप्तौ, जनी प्रादुर्भावे, बुध अवगमने, पूरी आप्यायने—एते दिवादयः। **चिणो लुक्। परस्य लुक् स्यादिति।** तब्दस्येति कैश्चित्पठ्यते, तदार्थिकार्थकथनम्। तशब्दे परतः चिणि विहिते चिणः परस्य जायमानो लुक् 'प्रत्ययस्य

मेले। ममङ्खे। भल ४९५ भल्ल ४९६ परिभाषणहिंसादानेषु। बभले। बभल्ले। कल ४९७ शब्दसंख्यानयोः। कलते। चकले। कल्ल ४९८ अव्यक्ते शब्दे। कल्लते। अशब्दे इति स्वामी, अशब्दस्तूष्णींभाव इति च। तेवृ ४९९ देवृ ५०० देवने। तितेवे। दिदेवे। षेवृ ५०१ गेवृ ५०२ ग्लेवृ ५०३ पेवृ ५०४ मेवृ ५०५ म्लेवृ ५०६ सेवने। 'परिनिविभ्यः–' (सू २२७५) इति षत्वम्। परिषेवते। सिषेवे। अयं सोपदेशोऽपीति न्यासकारादयः। तद् भाष्यविरुद्धम्। गेवते। जिगेवे। जिग्लेवे। पिपेवे। मेवते। म्लेवते। शेवृ खेवृ क्लेवृ इत्यप्येके। रेवृ ५०७ प्लवगतौ। प्लवगतिः प्लुतगतिः। रेवते।

अथावत्यन्ताः परस्मैपदिनः। मव्य ५०८ बन्धने। ममव्य। सूर्क्ष्य ५०९ ईर्क्ष्य ५१० ईर्ष्य ५११ ईर्ष्यार्थाः। हय ५१२ गतौ। अहयीत्। यान्तत्वान्न

रूपम्। परिषेवत इत्यत्र 'सात्पदाद्योः' इति निषेधे प्राप्ते आह **परिनिविभ्य इति**। **सिषेवे इति**। आदेशसकारत्वात् षत्वमिति भावः। **अयं सोपदेशोऽपीति**। षेवृधातुरित्यर्थः। **तद्भाष्यविरुद्धमिति**। सेक्सृप्सृस्तृसृजस्तृस्त्यानामेव भाष्ये षोपदेशपर्युदासादिति भावः। **रेवृ प्लवगताविति**। प्लवेति न धात्वन्तरमिति सूचयन्नाह **प्लवगतिः प्लुतगतिरिति**। अथपथेत्यादिरेवत्यन्ता गताः। **अवत्यन्ता इति**। अव रक्षणे इत्येतत्पर्यन्ता इत्यर्थः। मव्येत्यारभ्य अल भूषणेत्यतः

लुक्श्लुलुपः' इति वचनात्तशब्दस्यैवेति स्पष्टत्वात्। **अयमिति**। षेवृ धातुः। **भाष्यविरुद्धमिति**। यदि सोपदेशः स्यात्तदा स्त्यायतिरिवायमपि षोपदेशलक्षणे पर्युदस्येत, तदकरणान्नास्ति सोपदेश इति भावः। **प्लव गताविति**। केचित् प्लवेति धात्वन्तरमित्याहुस्तद्धि मनोरमायां दूषितम्। प्लवेति धात्वन्तरत्वे 'विभाषा ङि रुप्लवोः' इत्यत्र प्लुवः पक्षे घञ्विधानं व्यर्थं स्यात्। प्लवेत्येतस्माद् घञि आप्लावशब्दस्य सिद्धत्वात्। तथा 'स्रवति शृणोति–' इति सूत्रेण प्लवतेरभ्यासोकारस्येत्वविधानमपि व्यर्थं स्यात्। तद्धि पक्षे अपिप्लवदिति रूपसिद्ध्यर्थं क्रियते, तच्च रूपं प्लवधातोः 'सन्यतः' इत्यनेन सिद्धमिति किं तदुपादानेनेति। **ममव्येति**। 'यस्य हलः' इति लोपस्तु न भवति, यस्येति संघातग्रहणमिति सिद्धान्तितत्वात्। वर्णग्रहणे त्वर्थवद्ग्रहण-परिभाषाया अप्रवृत्त्या पुत्रकाम्येत्यादावपि लोपः स्यादिति दिक्। लुटि मव्यिता। आशिषि मव्यात्। 'हलो यमाम्–' इति धातुयकारस्य वा लोपः। **सूर्क्ष्य ईर्क्ष्य**। णलि सुसूर्क्ष्य। ईर्क्ष्याचकार। ईर्ष्याचकार। एभ्यः क्विपि 'लोपो व्योः–' इति लोपे, 'स्कोः–' इति कलोपे जश्त्वचर्त्वयोः सूर्ट् ईर्ट्। संयोगान्तलोपस्त्विह न भवति 'रात्सस्य' इति नियमात्। सूर्क्ष आदर इति वक्ष्यते, तस्यापि सूर्ट् इत्येव रूपम्। हय गतौ। जहाय। हय्यात्।

वृद्धिः। शुच्य २१३ अभिषवे। अवयवानां शिथिलीकरणं सुरायाः सन्धानं वा अभिषवः, स्नानं च। शुशुच्य। चुच्य इत्येके। हय २१४ गतिकान्त्योः। जहयं। अल २१५ भूषणपर्याप्तिवारणेषु। अलति। आल। २३३० अतो ल्रान्तस्य। (७-२-२) ल्र इति लुप्तषष्ठीकम्। अतः समीपौ यौ ल्रौ तदन्तस्याङ्गस्यातो वृद्धिः स्यात्परस्मैपदपरे सिचि। 'नेटि' (सू २२६८) इति

प्राग् यकारान्ताः। अल भूषणेत्यारभ्य खोर्ऋ प्रतीघात इत्यतः प्राग् लकारान्ताः। अतो ल्रान्तस्य। 'सिचि वृद्धिः परस्मैपदेषु' इत्यनुवृत्तम्। 'अङ्गस्य' इत्यधिकृतम्। तद्विशेषणत्वात्तदन्तविधिनैव सिद्धे अन्तग्रहणं व्यर्थम्। तत्राह ल्रेति लुप्तषष्ठीकमिति। ल्र अन्तस्य इति छेदः। ल् च र् चेति समाहारद्वन्द्वात् षष्ठ्येकवचनं लुप्तम्। ल्रस्यान्तस्येति सामानाधिकरण्येनान्वयः। अत इति व्यधिकरणषष्ठ्यन्तम् अन्तस्येत्यत्रान्वेति। अन्तशब्दः समीपवर्तिवाची। तथा च अतः समीपवर्तिनो ल्रस्येति लभ्यते। ल्रस्येत्यङ्गविशेषणत्वात्तदन्तविधिः, ततश्च अत्समीपवर्तिरेफलकारान्तस्य अङ्गस्य सिचि वृद्धिरिति लभ्यते। अत इत्यावृत्तं वृद्धौ स्थानित्वेनान्वेति, तदाह अतः समीपावित्यादिना। अतः समीप इति किम्? अखोरीत्। अमीलत्। ल्रान्तस्य इति किम्? मा भवानतीत्। अतो वृद्धिरित्युक्त्वा अतः समीपावित्यनुक्तौ तु अवश्रीत् अश्वल्लीदित्यत्रातिव्याप्तिः। अत्र अङ्गस्यान्तौ रेफलकारौ नातः समीपाविति न वृद्धिः। नचात्र अतो भकारेण लकारेण च व्यवहितत्वादेव न वृद्धिः। आलीदित्यादौ एकव्यवधाने चरितार्थत्वादिति वाच्यम्,

---

शिथिलीकरणमिति। सोममभिषुणोतीत्यादौ दर्शनात्। सुराया इति। तत्प्रकरणे 'संधानं स्यादभिषवः' इत्यमरोक्तेः। अतो ल्रान्तस्य। यद्यवयववचनेनान्तशब्देन बहुव्रीहिरयं चान्यपदार्थस्तत्पक्षे विशेषणेन तदन्तविधेः सिद्धत्वादन्तग्रहणमनर्थकम्, अश्वल्लीदित्यत्रातिव्याप्तिश्च। समीपवाचिना अन्तशब्देन षष्ठीसमासपक्षे रपिरणिशल्लप्रभृतिष्वतिव्याप्तिः, अङ्गस्यातो ल्रोः समीपत्वात्। ल्रू च तदन्तश्चेति समीपवाचिनान्तशब्देन कर्मधारयपक्षे त्वन्तशब्दस्य विशेषणत्वात्पूर्वनिपातः स्यादत आह लुप्तषष्ठीकमिति। अन्तशब्दः समीपवाचीत्यभिप्रेत्याह अतःसमीपाविति। अतो वृद्धिः स्यादिति। इह अत इत्यस्य तन्त्रावृत्त्यादिकं स्वीकर्तव्यम्। अन्यथा प्रयोजनाभावादिक्परिभाषानुपस्थानेऽप्यलोन्त्यपरिभाषयान्त्यस्य स्यादिति भावः। यद्यपि 'अतो ल्रस्य' इत्युक्तेऽपि ल्रान्तस्याङ्गस्य अतः सिचि परे वृद्धिरित्यर्थे स्वीकृते 'येन नाव्यवधान–' न्यायेनेष्टं सिध्यति, तथाप्यङ्गस्य सिचि परे अतो वृद्धिरित्यर्थोऽपि प्रतीयेत। ततश्चाश्वल्लीदित्यत्रातिप्रसङ्गः स्यात्। तद्वारणाय सूत्रेऽन्तग्रहणं कृतमिति।

निषेधस्य 'अतो हलादेः—' (सू २२८४) इति विकल्पस्य चापवादः। मा भवानालीत्। अयं स्वरितेदित्येके। तन्मते अलते इत्याद्यपि। ञि फला २१६ विशरणे। 'तॄफल—' (सू २३०१) इत्येत्वम्। फेलतुः फेलुः। अफालीत्। मील २१७ श्मील २१८ स्मील २१९ क्ष्मील २२० निमेषणे। निमेषणं संकोचः। द्वितीयस्तालव्यादिः। तृतीयो दन्त्यादिः। पील २२१ प्रतिष्टम्भे। प्रतिष्टम्भो रोधनम्। णील २२२ वर्णे। निनील। शील २२३ समाधौ। शीलति। कील २२४ बन्धने। कूल २२५ आवरणे। शूल २२६ रुजायां संघोषे च। तूल २२७ निष्कर्षे। निष्कर्षो निष्कोषणम्। तन्मध्यान्तर्गतस्य बहिर्निस्सारणम्। तुतूल। फूल २२८ संघाते। मूल २२९ प्रतिष्ठायाम्। फल २३० निष्पत्तौ।

सिचि परे यदङ्गं तदकारस्य वृद्धिरित्यर्थाश्रयणे अतिव्याप्तिवारणार्थत्वात्। **ञि फलेति**। विशरणं शिथिलीभावः। 'आदिर्ञिटुडवः' इति ञिरित्। 'ञीतः क्तः' इति प्रयोजनम्। 'आदितश्च' इति इण्निषेधार्थमादित्त्वम्। लिण्निमित्तादेशादित्वादप्राप्ते आह **तॄफलेति। मील श्मीलेति**। निमेषणं नेत्रसंकोचः। संकोच इति पाठेऽप्ययमेवार्थः। **णील वर्ण इति**। वर्णक्रियायामित्यर्थः। **फल निष्पत्ता-**

तदनुरोधेनान्तशब्दस्य समीपवाचित्वमत इत्यस्य चानुवृत्तिः स्वीकृते इति बोध्यम्। अतः समीपाविति किम्, अखोरीत्। अमीलीत्। लान्तस्याङ्गस्य किम्, श्वल्ल आशु गमने। अश्वल्लीत्। अत्र अकारसमीपो यो लकारः स नाङ्गस्यान्तः, यस्त्वङ्गस्यान्तः स तु नाकारस्य समीपः। ननु ल्रॄत्यस्य लुप्तषष्ठीकत्वाभ्युपगमेऽप्यन्तशब्दस्यावयववाचित्वं स्वीकृत्य अङ्गस्यान्तं यद् ल्रं तस्यातः तत्समीपस्यातो वृद्धिरिति व्याख्याने त्वत इत्यस्यावृत्तिर्नापेक्षितेति चेत्। अत्राहुः—'हलन्त्यम्' इति सूत्रे मनोरमायां 'सामीप्यं षष्ठ्यर्थः' इति पक्षस्य निराकरणात्तदनुरोधेनात्रात इत्यस्यावृत्तिराश्रितेति। अत्र केचित्—'अतो ल्रान्तस्य' इत्यत्र ल्रेति लुप्तसप्तमीकम्। अथवा 'अतो ल्रान्त' इति व्यस्तमेव सूत्रयितुं शक्यम्। तथा च 'अङ्गस्यान्तं यद् ल्रं तस्मिन्परेऽव्यवहितस्यातो वृद्धिरिति व्याख्यानसम्भवान्न तन्त्रावृत्त्याद्याश्रयणक्लेशः। न चाङ्गस्य विशेष्यत्वेनैवान्वयो युज्यते न तु विशेषणत्वेन 'पदाङ्गाधिकारे तस्य च तदन्तस्य च' इति परिभाषायाः पदमङ्गं च विशेष्यं भवतीत्यभिप्रायवर्णनादिति वाच्यम्, 'अल्लोपोऽनः' इति सूत्रेऽङ्गावयवोऽसर्वनामस्थानेत्येवं भाष्यकारादिभिर्विशेषणतया व्याख्यानात्क्वचिद्विशेषणत्वेऽप्यङ्गस्य न क्षतिरित्याहुः। **नेटीत्यादि**। यद्यपि पुरस्तादपवादन्यायेन नेटीत्यस्यापवादो न तु विकल्पस्यापि, तथापि बाध्यसामान्यचिन्तायां स्वविषये प्राप्तं सर्वं बाध्यत इति पुरस्तादपवादन्यायोऽत्र न प्रवर्तत इति भावः। **मील संकोच**

फेलतुः फेलुः। क्षुल्ल ५३१ भावकरणे। भावकरणमभिप्रायाविष्कारः। फुल्ल ५३२ विकसने। चिल्ल ५३३ शैथिल्ये भावकरणे च। तिल ५३४ गतौ। तेलति। तिल्ल इत्येके। तिल्लति। वेलृ ५३५ चेलृ ५३६ केलृ ५३७ खेलृ ५३८ क्ष्वेलृ ५३९ वेल्ल ५४० चलने। पञ्च ऋदितः। षष्ठो लोपधः। पेलृ ५४१ फेलृ ५४२ शेलृ ५४३ गतौ। षेलृ इत्येके। स्खल ५४४ संचलने। चस्खाल। अस्खालीत्। खल ५४५ सञ्चये। गल ५४६ अदने। गलति। अगालीत्। षल ५४७ गतौ। सलति। दल ५४८ विशरणे। श्वल ५४९ श्वल्ल ५५० आशुगमने। शश्वाल। अश्वालीत्। शश्वल्ल। अश्वल्लीत्। खोलृ ५५१ खोर्ऋ ५५२ गतिप्रतिघाते। खोलति। खोरति। धोर्ऋ ५५३ गतिचातुर्ये। धोरति। त्सर ५५४ छद्मगतौ। तत्सार। अत्सारीत्। क्मर ५५५ हूर्च्छने। चक्मार। अभ्र ५५६ वभ्र ५५७ मभ्र ५५८ चर ५५९ गत्यर्थाः। चरतिर्भक्षणेऽपि। अभ्रति। आनभ्र। मा भवानभ्रीत्। अङ्गान्त्यरेफस्यातः समीपत्वाभावान्न वृद्धिः। ष्ठिवु ५६० निरसने। 'ष्ठिवुक्लमु-' (सू २३२०) इति दीर्घः। ष्ठीवति। अस्य द्वितीयो वर्णस्थकारष्ठकारो वेति वृत्तिः। तिष्ठेव तिष्ठिवतुः तिष्ठिवुः। टिष्ठेव टिष्ठिवतुः टिष्ठिवुः। 'हलि च' (सू ३५४) इति दीर्घः। ष्ठीव्यात्। जि ५६१ जये। अयमजन्तेषु पठितुं युक्तः। जय उत्कर्षप्राप्तिः। अकर्मकोऽयम्। जयति। २३३१ सन्लिटोर्जेः।

विति। ञि फलेति पूर्वं पठितम्। अनुबन्धभेदात्पुनः पाठः। खोलृ खोर्ऋ इति। द्वितीयो रेफान्तः। ऋदित्। इत आरभ्य ष्ठिवेः प्राग् रेफान्ताः। धोर्ऋ गतिचातुर्ये इति। अश्वगतिविशेष इत्यर्थः। रेफान्तोऽयम्। ऋदित्। त्सर छद्मगताविति। कपटगताविसर्थः। क्मर हूर्च्छन इति। कुटिलीभवन इत्यर्थः। ष्ठिवु निरसन इति। इदुपधः। उदित्। इत आरभ्य ऊष्मान्तेभ्यः प्राग् वकारान्ताः। तिपि शपि लघूपधगुणे प्राप्ते आह ष्ठिवुक्लम्विति। ल्युटि तु शित्परकत्वाभावाद् दीर्घाभावे लघूपधगुणः। ष्ठीवनमिति तु पृषोदरादित्वात् समाधेयम्। अस्येति। ष्ठिवुधातोः द्वितीयो वर्णः थकार इत्यर्थः। कृतष्टुत्वस्य निर्देश इति भावः। षोपदेशोऽयम्। केवलदन्त्यथकारपरकसादित्वात् षोपदेशत्वेऽपि न सत्वम्, 'सुब्धातुष्ठिवु-' इति निषेधात्। लिटि तु 'शर्पूर्वाः खयः' इति षकारवकारयोर्निवृत्त्या

इति। नेत्रसंकोचे तु प्रचुरप्रयोगः। तिल गतौ। तिल स्नेहने इति चुरादौ। दल विशरणे। विशरणमवयवानां विभागः। धोर्ऋ। धोरितकमश्वानां गतिविशेषः। निष्ठान्तात्संज्ञायां कन्। त्सर छद्मगतौ। छद्मना कपटेन गतिः छद्मगतिः। क्मर हूर्च्छने। हूर्च्छनं कौटिल्यम्। ष्ठिवु निरसने। अस्य ल्युटि ष्ठेवनम्। 'ष्ठीवनाऽसृक्शकृ-

(७-३-५७) जयतेः सन्लिण्णिमित्तो योऽभ्यासस्ततः परस्य कुत्वं स्यात्। जिगाय जिग्यतुः जिग्युः। जिगयिथ, जिगेथ। जिगाय, जिगय जिग्यिव जिग्यिम। जेता। जीयात्। अजैषीत्। जीव ५६२ प्राणधारणे। जिजीव। पीव ५६३ मीव ५६४ तीव ५६५ णीव ५६६ स्थौल्ये। पिपीव। मिमीव। तितीव। निनीव। क्षीवु ५६७ क्षेवु ५६८ निरसने। उर्वी ५६९ तुर्वी ५७० थुर्वी ५७१ दुर्वी ५७२ धुर्वी ५७३ हिंसार्थाः। ऊर्वांचकार। 'उपधायां च' (सू २२६५) इति दीर्घः। तुतूर्व। गुर्वी ५७४ उद्यमने। गूर्वति। जुगूर्व। मुर्वी ५७५ बन्धने। पुर्व ५७६ पर्व ५७७ मर्व ५७८ पूरणे। चर्व ५७९ अदने। भर्व ५८० हिंसायाम्। कर्व ५८१ खर्व ५८२ गर्व ५८३ दर्पे। अर्व ५८४ शर्व ५८५ षर्व ५८६ हिंसायाम्। आनर्व। शर्वति। सर्वति। इवि ५८७ व्याप्तौ। इन्वति। इन्वांचकार। पिवि ५८८ मिवि ५८९ णिवि ५९० सेचने। तृतीयो

ष्टुत्वनिवृत्तौ रूपमाह **तिष्ठेवेति**। ठकारस्य स्वाभाविकत्वे तु टिष्ठेवेति रूपम्। **जि जय इति**। जिधातुरनिट्कः। **सन्लिटोर्जेः**। 'अभ्यासाच्च' इति सूत्राद् अभ्यासादित्यनुवर्तते। 'चजोः कु घिण्ण्यतोः' इत्यस्मात् कु इति च। सन्लिटोरिति निमित्तसप्तमी अभ्यासे अन्वेति, तदाह **सन्लिण्णिमित्तो योऽभ्यास इत्यादि**। सनि लिटि च अभ्यासात् परस्य कुत्वमिति व्याख्याने तु यङ्लुगन्तात् सनि जेजयिषति इत्यत्र कुत्वं स्यात्। अतः सन्लिण्णिमित्तो योऽभ्यास इति व्याख्येयमिति माधवः। **जिगायेति**। णलि द्वित्वे वृद्धौ उत्तरखण्डे जस्य कुत्वेन गः। **जिग्यतुरिति**। कित्त्वाद् गुणाभावो लिटि 'एकाच–' इति इण्णिषेधं बाधित्वा क्रादिनियमादिटि प्राप्ते, थलि 'अचस्तास्वत्–' इति तन्निषेधस्य भारद्वाजनियमाद्विकल्पः, तदाह **जिगयिथ, जिगेथेति**। जिग्यथुः। जिग्य। 'णलुत्तमो वा' इति मत्वा आह **जिगाय, जिगयेति**। क्रादिनियमादिटं मत्वा आह **जिग्यिव जिग्यिमेति**। **जेतेति**। जेष्यति। जयतु। अजयत्। आशीर्लिङि 'अकृत्सार्वधातुकयोः–' इति दीर्घं मत्वा आह **जीयादिति**। **अजैषीदिति**। 'सिचि वृद्धिः–' इति वृद्धिरिति भावः। अजेष्यत्। षर्वधातुः षोपदेशः। इविधातोरिदित्त्वान्नुम्, तदाह **इन्वतीति**। **इन्वांचकारेति**। नुमि इजादिगुरुमत्त्वादामिति भावः।

न्मूत्ररेतांस्यप्सु न निक्षिपेत्' इत्यत्र पृषोदरादित्वात्पक्षे दीर्घ ईकार इत्याहुः। **सन्लिटोर्जेः**। **सन्लिण्णिमित्त इति**। यदि तु सनि लिटि च परे योऽभ्यास इति प्राचो व्याख्यानमाद्रियेत तदा 'येन नाव्यवधान–' न्यायेन प्रकृतिव्यवधानं सोढव्यमेव परं तु यङ्लुगन्तात्सनि जेययिषतीत्यत्र कुत्वं स्यात्, न च तन्माधवग्रन्थसंमतमिति

मूर्धन्योष्मादिरित्येके। सेवने इति तरङ्गिण्याम्। पिन्वति। पिपिन्व। हिवि २११ दिवि २१२ धिवि ५१३ जिवि २१४ प्रीणनार्थाः। हिन्वति। दिन्वति। **२३३२ धिन्विकृण्व्योर च।** (३-१-८०) अनयोरकारोऽन्तादेशः स्यादु-प्रत्ययश्च शब्विषये। 'अतो लोपः' (सू २३०८) तस्य स्थानिवद्भावाल्लघूप-धगुणो न। उप्रत्ययस्य पित्सु गुणः। धिनोति धिनुतः धिन्वन्ति। **२३३३ लोपश्चास्यान्यतरस्यां म्वोः।** (६-४-१०७) असंयोगपूर्वो यः प्रत्य-योकारस्तदन्तस्याङ्गस्य लोपो वा स्याद् म्वोः परयोः। धिन्वः, धिनुवः धिन्मः, धिनुमः। मिपि तु परत्वाद् गुणः। धिनोमि। **२३३४ उतश्च प्रत्ययाद-संयोगपूर्वात्।** (६-४-१०६) असंयोगपूर्वो यः प्रत्ययोकारस्तदन्तादङ्गात्

पिविमिवीत्यादय इदितः। **धिन्विकृण्व्योः।** अ इति लुप्तप्रथमाकम्। धिवि-कृण्व्योः कृतनुमोः धिन्विकृण्वीति निर्देशः। 'तनादिकृञ्भ्य उः' इत्यत उरिति चकारादनुकृष्यते। 'कर्तरि शप्' इत्यतः कर्तरीति, 'सार्वधातुके यक्' इत्यतः सार्व-धातुक इति च, तदाह **अनयोरित्यादिना।** वकारस्याकारः, धिन् अ उ ति इति स्थितम्। **अतो लोप इति।** युगपत्संनियोगशिष्टतया उप्रत्ययाकारयोर्विधानेऽपि श्रुतक्रमानुरोधेन प्रवृत्त्या आर्धधातुकोपदेशकाले धिन इत्यस्यादन्तत्वमिति भावः। नन्वत्र वकारस्य लोप एव विधीयतां किमकारविधिनेत्यत आह **तस्येति।** वकारस्य लोपविधौ तु अजादेशत्वाभावात् स्थानिवत्त्वं न स्यादिति भावः। तथा च धिनु ति इति स्थिते आह **उप्रत्ययस्येति। धिनुत इति।** धिविधातोर्नुमि तसि उप्रत्यये वकारस्य अकारादेशे अतो लोपे तसो ङित्त्वादुकारस्य न गुणः। **धिन्वन्तीति।** धिन्व इत्यस्माद् झिः। झोऽन्तः। उप्रत्ययः। वकारस्य अकारः। अतो लोपः। उकारस्य यणिति भावः। अत्र वकारस्य स्थानिवत्त्वेन आर्धधातुकत्वेऽपि नेट्। उकारवृत्त्यार्धधातुकत्वस्य अल्धर्मत्वेन अनल्विधाविति निषेधात्। तदिदं 'भोभगो–' इति सूत्रभाष्ये स्पष्टम्। धिनोषि धिनुथः धिनुथ। धिनोमि। **लोपश्च।** 'उतश्च प्रत्ययादसंयोगपूर्वात्' इति पूर्वसूत्रोक्त उकारः अस्येत्यनेन परामृश्यते। प्रत्ययशब्दः प्रत्ययसंबन्धिनि वर्तते। असंयोगपूर्वात् प्रत्ययादिति च उकारे अन्वेति। स च

भावः। **धिन्विकृण्व्योर च।** 'अलोऽन्त्यस्य' इति वकारस्याकारादेशः। चकारेण तु उप्रत्ययोऽनुकृष्यते। बोपदेवेन त्वनयोस्तनादित्वं स्वीकृतम्। तन्मते तु चकारं विनाप्युप्रत्ययलाभः। **अतो लोप इति।** यद्यप्युपदेशेऽदन्तत्वं नास्ति, तथाप्यार्ध-धातुकोपदेशे तदस्त्येव। 'धिन्विकृण्व्योर च' इति श्रुतत्वाद् अकारादेशे कृते चानु-कृष्टस्य पश्चाज्जायमानत्वादिति भावः। **लोपश्च। यः प्रत्ययोकार इति।**

परस्य हेर्लुक्स्यात्। धिनु। नित्यत्वादुकारलोपात्पूर्वमाट्। धिनवाव धिनवाम। जिन्वतीत्यादि। रिवि ५९५ रवि ५९६ धवि ५९७ गत्यर्थाः। रिण्वति। रण्वति। धन्वति। कृवि ५९८ हिंसाकरणयोश्च। चकाराद्गतौ। कृणोति इत्यादि धिनोतिवत्। अयं स्वादौ च। मव ५९९ बन्धने। मवति। मेवतुः मेवुः। अमवीत्, अमावीत्। अव ६०० रक्षणगतिकान्तिप्रीतितृप्त्यवगमप्रवेश-

---

अङ्गस्य विशेषणम्। तदन्तविधिः। तदाह **असंयोगेति। प्रत्ययोकार इति।** प्रत्ययसंबन्धी उकार इत्यर्थः। प्रत्यय उकार इति व्याख्याने तु सुनुवः सुनुमः इत्यत्र न स्यात्, तत्र श्नोरेव प्रत्ययत्वात्। प्रत्यय इति किम्? युवः युमः। 'असंयोगपूर्वात्' इति किम्? शक्नुवः शक्नुमः। **धिन्वः, धिनुव इति।** अत्र उप्रत्ययस्य उकारान्तत्वं व्यपदेशिवत्त्वेन बोध्यम्। नन्वेवं धिनोमीत्यत्र मिपि धिनु मि इति स्थिते उकारस्य लोपः स्यादित्यत आह **मिपि त्विति।** दिधिन्व। धिन्विता। धिन्विष्यति। धिनोतु। **उतश्च। हेर्लुक्स्यादिति।** 'चिणो लुक्' इत्यतः 'अतो हेः' इत्यतश्च तदनुवृत्तेरिति भावः। लोटो मिपि उप्रत्यये वकारस्य अकारे अतो लोपे धिनु मि इति स्थिते मेर्निभावम् 'आडुत्तमस्य—' इत्याडागमं च बाधित्वा परत्वादुकारस्य 'लोपश्चास्यान्यतरस्याम्—' इति लोपमाशङ्क्याह **नित्यत्वादुकार-लोपात् पूर्वमाडिति।** निभावस्याप्युपलक्षणम्। उकारलोपे कृते अकृते च निभावस्य आडागमस्य च प्रवृत्त्या नित्यत्वादुकारलोपात्पूर्वमेव निभावाडागमयोः कृतयोः उकारलोपस्याप्रसक्तौ आटः पित्त्वेन ङित्त्वाभावादुकारस्य गुणे अवादेशे च धिनवानीति रूपमिति भावः। अधिनोत्। धिनुयात्। धिन्व्यात्। अधिन्वीत्। अधिन्विष्यत्। **कृणोतीत्यादीति।** धिनिवद्रूपाणीति भावः। **अयं स्वादौ**

असंयोगपूर्वो यः प्रत्यय इति प्रत्ययविशेषणं तु न कृतम्। अक्षणुवः अक्षणुम इत्यादावनिष्टाभावेऽपि अश्नुवहे इत्यादावतिप्रसङ्गात्। एवम् 'उतश्च—' इति सूत्रेऽपि अक्षणुहीत्यत्र दोषाभावेऽपि अश्नुहीत्यत्रातिप्रसङ्गः स्यादित्यसंयोगपूर्वेति प्रत्ययविशेषणं न कृतमित्याहुः। अश्नुहीति परस्मैपदं यद्यपि लोके दुर्लभम्, तथापि वेदाभिप्रायेण तत्प्रयोगस्य साधुत्वं बोध्यम्। आप्नुहीति पाठस्तूचितः। **कृवि। अयमिति।** कृणोतीत्यादिरित्यर्थः। स्वादौ हि कृवीत्ययं धातुर्न पठ्यते, किंतु कृञ् हिंसायामिति। तस्य च परस्मैपदेषु सार्वधातुके कृणोतीत्यादीनि रूपाणि तुल्यानीति फलितोऽर्थः। **अव** रक्षणे। एकोनविंशतिरर्थाः। कान्तिः शोभा। दीप्तिस्तेज इत्याहुः। तृप्तिरिच्छा-नाशः। स्वाम्यर्थः स्वामित्वम्। हिंसा हननम्। आदानं ग्रहणम्। न चात्र दान-मेवार्थोऽस्त्विति वाच्यम्, 'भागे वृद्धौ ग्रहे वधे' इत्येवमर्थानां विशिष्य बोपदेवेन

अवयास्वाम्यर्थयाचनक्रियेच्छादीप्त्यवाप्त्यालिङ्गनहिंसादानभाववृद्धिषु । अवति । आव । मा भवानवीत् । धावु ६०१ गतिशुद्ध्योः । स्वरितेत् । धावति, धावते । दधाव, दधावे ।

अथोष्मान्ता आत्मनेपदिनः । धुक्ष ६०२ धिक्ष ६०३ सन्दीपनक्लेशनजीवनेषु । धुक्षते । दुधुक्षे । धिक्षते । दिधिक्षे । वृक्ष ६०४ वरणे । वृक्षते । ववृक्षे । शिक्ष ६०५ विद्योपादाने । शिक्षते । भिक्ष ६०६ भिक्षायामलाभे लाभे च । भिक्षते । क्लेश ६०७ अव्यक्तायां वाचि । बाधने इति दुर्गः । क्लेशते । चिक्लेशे । दक्ष ६०८ वृद्धौ शीघ्रार्थे च । दक्षते । ददक्षे । दीक्ष ६०९ मौण्ड्येज्योपनयननियमव्रतादेशेषु । दीक्षते । दिदीक्षे । ईक्ष ६१० दर्शने । ईक्षांचक्रे । ईष ६११ गतिहिंसादर्शनेषु । ईषांचक्रे । भाष ६१२ व्यक्तायां वाचि । भाषते । वर्ष ६१३ स्नेहने । दन्त्योष्ठ्यादिः । ववर्षे । गेषृ ६१४ अन्विच्छायाम् । ग्लेषृ इत्येके । अन्विच्छा अन्वेषणम् । जिगेषे । पेषृ ६१५ प्रयत्ने । पेषते । जेषृ ६१६ णेषृ ६१७ एषृ ६१८ प्रेषृ ६१९ गतौ । जेषते । नेषते । एषांचक्रे । पिप्रेषे । रेषृ ६२० हेषृ ६२१ ह्रेषृ ६२२ अव्यक्ते शब्दे । आद्यो वृकशब्दे । ततो द्वौ अश्वशब्दे । रेषते । हेषते । ह्रेषते । कासृ ६२३ शब्दकुत्सायाम् । कासांचक्रे । भासृ ६२४ दीप्तौ । बभासे । णासृ ६२५ रासृ ६२६ शब्दे । नासते ।

चेति । कविरित्यर्थः । **अव रक्षणेति** । स्वाम्यर्थ ऐश्वर्यम् । **मा भवानवीदिति** । 'नेटि' इति न वृद्धिः । मव्यादयोऽवत्यन्ताः परस्मैपदिनो गताः । **धावु गतीति** । उदिदयम् । **स्वरितेदिति** । ततश्च कर्तृगामिनि फले आत्मनेपदम् । अन्यथा परस्मैपदमिति भावः । **अथोष्मान्ता इति** । तत्र धुक्षेत्यारभ्य कासधातोः प्राक् षकारान्ताः । तत्र क्लेशधातुरेकः शकारान्तः । **दीक्ष मौण्ड्येति** । पञ्चार्थाः । णेषृधातुर्णोपदेशः । कासृधातुमारभ्य ईहधातोः प्राक् सकारान्ताः ।

गणितत्वात् । **भिक्ष** । याच्ञालाभालाभत्रयोऽर्थाः । स्वामी तु 'क्लेशेऽव्यक्तायां वाचि च' इति पठित्वा इमावपि भिक्षधातोरर्थाविति मन्यते । क्लिश उपताप इति दिवादौ । क्लिशू विबाधन इति क्र्यादौ । **दीक्ष** । पञ्चार्थाः । **ईष** गति । 'गुरोश्च हलः' इत्यप्रत्यये टाप् । ईषा, मनस ईषा मनीषा । शकन्ध्वादिः । मनीषामभिनिविष्टं मनीषितम् । 'प्रातिपदिकाद्धात्वर्थे बहुलमिष्ठवच्च' इति णिचि तदन्तात् क्तः । ईष उञ्छे इति तु परस्मैपदिषु । ह्रस्वादयस्त्रयः । इष गतौ दिवादिः । इष इच्छायां तुदादिः । इष आभीक्ष्ण्ये क्र्यादिः । **कासांचक्र इति** । 'कास्प्रत्ययात्–' इत्याम् । **भासृ दीप्तौ** । अस्य ऋदित्त्वं भ्राजतेरिव तङ्मात्रफलकम् । 'भ्राजभास–' इत्यादिनोपधा-

प्रयासते। यासे ६२७ कौटिल्ये। नसते। भ्यस ६२८ भये। भ्यसते। बभ्यसे। आङः शसि ६२९ इच्छायाम्। आशंसते। आशशंसे। ग्रसु ६३० ग्लसु ६३१ अदने। जग्रसे। जग्लसे। ईह ६३२ चेष्टायाम्। ईहांचक्रे। वहि ६३३ महि ६३४ वृद्धौ वंहते। ववंहे। मंहते। अहि ६३५ गतौ। अंहते। आनंहे। गर्ह ६३६ गल्ह ६३७ कुत्सायाम्। जगर्हे। जगल्हे। बर्ह ६३८ बल्ह ६३९ प्राधान्ये। ओष्ठ्यादी। वर्ह ६४० वल्ह ६४१ परिभाषणहिंसाच्छादनेषु। दन्त्योष्ठ्यादी। केचित्तु पूर्वयोर्दन्त्योष्ठ्यादितामनयोरोष्ठ्यादितां चाहुः। प्लिह ६४२ गतौ। पिप्लिहे। वेहृ। ६४३ जेहृ ६४४ वाहृ ६४५ प्रयत्ने। आद्यो दन्त्योष्ठ्यादिः। अन्त्यः केवलोष्ठ्यादिः। उभावप्योष्ठ्यादी इत्येके। दन्त्योष्ठ्यादी इत्यपरे। जेहतिर्गत्यर्थोऽपि। ववाहे। द्राहृ ६४६ निद्राक्षये। निक्षेपे इत्येके। काशृ ६४७ दीप्तौ। चकाशे। ऊह ६४८ वितर्के। ऊहांचक्रे। गाहू ६४९ विलोडने। गाहते। जगाहे। जगाहिषे, जघाक्षे। जगाहिढ्वे, जगाहिध्वे, जघाढ्वे।

कासांचक्र इति। कास्प्रत्ययादित्याम्। णासृधातुर्णसधातुश्च णोपदेशः। **आङः शसीति**। आङः परः शसिधातुरिच्छायामित्यर्थः। ईहेत्यारभ्य काशृधातुवर्जं घुषि कान्तीत्यतः प्राग् हकारान्ताः। काशृधातुस्तु शकारान्तः। प्लिहधातुरिदुपधः। **ऊह वितर्क इति**। युक्त्या अर्थनिर्णयो वितर्कः। 'अनुक्रमप्यूहति पण्डितो जनः' इत्यत्र तु अनुदात्तत्वलक्षणात्मनेपदमनित्यमिति बोध्यम्। गाहूधातुरूदित्त्वाद्वेट्, तदाह **जगाहिषे, जघाक्ष इति**। इडभावे जगाह् से इति स्थिते हो ढः, 'एकाचः—'

ह्रस्वस्य विकल्पितत्वात्। **णस** कौटिल्ये। लिण्निमित्तादेशादित्वाभावादेत्वम्। नेसे। **आङः शसि**। शंसु स्तुताविति तु परस्मैपदिषु वक्ष्यते। **ग्रसु ग्लसु**। 'उदितो वा' इति क्त्वायां वेट्। ग्रसित्वा। ग्रस्त्वा। 'यस्य विभाषा' इति नेट्। ग्रस्तः। **वेहृ जेहृ वाहृ**। **आद्य इति**। वेहतेरति प्रत्यये वेहत्शब्दो निपातितः। 'पोटायुवति—' इति सूत्रे इति भावः। वेहद्गर्भोपघातिनी। **अन्त्य इति**। बाहुशब्दस्य भुजपर्यायस्य 'क्षुब्धस्वान्तध्वान्त—' इति निपातितस्य बाढशब्दस्य च निर्विवादत्वादिति भावः। **दन्त्योष्ठ्यादी इति**। उभावपीत्यनुषज्यते। अनुदात्तत्वकृतमात्मनेपदमनित्यम्। तेन 'ववाह रक्तं पुरुषास्ततो जाताः सहस्रशः' इति सिद्धम्। न चात्रार्थसंगतिः। धातूनामनेकार्थत्वात्प्रस्रवणार्थकत्वे बाधकाभावादित्याहुः। **ऊह**। कथं तर्हि 'अनुक्रमप्यूहति पण्डितो जनः' इति। अत्राहुः—अनुदात्तत्वलक्षणस्य तङोऽनित्यत्वान्न दोष इति। **गाहू**। ऊदित्त्वादिड् वा। इडभावे ढत्वम्। 'एकाचः—' इति भष्भावः। 'षढोः कः सि' इति कः। कात्परस्य षत्वम्। जघाक्षे। 'विभाषेटः' इति

गाहिता। २३३५ **ढो ढे लोपः।** (८-३-१३) ढस्य लोपः स्याद् ढे परे। गाढा। गाहिष्यते, घाक्ष्यते। गाहिषीष्ट, घाक्षीष्ट। अगाहिष्ट, अगाढ अघाक्षाताम् अघाक्षत। अगाढाः। अघाढ्वम्। अघाक्षि। गृहू ६५० ग्रहणे। गर्हते। जगृहे। 'ऋदुपधेभ्यो लिटः कित्वं गुणात्पूर्वविप्रतिषेधेन' (वा ४६३)

इति भष्भावेन गस्य घः, 'षढोः–' इति ढस्य कः, सस्य षः। **जगाहिढ्वे जगाहिध्व इति।** इट्पक्षे 'विभाषेटः' इति ढत्वविकल्पः। इडभावे त्वाह **जघाढ्व इति।** जगाह् ध्वे इति स्थिते हस्य ढः, धस्य ष्टुत्वेन ढः, गस्य भष् घकारः, पूर्वस्य ढस्य 'ढो ढे लोपः' इति वक्ष्यमाणो लोपः। ढलोपसूत्रं त्विहैव पठितुं युक्तम्। **गाहितेति।** इट्पक्षे रूपम्। इडभावे तु गाह् ता इति स्थिते हस्य ढत्वे 'झषस्तथोर्धोऽधः' इति तकारस्य धत्वे, ष्टुत्वेन धस्य ढत्वे, गाढ् ढा इति स्थिते **ढो ढे।** 'ढः' इति षष्ठ्यन्तम्। तदाह **ढस्येति।** ढकारस्येत्यर्थः। इति पूर्वस्य ढकारस्य लोपे गाढा इति रूपम्। ढलोपे ष्टुत्वस्यासिद्धत्वं तु न, तथा सति ढलोपविधिवैयर्थ्यात्। **घाक्ष्यत इति।** इडभावे हस्य ढः, गस्य भष् घकारः, ढस्य कः, सस्य ष इति भावः। **घाक्षीष्टेति।** आशीर्लिङि सीयुटि इडभावपक्षे हस्य ढः, गस्य भष् घकारः, ढस्य कः, सस्य ष इति भावः। **अगाहिष्टेति।** सिच इट्, सस्य षः, तकारस्य ष्टुत्वेन टः। इडभावे त्वाह **अगाढेति।** अगाह् स् त इति स्थिते सिच इडभावे 'झलो झलि' इति लोपः। ढत्वधत्वष्टुत्वढलोपाः। सलोपात्पूर्वं भष्भावस्तु न, भष्भावस्यासिद्धतया 'झलो झलि' इति सलोपस्य पूर्वं प्रवृत्तेः। न च कृतेऽपि सलोपे प्रत्ययलक्षणेन सकारपरकत्वाद् भष् दुर्वार इति शङ्क्यम्, वर्णाश्रये प्रत्ययलक्षणाभावादिति भावः। **अघाक्षातामिति।** इडभावपक्षे ढघकषाः। **अघाक्षतेति।** पूर्ववत्। **अगाढा इति।** थास्, सिच्, इडभावे सलोपः। ढत्वधत्वष्टुत्वढलोपाः। **अघाढ्वमिति।** ध्वमि इडभावपक्षे सलोपः। ढत्वधत्वष्टुत्वढलोपाः। ध्वममाश्रित्य ढलोपात्पूर्वं भष्भावः। **अघाक्षीति।** इडभावे हस्य ढः, भष्भावः, ढस्य कः, सस्य षत्वमिति भावः। अघाक्ष्वहि। अगाहिष्यत, अघाक्ष्यत। गृहूधातुरूदिद्

वा मूर्धन्यः। जगाहिढ्वे, जगाहिध्वे। इडभावे तु भष्भावः। **ढो ढे लोपः।** जघाढ्वे। ढे किम्, ऊढः। इह पूर्वं ढलोपो माभूत्। कृते तु ढग्रहणे 'ष्टुना ष्टुः' इत्यस्य आश्रयात् सिद्धत्वं भवतीति सिद्धमिष्टमित्याहुः। **अगाढेति।** 'झलो झलि' इति सलोपः। ढत्वधत्वष्टुत्वढलोपाः। सिचो लोपात्पूर्वं भष्भावस्तु न, असिद्धत्वात्। भष्भावस्तु सिज्लोपानन्तरमपि न भवति सकारपरत्वाभावात्। न च कृतेऽपि सलोपे प्रत्ययलक्षणेन सिच्परत्वाद्भष्भावो दुर्वार इति शङ्क्यम्, वर्णाश्रये प्रत्ययलक्षणा-

जगृहिषे, जघृक्षे। जघृढ्वे। गर्हिता, गर्ढा। गर्हिष्यते, घर्क्ष्यते। गर्हिषीष्ट, घृक्षीष्ट। लुङि अगर्हिष्ट। इडभावे। २३३६ **शल इगुपधादनिटः क्सः।** (३-१-४५) इगुपधो यः शलन्तस्तस्मादनिटः च्लेः क्सादेशः स्यात्। अघृक्षत। २३३७ **क्सस्याचि।** (७-३-७२) अजादौ तङि क्सस्य लोपः स्यात्। 'अलोऽन्त्यस्य' (सू ४२) अघृक्षाताम् अघृक्षन्त। ग्लह ६५१ च।

ऋदुपधः। **गर्हत इति।** लटस्तिपि शपि लघूपधगुणे रपरत्वम्। **जगृह इति।** 'असंयोगात्–' इति कित्त्वाद्गुणाभावः। न च कित्त्वात् परत्वाद्गुणः शङ्क्यः, 'ऋदुपधेभ्यो लिटः कित्त्वं गुणात् पूर्वविप्रतिषेधेन' इति वार्तिकादिति भावः। ऊदित्त्वादिड्विकल्पं मत्वा आह **जगृहिषे, जघृक्ष इति।** अभ्यासे उरदत्वम्, 'हलादिः शेषः' जश्त्वम्, इट्, षत्वम्। इडभावे तु ढत्वभष्भावकत्वषत्वानि। ध्वमि जगृहिध्वे इति सिद्धवत्कृत्य इडभावे आह **जघृढ्व इति।** हस्य ढः, भष्भावष्टुत्वढलोपाः। **गर्ढेति।** इडभावे गुणे रपरत्वे ढत्वधत्वष्टुत्वढलोपाः। **घर्क्ष्यत इति।** गुणः, रपरत्वम्, हस्य ढः, भष्भावे ढस्य कः, षत्वम्। **घृक्षीष्टेति।** आशीर्लिङः सीयुटि इडभावे 'लिङ्सिचौ–' इति कित्त्वाद्गुणाभावे, हस्य ढः, भष्भावः, ढस्य कः, षत्वम्। **अगर्हिष्टेति।** सिच इटि गुणे रपरत्वे षत्वे रूपम्। **शल इगुपधा। शलन्त इति।** 'धातोरेकाचः–' इत्यतोऽनुवृत्तधातुविशेषणत्वात्तदन्तविधिरिति भावः। सिचोऽपवादः क्सादेशः अदन्तः। ककार इत्। **अघृक्षतेति।** च्लेः क्सः। हस्य कित्त्वादृकारस्य न गुणः। हस्य ढः, भष्भावः, ढस्य कः, षत्वमिति भावः। अघृक्ष आताम् इति स्थिते 'आतो ङितः' इति इयादेशे प्राप्ते **क्सस्य।** अचीत्यस्याङ्गाक्षिप्तप्रत्ययविशेषणत्वात् तदादिविधिः। 'घोर्लोपो लेटि वा' इत्यतो लोप इत्यनुवर्तते। तदाह **अजादावित्यादिना। अलोऽन्त्यस्येति।** अन्त्यस्याकारस्य लोप इति भावः। वस्तुतस्तु 'लुग्वा दुहदिह–' इत्युत्तरसूत्रादात्मनेपदे इत्यपकृष्य तद्विशेषणत्वादचीति तदादिविधिः। तेन दृशेः क्सप्रत्यये तादृक्षा इत्यादौ नायं लोपः। अजादौ तङीत्येव क्वचित्पाठो दृश्यते। **अघृक्षातामिति।** अघृक्ष आताम् इति स्थिते

भावात्। अन्यथा गवे हितं गोहितमित्यत्रावादेशः स्यादिति दिक्। **जगृह इति।** कित्वात्परत्वात् 'पुगन्त–' इति गुणे प्राप्ते 'ऋदुपधेभ्यः–' इति वार्तिकात्कित्त्वे गुणाभावः। **शल इगुपधा।** शल इति धातोर्विशेषणात्तदन्तलाभः। शल इति किम्, अतिप्त। इगिति किम्, अगाढ। अनिटः किम्, औहिष्ट। **क्सस्याचि। अजादाविति।** अङ्गाक्षिप्तप्रत्ययोऽत्र विशेष्यः। तङीति तु केषांचित्प्रक्षेपस्तस्य काशिकादावनुक्तत्वादित्याहुः। अन्ये तु 'लुग्वा दुह–' इत्यत आत्मनेपद इत्यपकर्षणात्तङीति

ग्लहते। घुषि ६५२ कान्तिकरणे। घुंषते। जुघुंषे। केचिद् घष इत्यदुपधं पठन्ति।

अथार्हत्यन्ताः परस्मैपदिनः। घुषिर् ६५३ अविशब्दने। विशब्दनं प्रतिज्ञानम्, ततोऽन्यस्मिन्नर्थे इत्येके। शब्दे इत्यन्ये पेठुः। घोषति। जुघोष। घोषिता इरित्वादङ् वा, अघुषत्। अघोषीत्। अक्षू ६५४ व्याप्तौ। २३३८ अक्षोऽन्यतरस्याम्। (३-१-७५) अक्षो वा श्नुप्रत्ययः स्यात्कर्त्रर्थे सार्वधातुके परे। पक्षे शप्। अक्ष्णोति अक्ष्णुतः अक्ष्णुवन्ति। अक्षति अक्षतः अक्षन्ति। आनक्ष। आनक्षिथ, आनष्ठ। अक्षिता, अष्टा। अक्षिष्यति। 'स्कोः-' (सू ३८०) इति

क्साकारस्य लोपे अतः परत्वाभावाद् 'आतो ङितः' इति इय् नेति भावः। **अघृक्षन्तेति।** झस्य अजादित्वाभावात्तस्मिन्परे क्सस्य अकारलोपाभावादतः परत्वाद् 'आत्मनेपदेष्वनतः' इत्यदादेशो न। कृते तु झोऽन्तादेशे क्सस्याकारलोपः पररूपं वा। **ग्लहे चेति।** ग्लहधातुरपि ग्रहणे वर्तत इत्यर्थः। अदुपधोऽयम्। **घुषि कान्तीति।** उदुपधोऽयम्। इदित्वान्नुम्। 'नश्च-' इत्यनुस्वारः। यय्परकत्वाभावान्न परसवर्णः। तदाह **घुंषत इति।** सेट्कोऽयम्। अदुपधपक्षे तु घषते। जघषे। ऊष्मान्ता आत्मनेपदिनो गताः।

अथार्हत्यन्ताः परस्मैपदिन इति। ऊष्मान्ता इति शेषः। तत्र तुस हसेत्यतः प्राक् षान्ताः। **घुषिरिति।** इर् इत्। **प्रतिज्ञानमिति।** वेदाः प्रमाणमित्याद्यभ्युपगम इत्यर्थः। **ततोऽन्यस्मिन्निति।** विशब्दनाद् अन्यद् अविशब्दनम्, तस्मिन्नित्यर्थः। **इरित्वादङ् वेति।** 'इरितो वा' इत्यनेनेति शेषः। **अघुषदिति।** अङो ङित्वान्न लघूपधगुणः। **अघोषीदिति।** अङभावपक्षे लघूपधगुणे 'इट ईटि' इति सिज्लोपः। हलन्तलक्षणावृद्धेः 'नेटि' इति निषेधः। अक्षूधातुः ऊदित्वाद्वेट्कः। **अक्षोऽन्यतरस्याम्।** अक्ष इति पञ्चमी। 'स्वादिभ्यः श्नुः' इत्यतः श्नुरिति, 'कर्तरि शप्' इत्यतः कर्तरीति, 'सार्वधातुके यक्' इत्यतः सार्वधातुके इति चानुवर्तते, तदाह **अक्षो वेति।** श्नुप्रत्ययस्य शित्त्वं सार्वधातुकत्वार्थम्। तत्फलं तु 'स्वादिभ्यः श्नुः' इत्यत्र वक्ष्यते। **अक्ष्णोतीति।** तिपि श्नुः तस्य पित्त्वेन ङित्त्वाभावात् 'सार्वधातुक-' इति गुणः, णत्वम्। **अक्ष्णुत इति।** तसः अपित्त्वेन ङित्वात् श्नोर्न गुणः। **अक्ष्णुवन्तीति।** ङित्वाद्गुणाभाव उवङ्। अक्ष्णोषि अक्ष्णुथः अक्ष्णुथ। अक्ष्णोमि अक्ष्णुवः अक्ष्णुमः। **अक्षतीति।** शप्पक्षे रूपम्। **आनक्षेति।** णलि द्विहल्त्वान्नुट्। आनक्षतुः आनक्षुः। ऊदित्वादिट्पक्षे आह **आनक्षिथेति।**

रलभ्यते। तेन 'दृशेः क्सः' इति वार्तिकोक्तक्सप्रत्ययस्य लोपो न भवति सदृक्षा अन्यादृक्षा इत्यत्रेत्याहुः। **घुषि कान्तिकरणे।** लुङि अघुंषिष्ट अघुंषिषाताम्। अदुपधपाठे

कलोपः। 'षढोः कः सि' (सू २९९) अक्ष्यति। अक्ष्णोतु। अक्ष्णुहि। अक्ष्णवानि। आक्ष्णोत्। आक्ष्णवम्। अक्ष्णुयात्। अक्ष्णुयुः। अक्ष्यात्। ऊदित्त्वाद्वेट्। 'नेटि' (सू २२६८)। मा भवानक्षीत् अक्षिष्टाम् अक्षिषुः। इडभावे तु मा भवानाक्षीत् आष्टाम् आक्षुः। तक्षू ६५५ त्वक्षू ६५६ तनूकरणे। २३३६

इडभावे आह **आनष्टेति**। आनक्ष् थ इति स्थिते 'स्कोः–' इति कलोपः थस्य ष्टुत्वेन ठः। **अष्टेति**। लुटि तासि इडभावपक्षे 'स्कोः–' इति कलोपे तकारस्य ष्टुत्वेन टः। अक्ष् स्य तीति स्थिते, प्रक्रियां दर्शयति **स्कोरिति कलोपः, षढोः कः सीति**। कात्परत्वात् सस्य षत्वं च। **अक्ष्णोत्विति**। अक्ष्णोतु, अक्ष्णुतात् अक्ष्णुताम् अक्ष्णुवन्तु। **अक्ष्णुहीति**। संयोगपूर्वत्वाद् 'उतश्च–' इति हेर्लुग् न। हेरपित्त्वेन ङित्त्वात् श्नोर्न गुणः। अक्ष्णुतात् अक्ष्णुतम् अक्ष्णुत। **अक्ष्णवानीति**। आटः पित्त्वेन ङित्वाभावाश्च गुणनिषेधः। गुणे अवादेशः। अक्ष्णवाव अक्ष्णवाम। शपि तु अक्षत्वित्यादि। **आक्ष्णोदिति**। लङस्तिप् श्नोर्गुणः आट् वृद्धिः। आक्ष्णुताम् आक्ष्णुवन्। आक्ष्णोः आक्ष्णुतम् आक्ष्णुत। **आक्ष्णवमिति**। मिपः अम्, श्नोर्गुणः, अवादेशः। आक्ष्णुव आक्ष्णुम। **अक्ष्णुयादिति**। विधिलिङि यासुटो ङित्त्वात् श्नोर्न गुणः। **अक्ष्णुयुरिति**। 'लिङः सलोपः–' इति सलोपे 'उस्यपदान्तात्' इति पररूपमिति भावः। अक्ष्णुयाः अक्ष्णुयातम् अक्ष्णुयात। अक्ष्णुयाम् अक्ष्णुयाव अक्ष्णुयाम। शप्पक्षे अक्षेदित्यादि। **अक्ष्यादिति**। आशीर्लिङि आर्धधातुकत्वान्न श्नुः, नापि शप्। लुङि सिचि विशेषमाह **ऊदित्त्वाद्वेडिति**। तत्र इट्पक्षे आह **नेटीति**। हलन्तलक्षणा वृद्धिर्नेत्यर्थः। नच अभैत्सीदित्यादावेकेन हला व्यवधाने हलन्तलक्षणवृद्धेश्चरितार्थत्वादत्र न तत्प्रसक्तिरिति शङ्क्यम्, रञ्जेः अराङ्क्षीदित्यत्र वृद्धिसिद्धये अनेकाल्व्यवधानेऽपि हलन्तलक्षणवृद्धिप्रवृत्तेर्भाष्यादौ प्रपञ्चितत्वादिति भावः। **मा भवानक्षीदिति**। आटि सति हलन्तलक्षणवृद्धौ सत्यामसत्यां च रूपे भेदाभावाद् मा भवानित्युपात्तम्। **अक्षिष्टाम्। अक्षिषुरिति**। अत्रापि मा इति संबध्यते। **इडभावे त्विति**। लुङस्तिपि अक्ष् स् ईदिति स्थिते इडभावाद् 'नेटि' इति निषेधाप्रसक्त्या हलन्तलक्षणवृद्धौ 'स्कोः–' इति कलोपे 'षढोः -' इति कत्वे षत्वमिति भावः। अत्र 'नेटि' इति निषेधाभावेन हलन्तलक्षणवृद्धिर्निर्बाधेति स्पष्टयितुमत्र 'मा भवान्' इत्यत्राप्युपात्तमिति बोध्यम्। **आष्टामिति**। अक्ष् स् ताम् इति स्थिते हलन्तलक्षणवृद्धौ 'झलो झलि' इति सिज्लोपे 'स्कोः–' इति कलोपे तकारस्य ष्टुत्वम्। **आक्षुरिति**। अक्ष् स् उस् इति स्थिते हलन्तलक्षणवृद्धौ 'स्कोः–' इति कलोपे षस्य कत्वे सस्य षत्वमिति

तनूकरणे तक्षः। (३-१-७६) श्नुः स्याद्वा शब्विषये। तक्ष्णोति, तक्षति वा काष्ठम्। ततक्षिथ, ततष्ठ। अतक्षीत् अतक्षिष्टाम्। अताक्षीत् अताष्टाम्। 'तनूकरणे' किम्—वाग्भिः संतक्षति। भर्त्संयतीत्यर्थः। उक्ष ६५७ सेचने। उक्षांचकार। रक्ष ६५८ पालने। णिक्ष ६५९ चुम्बने। प्रणिक्षति। त्रक्ष ६६० ष्ट्रक्ष ६६१ णक्ष ६६२ गतौ। त्रक्षति। स्तृक्षति। नक्षति। वक्ष ६६३ रोषे। सङ्घाते इत्येके। मृक्ष ६६४ सङ्घाते। म्रक्ष इत्येके। तक्ष ६६५ त्वचने। त्वचनं संवरणं त्वचो ग्रहणं च। पक्ष परिग्रहे इत्येके। सूर्क्ष ६६६ आदरे। सुसूर्क्ष। अनादरे इति तु क्वाचित्कोऽपपाठः। 'अवज्ञावहेलनमसूर्क्षणम्' इत्यमरः। काक्षि ६६७ वाक्षि ६६८ माक्षि ६६९ काङ्क्षायाम्। द्राक्षि ६७० ध्राक्षि ६७१

भावः। आक्षीः आष्टम् आष्ट। आक्षम् आक्ष्व आक्ष्म। आक्षिष्यत्, आक्ष्यत् आक्ष्यताम् आक्ष्यन्। आक्ष्यः आक्ष्यतम् आक्ष्यत। आक्ष्यम् आक्ष्याव आक्ष्याम। तक्षू त्वक्षू इति। स्थूलस्य काष्ठादेः कतिपयावयवापनयनेन सूक्ष्मीकरणं तनूकरणम्। तनूकरणे। शेषपूरणेन सूत्रं व्याचष्टे श्नुः स्याद्वा शब्विषय इति। 'स्वादिभ्यः श्नुः' इत्यतः श्नुरिति, 'कर्तरि शप्' इत्यतः कर्तरीति, 'सार्वधातुके यक्' इत्यतः सार्वधातुके इति चानुवर्तते। तनूकरणेऽर्थे विद्यमानात् तक्षधातोः श्नुः स्यात्कर्त्रर्थे सार्वधातुके इति फलितम्। नच तक्षूधातोस्तनूकरणार्थकत्वाव्यभिचारात् श्नुविधौ तनूकरणग्रहणं व्यर्थमिति वाच्यम्, अत एव धातुपाठे अर्थनिर्देशस्य उपलक्षणत्वावगमात्। तक्ष्णोतीत्यादि। अक्षूवद्रूपाणि। लुङि सिचि इट्पक्षे 'नेटि' इति वृद्धिनिषेधे अतक्षीदिति, इडभावे तु अताक्षीदिति च रूपम् अक्षूवत्। एवं त्वक्षूधातुरपि। णिक्षधातुर्णोपदेशः। प्रणिक्षतीति। 'उपसर्गादसमासेऽपि—' इति णत्वम्। त्रक्ष ष्ट्रक्ष णक्ष गताविति। त्रयोऽप्यकारमध्याः, द्वितीयः षोपदेशः, तदाह स्तृक्षतीति। षस्य सत्वे ष्टुत्वनिवृत्तिरिति भावः। णक्षधातुर्णोपदेशः। सिचि 'नेटि' इति हलन्तलक्षणवृद्धिनिषेधः। वक्ष रोष इति। दन्त्योष्ठ्यादिः। म्रक्षधातुरकारमध्यः। त्वचनशब्दस्य विवरणं संवरणमिति। सूर्क्षधातुः रेफमध्यः। अपपाठत्वे हेतुमाह अवज्ञेति। सूर्क्षधातोरमादरार्थकत्वे

तु अघाक्षीत्, अघक्षीत्। अतक्षीदिति। 'नेटि' इति वृद्धिनिषेधः। इडभावे तु अताक्षीत्। प्रणिक्षतीति। 'उपसर्गादसमासेऽपि—' इति नित्यं णत्वम्। 'वा निंसनिक्षनिन्दाम्' इति तु कृद्विषयम्। 'ण्वुल्तृचौ', प्रणिक्षकः। प्रनिक्षकः। प्रणिक्षिता। प्रनिक्षिता। अवज्ञेत्यादि। सूर्क्षणमादरस्ततोऽन्यदसूर्क्षणमित्यमरग्रन्थार्थः। यदि तु सूर्क्षणमनादर इत्युच्येत तर्हि असूर्क्षणमवज्ञापर्यायो न स्यादिति भावः। काक्षि।

ध्वाक्षि ६७२ घोरवाशिते च। चूष ६७३ पाने। चुचूष। तूष ६७४ तुष्टौ। पूष ६७५ वृद्धौ। मूष ६७६ स्तेये। लूष ६७७ रूष ६७८ भूषायाम्। शूष ६७९ प्रसवे। प्रसवोऽभ्यनुज्ञानम्। तालव्योष्मादिः। यूष ६८० हिंसायाम्। जूष ६८१ च। भूष ६८२ अलङ्कारे। भूषति। ऊष ६८३ रुजायाम्। ऊषांचकार। ईष ६८४ उञ्छे। कष ६८५ खष ६८६ शिष ६८७ जष ६८८ झष ६८९ शष ६९० वष ६९१ मष ६९२ रुष ६९३ रिष ६९४ हिंसार्थाः। तृतीयषष्ठौ तालव्योष्मादी। सप्तमो दन्त्योष्ठ्यादिः। चकाष। चखाष। शिशेष। शिशेषिथ। शेष्टा। क्सः अशिक्षत्। अशेषयत्। जेषतुः, जझषतुः। शेषतुः। ववषतुः। मेषतुः। २३४० तीषसहलुभरुषरिषः। (७-२-४८) इच्छत्यादेः परस्य

असूर्क्षणमित्यस्य आदरार्थकत्वापत्त्या अमरकोशे अवज्ञापर्यायत्वावगमविरोध इति भावः। **घोरवाशिते चेति**। चात् काङ्क्षायामपि। घोरवाशितं क्रूरशब्दः। चूषेत्यारभ्य ऊष रुजायामिति यावद् दुपधाः। **ईष उञ्छ इति**। ईदुपधः। कषेत्यारभ्य दश धातवः। तत्र तृतीयो दशमश्च इदुपधः। शिषधातुरनिट्कः। क्रादिनियमात्थलि वसि मसि च नित्यमिट्, अजन्ताकारवत्त्वाभावेन थलि वेट्कत्वाभावात्। शिशेषिथ। शिशिषिव शिशिषिम। **अशिक्षदिति**। 'शल इगुपधात्–' इति च्लेः क्सादेशे कित्वाल्लघूपधगुणनिषेधे षस्य कत्वे सस्य षत्वमिति भावः। **ववषतुरिति**। 'न शसदद–' इति निषेधादेत्त्वाभ्यासलोपौ न। रुषधातुः सेट्कः। रोषति। रुरोष रुरुषतुः रुरुषुः। रुरोषिथ रुरुषथुः रुरुष। रुरोष रुरुषिव रुरुषिम। **तीषसह**। 'आर्धधातुकस्य–' इत्यत इडित्यनुवर्तते। 'स्वरतिसूति–' इत्यतो वेति च। तीति सप्तम्युपादानात्तदादिविधिः। इष सह लुभ रुष रिष एषां द्वन्द्वात्पञ्चम्येकवचनम्, तदाह **इच्छत्यादेरिति**। इच्छतीति इषेः श्तिपा निर्देशः। इषधातुर्विवक्षितः। इषु इच्छायां तुदादिः शविकरणः। इष गतौ दिवादिः श्यन्विकरणः। इष आभीक्ष्ण्ये क्र्यादिः श्नाविकरणः। तत्र 'इषेस्तकारे श्यन्प्रत्ययात्प्रति-

काङ्क्षा इच्छा। **ध्राक्षि ध्वाक्षि ध्वाक्षि**। घोरवासितं घोरशब्दः। वास शब्दे। **ध्वाङ्क्षतीति**। ध्वाङ्क्षः काकः। **द्राक्षि**। धातोः 'गुरोश्च हलः' इति अप्रत्यये द्राक्षा। यवादिगणे निपातनान्नलोपः। द्राक्षामान्। इह मतोर्वत्वं तु न भवति, 'अयवादिभ्यः' इत्युक्तेः। **तूष तुष्टौ**। दिवादौ तु ह्रस्वोपधः। **मूष** स्तेये। संज्ञायां क्वुनि मूषकः। क्र्यादौ तु ह्रस्वोपधोऽयम्। **भूष** अलंकारे। अयं चुरादावपि। **ईष** उञ्छे। 'गुरोश्च हलः' इत्यप्रत्यये ईषा लाङ्गलदण्डः। **कष खष** षान्तौ। शिषेत्ययमप्यनिट्को न तु रौधादिक एव, संकोचे मानाभावादित्यभिप्रेत्योदाहरति **शेष्टा**। **अशिक्षदित्यादि**।

षादेरार्धधातुकस्येड्वा स्यात्। रोषिता, रोष्टा। रोषिष्यति। रेषिता, रेष्टा। रेषिष्यति। भष ६९५ भर्त्सने। इह भर्त्सनं श्वरवः। भषति। बभाष। उष ६९६ दाहे। ओषति। २३४१ उषविदजागृभ्योऽन्यतरस्याम्। (३-१-३८) एभ्यो लिट्याम्वा स्यात्। ओषांचकार। उवोष। ऊषतुः। उवोषिथ। जिषु ६९७ विषु ६९८ मिषु ६९९ सेचने। जिजेष। क्रादिनियमादिट्। विवेषिथ, विविषिथ। वेष्टा। वेक्ष्यति। अविक्षत्। पुष ७०० पुष्टौ। पोषति। पोषिता। पोषिष्यति। अपोषीत्। अनिट्केषु पुष्य इति श्यना निर्देशादयं सेट्, अतो न क्सः। अङ्विधौ दैवादिकस्य ग्रहणान्नाङ्। श्रिषु ७०१ श्लिषु ७०२ प्रुषु ७०३ प्लुषु ७०४ दाहे। श्रेषति। शिश्रेष। श्रेषिता। श्लेषति। शिश्लेष। श्लेषिता। अयमपि सेट्। अनिट्सु दैवादिकस्यैव ग्रहणम् इति कैयटादयः। यत्त्वनिट्कारिकान्यासे द्वयोर्ग्रहणमित्युक्तं तत्स्वोक्तिविरोधाद् ग्रन्थान्तरविरोधाच्चो-

---

षेधः' इति वार्तिकात् श्यन्विकरणस्य न ग्रहणम्। **रोषिता, रोष्टेति**। इडभावे ष्टुत्वेन तकारस्य टकारः। रिषेस्तादाविड्विकल्पं मत्वा आह **रेषिता रेष्टेति**। **उष दाह इति**। सेट्कोऽयम्। उखधातुवद् रूपाणि। **उषविद**। 'कास्प्रत्ययात्–' इत्यत आम् लिटीत्यनुवर्तते, तदाह **एभ्यो लिटीति**। आमभावपक्षे आह **उवोषेति**। 'अभ्यासस्यासवर्णे' इति उवङादेशः। **जिषु विषु मिषु सेचन इति**। द्वितीयो दन्त्योष्ठ्यादिः। थलि वसि मसि च विशेषमाह **क्रादिनियमादिडिति। विवेषिथेति**। अजन्ताकारवत्त्वाभावेन भारद्वाजनियमाप्रवृत्तेस्थल्यपि क्रादिनियमान्नित्यमिट्। **वेष्टेति**। तासि ष्टुत्वेन तकारस्य टः। **वेक्ष्यतीति**। 'षढोः–' इति षस्य कः, सस्य षः। **अविक्षदिति**। 'शल इगुपधात्–' इति क्सः, षस्य कः, सस्य षः, कित्त्वान्न गुणः। पुषधातुः सेडिति मत्वा आह **पोषितेति। अपोषीदिति**। 'नेटि' इति वृद्धिनिषेधः। नन्वनिट्सु पुषेः पाठात् कथं सेट्कत्वमित्यत आह **अनिट्केष्विति। अत इति**। सेट्कत्वात् क्सो नेत्यर्थः। ननु पुषादित्वलक्षणः अङ् कुतो नेत्यत आह **अङ्विधाविति**। एतच्चानुपदमेव पुषादिसूत्रव्याख्यावसरे स्पष्टीभविष्यति। **अयमपीति**। पुषधातुवत् श्लिषधातुरपि भौवादिकः सेडित्यर्थः। **कैयटादय इति**। 'श्लिष आलिङ्गने' इति सूत्रे कैयटहरदत्तादिभिस्तथा प्रपञ्चितत्वादिति भावः। **द्वयोर्ग्रहणमिति**। भौवादिकदैवादिकयोरित्यर्थः। **स्वोक्तीति**। 'श्लिष आलिङ्गने' इति सूत्रे दैवादिकश्लिषे-

---

तीषसह। इष इच्छायाम्। षह मर्षणे। लुभ गार्ध्ये। रुष रिष हिंसायाम्। एषिता, एष्टा। सहिता, सोढा। लोभिता, लोब्धा। **उवोषेति**। 'पुगन्त–' इति

पेषथम् । पुप्रोष । पुप्लोष । पृषु ७०५ वृषु ७०६ मृषु ७०७ सेचने । मृषु सहने च । इतरौ हिंसासंक्लेशनयोश्च । पर्षति । पपर्ष । पृष्यात् । घृषु ७०८ सङ्घर्षे । हृषु ७०९ अलीके । तुस ७१० ह्रस ७११ ह्लस ७१२ रस ७१३ शब्दे । तुतोस । जह्रास । जह्लास । ररास । लस ७१४ श्लेषणक्रीडनयोः । घस्लृ ७१५ अदने । अयं न सार्वत्रिकः । 'लिट्यन्यतरस्याम्' (सू २४२४) इत्यदेर्घस्लादेशविधानात् । ततश्च यत्र लिङ्गं वचनं वास्ति तत्रैवास्य प्रयोगः । अत्रैव पाठः शपि परस्मैपदे लिङ्गम् । लृदित्करणमङि । अनिट्कारिकासु पाठो वलाद्यार्धधातुके । क्मरचि तु विशिष्योपादानम् । घसति । घस्ता । २३४२ सः स्यार्धधातुके । (७-४-४९) सस्य तः स्यात्सादावार्धधातुके । घत्स्यति । घसतु । अघसत् ।

रनिट्केषु ग्रहणमिति न्यासकृता कैयटादिभिश्चोक्तत्वादिति भावः । पृषु वृषु इत्यारभ्य हृषुपर्यन्ता ऋदुपधाः । अलीकं मिथ्याभवनं मिथ्योक्तिर्वा । तुस ह्रसेत्यारभ्य णश गतावित्यतः प्राक् सकारान्ताः । घस्लृधातुरनिट्कः । **अयमिति** । घस्लृधातुः सर्वेषु न प्रयोज्य इत्यर्थः । कुत इत्यत आह **लिटीति** । यद्ययं सार्वत्रिकः स्यात् तदा लिट्यपि प्रयुज्येत । ततश्च 'अद भक्षणे' इति धातोः 'लिट्यन्यतरस्याम्' इति घस्लृभावविधिर्व्यर्थः स्यादिति भावः । असार्वत्रिकत्वे सति क्व प्रयोगः क्व नेत्यत आह **ततश्चेति** । यत्र घस्लृधातोः प्रयोगे ज्ञापकं प्रत्यक्षवचनं वास्ति तत्रैवास्य प्रयोग इत्यर्थः । तत्र तावल्लिङ्गं दर्शयति **अत्रैवेति** । भ्वादिगणे अत्रैव क्रमे अस्य पाठः शपि परस्मैपदे प्रयोगे लिङ्गमित्यर्थः । नच धातुसंज्ञार्थः पाठ इति शङ्क्यम्, द्युत दीप्तावित्यतः प्राक् पाठेनैव सिद्धे अत्र क्रमे तत्पाठवैयर्थ्यादिति भावः । **लृदित्करणमङीति** । प्रयोगे लिङ्गमिति शेषः । **अनिट्कारिकास्विति** । अनुदात्तोपदेशेषु घस्लृधातोः पाठो वलाद्यार्धधातुप्रयोगे लिङ्गमित्यर्थः । अथ क्वचिदस्य प्रयोगे प्रत्यक्षवचनं दर्शयति **क्मरचीति** । 'सृघस्यदः क्मरच्' इत्यत्र विशिष्य घसेरुपादानं क्मरचि प्रयोगे प्रमाणमित्यर्थः । **घसतीति** । लटि तसाद्युपलक्षणमिदम् । लिटि अस्य प्रयोगाभावाल्लुट्युदाहरति **घस्तेति** । **सः सि** । स इति छेदः । सः इति षष्ठ्यन्तम् । सि इति सप्तम्यन्तम् आर्धधातुकविशेषणम् । तदादिविधिः । 'अच उपसर्गात्तः' इत्यतः त इत्यनुवर्तते । अकार उच्चारणार्थः, तदाह

गुणः । 'अभ्यासस्यासवर्णे' इत्युवङ् । **घृषु** संघर्षे । ल्युटि घर्षणम् । **घस्लृ** अदने । **अयमिति** । यद्ययं सार्वत्रिकः स्यात्तदा लिट्यपि प्रयुज्येत, ततश्च 'लिट्यन्यतरस्याम्' इति विकल्पेनादेशविधानं व्यर्थं भवेदिति भावः । **अत्रैव पाठ इति** । भ्वादौ परस्मैपदे पाठ इत्यर्थः । **क्मरचीति** । 'सृघस्यदः क्मरच्' इति सूत्रे । **सः स्यार्ध** ।

घसेत् । लिङ्गाद्यभावादाशिष्यस्याप्रयोगः । २३४३ **पुषादिद्युताद्यॢदितः परस्मैपदेषु** । (३-१-५५) श्यन्विकरणपुषादेर्द्युतादेॢदितश्च परस्य च्लेरङ् स्यात्परस्मैपदेषु । अघसत् । जर्ज ७१६ चर्च ७१७ झर्झ ७१८ परिभाषणहिंसा-

---

सस्य तः स्यादिति । आदेशे अकारस्य उच्चारणार्थत्वात्तकारः स्यादित्यर्थः । लुङि च्लेः सिचि प्राप्ते **पुषादि** । 'च्लेः सिच्' इत्यतः च्लेरिति 'अस्यतिवक्तिख्यातिभ्यः–' इत्यतः अङिति चानुवर्तते । पुषादि द्युतादि ॢदित् एषां समाहारद्वन्द्वात् पञ्चमी । तत्र पुषधातुस्तु भ्वादौ क्र्यादौ चुरादौ दिवादौ चास्ति । तत्र यदि भौवादिकः पुषादिगणो गृह्येत, तर्हि द्युतादिग्रहणमनर्थकं स्यात्, पुषादिगणोत्तरमेवात्र द्युतादि-गणपाठात् । नापि क्र्याद्यन्तर्गणः, तत्र हि 'मुष स्तेये' 'खच भूतप्रादुर्भावे' 'हेठ च' 'ग्रह उपादने' इति चत्वार एव पठ्यन्ते । यदि त एवात्र पुषादयो विवक्षिताः स्युः तर्हि लाघवाद् ॢदित एव ते क्रियेरन् । नाप्यत्र चौरादिकः पुषादिर्गृह्यते, णिचा च्लेर्व्यवहितत्वात् । अतः परिशेषाद् दिवादय एव गृह्यन्ते, तदाह **श्यन्वि-**

सः सीति च्छेदः । सादौ किम्, घस्मरः । आर्धधातुके इति किम्, वस्से । **आषि-षीति** । आशीर्लिङीत्यर्थः । एतच्च कर्तरि प्रयोगमभिप्रेत्योक्तम् । कर्मणि तु यग्विषये प्रयोगो नेति बोध्यम् । **पुषादिद्युता** । पुष धातुर्भ्वादौ दिवादौ क्र्यादौ चुरादौ च पठ्यते । यदि तु पुष पुष्टाविति भौवादिकधातुमारभ्य पुषादिगणो गृह्यते तदा द्युता-दिग्रहणमनर्थकं भवेत् । पुषेरुत्तरत्र द्युतादीनां पाठात् । नापि क्र्याद्यन्तर्गणः । तत्र हि पुषधातोरग्रे मुष स्तेये, खच भूतप्रादुर्भावे, हठे च, ग्रह उपादाने, इति चत्वार एव पठ्यन्ते । यदि तु त एव जिघृक्षिताः स्युस्तर्हि लाघवाल्लृदित एव क्रियेरन् । ग्रहेः स्वरितेत्त्वेऽपि ॢकारेणैव तन्निर्वाहादनेकानुबन्धासङ्गगौरवशङ्काया अप्यभावात् । नापि चुरादिः । णिचा व्यवधानेन ततोऽन्तरस्य च्लेरसंभवात् । अतः परिशेषाद् दिवादय एव गृह्यन्त इत्याह **श्यन्विकरणपुषादेरिति** । केचित्तु दिवाद्यन्तर्गत एव पुषादि-र्गृह्यते व्याख्यानादित्याहुः । चुरादीनां सर्वेषां णिजिवकल्प इति पक्षे चौरादिकपुषादेरपि परः च्लिः संभवतीति तेषामाशयः । 'नन्दिग्रहिपचादिभ्यः' इतिवत् 'पुषद्युताद्-ॢदितः' इति सूत्रयितुमुचितम् । ननु पुषादयो द्युतादयश्च ॢदित एव कुतो न कृता इति चेत् । अत्राहुः—निरनुबन्धेषु सानुबन्धेषु च प्रत्येकं ॢकारपाठे विपरीतगौरवं स्यात् । न च अनुबन्धान्तरस्य यत्प्रयोजनमात्मनेपदं तत्तु ॢदित्करणेऽपि सिध्यतीत्य-नेकानुबन्धासङ्गगौरवदोषो नास्तीत्यपि शङ्क्यम्, आदितामीदितामूदितां चैतेषु सत्त्वाद् ॢकारेण तत्तत्कार्याणामनिर्वाहादनेकानुबन्धासङ्गगौरवस्य दुर्निवारत्वादिति । **जर्ज चर्च झर्झ** । एषां परिभाषणादिभिः सह यथासंख्यं नास्ति, व्याख्यानादित्याहुः ।

तर्जनेषु। पिसृ ७१६ पेसृ ७२० गतौ। पिपिसतुः। पिपेसतुः। हसे ७२१ हसने। एदित्त्वान्न वृद्धिः। अहसीत्। णिश ७२२ समाधौ। तालव्योष्मान्तः। प्रणेशति। मिश ७२३ मश ७२४ शब्दे रोषकृते च। तालव्योष्मान्तौ। शव ७२५ गतौ। दन्त्योष्ठ्यान्तस्तालव्योष्मादिः। शवति। अशवीत्, अशावीत्। शंश ७२६ प्लुतगतौ। तालव्योष्माद्यन्तः। शशाश शेशतुः शेशुः। शेशिथ। शसु ७२७ हिंसायाम्। दन्त्योष्मान्तः। 'न शसदद–' (सू २२६३) इत्येत्वं न। शशसतुः शशसुः। शशसिथ। शंसु ७२८ स्तुतौ। अयं दुर्गतावपीति दुर्गः। 'नृशंसो घातुकः क्रूरः' इत्यमरः। शशंस। आशिषि नलोपः, शस्यात्। चह ७२६ परिकल्कने। कल्कनं शाठ्यम्। अचहीत्। मह ७३० पूजायाम्। अमहीत्। रह ७३१ त्यागे। रहि ७३२ गतौ। रंहति। रंह्यात्। दृह ७३३ दृहि ७३४ वृह ७३५ वृहि ७३६ वृद्धौ। दर्हति। ददर्ह ददृहतुः। दृंहति। बर्हति। बृंहति। बृहि शब्दे च। 'बृंहितं करिगर्जितम्' इत्यमरः। बृहिर् इत्येके। अबृहत्, अबर्हीत्। तुहिर् ७३७ दुहिर् ७३८ उहिर् ७३६ अर्दने। तोहति। तुतोह। अतुहत्, अतोहीत्। दोहति। दुदोह। अदुहत्, अदोहीत्। अनिट्कारिकास्वस्य दुहेर्ग्रहणं नेच्छन्ति। ओहति। उवोह ऊहतुः। ओहिता। मा भवानुहत्। औहीत्। अर्ह ७४० पूजायाम्। आनर्ह।

करणेति। जर्ज चर्च झर्झेति। एतेषां चवर्गीयान्तेष्वेव पाठ उचितः। हसे हसन इति। एदिदयम्। न वृद्धिरिति। 'ह्म्यन्त–' इत्यनेनेति शेषः। णिश समाधाविति। णोपदेशत्वाद् 'उपसर्गादसमासेऽपि–' इति नस्य णत्वम्, तदाह प्रणेशतीति। 'शसु हिंसायाम्' इत्यतः प्राक् शकारान्ताः। शवतिस्तु वान्तः। शंस्विति। नोपधः, कृतानुस्वारस्य निर्देशः। 'चह परिकल्कने' इत्यारभ्य अर्हेतिपर्यन्ता हकारान्ताः। रह त्यागे इति। नायमिदित्। रहि गताविति। अयमिदित्। दृह दृहीति। ऋदुपधा एते। द्वितीयचतुर्थाविदितौ। अबृहत्। अबर्हीदिति। इरित्त्वादङ्विकल्प इति भावः। उवोहेति। उहिर्धातोर्लिटि

परिभाषणं सनिन्दोपालम्भः। त्रयाणामपि चवर्गीयान्तेषु पाठ उचितो न त्विहोष्मान्तेषु। णिश समाधौ। समाधिरन्तःकरणनिरोधः। प्रणेशतीति। 'उपसर्गादसमासेऽपि' इति णत्वम्। रोषकृते चेति। चकारात्समाधौ। शश प्लुतगतौ। 'न शसदद-' इति प्रतिषेधसूत्रे सान्तस्य ग्रहणमित्यभिप्रेत्य व्याचष्टे शेशतुरिति। प्राचा तु शशतुरित्युक्तं तदयुक्तमिति भावः। अचहीदिति। 'ह्म्यन्त–' इति न वृद्धिः। रह त्यागे। अयं कथादावपि, 'ज्ञपमिच्च' इति मित्प्रकरणेऽप्ययमेकीयमतेन पठितः।

अथ कृपूपर्यन्ता अनुदात्तेतः। द्युत ७४१ दीप्तौ। द्योतते। २३४४ **द्युतिस्वाप्योः संप्रसारणम्।** (७-४-६७) अनयोरभ्यासस्य संप्रसारणं स्यात्। दिद्युते दिद्युताते। द्योतिता। २३४५ **द्युद्भ्यो लुङि।** (१-३-९१) द्युतादिभ्यो लुङः परस्मैपदं वा स्यात्। पुषादिसूत्रेण परस्मैपदे अङ्। अद्युतत्, अद्योतिष्ट। श्विता ७४२ वर्णे। श्वेतते। शिश्विते। अश्वितत्, अश्वेतिष्ट। ञि मिदा ७४३ स्नेहने। मेदते। २३४६ **मिदेर्गुणः।** (७-३-८२) मिदे-

---

द्वित्वे हलादिशेषे पुगन्तलक्षणे गुणे 'अभ्यासस्यासवर्णे' इत्युवङ्। **मा भवानुहदिति।** इरित्वादङि रूपम्। **औहीदिति।** अङभावपक्षे च्लेः सिचि तस्य इटि 'अस्तिसिचः–' इति तकारस्य ईटि 'इट ईटि' इति सिचो लोपे 'आडजादीनाम्' इति आटि वृद्धिः। माङ्योगे तु मा भवानुहीत्। **आनर्हेति।** 'अत आदेः' इति दीर्घे नुट्।

कृपूपर्यन्ता अनुदात्तेत इति। द्युतेरारभ्य कृपूपर्यन्ता इत्यर्थः। **द्युतिस्वाप्योः। अभ्यासस्येति।** 'अत्र लोपोऽभ्यासस्य' इत्यतः तदनुवृत्तेरिति भावः। **दिद्युत इति।** द्वित्वे 'हलादिः शेषः' इत्यनेन यकारस्य लोपे प्राप्ते तदपवादत्वेन 'द्युतिस्वाप्योः–' इति संप्रसारणे, 'संप्रसारणाच्च' इति उकारस्य पूर्वरूपे रूपम्। **द्युद्भ्यो लुङि।** बहुवचनाद् द्युतादिभ्य इति गम्यते। दिग्योगे पञ्चमी। 'तस्मादित्युत्तरस्य' इति परिभाषया परस्येति लभ्यते। 'शेषात्कर्तरि–' इत्यतः परस्मैपदमित्यनुवर्तते। तदाह **द्युतादिभ्य इति। परस्मैपदे अङिति।** आत्मनेपदपक्षे सिजेव नत्वङ्, पुषादिसूत्रे परस्मैपदग्रहणादिति भावः, तदाह **अद्योतिष्टेति। श्विता वर्णे इति।** श्वेतवर्णकरणे श्वेतीभवने वेत्यर्थः। **अश्वितदिति।** द्युतादित्वादङ्। **अश्वेतिष्टेति।** आत्मनेपदपक्षे रूपम्। एवमग्रेऽपि द्युतादौ लुङि रूपभेदो ज्ञेयः। **ञि मिदा स्नेहन इति।** ञिरित् 'ञीतः क्तः'

नेच्छन्तीति। व्याख्यानमेवात्रावलम्बनम्। **मा भवानुहदिति।** 'न माङ्योगे' इत्याडभावः। 'इरितो वा' इत्यङ् वा। **अथ द्युतादिः। द्युत** दीप्तौ। **द्युतिस्वाप्योः।** स्वापीति णिजन्तस्य ग्रहणम्। **दिद्युत इति।** संप्रसारणे कृते 'संप्रसारणाच्च' इति पूर्वरूपम्। स्वापेरुदाहरणं तु सुष्वापयिषति। इह स्वापेर्णिजन्तस्याभ्यासनिमित्तप्रत्ययेनानन्तर्ये सति संप्रसारणमिष्यते। तेनेह न—स्वापेर्ण्वुल् स्वापकः, तमिच्छति स्वापकीयति, ततः सन् सिस्वापकीयिषति। **द्युद्भ्यो लुङि।** बहुवचननिर्देशात् शौण्डैरित्यत्रेव तदादिग्रहणम्, तदाह **द्युतादिभ्य इति।** द्युतादयो घट चेष्टायामित्यवधिकाः। 'ङः सि–' इत्यत्रेव लुङीति सप्तम्याः षष्ठ्यर्थतेत्यभिप्रेत्याह। **लुङः**

रिको गुणः स्यादित्संज्ञकशकारादौ । एश आदिशित्त्वाभावान्नेन गुणः । मिमिदे । अमिदत्, अमेदिष्ट । ञि ष्विदा ७४४ स्नेहनमोचनयोः । मोहनयोः इत्येके । स्वेदते । सिष्विदे । अस्विदत्, अस्वेदिष्ट । ञि क्ष्विदा च इत्येके । अक्ष्विदत्, अक्ष्वेदिष्ट । रुच ७४५ दीप्तावभिप्रीतौ च । रोचते सूर्यः । हरये रोचते भक्तिः । अरुचत्, अरोचिष्ट । घुट ७४६ परिवर्तने । घोटते । जुघुटे । अघुटत्, अघोटिष्ट । रुट ७४७ लुट ७४८ लुठ ७४९ प्रतिघाते । अरुटत्, अरोटिष्ट । शुभ ७५० दीप्तौ । क्षुभ ७५१ संचलने । णभ ७५२ तुभ ७५३ हिंसायाम् ।

इत्येतदर्थः । मिमिदे इत्यत्र लिटः 'असंयोगात्–' इति कित्त्वेऽपि गुणं शङ्कितुमाह **मिदेर्गुणः** । मिदेरित्यवयवषष्ठी । गुणश्रुत्या 'इको गुणवृद्धी' इति परिभाषया इक इत्युपतिष्ठते 'ष्ठिवुक्लमुचमां शिति' इत्यतः शितीत्यनुवर्तते । श् चासाविच्चेति कर्मधारयः । तेन च अधिकृताङ्गाक्षिप्तः प्रत्ययो विशेष्यते । तदादिविधिः । इत्संज्ञकशकारादौ प्रत्यये परे इति लभ्यते, तदाह **मिदेरित्यादिना** । दैवादिकमिदेः श्यनि मेद्यते इत्याद्युदाहरणम् । श् इद् यस्येति बहुव्रीहिमाश्रित्य शिति प्रत्यये परे मिदेरिको गुण इत्येव कुतो न व्याख्यायत इत्याशङ्क्य मिमिदे इत्यत्र गुणाभावार्थमित्संज्ञकशकारादाविति व्याख्येयमित्यभिप्रेत्याह **एश आदिशित्त्वाभावादिति** । **ञिष्विदेति** । षोपदेशोऽयम् । अनिट्सु स्विद्येति श्यन्विकरणस्यैव ग्रहणादयं सेट् । **रुच दीप्तावभिप्रीतौ चेति** । अभिप्रीतिः प्रीतिविषयीभवनम् । दीप्तौ उदाहरति **रोचते सूर्य इति** । प्रकाशत इत्यर्थः । अभिप्रीतौ उदाहरति **हरये रोचते भक्तिरिति** । भक्तिः हर्याश्रितप्रीतिविषयो भवतीत्यर्थः । 'रुच्यर्थानाम्–' इति संप्रदानत्वाच्चतुर्थी । **क्षुभ संचलन इति** । क्षोभते । क्षुभ्यतीति दिवादौ । क्षुभ्रा-

---

परस्मैपदमिति । **ञिमिदा** । **मिदेर्गुणः** । 'ष्ठिवुक्लमुचमाम्–' इत्यतः शितीत्यनुवर्तते । तत्र शश्चासौ इच्चेति कर्मधारयात्सप्तमी । अङ्गाक्षिप्तप्रत्ययस्तु विशेष्यः । तेन 'यस्मिन्विधिः–' इति तदादिविधिः प्रवर्तते, तदाह **इत्संज्ञकशकरादाविति** । **आदिशित्त्वाभावादिति** । मेद्यति मेद्यत इत्यादौ तु 'दिवादिभ्यः–' इति श्यन् । आदिशित्त्वाद् गुणो भवत्येव । **मिमिद इति** । शितीति बहुव्रीहौ त्विह स्यादेव गुणः । तथा पपे तस्थे इत्यादौ पिबादयोऽपि स्युरिति भावः । **ञिष्विदा** । अनिट्कारिकायां स्विद्यतिरिति श्यना निर्देशादयं सेट् । स्वेदिता । स्वेदिष्यते । **ञिक्ष्विदा चेति** । पूर्वोक्तयोरेवार्थयोरयमिति बोध्यम् । **हरय इति** । 'रुच्यर्थानाम्–' इति संप्रदानसंज्ञायां चतुर्थी । **घुट** । परिवर्तनमितस्ततोभ्रमणम् । **जुघुट इति** । 'असंयोगात्–' इति कित्त्वाद् गुणाभावः । **क्षुभ** । संचलनं प्रकृतिविपर्यासो मन्थनं

आद्योऽभावे च। 'नभन्तामन्यके समे'। 'मा भूवन्नन्यके सर्वे' इति निरुक्तम्। अनभत्, अनभिष्ट। अतुभत्, अतोभिष्ट। इमौ दिवादौ क्र्यादौ च। स्रंसु ७५४ ध्वंसु ७५५ भ्रंसु ७५६ अवस्रंसने। ध्वंसु गतौ च। अङि नलोपः। अस्रसत्, अस्रंसिष्ट। 'नास्रसत्करिणां ग्रैवम्' इति रघुवंशे। भ्रंशु इत्यपि केचित् पेठुः। अत्र तृतीय एव तालव्यान्त इत्यन्ये। भ्रशु भ्रंशु अधःपतने इति दिवादौ। स्रम्भु ७५७ विश्वासे। अस्रभत्, अस्रम्भिष्ट। दन्त्यादिरयम्। तालव्यादिस्तु प्रमादे गतः। वृतु ७५८ वर्तने। वर्तते। ववृते। २३४७ **वृद्भ्यः स्यसनोः।** (१-३-९२) वृतादिभ्यः परस्मैपदं वा स्यात्स्ये सनि च। २३४८ **न वृद्भ्यश्चतुर्भ्यः।** (७-२-५९) एभ्यः सकारादेरार्धधातुकस्येण्न स्यात्तङानयोरभावे। वर्त्स्यति, वर्तिष्यते। अवृतत्, अवर्तिष्ट। अवर्त्स्यत्, अवर्तिष्यत। वृधु

तीति क्र्यादौ। णभधातुः णोपदेशः। नभते। **आद्योऽभावे चेति।** चात्संचलनेऽपि। तत्र अभावार्थकस्य प्रयोगं दर्शयति **नभन्तामन्यके समे इति।** मन्त्रोऽयम्। नन्वत्र मन्त्रे णभेर्हिंसार्थकत्वमेव कुतो न स्यादित्यत आह **मा भूवन्नन्यके सर्वे इति।** नभन्तामित्यस्य विवरणं—मा भूवन्निति। न भवन्तीत्यर्थः। समे इत्यस्य विवरणं—सर्वे इति। **निरुक्तमिति।** वेदव्याख्यानात्मको यास्कप्रणीतो ग्रन्थविशेषो निरुक्तम्। **स्रंसु ध्वंसु भ्रंसु इति।** त्रयो नोपधाः कृतानुस्वारनिर्देशाः। **ध्वंसु गतौ चेति।** चादवस्रंसनेऽपि। **अस्रसदिति।** द्युतादित्वात्परस्मैपदे अङि नलोप इति भावः। **नास्रसदिति।** नास्रंसदित्यपपाठः। नचास्रंसदिति लङो रूपमिति भ्रमितव्यम्। तत्र परस्मैपदासंभवात्। स्रंभुधातुरकारमध्यः। **वृतु वर्तने इति।** उदिद् ऋदुपधः सेट्कः। **वर्तत इति।** शपि गुणे रपत्वम्। **ववृत इति।** 'असंयोगात्–' इति कित्त्वाद् गुणाभावे द्वित्वे उरदत्त्वे रपरत्वे हलादिशेषे रूपम्। लुटि वर्तिता। **वृद्भ्यः।** बहुवचनाद् वृतादिभ्य इति गम्यते। 'शेषात्कर्तरि–' इत्यतः परस्मैपदमित्यनुवर्तते, 'वा क्यषः' इत्यतो वेति च, तदाह **वृतादिभ्य इति। न वृद्भ्यः।** 'सेऽसिचि–' इति सूत्रात् से इति आर्धधातुकस्येडिति चानुवर्तते, तदाह **एभ्यः सकारादेरिति। तङानयोरभाव इति।**

च। क्षोभते। क्षुभ्यतीति दिवादौ। क्षुभ्नातीति क्र्यादौ। **नास्रसदिति।** नास्रंसदित्यपपाठ एव। न चेदं लङो रूपम्, तत्र परस्मैपदासंभवादिति भावः। **वृद्भ्यः।** वृतादयः पञ्च। **न वृद्भ्यः।** गणकार्यत्वादुभयोर्यङ्लुक्यप्रवृत्तिः। वर्वर्तिष्यति। वर्वर्तिषति। चतुर्ग्रहणफलं तु मूले एव स्फुटीभविष्यति। 'सेऽसिचि–' इति सूत्रात्से इत्यनुवर्तते तदाह **सकारादेरिति। इण् न स्यादिति।** स्यन्देरूदित्त्वाद्विकल्पे

७२६ वृद्धौ। शृधु ७६० शब्दकुत्सायाम्। इमौ वृतुवत्। स्यन्दू ७६१ प्रस्रवणे। स्यन्दते। सस्यन्दे। सस्यन्दिषे, सस्यन्त्से। सस्यन्दिध्वे, सस्यन्द्ध्वे। स्यन्दिता, स्यन्ता।

'गमेरिट्–' इत्यतः परस्मैपदेष्वित्यनुवृत्तम्। तेन च तङानयोरभावो लक्ष्यते, व्याख्यानादिति भावः। तेन जिगमिषिता इत्यत्र गमेः सन्नन्तात् तृचि इट् सिध्यति, वृतेः सन्नन्ताद् हेर्लुकि विवृत्स इत्यत्र इण्निषेधश्च सिध्यति। **वर्त्स्यतीति**। लृटि स्यः। 'वृद्भ्यः स्यसनोः' इति परस्मैपदविकल्पः। 'न वृद्भ्यः–' इति इण्निषेधः। गुणः रपरत्वम्। परस्मैपदाभावे त्वाह **वर्तिष्यत इति**। तङानयोरभाव इत्युक्तेः 'न वृद्भ्यः–' इति इण्निषेधो न। **अवर्तिष्टेति**। परस्मैपदस्य अङश्चाभावे रूपम्। **अवर्त्स्यदिति**। लृङि स्यः। 'वृद्भ्यः स्यसनोः' इति परस्मैपदम्। 'न वृद्भ्यः–' इति इण्निषेधः, गुणः, रपरत्वमिति भावः। **अवर्तिष्यतेति**। परस्मैपदस्याभावे 'न वृद्भ्यः–' इति इण्निषेधोऽपि नेति भावः। वृधु शृधु इति द्वौ ऋदुपधौ। तत्रापि 'द्युद्भ्यो लुङि' इति परस्मैपदपक्षे द्युतादिलक्षणः अङ्। लृट्लृङोः 'वृद्भ्यः स्यसनोः' इति परस्मैपदपक्षे 'न वृद्भ्यः–' इति इण्निषेधश्च, तदाह **इमौ वृतुवदिति**। वर्त्स्यति, वर्धिष्यते। अवृधत्, अवर्धिष्ट। अवर्त्स्यत्, अवर्धिष्यत। शर्त्स्यति, शर्धिष्यते। अशृधत्, अशर्धिष्ट। अशर्त्स्यत्, अशर्धिष्यत। स्यन्दूधातुः ऊदिद् नकारोपधः कृतानुस्वारपरसवर्णनिर्देशः। **सस्यन्दिषे, सस्यन्त्स इति**। इडभावे दस्य चर्त्वेन तः। **सस्यन्दिध्वे सस्यन्द्ध्व इति**। इडभावे धकारात् प्राग् दकारः। खर्परकत्वाभावाच्च चर्त्वम्। **स्यन्दिता, स्यन्तेति**। इडभावे दस्य चर्त्वम्। ननु लृटि स्ये सति 'वृद्भ्यः स्यसनोः' इति परस्मैपदपक्षे परत्वादूदिल्लक्षणमिड्विकल्पं बाधित्वा 'न वृद्भ्यश्चतुर्भ्यः' इति इण्निषेधे स्यन्त्स्यतीत्येव रूपमि-

---

प्राप्ते इतरेषां नित्यमिटि प्राप्ते निषेधोऽयम्। **तङानयोरिति**। जिगमिषिता। जिगमिषितारौ इत्यादौ तृचि परतः सन इडागमसिद्धये 'गमेरिट् परस्मैपदेषु' इत्यत्र परस्मैपदग्रहणं तङानयोरभावं लक्षयतीत्यभ्युपगम्यते। तच्चात्रापि तथैवानुवर्तते, अर्थाधिकाराश्रयणात् तेन परस्मैपदाभावेऽपि तृचि विवृत्सिता विवृत्सितारावित्यत्र 'अतो हेः' इति हेर्लुकि त्वं विवृत्स इत्यत्र च सन इण्निषेधः सिध्यतीति भावः। अत्र भाष्यवार्तिकयोर्वृतादीनामात्मनेपदेन समानपदस्थेड्वचनादन्यत्र निषेध इति स्थितम्। तेन विवर्तिषते विवर्धिषते इत्यादाविड् भवति। विवृत्सितेवाचरति विवृत्सित्रीयते इत्यत्र त्वात्मनेपदोत्पत्तेः पूर्वं तत्समानपदस्थत्वाभावादन्तरङ्गोऽयं निषेधः प्रवर्तते। स च पश्चात्तङि कृतेऽपि न निवर्तते, चतुर्ग्रहणसामर्थ्यादिति। अत्र व्याचख्युः—पञ्चभ्य इति वक्तुमुचितम्। एवं च 'तासि च' इत्येव सूत्रं कर्तव्यम्। न च वृतादिष्वतिव्याप्तिः, तङानयोः

'वृद्भ्यः स्यसनोः' (सू २३४७) इति परस्मैपदे कृते ऊदिल्लक्षणमन्तरङ्गमपि विकल्पं बाधित्वा चतुर्ग्रहणसामर्थ्याद् 'न वृद्भ्यः–' (सू २३४८) इति निषेधः। स्यन्त्स्यति, स्यन्दिष्यते, स्यन्त्स्यते। स्यन्दिषीष्ट, स्यन्त्सीष्ट। 'द्युद्भ्यो लुङि' (सू २३४५) इति परस्मैपदपक्षे अङ्। नलोपः। अस्यदत्, अस्यन्दिष्ट, अस्यन्त्त अस्यन्त्साताम् अस्यन्त्सत। अस्यन्त्स्यत्, अस्यन्दिष्यत, अस्यन्त्स्यत। २३४६ अनुविपर्यभिनिभ्यः[1] स्यन्दतेरप्राणिषु। (८-३-७२) एभ्यः परस्याप्राणिकर्तृकस्य

ष्यते, नतु स्यन्दिष्यति इति। तदयुक्तम्, अन्तरङ्गतया ऊदिल्लक्षणस्यैव इड्विकल्पस्य उचितत्वात् सकारादिविशेषापेक्षतया तङानाभावनिमित्तापेक्षतया च 'न वृद्भ्यः–' इति निषेधस्य बहिरङ्गत्वादित्याशङ्क्य निराकरोति **वृद्भ्य इति**। 'वृद्भ्यः स्यसनोः' इति परस्मैपदे कृते अन्तरङ्गमपि विकल्पं बाधित्वा 'न वृद्भ्यः–' इति निषेध इत्यन्वयः। कुत इत्यत आह **चतुर्ग्रहणसामर्थ्यादिति**। यदि ह्यत्र ऊदिल्लक्षण इड्विकल्प एव स्याद् नतु 'न वृद्भ्यश्चतुर्भ्यः' इति निषेधः, तर्हि चतुर्भ्य इति व्यर्थं स्यात्। नच कृपूव्यावृत्तिस्तत्फलमिति शङ्क्यम्, 'तासि च क्लृपः' इति चकारेण सकाराद्यार्धधातुकेऽपि नित्यमिण्निषेधप्रवृत्तेर्वक्ष्यमाणत्वात्। तथा च चतुर्ग्रहणं चतुर्णामपि सर्वत्र इण्निषेधार्थमिति भावः। भाष्ये तु 'निषेधाश्च बलीयांसः' इति न्यायेन अन्तरङ्गस्यापि ऊदिल्लक्षणेड्विकल्पस्य 'न वृद्भ्यः–' इति निषेधेन बाधसिद्धेश्चतुर्ग्रहणं प्रत्याख्यातम्। तथा च लृटि परस्मैपदपक्षे ऊदिल्लक्षणमिड्विकल्पं बाधित्वा 'न वृद्भ्यः–' इति नित्यमिण्निषेधे स्यन्त्स्यतीत्येकमेव रूपमिति स्थितम्। आत्मनेपदपक्षे तु ऊदित्त्वादिड्विकल्पं मत्वा आह **स्यन्दिष्यते स्यन्त्स्यत इति**। इडभावे दस्य चर्त्वम्। आशीर्लिङि सीयुटि ऊदित्त्वादिड्विकल्पं मत्वा आह **स्यन्दिषीष्ट, स्यन्त्सीष्टेति**। 'न वृद्भ्यः–' इति निषेधस्तु न, तङानयोरभाव एव तत्प्रवृत्तेरिति भावः। लुङि विशेषमाह **द्युद्भ्यो लुङीत्यादिना**। **अङिति**। द्युतादिलक्षण इति शेषः। **नलोप इति**। 'अनिदिताम्–' इत्यनेनेति शेषः। आत्मनेपदपक्षे तु अङभावादूदिल्लक्षणमिड्विकल्पं मत्वा आह **अस्यन्दिष्ट अस्यन्त्तेति**। तत्र इडभावपक्षे अस्यन्द् स् त इति स्थिते 'झलो झलि' इति सलोपे दस्य चर्त्वम्। नचापित्त्वेन ङित्त्वाद् 'अनिदिताम्–' इति नलोपः शङ्क्यः, सिज्लोपस्यासिद्धत्वेनानुपधात्वादिति भावः। **अस्यन्त्साताम् अस्यन्त्सतेति**। अस्यन्त्थाः अस्यन्त्साथाम् अस्यन्द्ध्वम्। अस्यन्त्सि अस्यन्त्स्वहि अस्यन्त्स्महि।

सत्त्वादिति। **अस्यन्त्तेति**। अत्र 'अनिदिताम्–' इति नलोपो न भवति, सिज्लोपस्यासिद्धत्वेनानुपधात्वात्। **अनुविपर्यभिनिभ्यः**। **एभ्य इति**। पञ्चभ्य

---

१ 'अनुपर्यभिनिविभ्यः' इति क्वचित् पाठः।

स्यन्दतेः सस्य षो वा स्यात् । अनुष्यन्दते, अनुस्यन्दते वा जलम् । 'अप्राणिषु' किम्-अनुस्यन्दते हस्ती । 'अप्राणिषु' इति पर्युदासाद् मत्स्योदके अनुस्यन्दते इत्यत्रापि पक्षे षत्वं भवत्येव । प्राणिषु न इत्युक्तौ तु न स्यात् । कृपू ७६२ सामर्थ्ये । २३५० कृपो रो लः । (८-२-१८) कृप उः रः ल इति छेदः । कृप इति लुप्तषष्ठीकम् । तच्चावर्तते । कृपो यो रेफस्तस्य लः स्यात् । कृपेश्चका-

---

अस्यन्त्स्यत्, अस्यन्त्स्यत, अस्यन्दिष्यत । **अनुविपर्यभिनि** । **एभ्य इति** । अनु वि परि अभि नि इत्येतेभ्य इत्यर्थः । **सस्येति** । 'सेहेः साडः सः' इत्यतः स इति षष्ठ्यन्तस्यानुवृत्तेरिति भावः । **षो वा स्यादिति** । 'अपदान्तस्य मूर्धन्यः' इत्यधिकारादिति भावः । ननु मत्स्योदके अनुष्यन्दते इत्यत्र कथं षत्वं प्राणिकर्तृकत्वस्यापि सत्त्वादित्यत आह **अप्राणिष्विति पर्युदासादिति** । प्राणिकर्तृकस्य नेति न प्रतिषेधः, येनात्र प्राणिकर्तृकत्वस्यापि सत्त्वात् षत्वं न स्यात् । किन्तु प्राणिभिन्नकर्तृकस्येति पर्युदास आश्रीयते । एवं च प्राण्यप्राणिकर्तृकस्यापि अप्राणिकर्तृकत्वानपायादिह षत्वं निर्बाधमिति भावः । **कृपू सामर्थ्य इति** । सामर्थ्यं कार्यक्षमीभवनम् । ऊदित्त्वाद्वेट्कोऽयम् । ऋदुपधः । तङि प्रथमपुरुषैकवचनस्य टेरेत्वे शपि लघूपधगुणे रपरत्वे कर्पते इति स्थिते **कृपो रो लः** । कृप इति लुप्तविभक्तिकम् । षष्ठ्येकवचने उः इति ऋकारस्य रूपम् । अवयवषष्ठी । कृप उरिति स्थिते आद्गुणे कृपोरिति भवति । र इति षष्ठ्यन्तम् । कृपोर् रः इति स्थिते 'रो रि' इति रेफलोपे कृपो र इति भवति । ल इति प्रथमान्तम् । अकार उच्चारणार्थः, तदाह **कृप उः रः ल इति छेद इति** । एतच्च ऋलृक्सूत्रभाष्ये स्थितम् । ननु कृपेत्यत्र का विभक्तिर्लुप्तेत्यत आह **कृप इति लुप्तषष्ठीकमिति** । पकारादकार उच्चारणार्थः । कृप्धातोरिति लभ्यते । **तच्चावर्तत इति** । कृप रः ल इति पदत्रयमावर्तत इत्यर्थः । तथा च वाक्यद्वयं संपद्यते—कृप रः ल इत्येकं वाक्यम्, तदाह **कृपो यो रेफस्तस्य लः स्यादिति** । तथा च कल्पते इति भवति । कृप उः रः ल इति द्वितीयं वाक्यम् । तत्र कृपेत्यवयवषष्ठ्यन्तम् उरित्यत्रान्वेति । उरित्यवयवषष्ठ्यन्तं रेफे अन्वेति । तथा च कृप्धातोरवयवो य ऋकारः, तस्य यो रेफः, तस्य लकारः स्यादिति लभ्यते । तत्र ऋकारावयवत्वं रेफस्य न संभवतीति रेफशब्दो रेफसदृशे ऋकारांशे लाक्षणिकः । ल इत्यपि लकारसदृशे लृकारांशे लाक्ष-

---

इत्यर्थः । **षत्वं भवत्येवेति** । प्राण्यप्राणिकर्तृकस्याप्यप्राणिकर्तृकत्वानपायादिति भावः । असमर्थसमासवाक्यभेदापत्तिदोषाभ्यां प्रसज्यप्रतिषेधो न सूत्रेऽभिप्रेत इत्याशयेनाह **प्राणिषु नेत्युक्ताविति** । कृपू सामर्थ्ये । भाष्यकृतां व्याख्यामाह **कृप उ**

रस्यावयवो यो रेफसदृशः तस्य च लकारसदृशः स्यात्। कल्पते। चक्लृपे। चक्लृपिषे, चक्लृप्से। इत्यादि स्यन्दिवत्। २३५१ **लुटि च क्लृपः।** (१-३-९३) लुटि स्यसनोश्च क्लृपेः परस्मैपदं वा स्यात्। २३५२ **तासि च क्लृपः** (७-२-६०) क्लृपेः परस्य तासेः सकारादेरार्धधातुकस्य चेण्न स्यात्तङानयोरभावे। कल्प्तासि। कल्प्तास्थ। कल्पितासे, कल्प्तासे। कल्प्स्यति, कल्पिष्यते, कल्प्स्यते। कल्पिषीष्ट, क्लृप्सीष्ट। अक्लृपत्, अकल्पिष्ट, अक्लृप्त।

णकः, तदाह **कृपेर्ऋकारस्यावयव इत्यादिना।** एवं च लिटि चकृप् ए इति स्थिते कित्त्वाद् गुणाभावे ऋकारैकदेशस्य रेफसदृशस्य लकारसदृशे सति चक्लृपे इति रूपम्। कृपः रः ल इति छेदमभ्युपगम्य कृपधातोः रेफस्य लकार इति व्याख्याने तु चक्लृपे इति न सिध्येत्। तदर्थमावृत्तिराश्रितेत्यभिप्रेत्याह **कल्पते चक्लृप इति।** ऊदित्त्वादिड्विकल्पं मत्वा आह **चक्लृपिषे चक्लृप्स इति। स्यन्दिवदिति।** चक्लृपाथे चक्लृपिध्वे, चक्लृब्ध्वे। चक्लृपे चक्लृपिवहे, चक्लृप्वहे चक्लृपिमहे, चक्लृप्महे। **लुटि च क्लृपः।** चकाराद् 'वृद्भ्यः स्यसनोः' इत्यतः स्यसनोरित्यनुकृष्यते। 'शेषात्कर्तरि–' इत्यतः परस्मैपदमिति। 'वा क्यषः' इत्यतो वेति च, तदाह **लुटि स्यसनोरित्यादिना। तासि च।** चकारात्सकारादार्धधातुकं गृह्यते। 'सेऽसिचि कृत–' इत्यतः से इति 'आर्धधातुकस्य–' इत्यत आर्धधातुकस्येडिति चानुवर्तते, 'न वृद्भ्यश्चतुर्भ्यः' इत्यतो नेति च, 'गमेरिट्–' इत्यतः परस्मैपदेष्विति च, तदाह **क्लृपेः परस्येत्यादिना। कल्प्तासीति।** 'लुटि च क्लृपः' इति परस्मैपदपक्षे ऊदिल्लक्षणमिड्विकल्पं बाधित्वा 'तासि च क्लृपः' इति इण्निषेधे गुणे रपरत्वे लत्वे रूपम्। परस्मैपदाभावपक्षे तु ऊदिल्लक्षणमिड्विकल्पं मत्वा आह **कल्पितासे, कल्प्तास इति।** लृटि तु 'लुटि च क्लृपः' इति परस्मैपदपक्षे ऊदिल्लक्षणमिड्विकल्पं बाधित्वा 'तासि च क्लृपः' इति इण्निषेधं मत्वा आह **कल्प्स्यतीति।** परस्मैपदाभावे तु ऊदित्त्वादिड्विकल्पं मत्वा आह **कल्पिष्यते, कल्प्स्यत इति।** कल्पताम्। अकल्पत। कल्पेत। आशीर्लिङि ऊदिल्लक्षणमिड्विकल्पं मत्वा आह **कल्पिषीष्टेति, क्लृप्सीष्टेति च।** इडभावे 'लिङ्सिचावात्मनेपदेषु' इति कित्त्वान्न गुणः। **अक्लृपदिति।** 'द्युद्भ्यो

इति। 'कृपे रो लः' इति अर्वाचीनपाठस्तु नादर्तव्य इति ध्वनयति **कृपेर्ऋकारस्येत्यादिना।** वर्णैकदेशस्य वर्णग्रहणेन ग्रहणादाह **रेफसदृश इति।** एवं चात्र कृपेत्यस्यावृत्तिरवश्यं स्वीकर्तव्या। तथा च 'लुटि च क्लृपः' इत्यादिसौत्रनिर्देशोऽप्युपपद्यत इति भावः। **तासि च क्लृपः।** चकारात्साद्यार्धधातुकं गृह्यते। **क्लृप्-**

अकल्पिष्यत, अकल्प्स्यत । वृत् । वृत्तः संपूर्णो द्युतादिर्वृतादिश्चेत्यर्थः ।

अथ त्वरस्यन्तास्त्रयोदशानुदात्तेतः षितश्च । घट ७६३ चेष्टायाम् । घटते । जघटे । 'घटादयो मितः' इति वक्ष्यमाणेन मित्संज्ञा । तत्फलं तु णौ 'मितां ह्रस्वः' (सू २५६८) इति 'चिण्णमुलोर्दीर्घोऽन्यतरस्याम्' (सू २७६२) इति च वक्ष्यते । घटयति । विघटयति । कथं तर्हि 'कमलवनोद्घाटनं कुर्वते ये' 'प्रविघाटयिता समुत्पतन्हरिदश्वः कमलाकरानिव' इत्यादि । शृणु । घट सङ्घाते इति चौरादिकस्येदम् । न च तस्यैवार्थविशेषे मित्त्वार्थमनुवादोऽयमिति वाच्यम्,

लुङि' इति परस्मैपदपक्षे द्युतादिलक्षणे अङि सति ङित्त्वान्न गुणः । अङभावे तु ऊदिल्लक्षणमिड्विकल्पं मत्वा आह **अकल्पिष्टेति, अक्लृप्तेति**। **अकल्प्स्यदिति** । लृङि स्ये 'लुटि च क्लृपः' इति परस्मैपदपक्षे ऊदिल्लक्षणमिड्विकल्पं बाधित्वा 'तासि च क्लृपः' इति इण्निषेध इति भावः । परस्मैपदाभावपक्षे तु ऊदिल्लक्षणमिड्विकल्पं मत्वा आह **अकल्पिष्यत, अकल्प्स्यतेति** । **वृदिति** । वृतेः समाप्त्यर्थकात् कर्तरि क्विप्, तदाह **वृत्त इति** । 'गत्यर्थाकर्मक–' इति कर्तरि क्तः । वृत्तशब्दस्य विवरणं **सम्पूर्ण इति** । द्युतादयः कृपूपर्यन्ता अनुदात्तेतो गताः ।

अथ त्वरत्यन्ता इति । ञि त्वरा संभ्रमे इत्यन्ता इत्यर्थः । **षितश्चेति** । षित्संज्ञका इत्यर्थः । षित्कार्यभाज इति वा । ञि त्वरा संभ्रमे इत्युक्त्वा घटादयः षित इति वक्ष्यमाणत्वादिति भावः । षित्फलं तु स्त्रियामित्यधिकारे 'षिद्गिदादिभ्यः–' इत्यङ् । घटा व्यथा इत्यादिरूपम् । **घटत इति** । चेष्टते इत्यर्थः । **तत्फलं त्विति** । मित्त्वफलं तु 'मितां ह्रस्वः' इति णौ ह्रस्वः, 'चिण्णमुलोर्दीर्घः–' इति दीर्घश्च वक्ष्यते । धातुपाठे अर्थनिर्देश उपलक्षणमित्युक्तम् । ततश्चार्थान्तरवृत्तेरपि घटधातोर्घटादिकार्यं भवत्येव, तदाह **घटयति विघटयतीति** । संश्लेषयति विश्लेषयतीत्यर्थः । णौ ह्रस्वोदाहरणमिदम् । अघटि अघाटीति चिण्युदाहरणम् । घाटं घाटम्, घटं घटमिति ण्यन्ताण्णमुलि दीर्घविकल्पस्योदाहरणम् । 'नित्यवीप्सयोः' इति द्विर्वचनम् । ननु यद्यर्थान्तरवृत्तेरपि घटधातोर्मित्त्वम्, तदा उद्घाटनं प्रविघाटयितेत्यत्र विकसनार्थकस्यापि घटधातोर्णौ मित्त्वाद् ह्रस्वः स्यादि-

सीष्टेति । 'लिङ्सिचावात्मनेपदेषु' इति कित्त्वान्न गुणः । **वृदिति** । वृतु वर्तने इत्यस्मात्क्विप् । ञित्वरा संभ्रमे इत्यस्यानन्तरं 'घटादयः षितः' इत्युक्तत्वात्त्वरत्यन्तास्त्रयोदशैव षितो न तु फणान्ताः सर्वेऽपीति सिद्धम्, तथापि स्पष्टप्रतिपत्त्यर्थमाह **षितश्चेति** । प्रयोजनं तु 'षिद्भिदादिभ्यः–' इत्यङि टाप् । घटा व्यथेत्यादिरूपसिद्धिः । **घट** चेष्टायाम् । ये धातवोऽन्यत्राधीतास्तेषामिह पाठोऽर्थनियमार्थः । ये त्विहैव पठ्यन्ते तेषामुपसर्गादिनार्थान्तरपरत्वेऽपि मित्त्वमस्त्येवेति धातुवृत्त्यादिषु

'नान्ये मितोऽहेतौ' इति निषेधात्। अहेतौ स्वार्थे णिचि ज्ञपादिपञ्चकव्यतिरिक्ताश्चुरादयो मितो नेत्यर्थः। व्यथ ७६४ भयसञ्चलनयोः। व्यथते।
२३५३ व्यथो लिटि। (७-४-६८) व्यथोऽभ्यासस्य संप्रसारणं स्याल्लिटि। हलादिशेषापवादः। थस्य हलादिशेषेण निवृत्तिः। विव्यथे। प्रथ ७६५ प्रख्याने।

स्यादिपति कथं तर्हीति। अणिवति। समाधानमिति शेषः। चौरादिकस्येति। चुरादौ 'घट संघाते' इति पठितम्। तदिदं घटादिकाद् घटधातोर्धात्वन्तरमेव। तस्य णौ मित्त्वाभावाद् ह्रस्वाभावे उद्घाटनं प्रविघाटयितेति निर्बाधमेव, अर्थनिर्देशस्योपलक्षणतया संघातादन्यत्र विकासनेऽपि चौरादिकस्य वृत्तिसंभवादिति भावः। ननु घटादिगणादन्यत्र अर्थान्तरे पठितानां धातूनामिह घटादिगणे पाठः घटादिगणनिर्दिष्ट एवार्थे मित्त्वार्थोऽनुवाद एव, नतु धातुभेदः। अन्यथा घटादिकत्वं गणान्तरस्थत्वं चादाय मित्त्वतदभावयोर्विकल्पापत्तेः। ये तु धातवो घटादिगण एव पठिता नतु गणान्तरे, तेषां त्वर्थान्तरवृत्तावपि मित्त्वमिति धातुवृत्त्यादिग्रन्थेषु सिद्धान्तः। घटधातुस्तु 'घट संघाते' इति चुरादौ पठितः। अतस्तस्यैवात्र गणे चेष्टायामर्थे मित्त्वार्थोऽनुवाद इति लब्धम्। एवं च विघटयति इत्यादावर्थान्तरवृत्तौ तस्य कथं मित्त्वमित्याशङ्क्य निराकरोति नचेति। तस्यैव चौरादिकस्यैव घटधातोः चेष्टात्मके अर्थविशेषे वृत्तौ मित्त्वार्थोऽनुवादः स्यादिति न वाच्यमित्यर्थः। कुत इत्यत आह नान्ये मितोऽहेताविति। चुराद्यन्तर्गणसूत्रमिदम्। तत्र हि 'ज्ञप मिच्च' 'यम च परिवेषणे' 'चह परिकल्कने' 'रह त्यागे' 'बल प्राणने' 'चिञ् चयने' इति पञ्च धातून् पठित्वा 'नान्ये मितोऽहेतौ' इति पठितम्। तत्र चह परिकल्कने इत्यस्य स्थाने चपेति केचित् पठन्ति। तथा च पञ्चत्वस्य न विरोधः। एषु पञ्चस्वपि मिदित्यनुवर्तते। अहेताविति च्छेदः। कस्मादन्ये इत्यपेक्षायां संनिहितत्वाद् ज्ञपादिपञ्चभ्य इति लभ्यते। हेतुशब्देन 'हेतुमति च' इति सूत्रविहितो णिच् लभ्यते। तद्भिन्नो णिच् स्वार्थिकः अहेतुः, तदाह अहेतौ स्वार्थे णिचीति। ज्ञप आदिर्येषामिति अतद्गुणसंविज्ञानो बहुव्रीहिः। ज्ञपधातोस्तदुत्तरेभ्यश्च पञ्चभ्य इत्येवं षड्भ्योऽन्ये ये चुरादयः, ते मितो नेति फलितम्। एवं च चुरादौ ज्ञपादिपञ्चकव्यतिरिक्तानां मित्त्वाभावाद् 'घट चेष्टायाम्' इति निर्देशस्चौरादिकस्य 'घट संघाते' इत्यस्य चेष्टायां वृत्तौ मित्त्वार्थोऽनुवाद इति न युज्यते। किंतु इहैव घटादिगणे 'घट चेष्टायाम्' इत्यपूर्वोऽयं धातुः। तस्य चार्थान्तरवृत्तावपि मित्त्वमस्त्येवेति विघटयतीत्यादौ मित्त्वाद्ध्रस्वो निर्बाध इति भावः। व्यथधातुर्द्वितीयान्तः।

स्थितम्, तदेतद् ध्वनयन्नुदाहरति विधटयतीति। व्यथो लिटि। हलादिःशेषा-

पप्रथे। प्रस ७६६ विस्तारे। पप्रसे। म्रद ७६७ मर्दने। स्खद ७६८ स्खदने। स्खदनं विद्रावणम्। क्षजि ७६९ गतिदानयोः। मित्त्वसामर्थ्यादनुपधात्वेऽपि 'चिण्णमुलोः–' (सू २७६२) इति दीर्घविकल्पः। अक्षजि, अक्षाजि। क्षजं क्षजम्। क्षाजं क्षाजम्। दक्ष ७७० गतिहिंसनयोः। योऽयं वृद्धिशैघ्र्ययोरनुदात्तेत्सु पठितस्तस्येहार्थविशेष मित्त्वार्थोऽनुवादः। कृप ७७१ कृपायां गतौ। कदि

व्यथो लिटि। 'अत्र लोपः–' इत्यतः अभ्यासस्येति 'द्युतिस्वाप्योः–' इत्यतः संप्रसारणमिति चानुवर्तते, तदाह **व्यथोऽभ्यासस्येत्यादिना**। **हलादिशेषापवाद इति**। व्यथ् व्यथ् ए इति स्थिते हलादिशेषलभ्यं यकारस्य लोपं बाधित्वा संप्रसारणमित्यर्थः। तथा च यकारस्य इकारे पूर्वरूपे विव्यथे इति रूपम्। वकारस्य तु न संप्रसारणम्, 'न संप्रसारणे संप्रसारणम्' इति निषेधात्। ननु संप्रसारणेन हलादिशेषबाधे थकारस्यापि निवृत्तिर्न स्यादित्यत आह **थस्येति**। यकारलोपस्य बाधं विना संप्रसारणस्य प्रवृत्त्यनुपपत्तेस्तेन तद्बाधेऽपि थकारलोपस्य बाधे प्रमाणाभावादिति भावः। **म्रद मर्दन इति**। ऋदुपधोऽयम्। मर्दते। मम्रदे। क्षजिधातुरिदित् क्षञ्जते। चक्षञ्जे। ननु घटादिगणे अस्य पाठो व्यर्थः, क्षञ्जयतीत्यत्र णौ नुमि कृते अकारस्यानुपधात्वेन उपधादीर्घस्याप्रसक्त्या 'मितां ह्रस्वः' इत्यस्याप्रवृत्तावपि विशेषाभावाद् अनुपधात्वेन 'मितां ह्रस्वः' इत्यस्य प्रसक्त्यभावाच। अत एव अक्षञ्जि क्षञ्जं क्षञ्जमित्यत्रापि 'चिण्णमुलोः–' इति दीर्घविकल्पस्यापि न प्रसक्तिरित्यत आह **मित्त्वसामर्थ्यादिति**। **दक्ष गतीति**। ननु 'दक्ष वृद्धौ शीघ्रार्थे च' इत्यनुदात्तेत्सु पाठादेव सिद्धे किमर्थमिह पाठः? अर्थनिर्देशस्योपलक्षणत्वादेव गतिर्हिंसार्थकत्वस्यापि संभवादित्यत आह **वृद्धिशैघ्र्ययोरिति**। मित्त्वसामर्थ्यादनुपधात्वेऽपि चिण्णमुलोर्दीर्घविकल्पः। अदक्षि, अदाक्षि। दक्षंद-

---

पवाद इति। हलादिःशेषप्रक्रमणादिति भावः। एवं च 'उत्सर्गसदेशश्चापवादः' इति परस्यैव संप्रसारणं भवति न पूर्वस्येति कैयटाद्युक्त्या 'न संप्रसारणे–' इति निषेधोऽत्र नापेक्षितः। केचित्तु हलादिःशेषेण यकारनिवृत्तावपि वकारस्य सत्त्वात्सूत्रमिदं सावकाशमिति अपवादत्वं न संभवतीति मत्वा 'संप्रसारणं तदाश्रयं च कार्यं बलवत्' इति वचनाद्धलादिःशेषं बाधित्वा परस्य संप्रसारणे पूर्वस्य निषेधः। 'संप्रसारणं तदाश्रयं च कार्यम्–' इति वचनाभावे तु 'व्यथो लिटि' इति संप्रसारणस्य धातुविशेषप्रत्ययविशेषाश्रयत्वेन 'इग्यणः–' इति संज्ञाविशेषद्वयाश्रयत्वेन च बह्वपेक्षस्य बहिरङ्गत्वात्संप्रसारणं बाधित्वा हलादिःशेषे जाते वकारस्य संप्रसारणं स्यादित्याहुः। **थस्येति**। संप्रसारणस्याभ्यासान्तर्गतयकारनिवृत्तेरपवादत्वं न तु थकारनिवृत्तेरिति भावः। लिटीति किम्,

७७२ कदि ७७३ क्रदि ७७४ वैक्लव्ये। वैकल्ये इत्येके। अयोऽप्यनिदित इति नन्दी। इदित इति स्वामी। कदिक्रदी इदितौ, क्रद क्रद इति चानिदिताविति मैत्रेयः। कदिक्रदिक्लदीनामाह्वानरोदनयोः परस्मैपदिषूक्तानां पुनरिह पाठो मित्त्वार्थ आत्मनेपदार्थश्च। ञि त्वरा ७७५ संभ्रमे। 'घटादयः षितः' (ग सू १८६)। षित्वादङ् क्षत्सु वक्ष्यते।

अथ फणान्ताः परस्मैपदिनः। ज्वर ७७६ रोगे। ज्वरति। जज्वार। गड ७७७ सेचने। गडति। जगाड। हेड ७७८ वेष्टने। हेडृ अनादरे इत्यात्मनेपदिषु गतः। स एवोत्सृष्टानुबन्धोऽनूद्यते अर्थविशेषे मित्त्वार्थम्। परस्मैपदिभ्यो

त्तम् दात्तं दात्तम्। **क्रप कृपायां गताविति**। अदुपधोऽयम्। कृपायां गतौ चेत्यर्थः। कदि कदि क्रदि इति नन्दिमते। क्षीरस्वामिमते च त्रय एव धातवः। मैत्रेयमते चत्वार इति बोध्यम्। तत्र इदितां त्रयाणां पौनरुक्त्यं परिहरति **कदिक्रदिक्लदीनामित्यादिना। ञि त्वरेति**। ञिरित्। 'ञीतः क्तः' इति क्तः प्रयोजनम्। आदित्त्वं तु 'आदितश्च' इति निष्ठायामिण्निषेधार्थम्। वस्तुतस्तु आदित्त्वं व्यर्थम्, ह्रस्वेऽप्यात्मनेपदसिद्धेः 'रुष्यमत्वरसंघुषास्वनाम्' इति निष्ठायामिड्विकल्पसिद्धेश्च। **घटादयः षित इति**। त्वरत्यन्ता इति शेषः। गणसूत्रमिदम्। तत्प्रयोजनमाह **षित्त्वादिति। वक्ष्यत इति**। 'षिद्भिदादिभ्योऽङ्' इत्यनेनेति शेषः। घटादिषु त्रयोदशानुदात्तेतो गताः। 'द्युत दीप्तौ' इत्यतः प्राग् घटादिसमाप्तिरिति वक्ष्यते।

अथ फणान्ता इति। फण गतावित्येतत्पर्यन्ता इत्यर्थः। **ज्वर रोग इति**। णौ ज्वरयति। चिणि तु अज्वरि, अज्वारि। णमुलि तु ज्वरं ज्वरं ज्वारं ज्वारम्। एवमग्रेऽपि ज्ञेयम्। **हेड वेष्टन इति**। डकारादकार उच्चारणार्थः। ततश्च 'नाग्लोपिशास्वृदिताम्' इति निषेधो न भवति। **स एवेति**। हेडृधातुरेव

विव्यथिषते। इह 'सन्यतः' इति इत्वम्। वाव्यध्यते। वाव्यथीति। **क्रप** कृपायां गतौ। चकाराभावेऽपीहार्थद्वयमित्येव बोध्यमित्याहुः। **कदि क्रदि**। कन्दयति। अकन्दि। अकान्दि। कन्दं कन्दम्। कान्दं कान्दम्। **ञित्वरा**। आदित्वमिह व्यर्थम्, ह्रस्वोच्चारणेनाप्यात्मनेपदसिद्धेः। न च निष्ठायाम् 'आदितश्च' इतीट्प्रतिषेधार्थमिति शङ्क्यम, 'रुष्यमत्वर-' इति निष्ठायामिटो विकल्पितत्वात्। तूर्णः। त्वरितः। **ज्वर** रोगे। णौ ज्वरयति। अज्वरि। अज्वारि। ज्वरं ज्वरम्। ज्वारं ज्वारम्। **गड** सेचने। णौ। गडयति। अगडि। अगाडि। गडं गडम्। गाडं गाडम्। एवमन्यत्राप्यूह्यम्। हेड वेष्टने। **उत्सृष्टानुबन्ध इति**। तेन वेष्टने 'नाग्लोपि-' इति निषेध-

ज्वरादिभ्यः प्रागेवानुवादे कर्तव्ये तन्मध्येऽनुवादसामर्थ्यात्परस्मैदम्। हेडति। जिहेड। हिडयति। अहिडि, अहीडि। अनादरे तु हेडयति। वट ७७९ भट ७८० परिभाषणे। वट वेष्टने, भट भृतौ इति पठितयोः परिभाषणे मित्त्वार्थोऽनुवादः। णट ७८१ नृत्तौ। इत्थमेव पूर्वमपि पठितम्। तत्रायं विवेकः। पूर्वं पठितस्य नाट्यमर्थः। यत्कारिषु नटव्यपदेशः। वाक्यार्थाभिनयो नाट्यम्। घटादौ तु नृत्तं नृत्यं चार्थः। यत्कारिषु नर्तकव्यपदेशः। पदार्थाभिनयो नृत्यम्। गात्रविक्षेपमात्रं नृत्तम्। केचित्तु घटादौ णट नतौ इति पठन्ति। गतौ इत्यन्ये। णोपदेशपर्युदासवाक्ये भाष्यकृता 'नाटि' इति दीर्घपाठाद्धटादिर्णोपदेश एव।

ऋकारानुबन्धमुत्सृज्य वेष्टनरूपे अर्थविशेषे मित्त्वार्थमनूद्यत इत्यर्थः। धात्वन्तरत्वे तु मित्त्वतदभावयोर्विकल्पः स्यादिति भावः। नन्वात्मनेपदिन एवात्रानुवादे परस्मैपदं न स्यादित्यत आह **परस्मैपदिभ्य इति**। यदि त्वात्मनेपदमिष्टं तर्हि घटादिषु त्वरत्यन्तेष्वेवानुदात्तेत्सु पठ्यतेति भावः। **हेडतीति**। वेष्टते इत्यर्थः। **हिडयतीति**। वेष्टयतीत्यर्थः। 'हेतुमति–' इति णिचि 'मितां ह्रस्वः' इति ह्रस्व इति भावः। **अहिडि, अहीडीति**। 'चिण्णमुलोः–' इति दीर्घविकल्पः। **अनादरे तु हेडयतीति**। वेष्टनरूपार्थ एव मित्त्वात् ह्रस्व इति भावः। 'वट परिभाषणे' इति नापूर्वो धातुरित्याह **वट वेष्टन इत्यादि**। **अनुवाद इति**। धात्वन्तरत्वे तु मित्त्वतदभावयोर्विकल्पः स्यादिति भावः। 'णट नृत्तौ' इत्यस्य पौनरुक्त्यमाक्षिपति **इत्थमेव पूर्वमपि पठितमिति**। टवर्गान्तेष्विति शेषः। तथा च उभयोरप्यर्थैक्येन अर्थविशेषे मित्त्वार्थमिहानूद्यत इति परिहारस्यासंभवात्पौनरुक्त्यमेवेति भावः। परिहर्तुमुपक्षिपति **तत्रायं विवेक इति**। तत्र तयोर्धात्वोः अयं वक्ष्यमाणो विवेकः—अर्थभेदः प्रत्येतव्य इत्यर्थः। **पूर्वं पठितस्येति**। टवर्गान्तेषु पठितस्येत्यर्थः। **यत्कारिष्विति**। यस्य कर्तृषु नटव्यवहारः तन्नाट्यं पूर्वं पठितस्य नटधातोरर्थ इत्यर्थः। किं तन्नाट्यमित्यत्राह **वाक्यार्थेति। घटादौ त्विति**। यस्य कर्तृषु नर्तकव्यपदेशः तद् नृत्यम्, नृत्तं च घटादौ पठितस्य नटेरर्थ इत्यर्थः। नृत्यनृत्तयोः को भेद इत्यत आह **पदार्थेति**। एवं च टवर्गान्तेषु पठितस्य घटादिगतस्य चार्थभेदसत्त्वादर्थविशेषे मित्त्वार्थोऽनुवाद इति युज्यते। धात्वन्तरत्वे तु मित्त्वतदभावयोर्विकल्पः स्यादिति भावः। अथ नटधातोरस्य णोपदेशपर्युदासभ्रमं वारयति **णोपदेशेति**। अनर्दनाटीत्यादिपर्युदासवाक्ये नाटीति णिज्लक्षणवृद्धिनिर्देशेन 'नट अवस्कन्दने' इति चौरादिकस्यैव

शङ्कैव नास्तीति भावः। **णोपदेश एवेति**। प्रणटति प्रणटयति। नाटीत्यस्य तु

ष्टक ७८२ प्रतीघाते। स्तकति। चक ७८३ तृप्तौ। तृप्तिप्रतीघातयोः पूर्वं पठितस्य तृप्तिमात्रे मित्त्वार्थोऽनुवादः। आत्मनेपदिषु पठितस्य परस्मैपदिष्वनुवादात् परस्मैपदम्। कखे ७८४ हसने। एदित्त्वान्न वृद्धिः। अकखीत्। रगे ७८५ शङ्कायाम्। लगे ७८६ सङ्गे। ह्रगे ७८७ ह्लगे ७८८ षगे ७८९ ष्टगे ७९० संवरणे। कगे ७९१ नोच्यते। अस्यायमर्थ इति विशिष्य नोच्यते, क्रियासामान्यार्थत्वात्। अनेकार्थत्वादित्यन्ये। अक ७९२ अग ७९३ कुटिलायां गतौ। कण ७९४ रण ७९५ गतौ। चकाण। रराण। चण ७९६ शण ७९७ श्रण ७९८ दाने च। शण गतौ इत्यन्ये। श्रथ ७९९ श्नथ ८०० क्रथ ८०१ क्लथ ८०२ हिंसार्थाः। 'जासिनिप्रहण—' (सू ६१७) इति सूत्रे क्राथेति मित्त्वेऽपि वृद्धिर्निपात्यते। क्राथयति। मित्त्वं तु निपातनात्परत्वात् 'चिण्णमुलोः–'

ग्रहणादयं णोपदेश एवेत्यर्थः। ष्टकधातुः षोपदेशः। कृतष्टुत्वस्य निर्देशः। **स्तकतीति**। 'धात्वादेः–' इति षस्य सत्वे ष्टुत्वनिवृत्तिः। **चक तृप्तौ तृप्तीति**। 'चक तृप्तौ प्रतीघाते च' इत्यात्मनेपदिषु पठितस्य तृप्त्यर्थे मित्त्वार्थोऽत्रानुवाद इत्यर्थः। एवं च धात्वन्तरत्वाभावान्न मित्त्वतदभावविकल्पः। ननु आत्मनेपदिषु पठितस्यात्रानुवादादात्मनेपदं स्यादित्यत आह **आत्मनेपदिष्विति**। **षगे ष्टगे इति**। षोपदेशौ। ष्टगे इति कृतष्टुत्वनिर्देशः। **कगे नोच्यत इति**। ननु कगे इत्यनेन यदि किमपि नोच्येत, तर्हि कथमस्य धातुत्वमित्यत आह **अस्यायमिति**। क्रियाविशेषो नास्यार्थ इति भावः। ननु यदि न कोऽपि क्रियाविशेषोऽस्यार्थः, तर्हि कथमयं धातुरित्यत आह। **क्रियासामान्यार्थवाचित्वादिति**। धातुपाठपठितस्य क्रियाविशेषार्थकत्वाभावे सति क्रियासामान्यवाचित्वं परिशेषलभ्यमिति भावः। **अनेकेति**। कलिः कामधेनुरिति न्यायेन कलधातुवदपरिमितार्थकत्वमिति भावः। **श्रथ श्नथ क्रथ क्लथ इति**। चत्वारोऽपि द्वितीयान्ताः। आद्यतृतीयौ रेफमध्यौ द्वितीयो नकारमध्यः। चतुर्थस्तु लकारमध्यः। आद्यस्तु शकारादिः। इतरे ककारादयः। ननु क्रथधातोर्घटादित्वेन मित्त्वाद् णौ उपधावृद्धिसंपन्नस्य अकारस्य 'मितां ह्रस्वः' इति ह्रस्वत्वे क्रथयतीति स्यात्, नतु क्राथयतीति, तत्राह **जासिनीति**। 'जासिनिप्रहणनाटक्राथपिषां हिंसायाम्' इति षष्ठीविधौ णौ मित्त्वेऽपि क्राथेति वृद्धिर्निपात्यत इत्यर्थः। नन्वेवं सति घटादौ क्रथधातोः पाठो व्यर्थ इत्यत आह **मित्त्वं त्विति**। चिण्णमुलोर्दीर्घपक्षे चरितार्थमित्यन्वयः। ननु तत्रापि क्राथेति निपातनाद् वृद्धिरित्यत

प्रनाटयति। **वृद्धिर्निपात्यत इति**। तेन 'मितां ह्रस्वः' इति न प्रवर्तत इति भावः।

१ बालमनोरमाकृत्तु इमं 'क्रथ' इति ककारादिं पठति

(सू २७६२) इति दीर्घे चरितार्थम् । **अकथि, अकाथि** । **कथं कथम् । काथं काथम्** । **वन ८०३ च** । **हिंसायामिति शेषः** । **वनु च नोच्यते** । **वनु इत्यपूर्व एवायं धातुर्न तु तानादिकस्यानुवादः** । **उदित्करणसामर्थ्यात्** । **तेन क्रियासामान्ये वनतीत्यादि** । **प्रवनयति** । **अनुपसृष्टस्य तु मित्त्वविकल्पो वक्ष्यते** । **ज्वल ८०४ दीप्तौ** । **णप्रत्ययार्थं पठिष्यमाण एवायं मित्त्वार्थमनूद्यते** । **प्रज्वल-**

आह **निपातनात्परत्वादिति** । काथेति निपातनापेक्षया 'चिण्णमुलोः–' इत्यस्य परत्वादित्यर्थः । यद्यपि 'मितां ह्रस्वः' इत्यपि परम्, तथापि पुरस्तादपवादन्यायेन काथेति वृद्धिनिपातनं 'मितां ह्रस्वः' इत्यस्यैवाव्यवहितस्य बाधकम्, नतु 'चिण्णमुलोः–' इत्यस्यापि, तस्य व्यवहितत्वादिति बोध्यम् । **अकथि, अकाथीति** । कथेर्ण्यन्ताच्चिणि दीर्घविकल्पः । **कथं कथं काथं काथमिति** । णमुलि दीर्घविकल्पः । **वन चेति** । चकारो हिंसानुकर्षकः, तदाह **हिंसायामितीति** । **शेष इति** । वन शब्दे, वन संभक्ताविति पठितस्य हिंसायां मित्त्वार्थोऽत्रानुवादः । वनति । णौ तु वनयति । णमुलि तु वनं वनं वानं वानम् । **वनु च नोच्यत इति** । कगे नोच्यते इतिवद्व्याख्येयम् । नन्वन्यत्र पठितस्य घटादौ मित्त्वार्थोऽनुवाद इति सिद्धान्तात्तनादौ 'वनु याचने' इति पठितस्य अनुदात्तेतोऽत्रानुवादात् क्रियासामान्येऽर्थे वनुते इत्यात्मनेपदमुप्रत्ययश्च स्यादित्यत आह **अपूर्व एवायमिति** । **उदित्करणेति** । यदि तानादिकस्यैव अत्रानुवादः स्यात्, तर्हि तनादिगणे वनु इति कृतेन उदित्करणेनैव 'उदितो वा' इत्याद्युदित्कार्यस्य सिद्धेरिह गणे पुनरुदित्करणमनर्थकं स्यात् । अतस्तानादिकस्य नात्रानुवादः, किं त्वपूर्व एवायं वनुधातुः । तथा च वनतीति परस्मैपदं शब्विकरणं चेत्याह **तेन क्रियासामान्ये वनतीत्यादीति** । आदिना वनतः वनन्तीत्यादिसंग्रहः । **प्रवनयतीति** । घटादिकस्य क्रियासामान्यवाचिनो णिचि मित्त्वाद्ध्रस्वः । **वक्ष्यत इति** । 'ग्लाम्नावनुवमां च' इत्यनेनेति शेषः । तानादिकात्तु वनु याचने इत्यस्माण्णिचि उपधादीर्घे वानयतीत्येव भवति । **ज्वल दीप्तौ** । **णप्रत्य-**

निपातनात्परत्वादिति । निपातनविषयीभूतमितां ह्रस्व इत्यस्मात्परत्वाद् 'मितां ह्रस्वः' इत्येतदेव निपातनेन बाध्यते न तु ततः परं 'चिण्णमुलोः–' इत्येतदित्यर्थः । **वन** च । संभक्तौ पठितस्य हिंसायां मित्त्वार्थोऽनुवादः । वनति । णौ । वनयति । अवनि । अवानि । वनं वनम् । वानं वानम् । **तानादिकस्येति** । वनु याचने इत्यस्येत्यर्थः । **सामर्थ्यादिति** । अनुवादे तु तत्र कृतेनोदित्त्वेन क्त्वायामिड्विकल्पस्य निष्ठायामिट्प्रतिषेधस्य च सिद्धेः पुनरुदित्करणं व्यर्थं स्यादिति भावः । **वनतीत्यादीति** । णौ । वनयति । तानादिकस्य तु वनुते वानयति । **मित्त्वविकल्प इति** ।

यति। ह्वल ८०५ ह्मल ८०६ चलने। प्रह्वलयति। प्रह्मलयति। स्मृ ८०७ आध्याने। चिन्तायां पठिष्यमाणस्य आध्याने मित्त्वार्थोऽनुवादः। आध्यानमुत्कण्ठापूर्वकं स्मरणम्। दॄ ८०८ भये। दॄ विदारणे इति क्र्यादेरयं मित्त्वार्थोऽनुवादः। दॄणन्तं प्रेरयति दरयति। भयादन्यत्र दारयति। धात्वन्तरमेवेदमिति मते तु दरतीत्यादि। केचिद्घटादौ 'अत्स्मृदृत्वर–' (सू २२६६) इति सूत्रे च दृ इति दीर्घस्थाने ह्रस्वं पठन्ति। तन्नेति माधवः। नॄ ८०९ नये। क्र्यादिषु पठिष्यमाणस्यानुवादः। नयादन्यत्र नारयति। श्रा ८१० पाके। श्रै

यार्थमिति। 'ज्वलितिकसन्तेभ्यो णः' इति णप्रत्ययार्थं ज्वलादिगणे पठिष्यमाणस्य इह मित्त्वार्थोऽनुवाद इत्यर्थः। ज्वलतीत्यादि सिद्धवत्कृत्य मित्त्वस्य णौ ह्रस्वं प्रयोजनमाह प्रज्वलयतीति। धात्वन्तरत्वे तु मित्त्वतदभावयोर्विकल्पः स्यादिति बोध्यम्। स्मृ आध्याने। चिन्तायामिति। स्मृ चिन्तायामिति पठिष्यमाणस्य आध्याने मित्त्वार्थोऽनुवाद इत्यर्थः। चिन्ताया आध्यानमन्यदिति दर्शयितुमाह आध्यानमुत्कण्ठेति। दॄ भय इति। अस्य दृणातीति रूपं नतु शप्, तदाह क्र्यादेरयं मित्त्वार्थोऽनुवाद इति। भयेऽर्थे मित्त्वार्थमिति शेषः। अर्थनिर्देशस्य उपलक्षणत्वाद् भये वृत्तिः। तथा च क्र्यादित्वात् श्नाविकरण एवायमिति भावः। मित्त्वप्रयोजनं दर्शयति दॄणन्तं प्रेरयति दरयतीति। भीषयतीत्यर्थः। भयादन्यत्र दारयतीति। भेदयतीत्यर्थः। धात्वन्तरमेवेति। नतु क्र्यादेरनुवाद इत्यर्थः। अस्मिन्मते भौवादिकत्वात् शबेवेत्याह दरतीत्यादीति। सूत्रे चेति। 'अत्स्मृदृत्वरप्रथम्रदस्तॄस्पशाम्' इति अत्वविधावित्यर्थः। ह्रस्वं पठन्तीति। तन्मते क्र्यादेरनुवादप्रसक्तिरेव नास्तीति भावः। तन्नेतीति। यदि ह्ययं घटादौ ह्रस्वान्तः क्र्यादौ तु दीर्घान्तो भवेत् तर्हि 'शॄदॄप्रां ह्रस्वो वा' इत्यत्र दॄग्रहणमनर्थकं स्यात्। ह्रस्वदीर्घान्तधातुभ्यामेव तत्फलसिद्धेरिति भावः। नॄ नय इति। नयो नयनम्। क्र्यादिष्विति। नॄ नये इत्येव क्र्यादिषु

'ग्लास्नावनुवमां च' इति गणसूत्रेण। णप्रत्ययार्थमिति। 'ज्वलितिकसन्तेभ्यो णः' इति णप्रत्ययार्थम्। दॄ भये। धातोरनेकार्थत्वाद्भयार्थकत्वम्। दृणाति। दरयति। तन्नेतीति। माधवस्यायमाशयः—सूत्रे दीर्घान्त एव पाठः सर्वसंमतः। घटादावपि दीर्घान्त एव सर्वैः पठ्यते। यद्ययं ह्रस्वान्तो भवेत्तर्हि 'शॄदॄप्रां ह्रस्वो वा' इति ह्रस्वविकल्पविधायके सूत्रे दॄग्रहणमनर्थकं स्यात्, धातुद्वयेन दद्रतुःददरतुरिति रूपद्वयसिद्धेः। न च दॄ विदारणे इत्यस्य रूपद्वयलाभार्थं दॄग्रहणमावश्यकमिति वाच्यम्, धातूनामनेकार्थत्वात्समीहितसिद्धेरिति। नॄ नये। नृणाति। नरयति। अनरि। अनारि।

इति कृतात्वस्य श्रा इत्यादादिकस्य च सामान्येनानुकरणम् । 'लुग्विकरणालुग्विकरणयोरलुग्विकरणस्य' (प ९१) 'लक्षणप्रतिपदोक्तयोः प्रतिपदोक्तस्यैव ग्रहणम्' (प ११४) इति परिभाषाभ्याम् । श्रपयति । विक्लेदयतीत्यर्थः । पाकादन्यत्र श्रापयति । स्वेदयतीत्यर्थः । मारणतोषणनिशामनेषु ज्ञा ८११ ।

पठ्यते । तत्रार्थनिर्देशो न विवक्षितः । क्र्यादिषु पठिष्यमाणस्य नॄधातोर्नयादन्यत्र विद्यमानस्य नयेऽर्थे मित्त्वार्थोऽनुवाद इत्यर्थः । तथा च श्राविकरण एवायम् । नृणातेर्धात्वन्तरत्वाभावान्न मित्त्वतदभावौ, अपि तु नित्यमेव मित्त्वम् । **श्रा पाक इति** । नन्वत्र भ्वादौ पठ्यमानाच्छ्रायतेः, उत्तरत्र अदादौ पठिष्यमाणाच्च श्रातेरन्य एव यदि कश्चन स्वतन्त्रो धातुर्घटादौ निर्दिश्येत तदा प्रकृते लटि शपि श्रातीति रूपसंपत्त्या लुग्विकरणस्थेन श्रा पाके इत्यनेन पौनरुक्त्यमित्यत आह **श्रै इतीति** । अग्रे भ्वादिगणे श्रै पाक इति पठिष्यते । तस्य कृतात्वस्यानुकरणमित्यन्वयः । तथा च तस्यैव श्रैधातोरनेकार्थकतया पाके वृत्तस्य मित्त्वार्थमत्रानुवादात् शपि श्रायतीत्यादि रूपम् । एतच्च 'श्रृतं पाके' इति सूत्रे भाष्यकैयटयोः स्थितम् । एवं च सति संभवे अन्यत्र पठितानामिह मित्त्वार्थोऽनुवाद इति सिद्धान्तादग्रे भ्वादौ श्रै पाके इत्यस्य पौनरुक्त्यं न शङ्क्यम् । नन्वेवं सति 'श्रै पाके' इत्येवात्र कुतो न पठितमित्यत आह **श्रा इत्यादादिकस्य चेति** । ननु लाक्षणिकत्वात् 'श्रै पाके' इति भौवादिकस्य कृतात्वस्याप्यनुवाद इति न युज्यत इत्यत आह **लुग्विकरणेत्यादि परिभाषाभ्यामित्यन्तम्** । परिभाषाभ्यामुभयोरनुकरणमित्यन्वयः । 'स्वरतिसूतिसूयति-' इति सूत्रे सू इति पठितेऽपि द्वयोर्ग्रहणे सिद्धे सूतिसूयत्योः पृथग्ग्रहणं 'लुग्विकरण-' इति परिभाषां ज्ञापयतीत्याहुः । प्रतिपदोक्तपरिभाषा तु न्यायसिद्धेत्युक्तमेव । **श्रपयतीति** । श्रैधातोर्णिचि 'आदेच उपदेशे-' इत्यात्वे 'अर्तिह्री-' इति पुकि मितां ह्रस्वः । श्राधातोस्तु स्वत एवाऽऽदन्तत्वाण्णिचि पुकि ह्रस्वः । **पाकादन्य-**

नरंनरम् । नारंनारम् । **श्रै इति** । अयं हि वक्ष्यमाणो भौवादिकः । **लुग्विकरणेति** । अत्र व्याचक्षते—'स्वरतिसूति-' इति सूत्रे सूङ् इति पठितेनापि द्वयोर्ग्रहणे सिद्धे सूतिसूयत्योः पृथग्ग्रहणं व्यर्थं सदिमां परिभाषां ज्ञापयति । नन्वलुग्विकरणं बलीय इति वैपरीत्यं किं न स्यादिति शङ्क्यम्, इष्टानुरोधात् । सूङ् इति पठिते स्वरतिसाहचर्यादलुग्विकरणस्यैव ग्रहणं स्यान्न तूभयोरित्यपि न शङ्क्यम्, साहचर्यस्यानित्यत्वात् । तस्मात्पृथग्ग्रहणं व्यर्थं सज्ज्ञापकमेवेति । लक्षणप्रतिपदोक्तपरिभाषा तु न्यायसिद्धा, लाक्षणिकं हि विलम्बितोपस्थितिकम्, प्रतिपदोक्तं तु शीघ्रोपस्थितिकमिति । **परिभाषाभ्यामिति** । यद्यप्युक्तपरिभाषयोः परस्परविरोधेनाप्रवृत्तावपीष्टं सिध्यति, तथाप्यविशे-

निशामनं चाक्षुषज्ञानम् इति माधवः। ज्ञापनमात्रम् इत्यन्ये। निशानेषु इति पाठान्तरम्। निशानं तीक्ष्णीकरणम्। एष्वेवार्थेषु जानातिर्मित्। ज्ञप मिच्च इति चुरादौ। ज्ञापनं मारणादिकं च तस्यार्थः। कथं 'विज्ञापना भर्तृषु सिद्धि-

त्रेति। अर्थनिर्देशस्योपलक्षणत्वादिति भावः। मारणेति। मारणे तोषणे निशामने च ज्ञाधातुर्वर्तत इत्यर्थः। अज्ञतस्य मारणे संपूर्वकस्यैव ज्ञाधातोः प्रयोगः। चाक्षुषज्ञानमिति। निपूर्वकात् शम आलोचने इत्यस्मात् चौरादिकण्यन्ताद् ल्युटि निशामनशब्दस्य निष्पत्तेरिति भावः। ज्ञापनमात्रमिति। उपसर्गवशादिह ज्ञापने वृत्तिः, चाक्षुषत्वं च ज्ञानस्य न विवक्षितमिति भावः। निशानेष्वितीति। 'मारणतोषणनिशानेषु ज्ञा' इति पाठान्तरमित्यर्थः। ननु ज्ञाधातोरस्मात्क्र्यादौ श्नि 'ज्ञाजनोर्जा' इति जादेशे जाति जात इत्यादि स्यादित्यत आह एष्वेवेति। ज्ञा अवबोधने इति श्नाविकरणस्यैव मारणादिष्वर्थेषु णौ मित्त्वार्थमिहानुवादात् श्नाविकरण एवायमिति भावः। जानातेः मित्त्वफलं तु णौ ह्रस्वः—पशुं संज्ञपयति, अज्ञतं मारयतीत्यर्थः। हरिं ज्ञपयति, संतोषयतीत्यर्थः। रूपं ज्ञपयति, माधवमते दर्शयतीत्यर्थः। मतान्तरे तु बोधयतीत्यर्थः। शरं ज्ञपयति तीक्ष्णीकरोतीत्यर्थः। ननु माधवमते बोधयतीत्यर्थे ज्ञपयतीति कथं मित्त्वम्, तन्मते चाक्षुषज्ञानस्यैव निशामनशब्दार्थत्वादित्यत आह ज्ञप मिच्चेति चुरादाविति। एवं च चौरादिकं ज्ञाधातुमादाय बोधनेऽप्यर्थे ज्ञपयतीति ह्रस्वः संगच्छत इति भावः। ननु चौरादिकस्यापि ज्ञपेर्मारणतोषणनिशामनेष्वेवार्थेषु मित्त्वमस्तु, तत्रार्थान्तरनिर्देशाभावात्। तथा च माधवमते कथं बोधनेऽर्थे मित्त्वमित्यत आह ज्ञापनं मारणादिकं च तस्यार्थ इति। ज्ञापनं मारणं तोषणं निशामनं च तस्य चौरादिकस्य ज्ञपधातोरर्थो माधवमते इत्यर्थः। कथमिति। ज्ञाधातोर्ज्ञपधातोश्च णौ

षादुभयोः प्रवृत्तिरप्यत्र युक्तैवेति भावः। मारणतोषण। निशामनमित्यस्य शम आलोचन इत्यस्मान्निष्पन्नत्वादाह चाक्षुषं ज्ञानमिति। एष्वर्थेष्विति। पशुं संज्ञपयति, मारयतीत्यर्थः। विष्णुं विज्ञपयति, संतोषयतीत्यर्थः। संज्ञपयति रूपम्, माधवमते दर्शयतीत्यर्थः। मतान्तरे तु बोधयतीत्यर्थः। प्रज्ञपयति शरम्, तीक्ष्णीकरोतीत्यर्थः। स्यादेतत्—निशामनं ज्ञापनमात्रमिति वदतां मते 'श्लाघह्नुङ्स्था–' इति सूत्रे ज्ञीप्स्यमानो बोधयितुमभिप्रेत इति वृत्तिग्रन्थः संगच्छतां नाम, माधवमते तु तद्ग्रन्थस्य का गतिरित्यत आह ज्ञपमिच्चेति। ज्ञापनमिति। एवं च वृत्तिग्रन्थो माधवमतेऽपि संगच्छत इति भावः। मारणादिकं चेति। एतच्च मतान्तराभिप्रायेणोक्तम्। चुरादिषु तु 'ज्ञप मिच्च, अयं ज्ञाने ज्ञापने च वर्तते' इति वक्ष्यमाणत्वात्।

मेति' इति 'तज्ज्ञापयत्याचार्यः' इति च। शृणु। माधवमते अचाक्षुषज्ञाने मित्त्वाभावात्। ज्ञापनमात्रे मित्त्वमिति मते तु ज्ञा नियोगे इति चौरादिकस्य, धातूनामनेकार्थत्वात्। निशानेष्वित्ति पठतां हरदत्तादीनां मते तु न काप्यनुपपत्तिः। कम्पने चलिः ८१२। चल कम्पने इति ज्वलादिः। चलयति शाखाम्। कम्पनादन्यत्र तु शीलं चालयति। अन्यथा करोतीत्यर्थः। हरतीत्यर्थ इति स्वामी। सूत्रं चालयति। क्षिपतीत्यर्थः। छदिर् ८१३ ऊर्जने। छद अपवारणे

मित्त्वाद्धस्वप्रसङ्गादिति भावः। **शृण्विति**। उत्तरमिति शेषः। **मित्त्वाभावादिति**। ह्रस्वो नेति शेषः। विज्ञापनेत्यत्र तज्ज्ञापयतीत्यत्र च अचाक्षुषमेवाऽऽत्मज्ञानं विवक्षितमिति भावः। ननु ज्ञापनमात्रे मित्त्वमिति मते विज्ञापनेत्यत्र तज्ज्ञापयतीत्यत्र च मित्त्वं दुर्वारमित्यत आह **ज्ञापनमात्र इति**। **चौरादिकस्येति**। विज्ञापनेति, ज्ञापयतीति च रूपमिति शेषः। 'नान्ये मितोऽहेतौ' इति निषेधान्न तस्य मित्त्वमिति भावः। ननु नियोगार्थस्य तस्य कथं ज्ञापने वृत्तिरित्यत आह **धातूनामिति**। **न कापीति**। विज्ञापनेत्यत्र ज्ञापयतीत्यत्र च ज्ञापनार्थवृत्तित्वाज्ज्ञापनस्य च मारणतोषणतीक्षणीकरणान्यत्वाच्च तस्मिन्नर्थे ज्ञाधातोर्मित्त्वप्रसक्तिरिति भावः। एवं च माधवमते बोधने ज्ञाधातोः ज्ञापयतीत्युपधादीर्घः, ज्ञपधातोस्तु ज्ञपयतीत्युपधाह्रस्व इति रूपद्वयमपि साध्विति स्थितम्। **कम्पने चलिरिति**। इका निर्देशोऽयम्। चलधातुः कम्पने मिदित्यर्थः। **ज्वलादिरिति**। तस्य चलेः कम्पने मित्त्वार्थोऽत्रानुवाद इति भावः। **शीलं चालयतीति**। अत्र कम्पनार्थत्वाभावान्न मित्त्वमिति भावः, तदाह **अन्यथा करोतीत्यर्थ इति**। धातूनामनेकार्थत्वादिति भावः। **छदिरूर्जने इति**। इका निर्देशोऽयम्। छदधातुरूर्जने मिदित्यर्थः। ऊर्जनं बलवत्करणं प्राणनं वा, ऊर्ज बलप्राणनयोरित्युक्तेः। अन्यत्र पठितस्यात्रार्थविशेषे णौ मित्त्वार्थोऽनुवाद इति सिद्धान्तः। छदधातुस्त्वयं चुराद्यन्तर्गणे युजादौ पठितः। तस्यात्रानुवादो व्यर्थः, 'नान्ये मितोऽहेतौ' इति ज्ञपादिपञ्चकव्यतिरिक्तस्य चुरादौ मित्त्वनिषेधादित्यत आह **छद अपवारण इति**। चुराद्यन्तर्गणयुजादिपठितस्य 'आ धृषाद्वा' इति स्वार्थिकणिजभावपक्षे ऊर्जनेऽर्थे मित्त्वार्थोऽनुवाद इत्यर्थः। हेतुमण्णिचि इत्यर्थः। स्वार्थिकणिचि सत्येव 'नान्ये मितः–' इति निषेधप्रवृत्तेरिति भावः। नन्वपवारणार्थकस्य छदेः कथमूर्जने वृत्ति-

---

कथमिति। ज्ञाधातोर्ज्ञपधातोश्च णौ मित्त्वाद् ह्रस्वेन भवितव्यमिति भावः। **मित्त्वाभावादिति**। एवं च बोधने ज्ञाधातोः ज्ञापयति, ज्ञपधातोस्तु ज्ञपयतीति रूपद्वयं माधवमते बोध्यम्। छदिरूर्जने। ऊर्ज बलप्राणनयोः। अत्र छदिर्मित्।

---

१ एतद् वाक्यं क्वचिन्नास्ति।

इति चौरादिकस्य स्वार्थे णिजभावे मित्त्वार्थोऽयमनुवादः। अनेकार्थत्वादूर्जेऽर्थे वृत्तिः। छदन्तं प्रयुङ्क्ते छदयति। बलवन्तं प्राणवन्तं वा करोतीत्यर्थः। अन्यत्र छादयति। अपवारयन्तं प्रयुङ्क्ते इत्यर्थः। स्वार्थे णिचि तु छादयति। बलीभवति प्राणीभवति अपवारयति वेत्यर्थः। जिह्वोन्मथने लडिः ८१४। 'लड विलासे' इति पठितस्य मित्त्वार्थोऽनुवादः। उन्मथनं क्षोभणम्। जिह्वा-शब्देन षष्ठीतत्पुरुषः। लडयति जिह्वाम्। तृतीयातत्पुरुषो वा। लडयति जिह्वया। अन्ये तु जिह्वाशब्देन तद्व्यापारो लक्ष्यते। समाहारद्वन्द्वोऽयम्। लडयति शत्रुम्। लडयति दधि। अन्यत्र लाडयति पुत्रम्। मदी ८१५ हर्षग्लेपनयोः। ग्लेपनं दैन्यम्। दैवादिकस्य मित्त्वार्थोऽयमनुवादः। मदयति। हर्षयति ग्लेपयति

रित्यत आह **अनेकार्थत्वादिति**। ननु स्वार्थणिजभावे सति मित्त्वं किमर्थमित्यत आह **छदन्तं प्रयुङ्क्ते छदयतीति**। अत्र हेतुमण्णिचि ह्रस्वः। 'नान्ये मितः–' इति निषेधस्तु हेतुमण्णिचि नेति भावः। **अन्यत्रेति**। ऊर्जनादन्यत्र अपवारणे इत्यर्थः। **स्वार्थे णिचि त्विति**। 'नान्ये मितः–' इति निषेधस्य तत्र प्रवृत्तेरिति भावः। **जिह्वोन्मथने लडिरिति**। इका निर्देशोऽयम्। लडधातुर्जिह्वोन्मथने मिदित्यर्थः। **लडेति**। 'लड विलासे' इति टवर्गान्तेषु भ्वादौ पठितस्य जिह्वोन्मथ-नेऽर्थे मित्त्वार्थोऽनुवाद इत्यर्थः। एवं च धातुभेदाभावात् सर्वथैव मित्त्वकार्यं भवति। गणभेदाद्धातुभेदे मित्त्वतदभावयोर्विकल्पः स्यादिति भावः। **लडयति जिह्वामिति**। रसना रसान् ज्ञापयतीत्यर्थः। 'गतिबुद्धि–' इति द्विकर्मकोऽयम्। **लडयति जिह्व-येति**। देवदत्तो रसान् जानाति तज्जिह्वया ज्ञापयतीत्यर्थः। **तद्व्यापार इति**। शब्दप्रयोगादिजिह्वाव्यापार इत्यर्थः। **समाहारेति**। जिह्वा च उन्मथनं चेति समाहारद्वन्द्वः। जिह्वाव्यापारे उदाहरति **लडयति शत्रुमिति**। गेहेशूर इत्यादि-शब्दप्रयोगेण गर्हत इत्यर्थः। उन्मथनं लोडनम् इत्यभिप्रेत्योदाहरति **लडयति दधीति**। विलोडयतीत्यर्थः। **अन्यत्रेति**। जिह्वोन्मथनादन्यत्रेत्यर्थः। **लाड-यति पुत्रमिति**। क्रीडयतीत्यर्थः। **ग्लेपनं दैन्यमिति**। दीनीभवनमित्यर्थः।

चुराद्यन्तर्गणो यौजादिकः स्वार्थे। **णिजभाव इति**। 'आधृषाद्वा' इति वैकल्पिकत्वा-दिति भावः। **लडयति जिह्वामिति**। जिह्वां ज्ञापयतीत्यर्थः। **जिह्वयेति**। जिह्वया पदार्थान्तरं ज्ञापयतीत्यर्थः। जिह्वाव्यापारे उदाहरणमाह **लडयति शत्रु-मिति**। शत्रुमुद्दिश्य गालनादि करोतीत्यर्थः। **लडयति दधीति**। उन्मथ्नाति। विलोडयतीत्यर्थः। केचित्तु जिह्वाव्यापारे लडयति दधि, उन्मथने तु लडयति शत्रुमिति व्यत्यासेन योजयन्ति। **लाडयति पुत्रमिति**। शर्करादिदानेनानुकूलयतीत्यर्थः।

वेत्यर्थः। अन्यत्र मादयति। चित्तविकारमुत्पादयतीत्यर्थः। ध्वन ८१६ शब्दे। भाव्ययं मित्त्वार्थमनूद्यते। ध्वनयति घण्टाम्। अन्यत्र ध्वानयति। अस्पष्टाक्षरमुच्चारयतीत्यर्थः। अत्र भोजः 'दलिवलिस्खलिरणिध्वनित्रपिक्षपयश्च' इति पपाठ। तत्र ध्वनिरणी उदाहृतौ। दल विशरणे, वल संवरणे, स्खल संचलने, त्रपूष् लज्जायाम् इति गताः। तेषां णौ दलयति, वलयति, स्खलयति, त्रपयति। क्षै क्षये इति वक्ष्यमाणस्य कृतात्वस्य पुका निर्देशः। क्षपयति। स्वन ८१७ अवतंसने। शब्दे इति पठिष्यमाणस्यानुवादः। स्वनयति। अन्यत्र स्वानयति। 'घटादयो मितः' (ग सू १८७)। मित्संज्ञका इत्यर्थः। 'जनीजॄष्क्नसुरञ्जोऽ-

---

ननु लडादौ शपि मदतीत्यादि स्यादित्यत आह **दैवादिकस्येति**। तथा च श्यन्विकरण एवायमिति भावः। **ध्वन शब्द इति**। पूर्वमनुनासिकान्तेषु अणरणे-त्यत्र ध्वणधातुर्मूर्धन्यान्तः पठितः। अयं तु दन्त्यान्त इति भेदः। **भावीति**। ज्वलादौ 'ध्वन शब्दे' इति पठिष्यमाण एवात्र ध्वन्यात्मके अनुच्चारणजन्ये शब्दने मित्त्वार्थमनूद्यते इत्यर्थः। धातुभेदे तु मित्त्वतदभावौ स्यातामिति भावः। **ध्वनयति घण्टामिति**। शब्दायमानां करोतीत्यर्थः। **अन्यत्रेति**। अस्पष्टोच्चारणात्मके शब्दने इत्यर्थः। **अत्रेति**। घटादावित्यर्थः। **तत्रेति**। दलिवल्यादिष्वित्यर्थः। **उदाहृताविति**। घटादाविति शेषः। तत्र ध्वनिरनुपदमेवोदाहृतः। रणिस्तु कण रण गतावित्यत्रेति बोध्यम्। भोजमते प्रागनयोः पाठो नेति न पौनरुक्त्यम्। **गता इति**। भ्वादौ पठिता इत्यर्थः। इह मित्त्वार्थमनूद्यन्त इति शेषः। धात्वन्तरत्वे तु मित्त्वतदभावौ स्यातामिति भावः। ननु क्षपेरत्र पाठान्मित्त्वे णौ ह्रस्वे क्षपयतीति वक्ष्यति। अस्त्वेवम्। तथापि क्षै क्षये इति भ्वादौ पठिष्यमाणस्य णौ आत्वे पुकि क्षापयतीत्यपि स्यात्, क्षैधातोः क्षपीत्यनुवादासंभवात्, तत्राह **क्षै इत्यादि**। णौ आत्वे पुकि मित्त्वाद् ह्रस्वे सति क्षपीति क्षै इत्यस्यानुवादसंभव इति भावः। **स्वन अवतंसन इति**। अवतंसनम् अलंकृतिः। **पठिष्यमाणस्येति**। घटादि-गणादूर्ध्वं स्वन शब्दे इति पठिष्यमाणस्य स्वनेरवतंसनेऽर्थे णौ मित्त्वार्थोऽत्रानुवाद इत्यर्थः। धात्वन्तरत्वे तु मित्त्वतदभावौ स्यातामिति भावः। **स्वनयतीति**। भूष-यतीत्यर्थः। **अन्यत्रेति**। अवतंसनादन्यत्र शब्देऽर्थे णौ मित्त्वाभावान्न ह्रस्व इति भावः। **घटादयो मित इति**। गणसूत्रम्। ननु घटादिषु मकारानुबन्धादर्शनात्

ध्वनिरणी उदाहृताविति। ध्वनिरव्यवधानेनोदाहृतः, रणिस्तु कण रण गता-वित्यत्रेत्यर्थः। **स्वन** अवतंसने। अवतंसनं भूषणम्। **स्वनयतीति**। भूषयतीत्यर्थः। अस्वनीत्, अस्वानीत्। अस्वनि, अस्वानि। स्वनंस्वनम्, स्वानंस्वानम्। घटा-

मन्ताश्च' (ग सू १८८) । मित इत्यनुवर्तते । जॄष् इति षित्वनिर्देशाज्जीर्यते-र्ग्रहणम् । जॄणातेस्तु जारयति । केचित्तु 'जनीजॄष्क्नसु-' इति पठित्वा क्नसु निरसने इति दैवादिकमुदाहरन्ति । 'ज्वलह्वलह्मलनमामनुपसर्गाद्वा' (ग.सू.१८९) एषां मित्त्वं वा । प्राप्तविभाषेयम् । ज्वलयति, ज्वालयति । उपसृष्टे तु नित्यं मित्त्वम् । प्रज्वलयति । कथं तर्हि प्रज्वालयति उन्नामयतीति । घञ-न्तात् 'तत्करोति-' इति णौ । कथं संक्रामयतीति । 'मितां ह्रस्वः' (सू २२६८)

कथं मितस्ते स्युरित्यत आह । **मित्संज्ञका इति** । मिदर्थभाज इत्यर्थः । **जनीजॄषिति** । गणसूत्रम् । जनी जॄष् क्नसु रञ्ज् एषां द्वन्द्वात्प्रथमाबहुवचनम् । अम् अन्ते येषां ते अमन्ताः, कमिगम्यादयः । एते अघटादित्वेऽपि मित इत्यर्थः । **जीर्यतेरिति** । 'जॄष् वयोहानौ' इति श्यन्विकरणस्येत्यर्थः । **जॄणातेस्त्विति** । जॄ वयोहानौ इति श्नाविकरणस्य षित्वाभावेनात्र ग्रहणाभावान्न मित्त्वमिति भावः । **उदाहरन्तीति** । तन्मते जॄणातेरपि मित्त्वमिति भावः । **ज्वलह्वल** । इत्यपि गणसूत्रम् । **प्राप्तविभाषेयमिति** । ज्वलह्वलह्मलां घटादित्वान्नमेर्मन्तत्वाच्च मित्त्वस्य प्राप्तेरिति भावः । **उपसृष्टे त्विति** । सोपसर्गे त्वित्यर्थः । **कथं तर्हीति** । अनुपसर्गा-दिति विशेषणे सति ज्वलेर्नमेश्च णौ मित्त्वविकल्पाभावाज्जनीजॄषिति मित्त्वाद् ह्रस्वो नित्यः स्यादित्याक्षेपः । समाधत्ते **घञन्तादिति** । तत्करोतीति णाविष्ठवदित्यनन्तरं समाधेयमिति शेषः । प्रज्वलनं प्रज्वालः । उन्नमनम् उन्नामः । भावे घञ् । उपधा-वृद्धिः । प्रज्वालं करोतीति उन्नामं करोतीति चार्थे 'तत्करोति तदाचष्टे' इति णिचि 'णाविष्ठवत्' इति इष्ठवत्त्वात् टिलोपे सति तस्य स्थानिवत्त्वाद् मित्त्वप्रयुक्तह्रस्वाभावे प्रज्वालि उन्नामि इत्याभ्यां लटि तिपि शपि गुणे अयादेशे प्रज्वालयति उन्नामयतीति रूपे इति भावः । ननु संपूर्वात् क्रमेर्णौ संक्रामयतीति रूपमिष्यते । तत्र अमन्तत्वेन

दयो मितः । **मित्संज्ञा इत्यर्थ इति** । अन्ये तु मकारानुबन्धा इति व्याचक्षते । घट चेष्टायामिति प्रत्येकं पाठे गौरवादेकत्रैव सर्वेषां मित्संज्ञा मकारानुबन्धकत्वं वाऽनेन सूत्रेण विधीयत इति भावः । **जनीजॄष्** । जनीप्रादुर्भावे, जॄष् वयोहानौ, क्नसु ह्वरणदीप्त्योः, त्रयोऽपि दिवादयः । रञ्ज रागे, दैवादिको भौवादिकश्च । अमन्ताः कमिगमीत्यादयः । जनयति । जरयति । क्नसयति । रजयति मृगान् । रञ्जयति पक्षिणः । क्रमयति । गमयति । रमयति । **ज्वलह्वल । एषां मित्त्वं वेति** । मित इत्यनु-वृत्तस्येह भावप्रधानता । अनुपसर्गादिति तु षष्ठ्यर्थेयं पञ्चमीत्येवं क्लेशेन व्याख्येयमिति भावः । 'नमोऽनुपसर्गाद्वा' इति पाठान्तरम्, तत्र न कश्चित्क्लेशः । **प्राप्तविभाषेति** । ज्वल दीप्तौ, ह्वल ह्मल चलने इति त्रयाणां पूर्वपठितत्वान्नमेरत्वमन्तत्वादिति भावः ।

इति सूत्रे 'वा चित्तविरागे' (सू २६०५) इत्यतो वा इत्यनुवर्त्य व्यवस्थितविभाषाश्रयणादिति वृत्तिकृत्। एतेन 'रजो विश्रामयन् राज्ञाम्' 'धुर्यान्विश्रामयेति सः' इत्यादि व्याख्यातम्। 'ग्लास्नावनुवमां च' (ग सू १९०)। अनुपसर्गादेषां मित्वं वा स्यात्। आद्ययोरप्राप्ते इतरयोः प्राप्ते विभाषा। 'न कम्यमिचमाम्' (ग सू १९१)। अमन्तत्वात्प्राप्तं मित्वमेषां न स्यात्। कामयते। आमयति। चामयति। शमो दर्शने (ग सू १९२)। शाम्यतिर्दर्शने मिन्न स्यात्। निशामयति रूपम्। अन्यत्र तु 'प्रणयिनो निशमय्य वधूः कथाः'। कथं तर्हि 'निशामय तदुत्पत्तिं विस्तराद्गदतो मम' इति। शम आलोचने इति

मित्वाद् ह्रस्वप्रसङ्गः। नच क्रमणं क्राम इति घञन्तात् 'तत्करोति-' इति णावुक्तरीत्या ह्रस्वाभाव इति समाधानं संभवति, क्रमेर्घञि हि 'नोदात्तोपदेशस्य-' इति वृद्धिप्रतिषेधे सति क्रम इत्येव भवति, नतु क्राम इति कृत्वा उक्तसमाधानासंभवादित्यभिप्रेत्याक्षिपति **कथमिति**। समाधत्ते **मितामिति**। 'मितां ह्रस्वः' इति सूत्रे वेत्यनुवर्त्य मित्त्वाभावे संक्रामयतीति रूपमित्यन्वयः। ननु कदाचिद् ह्रस्वो दुर्वार इत्यत आह **व्यवस्थितेति**। तथा चात्र ह्रस्वाभाव एवाश्रीयत इति भावः। **वृत्तिकृदिति**। भाष्ये तु नैतद् इति भावः। **एतेनेति**। व्यवस्थितविभाषाश्रयणेनेत्यर्थः। 'ग्लास्नावनुवमां च' इत्यपि गणसूत्रम्। प्रथमार्थे षष्ठी। अनुपसर्गादिति मित इति वेति चानुवर्तते, फलितमाह **अनुपसर्गादिति**। **आद्ययोरिति**। ग्लास्ना इत्यनयोर्घटादित्वादप्राप्ते मित्त्वे इतरयोर्वनुवमोः प्राप्ते मित्त्वे विभाषेत्यर्थः। तत्र वनेः 'वनु च नोच्यते' इति घटादौ पाठाद्वमेस्त्वमन्तत्वान्मित्वप्राप्तिरिति बोध्यम्। 'न कम्यमिचमाम्' इति 'शमो दर्शने' इति च गणसूत्रम्। दर्शनं चाक्षुषज्ञानम्। 'शम उपशमे' इति दैवादिक श्यन्विकरण एवात्र गृह्यते, नतु 'शम आलोचने' इति चौरादिकः, 'नान्ये मितोऽहेतौ' इति तस्य मित्वनिषेधात्, तदाह **शाम्यतिरिति**। **निशामयति रूपमिति**। पश्यतीत्यर्थः। उपशमार्थकस्यापि अनेकार्थकत्वाद् दर्शने वृत्तिः। **अन्यत्रेति**। दर्शनादन्यत्रेत्यर्थः। **निशमय्येति**। श्रावयित्वे-

कथं संक्रामयतीति। क्रमेः 'नोदात्तोपदेशस्य-' इति वृद्धिप्रतिषेधाद् घञि क्रम इत्येव भवति न तु क्राम इति पूर्वोक्तसमाधानस्यात्रासंभवात्पृथक् प्रश्नः। **व्यवस्थितविभाषेत्यादि**। क्वचिद् णौ मितां ह्रस्वो न प्रवर्तत इति भावः। **वृत्तिकृदिति**। केचित्तु घञन्तात्क्रमशब्दात्प्रज्ञाद्यणि कामशब्दं स्वीकृत्य तस्मात् 'तत्करोति' इति णौ संकामयतीति समादधत इति भावः। **इतरयोः प्राप्त इति**। वनेः पूर्वं पाठाद्वमेरमन्तत्वाच्चेति भावः। ग्लापयति, ग्लपयति। स्नापयति, स्नपयति। वानयति,

चौरादिकस्य । धातूनामनेकार्थत्वाच्छ्रवणे वृत्तिः, शाम्यतिवत् । यमो ८१६ अपरिवेषणे (ग सू १६२) । यच्छतिर्भोजनतोऽन्यत्र मित्स्यात् । आयामयति । द्राघयति व्यापारयति वेत्यर्थः । परिवेषणे तु यमयति ब्राह्मणान् । भोजयतीत्यर्थः । 'पर्यवसितं नियमयन्' इत्यादि तु नियमवच्छब्दात्तत्करोतीति

त्यर्थः । शमेर्ण्यन्तात् क्त्वो ल्यपि कृते 'ल्यपि लघुपूर्वात्' इति णेरयादेशः । **कथमिति । तर्हि ।** दर्शनार्थकस्यैव शमेर्मित्त्वनिषेधे सति 'शृणु' इत्यर्थे मित्वाद्ध्रस्वप्रसङ्गान्निशामयेति कथमित्याक्षेपः । समाधत्ते **शम आलोचन इति चौरादिकस्येति ।** निशामयेति रूपमिति शेषः । 'नान्ये मितोऽहेतौ' इति तस्य मित्त्वनिषेधाद् न ह्रस्व इति भावः । ननु चौरादिकस्य शमेरालोचनार्थकत्वात् कथं श्रवणे वृत्तिरित्यत आह **धातूनामिति । शाम्यतिवदिति ।** श्यन्विकरणस्य शमेरुपशमार्थकस्य यथा दर्शने वृत्तिस्तद्वदित्यर्थः । 'यमोऽपरिवेषणे' इत्यपि गणसूत्रम् । भोजनपात्रे ओदनापूपादिभोज्यद्रव्याणां स्थापनं परिवेषणम् , तदाह **भोजनतोऽन्यत्रेति ।** भुक्त्यनुकूलपरिवेषणादन्यत्रेत्यर्थः । 'यम उपरमे' इत्यस्य उपसर्गवशात् परिवेषणे ततोऽन्यस्मिन्नप्यर्थे वृत्तिः संभवति । तत्र अपरिवेषणे वृत्तौ मित्त्वं नेत्यर्थः । **आयामयतीति ।** अत्रापरिवेषणे वृत्तेर्न मित्त्वमिति भावः, तदाह **द्राघयतीति । व्यापारयतीति ।** प्रवर्तयतीत्यर्थः । **यमयति ब्राह्मणानिति ।** परिवेषणार्थकत्वान्मित्त्वमिति भावः तदाह **भोजयतीति ।** भुञ्जते ब्राह्मणाः, तान्परिवेषणेन प्रवर्तयतीत्यर्थः । ननु पर्यवसितं नियमयन्नित्यत्र अपरिवेषणार्थकतया मित्त्वाभावात्कथं ह्रस्व इत्यत आह **पर्यवसितमित्यादि ।** नियमनं नियमः । 'यमः समुपनिविषु च' इति भावे अप्प्रत्ययः, तस्मान्मतुप् । नियमवच्छब्दात्तत्करोतीति णिचि 'विन्मतोर्लुक्' इति मतुपो लुकि ण्यन्ताल्लटश्शतरि गुणायादेशयोर्नियमयच्छब्द इति भावः । वस्तुतस्तु मतुपो लुकि टिलोपस्याप्राप्त्या 'अचो ञ्णिति' इति वृद्धौ पुगागमापत्तिः । ततश्च नियमवदित्यर्थकाद् अर्शआद्यजन्ताद् नियमशब्दात् 'तत्करोति' इति णिचि इष्ठवत्त्वाट्टिलोपे तस्य स्थानिवत्त्वादुपधावृद्ध्यभावे नियमयन्निति समर्थनीयमिति शब्देन्दुशेखरे स्थितम् ।

वनयति । वामयति, वमयति । **शाम्यतिवदिति ।** यथा शाम्यतेर्निशामयतीत्यादौ दर्शने प्रयुज्यते तथा चुरादिः शमधातुरपि श्रवणे भविष्यतीत्यर्थः । **यमोऽपरिवेषणे । यच्छतिरिति ।** यम उपरमे इत्ययं धातुर्भोजनातोऽन्यत्र । भोजनाशब्दो 'ण्यासश्रन्थो युच्' इति युजन्तो ज्ञेयः । परिवेषणमिह भोजनानुकूलव्यापारस्ततोऽन्यस्मिन्नर्थे मिन्निषेधः । **नियमयन्निति ।** नियमवच्छब्दाण्णिचि विन्मतोर्लुकि

णौ बोध्यम्। स्खदिर् ८२० अवपरिभ्यां च (ग सू १६४) मित्स्येव। अवस्खादयति। परिस्खादयति। अपावपरिभ्य इति न्यासकारः। स्वामी तु 'न कमि–' इति नञमुत्तरत्रिसूत्र्यामननुवर्त्य शमः अदर्शने इति चिच्छेद। यमस्तु अपरिवेषणे मित्त्वमाह। तन्मते 'पर्यवसितं नियमयन्' इत्यादि सम्यगेव। उपसृष्टस्य स्खदेश्चेदवादिपूर्वस्य इति नियमात्प्रस्खादयतीत्याह। तस्मात्सूत्रद्वये उदाहरणप्रत्युदाहरणयोर्व्यत्यासः फलितः। इदं च मतं वृत्तिन्यासादिविरोधादुपेक्ष्यम्। फण ८२१ गतौ। न इति निवृत्तमसंभवात्। निषेधा-

---

'स्खदिरवपरिभ्यां च' इत्यपि गणसूत्रम्। स्खदिरिति इका निर्देशः। अव परि आभ्यां परः स्खदधातुर्मिन्नित्यर्थः। 'स्खद स्खदने' इति घटादौ पाठान्मित्त्वप्राप्तिः। **परिस्खादयतीति**। अषोपदेशत्वेन आदेशसकारत्वाभावान्न ष इति भावः। **अपावेति**। 'स्खदिरपावपरिभ्यः' इति न्यासकारः पपाठेत्यर्थः। तन्मते अपस्खादयतीत्यत्रापि मित्त्वाभावान्न ह्रस्वः। **स्वामी त्विति**। 'न कम्यमिचमाम्' इत्यत्र श्रुतो नञ् 'शमो दर्शने' 'यमोऽपरिवेषणे' 'स्खदिरवपरिभ्यां च' इति त्रिषु सूत्रेषु नानुवर्तते। शमः अदर्शने इति च्छेदः। शमधातुः अदर्शने मित्स्यादित्यर्थः। अमन्तत्वादेव सिद्धे नियमार्थमिदम्। अदर्शन एव शमधातुर्मित्स्यात्, नतु दर्शने इति स्वामिमतम्। इदं च पर्यवसानगत्या पूर्वमतान्नातिरिच्यते। **यमस्त्विति**। यमधातोस्तु अपरिवेषण एव मित्त्वमाहेत्यर्थः। अमन्तत्वादेव सिद्धेरपरिवेषण एव यमधातुर्मित् नतु परिवेषण इति फलति। एवं च द्राघयति व्यापारयति वेत्यर्थे मित्त्वाद् ह्रस्वे आयमयतीत्येव रूपम्। परिवेषणे तु मित्त्वाभावाद् ह्रस्वाभावे यामयति ब्राह्मणानिति भवतीति पूर्वमताद्विपरीतं फलति। एवं च पर्यवसितं नियमयन्नित्यत्र यमेरपरिवेषणार्थत्वान्मित्त्वे ह्रस्वो निर्बाधः, तदाह **तन्मत इति**। स्खदेर्घटादित्वादेव मित्त्वसिद्धेः 'स्खदिरवपरिभ्यां च' इति सूत्रमपि नियमार्थम्। सोपसर्गस्य चेत् स्खदेर्मित्त्वं तर्हि अवपरिभ्यां परस्यैव मित्त्वं न तूपसर्गान्तरादिति। एवं च प्रस्खादयतीत्यत्र मित्त्वाभावान्न ह्रस्वः। अवस्खदयति परिस्खदयति इत्यत्र तु मित्त्वाद्ध्रस्व इति फलति, तदाह **उपसृष्टस्येति**। सोपसर्गस्येत्यर्थः। पूर्वमते तु अवपरिभ्यां परस्य मित्त्वनिषेधादवस्खादयति परिस्खादयतीति न ह्रस्वः। प्रस्खदयतीत्यत्र तु अवपरिपूर्वकत्वाभावेन मित्त्वनिषेधाभावाद्ध्रस्व इति विपरीतम्। **तस्मादिति**। 'यमोऽपरिवेषणे' 'स्खदिरवपरिभ्यां च' इति सूत्रद्वये उक्तरीत्या मित्त्वनियम-

---

शतरि शप्प्रत्यये गुणे च ज्ञेयम्। **व्यत्यासः फलित इति**। स्वामिमते त्वपरिवेषणे आयमयति। परिवेषणे तु यामयति ब्राह्मणान्। अवादिपूर्वस्य स्खदेरवस्खदयति।

त्पूर्वमसौ न पठितः। फणादिकार्यानुरोधात्। २३५४ फणां च सप्तानाम्। (६-४-१२५) एषां वा एत्वाभ्यासलोपौ स्तः किति लिटि सेटि थलि च। फेणतुः फेणुः। पफणतुः पफणुः। फेणिथ, पफणिथ। फणयति। वृत्। घटादिः समाप्तः। फणेः प्रागेव वृदित्येके। तन्मते फाणयतीत्येव। राजृ ८२२ दीप्तौ।

विध्याश्रयणादुदाहरणप्रत्युदाहरणयोरुक्तरीत्या व्यत्यासः फलित इत्यर्थः। **उपेक्ष्यमिति।** 'न पादम्याङ्–' इति सूत्रव्याख्यावसरे 'यमोऽपरिवेषणे' इति मित्त्वं प्रतिषिध्यत इति वृत्तिन्यासयोरुक्तत्वादिति भावः। केचित्तु स्वामिमते पर्यवसितं नियमयन्तित्या-दिसामञ्जस्यात्तावेवोपेक्ष्यावित्याहुः। **फण गताविति।** ननु घटादित्वेऽपि नायं मित्, इतः प्राक् 'स्वन अवतंसने' इत्युत्तरमेव घटादयो मित इत्युक्तेः। अतः कथ-मत्र निषेधः? तत्राह **न इति निवृत्तमसंभवादिति।** प्राप्तिं विना मित्त्वस्य निषेधासंभवादिह नेति नानुवर्तते, किंतु मिदित्येवानुवर्तत इत्यर्थः। ननु फण गता-वित्यत्र मिन्नेति यदि नानुवर्तते तर्हि 'न कम्यमिचमाम्' इति निषेधकाण्डात् प्रागेवायं कुतो न पठितः? तत्राह **निषेधात्पूर्वमसौ न पठित इति।** कुत इत्यत आह **फणादिकार्यानुरोधादिति।** निषेधकाण्डात्प्रागेव फणेः पाठे कम्यमिचमादीनामपि फणादिष्वन्तर्भावः स्यादिति भावः। **फणां च।** 'अत एकहल्मध्ये–' इत्यतो लिटीति 'थलि च सेटि' इति चानुवर्तते। 'घ्वसोः–' इत्यतः एदिति, 'गमहन–' इत्यतः कितीति, 'वा जॄभ्रमुत्रसाम्' इत्यतो वेति च, तदाह **एषामिति।** फणादीनामित्यर्थः। फणामिति बहुवचनात् तदादिलाभः। 'फण गतौ' इत्यत्र मिदित्येवानुवर्तते, नेति तु नानुवर्तत इत्यस्य प्रयोजनमाह **फणयतीति।** **वृदिति।** कर्तरि क्विबन्तम्। वृतुधातुरिह समाप्त्यर्थकः, तदाह **घटादिः समाप्त इति।** **फणेः प्रागेवेति।** एवं सति फणेरघटादित्वान्न मित्त्वमिति भावः, तदाह **तन्मते फाणयतीत्येवेति।** इति घटादयः। **राजृ दीप्ता-विति।** इत आरभ्य षण्णामेत्वाभ्यासलोपौ फणादित्वात्पक्षे भवतः, तदाह

परिस्खदयति। अपूर्वस्य तु प्रस्खादयतीत्येवं व्यत्यासो ज्ञेयः। **उपेक्ष्यमिति।** 'न पादम्याङ्–' इति सूत्रे आयामयत इत्युदाहृत्य वृत्तावुक्तं यमोऽपरिवेषण इत्यनेन मित्त्वं प्रतिषिध्यत इति न्यासेऽपि तत्र 'न कम्यमि–' इत्यतो नेत्यनुवर्तत इत्युक्तम्। एवं हि निषेधानन्तरं पाठ उपपद्यते। अन्यथा 'न कमि–' इत्यतः प्रागेव त्रिसूत्रीं पठेतेदिति भावः। फण गतौ। फणति। लुङि। अफाणीत्, अफणीत्। णौ तु 'चिण्णमुलोः–' इति वा दीर्घः। अफाणि, अफणि। फणंफणम्, फाणंफाणम्। **असंभवादिति।** मित्त्वप्राप्तिं विना निषेधासंभवादिह नेत्येतन्न संबध्यते किंतु मित्संज्ञैव, तदेतदाह

स्वरितेत्। राजति, राजते। रेजतुः, रराजतुः। रेजे, रराजे। 'अतः' इत्यनुवृत्तावपि विधानसामर्थ्यादात एत्वम्। टु भ्राजृ ८२३ टु भ्राशृ ८२४ टु भ्लाशृ ८२५ दीप्तौ। अनुदात्तेतः। भ्राजतेरिह पाठः फणादिकार्यार्थः। पूर्वं पाठस्तु व्रश्चादिषत्वाभावार्थः। तत्र हि राजिसाहचर्यात्फणादेरेव ग्रहणम्। भ्रेजे, बभ्राजे। 'वा भ्राश-' (सू २३२१) इति श्यन् वा। भ्राश्यते, भ्राशते। भ्रेशे, बभ्राशे। भ्लाशते, भ्लाश्यते। भ्लेशे, बभ्लाशे। द्वावपीमौ तालव्यान्तौ। स्यमु ८२६ स्वन ८२७ ध्वन ८२८ शब्दे। स्यमादयः त्वरत्यन्ताः परस्मैपदिनः। स्येमतुः, सस्यमतुः। अस्यमीत्। स्वेनतुः, सस्वनतुः। अस्वनीत्, अस्वानीत्। विष्वणति। अवष्वणति। सशब्दं भुङ्क्ते इत्यर्थः। 'वेश्च स्वनः-' (सू २२७४) इति षत्वम्। फणादयो गताः। दध्वनतुः। षम ८२९ ष्टम ८३० अवैकल्ये। ससाम। तस्ताम। ज्वल ८३१ दीप्तौ। 'अतो ल्रान्तस्य' (सू २३३०)। अज्वालीत्।

रेजतुरित्यादि। ननु 'फणां च सप्तानाम्' इत्यत्र अत इत्यनुवृत्तेः कथमिह एत्वाभ्यासलोपावित्यत आह **अत इत्यनुवृत्तावपीति**। अत इति नानुवर्तते। तदनुवृत्तावपि फणादिसप्तानामपि वचनसामर्थ्याद् राजृधातोराकारस्याप्येत्वाभ्यासलोपस्य विकल्पः स्यादेवेत्यर्थः। अत इति राजादिधातौ न संबध्यते, असंभवादिति यावत्। **टु भ्राजृ टु भ्राशृ टु भ्लाशृ दीप्ताविति**। टुरित् 'ट्वितोऽथुच्' इत्येतदर्थः। **अनुदात्तेत इति**। एते त्रय इति शेषः। ननु पूर्वं चवर्गान्तेष्वनुदात्तेत्सु भ्राजतेः पाठात् पुनरपि तस्येह पाठः किमर्थ इत्यत आह **भ्राजतेरिति**। तर्हि 'एजृ भ्रेजृ भ्राजृ दीप्तौ' इति भ्राजेः पूर्वं पाठो व्यर्थ इत्यत आह **पूर्वं पाठस्त्विति**। **षत्वाभावार्थ इति**। 'व्रश्चभ्रस्ज-' इति षत्वविधौ भ्राजेर्ग्रहणाभावार्थ इत्यर्थः। ननु पूर्वं पठितस्यापि षत्वविधौ कुतो न ग्रहणमित्यत आह **तत्र हीति**। षत्वविधौ हीत्यर्थः। एत्त्वाभ्यासलोपयोः पाक्षिकत्वादाह **भ्रेजे बभ्राजे इति**। **द्वावपीमाविति**। द्वितीयतृतीयावित्यर्थः। ननु विष्वणतीत्यत्र कथं षत्वम्? केवलदन्त्याजन्तसादित्वाभावेन अषोपदेशतया आदेशसकारत्वाभावात्। अवष्वणतीत्यत्र इण्कवर्गाभ्यां परत्वाभावान्न षत्वस्य प्रसक्तिः, 'सात्पदाद्योः' इति निषेधाच्चेत्यत आह **वेश्च स्वन इतीति**। तत्र चकारेण अवाच्चेत्यपि लभ्यत इति भावः। **फणादयो गता इति**। ध्वनतेः प्रागिति शेषः। ततश्च ध्वनेर्न फणादिकार्यमिति भावः,

---

फणयति। **वृत्**। **सामर्थ्यादिति**। फणादिषु पाठसामर्थ्यादित्यर्थः। **तत्र हीति**। षत्वविधौ हीत्यर्थः। तथा च विभ्राट्। विभ्राड्भ्याम्। पूर्वं पठितस्य तु विभ्राक् विभ्राग्भ्यामित्यादि सिध्यतीति भावः। **अस्यमीदिति**। मान्तत्वान्न वृद्धिः।

चल ८३२ कम्पने। जल ८३३ घातने। घातनं तैक्ष्ण्यम्। टल ८३४ ट्वल ८३५ वैक्लव्ये। ष्ठल ८३६ स्थाने। हल ८३७ विलेखने। णल ८३८ गन्धे। बन्धने इत्येके। पल ८३९ गतौ। पलति। बल ८४० प्राणने धान्यावरोधने च। बलति। बेलतुः बेलुः। पुल ८४१ महत्त्वे। पोलति। कुल ८४२ संस्त्याने बन्धुषु च। संस्त्यानं संघातः। बन्धुशब्देन तद्व्यापारो गृह्यते। कोलति। चुकोल। शल ८४३ हुल ८४४ पत्लृ ८४५ गतौ। शशाल। जुहोल। पपात पेततुः। पतिता। २३५५ पतः पुम्। (७-४-१९) अङि परे। अपप्तत्। 'नेर्गद–' (सू २२८५) इति णत्वम्। प्रण्यपप्तत्। क्वथे ८४६ निष्पाके। क्वथति। चक्वाथ। अक्वथीत्। पथे ८४७ गतौ। अपथीत्। मथे ८४८ विलोडने। मेथतुः। अमथीत्। टु वम् ८४९ उद्गिरणे। इहैव निपातनाद् अतः

तदाह दध्वनतुरिति। षम ष्टमेति। षोपदेशौ। तस्तामेति। सत्वे सति ष्टुत्वनिवृत्तिरिति। तैक्ष्ण्यमिति। तीक्ष्णीभवनमित्यर्थः। टल ट्वल वैक्लव्य इति। वैक्लव्यं भयादिजनितो व्यग्रीभावः। णल गन्ध इति। णोपदेशोऽयम्। गन्धो गन्धक्रिया। तद्व्यापार इति। बन्धुतानुकूलो विवाहादिव्यापार इत्यर्थः। पत्लृधातुस्तवर्गप्रथमान्तः सेट्कः। लुङि लृदित्वात् च्लेरङि कृते अपत् अ त् इति स्थिते पतः पुम्। शेषपूरणेन सूत्रं व्याचष्टे अङि पर इति। 'ऋदृशोऽङि–' इत्यतः तदनुवृत्तेरिति भावः। पतेः पुम् स्यादङि परे इति फलितम्। पुमि मकार इत्, उकार उच्चारणार्थः, मित्त्वादन्त्यादचः परः, तदाह अपप्तदिति। क्वथे निष्पाक इति। जलक्षीरघृतादीनां पादभागादिशोषणपर्यन्तः पाको निष्पाकः। अक्वथीदिति। एदित्त्वान्न वृद्धिः। एवम् अमथीत्। टु वम् उद्गिरण इति। टुरित्। नायमुदित्। तेन 'उदितो वा' इति क्त्वायामिड्विकल्पो न। 'गॄ निगरणे' इति दीर्घान्तोऽयम्। नन्वस्माद्धातोर्ल्युटि 'ॠत इद्धातोः' इति इत्त्वं बाधित्वा परत्वात् 'सार्वधातुक–' इति गुणे सति उद्गरण इत्येव निर्देशो युज्यत इत्यत आह

अथ ज्वलादिः। अज्वालीदिति। 'अतो ल्रान्तस्य' इति वृद्धिः। वैक्लव्य इति। वैक्लव्यं भयादिजनितोद्विग्नता। तद्व्यापार इति। बन्धुतानुकूलो व्यापारः। पतः पुम्। मित्त्वादन्त्यादचः परः। अक्वथीदिति। एदित्त्वान्न वृद्धिः। एवम् अपथीत्। अमथीदित्यत्रापि। टुवम्। केचिदमुमुदितं पठित्वा वान्त्वा वमित्वेत्युदाहरन्ति, तत्तु वामनेन विरुध्यते। तेन हि 'आदितश्च' इति चकारस्यानुक्तसमुच्चयार्थत्वमाश्रित्य वान्त इत्यत्र इडभावः साधितः। उदित्त्वे तु 'यस्य विभाषा' इत्यनेनैव वान्त इति सिद्धेस्तदसंगतं स्यात्। एवं च क्त्वाप्रत्यये वमित्वेत्येव साधु। निपातनादिति।

ह्रस्वमिति सुधाकरः । ववाम ववमतुः । वादित्वादेत्वाभ्यासलोपौ न । भागवृत्तौ तु वेमतुरित्याद्यप्युदाहृतम् । तन्त्राष्यादौ न दृष्टम् । भ्रमु ८५० चलने । 'वा भ्राश-' (सू २३२१) इति श्यन्वा । भ्रम्यति, भ्रमति । भ्राम्यति इति तु दिवादौ वक्ष्यते । २३५६ वा जॄभ्रमुत्रसाम् । (६-४-१२४) एषामेत्वाभ्यासलोपौ वा स्तः किति लिटि सेटि थलि च । भ्रेमतुः, बभ्रमतुः । अभ्रमीत् । क्षर ८५१ संचलने । अक्षारीत् ।

अथ द्वावनुदात्तेतौ । षह ८५२ मर्षणे । 'परिनिविभ्यः-' (सू २२७५)

इहैवेति । उद्गिरण इत्यर्थनिर्देशः पाणिनीय इति सुधाकरो मन्यते । भ्रमु चलन इति । वक्रमार्गसंचारे इत्यर्थः । अयथार्थज्ञानेऽप्ययम् । 'उदितो वा' इति क्त्वायामिड्विकल्पार्थमुदित्त्वम् । वा जॄभ्रमु । 'अत एकहल्मध्ये-' इत्यतो लिटि इति 'थलि च सेटि' इति चानुवर्तते । 'घ्वसोरेद्धौ-' इत्यत एदिति 'गमहन-' इत्यतः क्ङितीति च, तदाह एषामिति । अभ्रमीदिति । 'ह्म्यन्त-' इति न वृद्धिः । अक्षारीदिति । 'अतो ल्रान्तस्य' इति वृद्धिः ।

अन्यथा गुणे सति उद्गरण इति स्यात् । यद्यपि अर्थनिर्देश आधुनिकस्तथापि पृषोदरादित्वादित्वमित्यत्रैव तात्पर्यं बोध्यम् । इत्याद्यप्युदाहृतमिति । 'वेमुश्च केचिद्रुधिरम्' इत्यादिप्रयोगानुरोधेन तथोदाहृतमित्याहुः । ननु वादित्वेन निषेधादेत्वाभ्यासलोपौ कथमिह स्याताम् इति चेत् । अत्राहुः—'न शसददवादिगुणानाम्' इति सूत्रितेऽपि वेत्यकारान्तसंघातग्रहणेनेष्टसिद्धेरादिग्रहणमौपदेशिकप्रतिपत्त्यर्थम् । एकान्ता अनुबन्धा इति च स्वीक्रियते । तथा च नायं वादिः, किं तु ट्वादिरिति । अन्ये तु वमेरादौ 'लोपो व्योः-' इति लोपेन यकारः प्रश्लिष्यत । ततश्चोपदेशे वादित्वाभावान्निषेधो नेत्याहुः । भ्रमु चलने । मण्डलाकारेण चलनमेव धात्वर्थो न तु चलनमात्रम्, तदभाववद्विशेष्यकं तत्प्रकारकज्ञानं च धात्वर्थः । 'शुक्तिं पश्यन् रजतमिति भ्रमति' इति प्रयोगात् । 'उदितो वा' इति क्त्वायां वेट् । भ्रमित्वा, भ्रान्त्वा । 'यस्य विभाषा' इति निष्ठायां नेट् । भ्रान्तः । नन्वस्य ज्वलादिगणे पाठः किमर्थः । न चात्र णप्रत्ययार्थमेव पाठ इति वाच्यम्, पचादेराकृतिगणत्वादच्प्रत्ययेनापि भ्रम इति रूपसिद्धेः 'नोदात्तोपदेशस्य-' इति वृद्धिनिषेधाद् णप्रत्यये अच्प्रत्यये च रूपस्य तुल्यत्वादिति चेत् । अत्राहुः—यदि पचादित्वादच्प्रत्ययः स्यात्तर्हि अभ्रम इत्यत्र 'अच्कावशक्तौ' इति नञः परमन्तोदात्तं स्यात् । णप्रत्यये त्विह 'तत्पुरुषे तुल्यार्थ-' इत्याद्युदात्तमेव भवतीति । वा जॄभ्रमुत्रसाम् । अप्राप्तविभाषेयम् । अभ्रमीदिति । मान्तत्वान्न वृद्धिः । अक्षारीदिति । हलन्तलक्षणाया वृद्धेः 'नेटि' इति निषेधेऽपि 'अतो ल्रान्तस्य'

इति षत्वम्। परिषहते। सेहे। सहिता। 'तीषसह-' (सू २३४०) इति वा इट्। इडभावे ढत्वधत्वष्टुत्वढलोपाः। २३५७ **सहिवहोरोदवर्णस्य।** (६-३-११२) अनयोरवर्णस्य ओत्स्याड्ढलोपे सति। २३५८ **सोढः।** (८-३-११५) सोढ्रूपस्य सहेः सस्य षत्वं न स्यात्। परिसोढा। २३५९ **सिवादीनां वाड्व्यवायेऽपि।** (८-३-७१) परिनिविभ्यः परेषां सिवादीनां सस्य षो वा स्यादड्व्यवायेऽपि। पर्यषहत, पर्यसहत। रमु ८२३ क्रीडायाम्। रेमे। रेमिषे। रन्ता। रंस्यते। रंसीष्ट। अरंस्त।

अथ कसन्ताः परस्मैपदिनः। षद्लृ ८२४ विशरणगत्यवसादनेषु। २३६० **पाघ्राध्मास्थाम्नादाण्दृश्यर्तिसर्तिशदसदां पिबजिघ्रधमतिष्ठमनयच्छ-**

षह मर्षण इति। अपराधे सत्यपि कोपानाविष्करणं मर्षणम्। **इडभाव इति।** सह् ता इति स्थिते 'हो ढः' इति ढत्वं 'झषस्तथोः-' इति तकारस्य धत्वम्। धस्य ष्टुत्वेन ढः। 'ढो ढे लोपः' इति पूर्वस्य ढस्य लोप इत्यर्थः। सढा इति स्थितम्। **सहिवहोः। ढलोप इति।** 'ढ्लोपे-' इत्यतस्तदनुवृत्तेरिति भावः। रलोप इति तु नानुवर्तते, असंभवात्। तथा च सकारादकारस्य ओत्वे सोढेति रूपम्। परिसोढेत्यत्र 'परिनिविभ्यः-' इति षत्वे प्राप्ते। **सोढः।** सोढ इति सहेरोत्वसंपन्नस्य षष्ठ्यन्तम्। 'सहेः साडः सः' इत्यतः स इति षष्ठ्यन्तमनुवर्तते। 'न रपर-' इत्यतो नेति। मूर्धन्य इत्यधिकृतम्, तदाह **सोढ्रूपस्येत्यादिना। सिवादीनाम्।** 'परिनिविभ्यः-' इति सूत्रादुत्तरमिदं सूत्रम्, तदाह **परिनिविभ्यः परेषामिति।** सिवुसहसुट्स्तुस्वञ्जामिति शेषः। **रमु क्रीडायामिति।** नायमुदिदिति माधवः। केचित्तु उदितं मत्वा 'उदितो वा' इति क्त्वायामिड्विकल्पमिच्छन्ति। अनिट्कोऽयम्। लिटि क्रादिनियमादिट्, तदाह **रेमिष इति।**

अथ कसन्ता इति। 'कस गतौ' इत्येतत्पर्यन्ता इत्यर्थः। षद्लृधातुः

इति वृद्धिः। **षह।** अपराधे सत्यपि कोपानाविष्करणं मर्षणम्। **सहिवहो।** इह रेफलोपस्यासंभवाद् 'ढ्लोपे पूर्वस्य-' इत्यतो ढलोप एवानुवर्तते तदाह **ढलोप इति।** ढलोपे किम्, सहते। वहते। **सोढः। षत्वं नेति।** 'न रपर-' इति सूत्रान्नेत्यनुवर्तत इति भावः। **सिवादीनां।** सिवुसहसुट्स्तुस्वञ्जः सिवादयः। पर्यषीव्यत्। पर्यसीव्यत्। पर्यष्करोत्। पर्यस्करोत्। न्यष्टौत्। न्यस्तौत्। व्यष्वजत्। व्यस्वजत्। **रम** क्रीडायाम्। असुमुदितं मत्वा रत्वा रमित्वेति केचिदुदाजह्रुस्तन्माधवादयो न सहन्ते। तथा च क्त्वायां रत्वेत्येव साधु। **रेमिषे इति।** क्रादिनियमादिट्। पचाद्यचि टाप्। रमा। घञि तु रामः। अमन्तत्वेन मित्त्वाद् णौ ह्रस्वः।

पश्यर्च्छधौशीयसीदाः । (७-३-७८) पादीनां पिबादयः स्युरित्संज्ञकशकारादौ प्रत्यये परे । सीदति । ससाद सेदतुः । सेदिथ, ससत्थ । सत्ता । सत्स्यति । लृदित्वादङ् । असदत् । 'सदिरप्रतेः' (सू २२७१) । निषीदति । न्यषीदत् । **२३६१ सदेः परस्य लिटि** । (८-३-११८) सदेरभ्यासात्परस्य षत्वं न स्याल्लिटि । निषसाद निषेदतुः । शद्लृ ८५५ शातने । विशी-

पोपदेशः अनिट्कश्च । लटि शपि सद् अ ति इति स्थिते **पाघ्राध्मा** । पा घ्रा ध्मा स्था म्ना दाण् दृशि अर्ति सर्ति शद् सद्, एषां द्वन्द्वात् षष्ठीबहुवचनम् । पिब जिघ्र धम तिष्ठ मन यच्छ पश्य ऋच्छ धौ शीय सीद, एषां द्वन्द्वात् प्रथमाबहुवचनम् । यथासंख्यमादेशाः 'ष्ठिवुक्लमु–' इत्यतः शितीत्यनुवर्तते । श्चासौ इच्चेति कर्मधारयः । अङ्गाक्षिप्तप्रत्ययविशेषणत्वात् तदादिविधिः, तदाह **इत्संज्ञकेति** । **ससादेति** । इत्संज्ञकशकारादिप्रत्ययाभावाद् न सीदादेशः । श् इद् यस्य स शित् । शितीति बहुव्रीह्याश्रयणे तु पाधातोः कर्मणि लिटि एशि आल्लोपे पपे इत्यत्रापि पिबादेशः स्यादिति बोध्यम् । थलि क्रादिनियमप्राप्तस्य इटः 'उपदेशेऽत्वतः' इति निषेधेऽपि भारद्वाजनियमाद्विट् । तत्र इट्पक्षे 'थलि च सेटि' इत्येत्वाभ्यासलोपौ, तदाह **सेदिथ ससत्थेति** । सेदिव सेदिम । क्रादिनियमादिट् । **न्यषीददिति** । 'प्राक्सितादड्व्यवायेऽपि' इति षत्वम् । निषसादेत्यत्र अभ्यासात् परस्य 'स्थादिष्वभ्यासेन–' इति षत्वे प्राप्ते **सदेः परस्य** । 'न रपर–' इत्यतो नेत्यनुवर्तते । मूर्धन्य इत्यधिकृतम् । सदेरित्यवयवषष्ठी । परशब्द उत्तरखण्डपरः । सदेरुत्तरखण्डस्य षत्वं नेति लभ्यते । फलितमाह **सदेरभ्यासा-**

रमयति । **षद्लृ** । विशरणमवयवानां विश्लेषः । अवसादनं नाशः । **पाघ्राध्मा** । पा पाने । पा रक्षणे इति तु न गृह्यते । लुग्विकरणत्वात् । द्रष्ट्रीति केषांचित्पाठस्तत्र 'सृजिदृशोः–' इत्यम् । अर्तीत्यादौ ऋच्छादेशाद्यभाव इव सौत्रत्वात्पश्यादेशाभाव इति बोध्यम् । दृश्यर्तीति पाठस्तु निर्दुष्ट एव । **पादीनामिति** । एकादशानामेषां यथासंख्यमेकादश-पिबाद्यादेशाः स्युरित्यर्थः । 'ष्ठिवुक्लमुचमाम्–' इत्यतः शितीत्यनुवर्तते, स च कर्मधारय इत्यभिप्रेत्याह **इत्संज्ञकशकारादाविति** । शकारादाविति किम्, पपे । जघ्रे । दध्मे । शितीति बहुव्रीहिरित्यभ्युपगमे त्विह पिबाद्यादेशाः स्युरेव । **सेदिथेति** । 'उपदेशेऽत्वतः' इति क्रादिनियमप्राप्तस्येटो निषेधेऽपि भारद्वाजनियमादिट् । **सदेः परस्य** । सदेरिति षष्ठी । फलितमाह **अभ्यासात्परस्येति** । 'स्थादिष्वभ्यासेन च–' इति प्राप्तिः । लिटीति कीम्, निषिषित्सति । सदिस्वञ्जयोरिति वृत्त्यादिरूढोऽपि पाठ इहोपेक्षितः, भाष्याननुगुणत्वात् । **निषसादेति** । 'सदिरप्रतेः'

१ 'द्रष्टि' इति क्वचित् पाठः ।

र्णतायामयम्। शातनं तु विषयतया निर्दिश्यते। २३६२ शदेः शितः। (१-३-६०) शिद्भाविनोऽस्मादात्मनेपदं स्यात्। शीयते। शशाद शेदतुः। शेदिथ, शशत्थ। शत्ता। अशदत्। क्रुश ८५६ आह्वाने रोदने च। क्रोशति। क्रोष्टा। क्सेः क्सः। अक्रुक्षत्। कुच ८५७ सम्पर्चनकौटिल्यप्रतिष्टम्भविलेखनेषु।

तपरस्येति। शद्लृ शातन इति। ननु शद्धातोरस्माद् हेतुमण्ण्यन्ताद् ल्युटि 'शदेरगतौ तः' इति दकारस्य तकारे शातनशब्दः। तथा च शातनं शीर्णतानुकूलक्रियेति फलति। एवं च सकर्मकत्वापत्तौ विशीर्यतीत्यर्थे शीयत इति वक्ष्यमाणमुदाहरणं कथमित्यत आह विशीर्णतायामिति। विशरणे इत्यर्थः। तर्हि कथं शातनमिति हेतुमण्णिजित्यत आह शातनं तु विषयतयेति। विपूर्वात् 'षिञ् बन्धने' इत्यस्माद् विषयशब्दः। अविनाभावेनेत्यर्थः। प्रयोजकव्यापारं विना विशरणस्यासंभवात् शातननिर्देशः। ण्यर्थस्याविवक्षितत्वाद् विशरणमेव शद्लृधात्वर्थ इति यावत्। शदेः शितः। 'अनुदात्तङितः—' इत्यस्मादात्मनेपदमित्यनुवर्तते। श् इद् यस्य स शित्। शप् विवक्षितः। शिति विवक्षिते सतीत्यर्थः, तिङुत्पत्तेः पूर्वं सार्वधातुकाश्रयस्य शपोऽसंभवात्, तदाह शिद्भाविन इति। शिद् भावी भविष्यन् यस्मात्स शिद्भावी तस्मादित्यर्थः। शीयते इति। शपि शदेः शीयादेशः। विशीर्यतीत्यर्थः। शीयेते शीयन्ते इत्यादि। शिद्विषयादित्युक्तेर्लिटि नात्मनेपदम्, इत्संज्ञकशकारादावित्युक्तेर्न शीयादेशः, तदाह शशादेति। अनिट्कोऽयम्। क्रादिनियमप्राप्तस्य इटः 'उपदेशेऽत्वतः' इति नियमात्थलि भारद्वाजनियमाद् वेट्, तदाह शेदिथ शशत्थेति च। इट्पक्षे 'थलि च सेटि' इत्येत्त्वाभ्यासलोपाविति भावः। शेदिव शेदिम। क्रादिनियमादिट्। अशददिति। लृदित्त्वादङिति भावः। क्रुशधातुरनिट्कः। चुक्रोशिथ। क्रादिनियमात्थलि नित्यमिट्। अजन्ताकारवत्त्वाभावान्न भारद्वाजनियमः। चुक्रुशिव चुक्रुशिम। क्रोष्टेति। व्रश्चादिना शस्य षत्वे ष्टुत्वेन तकारस्य टः। क्सेः क्स इति। इगुपधशलन्तत्वादिति भावः। अक्रुक्षदिति। व्रश्चादिना शस्य षः। 'षढोः—' इति षस्य कः, सस्य षत्वम्। कित्वान्न गुणः। कुच संपर्चनेति। 'कुच शब्दे' इति पठितस्य

इत्यत्राप्रतेरिति पर्युदासात्प्रतिसस्रादेत्यत्राभ्यासस्यापि षत्वं नेति बोध्यम्। शद्लृ। विशीर्णतायामिति वक्तव्ये शातने इत्युक्तिरसंगतेत्याशङ्क्य कथंचित्समाधत्ते शातनं त्विति। शदेरेव हि णिचि 'शदेरगतौ—' इति तत्वे ल्युटि च शातनमिति रूपम्। तथा चास्यैव धातोरिदं रूपं प्रसिद्धं चेत्यभिप्रेत्य तन्निर्देशः कृतः। यथा गम्लृ गतौ। डुपचष् पाके इत्यादाविति भावः। कुच संपर्चनादौ। कुच शब्दे तारे इति चवर्गी-

कोचति। चुकोच। बुध ८५८ अवगमने। बोधति। बोधिता। बोधिष्यति। रुह ८५९ बीजजन्मनि प्रादुर्भावे च। रोहति। रुरोह। रुरोहिथ। रोढा। रोक्ष्यति। अरुक्षत्। कस ८६० गतौ। अकासीत्, अकसीत्। वृत्। ज्वलादिगणः समाप्तः।

अथ गूहत्यन्ताः स्वरितेतः। हिक्क ८६१ अव्यक्ते शब्दे। हिक्कति,हिक्कते। अञ्चु ८६२ गतौ याचने च। अञ्चति, अञ्चते। अचु इत्येके। अचि इत्यपरे टु याचृ ८६३ याच्ञायाम्। याचति, याचते। रेटृ ८६४ परिभाषणे। रेटति, रेटते। चते ८६५ चदे ८६६ याचने। चचात, चेते। अचतीत्। चचाद, चेदे। अचदीत्। प्रोथृ ८६७ पर्याप्तौ। पुप्रोथ, पुप्रोथे। मिदृ ८६८ मेदृ ८६९ मेधाहिंसनयोः। मिमेद, मिमिदे। मिमेदे। थान्ताविमौ इति स्वामी। मिमेथ। धान्तौ इति न्यासः। मेधृ ८७० संगमे च। मेधति। मिमेधे। णिदृ ८७१ णेदृ ८७२ कुत्सासंनिकर्षयोः। निनेद निनिदतुः। निनिदे। निनेदे। शृधु ८७३ मृधु ८७४

पुनरिह पाठः संपर्चनादावेव ज्वलादिकार्यणप्रत्ययार्थः। अर्थनिर्देशः क्वचित्पाणिनीय इति भूधातौ प्रपञ्चितम्। **बुध अवगमन इति**। सेट्कोऽयम्, अनिट्सु श्यन्विकरणस्यैव बुधेर्ग्रहणात्, तदाह **बोधितेति**। अबोधीत्। रुहधातुरनिट्कः। क्रादिनियमात्थल्यपि नित्यमिट्। अजन्ताकारवत्त्वाभावाद् न भारद्वाजनियमः। **रोढेति**। लुटि तासि गुणे ढत्वधत्वष्टुत्वढलोपाः। **रोक्ष्यतीति**। लृटि स्ये ढकषाः। **अरुक्षदिति**। इगुपधशलन्तत्वात् क्से ढकषाः कित्त्वान्न गुणः। **वृदिति**। 'ज्वलितिकसन्तेभ्यः-' इति उत्तरावधेरपि कसेर्ग्रहणादेव सिद्धेः वृत्करणं स्पष्टार्थमित्याहुः। इति ज्वलादयः।

गूहत्यन्ता इति। 'गुहू संवरणे' इत्येतत्पर्यन्ता इत्यर्थः। चते चदे

यान्तेषु पठितस्य पुनरिह पाठः संपर्चनादावेव ज्वलादित्वप्रयुक्तो णप्रत्ययो यथा स्यादिति मनोरमादौ स्थितम्। अत्र नव्याः—अनेनैव ग्रन्थेन पाणिनिनापि क्वचित् क्वचिदर्थनिर्देशः कृत इत्यनुमीयते अन्यथाऽत्रत्यग्रन्थस्वारस्यभङ्गापत्तेरित्याहुः। **बोधितेति**। बुध्यतेरेवानिट्कारिकासु पठितत्वादयं सेडिति भावः। **अकासीदिति**। हलन्तलक्षणाया वृद्धेः 'नेटि' इति निषेधेऽपि 'अतो हलादेः-' इति वैकल्पिकी वृद्धिः। **वृदिति**। अत्र नव्याः—'ज्वलितिकसन्तेभ्यः-' इति निर्देशाद् वृत्करणमिहानार्षमित्यनुमीयते। अन्यथा 'ज्वलादिभ्यो णः' इत्येव सूत्रयेदित्याहुः। **अञ्चु गतौ**। 'अनिदिताम्-' इति नलोपः। अच्यात्। अचीत्येकीयमते तु इदित्वादञ्च्यात्। **मेधृ संगमे च**। चात्पूर्वोक्तेऽर्थे। 'प्रजायै गृहमेधिनाम्' इत्यत्र गृहैर्दारैर्मेधन्ते सङ्गच्छन्ते

उन्दने । उन्दनं क्लेदनम् । शर्धति, शर्धते । शर्धिता । मर्धति,मर्धते । बुधिर् ८७५ अवबोधने । बोधति, बोधते । इरित्वादङ् वा । अबुधत्, अबोधीत्, अबोधिष्ट । 'दीपजन–' (सू २३२८) इति चिण् तु न भवति, पूर्वोत्तरसाहचर्येण दैवादिकस्यैव तत्र ग्रहणात् । उ बुन्दिर् ८७६ निशामने । निशामनं ज्ञानम् । बुबुन्दे । अबुदत्, अबुन्दीत् । वेणृ ८७७ गतिज्ञानचिन्तानिशामनवादित्रग्रहणेषु । वेणति, वेणते । नान्तोऽप्ययम् । खनु ८७८ अवदारणे । खनति, खनते । **२३६३ गमहनजनखनघसां लोपः क्ङित्यनङि । (६-४-९८)** एषामुपधाया लोपः स्यादजादौ क्ङिति न त्वङि । चख्नतुः । 'ये विभाषा'

याचने । **अचतीदिति** । एदित्वान्न वृद्धिः । एवमचदीत् । **बुधिर् अवबोधन इति** । 'बुध अवगमने' इति केवलपरस्मैपदी गतः । स तु ज्वलादिकार्यार्थः । अयं तु इरित् स्वरितेत् । अनिट्सु श्यन्विकरणस्यैव पाठादयं सेट् । **अबुधदिति** । इर इत्वेपि तदवयवस्य इकारस्य प्रत्येकमित्त्वाभावान्न नुम् । स्वरितेत्त्वप्रयुक्तमात्मनेपदं तु भवत्येव, स्वरितेत्सु पाठसामर्थ्यात् । वस्तुतस्तु इकारस्य प्रत्येकमित्वेऽपि न नुम्, इदितो नुमित्यत्र कर्मधारयमाश्रित्य इत्संज्ञकेकारान्तस्यैव नुंविधेः । **पूर्वोत्तरेति** । जनपूरिसाहचर्येणेत्यर्थः । **उ बुन्दिरिति** । आद्य उकार इत् 'उदितो वा' इति क्त्वायामिड्विकल्पार्थः । **अबुददिति** । इरित्वादङि 'अनिदिताम्–' इति नलोपः । इर इकारस्य प्रत्येकमित्संज्ञाविरहाद् अनिदितामित्यस्य इत्संज्ञकेकारान्तभिन्नानामित्यर्थाश्रयणाच्चेति शब्देन्दुशेखरे स्थितम् । **वेणृ गतीति** । वाद्यभाण्डस्य वादनार्थं ग्रहणं वादित्रग्रहणम् । खनुधातुरुदित् । क्त्वायामिड्विकल्पः । **गमहन** । **उपधाया इति** । 'ऊदुपधायाः–' इत्यतः तदनुवृत्तेरिति भावः । **अजादाविति** । 'अचि श्नुधातु–' इत्यतः अनुवृत्तस्य अचि इत्यस्य अङ्गाक्षिप्तप्रत्ययविशेषणतया तदादिविधिलाभ इति भावः । क्ङिती युक्तेः चखानेत्यत्र

इति विग्रहः । 'सुप्यजातौ–' इति णिनिः । **शृधु मृधु** । **क्लेदनमिति** । आर्द्रीभाव इत्यर्थः । उदित्त्वात् क्त्वायां वेट् । शर्धित्वा । शृद्ध्वा । **उबुन्दिर्** । बुन्दित्वा । बुत्त्वा । निष्ठायां बुन्नः । निशामनं चाक्षुषं ज्ञानम् । **वेणृ** । गत्यादयः पञ्चार्थाः । वाद्यभाण्डस्य वादनार्थं ग्रहणं वादित्रग्रहणम् । वेणिः वेणी वेणुरित्यादिरूपाण्यस्यैव धातोः । **नान्तोऽपीति** । 'उत माता महिषमन्ववेनत्' इत्यत्र नान्तदर्शनादिति भावः । **खनु** । खनित्वा । खात्वा । निष्ठायाम् । खातः । **गमहन** । 'अचि श्नुधातुभ्रुवाम्–' इत्यतोऽचीत्यनुवर्तते, ऊदुपधाया गोहः' इत्यत 'उपध ग्रहणं च, तदाह **एषामुपधाया इत्यादि** । जग्मतुः । जग्मुः । जघ्नतुः । जघ्नुः । जज्ञे । जज्ञाते ।

(सू २२१९) खायात्, खन्यात्। चीवृ ८७९ आदानसंवरणयोः। चिचीव, चिचीवे। चायृ ८८० पूजानिशामनयोः। व्यय ८८१ गतौ। अव्ययीत्। दाशृ ८८२ दाने। ददाश, ददाशे। भेषृ ८८३ भये। गतौ इत्येके। भेषति, भेषते। भ्रेषृ ८८४ भ्लेषृ ८८५ गतौ। अस ८८६ गतिदीप्त्यादानेषु। असति, असते। आस, आसे। अयं षान्तोऽपि। स्पश ८८७ बाधनस्पर्शनयोः। स्पर्शनं ग्रथनम्। स्पशति, स्पशते। लष ८८८ कान्तौ। 'वा भ्राश-' (सू २३२१) इति श्यन्वा। लष्यति, लषति। लेषे। चष ८८९ भक्षणे। छष ८९० हिंसायाम्। चच्छषतुः चच्छषे। झष ८९१ आदानसंवरणयोः। भ्रक्ष ८९२ म्लक्ष ८९३ अदने। भक्ष इति मैत्रेयः। दासृ ८९४ दाने। माहृ ८९५ माने। गुहू ८९६ संवरणे। २३६४ **ऊदुपधाया गोहः**। (६-४-८९) गुह उपधाया ऊत्स्याद् गुणहेतावजादौ प्रत्यये। गूहति, गूहते। ऊदित्त्वादिड् वा। गूहिता,

---

नोपधालोपः। 'अनङि' इति किम्? अगमत्। चख्ने चख्नाते इत्यादि। **व्यय गताविति**। अयं वित्तत्यागेऽपि, अर्थनिर्देशस्योपलक्षणत्वात्। **अव्ययीदिति**। ह्म्यन्तेति न वृद्धिः। **चष भक्षण इति**। चचाष चेषतुः। **छष हिंसाया-मिति**। वैरूप्यसंपादकादेशादित्वादेत्वाभ्यासलोपौ न, तदाह **चच्छषतुरिति**। **गुहू संवरण इति**। उदुपधोऽयम्। ऊदित्। **ऊदुपधायाः**। गोह इति कृतलघूपधगुणस्य गुहेर्निर्देशः। ततश्च गुणविषय एवेदं भवति। 'अचि श्नुधातु-' इत्यतः अनुवृत्तस्य अचीत्यस्य आक्षिप्तप्रत्ययविशेषणत्वात्तदादिविधिः, तदाह **गुह उपधाया इत्यादिना**। **गुणहेताविति**। गुणं प्रति परनिमित्तभूत इत्यर्थः। गुणापवादः। जुगूह। 'गुणहेतौ' इति किम्? जुगुहतुः जुगुहुः। जुगुहे

जक्षतुः। जक्षुः। अनङीति किम्, अगमत्। **चीवृ**। चीवरं वस्त्रम्, 'चीवरपीवर-मीवर-' इत्युणादिषु निपातितोऽयम्। **व्यय गतौ**। वित्तत्यागे तु नित्यमात्मनेपदी गत इति मनोरमा। न कुत्रापि गत इति चिन्त्यैव सा। **अव्ययीदिति**। यान्तत्वान्न वृद्धिः। **स्पश**। बाधनस्पर्शनयोः। 'णिश्रि-' इति च्लेश्चङि। अपस्पशत्। 'अत्स्मृदृ-त्वरप्रथ-' इत्यादिना अभ्यासस्यात्वं सन्वदित्वापवादः। पस्पशा। यङन्तादचि 'यङोऽचि च' इति लुक्। 'अजाद्यतः-' इति टाप्। 'दीर्घोऽकितः' इत्यभ्यासस्य दीर्घस्तु न भवति संज्ञापूर्वकविधेरनित्यत्वादित्याहुः। 'जपजभदहदशभञ्जपशां च' इत्यत्र पसेति सौत्रो धातुः। पसतीत्यादि। यङ्लुकोस्तु 'जपजभ-' इत्यनेनैवाभ्यासस्य नुक्। यङि पंपस्यते। लुकि पंपसीति। पंपस् इति कण्ड्वादिः। पंपस्यति। **ऊदु-पधाया**। **गुणहेताविति**। एतच्च गोह इति विकृतनिर्देशाल्लब्धम्। 'अचि

---

१ अस्य सान्तत्वं माधवमतेन। काशिकायां तु तालव्यान्तः।

गोढा। गूहिष्यति, घोक्ष्यति। गूहेत्। गुह्यात्। अगूहीत्। इडभावे क्सः। अघुक्षत्। २३६५ लुग्वा दुहदिहलिहगुहामात्मनेपदे दन्त्ये। (७-३-७३) एषां क्सस्य लुग्वा स्याद्दन्त्ये तङि। ढत्वधत्वष्टुत्वढलोपदीर्घाः। अगूढ। अघुक्षत। 'क्सस्याचि' (सू २३३७) इत्यन्तलोपः। अघुक्षाताम् अघुक्षन्त। अगुह्वहि, अघुक्षावहि। अघुक्षामहि।

जुगुहाते जुगुहिरे। जुगूहिथ, जुगोढ। ढत्वधत्वष्टुत्वढलोपाः। जुगुहथुः जुगुह। जुगुहिषे, जुघुक्षे। ढत्वभष्भावकत्वषत्वानि। जुगुहाथे जुगुहिध्वे, जुघुढ्वे। जुगूह जुगुहिव, जुगुह्व जुगुहिम, जुगुह्म। जुगुहे जुगुहिवहे, जुगुह्वहे जुगुहिमहे, जुगुह्महे—इति लिटि रूपाणि सिद्धवत्कृत्य लुटि इट्पक्षे ऊत्वे रूपमाह **गूहितेति**। इडभावे अजादिप्रत्ययाभावाद् ऊत्वाभावे गुणे ढत्वधत्वष्टुत्वढलोपेषु रूपमाह **गोढेति**। लृटि स्ये इट्पक्षे ऊत्वे रूपमाह **गूहिष्यतीति**। इडभावे तु गुण-ढत्वभष्भावकत्वषत्वेषु रूपमाह **घोक्ष्यतीति**। गूहिष्यते, घोक्ष्यते इत्यप्युदाहार्यम्। गूहतु। गूहताम्। अगूहत्। अगूहत। **गूहेदिति**। गूहेतेत्यपि ज्ञेयम्। **गुह्यादिति**। आशीर्लिङि अजादिप्रत्ययाभावादूत्वं न। कित्वान्न गुणः। लुङि इट्पक्षे सिज्लोपे ऊत्वे रूपमाह **अगूहीदिति**। अगूहिष्टाम् अगूहिषुरित्यादि। **इडभावे क्स इति**। इगुपधशलन्तत्वादिति भावः। **अघुक्षदिति**। ढत्वभष्भावकत्व-षत्वानि। अघुक्षताम् अघुक्षन्नित्यादि। लुङस्तङि विशेषमाह **लुग्वा दुह**। **दन्त्ये तङीति**। दन्त्यादौ तङीत्यर्थः। प्रत्ययादर्शनत्वात्सर्वादेशोऽयं लुक्। **अगूढेति**। अगुह् स त इति स्थिते क्सस्य कित्त्वेन गुणहेतुत्वाभावादजादित्वाभावाच्च ऊत्वाभावे क्सलुकि अगुह् त इति स्थिते प्रक्रियां दर्शयति **ढत्वधत्वष्टुत्वढलोपदीर्घा इति**। **अघुक्षतेति**। क्सलुगभावे ढत्वभष्भावकत्वषत्वानीति भावः। **अघुक्षा-तामिति**। च्लेः क्सादेशे क्सस्य कित्त्वेन गुणहेतुत्वाभावादूत्वाभावे ढत्वभष्भाव-कत्वषत्वेषु कृतेषु 'क्सस्याचि' इत्यन्त्यलोपे अतः परत्वाभावाद् 'आतो ङितः' इति न भवतीति भावः। **अघुक्षन्तेति**। झस्य अजादित्वाभावात्तस्मिन्परे क्सस्य अन्त्य-लोपाभावादतः परत्वाभावाद् 'आत्मनेपदेष्वनतः' इत्यदादेशो न भवति। कृते तु झोऽन्तादेशे क्सस्यान्तलोप इति भावः। अघुक्षथाः अघुक्षाथाम् अघुक्षध्वम्। अघुक्षि—इति रूपाणि सिद्धवत्कृत्याह **अगुह्वहीति**। दन्त्यादिप्रत्ययपरत्वात् क्सस्य लुङि अजादिप्रत्ययाभावाद् ऊत्वाभावे रूपम्। **अघुक्षावहीति**। क्सलु-

ग्नुधातु—' इत्यतोऽनुवृत्तेनाचीत्यनेनाज्ञादिप्रत्ययो विशेष्यते, विशेषणेन तदादिविधि-स्तदाह **अजादाविति**। **दन्त्ये तङीति**। दन्त्यादौ तङीत्यर्थः। अदुग्ध। अधु-

अथाजन्ता उभयपदिनः। श्रिञ् ८९७ सेवायाम्। श्रयति, श्रयते। शिश्रियतुः। श्रयिता। 'णिश्रि-' (सू २३१२) इति चङ्। अशिश्रियत्। भृञ् ८९८ भरणे। भरति। बभार बभ्रतुः। बभर्थ। बभृव। बभृषे। भर्ता। २३६६ ऋद्धनोः स्ये। (७-२-७०) ऋतो हन्तेश्च स्यस्य इट् स्यात्। भरिष्यति। २३६७ रिङ् शयग्लिङ्क्षु। (७-४-२८) शे यकि यादावार्ध-

गभावे ढत्वभष्भावकत्वषत्वानि अतो दीर्घश्च। अघुक्षामहीति। दन्त्यादि-प्रत्ययपरत्वाभावाच्च क्सलुक्। इति गुहत्यन्ताः स्वरितेतः।

उभयपदिन इति। ञित्त्वादिति भावः। श्रिञ्धातुः सेट्। शिश्रियतुरिति। कित्त्वान्न गुणः। इयङ् शिश्रियुः। शिश्रयिथ शिश्रियथुः शिश्रिय। शिश्राय, शिश्रय शिश्रियिव शिश्रियम। शिश्रिये शिश्रियाते शिश्रियिरे। शिश्रियिषे शिश्रियाथे शिश्रियिढ्वे, शिश्रियिध्वे। शिश्रिये शिश्रियिवहे शिश्रियिमहे। श्रयितेति। श्रयिष्यति, श्रयिष्यते। श्रयतु श्रयताम्। अश्रयत्, अश्रयत। श्रयेत्, श्रयेत श्रीयात्, श्रयिषीष्ट। लुङि विशेषमाह णिश्रीति। अशिश्रियदिति। 'चङि' इति द्वित्वम्। अशिश्रियत। अश्रयिष्यत् अश्रयिष्यत। भृञ्धातुरनिट्। भरतीति। भरते इत्यपि ज्ञेयम्। बभ्रतुरिति। कित्त्वान्न गुणः। यण्। बभ्रुः। थलादौ 'एकाचः-' इति नेट्, कृसृभृवृस्तुद्रुस्रुश्रुषु लिट्यपि तन्निषेधस्य प्रवृत्तेः। थलि 'अचस्तास्वत्-' इति निषेधाच्च, ऋदन्तत्वेन भारद्वाजमतेऽपि थलि निषेधाच्च, तदाह बभर्थेति। बभ्रथुः बभ्र। बभार, बभर—इति सिद्धवत्कृत्याह बभृवेति। बभृम। बभ्रे बभ्राते बभ्रिरे—इति सिद्धवत्कृत्याह बभृषे इति। बभ्राथे बभृढ्वे। बभ्रे बभृवहे बभृमहे। लृटि स्ये इण्निषेधे प्राप्ते ऋद्धनोः। ऋत् हन् अनयोर्द्वन्द्वात् पञ्चम्यर्थे षष्ठी। स्ये इति षष्ठ्यर्थे सप्तमी। 'आर्धधातुकस्येट्-' इत्यत इडित्यनुवर्तते, तदाह ऋत इत्यादिना। 'एकाचः-' इति इण्निषेधस्यापवादः। भरिष्यतीति। भरिष्यते। भरतु भरताम्। अभरत्, अभरत। भरेत्, भरेत। आशीर्लिङि परस्मैपदे भृ यात् इति स्थिते रिङ् शय। श यक् लिङ् एषां द्वन्द्वात्सप्तमीबहुवचनम्। 'अयङ् यि क्ङिति' इत्यतो यीति सप्तम्यन्तमनुवृत्तं लिङो विशेषणम्, तदादिविधिः। शे तु यीति नान्वेति, असंभवात्। नापि यकि, अव्यभिचारात्। अत एव 'अकृत्सार्व-

क्षत। अदिग्ध। अधिक्षत। अलीढ। अलिक्षतेत्यादि। रिङ् शयग्लिङ्क्षु। 'अयङ् यि क्ङिति' इत्यतोऽनुवृत्तं यीत्येतल्लिङ एव विशेषणम्, शेऽसंभवात्, यकि तु वैयर्थ्यात्। तथा 'अकृत्सार्वधातुकयोः-' इत्यनुवृत्तमपि लिङ एव विशेषणमित्यभिप्रेत्याह यादावित्यादि। शे—म्रियते। 'तुदादिभ्यः-' इति शः। यकि—क्रियते।

धातुके लिङि च ऋतो रिङादेशः स्यात्। रीङि प्रकृते रिङ्विधिसामर्थ्याद्दीर्घो न। भ्रियात्। २३६८ उश्च। (१-२-१२) ऋवर्णात्परौ झलादी लिङ्सिचौ तङ्परः सिचश्चेत्येतौ कितौ स्तः। भृषीष्ट भृषीयास्ताम्। अभार्षीत् अभार्ष्टाम् अभार्षुः। २३६९ ह्रस्वादङ्गात्। (८-२-२७) सिचो लोपः स्याज्झलि। अभृत। अभृषाताम्। अभरिष्यत्। हृञ् ८९९ हरणे। हरणं प्रापणं स्वीकारः

धातुकयोः' इत्यनुवृत्तमपि लिङ एव विशेषणम्, तदाह शे यकीत्यादिना। ऋत इति। 'रीङृतः' इत्यतः तदनुवृत्तेरिति भावः। 'अङ्गस्य' इत्यधिकृतम्। ऋत इति तद्विशेषणम्। तदन्तविधिः। ऋदन्तस्याङ्गस्येति लभ्यते। आदेशे ङकार इत्। ङित्त्वाद् अन्तादेशः। निर्दिश्यमानपरिभाषयैव सिद्धे ङकारोच्चारणम्, इकारमेनैव सिद्धे रेफोच्चारणं च स्पष्टार्थम्। ननु भ्रियादिति वक्ष्यमाणमुदाहरणमयुक्तम्, कृते रिङि 'अकृत्सार्वधातुकयोः' इति दीर्घप्रसङ्गादित्यत आह रीङि प्रकृत इति। कृते रिङि यदि दीर्घः स्यात्तर्हि रिङ्विधिर्व्यर्थः स्यात्, 'रीङृतः' इत्येव सिद्धेः। अतो रिङि कृते सति न दीर्घ इत्यर्थः। भ्रियादिति। भ्रियास्तामित्यादि सुगमम्। आशीर्लिङि भृषीष्टेत्यत्र गुणे प्राप्ते उश्च। 'लिङ्सिचावात्मनेपदेषु' इति सूत्रमनुवर्तते 'इको झल्' इत्यतो झलिति च, तदाह ऋवर्णादिति। भृषीष्टेति। कित्त्वान्न गुणः। अभार्षीदिति। परस्मैपदे सिचि वृद्धौ रपरत्वम्। तङि तु अभृ स् त इति स्थिते ह्रस्वादङ्गात्। ह्रस्वान्तादित्यर्थः। सिच इति भाष्यम्। 'झलो झलि' इत्यतो झलीति 'संयोगान्तस्य लोपः' इत्यतो लोप इति चानुवर्तते इत्यभिप्रेत्य शेषपूरणेन सूत्रं व्याचष्टे सिचो लोपः स्याज्झलीति। 'ह्रस्वात्' किम्? अच्योष्ट। 'अङ्गात्' किम्? अलाविष्टाम्। 'सिचः' किम्? द्विष्टराम् द्विष्टमाम्, सुजन्तात्तरप्तमपौ। अभृतेति। 'उश्च' इति सिचः कित्त्वान्न गुणः। झलीत्युक्तेः अभृषाताम् अभृषतेत्यत्र न सिज्लोपः। अनतः परत्वाद् झस्य अदादेशः। अभृथाः अभृषाथाम् अभृढ्वम्। अभृषि अभृष्वहि अभृष्महि। हृधातुरनिट्। हरणं चतु-

---

भ्रियते। उश्च। 'इको झल्' इत्यतो झल्ग्रहणं 'लिङ्सिचौ—' इति पूर्वसूत्रं चानुवर्तते, तदाह ऋवर्णादित्यादि। अभार्षीदिति। 'सिचि वृद्धिः—' इति वृद्धिः। ह्रस्वादङ्गात्। ह्रस्वात् किम्, अच्योष्ट। अस्तोष्ट। अङ्गग्रहणादिह 'रात्सस्य' इत्यतः सस्येत्यनुवृत्तावपि प्रत्ययस्यैव तत्रापीष्टत्वात्सिच एव लोपो भवति। तेनेह न—अस्तं द्विष्टमाम्। केचित्त्विहाङ्गग्रहणाभावे अयादिष्टाम् अलाविष्टामित्यादावपि अतिप्रसङ्गः स्यादित्याहुस्तदपरे न क्षमन्ते, संनिपातपरिभाषयापि परिहारसंभवादिति। झलीति किम्, अभृषाताम्। अभृषत। हृञ् हरणे। चत्वार इहार्थाः। भारं हरति, प्रापय-

स्तेयं नाशनं च। जहर्थ। जहिव। जह्रिषे। हर्ता। हरिष्यति। धृञ् १०० धारणे। धरति। अधार्षीत्। अधृत। णीञ् १०१ प्रापणे। निनयिथ, निनेथ, निन्यिषे।

अथाजन्ताः परस्मैपदिनः। धेट् १०२ पाने। धयति। २३७० आदेच उपदेशेऽशिति। (६-१-४५) उपदेशे एजन्तस्य धातोरात्वं स्यान्न तु

विधमित्याह। **प्रापणमित्यादि**। तद्यथा—भारं हरति, प्रापयतीत्यर्थः। अंशं हरति, स्वीकरोतीत्यर्थः। परस्वं हरति, चोरयतीत्यर्थः। पापं हरति हरते वा, नाशयतीत्यर्थः। जहार जह्रतुः जह्रुः। 'एकाचः–' इति इण्निषेधस्य क्रादिष्वेव लिटि नियमितत्वादिह थलि इटि प्राप्ते 'अचस्तास्वत्–' इति तन्निषेधः। ऋदन्तत्वेन भारद्वाजमतेऽपि इण् निषेध एव तदाह **जहर्थेति**। जह्रथुः जह्र। जहार, जहर—इति सिद्धवत्कृत्याह **जह्रिवेति**। क्रादिनियमादिट्। जह्रिम। **जह्रिषे,** क्रादिनियमादिट्। जह्राथे जह्रिढ्वे, जह्रिध्वे। जह्रे जह्रिवहे जह्रिमहे। लुङादिषु मृष इव रूपाणि। धृञ्धातुरनिट्। हृञ इव रूपाणि। णीञ्धातुरनिड् णोपदेशः। नयति, नयते। निनाय निन्यतुः निन्युः। क्रादिनियमाल्लिटि इट्। थलि तु 'अचस्तास्वत्–' इति इण्निषेधस्य भारद्वाजनियमादिड्विकल्प इत्यभिप्रेत्याह **निनयिथ निनेथेति**। निन्यिषे निन्याथे निन्यिढ्वे, निन्यिध्वे। निन्ये निन्यिवहे निन्यिमहे। नेता। नेष्यति, नेष्यते। नयतु, नयताम्। अनयत्, अनयत। नयेत्, नयेत। नीयात्, नेषीष्ट। अनैषीत्, अनेष्ट। अनेष्यत्, अनेष्यत। इत्यजन्ता उभयपदिनो गताः।

परस्मैपदिन इति। 'जि ज्रि अभिभवे' इत्येतत्पर्यन्ता इति शेषः। **धेट् पान इति**। स्तनंधयीत्यादौ ङीबर्थं टित्त्वम्, अवयवे टित्त्वस्य व्यर्थतया समुदायार्थत्वादिति हरदत्तः। **आदेचः। एजन्तस्य धातोरिति**। 'लिटि धातोः–'

तीत्यर्थः। अंशं हरति, स्वीकरोतीत्यर्थः। स्वर्णं हरति, चोरयति पापं हरति, नाशयति। **धृञ्**। दधार। दध्रतुः। दधर्थ। दध्रे। दध्राते। धर्ता। ध्रियात्। **णीञ्**। **निनयिथेति**। भारद्वाजनियमादिड्विकल्पः। **आदेच उपदेशेऽशिति**। 'लिटि धातोः–' इत्यतो धातोरित्यनुवृत्तमेचा विशेष्यते, तदाह **एजन्तस्य धातोरिति**। उपदेशे किम्, चेता। स्तोता। ननु लाक्षणिकत्वादेवात्र न भविष्यतीति चेत्। अत्राहुः—वर्णग्रहणे लक्षणप्रतिपदोक्तपरिभाषा नाश्रीयत इति ज्ञापनार्थमुपदेशग्रहणम्। तेन 'क्रीङ्जीनां णौ' इति कृतात्वे क्रापयतीत्यादौ पुक् सिध्यतीति मनोरमाकृत्। धातोः किम्, गोभ्याम्। नौभ्याम्। अस्ति ह्यत्रापि गमेर्डोः 'ग्लानुदिभ्यां डौः'

शिति। २३७१ आत औ णलः। (७-१-३४) आदन्ताद्धातोर्णल औकारा-

इत्यतो धातोरित्यनुवृत्तम् एचा विशेष्यते, तदन्तविधिरिति भावः। न तु शितीति। श् चासौ इच्चेति कर्मधारयात्सप्तमी, प्रत्ययविशेषणत्वात्तदादिविधिः, इत्संज्ञकशकारादौ प्रत्यये परे इति लभ्यते। 'लयपि च' 'न व्यो लिटि' इत्यादिपूर्वोत्तरसूत्राणां प्रत्ययेष्वेव प्रवृत्त्या 'प्रत्यये' इति विशेष्यलाभः। अशितीति न पर्युदासः, तथा सति शिद्भिन्ने प्रत्यये परे इत्यर्थः स्यात्, ततश्च 'सुग्लः' इत्यत्र ग्लैधातोः 'आतश्चोपसर्गे' इति कप्रत्ययो न स्यात्, कप्रत्ययनिमित्तमात्त्वम् आदन्तात्प्रत्यय इत्यन्योन्याश्रयात्। शिति नेति प्रसज्यप्रतिषेधे तु आत्त्वस्य अनैमित्तिकतया कप्रत्ययनिमित्तत्वाभावात् प्रथममात्त्वे कृते कप्रत्ययः सुपपादः। शितीति बहुव्रीह्याश्रयणे ग्लैधातोर्भावे लिटि 'भावकर्मणोः' इति तङि एशि आत्त्वे आतो लोपे 'जग्ले इति न सिध्येत्, एशः शित्त्वेन तस्मिन्परे आत्त्वस्य निषेधात्। अतः कर्मधारयमाश्रित्य इत्संज्ञकशकारादौ प्रत्यये परे नेत्यर्थ आश्रितः। एवं च पर्युदासेऽपि न क्षतिः। इत्संज्ञकशकारादिभिन्नप्रत्यये विवक्षित इत्याश्रयणेन सुग्ल इत्यत्र कप्रत्ययात्प्रागेव आत्त्वोपपत्तेः। 'उपदेशे' किम्? चेता, स्तोता। 'धातोः' किम्? गोभ्याम्। 'गमेर्डोः' इति डोप्रत्ययोपदेशाद् उपदेशे य एच् तदन्तत्वाद् गो इत्यस्य प्राप्तिः। न च मेङादीनामुपदेशे एजन्तत्वाभावात् कथमात्त्वमिति न शङ्क्यम्, 'उदीचां माङः–' इति निर्देशेन 'नानुबन्धकृतमनेजन्तत्वम्' इति ज्ञापनादित्यास्तां तावत्। तथा च प्रकृते लिटि द्वित्वादौ दधा अ इति स्थिते आत औ। औ इति लुप्तप्रथमाकम्। 'अङ्गस्य' इत्यधिकृतं पञ्चम्या विपरिणम्यते, आत इति तद्विशेषणम्, तदन्तविधिः, तदाह आदन्ताद्धातोरिति। णल्प्रकृतिश्च धातुरेवेति धातुग्रहणम्। तथा च

इत्युपदेशे एच्। अशितीति प्रसज्यप्रतिषेध इत्याह न तु शितीति। पर्युदासे तु जग्ले मम्ले इत्यादौ 'द्विर्वचनेऽचि' इति निषेधादात्वं न स्यादभ्यासे इकारश्च श्रूयेत। किं च सुग्ल इत्यत्र 'आतश्चोपसर्गे' इति कः। सुग्लेत्यत्र 'आतश्चोपसर्गे' इति स्त्रियामङ्। सुग्लान इत्यत्र 'आतो युच्' इति युच् न स्यात्। प्रत्ययनिमित्तं ह्यात्वमादन्ताच्च प्रत्यय इत्यन्योन्याश्रयात्। प्रसज्यप्रतिषेधे तु न कोऽपि दोषः। 'ह्वावामश्च इति सूत्रेण कबाधनार्थं पुनरणविधानं च प्रतिषेधपक्षे ज्ञापकम्। तदाहुः—अनैमित्तिकमात्वं शिति तु प्रतिषेध इति। नन्वेवमपि एशः शित्त्वाज्जग्ले मम्ले इत्यादि न सिध्यतीति चेत्। अत्राहुः—यदि तु शितीति बहुव्रीहिः स्यात्तदात्र स्यादेव दोषः। किं तु कर्मधारयोऽयम्। तथा चाशितीत्यत्रेत्संज्ञकशकारादौ प्रत्यये परे नेत्यर्थः। धातुग्रहणाल्लिप्तस्य प्रत्ययस्य शितीति कर्मधारयेण विशेषणाद्विषयसप्तम्यां तु इत्संज्ञक-

देशः स्यात् । दधौ । २३७२ आतो लोप इटि च । (६-४-६४) अजाद्योरार्धधातुकयोः क्ङिदिटोः परयोरातो लोपः स्यात् । द्वित्वात्परत्वाल्लोपे प्राप्ते 'द्विर्वचनेऽचि' (सू २२४३) इति निषेधः । द्वित्वे कृते आल्लोपः । दधतुः दधुः । दधिथ, दधाथ । दधिव दधिम । धाता । २३७३ दाधा घ्वदाप् । (१-१-२०) दारूपा धारूपाश्च धातवो घुसंज्ञाः स्युर्दाप्दैपौ

णल औत्वे वृद्धौ रूपमाह **दधाविति**। दधा अतुसिति स्थिते **आतो लोपः**। 'आर्धधातुके' इत्यधिकृतम् । 'दीङो युट्–' इत्यतः अचि क्ङितीति चानुवर्तते। अचीत्यार्धधातुकविशेषणत्वात्तदादिविधिः । क्ङिति अजाद्यार्धधातुके इटि च आतो लोप इति लभ्यते। फलितमाह **अजाद्योरिति** । इट आर्धधातुकत्वं तु तदवयवत्वाद्बोध्यम् । क्ङितीति च इटो न विशेषणम्, इड्ग्रहणसामर्थ्यात् । इडित्यनेन उत्तमपुरुषैकवचनम् इडागमश्च गृह्यते। 'अजाद्योः' किम् ? ग्लैधातोः कर्मणि लटि यकि ग्लायते। 'आर्धधातुकयोः' किम् ? यान्ति वान्ति । दधौ इत्यत्र तु क्ङित्त्वाभावान्नाल्लोपः । सति तस्मिन् औत्वं न स्यात्। ननु धा अतुस् इति स्थिते द्वित्वात्परत्वादाल्लोपे सति एकाच्त्वाभावाद् द्वित्वं न स्यादित्याशङ्क्य परिहरति **द्वित्वादित्यादिना**। धेट्धातुरनिट् । भारद्वाजनियमात् थलि वेडित्याह **दधिथ, दधाथेति**। इट्पक्षे आल्लोपः। दधथुः दध । दधौ । इति सिद्धवत्कृत्याह **दधिवेति**। वसि आत्वे क्रादिनियमादिटि आल्लोप इति भावः। दधिमेत्यपि एवं ज्ञेयम्। **धातेति**। लुटि आत्वे तासादि इति भावः। धास्यति । धयतु। अधयत् । धयेत्। आशीर्लिङि घुसंज्ञाकार्यं वक्ष्यन् घुसंज्ञां दर्शयति **दाधाघ्वदाप्**। दैत्यनेन स्वाभाविकाकारान्तयोः 'डु दाञ् दाने' 'दाण् दाने' इत्यनयोः, कृतात्वयोः

शकारादिभिन्नप्रत्ययविषये आत्वमित्यर्थात्पर्युदासेऽपि न क्षतिरिति। **आत औ णलः।** इह अङ्गस्येत्यनुवर्तते। धातोरिति तु फलितार्थकथनम् । आदन्तादङ्गादित्यर्थः । **आतो लोप इटि च**। आर्धधातुक इत्यनुवर्तते। 'दीङो युडचि क्ङिति' इत्यतोऽचि क्ङितीति च, तदेतत्फलितमाह **अजाद्योरार्धधातुकयोरिति** । अजाद्योः किम्, ग्लायते। यक् । जाग्लायते। यङ्। दासीय। डुदाञो लिङुत्तमैकवचनमिट्। आर्धधातुकयोः किम्, यान्ति। वान्ति। व्यतिरे। रा दाने। कर्मव्यतिहारे धातोर्लडुत्तमैकवचनमिट्। **दधिथेति**। एवं च अजाद्यार्धधातुकस्य क्त्त्वेन दधिव दधिमेत्यादिष्वातो लोपसिद्धावपि दधिथ पपिथेत्यादिरूपसिद्धये सूत्रेऽस्मिन्निटीति ग्रहणमावश्यकमिति ज्ञेयम् । यदि तु इडागम एवात्र गृह्यते व्याख्यानात्तदाऽचि क्ङितीत्येतदार्धधातुकस्यैव विशेषणं न तूभयोः। **दाधा घ्वदाप्**। इह दारूपाश्चत्वारः। डुदाञ्

विना। २३७४ एर्लिङि। (६-४-६७) घुसंज्ञानां मास्थादीनां चैत्वं स्यादार्धधातुके किति लिङि। धेयात् धेयास्ताम् धेयासुः। २३७५ विभाषा धेट्श्व्योः। (३-१-४९) आभ्यां च्लेश्चङ् वा स्यात्कर्तृवाचिनि लुङि परे।

'दो अवखण्डने' 'देङ् रक्षणे' इत्यनयोः लाक्षणिकयोश्च, धेत्यनेन स्वाभाविकाकारान्तस्य 'डु धाञ् धारणपोषणयोः' इत्यस्य, लाक्षणिकस्य 'धेट् पाने' इत्यस्य च ग्रहणम्। 'गामादाग्रहणेष्वविशेषः' इति परिभाषाबलात् तत्र दाग्रहणेन धारूपस्यापि ग्रहणाच। अत एव 'दो दद् घोः' इत्यत्र धेर्निवृत्त्यर्थं दाग्रहणमर्थवत्, दधाते र्हिभावविधानादेव निवृत्तिसिद्धेः, तदाह **दारूपा धारूपाश्चेति। एर्लिङि।** एरिति प्रथमान्तम्। 'आर्धधातुके' इत्यधिकृतम्। घुमास्थागापाजहातिसाम् इत्यनुवर्तते। घु मा स्था गा पा जहाति सा एषां द्वन्द्वात् षष्ठीबहुवचनम्, तदाह **घुसंज्ञानां मास्थादीनामिति। किति लिङीति।** 'दीङो युट्–' इत्यतः कितीत्यनुवृत्तेरिति भावः। ङितीति नानुवर्तते। लिङार्धधातुकस्य ङित्त्वासंभवात्। लुङि च्लेः सिचि प्राप्ते **विभाषा धेट्।** 'च्लि लुङि' इत्यनुवर्तते। 'णिश्रिद्रुस्रुभ्यः–' इत्यतः कर्तरि चङिति च, तदाह **आभ्यामिति।** धेट् श्वि आभ्यामित्यर्थः।

दाने। दाण् दाने। दो अवखण्डने। देङ् रक्षणे। धारूपौ तु द्वौ। डुधाञ् धारणपोषणयोः। धेट् पाने। अनुबन्धानामनेकान्तत्वाद् 'आदेच उपदेशे–' इत्यत्वे दोदेङ्धेटामनुकरणे दाधारूपत्वमस्ति। एवं च दाश्च दाश्च दाश्च दाः। धाश्च धाश्च धौ। दाश्च धौ च दाधा इति विग्रहः। **दाप्दैपौ विनेति।** दाप् लवने दैप् शोधने एतद्भिन्ना इत्यर्थः। दैपः पित्त्वमिह प्रतिषेधार्थं न त्वनुदात्तार्थम्। 'अनुदात्तौ सुप्पित्तौ' इति प्रत्ययस्यैव पितोऽनुदात्तत्वात्। न च दैपो लाक्षणिकत्वादस्य प्रतिषेध इति शङ्क्यम्, पित्करणस्यानर्थक्यप्रसङ्गात्। इदमेव दैपः पित्त्वं 'गामादाग्रहणेष्वविशेषः' इति परिभाषाया ज्ञापकमित्याहुः। अदाबिति किम्, दातं बर्हिः। लूनमित्यर्थः। इह 'दो दद्घोः' इति दद्भावो न। अवदातं मुखम्। शुद्धमित्यर्थः। इह तु 'अच उपसर्गात्–' इति तादेशो न। **एर्लिङि। मास्थादीनामिति।** मास्थागापाजहातिसामित्यर्थः माङ् माने। गामादाग्रहणेष्वविशेषेऽपि माङ्मेङौ नेह गृह्येते, लिङि कित्त्वासंभवात्। गतिनिवृत्तौ। गै शब्दे। गाङ् गतौ इति तु न गृह्यते, लिङि कित्त्वासंभवादेव। पा पाने। ओहाक् त्यागे। षोऽन्तकर्मणि। देयात्। स्थेयात्। गेयात्। पेयात्। हेयात्। अवसेयात्। आर्धधातुके किम्, मायात्। मायाताम्। मायुः। कितीति किम्, दासीष्ट। इह 'दीङो युडचि–' इत्यतः क्ङितीत्यनुवर्तमानेऽपि प्रकृतोपयोगितया कितीत्यस्यैवानुवृत्तिः कृता। **विभाषा धेट्।** 'च्लि लुङि' इत्यनुवर्तते 'णिश्रि–' इत्यस्मात्कर्तरीति

'चङि' (सू २३१५) इति द्वित्वम् । अदधत् अदधताम् । **२३७६ विभाषा घ्राधेट्शाच्छासः । (२-४-७८)** एभ्यः सिचो लुग्वा स्यात्परस्मैपदे परे। अघ्रात् अघ्राताम् अघ्रुः। **२३७७ यमरमनमातां सक्च । (७-२-७३)** एषां सक् स्यादेभ्यः सिच इट् च परस्मैपदेषु । अघ्रासीत् अघ्रासिष्टाम् अघ्रासिषुः। ग्लै १०३ म्लै १०४ हर्षक्षये। हर्षक्षयो धातुक्षयः।

अदधदिति । चङि द्वित्वे आल्लोप इति भावः । अदधताम् अदधन् । अदधः अदधतम् अदधत । अदधम् अदधाव अदधाम । चङभावपक्षे विशेषमाह **विभाषा घ्रा** । 'ण्यक्षत्रियार्ष-' इत्यतो लुगित्यनुवर्तते। 'गातिस्था-' इत्यतः सिचः परस्मैपदेष्विति, तदाह **एभ्य इति** । 'घ्रा गन्धोपादाने' 'धेट् पाने' 'शो तनूकरणे' 'छो छेदने' 'षो अन्तकर्मणि' एषां समाहारद्वन्द्वात्पञ्चम्येकवचनम् । शोप्रभृतीनां कृतात्वानां निर्देशः । धेटः 'गातिस्थाघुपा-' इति नित्यं प्राप्ते अन्येषामप्राप्ते वचनम्। **अघ्रुरिति** । 'उस्यपदान्तात्' इति पररूपम्। अघ्राः अघ्रातम् अघ्रात । अघ्राम् अघ्राव अघ्राम। सिचो लुगभावपक्षे आह **यमरम** । यम, रम, नम, आत्, एषां द्वन्द्वात्षष्ठीबहुवचनम् । आदित्यनेन आदन्तं गृह्यते, तदाह **एषां सक् स्यादिति** । सकि ककार इत्, अकार उच्चारणार्थः । कित्वादन्तावयवः । चकारेण 'इडत्यर्ति-' इत्यत इडिति 'स्तुसुधूञ्भ्यः-' इत्यतः परस्मैपदेष्विति चानुकृष्यते । 'अञ्जेः सिचि' इत्यतः सिचीति च । तच्च षष्ठ्या विपरिणम्यते, तदाह **एभ्यः सिच इट् चेति** । **अघ्रासीदिति** । धातोः सगागमः । सिच इट्, ईट्, 'इट ईटि' इति सिज्लोपः । **अघ्रासिष्टामिति** । अपृक्तत्वाभावादीडभावान्न सिज्लोपः। सस्य षत्वे तकारस्य ष्टुत्वेन टः। **अघ्रासिषुरिति** । अघ्रासीः अघ्रासिष्टम् अघ्रासिष्ट। अघ्रासिषम् अघ्रासिष्व अघ्रासिष्म। यद्यपि अघ्रासीदित्यत्र सगिटोर्विधिर्व्यर्थ एव, तथापि अघ्रासिष्टामित्याद्यर्थम् आतः सगिड्विधानम् । यमादीनां तु अयंसीत्यादौ हलन्तलक्षणवृद्धेरभावार्थम्, अयंसिष्टामित्याद्यर्थं च । तदेतत्

च, तदाह **च्लेश्चङ् चेत्यादि** । **अदधदिति** । चङि आतो लोपः । श्वयतेरुदाहरणमशिश्वियत्। **विभाषा घ्रा** । इह 'ण्यक्षत्रियार्ष-' इत्यतो लुगनुवर्तते, 'गातिस्था-' इत्यतः सिचः परस्मैपदेष्विति च तदाह **सिचो लुग्वेत्यादि** । परस्मैपदे किम्, व्यत्यघ्रास्त । **अघ्रुरिति** । 'आतः' इति झेर्जुस् । **यमरमनमातां** । इह 'आर्धधातुकस्येड्वलादेः' इतीडनुवर्तते । 'अञ्जेः सिचि' इत्यतः सिज्ग्रहणम, 'स्तुसुधूञ्भ्यः' इत्यतः परस्मैपदग्रहणं च, तदाह **एभ्यः सिच इडित्यादि** । अयंसीत्। अयंसिष्टाम्। व्यरंसीत्। व्यरंसिष्टाम्। अनंसीत् । अनंसिष्टाम् । परस्मैपदेषु किम्, उदायंस्त

ग्लायति। जग्लौ। जग्लिथ, जग्लाथ। २३७८ वाऽन्यस्य संयोगादेः। (६-४-६८) घुमास्थादेरन्यस्य संयोगादेर्धातोरात एत्त्वं वा स्यादार्धधातुके किति लिङि। ग्लायात्, ग्लेयात्। अग्लासीत्। म्लायति। द्यै १०५ न्यक्करणे। न्यक्करणं तिरस्कारः। द्रै १०६ स्वप्ने। ध्रै १०७ तृप्तौ। ध्यै १०८ चिन्तायाम्। रै १०९ शब्दे। स्त्यै ११० ष्ट्यै १११ शब्दसंघातयोः। स्त्यायति। षोपदेशस्यापि सत्वे कृते रूपं तुल्यम्। षोपदेशफलं तु तिष्ट्यासति अतिष्ट्यपदि-

---

तत्तद्धातुषु स्पष्टीभविष्यति। अधास्यत्। ग्लै म्लै हर्षक्षये। धातुक्षय इति। बलक्षय इत्यर्थः। अनिटाविमौ। ग्लायतीति। शपि आयादेशः। शिद्विषयत्वादात्त्वं न। जग्लाविति। णलि आत्त्वे 'आत औ णलः' इति औभावे वृद्धिरिति भावः। अतुसादौ द्वित्वे कृते आतो लोपः। जग्लतुः जग्लुः। भारद्वाजनियमात्थलि वेडित्याह जग्लिथ, जग्लाथेति। इट्पक्षे आल्लोपः। जग्लथुः जग्ल। जग्लौ जग्लिव जग्लिम। ग्लाता। ग्लास्यति। ग्लायतु। अग्लायत्। ग्लायेत्। आशीर्लिङि आत्वे कृते ग्लायात् इति स्थिते वाऽन्यस्य। 'आर्धधातुके' इत्यधिकृतम्। 'एर्लिङि' इत्यनुवर्तते। एरिति प्रथमान्तम्। 'आतो लोप इटि च' इत्यत आत इत्यनुवर्तते। कस्मादन्यस्येत्यपेक्षायां 'घुमास्थागापाजहातिसां हलि' इति प्रकृतत्वात्तेभ्योऽन्यस्येति लभ्यते, तदाह घुमास्थादेरित्यादिना। कितीति। 'दीङो युडचि क्ङिति' इत्यतः तदनुवृत्तेरिति भावः। ङितीति तु नानुवर्तते, लिङार्धधातुकस्य ङित्वासंभवात्। अग्लासीदिति। यमरमेत्यादन्तत्वात् सगिटौ। अग्लासिष्टाम् अग्लासिषुरित्यादि। अग्लास्यत्। म्लायतीति। ग्लैधातोरिव रूपाणीति भावः। द्यै न्यक्करण इति। यकारमध्योऽयम्। इत आरभ्य ऐकारान्तानां संयोगादीनां ग्लैवदेव रूपाणि प्रत्येतव्यानि। 'रै शब्दे' इत्यादीनां तु असंयोगादीनाम् आशीर्लिङि 'वाऽन्यस्य संयोगादेः' इत्येत्त्वं न भवति, रायादित्यादि रूपमिति विशेषः। स्त्यै ष्ट्यै इति। षोपदेशेषु स्त्याधातोः पर्युदासादाद्य न षोपदेशः। द्वितीयस्तु षोपदेशः। तकारस्य ष्टुत्वसंपन्नटकारनिर्देशः। सत्वे कृते इति। 'धात्वादेः–' इति षस्य सकारे सति निमित्तापायात् ष्टुत्वनिवृत्तिरिति भावः। तिष्ट्यासतीति। ष्ट्यैधातोः कृतसत्वात् सनि आत्त्वे स्त्या स इति सन्नन्ताल्लटि तिपि शपि 'सन्यङोः' इति द्वित्वे 'शर्पूर्वाः खयः' इति सकारयकारनिवृत्तौ तास्त्यासति इति स्थिते अभ्यासह्रस्वे 'सन्यतः' इति इत्वे सकारस्य इणः परत्वादादेश-

---

भारम्। अरंस्त। अरंसाताम्। वान्यस्य। अन्यस्य किम्, स्थेयात्। द्यै न्यक्करणे। द्यायति। दद्यौ। अद्यासीत्। घुमास्थेत्यत्रेति। व्याख्यानात्तन्त्रान्तरे जहातिस्य-

स्यत्र षत्वम् । खै ९१२ खदने । चै ९१३ जै ९१४ षै ९१५ क्षये । स्रायति । जजौ । ससौ । साता । 'घुमास्था–' (सू २४६२) इत्यत्र 'विभाषा घ्राधेट्–' (सू २३७६) इत्यत्र च स्यतेरेव ग्रहणं न स्यस्य । तेन एत्त्वसिज्लुकौ न । सायात् । असासीत् । कै ९१६ गै ९१७ शब्दे । गेयात् । अगासीत् । शै ९१८ श्रै ९१९ पाके । पै ९२० ओ वै ९२१ शोषणे । पायात् । अपासीत् । 'घुमास्था–' (सू २४६२) इतीत्त्वम्, तदपवाद 'एर्लिङि' (सू २३७४) इत्येत्त्वम्, 'गातिस्था–' (सू २२२३) इति सिज्लुक् च न । पारूपस्य लाक्षणिकत्वात् । ष्टै ९२२ वेष्टने ।

सकारत्वाच्च षत्वे तिष्ठ्यासतीति रूपम् । स्वाभाविकसकारादित्वे त्वादेशसकारादित्वाभावात् षत्वं न स्यादिति भावः । **अतिष्ठ्यपदिति** । ष्ठ्यैधातोः कृतसत्वात् णौ आत्त्वे 'अर्तिह्री–' इति पुकि स्त्यापि इति ण्यन्ताद् लुङि अडागमे तिपि 'इतश्च' इति इकारलोपे 'णिश्रिद्रुस्रुभ्यः–' इति च्लेश्चङि 'णेरनिटि' इति णिलोपे 'णौ चङ्युपधायाः–' इति ह्रस्वे 'चङि' इति स्त्यप् इत्यस्य द्वित्वे 'शर्पूर्वाः–' इति सकारयकारपकाराणां निवृत्तौ सत्यां 'सन्यतः' इति इत्वे इणः परत्वादादेशसकारत्वाच्च सस्य षत्वे तस्य ष्टुत्वे अतिष्ठ्यपदिति रूपम् । स्वाभाविकसकारत्वे त्वादेशसकारत्वाभावात् षत्वं न स्यादिति भावः । **जजौ ससाविति** । जैधातोः षैधातोश्च णलि आत्त्वे द्वित्वादौ वृद्धिरिति भावः । ननु 'एर्लिङि' इत्यत्र 'घुमास्थागापाजहातिसाम्–' इत्यनुवृत्त्या सैधातोराशीर्लिङि सायादित्यत्र एत्त्वं स्यात् । तथा लुङि सगिटोः असासीत् असासिष्टामित्येव इष्यते । तत्र 'विभाषा घ्राधेट्शाच्छासः' इति सिचः पाक्षिके लुकि असात् असातामित्यपि प्रसज्येतेत्यत आह **घुमास्थेत्यत्रेत्यादि । स्यतेरिति** । 'षो अन्तकर्मणि' इति श्यन्विकरणस्येत्यर्थः । अत्र व्याख्यानमेव शरणम् । 'विभाषा घ्राधेट्–' इत्यत्र श्यन्विकरणाभ्यां साहचर्याच्च । **पै ओवै शोषणे** । पायति । वायति । 'ओदितश्च' इति निष्ठानत्वार्थमोदित्त्वम् । ननु पैधातोः कर्मणि लटि यकि आत्त्वे पायते इत्यत्र 'घुमास्थागापाजहातिसां हलि' इति ईत्त्वं स्यात् । तथा आशीर्लिङि पायाद् इत्यत्र 'एर्लिङि' इति एत्त्वं स्यात्, तत्रापि 'घुमास्थागापाजहातिसाम्–' इत्यनुवृत्तेः । तथा लुङि अपासीदित्यत्र 'गातिस्था–' इति सिचो लुकि 'यमरम–' इति इटः अभावात्तत्संनियोगशिष्टः सगपि न स्यादित्यत

तीनामिति श्यना निर्देशाच्चेति भावः । **विभाषा घ्रेति** । श्यन्विकरणाभ्यां शाच्छाभ्यां साहचर्यादिति भावः । एवं शाच्छासेति युग्विधावपि स्यतेरेव ग्रहणमिति बोध्यम् । तेनास्य धातोः 'अर्तिह्री–' इति पुगेव । सापयति । **पै ओवै** । पायति । वायति । शुष्यतीत्यर्थः । 'ओदितश्च' इति निष्ठानत्वम् । वानम् । 'शुष्के वानमुभे

स्त्यायति । ष्ट्यै ९२३ वेष्टने । शोभायां च इत्येके । स्त्यायति । दैप् ९२४ शोधने । दायति । अघुत्वादेत्त्वसिज्लुकौ न । दायात् । अदासीत् । पा ९२५ पाने । 'पाघ्राध्मा-' (सू २३६०) इति पिबादेशः । तस्यादन्तत्वान्नोपधागुणः । पिबति । पेयात् । अपात् । घ्रा ९२६ गन्धोपादाने । जिघ्रति । घ्रायात्, घ्रेयात् । अघ्रात्, अघ्रासीत् । ध्मा ९२७ शब्दाग्निसंयोगयोः । धमति । ष्ठा ९२८

आह **घुमास्थेतीत्त्वमित्यादिना । पारूपस्येति ।** उदाहृतसूत्रत्रये लक्षणप्रतिपदोक्तपरिभाषया आदन्तत्वेन उपदिष्टस्यैव पाधातोर्ग्रहणम्, नतु पैधातोः कृतात्वस्येति भावः । एवं च प्रकृते पैधातोराशीर्लिङि पायादित्येव रूपम् लुङि सगिटोः अपासीत्, अपासिष्टामित्येव रूपम् । **ष्टै वेष्टन इति ।** षोपदेशोऽयम् । कृतष्टुत्वनिर्देशः । सत्वे कृते ष्टुत्वनिवृत्तिः, तदाह **स्तायतीति ।** ष्ट्यैधातुरपि षोपदेशः कृतष्टुत्वनिर्देशः । सत्वे कृते ष्टुत्वनिवृत्तिः, तदाह **स्त्यायतीति । दैप् शोधने । अघुत्वादिति ।** घुसंज्ञाविधौ दाब्दैपौ विनेत्युक्तेरिति भावः । **पा पाने पिबादेश इति ।** शिद्विषय इति शेषः । **तस्येति ।** पिबादेशस्य अदन्तत्वाद् न लघूपधगुण इति भाष्ये स्पष्टम् । अनिडयम् । पपौ पपतुः पपुः । भारद्वाजनियमात् थलि वेट्— पपिथ, पपाथ पपथुः पप । पपौ पपिव पपिम । क्रादिनियमादिट् । पाता । पास्यति । पिबतु । अपिबत् । पिबेत् । आशीर्लिङि 'एर्लिङि' इत्येत्त्वमभिप्रेत्याह **पेयादिति ।** 'गातिस्था-' इति सिचो लुगित्यभिप्रेत्याह **अपादिति ।** अपाताम् अपुः । अपाः अपातम् अपात । अपाम् अपाव अपाम । अपास्यत् । **घ्रा गन्धोपादाने ।** 'पाघ्राध्मा-' इति शिद्विषये जिघ्रादेशः, तदाह **जिघ्रतीति ।** अनिडयम् । जघ्रौ जघ्रतुः जघ्रुः भारद्वाजनियमात् थलि वेट्—जघ्रिथ, जघ्राथ जघ्रथुः जघ्र । जघ्रौ जघ्रिव जघ्रिम । क्रादिनियमादिट् । घ्राता । घ्रास्यति । जिघ्रतु । अजिघ्रत् । जिघ्रेत् । आशीर्लिङि 'वाऽन्यस्य संयोगादेः' इत्येत्त्वविकल्पं मत्वा आह **घ्रायात्, घ्रेयादिति ।** 'विभाषा घ्राधेट्-' इति सिचो वा लुक् । लुगभावपक्षे आदन्तत्वात्सगिटौ, तदाह **अघ्रात्, अघ्रासीदिति ।** ध्माधातुरनिट् । 'पाघ्राध्मा-' इति शिद्विषये धमादेशः,

---

त्रिषु' इत्यमरः । **अदन्तत्वादिति ।** केचित्तु अभ्यस्तपरिभाषयापि गुणाभावं समर्थयन्ति । **घ्रा** गन्धोपादाने । गन्धोपादानं गन्धग्रहणम् । नन्वेवं कर्मणो धात्वर्थेनोपसंग्रहादकर्मकत्वेन 'जिघ्रति कुसुमम्' इत्यादिप्रयोगो न सिध्येदिति चेत् । अत्राहुः— यद्धात्वर्थेन कर्तृनिष्ठकर्मण उपसंग्रहस्तस्यैव धातोरकर्मकत्वं नान्यस्य । भवति हि जीवति नृत्यतीत्यादेरकर्मकत्वम् । तदर्थोपसंगृहीतकर्मणः कर्तृनिष्ठत्वात् । घ्राधातोः कर्मणस्त्वतथात्वान्नाकर्मकतेति । **ध्मा** शब्दाग्निसंयोगयोः । शब्दशब्देन तदनुकूलो

गतिनिवृत्तौ । तिष्ठति । 'स्थादिष्वभ्यासेन–' (सू २२७७) इति षत्वम् , अधितष्ठौ । 'उपसर्गात्–' (सू २२७०) इति षत्वम् , अधिष्ठाता । स्थेयात् । म्ना ९२९ अभ्यासे । मनति । दाण् ९३० दाने । प्रणियच्छति । देयात् । अदात् । हृ ९३१ कौटिल्ये । ह्वरति । २३७९ **ऋतश्च संयोगादेर्गुणः** । (७-४-१०) ऋदन्तस्य संयोगादेरङ्गस्य गुणः स्याल्लिटि । किदर्थमपीदं परत्वाण्णल्यपि भवति ।

तदाह **धमतीति** । दध्मौ दध्मतुः दध्मुः । दध्मिथ, दध्माथ दध्मथुः दध्म । दध्मौ दध्मिव दध्मिम । ध्माता । ध्मास्यति । धमतु । अधमत । धमेत् । ध्मायात् , ध्मेयात् । अध्मासीत् । अध्मास्यत् । ष्ठाधातुः षोपदेशः कृतष्टुत्वनिर्देशः । शिद्विषये 'पाघ्रा–' इति तिष्ठादेशः, तदाह **तिष्ठतीति** । तस्थौ । अधितष्ठावित्यत्र इण्कवर्गाभ्यां परत्वाभावेऽपि षत्वमाह **स्थादिष्विति** । तस्थतुः तस्थुः । तस्थिथ, तस्थाथ तस्थथुः तस्थ । तस्थौ तस्थिव तस्थिम । स्थाता । अधिष्ठातेत्यत्र 'सात्पदाद्योः' इति षत्वनिषेधमाशङ्क्याह **उपसर्गादिति षत्वमिति** । स्थास्यति । तिष्ठतु । अतिष्ठत् । तिष्ठेत् । आशीर्लिङि संयोगादित्वेऽपि घुमास्थादेरन्यत्वाभावादेत्त्वविकल्पो न, किंतु 'एर्लिङि' इति नित्यमेव एत्वम् , तदाह **स्थेयादिति** । 'गातिस्था–' इति सिचो लुक् । अस्थात् । अस्थास्यत् । **म्ना अभ्यास इति** । अयमप्यनिट् । 'पाघ्रा–' इति शिद्विषये मनादेशः तदाह **मनतीति** । मम्नौ मम्नतुः मम्नुः । मम्निथ, मम्नाथ मम्नथुः मम्न । मम्नौ मम्निव मम्निम । म्नाता । म्नास्यति । मनतु । अमनत् । मनेत् । म्नायात् , म्नेयात् , अम्नासीत् । अम्नास्यत् । **दाण् दान इति** । अयमप्यनिट् । 'पाघ्रा–' इति शिद्विषये यच्छादेशः । **प्रणियच्छतीति** । 'नेर्गद–' इति णत्वम् । ददौ ददतुः ददुः । ददिथ, ददाथ ददथुः दद । ददौ ददिव ददिम । दाता । दास्यति । यच्छतु । अयच्छत् । यच्छेत् । आशीर्लिङि 'एर्लिङि' इत्येत्त्वं मत्वा आह **देयादिति** । 'गातिस्था–' इति सिचो लुकं मत्वा आह **अदादिति** । **हृ कौटिल्य इति** । अयमप्यनिट् । **ह्वरतीति** । शपि गुणे रपरत्वम् । **ऋतश्च** । **लिटीति** । 'दयतेर्दिगि

वायुरिह गृह्यते । तेन शङ्खं धमतीतिवद् मृदङ्गं धमतीति प्रयोगो नेत्याहुः । अग्निसंयोगे सुवर्णं धमति । अग्निना संयुनक्तीत्यर्थः । **स्थेयादिति** । 'एर्लिङि' इति नित्यमेत्वम् । लुङि अस्थात् । **म्ना** अभ्यासे । मनति विद्यामभ्यस्यतीत्यर्थः । मम्नौ । अम्नासीत् । **अदादिति** । 'गतिस्था–' इति सिचो लुक् । **ऋतश्च** । संयोगादेः किम् , चक्रतुः । चक्रुः । तपरकरणं स्पष्टार्थम् । स्तॄञ् इत्यादेर्लिटि तस्तरतुरित्यादौ 'ऋच्छत्यृताम्' इति गुणस्य जायमानत्वात् । चकारो मन्दप्रयोजनः । 'दयतेर्दिगिलिटि' इत्यतोऽनुवर्तनादाह **गुणः स्याल्लिटीति** । अवृद्धिनिमित्ते लिटीति प्राचो व्याख्यानं

रपरत्वम्। उपधावृद्धिः। जहार जह्रतुः जह्रुः। जह्र्थ। हर्ता। 'ऋद्धनोः स्ये' (सू २३६६) हरिष्यति। २३८० **गुणोऽर्तिसंयोगाद्योः।** (७-४-२९) अर्तेः संयोगादेर्ऋदन्तस्य च गुणः स्याद्यकि यादावार्धधातुके लिङि च। ह्रियात्। अहार्षीत्। अहार्ष्टाम्। स्वृ ९३२ शब्दोपतापयोः। 'स्वरतिसूति-' (सू २२७९)

लिटि' इत्यतः तदनुवृत्तेरिति भावः। ननु तिप्सिप्मिप्सु सार्वधातुकार्धधातुकयोरित्येव गुणे सिद्धे किमर्थमिदमित्यत आह **किदर्थमपीदमिति।** अतुसादिकिदर्थं णलाद्यकिदर्थं चेत्यर्थः। ननु अस्य गुणस्य अतुसादिषु चरितार्थत्वाद् णलि 'अचो ञ्णिति' इति वृद्धिप्रसङ्गात्कथं णलि अयं गुण इत्यत आह **परत्वाण्णल्यपि भवतीति।** 'अचो ञ्णिति' इति वृद्ध्यपेक्षया अस्य गुणस्य परत्वादित्यर्थः। तर्हि जहार इति कथमित्यत आह **उपधावृद्धिरिति।** 'अत उपधायाः' इत्यनेनेति शेषः। **जह्र्थेति।** क्रादिनियमप्राप्तस्य इटः 'अचस्तास्वत्-' इति 'ऋतो भारद्वाजस्य' इति च निषेधादिति भावः। जह्रथुः जह्र। जहार, जहर जह्रिव जह्रिम। क्रादिनियमादिट्। हरतु। अहरत्। हरेत्। आशीर्लिङि ह्र यात् इति स्थिते कित्त्वाद्गुणनिषेधे प्राप्ते— **गुणोऽर्ति।** भौवादिको जौहोत्यादिकश्च ऋधातुः अर्तीत्यनेन गृह्यते। लुका निर्देशस्तु न विवक्षितः। 'अङ्गस्य' इत्यधिकृतम्। 'रीङृतः' इत्यत ऋत इत्यनुवर्तते। तच्च अङ्गविशेषणम्, तदन्तविधिः, ऋदन्तस्याङ्गस्येति लभ्यते। संयोगाद्योरित्यपि तद्विशेषणम्। 'अकृत्सार्वधातुकयोः-' इत्यतः असार्वधातुकग्रहणमनुवर्तते। आर्धधातुके इति लभ्यते। 'रिङ् शयग्लिङ्क्षु' इत्यतो यकि लिङीति च लभ्यते। 'अयङ् यि क्ङिति' इत्यतो यीति सप्तम्यन्तमनुवर्तते। आर्धधातुकविशेषणत्वात्तदादिविधिः, तदाह **अर्तेरित्यादिना।** तथा च हृ यात् इति स्थिते गुणे रपरत्वे रूपमाह **ह्रियादिति। अहार्षीदिति।** सिचि वृद्धिः, रपरत्वं षत्वम्। अह्वरिष्यत्।

तु नादर्तव्यम्। न च स्वविषये वृद्धिर्बाधिकेति फलितार्थकथनपरतया तदुक्तिः संगच्छत इति वाच्यम्। परत्वेन गुणस्यैव न्याय्यत्वादिति भावः। **गुणोऽर्ति।** अर्तीति भ्वादिह्वाद्योर्ग्रहणम्। लुका निर्देशस्तु सौत्रः। ऋग्रहणे कर्तव्ये शितपा निर्देशो यङ्लुङ्निवृत्त्यर्थः। 'रीङ् ऋतः' इत्यस्मादृत इति वर्तते, तच्च संयोगादित्वेन विशेष्यते, तदाह **संयोगादेरिति।** अर्तिसंयोगाद्यो र इत्यकारे विधेये गुणग्रहणं चिन्त्यप्रयोजनम्। 'अयङ् यि क्ङिति' इति सूत्राद् यीत्यनुवर्तते। तच्च लिङो विशेषणम्। 'रिङ् शयग्लिङ्क्षु' इति सूत्रायग्ग्रहणस्य लिङ्ग्रहणस्य चानुवर्तनादित्यभिप्रेत्याह **यकि यादाविति।** आर्धधातुके इत्येतद् 'अकृत्सार्वधातुकयोः-' इत्यनुवृत्तिपर्यालोचनया फलितार्थकथनमिति ज्ञेयम्। संयोगादेरिति किम्, क्रियात्। यादीति किम्, संस्कृषीष्ट

इति वेद् । सस्वरिथ, सस्वर्थ । वमयोस्तु । २३८१ श्र्युकः क्किति । (७-२-११) श्रिञ एकाच उगन्ताच्च परयोर्गित्कितोरिण्न स्यात् । परमपि स्वरत्यादिविकल्पं बाधित्वा पुरस्तात्प्रतिषेधकाण्डारम्भसामर्थ्यादनेन निषेधे प्राप्ते क्रादिनियमा-

---

स्वृ शब्दोपतापयोरिति । अयमप्यनिट् । स्वरति । लिटि तु कित्यपि गुणः । णलि तु कृते गुणे रपरत्वे उपधावृद्धिः । सस्वार सस्वरतुः सस्वरुः । थलि तु क्रादिनियमप्राप्तस्य इटः 'अचस्तास्वत्–' इति 'ऋतो भारद्वाजस्य' इति च नित्य-निषेधे प्राप्ते आह **स्वरतिसूतीति वेडिति । सस्वरिथ, सस्वर्थेति** । सस्वरथुः सस्वर । सस्वार, सस्वर । इत्यपि ज्ञेयम् । **वमयोस्त्विति** । क्रादिनियमाश्रित्य-मिडित्यन्वयः । अत्र इण्निषेधं शङ्कितुमाह **श्र्युकः क्किति** । श्रिश्च उक् चेति समाहारद्वन्द्वात् षष्ठी । उक् प्रत्याहारः । 'अङ्गस्य' इत्यधिकृतं पञ्चम्या विपरिणतम् उका विशेष्यते । तदन्तविधिः । 'एकाच उपदेशे–' इत्यत एकाच इत्यनुवृत्तम् इगन्तेऽङ्गेति । 'नेड्वशि कृति' इत्यतो नेडिति । क्कितीति सप्तमी षष्ठ्यर्थे । ग् च क् च क्कौ तौ इतौ यस्येति विग्रहः । गकारस्य चर्त्वेन निर्देशः, तदाह **श्रिञ एकाच्च इत्यादिना** । 'गकारप्रश्लेषः' किम् ? भूष्णुः । 'ग्लाजिस्थश्च ग्स्नुः' इति चकाराद् भूधातोः ग्स्नुः । तस्य गित्त्वादिड् न । कित्वे तु स्थास्नुरित्यत्र 'घुमास्था–' इति ईत् स्यात् । इण्न स्यादित्यनन्तरम् अनेन निषेधे प्राप्ते इत्यन्वयः । नन्वियं शङ्का न युज्यते, 'श्र्युकः क्किति' इति निषेधं बाधित्वा परत्वात् 'स्वरतिसूति–' इति विकल्पस्य प्राप्तेरित्यत आह **परमपीत्यादि सामर्थ्यादित्यन्तम्** । पुरस्तात्प्रतिषेधकाण्डा-रम्भसामर्थ्यात्परमपि स्वरत्यादिविकल्पं बाधित्वा अनेन निषेधे प्राप्ते इत्यन्वयः । 'आर्धधातुकस्येट्–' इत्यादिविधिकाण्डात्प्रागेव 'नेड्वशि कृति' इत्यादिप्रतिषेधका-ण्डारम्भसामर्थ्यात् 'स्वरति–' इति विकल्पोऽप्यनेन बाध्यत इत्यर्थः । परमपीत्यादिः

आर्धधातुके किम्, इयूयात् । **स्वृ** । उपतापो रोगः । **श्र्युकः क्किति** । 'एकाच उपदेशे–' इत्यत एकाच इत्यनुवर्तते, तच्च उको विशेषणमित्याह **एकाच्च उगन्ता-दिति** । श्रितः । श्रितवान् । श्रित्वा । भूतः । भूत्वा । भूतिः । गित्युदाहरणम्—भूष्णुः । 'ग्लाजिस्थश्च–' इति ग्स्नुः । स च गिद्भवति न कित्, स्थास्नुरित्यत्र 'घुमास्था–' इतीत्वप्रसङ्गात् । एकाच इति किम्, जागरितः । जागरितवान् । ऊर्णोतेस्तु नुवद्भावेन ऊर्णुतः, ऊर्णुतवान् इति सिध्यति । उगन्तात्किम्, शयितः, शयितवान् । **पुरस्ता-दित्यादि** । 'आर्धधातुकस्येड्वलादेः' इत्यादिविधिकाण्डात्प्रागेव 'नेड्वशि कृति' इत्यादिप्रतिषेधकाण्डारम्भसामर्थ्यादित्यर्थः । **निषेधे प्राप्त इति** । स्वृतः ।

न्नित्यमिट् । सस्वरिव सस्वरिम । परत्वाद् '**ऋद्धनोः स्ये**' (६, २३६६) इति नित्यमिट् । स्वरिष्यति । स्वर्यात् । **अस्वारीत् अस्वारिष्टाम्** । अस्वार्षीत् अस्वार्ष्टाम् । स्मृ ९३३ चिन्तायाम् । ह्वृ[1] ९३४ संवरणे । सृ ९३५ गतौ । क्रादित्वान्नेट्, ससर्थ । सस्रिव । रिङ्, स्रियात् । असार्षीत् । असार्ष्टाम् । २३८२ **सर्तिशास्त्यर्तिभ्यश्च** । (३-१-५६) एभ्यश्च्लेरङ् स्यात्कर्तरि लुङि । इह लुक्शपा शासिना साहचर्यात् सर्त्यर्ती जौहोत्यादिकावेव गृह्येते । तेन

प्राप्ते इत्यन्तः शङ्काग्रन्थः । परिहरति **क्रादिनियमान्नित्यमिडिति** । प्रकृत्याश्रयः प्रत्ययाश्रयो वा यावान् इण्निषेधः स लिटि चेत् तर्हि क्रादिभ्य एवेत्युक्तत्वादिति भावः । लुटि स्वरिता स्वर्ता । लृटि स्ये 'स्वरति–' इति विकल्पं निरस्यति **परत्वादिति** । स्वरतु । अस्वरत् । स्वरेत् । **स्वर्यादिति** । आशीर्लिङि 'गुणोऽर्तिसंयोगाद्योः' इति गुणः । **अस्वारीदिति** । 'स्वरति–' इति इट्पक्षे वृद्धिरिति भावः । **अस्वार्षीदिति** । इडभावे 'सिचि वृद्धिः–' इति वृद्धिरिति भावः । **स्मृ चिन्तायामिति** । अयमप्यनिट् । स्मरति । लिटि 'ऋतश्च–' इति कित्यपि गुणः । णलि तु गुणे उपधावृद्धिः । सस्मार सस्मरतुः सस्मरुः । ऋदन्तत्वाद्भारद्वाजमतेऽपि क्रादिनियमप्राप्तस्य इटः थलि नित्यनिषेधः । सस्मर्थ सस्मरथुः सस्मर । सस्मार, सस्मर सस्मरिव सस्मरिम । स्मर्ता । लृटि स्ये 'ऋद्धनोः–' इति इट्—स्मरिष्यति । स्मरतु । अस्मरत् । स्मरेत् । आशीर्लिङि 'गुणोऽर्ति–' इति गुणः—स्मर्यात् । लुङि सिचि वृद्धौ रपरत्वम्—अस्मार्षीत् । अस्मरिष्यत् । **ह्वृ संवरण इति** । अयमपि स्मृधातुवत् । **सृ गताविति** । ऋदन्तोऽयमनिट् । सरति । लिटि संयोगादित्वाभावाद् ऋतश्चेति गुणो न । ससार सस्रतुः सस्रुः । **क्रादित्वान्नेडिति** । सृधातोः क्रादिस्थत्वादिति भावः । **ससर्थेति** । क्रादित्वात्थल्यपि नित्यं निषेध इति भावः । सस्रथुः सस्र । ससार, ससर सस्रिव सस्रिम—इत्यपि ज्ञेयम् । सर्ता । लृटि 'ऋद्धनोः–' इति इट्—सरिष्यति । सरतु । असरत् । सरेत् । आशीर्लिङि संयोगादित्वाभावाद् 'गुणोऽर्ति–' इति न गुणः । किंतु 'रिङ् शयग्लिङ्क्षु' इति रिङित्याह **रिङिति** । **स्रियादिति** । रीङि प्रकृते रिङ्विधिसामर्थ्यान्न दीर्घ इति भावः । **असार्षीदिति** । सिचि वृद्धौ रपरत्वम् । अत्र च्लेरङमाशङ्कितुमाह **सर्ति** । च्लि लुङीत्यनुवर्तते । 'शलइगुपधाद–' इत्यतः कर्तरि,

सृतः । धूत इत्यादौ यथेति भावः । **सृ** गतौ । सरति । सरिष्यति । **सर्तिशास्त्यर्ति** । परस्मैपदेष्विति न संबध्यते । पुषादियोगादस्य पृथक्करणात् । **आङः शासु** । इच्छायामित्यस्यात्र न ग्रहणं किं तु सर्त्यर्तिभ्यां साहचर्यात्परस्मैपदिनः

1 क्वचित्तु 'ह्वृ' इति पाठः । धातुपाठे तु 'ह्वृ' इत्युपलभ्यते ।

भ्वाद्योर्नाङ् । शीघ्रगतौ तु 'पाघ्राध्मा–' (सू २३६०) इति शिति धौरादेशः । धावति । ऋ १३६ गतिप्रापणयोः । ऋच्छति । २३८३ **ऋच्छत्यृताम्** । (७-४-११) तौदादिकस्य ऋच्छतेः ऋधातोः ऋतां च गुणः स्याल्लिटि । णलि प्राग्वदुपधावृद्धिः । आर आरतुः आरुः । २३८४ **इडत्त्यर्तिव्ययतीनाम्** ।

चङिति । तदाह **पञ्च इति** । ततश्च प्रकृते असार्षीदित्यत्र अङ् स्यादिति शङ्का सूचिता । तां परिहरति **इह लुमेत्यादिना** । इह अङ्विधौ शास्तीत्यनेन लुम-विकरणः शासिर्गृह्यते इति निर्विवादम्, तस्य विकरणान्तराभावात् । एवं च तत्साहचर्यात् सृधातुः ऋधातुश्च जौहोत्यादिकौ श्लुविकरणावेव गृह्येते इत्यर्थः, लुमविकरणत्वसाम्यादिति भावः । **तेनेति** । लुमविकरणयोरेव ग्रहणेन भ्वादि-गणस्थयोः सृधातुऋधात्वोरङ् नेत्यर्थः । तदेवं सृधातोर्गतिसामान्यवृत्तेरुक्तानि रूपाणि । यदि शीघ्रगतौ सृधातुः, तदा तस्य विशेषमाह **शीघ्रगतौ त्विति** । **धौरादेश इति** । धौशब्दस्य धौरिति प्रथमान्तम् । धौ इत्यौकारान्त आदेश इत्यर्थः । 'पाघ्रा–' इति सूत्रे सर्तीति श्तिपा निर्देशः । लुमविकरणनिर्देशस्तु अविवक्षित इति भावः । 'सर्तेर्वेगितायां गतौ धावादेशः' इति वार्तिकमभिप्रेत्येदम् । **धावतीति** । शपि सृधातोर्धौभावे आवादेशः । धावतु । अधावत् । धावेत् । **ऋगतिप्राप-णयोः** । अनिट् । 'पाघ्राध्मा–' इति शिद्विषये ऋच्छादेशः, तदाह **ऋच्छतीति** । ननु ऋ अतुस् इति स्थिते द्वित्वे उरदत्त्वे रपरत्वे हलादिशेषे 'अत आदेः' इति दीर्घे आ ऋ अतुस् इति स्थिते 'असंयोगात्–' इति कित्वादुत्तरखण्डस्य गुणाभावे यणं बाधित्वा परत्वादाद् गुणे अरतुरिति स्यादित्यतस्तत्र गुणविधानमाह **ऋच्छत्यृताम्** । 'दयतेर्दिगि लिटि' इत्यतो लिटीति 'ऋतश्च संयोगादेर्गुणः' इत्यतो गुण इति चानुवर्तते । ऋच्छति ऋ ऋृद् एषां द्वन्द्वाद्बहुवचनम् । बहुवचनादेव ऋकारप्रश्लेषो गम्यते । प्रश्लिष्टेन च ऋकारेण ऋधातुरेव गृह्यते । ऋवर्णान्तधातुग्रहणे 'ऋतश्च संयोगादेर्गुणः' इत्यस्य वैयर्थ्यात् । 'ऋच्छ गतीन्द्रियप्रलयमूर्तिभावेषु' इति तौदा-दिकस्य ऋच्छतीति श्तिपा निर्देशः । भौवादिकस्य धातोस्तु ऋग्रहणेनैव सिद्धेः, तदाह **तौदादिकस्य ऋच्छतेरित्यादिना** । किदर्थमपीदं सूत्रं परत्वादकित्यपि भवति । **णलि प्राग्वदिति** । 'ह्वृ कौटिल्ये' इत्यत्र उक्तया रीत्या किन्तु चरिता-र्थोऽप्ययं गुणः 'अचो ञ्णिति' इति वृद्ध्यपेक्षया परत्वाद् णल्यपि भवति । ततो रपरत्वे उपधावृद्धिरित्यर्थः । **आरेति** । ऋधातोर्लिटि तिपो णलि द्वित्वे उरदत्त्वे हलादिशेषे 'अत आदेः' इति दीर्घे उत्तरखण्डस्य वृद्धौ रपरत्वे सवर्णदीर्घ इति

शासेरेवेत्याहुः । असरत् । अशिषत् । आरत् । **प्राग्वादिति** । किदर्थमारब्धोऽपि

(७-२-६६) **अद् ऋ व्येञ् एभ्यस्थलो नित्यमिट् स्यात्। आरिथ। अर्ता। अरिष्यति। अर्यात्। आर्षीत् आर्ष्टाम्। गृ ९३७ घृ ९३८ सेचने। गरति। जगार। जगर्थ। जग्रिव। रिङ्। ग्रियात्। अगार्षीत्। ध्वृ ९३९ हूर्छने। स्व**

भावः। **आरतुरिति**। पूर्ववद् द्वित्वादौ आ ऋ अतुसिति स्थिते कित्वाद् गुणनिषेधे प्राप्ते 'ऋच्छत्यृताम्' इति गुणे रपरत्व सवर्णदीर्घ इति भावः। आरुरित्यप्येवम्। थलि तु क्रादिनियमप्राप्तस्य इटः 'अचस्तास्वत्–' इति ऋदन्तत्वाद् भारद्वाजमतेऽपि निषेधे प्राप्ते आह **इडत्यर्ति**। पञ्चम्यर्थे षष्ठी। 'अचस्तास्वत्–' इत्यतः थलीत्यनुवर्तते। 'विभाषा सृजिदृशोः' इति पूर्वसूत्राद्विभाषाग्रहणमस्वरितत्वान्नानुवर्तते, तदाह **अद् ऋ इत्यादिना**। 'आर्धधातुकस्येट्–' इत्यनुवृत्तौ पुनरिड्ग्रहणं तु 'न वृद्भ्यश्चतुर्भ्यः' इत्यतो नेत्यनुवृत्तिनिवृत्तये इत्याहुः। **आरिथेति**। आरथुः आरुः। आर आरिव आरिम। क्रादिनियमादिट्। **अरिष्यतीति**। 'ऋद्धनोः–' इति इट्। ऋच्छतु। आर्च्छत्। **अर्यादिति**। 'गुणोऽर्ति–' इति गुणे रपरत्वमिति भावः। **आर्षीदिति**। सिचि वृद्धिः। 'सर्तिशास्त्यर्तिभ्यश्च' इति अङ् तु न, तत्र भौवादिकस्य ऋधातोर्न ग्रहणमित्यनुपदमेवोक्तेरिति भावः। आरिष्यत्। 'ऋद्धनोः स्ये' इति इट्। **गृ घृ सेचने**। अनिटौ। **गरतीति**। **जगार**। असंयोगादित्वाद् 'ऋतश्च–' इति गुणो न। जग्रतुः जग्रुः। क्रादिनियमेन इटि प्राप्ते 'अचस्तास्वत्–' इति नेट्। ऋदन्तत्वाद्भारद्वाजमतेऽपि नेट्, तदाह **जगर्थेति**। जग्रथुः जग्र। जगार, जगर। **जग्रिवेति**। क्रादिनियमादिट्, जग्रिम। गर्ता। गरिष्यति। 'ऋद्धनोः–' इति इट्। गरतु। अगरत्। गरेत्। **रिङिति**। आशीर्लिङि असंयोगादित्वाद् 'गुणोऽर्ति–' इति गुणाभावे 'रिङ् शयग्लिङ्क्षु' इति रिङित्यर्थः। **ग्रियादिति**। रीङि प्रकृते रिङ्विधेर्न दीर्घः। **अगार्षीदिति**। सिचि वृद्धौ रपरत्वम्। अगार्ष्टाम्। अगरिष्यत्। 'ऋद्धनोः–' इति इट्। घृधातोस्तु भौवादिकस्य घृतं घर्मः घृणा इत्यत्रैव प्रयोगः, नान्यत्रेति 'तृज्वत्क्रोष्टुः' इति सूत्रे भाष्ये स्पष्टम्। **ध्वृ हूर्च्छने इति**। हूर्च्छनं कुटिलीभवनम्। ध्वरति। दध्वार। 'ऋतश्च–' इति गुणः। दध्वरतुः दध्वरुः। थलि 'अचस्तास्वत्–' इति क्रादिनियमप्राप्त इट् न। ऋदन्तत्वाच्च भारद्वाजमतेऽपि नेट्। दध्वर्थ दध्वरथुः दध्वर। दध्वार, दध्वर दध्वरिव दध्वरिम। क्रादिनियमादिट्। ध्वर्ता। 'ऋद्धनोः–' इति इट्–ध्वरिष्यति। ध्वरतु। अध्वरत्। ध्वरेत्। आशीर्लिङि 'गुणोऽर्ति–'

गुणः परत्वाण्णल्यपि भवति। रपरत्वम्। तत उपधावृद्धिरित्यर्थः। **नित्यमिट् स्यादिति**। 'विभाषा सृजिदृशोः' इत्यतो विभाषा नानुवर्तत इति भावः। **ध्वृ हूर्छने**।

१४० गतौ। सुस्रोथ। सुस्रुव। स्रूयात्। 'णिश्रि–' (सू २३१२) इति चङ्। लघूपधगुणादन्तरङ्गत्वादुवङ्, असुस्रुवत्। षु १४१ प्रसवैश्वर्ययोः। प्रसवोऽभ्यनुज्ञानम्। सुषोथ, सुषविथ। सुषुविव।। सोता। २३८५ स्तुसुधूञ्भ्यः परस्मैपदेषु। (७-२-७२) एभ्यः सिच इट् स्यात्परस्मैपदेषु। असावीत्। पूर्वोत्तराभ्यां लिङ्गभ्यां साहचर्यात्सुनोतेरेव ग्रहणमिति पक्षे असौ-

---

इति गुणः। ध्वर्यात्। अध्वार्षीत्। अध्वरिष्यत्। स्रु गतौ। अनिट्। स्रवति। सुस्राव। असुसादौ कित्त्वाद् गुणाभावे उवङ्। सुस्रुवतुः सुस्रुवुः। क्रादित्वान्नेट्, तदाह सुस्रोथेति। सुस्रुवथुः सुस्रुव। सुस्राव, सुस्रव। सुस्रुवेति। क्रादित्वान्नेट्। सुस्रुमेत्यपि ज्ञेयम्। स्रोता। स्रोष्यति। स्रवतु। अस्रवत्। स्रवेत्। स्रूयादिति। 'अकृत्सार्वधातुकयोः–' इति दीर्घ इति भावः। लुङि विशेषमाह णिश्रीति चङिति। 'चङि' इति द्वित्वमित्यपि द्रष्टव्यम्। ननु असुस्रु अ त् इति स्थिते रेफादुत्तरस्य उकारस्य 'सार्वधातुकार्धधातुकयोः' इति गुणस्य चङ्निमित्तकस्य ङित्त्वान्निषेधेऽपि उवङपेक्षया परत्वात् तिपं निमित्तीकृत्य रेफादुकारस्य लघूपधगुणः स्यादित्यत आह लघूपधगुणादन्तरङ्गत्वादुवङिति। बहिर्भूततिबपेक्षत्वाल्लघूपधगुणो बहिरङ्गः। अन्तर्गतचङपेक्षत्वादुवङन्तरङ्गः। अत उवङेव भवति। परादन्तरङ्गस्य बलवत्त्वादिति भावः। असुस्रुवदिति। अस्रोष्यत्। षु प्रसवेति। अत्र प्रसवशब्दस्य गर्भमोचनपरत्वभ्रमं वारयति। प्रसवोऽभ्यनुज्ञानमिति। 'ओं प्रणयेति ब्रह्मा प्रसौति' इत्यादौ तथा दर्शनादिति भावः। षोपदेशोऽयम्। शपि उवङं बाधित्वा परत्वात् 'सार्वधातुकार्धधातुकयोः' इति गुणः। सवति। सुषाव। असुसादौ कित्त्वाद् गुणाभावे उवङ्। सुषुवतुः सुषुवुः। भारद्वाजनियमात्थलि वेट्, तदाह सुषविथ, सुषोथेति। अकित्त्वाद् गुण इति भावः। सुषुवथुः सुषुव। सुषाव, सुषव। वमयोस्तु क्रादिनियमान्नित्यमिट्, तदाह सुषुविवेति। कित्त्वाद् गुणाभावे उवङ्। सोतेति। सोष्यति। सवतु। असवत्। सवेत्। सूयात्। लुङि असौषीदिति प्राप्ते स्तुसुधूञ्भ्यः। 'इडत्यर्ति–' इत्यत इडित्यनुवर्तते। 'अञ्जेः सिचि' इत्यतः सिचीत्यनुवृत्तं षष्ठ्या विपरिणम्यते, तदाह एभ्यः सिच इति। असावीदिति। सिचि वृद्धौ 'इट ईटि' इति सिज्लोपः।

ह्र्छनं कौटिल्यम्। स्रु गतौ। यद्यपि सामान्येन गतिरुक्ता, तथापि द्रवद्रव्यस्यैव गतिरिह ज्ञेया। स्रवति घृतम्। प्रसवोऽभ्यनुज्ञानमिति। 'देवस्य त्वा सवितुः प्रसवे' इत्यादावभ्यनुज्ञानार्थदर्शनात्। स्तुसुधूञ्भ्यः। परस्मैपदेषु किम्, अस्तोष्ट।

षीत्। श्रु ९४२ श्रवणे। २३८६ श्रुवः शृ च। (३-१-७४) श्रुवः शृ इत्यादेशः स्यात् श्नुप्रत्ययश्च। शपोऽपवादः। श्नोर्ङित्त्वाद्धातोर्गुणो न, शृणोति शृणुतः। २३८७ हुश्नुवोः सार्वधातुके। (६-४-८७) जुहोतेः श्नुप्रत्ययान्तस्यानेकाचोऽङ्गस्य चासंयोगपूर्वोवर्णस्य यण्स्यादजादौ सार्वधातुके।

पूर्वोत्तराभ्यामिति। स्तुभ्सूभ्यामित्यर्थः। **सुनोतेरिति**। षुञ् अभिषवे इति श्नुविकरणस्येत्यर्थः। **असौषीदिति**। इडभावे सिचि वृद्धिः इति भावः। असोष्यत्। **श्रु श्रवण इति**। उदन्तोऽयमनिट्। **श्रुवः शृ च**। शृ इति लुप्तप्रथमाकम्। चकारेण 'स्वादिभ्यः श्नुः' इति सूत्रस्थः श्नुः समुच्चीयते, तदाह **श्रुवः शृ इत्यादेशः स्यात् श्नुप्रत्ययश्चेति**। **शपोऽपवाद इति**। अनेन शब्विषये कर्त्रर्थसार्वधातुक एवास्य प्रवृत्तिः सूचिता। **श्नोर्ङित्त्वादिति**। 'सार्वधातुकमपित्' इत्यनेनेति भावः। **शृणोतीति**। तिपमाश्रित्य श्नोर्गुणः। तसादीनां ङित्वात् श्नोर्न गुणः, तदाह **शृणुत इति**। शृणु अन्तीति स्थिते अन्तेः ङित्त्वात् श्नोर्गुणनिषेधे सति उवङि प्राप्ते **हुश्नुवोः**। श्नोः प्रत्ययत्वात्तदन्तग्रहणम्। 'इणो यण्' इत्यतो यण् इत्यनुवर्तते, 'अचि श्नु–' इत्यतः अचीति। तस्य सार्वधातुकविशेषणत्वात्तदादिविधिः। 'एरनेकाचः–' इति सूत्रं एरितिवर्जमनुवर्तते। 'ओः सुपि' इत्यत ओरिति च षष्ठ्यन्तम्, तदाह **जुहोतेरित्यादिना**। असंयोगपूर्वस्येति तु उकारस्य विशेषणं न तु श्नुविशेषणम्। तेन आप्नुवन्तीत्यत्र यण् न। 'हुश्नुवोः' किम्? योयुवति। अत्र युधातोर्यङ्लुकि 'अदभ्यस्तात्' इति झस्यादादेशे योयु अति इति स्थिते अनेकाजङ्गा-

---

ग्राधोऽ। **श्रुवः शृ च**। यद्ययं श्रुधातुः स्वादौ पठ्येत तर्हि चकारो न कर्तव्य इति लाघवमित्याहुः। **हुश्नुवोः**। जुह्वति। सुन्वन्ति। हुश्नुवोः किम्, योयुवति। नोनुवति। सार्वधातुके किम्, जुहुवतुः, जुहुवुः। असंयोगपूर्वेति किम्, अक्ष्णुवन्ति। असंयोगपूर्वग्रहणमोर्विशेषणं न श्नुप्रत्ययस्य। तेन आप्नुवन्ति इत्यत्रापि यणिनषेधः सिध्यति। प्रत्ययविशेषणत्वे तु अक्ष्णुवन्तीत्यत्रैव निषेधः स्यादिति भावः। स्यादेतत्—यङ्लुकश्छान्दसत्वाद्योयुवतीत्यादौ प्रत्ययस्य 'छन्दस्युभयथा' इत्यनेनार्धधातुकत्वाश्रयणे यणादेशो न भवेदिति किमनेन हुश्नुग्रहणेन। न च युवन्ति नुवन्ति इत्यत्रातिप्रसङ्गवारणार्थं तद्ग्रहणमिति वाच्यम्, अनेकाच इत्यस्यानुवर्तनेनोक्तदोषाभावादिति चेत्। अत्राहुः—'दाधर्तिदर्धर्तिदर्धर्षिबोभूतु–' इति च्छन्दसि निपातनाद्भाषायां यङ्लुकि बोभवीतीत्यादौ 'भूसुवोः–' इति गुणनिषेधो न प्रवर्तते। अत एव भाषायामपि यङ्लुक् सिद्ध इति वक्ष्यमाणत्वात्। योयुवतीत्यादावतिप्रसङ्गवारणाय हुश्नुग्रहणं कर्तव्यमेवेति। हुश्नुग्रहणाज्ज्ञापकाद् भाषायामपि कश्चिद्यङ्लुग्भवतीति भाष्यकाराः।

उवङोऽपवादः । शृण्वन्ति । शृणोमि शृण्वः, शृणुवः शृण्मः, शृणुमः । शुश्रोथ । शुश्रुव । शृणु । शृणवानि । शृणुयात् । श्रूयात् । अश्रौषीत् । ध्रु १४३ स्थैर्ये । ध्रवति । अयं कुटादौ गत्यर्थोऽपि । दु १४४ द्रु १४५ गतौ । दुदोथ, दुदविथ । दुदुविव । दुद्रोथ । दुद्रुव । 'णिश्रि–' (सू २३१२) इति

वयवस्य असंयोगपूर्वस्य उकारस्य यण् न भवति । अत्र भाष्ये 'बहुलं छन्दसि' इत्यनुवृत्तौ 'यङोऽचि च' इति विहितस्य यङ्लुकः छान्दसत्वात् 'छन्दस्युभयथा' इत्यार्धधातुकत्वाश्रयणादेव योयुवतीत्यत्र यणभावसिद्धेः हुश्नुग्रहणं भाषायामपि क्वचिद् यङ्लुकं ज्ञापयतीत्युक्तम् । तथा च भाषायामपि अनेकाचः असंयोगपूर्वकोकारान्तायोयुवतीत्यादौ यङ्लुक्सिद्धेः तत्र यणभावार्थं हुश्नुग्रहणमिति फलति । ज्ञापकस्य सामान्यापेक्षत्वादुदाहृतोवर्णान्तादन्यत्रापि क्वचिद्यङ्लुक् सिध्यति । एतदेवाभिप्रेत्य भाष्ये—'हुश्नुग्रहणं ज्ञापयति—भाषायामपि यङ्लुग् भवति' इत्युक्त्वा, 'किमेतस्य ज्ञापने प्रयोजनम्, बेभिदीति चेच्छिदीति इत्येतत्सिद्धं भवति' इत्युक्तम् । अत्र भिदिच्छिदोरेव ग्रहणादुदाहृतोकारान्तादन्यत्र भवन् यङ्लुग् आभ्यामेव भवति, न त्वन्यत्रेत्याहुः । भिदिच्छिदोर्ग्रहणं प्रदर्शनमात्रमित्यन्ये । **शृण्वन्तीति** । शृणुथः । शृणुथेत्यपि ज्ञेयम् । 'लोपश्चास्यान्यतरस्यां म्वोः' इत्यभिप्रेत्याह **शृण्व इत्यादि** । शुश्राव शुश्रुवतुः शुश्रुवुः । थलि वमयोश्च क्रादित्वान्नित्यमिण्णिषेधः, तदाह **शुश्रोथ । शुश्रुवेति** । शुश्रुमेत्यपि ज्ञेयम् । श्रोता । श्रोष्यति । शृणोतु, शृणुतात् शृणुताम् । शृण्वन्तु । 'उतश्च प्रत्ययादसंयोगपूर्वात्' इति हेर्लुकं मत्वा आह **शृणिवति** । शृणुतात् शृणुतम् शृणुत । **शृणवानीति** । आटः पित्त्वेन ङित्त्वाभावाद् गुण इति भावः । **ध्रु स्थैर्य इति** । अनिट् । ध्रवति । दुध्राव दुध्रुवतुः दुध्रुवुः । भारद्वाजनियमात्थलि वेट् । दुध्रविथ, दुध्रोथ दुध्रुवथुः दुध्रुव । दुध्राव, दुध्रव दुध्रुविव दुध्रुविम । क्रादिनियमादिट् । ध्रोता । ध्रोष्यति । ध्रवतु । अध्रवत् । ध्रवेत् । ध्रूयात् । अध्रौषीत् । अध्रोष्यत् । **दु द्रु गताविति** । अनिटौ । दवति । द्रवति । दुदाव दुदुवतुः दुदुवुः । दुद्राव दुद्रुवतुः दुद्रुवुः । अस्य भारद्वाजनियमात्थलि वेडित्याह **दुदोथ, दुदविथेति** । दुदुवथुः दुदुव । दुदाव, दुदव । वमयोः क्रादिनियमादिडित्याह **दुदुविवेति** । द्वितीयस्य क्रादित्वात्थलि नित्यं नेट्, तदाह **दुद्रोथेति** । दुद्रुवथुः दुद्रुव । दुद्राव, दुद्रव । वमयोः क्रादित्वान्नेट्, तदाह **दुद्रु-**

एवं च सार्वधातुकपरयोर्हुश्नुवोरनेकाच्त्वाव्यभिचारादनेकाच इत्यस्यानुवृत्तिरिह किमर्थेत्याशङ्काया निरवकाश एव । तदनुवृत्त्यभावे हुश्नुग्रहणस्य ज्ञापकत्वासंभवादिति दिक् । **दुदविथेति** । भारद्वाजनियमादिट् । **दुद्रोथ** । **दुद्रुवेति** । क्रादित्वान्निटि

चङ्, अदुद्रुवत्। जि ९४६ ज्रि ९४७ अभिभवे। अभिभवो न्यूनीकरणं न्यूनीभवनं च। आद्ये सकर्मकः। शत्रून् जयति। द्वितीये त्वकर्मकः। अध्ययनात्पराजयते। अध्येतुं ग्लायतीत्यर्थः। 'विपराभ्यां जेः' (सू २६८२) इति तङ् 'पराजेरसोढः' (सू ५८६) इत्यपादानत्वम्।

अथ डीङन्ता ङितः। ष्मिङ् ९४८ ईषद्धसने। स्मयते। सिष्मिये। सिष्मियिढ्वे, सिष्मियिध्वे। गुङ् ९४९ अव्यक्ते शब्दे। गवते। जुगुवे। गाङ् ९५० गतौ। गाते गाते गाते। टेरेत्वे कृते वृद्धिः, गै। लङ् इटि—

वेति। दोता। द्रोता। दोष्यति। द्रोष्यति। दवतु। द्रवतु। अदवत्। अद्रवत्। दवेत्। द्रवेत्। दूयात्। द्रूयात्। अदौषीत्। **चङिति**। द्रुधातोरिति भावः। **अदुद्रुवदिति**। 'चङि' इति द्वित्वम्। ङित्त्वाद् गुणनिषेधे उवङिति भावः। अदोष्यत्। अद्रोष्यत्। **जि ज्रि अभिभव इति**। अनिट्। **न्यूनीकरणमिति**। नीचीकरणमित्यर्थः। **न्यूनीभवनमिति**। क्षीणबलीभवनमित्यर्थः। **शत्रून् जयतीति**। नीचीकरोतीत्यर्थः। ननु जिधातोः परस्मैपदित्वात् पराजयत इति कथमात्मनेपदमित्यत आह **विपराभ्यामिति**। ननु पराजयस्य अध्ययनेन संश्लेषविश्लेषयोरभावात् कथं पराजयं प्रत्यध्ययनस्यापादानत्वमित्यत आह **पराजेरिति**। जयति। लिटि 'सन्लिटोर्जेः' इति कुत्वम्। जिगाय जिग्यतुः जिग्युः। भारद्वाजनियमात्थलि वेट्। जिगयिथ, जिगेथ जिग्यथुः जिग्य। जिगाय, जिगय। वमयोः क्रादिनियमादिट्, जिग्यिव जिग्यिम। जेता। जेष्यति। जयतु। अजयत्। जयेत्। जीयात्। अजैषीत् अजैष्टाम् अजैषुः। अजैषीः अजैष्टम् अजैष्ट। अजैषम् अजैष्व अजैष्म। अजेष्यत्। इति धेडादयोऽजन्ताः परस्मैपदिनः।

अथ डीङन्ता ङित इति। 'डीङ् विहायसा गतौ' इत्येतत्पर्यन्ताः ङित्त्वादात्मनेपदिन इत्यर्थः। ष्मिङ् ईषद्धसने। षोपदेशोऽयम्। **स्मयते इति**। 'धात्वादेः–' इति षस्य सः। **सिष्मिये इति**। कित्त्वाद् गुणाभावे इयङ्। आदेशसकारत्वादुत्तरखण्डे सस्य षः। सिष्मियाते सिष्मियिरे। क्रादिनियमादिट्, सिष्मियिषे सिष्मियाथे। 'विभाषेटः' इति मत्वा आह **सिष्मियिढ्वे, सिष्मियिध्वे इति**। स्मेता। स्मेष्यते। स्मयताम्। अस्मयत। स्मयेत। स्मेषीष्ट। अस्मेष्ट। अस्मेष्यत। गुङ्धातुरनिट्। गुण ओकारः, अवादेश इति विशेषः। गाङ्धातुरनिट्। **गाते इति**। लटस्तादेशे शपि सवर्णदीर्घे टेरेत्वमिति भावः। आतामि तथैव रूपमाह **गाते इति**। गा अ आतामिति स्थिते परत्वात् सवर्णदीर्घे नेट्। **गाङ् गतौ**। **गाते गाते गाते इति**। पूर्वं शपा सह सवर्णदीर्घे कृते 'आतो

अगे। गेत। गेयाताम्। गेरन्। गासीष्ट। 'गाङ्कुटादिभ्यः–' (सू २४६१) इति सूत्रे इङादेशस्यैव गाङो ग्रहणम्, न त्वस्य। तेनाङित्त्वाद् 'घुमास्था–' (सू २४६२) इतीत्त्वं न, अगास्त। आदादिकोऽयमिति हरदत्तादयः। फले तु

अतः परस्य दीर्घाकारस्याभावाद् 'आतो ङितः' इति इय् न भवति। झावपि तथैव रूपमाह **गाले इति**। शपा सह आकारस्य सवर्णदीर्घे 'आत्मनेपदेष्वनतः' इति झेः अदादेशे टेरेत्वमिति भावः। गासे गाथे गाध्वे। लट उत्तमपुरुषैकवचने विशेषमाह **इट इति**। गा अ इ इति स्थिते सवर्णदीर्घे सति इट एत्वे कृते 'वृद्धिरेचि' इति वृद्धौ गै इति रूपमित्यर्थः। गावहे गामहे। लिटि अजादौ आल्लोपः। जगे जगाते जगिरे। क्रादिनियमादिट्। जगिषे जगाथे जगिध्वे। जगे जगिवहे जगिमहे। गाता। गास्यते। गाताम् गाताम् गाताम्। गास्व गाथाम् गाध्वम्। गै गावहै गामहै। अगात अगाताम् अगात। अगाथाः अगाथाम् अगाध्वम्। **लङ इटीति**। अगा अ इ इति स्थिते टिदादेशत्वाभावादेत्वाभावे सवर्णदीर्घे आद्गुणे अगे इति रूपमित्यर्थः। अगावहि अगामहि। **गेतेति**। लिङस्तादेशे शपि गा अ त इति स्थिते सवर्णदीर्घे सीयुटि सलोपे यलोपे 'आद् गुणः' इति भावः। **गेयातामिति**। गा अ आतामिति स्थिते सवर्णदीर्घे सीयुटि सलोपे 'आद् गुणः' इति भावः। **गेरन्निति**। झस्य रन्भावे गा अ रन् इति स्थिते सवर्णदीर्घे सीयुटि सलोपे यलोपे 'आद् गुणः' इति भावः। गेथाः गेयाथाम् गेध्वम्। गेय गेवहि गेमहि। आशीर्लिङि आह **गासीष्टेति**। गासीयास्ताम् गासीरन्। गासीष्ठाः गासीयास्थाम् गासीध्वम्। गासीय गासीवहि गासीमहि। ननु गासीष्टेत्यादौ 'गाङ्कुटादिभ्योऽञ्णिन्ङित्' इति ञ्णिद्भिन्नप्रत्ययस्य ङित्त्वविधानेन सीयुडागमविशिष्टप्रत्ययस्य ङित्त्वाद् 'घुमास्थागापाजहातिसां हलि' इति हलादौ क्ङिति विहितमीत्त्वं स्यादित्यत आह **गाङ्कुटादिभ्य इति सूत्रे इति**। इङ इत्यनुवृत्तौ 'गाङ् लिटि' इति विहितस्य गाङादेशस्यैव गाङ्कुटादिसूत्रे ग्रहणम्, न त्वस्य गाधातोरित्यर्थः। एतच्च 'गाङ् लिटि' इति सूत्रे भाष्ये स्पष्टम्। **तेनेति**। गाङ्कुटादिसूत्रे प्रकृतस्य गाधातोरग्रहणेनेत्यर्थः। लुङ्याह **अगास्तेति**। अगासाताम् अगासत। अगास्थाः अगासाथाम् अगाध्वम्। अगासि अगास्वहि अगास्महि। अगास्यत। **आदादिकोऽयमिति**। ततश्च 'अदि-

---

ङितः' इति न प्रवर्तते। 'आत्मनेपदेष्वनतः' इति तु प्रवर्तते इति तातोझेषु तुल्यं रूपमित्याहुः। गै। गावहे। गामहे। जगे। जगाते। गाताम्। गाताम्। गाताम्। गास्व। उत्तमे तु—गै। गावहै। गामहै। अगात। अगाताम्। **न त्वस्येति**। गाते इत्यादौ तङं प्रवर्त्य ङकारस्य चरितार्थत्वात्। आदेशङकारस्तु न चरितार्थः।

न भेदः। कुङ् ९५१ घुङ् ९५२ उङ् ९५३ ङुङ् ९५४ शब्दे। अन्ये तु उङ् कुङ् खुङ् गुङ् घुङ् ङुङ् इत्याहुः। कवते। चुकुवे। घवते। अवते। ऊवे 'वार्णादाङ्गं बलीयः' (प २६) इत्युवङ्। ततः सवर्णदीर्घः। ओता। ओष्यते। ओषीष्ट। औष्ट। ङवते। ञुङुवे। ङोता। च्युङ् ९५५ ज्युङ् ९५६ प्रुङ् ९५७ प्लुङ् ९५८ गतौ। क्लुङ् इत्येके। रुङ् ९५९ गतिरेषणयोः। रेषणं हिंसा। रुरुवे।

प्रभृतिभ्यः शपः' इति शपो लुगिति भावः। **फले तु न भेद इति**। शपो लुकि सति, गाते इत्याद्येव रूपम्। तस्मिन्नसत्यपि गा अ ते इत्यादौ सवर्णदीर्घे सति तदेव रूपमिति न रूपभेद इत्यर्थः। **कुङ् घुङ् उङ् ङुङ् शब्द इति**। चत्वारोऽपि ङित आद्यद्वितीयचतुर्थाः कवर्गप्रथमचतुर्थपञ्चमाद्याः। तृतीयस्तु केवलोवर्णः। **अन्ये त्विति**। आद्यः केवलोवर्णो ङित्। इतरे तु पञ्च क्रमेण कवर्गाद्याः। तत्र कुङ्धातोरुदाहरति **कवते इति**। लिटि अजादौ कित्त्वाद् गुणाभावे उवङ्, तदाह **चुकुवे इति**। चुकुवाते चुकुविरे। क्रादिनियमादिट्, चुकुविषे चुकुवाथे चुकुविध्वे। चुकुवे चुकुविवहे चुकुविमहे। कोता। कोष्यते। कवताम्। अकवत। कवेत। कोषीष्ट। अकोष्ट। अकोष्यत। एवं खवते इत्यादि। उङ्धातोराह **अवते इति**। **ऊवे इति**। उ उ ए इति स्थिते द्वितीयस्य उवर्णस्य उवङि कृते सवर्णदीर्घ इति भावः। ननु उवङो बहिर्भूतप्रत्ययापेक्षतया बहिरङ्गत्वादन्तरङ्गे सवर्णदीर्घे कृते ऊ ए इति स्थिते उवङि उवे इत्येवोचितमित्यत आह **वार्णादिति**। ऊवाते ऊविरे। क्रादिनियमादिट्। ऊविषे ऊवाथे ऊविध्वे। ऊवे ऊविवहे ऊविमहे। **ओता ओष्यते इति**। अवत। अवेत। ओषीष्ट। औष्ट। औष्यत—इत्यपि ज्ञेयम्। ङुङ्धातोर्लटि ङवते इति रूपमुक्तम्। संप्रति लिटि रूपमाह **ञुङुवे इति**। 'कुहोश्चुः' इति ङकारस्य स्थानिनः चुर्भवन् स्थानसाम्यस्य पञ्चस्वभावादाभ्यन्तरप्रयत्नसाम्यस्य पञ्चस्वप्यविशिष्टत्वादल्पप्राणानुनासिक्यसाम्याद् ञकारः। प्रथमतृतीयौ तु न भवतः, आनुनासिक्याभावात्। च्युङादयोऽप्युवर्णान्ता अनिटः कुङ्धातुवद् ज्ञेयाः। **रुङ् गतीति**। सेट्कोऽयम्। 'ऊदृदन्तैर्यौतिरुक्ष्णु—' इत्यनिट्सु पर्युदासात्, तदाह

स्थानिवद्भावेन ङित्त्वादेव तङः सिद्धत्वादिति भावः। **आदादिकोऽयमिति**। एवं च गाते गाथे इत्यादावातामाथामोः परत 'आतो ङितः' इत्यस्य प्रवृत्तिशङ्कैव नास्तीति भावः। **फले तु न भेद इति**। न च गाते गाथे इत्यादौ शपा सह सवर्णदीर्घे कृतेऽपि पूर्वस्मात्परस्य विधौ कर्तव्ये स्थानिवत्त्वादतः परत्वेन ङितामाकारस्य इय् स्यादिति शङ्क्यम्, पञ्चमीसमासपक्षस्यानित्यत्वाभ्युपगमादिति भावः। **ञुङुवे इति**। 'कुहोश्चुः' इति ङस्य ञः। **क्लुङ् इति**। अस्मात् पचाद्यचि

१ क्वचित् 'च्युङ्' इति पाठः।

रविताले। धृङ् ९६० अवध्वंसने। धरते। दध्रे। मेङ् ९६१ प्रणिदाने। प्रणिदानं विनिमयः प्रत्यर्पणं च। प्रणिमयते। 'नेर्गद–' (सू २२८१) इति णत्वम्। तत्र घुप्रकृतिमाङिति पठित्वा ङितो माप्रकृतेरपि ग्रहणस्येष्टत्वात्।

रविताले इति। धृङ्धातुरनिट्। **दध्रे इति**। कित्त्वाद् गुणनिषेधे ऋकारस्य यण्। दध्राते दध्रिरे। क्रादिनियमादिट्। दध्रिषे दध्राथे दध्रिध्वे। दध्रे दध्रिवहे दध्रिमहे। धर्ता। लृटि स्ये 'ऋद्धनोः–' इति इटि धरिष्यते। धरताम्। अधरत। धरेत। आशीर्लिङि सीयुटि 'उश्च' इति कित्त्वान्न गुणः। धृषीष्ट। 'ह्रस्वादङ्गात्' इति सिचो लुक्। अधृत अधृषाताम् अधृषत। अधरिष्यत। **मेङ् प्रणिदाने। णत्वमिति**। प्रणिदानशब्दे प्रणिमयते इत्यत्र च 'नेर्गद–' इति णत्वमित्यर्थः। ननु प्रणिमयत इत्यत्र णत्वमिदं न संभवति, शिद्विषये आत्वाभावेन, मारूपाभावात्। तथा प्रणिमानशब्देऽपि णत्वं न संभवति, तत्र मेङः कृतात्वस्य लाक्षणिकमारूपत्वात्। 'गामादाग्रहणेष्वविशेषः' इत्याश्रित्य मेङोऽपि कृतात्वस्य णत्वविधौ ग्रहणे तु मीनातिमिनोत्योरात्त्वे प्रनिमाता प्रनिमास्यति इत्यत्रापि नेर्णत्वापत्तिरित्यत आह **तत्रेति**। तत्र 'नेर्गद–' इति णत्वविधौ। घुमेत्यस्य स्थाने घुप्रकृतिमाङिति पठित्वा तत्र प्रकृतिशब्दस्य घुमाङ्प्रकृतिपरत्वमाश्रित्य घौ माङ्धातौ घुमाङ्प्रकृतौ च परत इति पर्यवसानमाश्रित्य माप्रकृतेर्ङितो मेङ्धातोरकृतात्वस्यापि ग्रहणस्य भाष्यकृता अभ्युपगतत्वादित्यर्थः। एवं च प्रणिमयते इत्यत्र नाव्याप्तिः, मेङः कृतात्वमाप्रकृतित्वे सति ङित्वात्। नापि मीनातिमिनोत्योरात्त्वे प्रनिमाता प्रनिमास्यतीत्यत्र अतिव्याप्तिः, मारूपस्य ङित्त्वाभावादिति भावः। एतच्च घुसंज्ञासूत्रे भाष्ये स्थितम्। ममे ममाते ममिरे। क्रादिनियमादिट्, ममिषे ममाथे ममिध्वे। ममे ममिवहे ममिमहे। माता। मास्यते। मयताम्। अमयत। मयेत। मासीष्ट। अमास्त। अमास्यत।

विक्लवः[1]। वबयोरभेदाद्विक्लब इत्यन्ये। **मेङ् प्रणिमयत इति**। ननु 'नेर्गद–' इति कथमिह णत्वं स्यात्, शिद्विषये आत्वाभावेन मारूपाभावादशिद्विषये कृतात्वेऽप्यस्मिन् णत्वं दुर्लभमेव प्रतिपदोक्तस्यैव माधातोर्ग्रहणौचित्यान्न त्वस्य लाक्षणिकस्य। 'गामादाग्रहणेष्वविशेषः' इत्यभ्युपगमे तु मीनातिमिनोत्योरात्वे कृते प्रनिमाता प्रनिमास्यतीत्यादावतिप्रसङ्गः स्यादित्यत आह **तत्रेति। इष्टत्वादिति**। अयं भावः— घुसंज्ञासूत्रे प्रणिदयते प्रणिधयतीत्यादौ णत्वसिद्धये भाष्यकारैरित्थं सिद्धान्तितम्— 'नेर्गदनद–' इति णत्वविधौ 'घुमा' इत्यस्य स्थाने 'घुप्रकृतिमाङ्' इति पठनीयम्। घुश्च प्रकृतिश्च माङ् चेति द्वन्द्वः। प्रकृतिश्च कस्येत्याकाङ्क्षायां संनिधानात्पूर्वोत्तरयोरेव। तेन न क्वाप्यव्याप्तिः। नापि मा माने इत्यत्र मीनातिमिनोत्योश्चातिव्याप्तिः।

१ 'विच्यवः' इति क्वचित्।

देङ् ९६२ रक्षणे। दयते। २३८८ दयतेर्दिगि लिटि। (७-४-९) दिग्यादेशेन द्वित्वबाधनमिष्यत इति वृत्तिः। दिग्ये। २३८९ स्थाघ्वोरिच्च। (१-२-१७) अनयोरिदादेशः स्यात् सिच्च किस्स्यात्। अदित। अदिथाः। अदिषि। श्यैङ् ९६३ गतौ। श्यायते। शश्ये। प्यैङ् ९६४ वृद्धौ। प्यायते। पप्ये।

देङ्धातुर्मेङ्वत्। दयतेर्दिगि। दिगीति लुप्तप्रथमाकम्। देङ्धातोः दिगि इत्यादेशः स्याल्लिटीत्यर्थः। ननु लिट एशादौ दिग्यादेशे कृते द्वित्वे सति दिदिग्ये इत्यादि स्यादित्यत आह दिग्यादेशेनेति। एतच्च भाष्ये स्पष्टम्। वृत्तिरिति। भाष्यस्याप्युपलक्षणम्। क्रादिनियमादिट्। दिग्यिषे दिग्याथे दिग्यिध्वे। दिग्ये दिग्यिवहे दिग्यिमहे। दाता। दास्यते। दयताम्। अदयत। दयेत। दासीष्ट। लुङि सिचि अदास् त इति स्थिते स्थाघ्वोरिच्च। 'असंयोगाल्लिट्–' इत्यतः किदिति 'हनः स्सिच्' इत्यतः सिजिति चानुवर्तते, तदाह अनयोरित्यादिना। परस्मैपदेषु नेदं प्रवर्तते, तत्र 'गातिस्था–' इति सिचो लुका लुप्तत्वात्। अत एव 'लिङ्सिचौ–' इति सूत्रादात्मनेपदेष्विति नानुवर्तितम्, व्यावर्त्याभावात। अदितेति। इत्वे कृते 'ह्रस्वादङ्गात्' इति सिचो लुक्। त इत्यस्य ङित्वादिकारस्य न गुणः। आतामादौ तु इत्वे कृतेऽपि सिचो न लुक्, झलि परत एव लुग्विधेः। सिचः कित्त्वादिकारस्य न गुणः। अदिषाताम् अदिषत। अदिथाः अदिषाथाम्। अदिढ्वम्। अदिषीति। अदिष्वहि अदिष्महि। अदास्यत इत्यपि ज्ञेयम्। श्यैङ् गतौ। श्यायते इति। शपि आयादेशः। शिद्विषयत्वादात्वं नेति भावः। शश्ये इति। एशि आत्वे आतो लोपः। शश्याते शश्यिरे। क्रादिनियमादिट्। शश्यिषे

माङ् इति ङकारानुबन्धकस्यैव पठितत्वादिति। दिग्यादेशेनेति। दयतेर्लिटि परे द्वित्वं प्राप्तं दिग्यादेशश्च। तत्र विशेषविहितेन दिग्यादेशेन द्वित्वशास्त्रस्य बाधः। न चैवं 'प्यायः पी' 'चक्षिङः ख्याञ्' इति पीख्याञोरपि विशेषविहितत्वात्ताभ्यां द्वित्वबाधः स्यादिति वाच्यम्, विषयसप्तमीमाश्रित्य लिडुत्पत्तेः प्रागेव तयोः प्रवृत्तत्वात्। दिग्यादेशविधौ तु लिटीति परसप्तम्येव न तु विषयसप्तमी। लक्ष्यानुरोधात्। तदेतत्सूचयति इष्यत इति। दयतेर्लिटि द्वित्वे प्राप्ते तद्बाधित्वा परत्वाद्दिग्यादेश इति तु नोक्तम्। परस्परलब्धावकाशयोरेव परस्य बलीयस्त्वात्। दिग्यादेशं विना द्वित्वस्य सावकाशत्वेऽपि द्वित्वं विना दिग्यादेशस्य तदभावादिति दिक्। स्थाघ्वोरिच्च। इह 'लिङ्सिचौ–' इति सूत्रादात्मनेपदेष्विति नानुवर्तितम्। परस्मैपदेषु 'गातिस्था–' इति लुकः प्रवृत्तेर्व्यावर्त्यालाभात्। अस्थित। अस्थिषाताम्। भाव्यमानोऽण् क्वचित् सवर्णान् गृह्णातीत्यत्रेदमपि तपरकरणं लिङ्गमित्याहुः। अत्र वदन्ति—विधीयमानस्य

प्याता। त्रैङ् ९६५ पालने। त्रायते। तत्रे। पूङ् ९६६ पवने। पवते। पुपुवे। पविता। मूङ् ९६७ बन्धने। मवते। डीङ् ९६८ विहायसा गतौ। डयते। डिड्ये। डयिता। तॄ ९६९ प्लवनतरणयोः। **२३९० ॠत इद्धातोः।** (७-१-१००) ॠदन्तस्य धातोरङ्गस्य इत्स्यात्। 'इत्वोत्वाभ्यां गुणवृद्धी विप्रतिषेधेन' (वा ४३७३)। तरति। 'ऋच्छत्यॄताम्' (सू २३८३) इति

शश्याथे शश्यिध्वे। शश्ये शश्यिवहे शश्यिमहे। श्याता। श्यास्यते। श्यायताम्। अश्यायत। श्यायेत। श्यासीष्ट। अश्यास्त। अश्यास्यत। प्यैङ्धातुरपि श्यैङ्वत्। त्रैङप्येवम्। **पूङ् पवन इति।** सेट् ऊदन्तानामनिट्सु पर्युदासात्। **पवते इति।** शपि गुणः, अवादेशः। **पुपुवे इति।** कित्त्वाद् गुणाभावे उवङ्। पुपुवाते पुपुविरे। पुपुविषे पुपुवाथे पुपुविध्वे। पुपुवे पुपुविवहे पुपुविमहे। पविता। पविष्यते। पवताम्। अपवत। पवेत। पविषीष्ट। अपविष्ट। अपविष्यत। मूङ्धातुरप्येवम्। **डीङ् विहायसा गताविति।** आकाशेन गमने इत्यर्थः। सेडयम्, अनिट्सु डीङः पर्युदासात्। **डयते इति।** शपि ईकारस्य गुणे अयादेश इति भावः। **डिड्ये इति।** कित्त्वाद् गुणाभावे ईकारस्य यणिति भावः। डिड्याते डिड्यिरे। डिड्यिषे डिड्याथे डिड्यिध्वे। डिड्ये डिड्यिवहे डिड्यिवहे। डयिता। डयिष्यते। डयताम्। अडयत। डयेत। डयीषीष्ट डयिषीयास्ताम् डयिषीरन्। डयिषीष्ठाः डयिषीयास्थाम् डयिषीढ्वम्, डयिषीध्वम्। डयिषीय डयिषीवहि डयिषीमहि। अडयिष्ट। अडयिष्यते। इति स्मिङादयो डीङन्ता ङितः। तॄधातुः सेट् परस्मैपदी। अनिट्सु ॠदन्तपर्युदासात्सेट्। **ॠत इद्धातोः।** ॠत इति धातोर्विशेषणम्। तदन्तविधिः। अङ्गस्येत्यधिकृतम्, तदाह **ॠदन्तस्येति।** 'धातोः' किम्? मातॄणाम्। तथा च तरति पिपर्ति, ततार पपार इत्यादौ ॠकारस्य शपि तिपि णलि च परे गुणवृद्धी बाधित्वा अन्तरङ्गत्वाद् इत्त्वम् उत्त्वं च स्यादिति शङ्का प्राप्ता। तां परिहर्तुमाह **इत्वोत्वाभ्यामिति।** ल्यब्लोपे पञ्चमीद्विवचनम्। 'ॠत इद्धातोः' इति इत्त्वम् 'उदोष्ठ्यपूर्वस्य' इति उत्त्वमन्तरङ्गमपि बाधित्वा गुणवृद्धी विप्रतिषेधसूत्रेण परत्वात्

सवर्णग्राहकत्वेऽपि तपरकरणमिह व्यर्थम्। न चात्र दीर्घः स्यादिति वाच्यम्, 'घुमास्था–' इत्यनेनैव तत्सिद्धौ विधिवैयर्थ्यापत्तेः। न चैवमपि प्लुतः स्यादिति वाच्यम्, 'प्लुताऽप्लुतप्रसङ्गेऽपि प्लुतश्च विषये स्मृतः' इति सिद्धान्तादिति। **डीङ्।** विहायसा आकाशेन। विहायसामिति पाठस्त्वनाकर इत्याहुः। **ॠत इद्धातोः।** किरति। गिरति। कीर्णः। गीर्णः। स्तीर्णः। धातोः किम्, मातॄणाम्। **इत्वोत्वाभ्यामिति।** 'परत्वाद् गुणवृद्धी भवतः' इति वक्ष्ये किमिदं वार्तिकमिति चेत्

गुणः। 'तृफल-' (सू २३०१) इत्येत्वम्। तेरतुः तेरुः । २३६१ वृतो वा। (७-२-३८) वृङ्वृञ्भ्यामृदन्ताच्चेटो दीर्घो वा स्यान्न तु लिटि। तरिता, तरीता। 'अलिटि' इति किम्- तेरिथ। 'हलि च' (सू २५४) इति दीर्घः। तीर्यात्। २३६२ सिचि च परस्मैपदेषु। (७-२-४०) अत्र वृत इटो दीर्घो न। अतारिष्टाम्।

अथाष्टावनुदात्तेतः। गुप १७० गोपने। तिज १७१ निशाने। मान १७२ पूजायाम्। बध १७३ बन्धने। २३६३ गुप्तिज्किद्भ्यः सन्। (३-१-५) २३६४ मान्बधदान्शान्भ्यो दीर्घश्चाभ्यासस्य। (३-१-६) सूत्रद्वयोक्तेभ्यः

स्यातामिति भावः। **तरतीति**। णलि ततार। अतुसादौ कित्त्वाद् गुणनिषेधमाशङ्कयाह **ऋच्छत्यृतामिति**। ततर् अतुस् इति स्थिते अकारस्य गुणशब्देन भावितत्वाद् 'न शसददवादिगुणानाम्' इति निषेधमाशङ्कयाह **तृफलेति**। **तेरतुः तेरुरिति**। तेरिथ तेरथुः तेर। ततार, ततर तेरिव तेरिम। **वृतो वा**। वृ ॠत् इत्यनयोः समाहारद्वन्द्वात्पञ्चम्येकवचनम्। वृ इति वृङ्वृञोर्ग्रहणम्। 'आर्धधातुकस्येट्-' इत्यत इडित्यनुवृत्तं षष्ठ्या विपरिणम्यते। 'ग्रहोऽलिटि दीर्घः' इत्यतः अलिटि दीर्घ इत्यनुवर्तते, तदाह **वृङ्वृञ्भ्यामित्यादि**। **तरिता तरीतेति**। इटो दीर्घविकल्पः। गुणे रपरत्वम्। तरिष्यति। तरतु। अतरत्। तरेत्। **हलि चेति**। आशीर्लिङि कित्त्वादृकारस्य गुणनिषेधे, इत्त्वे, रपरत्वे 'हलि च' इति दीर्घे, तीर्यात् इति रूपमित्यर्थः। अतारीत् अतारिष्टाम्, इत्यादौ 'वृतो वा' इति दीर्घे प्राप्ते **सिचि च। अत्रेति**। परस्मैपदपरके सिचि वृङ्वृञ्भ्याम् ॠदन्ताच्च परस्य इटो दीर्घो नेत्यर्थः। 'न लिङि' इत्यतो नेत्यनुवर्तते। **अतारिष्टामिति**। अतारिषुः। अतारिषम् अतारिष्व अतारिष्म। अतरिष्यत्।

गुप गोपन इति। गोपनं रक्षणम्। **तिज निशान इति**। निशानं तीक्ष्णीकरणम्। **मान पूजायाम्**। **बध बन्धन इति**। एते चत्वारोऽनुदात्तेत इति स्थितिः। **गुप्तिज्किद्भ्यः**। **मान्बध**। गुप्तिजी इह पठितौ। 'कित निवासे' इत्यनुपदमेव परस्मैपादिषु पठिष्यते। एभ्यस्त्रिभ्यो धातुभ्यः सन्प्रत्ययः स्यादिति प्रथमसूत्रार्थः। मानधातुर्बधधातुश्च इह पठितौ। दान खण्डने, शान तेजने इत्यनु-

---

अत्राहुः—परादप्यन्तरङ्गं प्रबलमितीत्वे प्राप्ते वार्तिकमिदमारब्धमिति। **वृतो वा**। इह 'आर्धधातुकस्येड्-' इत्यत इडित्यनुवर्तते 'ग्रहो लिटि-' इत्यतो लिटि दीर्घ इति च, तदाह **इटो दीर्घो वेत्यादि**। **सिचि च**। 'न लिङि' इत्यतो नेत्यनुवर्तनादाह **इटो दीर्घो नेति**। **मान्बध**। अभ्यासस्येति च्छेदः। अभ्यासस्य विकार

सन्स्यात्, मानादीनामभ्यासस्येकारस्य दीर्घश्च। 'गुपेर्निन्दायाम्' (वा १६८७)। 'तिजेः क्षमायाम्' (वा १६८८)। 'कितेर्व्याधिप्रतीकारे निग्रहे अपनयने नाशने संशये च'। (वा १६८९)। 'मानेर्जिज्ञासायाम्' (वा १६९२)। बधेश्चित्त-विकारे' (वा १६९३)। 'दानेरार्जवे' (वा १६९४) 'शानेर्निशाने' (वा १६९५)। 'सनाद्यन्ताः—' (सू २३०४) इति धातुत्वम्। २३९५ सन्यङोः। (६-१-९) सन्नन्तस्य यङन्तस्य च प्रथमैकाचो द्वे स्तोऽजादेस्तु

पदमेव स्वरितेत्सु पठिष्येते। एभ्यश्चतुर्भ्यः सन् स्यादिति द्वितीयसूत्रे प्रथमखण्ड-स्यार्थः। आभ्यासस्येति च्छेदः। अभ्यासस्य विकार आभ्यासः। स च 'सन्यतः' इति इत्त्वमेव, नतु ह्रस्वः, इति 'गुणो यङ्लुकोः' इति सूत्रे भाष्ये स्पष्टम्। ततश्च मान्बधदान्शानामभ्यासावयवस्य इकारस्य सन्संनियोगशिष्टो दीर्घश्च स्यादिति द्वितीयसूत्रे द्वितीयखण्डस्यार्थः, इत्यभिप्रेत्य सूत्रद्वयस्य फलितमर्थमाह **सूत्रद्वयेति**। अथ उक्तसनो वृत्तिकृदाद्युपनिबद्धान् अर्थविशेषानाह **गुपेर्निन्दायामित्यादिना शानेर्निशाने इत्यन्तेन**। अत्र गोपनाद्यर्थकानां निन्दादौ वृत्तिस्त्वर्थनिर्देशस्योप-लक्षणत्वाद्बोध्या। जिज्ञासाशब्देन जिज्ञासाप्रयोज्यो विचारो लक्ष्यते। मानेर्विचारे इत्येव वृत्तिकृत्। सन्नन्तस्य धातुकार्यप्राप्त्यर्थमाह **सनाद्यन्ता इति। सन्यङोः।** अवयवषष्ठ्येषा। प्रत्ययत्वात्तदन्तग्रहणम्। 'एकाचो द्वे प्रथमस्य' इति 'अजादेर्द्वि-तीयस्य' इति चाधिकृतम्, तदाह **सन्नन्तस्येत्यादिना**। सनि यङि च परे इति तु न व्याख्येयम्, तथा सति प्रतिपूर्वादिणः सनि अटधातोर्यङि च प्रतीषिषति,

अभ्यासः। स चात्र 'सन्यतः' इतीत्वमेव। यदि तु ह्रस्व इत्येव गृह्येत तर्हि तद्धित-निर्देशो व्यर्थः स्यात्तदेतदाह **अभ्यासस्येकारस्येति**। वृत्तिकाराद्युपनिबद्धानर्थान्दर्शयति **गुपेर्निन्दायामित्यादिना। सन्यङोः।** सप्तमीमाश्रित्य सनि यङि च परे इति व्याख्यायां प्रतीषिषति, अटाट्यते इत्यादि न सिध्येत्। सन्यङोः प्रकृतिभागस्यैव द्वित्व-प्रसक्तेरत आह **सन्नन्तस्येति**। ननु सप्तमीपक्षेऽपि सन्यङोरेव द्वित्वं स्यान्न तु प्रकृति-भागस्य। शपोऽकारणैव जुगुप्सते तितिक्षते इत्यादिरूपसिद्धेस्तयोरकारोच्चारणस्य 'अजादेर्द्वितीयस्य' इति द्वित्वार्थत्वात्। यद्यपि निमित्तस्य कार्यित्वस्वीकारे आट आटतुरित्यादौ लिटि परतः पूर्वभागमात्रस्य द्वित्वं न सिध्येत्तथाप्यकारोच्चारणसामर्थ्यात् सन्यङोः कार्यित्वमभ्युपगन्तुं शक्यमिति चेत्। मैवम्, अकारफलानां बहूनां सत्त्वात्। तथा हि दित्स्यं धित्स्यमित्यत्र 'अचो यत्' इति यति कृते 'यतो नावः' इत्याद्युदात्तः सिध्यति। अकाराभावे तु 'ऋहलोः—' इति ण्यतीष्टस्वरो न सिध्येत्। किंच पिपठिषि ब्राह्मणकुलानी-त्यत्राल्लोपस्य स्थानिवत्त्वाद् झलन्तलक्षणो नुम् न भवति, अकाराभावे तु स्यादेव

१ '—माभ्यासस्य—' इति बालमनोरमाकृत्सम्मतः पाठः।

द्वितीयस्य। अभ्यासकार्यम्। गुपिप्रभृतयः किद्विना निन्दाद्यर्थका एवानुदात्तेतः। दानशानौ तु स्वरितेतौ। एते नित्यं सन्नन्ताः। अर्थान्तरेषु त्वननुबन्धकाः चुरादयः। अनुबन्धस्य केवलेऽचरितार्थत्वात्सन्नन्तात्तङ्। धातोरित्यविहितत्वात्

अटाट्यते इत्यत्र प्रत्ययसहितस्य द्वित्वानापत्तेः। **अभ्यासकार्यमिति**। हलादिशेषादिकमित्यर्थः। **गुपिप्रभृतय इति**। कितधातुभिन्ना गुपिजमानबधाश्चत्वारो गुपेर्निन्दायामित्यादिनिबद्धनिन्दाद्यर्थका एव अनुदात्तेतः सन्भाज इत्यर्थः। कितधातुस्तु परस्मैपदिषु पठिष्यमाणत्वादुदात्तेदेव सन् व्याधिप्रतीकारादिषु पञ्चस्वेवार्थेषु सन्भागिति भावः। **दानशानौ त्विति**। दान खण्डने शान तेजने इति धातू स्वरितेताविव सन्तौ आर्जवे निशाने चार्थे सन्भाजावित्यर्थः, तयोरनुपदमेव स्वरितेत्सु पाठादिति भावः। **एते नित्यं सन्नन्ता इति**। एते गुपिजादयः सप्त धातवो गुपेर्निन्दायामित्यादिनिबद्धेष्वर्थेषु नित्यं सन्नन्ताः। निन्दाद्यर्थकत्वे सनं विना एषां प्रयोगो नास्तीत्यर्थः। **अर्थान्तरेषु त्विति**। निन्दादिभ्योऽन्येषु धातुपाठनिर्दिष्टेषु तदन्येषु चार्थेषु अनुदात्तानुबन्धरहिताः सन्तश्चौरादिका एव भवन्ति, न तु भौवादिका इत्यर्थः। चुरादिष्वेतेषामनुदात्तानुबन्धकत्वे अनुबन्धकरणस्य केवलेष्वचरितार्थतया णयन्तादकर्तृगेऽपि फले तङ् स्यादिति भावः। नन्वेवं सति भ्वादिगणे गुपादेरनुदात्तानुबन्धकरणं व्यर्थम्, उक्तरीत्या गोपनाद्यर्थकानामेषामनुबन्धरहितचौरादिकत्वनियमेन निन्दाद्यर्थेषु सन्नन्तनियमेन च ततोऽन्यत्र प्रयोगाभावादित्यत आह **अनुबन्धस्येति**। गुपादिषु केवलेष्वनुबन्धनिर्देशस्य निष्फलतया अनुबन्धनिर्देशस्य सन्नन्तार्थत्वं विज्ञायत इति कृत्वा सन्नन्तात्तङित्यर्थः। नचैवमपि भ्वादिगणे एषां गोपनाद्यर्थनिर्देशो व्यर्थ एवेति वाच्यम्, भ्वादौ तदर्थनिर्देशस्य अपाणिनीयत्वादिति भावः। तदुक्तं भाष्ये—'गुपादिष्वनुबन्धकरणसामर्थ्यात् सन्नन्तादात्मनेपदम्' इति। अत्र सन्नन्तादात्मनेपदमित्युक्त्या केवलानामेषां शब्विकरणानां

नुम्। अपि च पापचक इत्यादावल्लोपस्य स्थानिवत्त्वाद् 'अत उपधायाः' इति वृद्धिर्न प्रवर्तते। अपि च 'यस्य हलः' इत्यत्र यस्येति संघातग्रहणमहर्यीदित्यादौ यलोपव्यावृत्त्यर्थमिति सर्वसंमतम्। तथा च अपापचिष्टेत्यादौ यलोपोऽप्यकारफलमिति 'सन्यङोः' इति षष्ठ्येव युक्ता। एवं हि यङ्लुकि प्रत्ययलक्षणेन यङन्तत्वाद् द्वित्वं सिध्यति। परसप्तम्यां तु द्वित्वस्याङ्गकार्यत्वाद् 'न लुमता—' इति निषेधः प्रवर्तेतेति दिक्। **दानशानौ चेति**। आर्जवनिशानार्थाविति भावः। **अर्थान्तरे त्विति**। धातुपाठोपात्ते गोपनादिरूपेऽर्थे इत्यर्थः। **अननुबन्धका इति**। सानुबन्धकत्वे तु केवले चरितार्थत्वाद् अनुबन्धस्य सन्नन्तादिवाकर्तृगफलाद् णयन्तादपि तङ् स्यादिति भावः।

सनोऽत्र नार्धधातुकत्वम्। तेनेड्गुणौ न। जुगुप्सते। जुगुप्सांचक्रे। तितिक्षते। मीमांसते। भष्भावः। चर्त्वम्। बीभत्सते। रभ १७४ राभस्ये। आरभते। आरेभे। रब्धा। रप्स्यते। डुलभष् १७५ प्राप्तौ। लभते। ष्वञ्ज १७६

नास्ति प्रयोग इति सूचितम्। तथा चुरादिष्वेषामनुदात्तानुबन्धराहित्यमित्यपि सूचितम्। अन्यथा अनुबन्धकरणस्य केवलेष्वचरितार्थत्वात् सन्नन्तादिव णयन्तादपि अकर्तृगे फले आत्मनेपदार्थत्वापातात्सन्नन्तादात्मनेपदमित्युक्तिरसंगता स्यादित्यन्यत्र विस्तरः। **धातोरितीति**। 'आर्धधातुकं शेषः' इत्यत्र धातोर्विहितः प्रत्यय इतिविहितविशेषणाश्रयणात् सनश्चास्य धात्वधिकारविहितत्वाभावान्नार्धधातुकत्वमित्यर्थः। **तेनेति**। सन आर्धधातुकत्वाभावेनेत्यर्थः। **जुगुप्सत इति**। निन्दतीत्यर्थः। गुपेः सनि अनार्धधातुकत्वादिड्गुणयोरभावे 'सन्यङोः' इति द्वित्वे हलादिशेषे अभ्यासचुत्वमिति भावः। **जुगुप्सांचक्र इति**। 'कास्प्रत्ययात्–' इत्याम्। जुगुप्सिता। जुगुप्सिष्यते। जुगुप्सताम्। अजुगुप्सत। जुगुप्सेत। जुगुप्सिषीष्ट। अजुगुप्सिष्ट। अजुगुप्सिष्यत। **तितिक्षत इति**। तीक्ष्णीकरोतीत्यर्थः। तिजेः सनि द्वित्वादि। जस्य कुत्वेन गः, तस्य चर्त्वेन कः, सस्य षत्वमिति विशेषः। **मीमांसते इति**। विचारयतीत्यर्थः। मान्धातोः सनि द्वित्वे हलादिशेषे अभ्यासह्रस्वे 'सन्यतः' इति इत्वे 'मान्बध–' इत्यभ्यासदीर्घे, 'नश्च–' इत्यनुस्वारे, मीमांसधातोर्लडादीति भावः। बधधातोः सनि विशेषमाह **भष्भाव इति**। बकारस्य भकार इत्यर्थः। **चर्त्वमिति**। धस्य तकार इत्यर्थः। तथा च भत्सेति सन्नन्तं संपन्नम्। **बीभत्सत इति**। भष्त्वचर्त्वयोरसिद्धत्वाद् बध् इत्यस्य द्वित्वे हलादिशेषे 'सन्यतः' इति इत्वे 'मान्बध–' इति दीर्घे बीभत्सधातोर्लडादीति भावः। तदेवं गुपादिषु सप्तसु सन्नन्तेषु अत्र क्रमे धातुपाठे निबद्धाश्चत्वार उदाहृताः। कितमानशानधातवस्तु अनुपदमेव धातुपाठक्रमे पठिष्यमाणास्तत्र तत्रोदाहरिष्यन्ते। **रभ राभस्य इति**। अनिडयम्। राभस्यं शीघ्रीभावः। आङ्पूर्वकस्तु प्रारम्भार्थकः। तदाह **आरभत इति**। **रब्धेति**। झषस्तथोरिति धत्वम्, भस्य जश्त्वम्। **रप्स्यत इति**। रभताम्। अरभत। रभेत। रप्सीष्ट। अरब्ध। अरप्स्यत। **डुलभ-**

एवं चानुपूर्वीमात्रसाम्येऽपि भ्वादयश्चुरादिभ्यो भिन्ना एवेति फलितम्। **इड्गुणौ नेति**। यद्यपि 'हलन्ताच्च' इति सनः कित्वेनापि गुणाभावः सुसाधस्तथापीडभावार्थमुक्तहेतुरेवाश्रयणीय इति किं हेत्वन्तराश्रयणेनेति भावः। केचित्तु अर्थवद्ग्रहणपरिभाषया इच्छासन एव 'हलन्ताच्च' इति सूत्रे ग्रहणमिति नास्य स्वार्थसनः कित्त्वमित्याहुः। **रभ** राभस्ये। राभस्यमुपक्रमः। लिटि। रेभे। रेभाते। लुङि। अरब्ध। अरप्स-

परिष्वङ्गे । २३९६ दंशसञ्जस्वञ्जां शपि । (६-४-२५) २३९७ रञ्जेश्च । (६-४-२६) एषां शपि नलोपः । स्वजते । परिष्वजते । 'ग्रन्थिग्रन्थिदम्भिस्वञ्जीनां लिटः कित्वं वा' इति व्याकरणान्तरम् । देभतुः सस्वजे इति भाष्योदाहरणादेकदेशानुमत्या इहाप्याश्रीयते । 'सदेः परस्य लिटि' (सू २३६१) इति सूत्रे 'स्वञ्जेरुपसंख्यानम्' (वा ४१६८) अतोऽभ्यासात्परस्य षत्वं न । परिषस्वजे, परिषस्वञ्जे । सस्वजिषे, सस्वञ्जिषे । स्वङ्क्ता । स्वङ्क्ष्यते । स्वजेत । स्वङ्क्षीष्ट । अस्वङ्क्त । प्रत्यष्वङ्क्त । 'प्राक्सितात्–' (सू २२७६) इति षत्वम् । परिनिविभ्यस्तु

षिति । डुरित् षकारश्च । 'ड्वितः क्त्रिः' 'षिद्भिदादिभ्योऽङ्' इति प्रयोजनम् । अनिड्, रभधातुवद्रूपाणि । ष्वञ्ज परिष्वङ्गे इति । षोपदेशोऽयमनिट् । दंशसञ्ज । रञ्जेश्च । व्याख्यासौकर्याय सूत्रद्वयमुपात्तम् । नलोप इति । नकारस्य लोप इत्यर्थः, 'श्नान्नलोपः' इत्यतः तदनुवृत्तेरिति भावः । परिष्वजत इति । 'परिनिविभ्यः–' इति षत्वमिति भावः । संयोगात्परत्वाल्लिटः कित्त्वे अप्राप्ते आह ग्रन्थीति । व्याकरणान्तरमिदं पाणिनीयैरपि ग्राह्यमित्याह देभतुरिति । 'अत एकहल्मध्ये–' इति सूत्रभाष्ये देभतुः इत्युदाहृतम् । 'सदेः परस्य लिटि' इति सूत्रभाष्ये सस्वजे इत्युदाहृतम् । ततश्च एकदेशानुमत्या ग्रन्थिग्रन्थीत्यादिवाक्यं कृत्स्नं व्याकरणान्तरस्थं भाष्यानुमतमिति विज्ञायत इत्यर्थः । सदेरिति । 'सदेः परस्य लिटि' इति षत्वनिषेधसूत्रे स्वञ्जेरपि ग्रहणमित्यर्थः । ततश्च स्वदिस्वञ्ज्योरुत्तरखण्डस्य सस्य षत्वं न स्यादिति लब्धम्, तदाह अतोऽभ्यासात् परस्येति । परिषस्वजे परिषस्वञ्ज इति । परस्येत्युक्तेरुत्तरखण्डस्यैव षत्वनिषेधः, न त्वभ्यासस्य । कित्त्वपक्षे नलोपः । सस्वजाते, सस्वञ्जाते । सस्वजिरे, सस्वञ्जिरे । क्रादिनियमादिडित्याह सस्वजिषे, सस्वञ्जिष इति । सस्वजाथे, सस्वञ्जाथे । सस्वजिध्वे, सस्वञ्जिध्वे । सस्वजे, सस्वञ्जे । सस्वजिवहे, सस्वञ्जिवहे । सस्वजिमहे, सस्वञ्जिमहे । स्वङ्क्तेति । स्वञ्ज् ता इति स्थिते जकारस्य कुत्वेन गकारे सति श्चुत्वसंपन्नञकारस्य निवृत्तौ नकारस्यानुस्वारे तस्य परसवर्णेन ङकारे गकारस्य चर्त्वे रूपम् । एवमग्रेऽपि । स्वजेतेति । 'दंशसञ्ज–' इति शपि नलोप इति भावः । स्वङ्क्षीष्ट । अस्वङ्क्तेति । लुङि अस्वञ्ज् स् त इति स्थिते 'झलो झलि' इति सिज्लोपे कुत्वादि पूर्ववदिति भावः । ननु प्रत्यष्वङ्क्त इत्यत्र अटा व्यवधानादुपसर्गस्थादिणः परत्वाभावात् कथम् 'उपसर्गात्सुनोति–' इति षत्वमित्यत आह प्राक् सितादिति । परिनिविभ्यस्त्विति । परस्य स्वञ्जेः इति शेषः । ननु परिनिविभ्यः परस्यापि स्वञ्जेः 'परिनिविभ्यः सेवसितसयसिवुसहसुट्स्तुस्वञ्जाम्' इति नित्यमेव षत्वमुचितम्,

'सिवादीनां वा–' (सू २३२९) इति विकल्पः। एतदर्थमेव 'उपसर्गात्सुनोति–' (सू २२७०) इत्येव सिद्धे स्तुस्वञ्ज्योः 'परिनिवि–' (सू २२७५) इत्यत्र पुनरुपादानम्। पर्यष्वङ्क्त, पर्यस्वङ्क्त। हद ९७७ पुरीषोत्सर्गे। हदते। जहदे। हत्ता। हत्स्यते। हदेत। हत्सीष्ट। अहत्त।

अथ परस्मैपदिनः। ञि ष्विदा ९७८ अव्यक्ते शब्दे। स्कन्दिर् ९७९ गतिशोषणयोः। चस्कन्दिथ, चस्कन्थ। स्कन्ता। स्कन्त्स्यति। नलोपः—स्कद्यात्। इरित्वादङ् वा—अस्कदत्, अस्कान्त्सीत्। अस्कान्ताम्। अस्कान्त्सुः।

'प्राक्सितादड्व्यवायेऽपि' इत्यटा व्यवधानेऽपि तस्य प्रवृत्तेः। 'उपसर्गात्सुनोति–' इत्यादिसूत्रे स्वञ्जेः पठितत्वेन स्वञ्जेः 'प्राक्सितात्–' इति सूत्रविषयत्वादित्यत आह एतदर्थमेवेत्यादि। परिनिवि इति। नित्यषत्वविधौ स्वञ्जिरप्युपात्तः। ततः 'उपसर्गात्सुनोति–' इत्येव तस्य षत्वे सिद्धे पुनरुपादानं 'सिवादीनां वाड्व्यवायेऽपि' इत्युत्तरसूत्रे षत्वविकल्पविधौ अनुवृत्त्यर्थमेव संपद्यते। परिनिविभ्यः परस्य स्वञ्जेः 'सिवादीनां वा–' इति षत्वविकल्पार्थं पूर्वसूत्रे 'परिनिविभ्यः सेव–' इत्यत्र स्वञ्जिग्रहणमिति पर्यवस्यतीत्यर्थः। हद पुरीषोत्सर्गे। अनिडयम्। क्रादिनियमादिट्। जहदिषे। जहदिध्वे। जहदिवहे जहदिमहे। हत्तेति। लुटि तासि दस्य चर्त्वम्। अहत्तेति। 'झलो झलि' इति सिज्लोपः। गुपादयोऽष्टावनुदात्तेतो गताः।

अथ परस्मैपदिन इति। 'कित निवासे' इत्यन्ता इति शेषः। ञि ष्विदेति। ञिः आकारश्च इत्। सेट्। स्वेदति। सिष्वेद सिष्विदतुः सिष्विदुः। सिष्वेदिथ सिष्विदथुः सिष्विद। सिष्वेद सिष्विदिव सिष्विदिम। स्वेदिता। स्वेदिष्यति। स्वेदतु। अस्वेदत्। स्वेदेत्। स्विद्यात्। अस्वेदीत्। अस्वेदिष्यत्। स्कन्दिरिरित्। अनिट्। भारद्वाजनियमात्थलि वेडित्याह चस्कन्दिथ, चस्कन्थेति। अनिट्पक्षे चस्कन्द् थ इति स्थिते 'खरि च' इति दकारस्य तकारः। चस्कन्दिव चस्कन्दिम। स्कन्तेति। लुटि तासि चर्त्वेन दस्य तः। स्कन्त्स्यतीति। स्ये दस्य चर्त्वम्। स्कन्दतु। अस्कन्दत्। स्कन्देत्। आशीर्लिङि विशेषमाह नलोप इति। इरः समुदायस्य इत्त्वेन धातोरनिदित्त्वादाशीर्लिङि नकारस्य लोप इत्यर्थः। अस्कददिति। लुङि अङि सति ङित्वान्नलोप इति भावः। अङभावे आह अस्कान्त्सीदिति। अनेकहल्व्यवधानेऽपि हलन्तलक्षणा वृद्धिः प्रवर्तत इति निरूपितमदूधातौ। अतोऽत्र वृद्धौ दस्य चर्त्वेन तः। अस्कान्तामिति। हलन्तलक्षणवृद्धौ 'झलो झलि' इति सिज्लोपे दस्य चर्त्वम्। अस्कान्त्सुरिति। उसि सिचि वृद्धौ दस्य चर्त्वम्। अस्कान्त्सीः

२३९८ **वेः स्कन्देरनिष्ठायाम्।** (८-३-७३) षत्वं वा स्यात्। कृत्येवेदम्, अनिष्ठायाम् इति पर्युदासात्। विष्कन्ता, विस्कन्ता। निष्ठायां तु विस्कन्नः। २३९९ **परेश्च।** (८-३-७४) अस्मात्परस्य स्कन्देः सस्य षो वा। योगविभागाद् अनिष्ठायाम् इति न संबध्यते, परिष्कन्दति, परिस्कन्दति। परिस्कन्नः, परिष्कण्णः। षत्वपक्षे णत्वम्। न च पदद्वयाश्रयतया बहिरङ्गत्वात् षत्वस्यासिद्धत्वम्, 'धातूपसर्गयोः कार्यमन्तरङ्गम्' इत्यभ्युपगमात्। 'पूर्वं धातुरुपसर्गेण युज्यते ततः साधनेन' इति भाष्यम्। 'पूर्वं साधनेन' इति

अस्कान्तम् अस्कान्त। अस्कान्त्सम् अस्कान्त्स्व अस्कान्त्स्म। अस्कन्त्स्यत्। **वेः स्कन्देः।** शेषपूरणेन सूत्रं व्याचष्टे **षत्वं वा स्यादिति**। 'अपदान्तस्य मूर्धन्यः' इत्यधिकारात् 'सिवादीनां वा–' इत्यतो वेत्यनुवृत्तेश्चेति भावः। वेः परस्य स्कन्देः सस्य षो वा स्याद् अनिष्ठायां परत इति फलितम्। ननु विस्कन्दतीत्यादौ कुतो न षत्वविकल्प इत्यत आह **कृत्येवेदमिति।** पर्युदासस्य अब्राह्मणमानयेत्यादाविव सजातीयापेक्षत्वादिति भावः। **विष्कन्ता, विस्कन्तेति।** तृचि रूपे। असोपदेशत्वादप्राप्ते विभाषेयम्। **परेश्च।** ननु 'विपरिभ्यां स्कन्देरनिष्ठायाम्' इत्येव सिद्धे सूत्रभेदो व्यर्थ इत्यत आह **योगेति। षत्वपक्ष इति।** परिष्कन्द् त इति स्थिते अनिदितामिति नलोपे 'रदाभ्याम्–' इति निष्ठातकारस्य तत्पूर्वदकारस्य च नत्वे सस्यानेन षत्वपक्षे प्रथमनकारस्य रेफापेक्षया भिन्नपदस्थत्वेऽपि षात् परत्वाद् णत्वे द्वितीयनकारस्य ष्टुत्वेन णत्वे परिष्कण्ण इति रूपमित्यर्थः। ननु दकारस्थानिकनकारस्य षकारनिमित्तकं णत्वमन्तरङ्गम्, निमित्तनिमित्तिनोरेकपदस्थत्वात्। षत्वं तु परि इत्युपसर्गात्मकपदान्तरस्थमिणं निमित्तीकृत्य प्रवर्तमानं बहिरङ्गम्। ततश्च णत्वे कर्तव्ये बहिरङ्गस्य षत्वस्यासिद्धत्वात् षात्परत्वाभावात् कथं णत्वमित्याशङ्क्य निराकरोति **न चेति।** पदद्वयाश्रयतया बहिरङ्गस्य षत्वस्यासिद्धत्वं यत्प्रसक्तं तन्न शङ्क्यमित्यन्वयः। कुत इत्यत आह **धातूपसर्गयोरिति। पूर्वं धातुरिति।** धातुरुपसर्गेण सह युज्यते सन्ध्यादिकार्यं लभते। पश्चाद् धातूपसर्गकार्यप्रवृत्त्यनन्तरं साधनेन युज्यते। साधनशब्दः कारकवाची। इह तु तद्वाचकः प्रत्ययो लक्ष्यते। प्रत्ययेनेति यावत्। इदं च 'संप्रसारणाच्च' इत्यादिसूत्रभाष्ये स्पष्टम्,

---

ताम्। **डुलभष्।** 'ड्वितः क्त्रिः'। लब्त्रिमम्। 'षिद्भिदादिभ्यः–' इत्यङ्। लभा। लिटि। लेभे। लुङि। अलब्ध। **वे स्कन्देरनिष्ठायाम्।** 'सिवादीनाम्–' इत्यतो वेत्यनुवर्तते। असोपदेशत्वादप्राप्ते विभाषेयम्। माधवादिग्रन्थानुरोधेनाह **कृत्येवेदमिति।** प्राचा तु विस्कन्दतीत्युदाहृतं तत्र मूलं मृग्यमिति भावः। **न संबध्यत**

मतान्तरे तु न णत्वम्। यभ ९८० मैथुने। येभिथ, ययब्ध। यब्धा। यप्स्यति। अयाप्सीत्। णम ९८१ प्रह्वत्वे शब्दे च। नेमिथ, ननन्थ। नन्ता। अनंसीत् अनंसिष्टाम्। गम्लृ ९८२ सृप्लृ ९८३ गतौ। २४०० इषुगमियमां छः। (७-३-७७) एषां छः स्याच्छिति परे। गच्छति। जगाम जग्मतुः जग्मुः। जगमिथ, जगन्थ। गन्ता। २४०१ गमेरिट् परस्मैपदेषु। (७-२-५८)

तदाह **भाष्यमिति। मतान्तरे त्विति।** 'पूर्वं धातुः साधनेन युज्यते पश्चादुपसर्गेण, इति पक्षे तु षत्वस्य बहिरङ्गतया असिद्धत्वान्न णत्वमित्यर्थः। यभधातुरनिट्। यभति। ययाभ येभतुः। थलि तु भारद्वाजनियमादिट्पक्षे पित्त्वेनाकित्त्वेऽपि 'थलि च सेटि' इत्येत्त्वाभ्यासलोपं मत्वा आह **येभिथेति। ययब्धेति।** थलि इडभावपक्षे पित्त्वेनाकित्त्वादेत्त्वाभ्यासलोपाभावे ययभ् थ इति स्थिते 'झषस्तथोः–' इति थस्य धत्वे भस्य जश्त्वेन बकार इति भावः। येभथुः येभ। ययाभ, ययभ। क्रादिनियमादिट्। येभिव। येभिम। **यब्धेति।** लुटि तासि तकारस्य 'झषस्तथोः–' इति धत्वम्। भकारस्य जश्त्वेन बकार इति भावः। **यप्स्यतीति।** स्ये भस्य चर्त्वेन पः। यभतु। अयभत्। यभेत्। यभ्यात्। **अयाप्सीदिति।** हलन्तलक्षणा वृद्धिरिति भावः। अयप्स्यत्। **णम प्रह्वत्व इति।** अनिडयं णोपदेशश्च। केचित्त्विमं धातुमुदितं पठन्ति। तत्तु प्रामादिकम्। तथा सति 'उदितो वा' इति क्त्वायामिड्विकल्पस्य ['यस्य विभाषा' इति निष्ठायामिड्विकल्पस्य च] आपत्तेः। नमति। ननाम नेमतुः नेमुः। थलि तु भारद्वाजनियमादिट्पक्षे पित्त्वेनाकित्त्वेऽपि 'थलि च सेटि' इत्येत्त्वाभ्यासलोपं मत्वा आह **नेमिथ, ननन्थेति।** इडभावपक्षे पित्त्वेन अकित्त्वादेत्वाभ्यासलोपाभावे रूपम्। नेमथुः नेम। ननाम, ननम नेमिव नेमिम। क्रादिनियमादिट्। **नन्तेति।** मस्यानुस्वारपरसवर्णौ। नंस्यति। नमतु। अनमत्। नमेत्। नम्यात्। **अनंसीदिति।** 'यमरम्–' इति सगिति भावः। अनंस्यत्। **गम्लृ सृप्लृ गताविति।** अनिटौ। सृपिरषोपदेशः। **इषुगमि। शितीति।** 'ष्ठिवुक्लम्वाचमाम्–' इत्यतः तदनुवृत्तिरिति भावः। उदिन्निर्देशात्तौदादिकस्य इषेर्ग्रहणम्। अत्राचीत्यनुवर्त्य अजादौ शितीत्याश्रित्य इष्यति इष्णाति इत्यत्र छत्वं नेति भाष्ये स्थितम्। एवं चात्र सूत्रे तुदादौ च उदित्पाठः अनार्ष इति शब्देन्दुशेखरे स्थितम्। **गच्छतीति।** शपि मकारस्य छकारः। **जग्मतुरिति।** 'गमहन–' इत्युपधालोपः। एवं जग्मुः। भारद्वाजनियमात्थलि वेट्, तदाह **जगमिथ, जग-**

इति। अत एव तिङन्तेऽपि षत्वमुदाहरन्ति **परिष्कन्दतीति। णम प्रह्वत्वे।**

१ अयं पाठो नितान्तमसङ्गतः, यस्य विभाषेतिसूत्रस्य निष्ठायामिण्निषेधकत्वाद् नमतेश्चानिट्कत्वान्निष्ठायामिडप्राप्तेः।

गमेः परस्य सकारादेरिट् स्यात्। गमिष्यति। लृदित्वादङ्। 'अनङि' इति पर्युदासान्नोपधालोपः। अगमत्। सर्पति। ससर्प। २४०२ **अनुदात्तस्य चर्दुपधस्यान्यतरस्याम्**। (६-१-५९) उपदेशेऽनुदात्तो य ऋदुपधस्तस्याम्वा स्याज्झलादावकिति परे। स्रप्ता, सर्प्ता। स्रप्स्यति, सर्प्स्यति। असृपत्। यम १८४ उपरमे। यच्छति। येमिथ, ययन्थ। यन्ता। अयंसीत् अयंसिष्टाम्।

न्थेति। जग्मथुः जग्म। जगाम, जगम जग्मिव जग्मिम। क्रादिनियमादिट्। **गमेरिट्**। गमेरिति पञ्चमी। 'सेऽसिचि–' इत्यतः से इत्यनुवृत्तेन आर्धधातुकस्येत्यनुवृत्तं विशेष्यते। तदादिविधिः। तदाह **गमेः परस्येत्यादिना**। परस्मैपदेष्वित्यस्य आत्मनेपदाभावे इत्यर्थः। एवं च संजिगमिषितेति नृचि इट् सिध्यति। **गमिष्यतीति**। गच्छतु। अगच्छत्। गच्छेत्। गम्यात्। लुङि विशेषमाह **लृदित्वादङिति**। 'गमहन–' इति उपधालोपो नेत्याह **अनङि इति पर्युदासादिति**। **अगमदिति**। लृङि अगमिष्यत्। **सर्पतीति**। शपि ऋकारस्य लघूपधगुणः, रपरत्वम्। **ससर्पेति**। ससृपतुः ससृपुः। थलि क्रादिनियमान्नित्यमिट्। अजन्तत्वाभावादकारवत्त्वाभावाच्च नेड्विकल्पः। ससर्पिथ ससृपथुः ससृप। ससर्प ससृपिव ससृपिम। लुटि तासि लघूपधगुणे रपरे प्राप्ते **अनुदात्तस्य च**। 'सृजिदृशोः–' इत्यतो झल्यमकितीति 'आदेच–' इत्यत उपदेशे इति चानुवर्तते। तदाह **उपदेशेऽनुदात्त इत्यादिना**। मित्वादन्त्यादचः परः। 'उपदेशे' किम्। स्रप्तुम्। तुमुनि परे 'ञ्नित्यादिर्नित्यम्' इत्युदात्तोऽयम्। अथापि उपदेशे अनुदात्तत्वादम् भवत्येव। 'अकिति' इति किम्। क्तप्रत्यये सृप्तः। **स्रप्तेति**। सृप्धातोर्लुटि तासि अमागमे ऋकारस्य यणिति भावः। **सर्प्तेति**। अमभावे लघूपधगुणे रपरत्वमिति भावः। एवं स्रप्स्यति सर्प्स्यतीति। सर्पतु। असर्पत्। सर्पेत्। सृप्यात्। **असृपदिति**। लृदित्वात् च्लेरङि सति ङित्वान्न गुण इति भावः। अस्रप्स्यत्, असर्प्स्यत्। **यम उपरम इति**। उपरमो विरमणम्। अनिडयम्। **यच्छतीति**। 'इषुगमियमाम्–' इति शपि छः। ययाम येमतुः येमुः। थलि भारद्वाजनियमादिट्पक्षे 'थलि च सेटि' इत्येत्वाभ्यासलोपौ, तदाह **येमिथ, ययन्थेति**। इडभावे रूपम्। येमथुः येम। ययाम, ययम येमिव

केचिदमुमुदितं पठन्ति तत्प्रामादिकमित्याहुः। **जग्मतुरिति**। 'गमहन–' इत्युपधालोपः। **अनुदात्तस्य**। 'आदेच उपदेशेऽशिति' इत्यत उपदेश इत्यनुवर्तते। उपदेशे किम्, स्रष्टुम्। तुमुनि उदात्तः। ऋदुपधस्य किम्, कर्ता। झलीति किम्, ससर्प। अकितीति किम्, सृप्तः। **असृपदिति**। लृदित्वादङ्। 'स्पृशमृश–' इति सिज्विकल्पवार्तिके सृपं प्रक्षिप्य असाप्सीदिति केचिदुदाहरन्ति तत्प्रमादिकमित्याहुः।

तप ९८५ सन्तापे । तप्ता । अताप्सीत् । २४०३ निसस्तपतावनासेवने । (८-३-१०२) षः स्यात् । आसेवनं पौनःपुन्यम्, ततोऽन्यस्मिन्विषये । निष्टपति । त्यज ९८६ हानौ । तत्यजिथ, तत्यक्थ । त्यक्ता । अत्याक्षीत् । षञ्ज ९८७ सङ्गे । 'दंशसञ्जस्वञ्जां शपि' (सू २३९९) इति नलोपः । सजति । सङ्क्ता । दृशिर् ९८८ प्रेक्षणे । पश्यति । २४०४ विभाषा सृजिदृशोः ।

येमिम । क्रादिनियमादिट् । **यन्तेति** । यंस्यति । यच्छतु । अयच्छत् । यच्छेत् । यम्यात् । **अयंसीदिति** । 'यमरम-' इति इट्सकौ । 'इट ईटि' इति सिज्लोपः । 'नेटि' इति निषेधान्न हलन्तलक्षणा वृद्धिरिति भावः । अयंस्यत् । **तप संताप इति** । अनिडयम् । तपति । तताप तेपतुः तेपुः । तेपिथ, ततप्थ तेपथुः तेप । तताप, ततप तेपिव तेपिम । **तप्तेति** । तप्स्यति । तपतु । अतपत् । तपेत् । तप्यात् । **अताप्सीदिति** । हलन्तलक्षणा वृद्धिरिति भावः । अतप्स्यत् । **निसस्तपतौ** । शेषपूरणेन सूत्रं व्याचष्टे **षः स्यादिति** । 'अपदान्तस्य मूर्धन्यः' इत्यधिकारादिति भावः । निसः सकारस्य षः स्यात् तपधातौ परत इति यावत् । अनासेवने इत्येतद्व्याख्यास्यन् आसेवनशब्दं व्याचष्टे **पौनःपुन्यमिति** । आसेवनशब्देन सह नञ्समास इत्यभिप्रेत्याह **ततोऽन्यस्मिन्विषय इति** । आदेशत्वाभावात् पदान्तत्वाच्च अप्राप्ते वचनम् । **निष्टपतीति** । निष्कृष्य तपतीत्यर्थः । निसः सस्य षत्वे तकारस्य ष्टुत्वेन टः । आसेवने तु न षत्वम् । **त्यज हानाविति** । हानिरुत्सर्गः । अयमनिट् । त्यजति । तत्याज तत्यजतुः तत्यजुः । संयुक्तहल्मध्यस्थत्वादेत्त्वाभ्यासलोपौ न । थलि तु भारद्वाजनियमादिट्, तदाह **तत्यजिथ, तत्यक्थेति** । इडभावे 'चोः कुः' इति भावः । **त्यक्तेति** । त्यक्ष्यति । त्यजतु । अत्यजत् । त्यजेत् । त्यज्यात् । **अत्याक्षीदिति** । हलन्तलक्षणा वृद्धिरिति भावः । अत्यक्ष्यत् । **षञ्ज सङ्ग इति** । षोपदेशोऽयमनिड् नोपधश्च । कृतानुस्वारपरसवर्णस्य निर्देशः । शपः पित्त्वेन कित्त्वाभावात्तस्मिन्परे 'अनिदिताम्-' इति नलोपाप्रवृत्तेराह **दंशसञ्जेति नलोप इति** । अनुस्वारपरसवर्णयोरसिद्धत्वादिति भावः । **सजतीति** । लिटि तु ससञ्ज । अतुसादौ तु अकित्त्वान्न नलोपः । ससञ्जतुः ससञ्जुः । थलि भारद्वाजनियमादिट् । ससञ्जिथ, ससङ्क्थ । इडभावे जस्य कुत्वेन गकारे तस्य चर्त्वे सति अनुस्वारपरसवर्णसंपन्नस्य चवर्गपञ्चमस्य निवृत्तौ ककारे परेऽनकारस्य परसवर्णो ङकारः । ससञ्जथुः ससञ्ज । ससञ्ज ससञ्जिव

अयंसीदिति । 'यमरम-' इतीट्सकौ । **निसस्तपता** । मूर्धन्य इत्यनुवर्तमाने फलितमाह **षः स्यादिति** । आसेवने तु निस्तपति । पुनः पुनस्तपतीत्यर्थः ।

(७-२-६५) आभ्यां थल इड् वा। २४०५ **सृजिदृशोर्झल्यमकिति।** (६-१-५८) अनयोरमागमः स्याज्झलादावकिति। द्रष्ठ, ददर्शिथ। द्रष्टा। द्रक्ष्यति। दृश्यात्। इरित्वादङ् वा। २४०६ **ऋदृशोऽङि गुणः।** (७-४-१६) ऋवर्णान्तानां दृशेश्च गुणः स्यादङि। अदर्शत्। अङभावे—२४०७ **न दृशः।** (३-१-४७) दृशश्च्लेः क्सो न। अद्राक्षीत्। दंश ९८९ दशने। दशनं

ससञ्जिथ। कादिनियमादिट्। **सङ्क्तेति।** तासि जस्य कुत्वेन गकारे तस्य चर्त्वे सति अस्य निवृत्तौ नस्य ङकार इति भावः। सङ्क्ष्यति। सजतु। असजत्। सजेत्। सज्यात्। असाङ्क्षीत्। हलन्तत्वाद् वृद्धिः। असङ्क्ष्यत्। **दृशिर् प्रेक्षण इति।** इरित्। अनिट् च। **पश्यतीति।** शिति 'पाघ्राध्मा-' इति पश्यादेश इति भावः। **ददर्श** ददृशतुः ददृशुः। थलि तु कादिनियमान्नित्यमिट् प्राप्तः, अजन्ताकारवत्त्वाभावाद् 'अचस्तास्वत्-' इति 'उपदेशेऽत्वतः' इति निषेधस्य चाप्राप्तेः ऋदन्तत्वाभावेन भारद्वाजनियमस्याप्रसक्तेः। तत्राह **विभाषा सृजि।** पञ्चम्यर्थे षष्ठी। 'गमेरिट्-' इत्यत इडिति 'अचस्तास्वत्-' इत्यतः थलीति चानुवर्तते, तदाह **आभ्यामिति।** इडभावपक्षे 'अनुदात्तस्य-' इति अमागमविकल्पे प्राप्ते **सृजिदृशोः।** अम् अकिति इति च्छेदः। नित्यार्थमिदम्। **द्रष्ठेति।** दृश् थ इति स्थिते इडभावपक्षे अमागमे ऋकारस्य यणि व्रश्चादिना शस्य षत्वे थस्य ष्टुत्वेन ठ इति भावः। इट्पक्षे त्वाह **ददर्शिथेति।** अझलादित्वादम् नेति भावः। **द्रष्टेति।** तासि अमागमे शस्य षत्वे तकारस्य ष्टुत्वेन टकार इति भावः। **द्रक्ष्यतीति।** अमागमे शस्य षत्वे 'षढोः-' इति कत्वे सस्य ष इति भावः। पश्यतु। अपश्यत्। पश्येत्। आशीर्लिङि आह **दृश्यादिति।** अझलादित्वादम् नेति भावः। लुङि विशेषमाह **इरित्वादङ् वेति।** अत्र अङ्पक्षे गुणनिषेधे प्राप्ते **ऋदृशोऽङि।** ऋ इत्यङ्गविशेषणत्वात् तदन्तविधिः, तदाह **ऋवर्णान्तानामिति।** **अङभाव इति।** अङभावपक्षे 'शल इगुपधात्-' इति क्सादेशे प्राप्ते सतीत्यर्थः। **न दृशः।** 'च्लेः सिच्' इत्यतः च्लेरिति 'शल इगुपधात्-' इत्यतः क्स इति चानुवर्तते, तदाह **दृशश्च्लेः क्सो नेति।** क्सादेशे तु अदृक्षदिति स्यादिति भावः। **अद्राक्षीदिति।** सिचि अमागमे ऋकारस्य यणि अकारस्य हलन्तलक्षणवृद्धौ शस्य षत्वे तस्य कत्वे सस्य षत्वमिति भावः। अद्रक्ष्यत्। **दंश दशन इति।** अयमनिट् नोपधश्च कृतानुस्वारनिर्देशः।

विभाषा सृजिदृशोः। कादिनियमान्नित्ये प्राप्ते विभाषेयम्। **सृजिदृशोः।** झलि किम्, ससर्ज। ददर्श। अकितीति किम्, सृष्टः। सृष्टवान्। दृष्टः। दृष्टवान्।

दंष्ट्राव्यापारः। पृषोदरादित्वादनुनासिकलोपः। अत एव निपातनादित्येके। तेषामप्यत्रैव तात्पर्यम्। अर्थनिर्देशस्याधुनिकत्वात्। 'दंशसञ्ज-' (सू २३१६) इति नलोपः। दशति। ददंशिथ, ददंष्ठ। दंष्टा। दङ्क्ष्यति। दश्यात्। अदाङ्क्षीत्। कृष ९९० विलेखने। विलेखनमाकर्षणम्। क्रष्टा, कर्ष्टा। क्रक्ष्यति, कर्क्ष्यति। 'स्पृशमृशकृषतृपदृपां च्लेः सिज्वा वाच्यः' (वा १८२६)। अक्राक्षीत्

दंष्ट्राव्यापार इति। हनुमूलगताः स्थूलदन्ता दंष्ट्राः, तद्व्यापारः क्षतक्रियादिरूप इत्यर्थः। ननु दंशधातोर्ल्युटि दशनशब्दः। तत्र 'अनिदिताम्-' इति नकारस्य लोपो न संभवति ल्युटः क्ङित्त्वाभावात्। 'दंशसञ्ज-' इत्यपि नस्य लोपो न संभवति, तस्य शप्येव प्रवृत्तेः। तथा च **दशन** इत्यर्थनिर्देशः कथमित्यत आह **पृषोदरादित्वादिति। अत एवेति।** दशनशब्दनिर्देशादेव नकारस्य लोप इत्यन्ये मन्यन्त इत्यर्थः। **तेषामपीति।** निपातनान्नकारलोप इति वदतामपि पृषोदरादिषु निपातनादित्यर्थ एव तात्पर्यं न तु धातुपाठे दंश दशने इत्यर्थनिर्देशे इति भावः। विनिगमनाविरहमाशङ्क्याह **अर्थनिर्देशस्याधुनिकत्वादिति।** सर्वधातुष्वर्थनिर्देशस्य अपाणिनीयत्वादित्यर्थः। क्वचिदेव धातुष्वर्थनिर्देशः पाणिनीय इति भूधातौ निरूपितम्। अथ दशतीत्यादौ शपः पित्त्वेन अकित्त्वाद् 'अनिदिताम्-' इति नलोपाप्रवृत्तेराह **दंशसञ्जेति नलोप इति। दशतीति।** अनुस्वारस्यासिद्धत्वादिति भावः। 'दंशसञ्ज-' इत्यत्र शपीत्युक्तेरार्धधातुके नलोपो न। संयोगात्परत्वेन लिटः कित्त्वाभावाद् 'अनिदिताम्-' इत्यपि न। ददंश ददंशतुः ददंशुः। भारद्वाजनियमात्थलि वेट्, तदाह **ददंशिथ ददंष्ठेति।** अनिट्पक्षे व्रश्चादिना शस्य षः थस्य ष्टुत्वेन ठ इति भावः। **दंष्टेति।** तासि व्रश्चादिना शस्य षत्वे तकारस्य ष्टुत्वमिति भावः। **दङ्क्ष्यतीति।** व्रश्चादिना शस्य षत्वे तस्य कत्वे अनुस्वारस्य परसवर्णो ङकारे सस्य षत्वमिति भावः। दशतु। अदशत्। दशेत्। **दश्यादिति।** आशीर्लिङि 'अनिदिताम्-' इति नलोप इति भावः। **अदाङ्क्षीदिति।** सिचि हलन्तलक्षणा वृद्धिः, शस्य षः, तस्य कः, अनुस्वारस्य परसवर्णेन ङः, सस्य षत्वमिति भावः। अदङ्क्ष्यत्। **कृष विलेखन इति।** अनिडयम्। कर्षति। चकर्ष चकृषतुः चकृषुः। थलि अजन्ताकारवत्त्वाभावात् क्रादिनियमान्नित्यमिट्— चकर्षिथ चकृषथुः चकृष। चकर्ष चकृषिव चकृषिम, इति सिद्धवत्कृत्याह **क्रष्टा, कर्ष्टेति।** 'अनुदात्तस्य च-' इति अम्विकल्पः। तकारस्य ष्टुत्वम्। **क्रक्ष्यति, कर्क्ष्यतीति।** षस्य कत्वे सस्य षः। कर्षतु। अकर्षत्। कर्षेत्। कृष्यात्। 'शल

अदाङ्क्षीदिति। 'वदव्रज-' इति वृद्धिः। अदाङ्ष्टाम्। अदाङ्क्षुः। क्रष्टा।

अकार्क्षाम्। अकार्क्षीत् अकार्ष्टाम् अकार्क्षुः। पक्षे क्सः, अकृक्षत् अकृक्षताम् अकृक्षन्। दह ९९१ भस्मीकरणे। देहिथ, ददग्ध। दग्धा। धक्ष्यति। अधाक्षीत् अदाग्धाम् अधाक्षुः। मिह ९९२ सेचने। मिमेह। मिमेहिथ। मेढा। मेक्ष्यति। अमिक्षत्। कित ९९३ निवासे रोगापनयने च। चिकित्सति। संशये प्रायेण

इगुपधात्–' इति च्लेः क्सादेशे प्राप्ते आह स्पृशमृशेति। अकार्क्षीदिति। च्लेः क्सादेशाभावे सिचि 'अनुदात्तस्य चर्दुपधस्य–' इत्यमि ऋकारस्य यणि हलन्तलक्षणवृद्धौ 'षढोः कः सि' इत्यनेन षस्य कत्वे सस्य षत्वमिति भावः। अकार्ष्टीदिति। अमभावे सिचि वृद्धौ रूपम्। पक्षे क्स इति। च्लेः सिजभावपक्षे 'शल इगुपधात्–' इति क्स इत्यर्थः। अकृक्षदिति। क्से सति, कित्त्वाद् गुणाभावे षस्य कः, सस्य ष इति भावः। अकृक्ष्यत्, अकर्क्ष्यत्। दह भस्मीकरण इति। अनिट्। दहति। ददाह देहतुः देहुः। थलि तु भारद्वाजनियमाद्वैकल्पिकत्वादिडिति आह देहिथ, ददग्धेति। इट्पक्षे 'थलि च सेटि' इत्येत्वाभ्यासलोपौ। अनिट्पक्षे तु 'दादेः–' इति हस्य घः, 'झषस्तथोः–' इति थस्य धः, घस्य जश्त्वेन ग इति भावः। देहथुः देह। ददाह, ददह देहिव देहिम। दग्धेति। तासि हस्य घः, तकारस्य धः, घस्य ग इति भावः। धक्ष्यतीति। हस्य घः, दस्य भष्, घस्य गः, तस्य चर्त्वेन कः, सस्य ष इति भावः। दहतु। अदहत्। दहेत्। दह्यात्। अधाक्षीदिति। सिचि हलन्तलक्षणा वृद्धिः। हस्य घः, दस्य भष्, घस्य गः, तस्य कः, सस्य ष इति भावः। अदाग्धामिति। सिचि वृद्धिः, हस्य घः, 'झलो झलि' इति सलोपः, 'झषस्तथोः–' इति तकारस्य धः, घस्य ग इति भावः। अधाक्षुरिति। सिचि वृद्धिः, हस्य घः, दस्य भष्, घस्य गः, तस्य कः, सस्य ष इति भावः। अधाक्षीः अदाग्धम् अदाग्ध। अधाक्षम् अधाक्ष्व अधाक्ष्म। अधक्ष्यत्। मिह सेचन इति। अनिट्। मेहति। मिमेह मिमिहतुः मिमिहुः। अजन्ताकारवत्त्वाभावात् क्रादिनियमान्नित्यमिट्, तदाह मिमेहिथेति। मिमिहथुः मिमिह। मिमेह मिमिहिव मिमिहिम। मेढेति। तासि ढत्वधत्वष्टुत्वढलोपाः। मेक्ष्यतीति। हस्य ढः, तस्य कः, सस्य षः। मेहतु। अमेहत्। मेहेत्। मिह्यात्। लुङि 'शल इगुपधात्–' इति क्सः। कित्त्वान्न गुणः। हस्य ढः, तस्य कः, सस्य षः, तदाह अमिक्ष-

---

कर्ष्टेति। 'अनुदात्तस्य च–' इत्यम् वा। धक्ष्यतीति। घत्वकत्वभष्भावाः। अधाक्षीदिति। 'अस्तिसिचः–' इतीट्। वृद्धिः। घत्वादि प्राग्वत्। मिह सेचने। सेचनमिह मिश्रीकरणकं विवक्षितं नतु सेचनमात्रम्। 'मेढ्ं मेहनशेफसी' इत्यमरः। कित निवासे।

विपूर्वः। 'विचिकित्सा तु संशयः' इत्यमरः। अस्यानुदात्तेत्त्वमाश्रित्य चिकित्सते इत्यादि कश्चिदुदाजहार। निवासे तु केतयति। दान ११४ खण्डने। शान ११५ तेजने। इतो वहत्यन्ताः स्वरितेतः। दीदांसति। दीदांसते। शीशांसति। शीशांसते। अर्थविशेषे सन्। अन्यत्र दानयति। शानयति। डु पचष् ११६ पाके। पचति, पचते। पेचिथ, पपक्थ। पेचे।

दिति। अमेक्ष्यत। **कित निवासे रोगापनयने चेति।** परस्मैपदिषु पाठाद् अयं परस्मैपदी। अर्थद्वयमात्रमत्र निर्दिष्टम्। अर्थनिर्देशस्य उपलक्षणत्वाद् अर्थान्तरेषु वृत्तिः। तत्र 'कितेर्व्याधिप्रतीकारे निग्रहे अपनयने नाशने संशये च' इति निबद्धेष्वर्थेषु 'गुप्तिज्किद्भ्यः सन्' इति सन्विहितः, तदाह **चिकित्सतीति।** 'सन्यतः' इति इत्वे हलादिशेषे अभ्यासचुत्वे चिकित्सेति सन्नन्तम्, तस्माल्लटि शपि चिकित्सतीति रूपम्। अस्य सनः 'धातोः' इति विहितत्वाभावादनार्धधातुकत्वान्न लघूपधगुणः, नापि इडागम इति प्रागुक्तम्। चिकित्साञ्चकारेत्यादि सुगमं जुगुप्सतिवत्। **संशय इत्यादि।** व्यक्तम्। **निवासे त्विति।** व्याधिप्रतीकाराद्यर्थपञ्चकादर्थान्तरे चुरादित्वस्योक्तत्वादिति भावः। **दान खण्डने। शान तेजन इति।** तेजनं तीक्ष्णीकरणम्। **इत इति।** 'दान खण्डने' इत्यारभ्य 'वह प्रापणे' इत्येतत्पर्यन्ताः स्वरितेत इत्यर्थः। तत्र धातुपाठे अर्थनिर्देशस्य उपलक्षणत्वाद्यदा दानधातुरार्जवे शानधातुस्तु निशाने वर्तते, तदा 'मान्बधदान्शान्-' इति सनि, 'सन्यङोः' इति द्वित्वे, अभ्यासह्रस्वे, तस्य 'सन्यतः' इति इत्वे, तस्य 'मान्बध-' इति दीर्घे सति, नकारस्यानुस्वारे, दीदांसशीशांसाभ्यां लटि स्वरितानुबन्धस्य केवलयोरचरितार्थत्वात्, कर्तृगे फले तङि शपि दीदांसते शीशांसते इति रूपम्। परगामिनि तु फले परस्मैपदे तिपि शपि दीदांसति शीशांसति इति रूपम्, तदाह **दीदांसत इत्यादि। शीशांसतीति।** तीक्ष्णीकरोतीत्यर्थः। **अर्थविशेष इति।** आर्जवे निशाने चार्थे सनित्यर्थः। **अन्यत्रेति।** आर्जवनिशानाभ्यामन्यत्र णिजन्तात्परस्मैपदमेवेत्यर्थः। अर्थान्तरे अनुबन्धकाश्चुरादय इत्युक्तेरिति भावः। **डु पचष् पाक इति।** डुः षकारः चकारादकारश्च इत्। स्वरितेत्त्वादुभयपदी, तदाह **पचति, पचत इति।** पपाच पेचतुः पेचुः। भारद्वाजनियमात्थलि वेट्, तदाह **पेचिथ, पपक्थेति।** इट्पक्षे

कितेर्व्याधिप्रतीकारादावेव सन्नित्युक्तम्, तदुदाहरति **चिकित्सतीति।** रोगमपनयतीत्यर्थः। शत्रुं चिकित्सति, निगृह्णातीत्यर्थः। क्षेत्रे तृणं चिकित्सति, अपनयति

पक्ता। पक्षीष्ट। षच ९९७ समवाये। सचति, सचते। भज ९९८ सेवायाम्। बभाज भेजतुः भेजुः। भेजिथ, बभक्थ। भक्ता। भक्ष्यति, भक्ष्यते। अभाक्षीत्, अभक्त। रञ्ज ९९९ रागे। नलोपः। रजति, रजते। रज्यात्, रङ्क्षीष्ट। अराङ्क्षीत् अराङ्क्ताम्। अरङ्क्त। शप १००० आक्रोशे। आक्रोशो विरुद्धानु-

---

'थलि च सेटि' इत्येत्त्वाभ्यासलोपौ। अनिट्पक्षे तु 'चोः कुः' इति भावः। पेचथुः पेच। पपाच, पपच पेचिव पेचिम। क्रादिनियमादिट्। **पेचे इति**। पेचाते पेचिरे। पेचिषे पेचाथे पेचिध्वे। पेचे पेचिवहे पेचिमहे। क्रादिनियमादिट्। **पक्तेति**। तासि 'चोः कुः'। पक्ष्यति, पक्ष्यते। पचतु, पचताम्। अपचत्, अपचत। पचेत्। **पक्षीष्टेति**। आशीर्लिङि तङि सीयुटि 'चोः कुः', षत्वम्। अपाक्षीत्। अपक्त। अपक्षाताम्। अपक्ष्यत्, अपक्ष्यत। षचधातुः षोपदेशः, तदाह **सचति, सचत इति**। सेडयम्। ससाच सेचतुः सेचुः। सेचिथ सेचथुः सेच। ससाच, ससच सेचिव सेचिम। सेचे। सेचिषे। सेचिवहे सेचिमहे। सच्यात्, सचिषीष्ट। असाचीत्, असचीत्, असचिष्ट। भजधातुरनिट्। भजति। किति लिटि वैरूप्यापादकादेशादित्वाद् 'अत एकहल्मध्ये–' इत्यप्राप्तौ 'तॄफल–' इत्येत्त्वाभ्यासलोपौ, तदाह **भेजतुरिति**। भारद्वाजनियमात्थलि वेट्, तदाह **भेजिथ, बभक्थेति**। इट्पक्षे 'थलि च सेटि' इत्येत्त्वाभ्यासलोपौ इति भावः। भेजिव भेजिम। क्रादिनियमादिट्। भेजे। भेजिषे। भेजिवहे। **भक्तेत्यादि**। सुगमम्। **रञ्ज राग इति**। नोपधोऽयम्। कृतानुस्वारपरसवर्णनिर्देशः। अनिडयम्। शपः पित्त्वेन ङित्त्वाभावाद् 'अनिदिताम्–' इत्यप्राप्तावपि 'रञ्जेश्च' इति शपि नलोपः, तदाह **रजति, रजत इति**। संयोगात्परत्वाल्लिटो न कित्त्वम्, ररञ्ज ररञ्जतुः। भारद्वाजनियमात्थलि वेट्, ररञ्जिथ, ररङ्क्थ। अनिट्पक्षे जस्य कुत्वेन गः। ततोऽनुस्वारपरसवर्णञकारनिवृत्तौ गस्य चर्त्वेन कः। नस्यानुस्वारे तस्य परसवर्णो ङकार इति भावः। ररञ्जिव ररञ्जिम, क्रादिनियमादिट्। रङ्क्ता। रङ्क्ष्यति। रङ्क्ष्यते। रजतु, रजताम्। अरजत्, अरजत। रजेत्, रजेत। आशीर्लिङि यासुटः कित्वाद् 'अनिदिताम्–' इति नलोपः, तदाह **रज्यादिति। रङ्क्षीष्टेति**। आत्मनेपदे लिङः सीयुटि जस्य कुत्वेन गः, ततः परसवर्णसंपन्नञकारनिवृत्तिः, गस्य कः, नस्य परसवर्णेन ङः, षत्वमिति भावः। **अराङ्क्षीदिति**। सिचि हलन्तलक्षणवृद्धौ कुत्वादि पूर्ववत्। अनेकहल्व्यवधानेऽपि हलन्तलक्षणा वृद्धिः प्रवर्तत इति भाष्ये

नाशयति वेत्यर्थः। अर्थान्तरे चुरादिरित्युक्तं तदुदाहरति **केतयतीति**। **षच समवाये**। समवायः सम्बन्धः। **भेजतुरिति**। 'तॄफलभज–' इत्येत्वम्। **भक्ष्यतीति**।

ध्यानम् । शशाप, शेपे । अशाप्सीत्, अशप्त । त्विष १००१ दीप्तौ । त्वेषति, त्वेषते । तित्विषे । त्वेष्टा । त्वेक्ष्यति, त्वेक्ष्यते । त्विष्यात्, त्विक्षीष्ट । अत्विक्षत् । अत्विक्षत अत्विक्षाताम् । अत्विक्षन्त । यज १००२ देवपूजासङ्गतिकरणदानेषु । यजति, यजते । **२४०८ लिट्यभ्यासस्योभयेषाम् ।** (६-१-१७)

स्पष्टम् । **अशाङ्क्तामिति** । 'झलो झलि' इति सलोपः । कुत्वादि पूर्ववत् । **अशङ्क्तेति** । लुङ्लङि प्रथमपुरुषैकवचने 'झलो झलि' इति सलोपे कुत्वादि । **शप आक्रोश इति** । अनिडयम् । भारद्वाजनियमात्थलि वेट् । वमादौ तु क्रादिनियमादिट् । **अशाप्सीदिति** । हलन्तलक्षणा वृद्धिः । **अशप्तेति** । 'झलो झलि' इति सलोपः । अशप्साताम् । त्विषधातुरनिट् । शपि लघूपधगुणः, तदाह **त्वेषति, त्वेषत इति** । तित्वेष तित्विषतुः तित्विषुः । तित्वेषिथ तित्विषथुः तित्विष । तित्वेष तित्विषिव तित्विषिम, क्रादिनियमादिट् । **तित्विषे इति** । तित्विषाते तित्विषिरे । तित्विषिषे तित्विषाथे तित्विषिध्वे । तित्विषे तित्विषिवहे तित्विषिमहे । **त्वेष्टेति** । तासि तकारस्य ष्टुत्वम् । **त्वेक्ष्यति, त्वेक्ष्यत इति** । स्ये कत्वषत्वे । त्वेषतु, त्वेषताम् । अत्वेषत्, अत्वेषत । त्वेषेत्, त्वेषेत । **त्विष्यादिति** । यासुट आशीर्लिङि कित्त्वान्न लघूपधगुणः । **त्विक्षीष्टेति** । 'लिङ्सिचावात्मनेपदेषु' इति कित्त्वान्न गुणः । लुङि परस्मैपदे 'शल इगुपधात्–' इति च्लेः क्सः । कित्त्वान्न गुणः, तदाह **अत्विक्षदित्यादि** । लुङि आत्मनेपदे च्लेः क्सादेशं मत्वा आह **अत्विक्षतेति** । **अत्विक्षन्तेति** । अत्विक्ष झ इति स्थिते 'क्सस्याचि' इत्यन्त्यलोपासंभवादतः परत्वाद् 'आत्मनेपदेष्वनतः' इत्यदादेशासंभवादन्तादेशे क्सस्यान्त्यलोपे पररूपे वा रूपमिति भावः । **यज देवपूजेति** । अनिडयम् । **यजति, यजत इति** । देवान् पूजयति सङ्गमयति ददाति वेत्यर्थः । णलि द्वित्वादौ तु ययाज इति स्थिते **लिट्यभ्यासस्योभयेषाम्** । 'ष्यङः संप्रसारणम्–' इत्यतः संप्रसारणमित्यनुवर्तते । 'वचिस्वपियजादीनाम्–' इति सूत्रोपात्ताः 'ग्रहिज्यावयि–'

कुत्वषत्वे । त्विष दीप्तौ । **अत्विक्षदिति** । 'शल इगुपधात्–' इति क्सः । कत्वषत्वे । **अत्विक्षातामिति** । 'क्सस्याचि' इति लोपः । **यज** देव– । देवपूजा त्विह देवतोद्देशेन विधिबोधितो द्रव्यत्यागः । **लिट्यभ्यासस्येति** । वच्यादयो वचिस्वपियजादयः । ग्रह्यादयस्तु 'ग्रहिज्यावयि–' इत्यादयः । यद्यपि ग्रहिपृच्छतिभृज्जतीनामभ्यासस्य संप्रसारणे कृतेऽकृते च विशेषो नास्ति, तथापि पर्जन्यवल्लक्षणं प्रवर्तते । जग्राह । पप्रच्छ । बभ्रज्ज । व्रश्चतेस्तु विशेषः, संप्रसारणस्याकरणे वव्रश्चेरयत्र वकारस्य संप्रसारणं स्यात् । कृते तु संप्रसारणे 'न संप्रसारणे–' इति निषेधप्रवृत्तिरिति ।

वच्यादीनां ग्रह्यादीनां चाभ्यासस्य संप्रसारणं स्याल्लिटि। इयाज । २४०१

वचिस्वपियजादीनां किति । (६-१-१५) वचिस्वप्योर्यजादीनां च संप्रसारणं स्यात्किति । पुनः प्रसङ्गविज्ञानाद् द्वित्वम् । ईजतुः ईजुः । इयजिथ, इयष्ठ । ईजे । यष्टा । यक्ष्यति, यक्ष्यते । इज्यात् , यक्षीष्ट। अयाक्षीत् , अयष्ट ।

इति सूत्रोपात्ताश्च उभयशब्देन गृह्यन्ते, तदाह **वच्यादीनां ग्रह्यादीनां चेति** । अत्र वच्यादीनामित्यनेन वचिः स्वपिः यजादयश्च विवक्षिताः । 'यज देवपूजा–' इत्यारभ्य 'टु ओ श्वि गतिवृद्धयोः' इत्येतत्पर्यन्ता यजादयः, तदुक्तम्—'यजिवपिर्वहिश्चैव वसिर्वेञ्व्येञ् इत्यपि । ह्वेञ् वदिः श्वयतिश्चैव यजाद्याः स्युरिमे नव ॥' इति । तेष्वनन्तर्भावाद्वचिस्वप्योः पृथग्ग्रहणम् । ग्रह्यादीनामित्यनेन तु ग्रहिज्यावयिव्यधिवष्टिविचतिवृश्चतिपृच्छतिभृज्जतयो विवक्षिताः । **इयाजेति** । अभ्यासयकारस्य संप्रसारणे इकारे 'संप्रसारणाच्च' इति पूर्वरूपमिति भावः । यज् अतुस् इति स्थिते द्वित्वे अभ्यासयकारस्य संप्रसारणे पूर्वरूपे च इयजतुरिति प्राप्ते **वचिस्वपि** । वचिस्वपीति इका निर्देशः । सौत्रः संप्रसारणाभावः । आदिशब्दो यजिनैव संबध्यते न तु वचिस्वपिभ्याम् , तथा सति हि वच्यादेः स्वप्यादेर्यजादेश्चेत्यर्थः स्यात् । तथा सति पृथक्स्वपिग्रहणं व्यर्थं स्यात् , अदादिगणे लुग्विकरणे 'वच परिभाषणे' इत्यारभ्य पठ्तस्य 'ञि ष्वप् शये' इत्यस्य वच्यादिग्रहणेनैव सिद्धेः, तदाह **वचिस्वप्योर्यजादीनां चेति** । ननु यज् अतुस् इति स्थिते द्वित्वात्परत्वात्संप्रसारणे कृते 'विप्रतिषेधे यद्बाधितं तद्बाधितमेव' इति न्यायेन द्वित्वस्य कथं प्राप्तिरित्याशङ्कयाह **पुनः प्रसङ्गेति । ईजतुरिति** । यज् अतुस् इति स्थिते संप्रसारणे पूर्वरूपे च कृते द्वित्वे सवर्णदीर्घ इति भावः । एवं चात्र किति लिटि 'वचिस्वपि–' इति सूत्रम्, अकिति लिटि तु 'लिट्यभ्यासस्य–' इति सूत्रमिति स्थितिः । भारद्वाजनियमात्थलि वेट्। कृते द्वित्वे अकित्वाद् 'वचिस्वपि–' इत्यप्रवृत्तौ 'लिट्यभ्यासस्य–' इत्यभ्यासयकारस्य संप्रसारणम् , तदाह **इयजिथ, इयष्ठेति** । अनिट्पक्षे व्रश्चादिना जस्य षत्वे ष्टुत्वेन थस्य ठः । ईजथुः ईज । इयाज, इयज ईजिव ईजिम । **ईज इति** । 'असंयोगात्–' इति कित्वाद् 'वचिस्वपि–' इति संप्रसारणे कृते द्वित्वे सवर्णदीर्घ इति भावः । ईजाते ईजिरे । क्रादिनियमादिट् । ईजिषे ईजाथे ईजिध्वे । ईजे ईजिवहे ईजिमहे । **यष्टेति** । तासि व्रश्चादिना जस्य षत्वे ष्टुत्वेन तकारस्य टः । **यक्ष्यति, यक्ष्यत इति** । व्रश्चादिना जस्य षत्वे 'षढोः–' इति षस्य कत्वे सस्य षत्वमिति भावः । यजतु, यजताम् । अयजत् , अयजत ।

लिटीति किम् , विवक्षति । यियक्षति । **वचिस्वपि** । आगणान्ता यजादयः । 'यजिवपिर्वहिश्चैव वसिर्वेञ् व्येञ् इत्यपि । ह्वेञ्वदी श्वयतिश्चेति यजाद्याः स्युरिमे नव' ।

डु वप् १००३ बीजसन्ताने । बीजसन्तानं क्षेत्रे विकिरणं गर्भाधानं च । अयं छेदनेऽपि । केशान् वपति । उवाप, ऊपे । वप्ता । उप्यात् , वप्सीष्ट । अवाप्सीत् । अवप्त । वह १००४ प्रापणे । उवाह । उवहिथ । 'सहिवहोरोदवर्णस्य' (सू २३२७) । उवोढ । ऊहे । वोढा । वक्ष्यति, वक्ष्यते । अवाक्षीत् अवो

यजेत् , यजेत । आशीर्लिङि आह इज्यादिति । यासुटः कित्त्वाद् 'वचिस्वपि–' इति संप्रसारणमिति भावः । यक्षीष्टेति । आशीर्लिङि आत्मनेपदे प्रथमैकवचने सीयुटि जस्य षत्वे तस्य कत्वे सस्य षत्वमिति भावः । अयाक्षीदिति । सिचि हलन्तलक्षणा वृद्धिः । जस्य षः, तस्य कः, सस्य ष इति भावः । अयष्टेति । अयज् स् त इति स्थिते 'झलो झलि' इति सलोपे, जस्य षः, ष्टुत्वेन तकारस्य ट इति भावः । अयक्षाताम् अयक्षत । अयक्ष्यत्, अयक्ष्यत । डु वप् बीजसंतान इति । प्ररोहार्थं बीजानां क्षेत्रेषु प्रक्षेपण इत्यर्थः, तदाह क्षेत्रे विकिरणमिति । वपिः प्रकिरणार्थ इति 'सन्यङोः' इत्यत्र भाष्यम् । गर्भाधानं चेति । 'अप्रमत्ता रक्षत तन्तुमेतं मा वः क्षेत्रे परबीजानि वाप्सुः' इत्यादौ तथा दर्शनादिति भावः । अयं छेदनेऽपीति । वर्तत इति शेषः । केशान् वपतीति । छिनत्तीत्यर्थः । अनिडयम् । उवापेति । 'लिट्यभ्यासस्य–' इत्यकित्यभ्यासस्य संप्रसारणमिति भावः । किति तु 'वचिस्वपि–' इति द्वित्वात्प्राक्संप्रसारणे कृते द्वित्वम् । ऊपतुः ऊपुः । उवपिथ, उवप्थ ऊपथुः ऊप । उवाप, उवप ऊपिव ऊपिम । ऊप इति । ऊपाते ऊपिरे । ऊपिषे ऊपाथे ऊपिध्वे । ऊपे ऊपिवहे ऊपिमहे । वप्तेति । वप्स्यति, वप्स्यते । वपतु, वपताम् । अवपत् , अवपत । वपेत् वपेत । उप्यादिति । आशिषि यासुटः कित्त्वाद् 'वचिस्वपि–' इति संप्रसारणम् । वप्सीष्टेति । सीयुटि रूपम् । प्रण्यवाप्सीदिति । लुङि परस्मैपदे सिचि हलन्तलक्षणा वृद्धिः । 'नेर्गद–' इति णत्वम् । अवाप्ताम् अवाप्सुः । अवप्तेति । आत्मनेपदे लुङि 'झलो झलि' इति सलोपः । अवप्साताम् । वह प्रापण इति । अयमनिट् । वहति, वहते । उवाहेति । 'लिट्यभ्यासस्य–' इति अकिति अभ्यासस्य संप्रसारणमिति भावः । किति 'वचिस्वपि–' इति संप्रसारणे कृते द्वित्वम् । ऊहतुः ऊहुः । भारद्वाजनियमात्थलि वेट् , तदाह उवहिथेति । 'न वृसदद–' इति निषेधात् 'थलि च सेटि' इति न भवति । अथ थलि अनिट्पक्षे आह सहिवहोरोदवर्णस्येति । सहिवहोरवर्णस्य ओत्स्याड्ढलोपे परत इत्यर्थः । 'ढ्लोपे–' इति दीर्घं बाधित्वा ओत्त्वमिति भावः । उवोढेति । उवह् थ इति स्थिते ढत्वधत्वष्टुत्व-

---

१ वस्तुतस्त्विदमसङ्गतम् , वहतेस्थलि सम्प्रसारणेन लिण्निमित्तादेशादित्वात् 'थलि च–' इत्यस्याप्राप्तेः ।

ढाम् अवाक्षुः। अवोढ अवक्षाताम् अवक्षत। अवोढाः अवोढ्वम्। वस १००५ निवासे। परस्मैपदी। वसति। उवास। **२४१० शासिवसिघसीनां च।** (८-३-६०) इण्कुभ्यां परस्यैषां सस्य षः स्यात्। ऊषतुः ऊषुः। उवसिथ, उवस्थ। वस्ता। 'सः स्यार्धधातुके' (सू २३४२)। वत्स्यति। उष्यात्।

ढलोपा ओत्वं चेति भावः। ऊहथुः ऊह। उवाह, उवह ऊहिव ऊहिम। कादिनियमादिट्। **ऊह इति**। ऊहाते ऊहिरे। ऊहिषे ऊहाथे ऊहिध्वे, ऊहिढ्वे। ऊहे ऊहिवहे ऊहिमहे। **वोढेति**। तासिढत्वधत्वष्टुत्वढलोपा ओत्वं च। लृटि स्ये, हस्य ढः, तस्य कः, षत्वम्, तदाह **वक्ष्यति, वक्ष्यत इति**। वहतु वहताम्। अवहत्, अवहत। वहेत् वहेत। उह्यात्। **अवाक्षीदिति**। हलन्तलक्षणवृद्धौ ढकषाः प्राग्वत्। **अवोढामिति**। 'झलो झलि' इति सलोपे ढत्वधत्वष्टुत्वढलोपा ओत्वं चेति भावः। **अवाक्षुरिति**। उसि सिचि वृद्धौ ढकषाः। अवाक्षीः अवोढम् अवोढ। अवाक्ष्म् अवाक्ष्व अवाक्ष्म। **अवोढेति**। लुङि आत्मनेपदे प्रथमपुरुषैकवचने अवह् स् त इति स्थिते सलोपः, ढत्वधत्वष्टुत्वढलोपा ओत्वं च। **अवक्षातामिति**। आतामि सिचि ढकषा इति भावः। **अवक्षतेति**। 'आत्मनेपदेष्वनतः' इत्यदादेशः। **अवोढ्वमिति**। अवक्षि अवक्ष्वहि अवक्ष्महि। अवक्ष्यत्, अवक्ष्यत। इति वहत्यन्ताः स्वरितेतो गताः। वसधातुरनिट्। अकिति लिटि परे 'लिट्यभ्यासस्य–' इत्यभ्यासस्य संप्रसारणम्, तदाह **उवासेति**। किति तु 'वचिस्वपि–' इति संप्रसारणे कृते द्वित्वादौ ऊस् अतुस् इति स्थिते सकारस्य आदेशप्रत्ययावयवत्वाभावादप्राप्ते षत्वे **शासिवसि**। 'सहेः साडः सः' इत्यतः स इति षष्ठ्यन्तमनुवर्तते। 'इण्कोः' इति 'अपदान्तस्य मूर्धन्यः' इति चाधिकृतम्, तदाह **इण्कवर्गाभ्यामिति**। भारद्वाजनियमात्थलि वेट् इति मत्वा आह **उवसिथ, उवस्थेति**। 'न शसदद–' इति निषेधात् 'थलि च सेटि' इति न भवति। ऊषथुः ऊष। उवास, उवस ऊषिव ऊषिम। कादिनियमादिट्। वस् स्य ति इति स्थिते आह **सः स्यार्धधातुक इति**। अनेन सकारस्य तकार इति भावः। वसतु। अवसत्। वसेत्। **उष्यादिति**। आशीर्लिङि यासुटः कित्वाद् वस्य संप्रसारणे

कितीति किम्, इयष्ठ। **ड्डुवप्**। 'ड्वितः क्त्रिः, उप्त्रिमम्। **शासिवसिघसीनां च**। धातुसकारस्याप्राप्ते विधिरयम्। ननु सुपिसौ सुपिस इत्यादावतिप्रसङ्गवारणाय धातोः सकारस्य चेदेषामेवेति नियमार्थतां स्वीकृत्य 'आदेशप्रत्यययोः' इति सूत्रं त्यज्यतामिति चेत्। अत्राहुः—आदेशावयवस्य षत्ववारणाय आदेशस्येत्यंशस्तावदावश्यकः। तद्ग्रहणे कृते धातुभिन्नसकारस्य चेद्भवति आदेशरूपस्यैवेति नियमप्रसङ्गवारणाय प्रत्यय-

१ चिन्त्यमिदम्। २४७ पृष्ठे टिप्पणमवलोकनीयम्।

अवात्सीत् अवात्ताम्। वेञ् १००६ तन्तुसन्ताने। वयति, वयते। २४११ **वेञो वयिः।** (२-४-४१) वा स्याल्लिटि। इकार उच्चारणार्थः। उवाय। २४१२ **ग्रहिज्यावयिव्यधिवष्टिविचतिवृश्चतिपृच्छतिभृज्जतीनां ङिति च।** (६-१-१६) एषां किति ङिति च संप्रसारणं स्यात्। इति यकारस्य प्राप्ते। २४१३ **लिटि वयो यः।** (६-१-३८) वयो यस्य संप्रसारणं न

'शासिवसि–' इति षत्वमिति भावः। **अवात्सीदिति**। सिचि हलन्तलक्षणवृद्धौ सस्य तकारः। **अवात्तामिति**। अवस् स् तामिति स्थिते वृद्धौ 'झलो झलि' इति सलोपे प्रत्ययलक्षणमाश्रित्य सकारादार्धधातुकपरत्वाद् धातुसकारस्य 'सः सि–' इति तकारः। वस्तुतस्तु सिज्लोपस्यासिद्धत्वात् 'सः सि–' इति तकारे सिज्लोप इति बोध्यम्। अवात्सुः। अवात्सीः अवात्तम् अवात्त। अवात्सम् अवात्स्व अवात्स्म। अवत्स्यत्। वेञ्धातुरनिट्। ञित्त्वादुभयपदी। तन्तुसन्तानः पटनिर्माणार्थं तन्तूनां तिर्यक्प्रसारणविशेषः। **वयति, वयत इति**। शपि अयादेशः। **वेञो वयिः**। शेषपूरणेन सूत्रं व्याचष्टे **वा स्याल्लिटीति**। 'लिट्यन्यतरस्याम्' इत्यतः अन्यतरस्यामित्यनुवृत्तेरिति भावः। **उच्चारणार्थ इति**। इकारस्य इत्संज्ञकत्वे तु नुम् स्यादिति भावः। **उवायेति**। णलि वयादेशे यजादित्वादकिति लिटि परे 'लिट्यभ्यासस्य–' इति वकारस्य संप्रसारणे उपधावृद्धिरिति भावः। अत्र यकारस्य तु न संप्रसारणम्, 'लिटि वयो यः' इति तन्निषेधस्यानुपदमेव वक्ष्यमाणत्वादिति भावः। यद्यपि णलि वयादेशाभावेऽपि द्वित्वे अभ्यासस्य संप्रसारणे 'अचो ञ्णिति' इति वृद्धौ आयादेशे उवायेति सिध्यति। तथापि ऊयतुरित्याद्यर्थं वयादेशस्य आवश्यकत्वादिहापि वयादेशो न्याय्यत्वादुपन्यस्तः। वे अतुस् इति स्थिते वयादेशे कृते **ग्रहिज्या**। चकारेण 'वचिस्वपियजादीनाम्–' इत्यतः कितीति समुच्चीयते। 'ष्यङः संप्रसारणम्–' इत्यतः संप्रसारणम् अनुवर्तते, तदाह। **एषामित्यादि**। अत्र परस्मैपदिग्रह्यादिसाहचर्याद् 'अय वय पय गतौ' इति पठितस्यात्मनेपदिनो वयेर्न ग्रहणम्। यजादित्वादेव वयेः संप्रसारणे सिद्धे अत्र वयग्रहणं स्पष्टार्थमिति भाष्ये स्पष्टम्। **इति यकारस्य प्राप्त इति**।

ग्रहणमपि कर्तव्यमेवेति। **अवात्सीदिति**। 'वदव्रज–' इति वृद्धिः। 'सः सि–' इति तः। 'अस्तिसिचः–' इतीट्। **उच्चारणार्थ इति**। इत्संज्ञायां तु 'इदितः–' इति नुम् स्यादिति भावः। **उवायेति**। 'ग्राहिज्या–' इत्यत्र वयिग्रहणाद्वेञ इति निषेधोऽत्र न प्रवर्तत इत्याहुः। **ग्रहिज्यावयि**। गृह्णाति। गृहीतः। जिनाति। जिनीतः। जीनः। ङिति वयेरुदाहरणं नास्ति। किति तु 'वचिस्वपियजादीनाम्–' इति सिद्धम्,

स्याल्लिटि। ऊयतुः ऊयुः। **२४१४ वश्चास्यान्यतरस्यां किति।** (६-१-३९) वयो यस्य वो वा स्यात्किति लिटि। ऊवतुः ऊवुः। उवयिथ। वयेस्तासावभावात् थलि नित्यमिट्। स्थानिवद्भावेन ञित्वात्तङ्। ऊये ऊवे। वयादेशाभावे। **२४१५ वेञः।** (६-१-४०) वेञो न संप्रसारणं स्याल्लिटि। ववौ ववतुः ववुः।

'न संप्रसारणे संप्रसारणम्' इति लिङ्गादन्त्यस्य यणः पूर्वं संप्रसारणमिति विज्ञानाद्य-कारस्य संप्रसारणे प्राप्ते सतीत्यर्थः। **लिटि वयो। संप्रसारणं नेति।** 'न संप्रसारणे संप्रसारणम्' इत्यतः तदनुवृत्तेरिति भावः। तथा च यकारस्य संप्रसारणनिषेधे वकारस्य संप्रसारणमिति भावः, तदाह **ऊयतुरिति। वश्चास्य।** 'लिटि वयो यः' इत्यनुवर्तते, तदाह **वयो यस्येत्यादि। उवयिथेति।** अकित्त्वान्न वः। अजन्तत्वादकारवत्त्वाच्च थलि इड्विकल्पमाशङ्क्याह **वयेस्तासावभावात्थलि नित्यमिडिति।** वयेर्लिट्येव विहितत्वेन तासावभावाद् 'अचस्तास्वत्–' इति 'उप-देशेऽत्वतः' इति च इण्निषेधाप्रसक्त्या क्रादिनियमान्नित्यमिडित्यर्थः। 'यस्तासावस्ति नित्यानिट् च' इति भाष्यम्। ऊयथुः, ऊवथुः ऊय, ऊव। उवाय, उवय ऊयिव, ऊविव ऊयिम, ऊविम। ननु वयेरञित्वात् कथमुभयपदित्वमित्यत आह **स्थानिवद्भावेनेति।** **ऊये, ऊव इति।** 'वश्चास्यान्यतरस्याम्–' इति वत्वविकल्पः वत्वाभावे 'लिटि वयो यः' इति यकारस्य संप्रसारणनिषेधः। वकारस्य 'ग्रहिज्या–' इति 'वचिस्वपि–' इति वा संप्रसारणम्। ऊयाते ऊयिरे। ऊयिषे ऊयाथे ऊयिध्वे। ऊये ऊयिवहे ऊयिमहे। क्रादिनियमादिट्। एवम् ऊवाते ऊविरे इत्यादि। **वयादेशाभाव इति।** यजादित्वाद् 'लिट्यभ्यासस्य–' इति 'वचिस्वपि–' इति च संप्रसारणे प्राप्ते सतीति शेषः। **वेञः।** 'लिटि वयो यः' इत्यतो लिटीति 'न संप्रसारणे संप्रसारणम्' इत्यतो न संप्रसारणमिति चानुवर्तते, तदाह **वेञो नेति।** अत्र कितीति नानुवर्तते, तदाह **ववाविति।** णलि संप्रसारणनिषेधे 'आदेच उपदेशे–' इत्यात्त्वे 'आत औ णलः' इत्यौभावे

यजादिषु वेञः पाठात्। अतएवाभ्याससंप्रसारणमपि सिद्धम्। **वेञ इति।** संप्रसारण-निषेधस्तु 'लिटि वयो यः' इति निषेधारम्भान्न प्रवर्तते। तस्माद् ग्रहिज्यादिषु वयि-ग्रहणं स्पष्टार्थमेवेति बोध्यम्। **वश्चास्य।** अस्येत्यनेन 'लिटि वयो यः' इति परामृश्यते तदाह **वयो यस्येति।** 'वो वा किति' इत्येव सुवचम्। 'लिटि वयो यः' इति प्रकृतत्वात्। 'उपदेशेऽत्वतः' इति निषेधमाशङ्क्याह **वयस्तासावभावादिति।** ननु स्थानिनस्तासौ विद्यमानत्वात् स्थानिवद्भावेन तासौ विद्यमानत्वं सुलभमिति चेत्। अत्राहुः—शास्त्रीयकार्ये हि स्थानिवद्भावो न तु लौकिके। अचस्तास्वदिति निषेधस्य शास्त्रीयत्वेऽपि सोऽत्र नातिदिश्यते। अच इत्युक्तेरल्विधित्वादिति। **वेञः।** लिटि किम्,

वविथ, ववाथ । ववे   वाता । ऊयात् , वासीष्ट । अवासीत् । व्येञ् १००७ संवरणे । व्ययति, व्ययते । २४१६ न व्यो लिटि । (६-१-४६) व्येञ आत्वं न स्याल्लिटि । वृद्धिः । परमपि हलादिःशेषं बाधित्वा यस्य संप्रसारणम् । उभयेषांग्रहणसामर्थ्यात् । अन्यथा वच्यादीनां ग्रह्यादीनां चानुवृत्त्यैव सिद्धे किं

'वृद्धिरेचि' इति वृद्धौ रूपम् । ववतुरिति । 'आदेचः–' इत्यात्वे 'आतो लोपः–' । एवं ववुः । भारद्वाजनियमात्थलि वेट् , वेञस्तासावनिट्कत्वात् तदाह वविथ, ववाथेति । इट्पक्षे अकित्त्वेऽपि इट्परत्वादाल्लोप इति भावः । ववथुः वव । ववौ ववव वविम । क्रादिनियमादिट् । ववे इति । ववाते वविरे । वविषे ववाथे वविध्वे । ववे ववहे वविमहे । वा तेति । लुटि तासि आत्त्वम् । वास्यति वास्यते । वयतु, वयताम् । अवयत् , अवयत । वयेत् , वयेत । ऊयादिति । आशीर्लिङि यासुटि कित्त्वाद् 'वचिस्वपि–' इति संप्रारणे पूर्वरूपे 'अकृत्सार्वधातुकयोः–' इति दीर्घ इति भावः । वासीष्टेति । आशीर्लिङि आत्मनेपदे, सीयुटि आत्त्वे रूपम् । वासीयास्ताम् । अवासीदिति । आत्त्वे कृते इट्सकौ । अवास् इ स् ईदिति स्थिते 'इट ईटि' इति सलोपः । अवासिष्टामित्यादि । आत्मनेपदे, अवास्त अवासातामित्यादि । अवास्यत् , अवास्यत । व्येञ् संवरणे इति । ञित्त्वादुभयपदी । अनिट् । व्ययति, व्ययते इति । शपि अयादेशः । णलादौ तु आत्त्वे विव्यौ विव्यतुरित्यादि प्राप्तम् , तत्राह न व्यो लिटि । व्ये इत्यस्य कृतात्त्वस्य षष्ठ्यन्तस्य व्य इति निर्देशः । आत्त्वमिति । 'आदेच उपदेशे–' इत्यत आदित्यनुवृत्तेरिति भावः । वृद्धिरिति । णलि व्ये अ इति स्थिते 'अचो ञ्णिति' इति वृद्धिरित्यर्थः । तथा च व्यै अ इति स्थितम् । ननु तत्र द्वित्वे 'लिट्यभ्यासस्य–' इत्यभ्यासे यकारस्य संप्रसारणे पूर्वरूपे उत्तरखण्डस्य आयादेशे विव्याय इति रूपं वक्ष्यति । तदयुक्तम् , संप्रसारणात्प्राक् परत्वाद् हलादिशेषेण यकारस्य निवृत्तौ वकारस्य संप्रसारणे उकारे सति उव्यायेत्यापत्तेरित्यत आह परमपीति । उभयेषामिति । 'लिट्यभ्यासस्य–' इति सूत्रे उभयेषामिति ग्रहणसामर्थ्यादित्यर्थः । तदेवोपपादयति अन्यथेति । 'वचिस्वपियजादीनाम्–' इत्यस्य 'ग्रहिज्यावयिव्यधिवष्टिविचतिवृश्चतिपृच्छतिभृज्जतीनाम्–' इत्यस्य च स्वरितत्वादेवात्रानुवृत्त्यैव सिद्धे पुनः 'लिट्यभ्यासस्य–' इत्यत्र उभयेषांग्रहणं पुनर्विधानार्थम् । तथा च वच्यादीनां ग्रह्यादीनां चाभ्यासस्य संप्रसारणं स्याल्लिटीति द्विर्विधानं लब्धम् । तत्र द्वितीयं विधानं नियमार्थम्—उभयेषामभ्यासस्य संप्रसारणमेव स्यान्नेतरदिति ।

उतम् । उतवान् । न व्यो लिटि । लिटि किम् , व्याता । व्यास्यति । हलादिःशेषं बाधित्वेति । हलादिःशेषे तु वस्य संप्रसारणं स्यादिति भावः । अजन्तोकार-

तेन। विव्याय विव्यतुः विव्युः। 'इडत्त्यर्ति-' (सू २३८४) इति नित्यमिट्, विव्ययिथ। विव्याय, विव्यय। विव्ये। व्याता। वीयात्। व्यासीष्ट। अव्यासीत्, अव्यास्त। ह्वेञ् १००८ स्पर्धायां शब्दे च। ह्वयति, ह्वयते। २४१७ अभ्यस्तस्य च। (६-१-३३) अभ्यस्तीभविष्यतो ह्वेञः संप्रसारणं स्यात्। ततो द्वित्वम्।

तेनाऽभ्यासे एतत्संप्रसारणविषये कार्यान्तरनिवृत्तिः सिद्धेत्यर्थः। तथा च प्रकृते अभ्यासयकारस्य संप्रसारणे सिद्धं रूपमाह **विव्यायेति**। **विव्यतुः विव्युरिति**। 'वचिस्वपि-' इति संप्रसारणे द्वित्वे यणिति भावः। थलि भारद्वाजनियमादिड्विकल्पमाशङ्क्याह **इडत्त्यर्तीति। विव्ययिथेति**। अकित्त्वादभ्यासस्य संप्रसारणमिति भावः। विव्यथुः विव्य। **विव्याय, विव्ययेति**। अकित्वादभ्यासस्य संप्रसारणे णित्वविकल्पाद् वृद्धिविकल्प इति भावः। विव्यिव विव्यिम। **विव्ये इति**। कित्त्वाद् 'वचिस्वपि-' इति संप्रसारणे पूर्वरूपे वि इत्यस्य द्वित्वे यणिति भावः। विव्याते विव्यिरे। विव्यिषे विव्याथे विव्यिध्वे। विव्ये विव्यिवहे विव्यिमहे। **व्यातेति**। तासि एकारस्य आत्त्वम्। व्यास्यति, व्यस्यते। व्ययतु, व्ययताम्। अव्ययत्, अव्ययत। व्ययेत्, व्ययेत। **वीयादिति**। कित्त्वाद् 'वचिस्वपि-' इति संप्रसारणे पूर्वरूपे 'अकृत्सार्वधातुकयोः-' इति दीर्घः। वीयास्ताम्। **व्यासीष्टेति**। आशीर्लिङि सीयुटि आत्त्वम्। **अव्यासीदिति**। लुङि सिचि आत्त्वे इट्सकोः सिज्लोपः। अव्यासिष्टामित्यादि। **अव्यास्तेति**। लुङि आत्मनेपदे अव्ये स् त इति स्थिते आत्वमिति भावः। अव्यासातामित्यादि। अव्यास्यत्, अव्यास्यत। ह्वेञ्धातुरनिट्। ञित्त्वादुभयपदी। **शब्दे चेति**। आकारणार्थं आगच्छेत्यादिशब्दोऽत्र विवक्षितः। **ह्वयति, ह्वयते इति**। शपि अयादेशः। णलादौ अकिति 'लिट्यभ्यासस्य-' इति अभ्यासस्यैव संप्रसारणे प्राप्ते **अभ्यस्तस्य च**। 'ह्वः संप्रसारणम्' इत्यनुवर्तते। ह्व इति कृतात्त्वस्य ह्वे इत्यस्य षष्ठ्यन्तम्। तथा च अभ्यस्तीभूतस्य ह्वः संप्रसारणमिति लभ्यते। तथा सति णलि ह्वे अ इति स्थिते द्वित्वे कृते 'उभे अभ्यस्तम्' इत्यभ्यस्तसंज्ञायामुत्तरखण्डस्य संप्रसारणे कृते पूर्वखण्डस्याभ्यासस्य 'न संप्रसारणे संप्रसारणम्' इति निषेधः स्यादित्यत आह **अभ्यस्तीभविष्यत इति**। ननु यदभ्यस्तीभविष्यतो

वान्वा यस्तास्यनिट् थलि वेड् भवतीत्याशङ्कायामाह **नित्यमिडिति। वीयादिति**। संप्रसारणे 'अकृत्सार्व-' इति दीर्घः। **ह्वेञ्**। शब्द इति सामान्योक्तावपि आकारणरूपशब्द एवात्र गृह्यत इत्याहुः। तथा च माघे—'यान्तोऽन्यतः प्लुतकृतस्वरमाशु दूराद्दुद्वाहुना जुहुविरे मुहुरात्मवर्ग्याः' इति कर्मणि प्रयोगः। 'ह्वः संप्रसारणमभ्यस्तस्य च' इति सूत्रं योगविभागेन व्याचष्टे **अभ्यस्तस्य चेति**। पूर्वयोगस्तु 'णौ च

जुहाव जुहुवतुः जुहुवुः । जुहोथ, जुहविथ । जुहुवे । ह्वाता । हूयात्, ह्वासीष्ट ।
२४१८ लिपिसिचिह्वश्च । (३-१-५३) एभ्यश्च्लेरङ् स्यात् । **२४१९ आत्मनेपदेष्वन्यतरस्याम् । (३-१-५४)** 'आतो लोपः–' (सू २३७२) अह्वत् अह्वताम् अह्वन् । अह्वत । अह्वास्त ।

ह्वेञः संप्रसारणं तर्हि द्वित्वं बाधित्वा परत्वात्संप्रसारणे सति 'विप्रतिषेधे यद्बाधितं तद्बाधितम्' इति न्यायाद् द्वित्वं न स्यादित्यत आह **ततो द्वित्वमिति** । संप्रसारणानन्तरं द्वित्वमित्यर्थः, पुनः प्रसङ्गविज्ञानादिति भावः । तथा च णलि आत्वे कृते संप्रसारणे पररूपे हु इत्यस्य द्वित्वे 'कुहोश्चुः' इति चुत्वे तस्य जश्त्वे 'अचो ञ्णिति' इति वृद्धौ आवादेशे परिनिष्ठितं रूपमाह **जुहावेति** । **जुहुवतुरिति** । अतुसि आत्वे आल्लोपं बाधित्वा अन्तरङ्गत्वाद् 'अभ्यस्तस्य च' इत्यनेन संप्रसारणे 'वार्णादाङ्गं बलीयः' इत्यस्यानित्यतया अन्तरङ्गत्वात्पूर्वरूपे कृते द्वित्वे उवङिति भावः । यद्यपि किति 'वचिस्वपि–' इति संप्रसारणेऽपि सिद्धमिदम् । तथापि अकिति आवश्यकमभ्यस्तस्य चेत्येतद् न्याय्यत्वादिहापि भवतीति बोध्यम् । एवं जुहुवुः । भारद्वाजनियमात्थलि वेट्, तदाह **जुहोथ, जुहविथेति** । जुहुवथुः जुहुव । जुहाव, जुहव जुहुविव जुहुविम, क्रादिनियमादिट् । जुहुवे जुहुवाते जुहुविरे । जुहुविषे जुहुवाथे जुहुविध्वे । जुहुवे जुहुविवहे जुहुविमहे । **ह्वातेति** । तासि आत्वम् । ह्वास्यति, ह्वास्यते । ह्वयतु, ह्वयताम् । अह्वयत्, अह्वयत । ह्वयेत्, ह्वयेत । **हूयादिति** । आशीर्लिङि आत्वे यासुटि कित्वाद् 'वचिस्वपि–' इति संप्रसारणे पूर्वरूपे 'अकृत्सार्वधातुकयोः–' इति दीर्घ इति भावः । **ह्वासीष्टेति** । आशीर्लिङि सीयुटि रूपम् । लुङि विशेषमाह **लिपिसिचि** । लिपि सिचि ह्वा एषां समाहारद्वन्द्वात्पञ्चम्येकवचनम् । 'च्लेः सिच्' इत्यतः च्लेरिति 'अस्यतिवक्तिख्यातिभ्यः–' इत्यतः अङिति चानुवर्तते, तदाह **एभ्य इति** । इदं परस्मैपदविषयम्, आत्मनेपदे विकल्पविधानात्, तदाह **आत्मनेपदेषु । आतो लोप इति** । अह्वा अ त् इति स्थिते 'आतो लोप इटि च' इत्याल्लोप इत्यर्थः । **अह्वदिति** । अह्वताम् । **अह्वन्नित्यादि** । **अह्वतेति** ।

संश्चङोः' विषये प्रवर्तते । जुहावयिषति । अजूहवत् । **अभ्यस्तीभविष्यतो ह्वेञ इति** । अभ्यस्तनिमित्ते प्रत्यये परे द्विर्वचनात्प्रागेव ह्वेञः संप्रसारणमिति फलितोऽर्थः । अभ्यस्तमस्यास्तीति अभ्यस्तः सनादिः, तस्य यो ह्वेञ् तत्प्रकृतिभूतस्तस्येत्यादिव्याख्यानस्य स्वीकारात् । तेन जिह्वायकीयिषतीत्यत्र ह्वेञः संप्रसारणं न भवति, ण्वुलो द्वित्वनिमित्तत्वाभावात् । अतएव णिचो द्वित्वनिमित्तत्वं नेति ह्वः संप्रसारणमिति योगविभागः क्रियते । एतच्च आकरे स्पष्टम् । **लिपिसिचि** । लिप उपदेहे ।

अथ द्वौ परस्मैपदिनौ । वद १००९ व्यक्तायां वाचि । अच्छ वदति । उवाद ऊदतुः । उवदिथ । वदिता । उद्यात् । 'वदव्रज–' (सू २२६७) इति वृद्धिः । अवादीत् । टु ओ श्वि १०१० गतिवृद्ध्योः । श्वयति । २४२० विभाषा श्वेः । (६-१-३०) श्वयतेः संप्रसारणं वा स्याल्लिटि यङि च । शुशाव

लुङि आत्मनेपदे अङि रूपम् । अह्वेताम् अह्वन्तेत्यादि । अङभावपक्षे त्वाह अह्वास्तेति । अह्वासाताम् अह्वासत इत्यादि । अह्वास्यत् , अह्वास्यत ।

वद व्यक्तायां वाचीति । अज्झल्विभागेन स्पष्टोच्चारणे इत्यर्थः । सेडयम् । अच्छ वदतीति । अच्छेत्यव्ययमाभिमुख्ये । अभिमुखं वदतीत्यर्थः 'अच्छ गत्यर्थवदेषु' इति गतित्वादच्छेत्यस्य धातोः प्रागेव प्रयोग इति भावः । अकिति लिटि द्वित्वे 'लिट्यभ्यासस्य–' इति संप्रसारणमिति मत्वा आह उवादेति । किति लिटि तु 'वचिस्वपियजादीनाम्–' इति द्वित्वात्प्राक् संप्रसारणे कृते द्वित्वे सवर्णदीर्घ इति मत्वाह ऊदतुरिति । उवदिथेति । द्वित्वे अभ्यासस्य संप्रसारणमिति भावः । ऊदथुः ऊद । उवाद, उवद ऊदिव ऊदिम । वदितेति । तासि इट् । वदिष्यति । वदतु । अवदत् । वदेत् । उद्यादिति । आशीर्लिङि यासुटः कित्वाद् 'वचिस्वपि–' इति संप्रसारणमिति भावः । अवादीत् इत्यत्र हलन्तलक्षणवृद्धेः 'नेटि' इति निषेधेऽपि 'अतो हलादेः–' इति वृद्धिविकल्पमाशङ्क्य वदधातोः पृथग् ग्रहणाद् वृद्धिरित्यभिप्रेत्याह वदव्रजेति वृद्धिरिति । एतदर्थमेव 'वदव्रजहलन्तस्य–' इत्यत्र वदधातोः पृथग् ग्रहणमिति भावः । टु ओ श्वि इति । टुरोकारश्चेत् । श्वयतीति । शपि गुणायादेशौ । लिटि तु अकिति णलादौ 'लिट्यभ्यासस्य–' इत्यभ्यासस्य नित्यं संप्रसारणे प्राप्ते किति तु अतुसादौ द्वित्वात्प्राग् 'वचिस्वपि–'इति नित्यं संप्रसारणे प्राप्ते आह विभाषा श्वेः । संप्रसारणमिति । 'ष्यङः संप्रसारणम्–' इत्यतस्तदनुवृत्तेरिति भावः । लिटि यङि चेति । 'लिड्यङोः–' इत्यनुवृत्तेरिति भावः । शुशावेति । णलि अभ्याससंप्रसारणं बाधित्वा द्वित्वात्प्रागेव परत्वादनेन संप्रसारणे कृते ततो द्वित्वे वृद्ध्यावादेशाविति भावः । अकित्त्वाद् 'वचिस्वपि–' इत्यस्य नात्र प्राप्तिः । तथा च लिट्यकित्स्वेकवचनेषु द्वित्वात् प्रागप्राप्तस्य संप्रसारणस्य विकल्पविधिः । शुशुवतुरित्यादिद्विवचनबहुवचनेषु तु

षिच क्षरणे । अलिपत् । असिचत् । अच्छ वदतीति । अच्छेत्यस्य वद्योगे गतित्वाद्धातोः प्राक् प्रयोगः । विभाषा श्वेः । लिटि यङि चेति । 'लिड्यङोश्च' इति पूर्वसूत्रमिहानुवर्तत इति भावः । उभयत्र विभाषेयम् । लिडंशे अतुसादौ नित्ये प्राप्ते णलादावप्राप्ते । यङंशे त्वप्राप्तविभाषा । शोशू-

शुशुवतुः। 'श्वयतेर्लिट्यभ्यासलक्षणप्रतिषेधः' (वा ३४६२)। तेन 'लिट्य-भ्यासस्य–' (सू २४०८) इति संप्रसारणं न। शिश्वाय शिश्वियतुः। श्वयिता। श्वयेत्। शूयात्। 'जृस्तन्भु–' (सू २२६१) इत्यङ् वा। २४२१ श्वयतेरः। (७-४-१८) श्वयतेरिकारस्याकारः स्यादङि। पररूपम्। अश्वत् अश्वताम् अश्वन्। 'विभाषा धेट्श्व्योः' (सू २३७५) इति चङ्। इयङ्। अशिश्वियत्। 'ह्म्यन्त–' (सू २२६६) इति न वृद्धिः। अश्वयीत्। वृत्। यजादयो वृत्ताः।

द्वित्वात्प्राग् 'वचिस्वपि–' इति प्राप्तस्य संप्रसारणस्य विकल्पविधिः। तथा च उभयत्र विभाषेयम्। यङंशे त्वप्राप्तविभाषैवेयम्—शोशूयते। शेश्वीयते। तत्र यालि एतत्संप्रसारणाभावपक्षे श्वि इत्यस्य द्वित्वानन्तरमभ्याससंप्रसारणे शुश्वाय इति प्राप्ते आह **श्वयतेर्लिट्यभ्यासलक्षणप्रतिषेध इति**। लिट्यभ्याससंप्रसारणस्य प्रतिषेधो वक्तव्य इत्यर्थः। तथा च श्वि इत्यभ्यासस्य संप्रसारणाभावादभ्यासे इकार एव श्रूयत इत्याह **तेनेति**। **शूयादिति**। आशीर्लिङि यासुटः कित्त्वाद् 'वचि-स्वपि–' इति संप्रसारणे पूर्वरूपे 'अकृत्सार्वधातुकयोः–' इति दीर्घ इति भावः। लुङि विशेषमाह **जृस्तन्भ्विति**। तथा च अश्वि अ त् इति स्थिते इयङि प्राप्ते **श्वयतेरः**। श्वयतेः अः इति च्छेदः। श्वयतेरिति श्तिपा निर्देशः। श्विधातोरित्यर्थः। 'अलो-ऽन्त्यस्य' इत्यन्त्यस्य इकारस्येति लभ्यते। 'ऋदृशोऽङि–' इत्यतः अङीत्यनुवर्तते, तदाह **श्वयतेरिकारस्येति**। अश्व अ त् इति स्थिते सवर्णदीर्घमाशङ्क्याह **पररूपमिति**। आर्धधातुकोपदेशे अदन्तत्वाभावाद् न अल्लोपः। **अश्वन्निति**। अश्वः अश्वतम् अश्वत। अश्वम् अश्वाव अश्वाम। अङभावपक्षे त्वाह **विभाषेति**। **इयङिति**। 'चङि' इति द्वित्वमित्यपि ज्ञेयम्, तदाह **अशिश्वियदिति**। अङश्चङश्चाभावे तु अश्वि ईद् इति स्थिते इकारस्य सिचि वृद्धौ सत्याम् आयादेशे अश्वायीदिति प्राप्ते आह **ह्म्यन्तेति न वृद्धिरिति**। श्विग्रहणादिति भावः। न च 'नेटि' इत्येव सिचि वृद्धेः निषेधसिद्धेः पृथक् श्विग्रहणं व्यर्थमिति वाच्यम्, 'नेटि' इति निषेधस्य हलन्तलक्षणवृद्धिमात्रविषयत्वात्। न च अश्वि ईत् इति स्थिते सिचि वृद्ध्यपेक्षया परत्वादन्तरङ्गत्वाच्च इकारस्य गुणे एकारे कृते इगन्तत्वाभावेन सिचि

यते। शेश्वीयते। **संप्रसारणं नेति**। अन्यथा शुश्वायेत्यादि स्यादिति भावः। **श्वयतेरः**। अलोऽन्त्यपरिभाषालभ्यमाह **इकारस्येति**। **पररूपमिति**। अतो लोपस्तु न भवति, आर्धधातुकोपदेशे यदकारान्तमिति व्याख्यातत्वात्। **इयङिति**। लघूपधगुणापेक्षयान्तरङ्गत्वादिति भावः। **अश्वयीदिति**। नन्विहान्तरङ्गत्वाद् गुणा-यादेशयोः कृतयोर्यान्तत्वादेव वृद्धिनिषेधो भवेदिति किमनेन श्विग्रहणेनेति चेत्।

भ्वादिस्त्वाकृतिगणः। तेन चुलुम्पतीत्यादिसंग्रहः। इति भ्वादयः। २४२२ **ऋतेरीयङ्।** (३-१-२९) ऋतिः सौत्रस्तस्मादीयङ् स्यात्स्वार्थे। जुगुप्सायामयं धातुरिति बहवः। कृपायां चेत्येके। 'सनाद्यन्ताः–' (सू २३०४) इति धातुत्वम्। ऋतीयते। ऋतीयांचक्रे। आर्धधातुकविवक्षायां तु 'आयादय आर्धधातुके वा' (सू २३०५) इतीयङभावे 'शेषात्कर्तरि–' (सू २१५९) इति परस्मैपदम्। आनर्त। अर्तिष्यति। आर्तीत्।

॥ इति तिङन्ते भ्वादिप्रकरणम् ॥

वृद्ध्यप्राप्त्या अयादेशे कृते यान्तत्वादेव हलन्तलक्षणवृद्धेर्निषेधसिद्धेः 'ह्म्यन्त–' इत्यत्र श्विग्रहणं व्यर्थमिति वाच्यम्, अनवकाशतया अपवादत्वेन गुणं बाधित्वा सिचि वृद्धेः प्राप्तौ तन्निषेधार्थत्वादित्यलम्। वृदित्यस्य व्याख्यानम् **यजादयो वृत्ता इति**। ननु भ्वादयो वृत्ता इति कुतो न व्याख्यायते इत्यत आह **भ्वादिस्त्वाकृतिगण इति**। **चुलुम्पतीति**। चुलुम्पधातुर्लोपार्थकः, तस्यापि भ्वादिगणे पाठात् शब्विकरणत्वमिति भावः। **इति भ्वादय इति**। नचैवं सति 'अद भक्षणे' इत्यादीनां वक्ष्यमाणानां धातुत्वं कथमिति शङ्क्यम्, शब्विकरणा भ्वादयः समाप्ता इत्यर्थात्। **ऋतेरीयङ्**। ऋतेर्धातुपाठे अदर्शनादाह **ऋतिः सौत्र इति**। **स्वार्थे इति**। अर्थविशेषस्यानिर्देशादिति भावः। तकारान्तो धातुरयमिका निर्दिष्टो न त्विकारान्तः। इदन्तत्वे हि सवर्णदीर्घेणैव सिद्धे ईयङिति ईकारोच्चारणवैयर्थ्यात्। न च इदन्तत्वे सति 'एरनेकाचः–' इति यण् स्यादिति वाच्यम्, एवमपि 'ऋतेर्ङ्यः' इति ङ्यप्रत्यये कृते 'अकृत्सार्वधातुकयोर्दीर्घः' इति दीर्घेणैव सिद्धे इयङ्विधिवैयर्थ्यात्। **एके इति**। अन्ये इत्यर्थः। **ऋतीयते इति**। ईयङोऽदन्तत्वात् शपि पररूपम्। **ऋतीयांचक्रे इति**। 'कास्प्रत्ययात्–' इत्याम्। ऋतीयिता। ऋतीयिष्यते। ऋतीयताम्। आर्तीयत। ऋतीयेत। ऋतीयिषीष्ट। आर्तीयिष्ट। आर्तीयिष्यत। **आनर्तेति**। ऋत् इति तकारान्ताद् लिटि णलि द्वित्वे उरदत्वे रपरत्वे हलादिशेषे 'अत आदेः' इत्यभ्यासस्य दीर्घे 'तस्मान्नुड्द्विहलः' इति नुट्, नुड्विधौ ऋकारैकदेशो रेफो हल्त्वेन गृह्यत इत्युक्तेरिति भावः। आनृततुः आनृतुः। अनिट्सु अस्यापाठात् थलि नित्यमिट्। आनर्तिथ आनृतथुः आनृत। आनर्त

अत्राहुः—न सिच्यन्तरङ्गमस्तीति ज्ञापनार्थं णिश्विग्रहणम्। तेन चिरिणोति जिरिणोत्योर्यङ्लुगन्तानां चिनीप्रभृतीनां च सिचि बहिरङ्गा वृद्धिरेव भवति। अचिरायीत्। अजिरायीत्। अचेचायीत्। अनेनायीत् इति। **तेनेति**। उक्तं च वार्तिक-

अथ तिङन्तेऽदादिप्रकरणम् ॥ ४४ ॥

अद १०११ भक्षणे । द्वौ परस्मैपदिनौ। २४२३ अदिप्रभृतिभ्यः शपः। (२-४-७२) **लुक्स्यात्।** अत्ति अत्तः अदन्ति। **२४२४ लिट्यन्यतरस्याम्।** (२-४-४०) अदो घस्लृ वा स्याल्लिटि। जघास। 'गमहन–' (सू २३६३) इत्युपधालोपः। तस्य चर्विधिं प्रति स्थानिवद्भावनिषेधाद् घस्य

आनृतिव आनृतिम। अर्तिता। अर्तिष्यति। ऋत्यात्। **आर्तीदिति।** 'इट ईटि' इति सिज्लोपः, आडागमः। आर्तिष्यत्।

इति श्रीवासुदेवदीक्षितविदुषा विरचितायां सिद्धान्तकौमुदीव्याख्यायां बालमनोरमाख्यायां शब्विकरणनिरूपणं समाप्तम्।

अथ लुग्विकरणान् धातून्निरूपयितुमुपक्रमते **अद भक्षण इति।** अनिडयम्। **अदिप्रभृतिभ्यः।** 'ण्यक्षत्रियार्षञितः–' इत्यतो लुगित्यनुवर्तते इत्यभिप्रेत्य शेषपूरणेन सूत्रं व्याचष्टे **लुक् स्यादिति।** अदिप्रभृतिभ्यः परस्य शपो लुगिति फलितम्। **अत्तीति।** शपो लुकि दस्य चर्त्वेन तकारः। एवम् अत्त इत्यपि। **अदन्तीति।** एतदर्थमेव 'झोऽन्तः' इत्यत्र अकारादिरादेश आश्रितः। अत्सि अत्थः अत्थ। अद्मि अद्वः अद्मः। **लिट्यन्यतरस्याम्।** 'अदो जग्धिः' इत्यतः अद इति 'लुङ्सनोर्घस्लृ' इत्यतो घस्लृ इति चानुवर्तते। तदाह **अद इति।** आदेशे लृकार इत्। घसादेशः अनिट्। **जघासेति।** अकित्त्वाद् 'गमहन–' इत्युपधालोपो नेति भावः। जघस् अतुसिति स्थिते आह **गमहनेत्युप-**

कृता—'कस्यनेकाज्ग्रहणं चुलुम्पाद्यर्थम्' इति। **चुलुम्पतीति।** लुम्पतीत्यर्थः। चुलुम्प लोप इति कविकल्पद्रुमे उक्तत्वात्।

इति तत्त्वबोधिन्यां भ्वादिप्रकरणम्।

ऋतेरीयङ्। तान्तोऽयं धातुरिकानिर्दिष्टो न त्विकारान्तः, 'वञ्चिलुञ्च्यृतश्च' इति निर्देशात्। केचित्तु ईयङ् इति दीर्घोच्चारणात्तान्तोऽयमिति ज्ञाप्यते। इदन्तत्वे हि सवर्णदीर्घेणैव सिद्धेरियङमेव कुर्यादित्याहुस्तच्चिन्त्यम्। इदन्तत्वे तु 'एरनेकाच–' इति यणा सवर्णदीर्घस्य बाधात्। न च ऋतेर्यङ्विधौ 'अकृत्सार्व–' इति दीर्घोपपत्तेरीयङ्विधानं तान्तत्वे लिङ्गं भवत्येवेति वाच्यम्, यङ्विधौ 'सन्यङोः' इति द्वित्वापत्तेः। **कृतायां चेति।** 'अर्तनं च ऋतीया च हिणीया च घृणार्थकाः' इति, 'जुगुप्सा

चर्त्वम् । 'शासिवसि-' (सू २४१०) इति षत्वम् । जक्षतुः जक्षुः । घसेस्तासावभावात्थलि नित्यमिट् । जघसिथ । आद आदतुः । 'इडत्त्यर्त्ति-' (सू २३८४) इति नित्यमिट् । आदिथ । अत्ता । अत्स्यति । २४२५ हुझल्भ्यो हेर्धिः । (६-४-१०१) होर्झलन्तेभ्यश्च हेर्धिः स्यात् । अद्धि, अत्तात् । अदानि । २४२६ अदः सर्वेषाम् । (७-३-१००) अदः परस्यापृक्तसार्वधातुकस्या-

---

धालोप इति । 'असंयोगात्-' इति कित्त्वादिति भावः । जघ्स् अतुसिति स्थिते घकारस्य चर्त्वं वक्ष्यन् उपधालोपस्य स्थानिवत्त्वमाशङ्क्याह **तस्येति** । उपधालोपस्येत्यर्थः । जघ्स् अतुसिति स्थिते सकारस्य आदेशप्रत्ययावयवत्वाभावादाह **शासीति** । थलि तु क्रादिनियमान्नित्यमिट् । 'उपदेशेऽत्वतः' इति निषेधस्य तासौ नित्यानिड्विषयत्वात् । घस् तु तासौ न विद्यत एव, कुतस्तस्य तासावनिट्कत्वम् । 'यस्तासावस्ति अनिट् च' इति हि भाष्यम्, तदाह **घसेस्तासाविति** । **जघसिथेति** । जक्षथुः जक्ष । जघास, जघस जक्षिव जक्षिम । घसादेशाभावपक्षे त्वाह **आदेति** । थलि भारद्वाजनियमादिड्विकल्पे प्राप्ते आह **इडत्त्यर्तीति** । **आदिथेति** । आदथुः आद । आद आदिव आदिम । अत्ता । **अत्स्यतीति** । अनिट् । दस्य तः । अत्तु, अत्तात् अत्ताम् अदन्तु । अद् हि इति स्थिते 'झयो होऽन्यतरस्याम्' इति हकारस्य पूर्वसवर्णविकल्पेन धकारविकल्पे प्राप्ते **हुझल्भ्यो हेर्धिः** । **झलन्तेभ्य इति** । अङ्गविशेषणत्वात् तदन्तविधिरिति भावः । 'अनेकाल्त्वात् सर्वादेशः । रुदिहीत्यत्र तु न, निर्दिश्यमानहेरिटा व्यवहितत्वाद् इटा व्यवहितस्य त्वनिर्दिश्यमानत्वादिति भाष्ये स्पष्टम् । **अत्तादिति** । धित्वात् परत्वात्तातङ् । तस्य स्थानिवत्त्वेन हित्वेऽपि न पुनर्धित्वम्, 'विप्रतिषेधे यद्बाधितं तद्बाधितमेव' इति न्यायात् । अत्तम् अत्त । **अदानीति** । 'आडुत्तमस्य-' इत्याडागमः । एतदर्थमेव आडागमे दीर्घोच्चारणमिति भावः । अदाव अदाम । लङि आद् त् इति स्थिते **अदः सर्वेषाम्** । अद इति पञ्चमी । 'तस्मादित्युत्तरस्य' इति परिभाषया परस्येति लभ्यते । 'गुणोऽपृक्ते' इत्यतः अपृक्ते इति 'तुरुस्तुशम्यम-' इत्यतः सार्वधातुके इति

करुणा घृणा' इति चामरः । **हुझल्भ्यो हेर्धिः** । जुहुधि । 'घसिभसोर्हलि' इत्यतो हलीत्यनुवर्त्य हलादेरिति व्याख्यानात् । रुदिहि स्वपिहि इत्यादाविडादेर्हेर्धिर्न भवति, अत्तादित्यत्र तु धित्वात्परत्वात्तातङि कृते स्थानिवद्भावेन पुनर्धित्वं तु 'सकृद्गतौ-' इति न्यायान्नेत्याहुः । अन्ये तु हेर्धिरित्यत्र स्थान्यादेशयोर्द्वयोरपीकार उच्चारणार्थ इति हकारस्य धकार आदेशः । तेन हलीत्यनुवृत्तिर्न कर्तव्या, नापि तातङो धित्वप्रसङ्ग इति सकृद्गतिन्यायाश्रयणमपि मास्त्वित्याहुः । **अदः सर्वेषाम्** । 'अङ्गार्यगालवयोः'

डागमः स्यात्सर्वमतेन। आदत् आत्ताम् आदन्। आदः आत्तम् आत्त। आदम् आद्व आद्म। अद्यात् अद्याताम् अद्युः। अद्यास्ताम् अद्यासुः। २४२७ **लुङ्सनोर्घस्लृ**। (२-४-३७) अदो घस्लृ स्याल्लुङि सनि च। लृदित्त्वादङ्। अघसत्। हन १०१२ हिंसागत्योः। प्रणिहन्ति। २४२८ **अनुदात्तोपदेशवनतितनोत्यादीनामनुनासिकलोपो झलि क्ङिति।** (६-४-३७) अनुनासिक इति लुप्तषष्ठीकं पदं वनतीतरेषां विशेषणम्। अनुनासिकान्तानामेषां वनतेश्च लोपः स्याज्झलादौ क्ङिति परे। यमि रमि नमि गमि हनि मन्यतयो-

---

चानुवर्तते। सप्तमीद्वयं च षष्ठ्या विपरिणम्यते। 'अङ् गार्ग्यगालवयोः' इत्यतः अडित्यनुवर्तते। गार्ग्यगालवयोरित्यस्यानुवृत्तिनिवृत्तये सर्वेषामिति, तदाह **अदः परस्येत्यादिना**। टित्त्वादाद्यवयवः, तदाह **आददिति**। **आत्तामिति**। अपृक्तग्रहणान्नाडागम इति भावः। विधिलिङि रूपमाह **अद्यादिति**। शपो लुकि अतः परत्वाभावाद् 'अतो येयः' इति नेति भावः। मिपः अमि यासुटि सलोपे सवर्णदीर्घे अद्याम् अद्याव अद्याम। आशीर्लिङि अद्यादिति सिद्धवत्कृत्याह **अद्यास्तामिति**। लुङि अद् स् त् इति स्थिते **लुङ्सनोर्घस्लृ**। 'अदो जग्धिः–' इत्यतः अद इत्यनुवर्तते, तदाह **अद इति**। लृदित्त्वस्य प्रयोजनमाह **लृदित्त्वादिति**। हनधातुरनिट्। **प्रणिहन्तीति**। शपो लुक्। नस्यानुस्वारपरसवर्णौ। 'नेर्गद–' इति णत्वम्। **अनुदात्तोपदेश**। ऊद्दन्तैरित्यादिभिः संगृहीता अनुदात्तोपदेशाः, वनतिर्भ्वादिकः, तनोत्यादयस्तु 'तनु विस्तारे' इत्यादिना पठिष्यन्ते। एतेषामनुनासिकस्य लोपः स्याज्झलादौ क्ङिति इति प्रतीयमानार्थः। एवं सति मुक्तमित्यादौ मुचादीनामपि मकारादिलोपः स्यात्, तत्राह **अनुनासिक इति लुप्तषष्ठीकं पदमिति**। एवमप्युक्तातिप्रसक्ततादवस्थ्यादाह **वनतीतरेषां विशेषणमिति**। अनुदात्तोपदेशानां तनोत्यादीनां चेत्यर्थः। तथा च विशेषणत्वात्तदन्तविधौ अनुनासिकान्तानामनुदात्तोपदेशानां तनोत्यादीनां वनतेश्चैतेषामन्तस्य लोपः स्यादित्यर्थलाभान्मुक्तमित्यादौ नातिप्रसङ्गः, तदाह **अनुनासिकान्ता-**

इत्यतः अडित्यनुवर्तते। गार्ग्यगालवयोरित्यस्य त्वनुवृत्तिशङ्कां निवारयितुं सर्वेषांग्रहणम्। **लुङ्सनोः**। जिघत्सति। **प्रणिहन्तीति**। 'नेर्गद–' इति णत्वम्। **अनुदात्तोपदेश**। यद्यत्र एतेषामनुनासिकस्य लोप इति व्याख्यायेत तदा मन्यतेर्नमूनहमिहमुच्मस्जादीनां चानन्त्यस्यापि लोपः स्यात्, तथा च मतः नतः नद्धः मीढः मग्न इत्यादि न सिध्येत्, अत आह **लुप्तषष्ठीकमिति**। **वनतीतरेषामिति**। वनतेरव्यभिचाराद्विशेषणं व्यर्थमिति भावः। वतिः। इह क्तिनि 'तितुत्र–'

ऽनुदात्तोपदेशाः। तनु क्षणु क्षिणु ऋणु तृणु घृणु वनु मनु तनोत्यादयः। हतः घ्नन्ति। २४२६ **हमोर्वा** (८-४-२३) उपसर्गस्थान्निमित्तात्परस्य हन्तेर्नस्य णो वा स्याद्धमयोः परयोः। प्रहण्मि, प्रहन्मि प्रहण्वः, प्रहन्वः। 'हो हन्तेः–' (सू ३२८) इति कुत्वम्। जघान जघ्नतुः जघ्नुः। २४३० अभ्यासाच्च।

नामित्यादिना । वनधातोस्तु अनुनासिकान्तत्वान्न विशेषणम्, अव्यभिचारादिति भावः। अत्रानुदात्तोपदेशान् अनुनासिकान्तान् दर्शयति **यमिरमीति** । अनुदात्तोपदेशेषु एतेषामेव षण्णामनुनासिकान्तत्वादिति भावः। अथ तनोतीत्यादीननुनासिकान्तान् दर्शयति **तनुक्षणुक्षिणिवति** । मनु इत्यन्तं समाहारद्वन्द्वात् प्रथमैकवचनान्तम्। एतेऽष्टौ तनोत्यादयोऽनुनासिकान्ता इत्यर्थः। 'तनु विस्तारे' इत्यारभ्य 'डु कृञ् करणे' इत्यन्ता दश धातवस्तनोत्यादयः। तत्र करोतिरनुनासिकान्तत्वाभावादिह न गृह्यते। 'जनसनखनां सञ्झलोः' इति सनोतेरात्त्वस्य वक्ष्यमाणत्वात् सोऽप्यत्र न गृहीतः। 'वनु याचने' इति तनादौ पठितम्। तस्य उविकरणतया उदित्त्वेन च वनतिग्रहणेनाग्रहणात् तनादौ पठितस्यापि पृथग्ग्रहणम्। तत्र तानादिकस्य वनेरुदित्त्वाद् 'उदितो वा' इति क्त्वायामिड्विकल्पाद् 'यस्य विभाषा' इति निष्ठायामिडभावे वतः वतवान् इत्युदाहरणम्। वनतेस्तु भौवादिकस्य उदित्त्वाभावान्निष्ठायां सेट्कत्वेऽपि क्तिनि वतिरित्युदाहरणम्, तत्र 'तितुत्रतथसिसुसरकसेषु च' इति इण्निषेधादित्यलम्। **हत इति** । तसि अनुदात्तोपदेशानुनासिकान्तत्वान्मकारलोपः, 'सार्वधातुकमपित्' इति तसो ङित्त्वात्। **घ्नन्तीति** । अजादिङित्परकत्वाद् 'गमहन–' इत्युपधालोपे 'हो हन्तेः–' इति कुत्वेन हस्य घः। हंसि हथः हथ। **हमोर्वा** । 'उपसर्गादसमासेऽपि–' इत्यत उपसर्गादित्यनुवर्तते। 'रषाभ्यां नो णः–' इति सूत्रमनुवर्तते। हन्तेरत्पूर्वस्य' इत्यतो हन्तेरिति, तदाह **उपसर्गस्थान्निमित्तादिति** । णलि जहानेति स्थिते आह **हो हन्तेरिति** । 'अभ्यासाच्च' इत्यपेक्षया अस्यान्तरङ्गत्वेन न्याय्यत्वादिति भावः। **जघ्नतुरिति** । 'गमहन–' इत्युपधालोपे 'हो हन्तेः–' इति कुत्वम्। थलि

इतीण्निषेधाज्झलि क्ङिति न लोपः। **लोपः स्यादिति** । 'अलोऽन्त्यस्य' इत्यन्त्यस्येति भावः। अनुनासिकान्तानुदात्तोपदेशान्दर्शयति **यमिरमीति** । तनोत्यादीनप्यनुनासिकान्तान्दर्शयति **तनुक्षणुक्षिणिवति** । करोतिवर्जितास्तनोत्यादयो नव, तन्मध्ये सनोतेः 'जनसनखनाम्–' इत्यात्वं वक्ष्यतीति न स परिगणितः, ततः क्षतः क्षिति इत्यादीन्युदाहरणानि। तनोत्यादीनामुदित्त्वात् क्त्वायामिड्विकल्पान्निष्ठायां नेट्। अनुनासिकान्तानामिति किम्, शक्तः। रुग्णः। झलीति

(७-३-५५) अभ्यासात्परस्य हन्तेर्हस्य कुत्वं स्यात्। जघनिथ, जघन्थ। हन्ता। 'ऋद्धनोः-' (पृ १३६६) इतीट्। हनिष्यति। हन्तु, हतात्। घ्नन्तु। २४३१ हन्तेर्जः। (६-४-३६) हौ परे। आभीयतया जस्यासिद्धत्वाद्धेर्न लुक्, जहि। हनानि हनाव हनाम। अहन् अहताम् अघ्नन्। अहनम्। २४३२ आर्धधातुके। (२-४-३५) इत्यधिकृत्य। २४३३ हनो वध लिङि। (२-४-४२) २४३४ लुङि च। (२-४-४३) वधादेशोऽदन्तः।

भारद्वाजनियमादिड्विकल्पः। जहनिथ जहन्थ, इति स्थिते ञ्णित्प्रत्ययपरत्वाभावान्नकारपरत्वाभावाच्च 'हो हन्तेः-' इति कुत्वाप्राप्तौ अभ्यासाच्च। 'हो हन्तेः-' इत्यनुवर्तते। 'चजोः कु घिण्ण्यतोः' इत्यतः कुग्रहणं च, तदाह अभ्यासात् परस्येत्यादिना। जघनिथ, जघन्थेति। इडभावे नस्यानुस्वारपरसवर्णौ। जघ्नथुः जघ्न। जघान, जघन जघ्निव जघ्निम। लृटि स्ये इण्निषेधमाशङ्कयाह ऋद्धनोरिति। हन् हि इति स्थिते 'हुझल्भ्यः-' इति धित्वे प्राप्ते हन्तेर्जः। 'शा हौ' इत्यतो हौ इत्यनुवृत्तिमभिप्रेत्य शेषपूरणेन सूत्रं व्याचष्टे हौ पर इति। कृते जादेशे 'अतो हेः' इति हेर्लुकमाशङ्कय आह आभीयतयेति। जहीति। हतात् हतम् हत। हनानीति। आटः पित्त्वेन ङित्त्वाभावान्नोपधालोप इति भावः। अहन्निति। लङस्तिपि, 'इतश्च' इति इकारलोपे 'संयोगान्तस्य-' इति तकारलोपः। स्थानिवत्त्वाद्धल्ङ्यादिलोपो वा। अहनमिति। अहन्व अहन्म। झलादिपरकत्वाभावान्नोपधादीर्घः। विधिलिङि हन्यात् हन्याताम् इत्यादि। आशीर्लिङि वधादेशं वक्ष्यन्नाह आर्धधातुके। इत्यधिकृत्येति। 'अदो जग्धिः-' इत्यादिविधयो वक्ष्यन्त इति शेषः। तदधिकारस्थं सूत्रमाह हनो वध। वधेति लुप्तप्रथमाकम्। हनो वधादेशः स्यादार्धधातुके लिङीत्यर्थः। लुङि च। हनो वधादेशः स्याद् लुङीत्यर्थः स्पष्टः। वधादेशोऽदन्त इति। धकारादकारो न सुखोच्चारणार्थ इति भावः। तत्प्रयोजनं तु अनुपदमेव 'अवधीत्' इत्यत्र वक्ष्यते। ननु आशीर्लिङि हन् यादिति स्थिते आर्धधातुके परे स्थतस्य वधादेशस्य आर्धधातुकोपदेशे अकारान्तत्वाभावात्

किम्, गम्यते। नम्यते। क्ङितीति किम्, गन्ता। मन्ता। जघान जघ्नतुरिति। यद्यप्यत्र 'अभ्यासाच्च' इत्यस्यापि प्रवृत्तिरस्ति, तथाप्यन्तरङ्गत्वाद्। 'हो हन्तेः-' इत्युपन्यस्तम्। आभीयतयेति। सन्निपातपरिभाषयापि हेर्लुग् नेति वक्तुं शक्यमिति केचित्। तन्मन्दम्, 'अतो हेः' इत्यारम्भसामर्थ्यात्तस्याप्रवृत्तेरिति नव्याः। वधादेशोऽदन्त इति। तेन आदेशोपदेशेऽनेकाच्त्वाद् अवधीदित्यत्र 'एकाचः-' इतीण्निषेधाप्रवृत्ताविडादौ सिचि 'अतो हलादेः-' इति प्राप्ता वृद्धिरल्लोपस्य स्थानि-

'आर्धधातुके' (सू २१०७) इति विषयसप्तमी । तेनार्धधातुकोपदेशेऽकारान्तत्वाद् 'अतो लोपः–' (सू २३०८)। वध्यात् वध्यास्ताम् । आर्धधातुके किम्–विध्यादौ हन्यात् । 'हन्तेः–' (सू ३२६) इति णत्वम् । प्रहण्यात् । अल्लोपस्य स्थानिवत्त्वाद् 'अतो हलादेः–' (सू २२८४) इति न वृद्धि , अवधीत् ।

अथ चत्वारः स्वरितेतः । द्विष १०१३ अप्रीतौ । द्वेष्टि, द्विष्टे । द्वेष्टा। द्वेक्ष्यति, द्वेक्ष्यते । द्वेष्टु, द्विष्टात् । द्विड्ढि । द्वेषाणि । द्वेषै द्वेषावहै । अद्वेट् ।

२४३५ द्विषश्च । (३-४-११२) लङो झेर्जुस् वा स्यात् । अद्विषुः, अद्विषन् । अद्वेषम् । द्विष्यात् । द्विषीत । द्विक्षीष्ट । अद्विक्षत् । दुह १०१४

कथं वध्यादित्यत्र अल्लोप इत्यत आह विषयसप्तमीति । तथा च आर्धधातुके विवक्षिते तत्प्रवृत्तेः प्रागेव वधादेशे कृते आर्धधातुकप्रवृत्तिरिति फलितम् । ततश्च आर्धधातुकोपदेशे वधादेशस्य अकारान्तत्वादल्लोपो निर्बाधः, तदाह तेनेति । अवधीदिति । सिचि अल्लोपे कृते वधादेशस्य धकारान्ततया एकाच्त्वेऽप्यादेशोपदेशे अनेकाच्त्वेन 'एकाच उपदेशे–' इति निषेधाभावात् सिच इट् । 'अतो हलादेः–' इति वृद्धिस्तु न भवति, 'अचः परस्मिन्–' इत्यल्लोपस्य स्थानिवत्त्वात् । एतदर्थमेव हि वधादेशस्य अदन्तत्वमाश्रितम् ।

स्वरितेत इति । उभयपदिन इति फलितम् । द्विष अप्रीताविति । अनिट् । द्वेष्टीति । पित्त्वेन ङित्त्वाभावाल्लघूपधगुण इति भावः । द्विष्टः द्विषन्ति । द्वेक्षि द्विष्ठः द्विष्ठ । द्वेष्मि द्विष्वः द्विष्मः । तङि उदाहरति द्विष्ट इति । ङित्त्वान्न गुणः । द्विषाते द्विषते । द्विक्षे द्विषाथे द्विड्ढ्वे । द्विषे द्विष्वहे द्विष्महे । षढोरिति षस्य कत्वं मत्वा आह द्वेक्ष्यतीति । द्विड्ढीति । हेर्धिः, षस्य जश्त्वेन डः, ष्टुत्वेन ढः । द्विष्टात् द्विष्टम् द्विष्ट । द्वेषाणीति । आटः पित्त्वेन ङित्त्वाभावाद् गुणः, षात्परत्वाण्णत्वम् । द्वेषाव द्वेषाम । द्विष्टाम् द्विषाताम् द्विषताम् । द्विक्ष्व द्विषाथाम् द्विड्ढ्वम् । द्वेषै इति । आटः पित्त्वेन ङित्त्वाभावाद् गुण इति भावः । अद्वेडिति । लङस्तिप्, गुणः, इकारलोपः, हल्ङ्यादिलोपः 'वाऽवसाने' इति 'झलां जश्–' इति च चर्त्वजश्त्वे इति भावः । अद्विष्टाम् । द्विषश्च । 'झेर्जुस्' इति 'लङः शाकटायनस्य' इति चानुवर्तते, इत्यभिप्रेत्य शेषपूरणेन सूत्रं व्याचष्टे लङो झेरिति । अद्विषन्निति । अद्वेट् अद्विष्टम् अद्विष्ट । अद्वेषम् अद्विष्व अद्विष्म । विधिलिङि परस्मैपदे आह द्विष्यादिति । द्विष्याताम् द्विष्युः इत्यादि । तङि आह द्विषीतेति । द्विषीयाताम् द्विषीरन् इत्यादि । आशीर्लिङि द्विष्यास्ताम् इत्यादि । तङ्याह द्विक्षीष्टेति । 'लिङ्सिचावात्मनेपदेषु' इति कित्त्वान्न गुणः । द्विक्षीयास्तामित्यादि । लुङि परस्मैपदे

प्रपूरणे। [[1]प्रपूरणं 'पूरणाभावः। धात्वर्थं बाधते कश्चित्]। दोग्धि दुग्धः। धोक्षि। दुग्धे। धुक्षे धुग्ध्वे। दोग्धु। दुग्धि। दोहानि। धुग्ध धुग्ध्वम्। दोहै। अधोक्। अदोहम्। अदुग्ध अधुग्ध्वम्। अधुक्षत्, अधुक्षत। 'लुग्वा दुह-' (सू २३६९)

आह **अद्विक्षदिति**। 'शल इगुपधात्-' इति क्सः। अद्विक्षताम् अद्विक्षन् इत्यादि। तङि अद्विक्षत अद्विक्षाताम् अद्विक्षन्त इत्यादि। अद्वेक्ष्यत्, अद्वेक्ष्यत। **दुह प्रपूरणे इति**। अयमनिट्। 'पयो दोग्धि' इत्यादौ प्रकृष्टपूरणस्यार्थस्यानवगमादाह **प्रपूरणं पूरणाभाव इति**। ऊधः पूरणप्रतिकूलीभाव इत्यर्थः। ऊधसः सकाशात् क्षारणे इति यावत्। ननु प्रपूरणशब्दस्य कुतोऽयमर्थ इत्यत आह **धात्वर्थं बाधते कश्चिदिति**। प्रसिद्धं धात्वर्थं कश्चिदुपसर्गो बाधित्वा अर्थान्तरं नयतीत्यर्थः। **दोग्धीति**। 'दादेः-' इति हस्य घः, 'झषस्तथोः-' इति तकारस्य धकारः, घस्य जश्त्वेन गः। एवं दुग्ध इत्यपि। दुहन्ति। **धोक्षीति**। हस्य घः, चर्त्वेन कः, षत्वमिति भावः। दुग्धः दुग्ध। दोह्मि दुह्वः दुह्मः। लटि आत्मनेपदे आह **दुग्धे इति**। घत्वगः। दुहाते दुहते। **धुक्ष इति**। हस्य घः, दस्य भष् धकारः, घस्य कः, षत्वम्। दुहाथे। **धुग्ध्व इति**। हस्य घः, भष्, घस्य गः। दुहे दुह्वहे दुह्महे। दुदोह दुदुहतुः दुदुहुः। अजन्ताकारवत्त्वाभावात् क्रादिनियमान्नित्यमिट्-दुदोहिथ दुदुहथुः दुदुह। दुदोह दुदुहिव दुदुहिम। दुदुहे दुदुहाते दुदुहिरे। दुदुहिषे दुदुहाथे दुदुहिढ्वे, दुदुहिध्वे। दुदुहे दुदुहिवहे दुदुहिमहे। दोग्धा। धोक्ष्यति, धोक्ष्यते। **दोग्धिवति**। दुग्धात् दुग्धाम् दुहन्तु। **दुग्धीति**। हेर्धिः, घत्वजश्त्वे। दुग्धात् दुग्धम् दुग्ध। **दोहानीति**। आटः पित्त्वादङित्त्वाद् गुणः। दोहाव दोहाम। दुग्धाम् दुहाताम् दुहताम्। **धुक्ष्वेति**। घत्वं भष् जश्त्वचर्त्वे षत्वम्। दुहाथाम्। **धुग्ध्वमिति**। हस्य घः, भष्, घस्य जश्त्वम्। **दोहै इति**। आटः पित्त्वादङित्त्वाद् गुण इति भावः। दोहावहै दोहामहै। लङि परस्मैपदे आह **अधोगिति**। तिप् इकारलोपः, हल्ङ्यादिलोपः, हस्य घः, दस्य भष्, घस्य चर्त्वविकल्पः। अदुग्धाम् अदुहन्। अधोक् अदुग्धम् अदुग्ध। **अदोहमिति**। अदुह्व अदुह्म। लङस्तङ्याह **अदुग्धेति**। हस्य घः, तकारस्य धः, घस्य गः। अदुहाताम् अदुहत। अदुग्धाः अदुहाथाम्। **अधुग्ध्वमिति**। हस्य घः, दस्य भष्, घस्य गः। अदुहि अदुह्वहि अदुह्महि। लुङि परस्मैपदे आह **अधुक्षदिति**। 'शल इगुपधात्-' इति क्सः। हस्य घः, दस्य भष्, घस्य चर्त्वम्, षत्वम्। अधुक्षताम् अधुक्षन् इत्यादि। लुङस्तङ्याह **अधुक्षतेति**। 'क्सस्याचि'।

त्वाश्चेति भावः। **दुह** प्रपूरणे। प्रपूरणं त्याजनम्। **लङ्वदपीति**। अदुग्ध।

[1] अयं पाठः क्वचिन्नोपलभ्यते।

इति लुक्पक्षे तथारूपमव्वहिषु लङ्वदपि । दिह १०१५ उपचये । उपचयो वृद्धिः । प्रणिदेग्धि । लिह १०१६ आस्वादने । लेढि लीढः लिहन्ति । लेक्षि । लीढे । लिक्षे । लीढ्वे । लेढु । लीढाम् । लीढि । लेहानि । अलेट् । अलिक्षत्, अलिक्षत । अलिक्षताम् । अलीढ । अलिक्षावहि, अलिह्वहि । अलेक्ष्यत्, अलेक्ष्यत । चक्षिङ् १०१७ व्यक्तायां वाचि । अयं दर्शनेऽपि । इकारोऽनुदात्तो

अधुक्षाताम् अधुक्षन्त । अधुक्षथाः अधुक्षाथाम् अधुक्षध्वम् । अधुक्षि अधुक्षावहि अधुक्षामहि । **लुग्वेति** । त थास् ध्वम् वहि एषु चतुर्षु दन्त्यादिषु परेषु 'लुग्वा दुह–' इति क्सस्य लुक्पक्षे लङीव रूपाणीत्यर्थः । तथा च अदुग्ध, अदुग्धाः अधुग्ध्वम्, अदुह्वहि इत्यपि रूपाणीति फलितम् । अधोक्ष्यत्, अधोक्ष्यत । **दिह उपचय इति** । उपचयो वृद्धिः । अनिट् । **प्रणिदेग्धीति** । 'नेर्गद–' इति णत्वम् । दुहधातुवद्रूपाणि । **लिह आस्वादन इति** । अनिट् । **लेढीति** । शपो लुकि ढत्वधत्वष्टुत्वढलोपाः । **लेक्षीति** । सिपि हस्य ढः 'षढोः–' इति ढस्य क इति भावः । लीढः लीढ । लेह्मि लिह्वः लिह्मः । लटि तङ्याह **लीढे इति** । लिहाते लिहते । **लिक्षे इति** । ढकषाः । लिहाथे इति सुगमम् । **लीढ्वे इति** । ढत्वधत्वष्टुत्वढलोपदीर्घाः । लिहे लिह्वहे लिह्महे । लेढा । लेक्ष्यति, लेक्ष्यते । **लेढ्विति** । लीढात् लीढाम् लिहन्तु । **लीढीति** । हेर्धिः, ढत्वधत्वष्टुत्वढलोपदीर्घाः । लीढात् लीढम् लीढ । **लेहानीति** । आटः पित्त्वेन ङित्त्वाभावाद् गुण इति भावः । लेहाव लेहाम । लीढाम् लिहाताम् लिहताम् । लिक्ष्व लिहाथाम् लीढ्वम् । लेहै लेहावहै लेहामहै । **अलेडिति** । लङि तिपि शपो लुकि इकारलोपे हल्ङ्यादिलोपे हस्य ढः, चर्त्वविकल्प इति भावः । अलीढाम् अलिहन् । अलेट् अलीढम् अलीढ । अलेहम् अलिह्व अलिह्म । अलीढ अलिहाताम् अलिहत । अलीढाः अलिहाथाम् अलीढ्वम् । अलिहि अलिह्वहि अलिह्महि । **अलिक्षदिति** । लुङि क्सः । अलिक्षताम् अलिक्षन् । अलिक्षः इत्यादि । तङ्याह **अलिक्षतेति** । **अलीढेति** । 'लुग्वा दुह–' इति क्सलोपपक्षे रूपम् । अलिक्षाताम् अलिक्षन्त । अलिक्षथाः, अलीढाः अलिक्षाथाम् अलिक्षध्वम्, अलीढ्वम् । अलिक्षि । 'लुग्वा दुह–' इति लुग्विकल्पं मत्वाह **अलिक्षावहि, अलिह्वहीति** । **अलेक्ष्यत्, अलेक्ष्यतेति** । लृङि रूपे । द्विषादयश्चत्वारः स्वरितेतो गताः । **चक्षिङ् व्यक्तायां**

अदुग्धाः । अधुग्ध्वम् । अदुह्वहि । **दिह उपचये** । उपचयो वृद्धिः । **प्रणिदग्धीति** । 'नेर्गद–' इति णत्वम् । **अलिक्षतेति** । 'शल इगुपधा–' इति क्सः । अलिक्षाताम् । अलिक्षन्त । **अलीढेति** । 'लुग्वा दुह–' इति वा लुक् । अलीढाः । अलीढ्वम् । **चक्षिङ्** । **दर्शनेऽपीति** । 'विश्वा रूपा अभिचष्टे शचीभिः' इत्यत्र दर्शनार्थत्वेन

युजर्थः । 'विचक्षणः प्रथयन्' । नुम् तु न । 'अन्तेदितः' इति व्याख्यानात् । ङकारस्तु 'अनुदात्तेत्त्वप्रयुक्तमात्मनेपदमनित्यम्' (प १७) इति ज्ञापनार्थः । तेन 'स्फायन्निर्मोकसन्धि-' इत्यादि सिध्यति । चष्टे चक्षाते । 'आर्धधातुके' (सू २४३२) २४३६ चक्षिङः ख्याञ् । (२-४-५४) २४३७ वा लिटि ।

वाचीति । गूढार्थस्य स्पष्टप्रतिपत्त्यर्थे विवरणे इत्यर्थः । अयं दर्शनेऽपीति । श्रुतौ 'पूर्वापरं चरतो मयायैतौ । शिशू क्रीडन्तौ परियातो अध्वरम् । विश्वान्यन्यो भुवनाभिचष्टे । ऋतूनन्यो विदधज्जायते पुनः' इत्यादौ तथा दर्शनादिति भावः । ननु चक्षिङित्यत्र इकारोच्चारणं व्यर्थम् । न च सुखोच्चारणार्थं तदिति वाच्यम्, अकारोच्चारणेनैव तत्सिद्धेः । नाप्यनुदात्तेत्त्वप्रयुक्तात्मनेपदार्थं तदिति शक्यं वक्तुम्, ङित्त्वादेव तत्सिद्धेरित्यत आह इकारोऽनुदात्तो युजर्थ इति । 'अनुदात्तेतश्च हलादेः' इति ल्युडपवादयुच्प्रत्ययार्थ इत्यर्थः । अकारमुल्लङ्घ्य इकारोच्चारणं तु उच्चारणार्थत्वाभावप्रतिपत्त्यर्थमिति भावः । विचक्षणः प्रथयन् इति मन्त्रः । अत्र लित्स्वरनिवृत्तये युच्प्रत्यय इति भावः । ननु युच्प्रत्ययार्थमिकारस्य इत्संज्ञावश्यकत्वे नुमागमः स्यादित्यत आह नुम् तु नेति । कुत इत्यत आह अन्तेदित इति । 'इदितो नुम् धातोः' इत्यत्र 'गोः पादान्ते' इत्यस्मादन्ते इत्यनुवृत्तेरिति भावः । नन्विकारे युजर्थम् अनुदात्तेत्त्वस्य इत्संज्ञकत्वस्य च आवश्यकत्वे तत एवात्मनेपदसंभवाद् ङकारोच्चारणं व्यर्थमित्याशङ्क्य आह ङकारस्त्विति । ङकारो नित्यात्मनेपदार्थः । अनुदात्तेत्त्वप्रयुक्तं त्वात्मनेपदं कदाचिन्न स्यात्, अतो ङकारोच्चारणम् । अत एव 'अनुदात्तेत्त्वप्रयुक्तात्मनेपदमनित्यम्' इति विज्ञायत इत्यर्थः । स्फायन्निति । स्फायी वृद्धावित्यनुदात्तेतोऽपि लटः शत्रादेशः, न त्वात्मनेपदं शानजिति भावः । वस्तुतस्तु अन्त्येत्कत्वव्याघातेन चरितार्थत्वाद् ङकारोच्चारणमुक्तार्थे कथं ज्ञापकम्, भाष्ये तथानुक्तत्वाच्च । अतः पृषोदरादित्वकल्पनया स्फायन्निति कथंचित्साध्यमित्याहुः । चष्टे इति । 'स्कोः-' इति कलोपः, ष्टुत्वं चेति भावः । चक्षाते इति । चक्षते । थासः सेभावे 'स्कोः-' इति कलोपे 'षढोः-' इति षस्य कत्वे षत्वे च कृते, चक्षे चक्षाथे । ध्वमि 'स्कोः-' इति कलोपे षस्य जश्त्वेन डकारे चड्ढ्वे । चक्षे चक्ष्वहे चक्ष्महे ।

व्याख्यातत्वादिति भावः । युजर्थ इति । 'अनुदात्तेतश्च हलादेः' इति युच् । अन्तेदित इति । 'इदितः-' इति नुम्विधौ 'गोः पादान्त-' इत्यस्मादन्त इत्यनुवर्तत इति भावः । एवं च नुमागमशङ्कानुत्थानाय चक्षिङ इकारस्थानेऽकार एवासञ्जयितुमुचितः । अनुदात्तत्वेनैव तङि सिद्धे ङकारो व्यर्थ इत्याशङ्क्याह ङकारस्त्विति । स्फायन्निति । स्फायी वृद्धावित्यनुदात्तेतो लटः शत्रादेशः । चष्टे इति । 'स्कोः-'

(२-४-५५) अत्र भाष्ये ख्शादिरयमादेशः। असिद्धकाण्डे 'शस्य यो वा' (वा १५८६) इति स्थितम्। ञित्त्वात्पदद्वयम्। चख्यौ, चख्ये; चक्शौ, चक्शे। 'चयो द्वितीयाः-' (वा ५०२३) इति तु न, चर्त्वस्यासिद्धत्वात्। चचक्षे। ख्याता, क्शाता। ख्यास्यति, ख्यास्यते; क्शास्यति, क्शास्यते। अचष्ट। चक्षीत। ख्यायात्, ख्येयात्; क्शायात्, क्शेयात्। २४३८ अस्यतिवक्तिख्यातिभ्योऽङ्।

आर्धधातुके इत्यनन्तरम् 'इत्यनुवर्तमाने' इति शेषः। **चक्षिङः ख्याञ्।** चक्षिङः ख्याञ् स्यादार्धधातुके परे इत्यर्थः। **वा लिटि।** चक्षिङः ख्याञ् वा स्याल्लिटीत्यर्थः। **अत्रेति।** 'चक्षिङः ख्याञ्' इति सूत्रभाष्ये 'ख्शादिरयमादेशः' इति, 'पूर्वत्रासिद्धम्' इत्यधिकारे 'ख्शाञः शस्य यो वा वक्तव्यः' इति च स्थितमित्यर्थः। तेन पुंख्यानमित्यत्र यत्वस्यासिद्धत्वात् 'पुमः खय्यम्परे' इति रुत्वं नेति हल्संधिनिरूपणे प्रपञ्चितम्। **ञित्त्वात्पदद्वयमिति।** परस्मैपदमात्मनेपदं चेत्यर्थः। **चख्यौ इति।** ख्शादेशस्य शस्य यत्वपक्षे 'आत औ णलः' इति भावः। चख्यतुः चख्युः। भारद्वाजनियमात्थलि वेट्, चख्यिथ, चख्याथ चख्यथुः चख्य। चख्यौ चख्यिव चख्यिम, क्रादिनियमादिट्। लिटि तङि ख्शादेशस्य शस्य यत्वपक्षे आह **चख्ये इति।** चख्याते चख्यिरे। चख्यिषे चख्याथे चख्यिध्वे। चख्ये चख्यिवहे चख्यिमहे। शस्य यत्वाभावपक्षे त्वाह **चक्शौ, चक्श इति।** खस्य चर्त्वेन क इति भावः। कृते चर्त्वे तस्य 'चयो द्वितीयाः शरि-' इति खकारमाशङ्क्य निराकरोति **चय इति।** अथ ख्याञादेशाभावपक्षे आह **चचक्षे इति।** चचक्षिषे चचक्षिध्वे। चचक्षिवहे। **ख्यास्यते इति।** चष्टाम् चक्षाताम् चक्षताम्। चक्ष्व चक्षाथाम् चड्ढ्वम्। चक्षै चक्षावहै चक्षामहै। लङ्याह **अचष्टेति।** अचक्षाताम् अचक्षत। अचष्ठाः अचक्षाथाम् अचड्ढ्वम्। अचक्षि अचक्ष्वहि अचक्ष्महि। विधिलिङ्याह **चक्षीतेति।** आशीर्लिङि ख्शादेशस्य शस्य यत्वपक्षे आह **ख्यायात्, ख्येयादिति।** 'वाऽन्यस्य-' इत्येत्त्वविकल्पः। शस्य यत्वाभावपक्षे आह

इति कलोपः, ष्टुत्वम्। **ख्शादिरिति।** तेन पुंख्यानमित्यत्र 'पुमः खय्यम्परे' इति रुत्वं नेत्यादि पूर्वार्धे एवोक्तम्। **असिद्धकाण्डे इति।** णत्वप्रकरणानन्तरमिति शेषः। तेन पर्याख्यानमित्यत्र शकारेण व्यवधानात् 'कृत्यचः' इति णत्वं न। तथा सुप्रख्येन निर्वृत्तं सौप्रख्यं तत्र भवः सौप्रख्यीयः, यत्वस्यासिद्धत्वाद् 'धन्वयोपधात्-' इति वुञ् न, किं तु छ एवेति बोध्यम्। **अचष्टेति।** 'स्कोः-' इति कलोपः। ष्टुत्वम्। 'अस्यतिवक्तिख्याति-' इत्यत्र विधिसामर्थ्याद्यत्वं नासिद्धम्। स्वतन्त्रस्य ख्याधातोः सार्वधातुकमात्रविषयतया वक्ष्यमाणत्वात्। अस्यतेः पुषादिपाठादङि

(३-१-५२) एभ्यश्च्लेरङ्। अख्यत्, अख्यत, अक्शासीत्, अक्शास्त। 'वर्जने क्शाञ् नेष्टः' (वा १५१२) समचक्षिष्ट इत्यादि।

अथ पृच्यन्ता अनुदात्तेतः। ईर १०१८ गतौ कम्पने च। ईर्ते। ईराञ्चक्रे। ईरिता। ईरिष्यते। ईर्ताम्। ईर्ष्व। ईर्ध्वम्। ऐरिष्ट। ईड १०१९ स्तुतौ। ईट्टे। २४३९ ईशः से। (७-२-७७)। २४४० ईडजनोर्ध्वे च। (७-२-७८) ईशीड्जनां सेध्वेशब्दयोः सार्वधातुकयोरिट् स्यात्। योगविभागो वैचित्र्यार्थः।

क्शायात्, क्शेयादिति। लुङि च्लेः सिचि प्राप्ते **अस्यतिवक्ति**। 'च्लेः सिच्' इत्यतः च्लेरित्यनुवर्तते, तदाह **एभ्यश्च्लेरिति**। **अख्यत्, अख्यतेति**। ख्यत्वपक्षे रूपम्। आल्लोपः। ञित्त्वादुभयपदित्वादात्मनेपदेऽपि रूपम्। क्शादेशपक्षे परस्मैपदपक्षे त्वाह **अक्शासीदिति**। अङ्विधौ ख्यातीति यकारनिर्देशाद् यत्वाभावपक्षे अङ् न भवति। किं तु आदन्तत्वलक्षणौ सगिटौ, अक्शासिष्टाम् इत्यादि। **अक्शास्तेति**। आत्मनेपदे लुङि रूपम्। अक्शासाताम् इत्यादि। अख्यास्यत्, अख्यास्यत। अक्शास्यत्, अक्शास्यत। **वर्जने ख्शाञ् नेष्ट इति**। वार्तिकमिदम्। **समचक्षिष्टेति**। अवर्जयदित्यर्थः। लुङि रूपम्।

अथ पृच्यन्ता इति। 'पृची संपर्चने' इत्येतत्पर्यन्ता इत्यर्थः। **ईर गताविति**। सेट्। **ईर्ते इति**। ईराते ईरते। ईर्षे ईराथे ईर्ध्वे। ईरे ईर्वहे ईर्महे। **ईराञ्चक्रे इति**। 'इजादेश्च-' इत्याम्। **ईरितेति**। ईरिष्यते इत्यपि ज्ञेयम्। **ईर्तामिति**। ईराताम् ईरताम्। **ईर्ष्वेति**। ईराथाम् इत्यपि ज्ञेयम्। **ईर्ध्वमिति**। ईरै ईरावहै ईरामहै। ऐर्त ऐराताम् ऐरत। ऐर्थाः ऐराथाम् ऐर्ध्वम्। ऐरि ऐर्वहि ऐर्महि। ईरीत। ईरिषीष्ट। ऐरिष्ट। ऐरिष्यत। **ईड स्तुतौ**। **ईट्टे इति**। तकारस्य ष्टुत्वेन टः, डस्य चर्त्वेन ट इति भावः। ईडाते ईडते। ईड् से इति स्थिते सार्वधातुकत्वादिडागमे अप्राप्ते **ईशः से**। **ईडजनोर्ध्वे च**। 'इड-त्यर्ति-' इत्यत इडिति 'रुदादिभ्यः-' इत्यतः सार्वधातुक इति चानुवर्तते। से ध्वे इति लुप्तषष्ठीके इत्यभिप्रेत्य सूत्रद्वयं युगपद्व्याचष्टे **ईशीड्जनामिति**। ध्वे इत्यस्य पूर्वत्रापकर्षः, से इत्यस्य उत्तरत्रानुवृत्तिरिति भावः। प्रत्येकं व्याख्याने तु ईशो ध्वेशब्दे परे न स्यात्, ईडजनोः सेशब्दे परे न स्यादिति भावः। ननु तर्हि 'ईशी-

---

सिद्धे तदर्थं ग्रहणमित्यादि पुषादिषु वक्ष्यति। **चक्षीति**। 'ब्रुवो वचिः' 'वच परिभाषणे' इति उभयोर्ग्रहणम्। **ईर**। ईरिता। ईरिष्यते। लङि ऐर्त ऐराताम् ऐरत। ऐरि ऐर्वहि ऐर्महि। **ईशः से**। यथाश्रुतसूत्रन्यासे ईशो ध्वे शब्दे परे ईशिध्वे ईशिध्वमिति न सिध्येदत आह **ईशीड्जनामिति**। **वैचित्र्यार्थ इति**।

ईडिषे। ईडिध्वे। 'एकदेशविकृतस्यानन्यत्वात्' (प ३८) ईडिष्व। ईडिध्वम्। 'विकृतिग्रहणेन प्रकृतेरग्रहणात्' ऐड्ढ्वम्। ईश १०२० ऐश्वर्ये। ईष्टे। ईशिषे ईशिध्वे। आस १०२१ उपवेशने। आस्ते। 'दयायासश्च' (सू २३२४)। आसांचक्रे। आस्स्व आध्वम्। आसिष्ट। आङःशासु १०२२ इच्छायाम्। आशास्ते आशासाते। आङ्पूर्वत्वं प्रायिकम्। तेन 'नमोवाकं प्रशास्महे' इति

ईडजनां सेध्वयोः' इत्येकमेव सूत्रं कुतो न कृतमित्यत आह **योगविभागो वैचित्र्यार्थ इति**। से इत्यस्य उत्तरत्रानुवृत्तिः ध्वे इत्यस्य पूर्वत्रापकर्ष इति वैचित्र्यद्योतनार्थ इत्यर्थः। स्वतन्त्रेच्छस्य महर्षेर्नियन्तुमशक्यत्वादिति भावः। **ईडिष इति**। ईडे ईड्वहे ईड्महे। लिटि तु ईडांचक्रे इत्यादि। ईडिता। ईडिष्यते। ईट्टाम्। ननु ईडिष्वेत्यत्र कथमिट् सेशब्दाभावात्, तत्राह **एकदेशेति**। एकदेशविकृतत्वात् स्वशब्दस्य इटि ईडिष्व इति रूपमित्यर्थः। ननु तर्हि ईड्ढ्वम् इत्यत्र कथं नेट् ध्वेस्वरूपापेक्षया ध्वमित्यस्य एकदेशविकृतत्वादित्यत आह **विकृतीति**। प्रकृतिग्रहणे तदेकदेशविकृतस्य ग्रहणम्। न तु विकृतिग्रहणे तदेकदेशविकृताया अपि प्रकृतेर्ग्रहणम्। पुरुषमानयेत्युक्ते हि अन्धोऽनन्धो वा पुरुष आनीयते। अन्धमानय इत्यत्र तु अन्ध एवानीयते न त्वनन्धः। तथा च ध्वम एत्वे कृते ध्वेशब्दः, तेन च विकृतेन ध्वमित्यस्य तत्प्रकृतिभूतस्य न ग्रहणमिति नेडिति भावः। ऐडं ईडावहै ईडामहै। ऐट्ट ऐडाताम् ऐडत। ऐट्ठाः ऐडाथाम् ऐड्ढ्वम्। ऐडि ऐड्वहि ऐड्महि। ईडीत। ईडिषीष्ट। ऐडिष्ट। ऐडिष्यत। ईशधातुरीडिवत्। **ईष्टे इत्यादि**। शस्य व्रश्चादिना षत्वे ष्टुत्वमिति विशेषः। **आस उपवेशने। आस्ते इति**। आसाते आसते। आस्से आसाथे। 'धि च' इति सलोपः। आध्वे। आसे आस्वहे आस्महे। इजादित्वाद्यभावादाह **दयायासश्चेति**। आसिता। आसिष्यते। आस्ताम् आसाताम्। **आस्स्वेति**। सकारद्वयमत्र बोध्यम्। आसाथाम्। **आध्वमिति**। 'धि च' इति सलोपः। आसै आसावहै आसामहै। आस्त आसाताम् आसत। आस्थाः आसाथाम् आध्वम्। आसि आस्वहि आस्महि। आसीत आसीयाताम्। आसिषीष्ट आसिषीयास्ताम्। **आसिष्टेति**। आसिषातामित्यादि। आसिष्यत। **आङः शासु इच्छायामिति**। आङः परः शासधातु-

---

ध्वे इत्यस्य पूर्वत्रापकर्षः, से इत्यस्योत्तरत्रानुवृत्तिरित्येवं विचित्रबोधार्थ इत्यर्थः। इह काशिकादौ जनेरुदाहरणमुक्तम्। तथा हि-'जनी प्रादुर्भावे' इत्यस्माच्छ्यनश्छान्दसो लुग् उपधालोपाभावश्च। जनिषे। जनिध्वे। जनिष्व। जनिध्वम्। 'जन जनने' इति श्लुविकरणस्याप्युपधालोपे व्यतिजज्ञिषे। व्यतिजज्ञिध्वे। 'कर्तरि कर्मव्यतिहारे' इति

सिद्धम् । वस १०२३ आच्छादने । वस्ते । वस्से । वध्वे । ववसे । वसिता । कसि १०२४ गतिशासनयोः । कंस्ते कंसाते कंसते । अयमनिदिद् इत्येके—कस्ते । तालव्यान्तोऽप्यनिदित् । कष्टे कशाते । कक्षे कड्ढ्वे । णिसि १०२५ चुम्बने । निंस्ते । दन्त्यान्तोऽयम् । आभरणकारस्तु तालव्यान्त इति बभ्राम । निंस्से । णिजि १०२६ शुद्धौ । निङ्क्ते । निङ्क्षे । निञ्जिता । शिजि १०२७ अव्यक्ते

रिच्छायामित्यर्थः । **नमोवाकमिति** । वचेर्घञि वाकः । नमश्शब्दस्य वचनं कुर्महे इत्यर्थः, धातूनामनेकार्थत्वात् । आसिवद्रूपाणि । **वस आच्छादन इति** । परिधाने इत्यर्थः । **वध्वे इति** । 'धि च' इति सलोपः । **ववसे इति** । वादित्वादेत्वाभ्यासलोपौ नेति भावः । **वसितेति** । अनिट्सु शब्विकरणस्यैव वसेर्ग्रहणमिति भावः । वसिष्यते । वस्ताम् । अवस्त । वसीत । वसिषीष्ट । अवसिष्ट । अवसिष्यत । **कसि गतीति** । वसधातुवत् । इदित्त्वान्नुमिति विशेषः । **तालव्यान्त इति** । तालव्योष्मान्त इत्यर्थः । **कष्टे इति** । 'व्रश्च–'इति शस्य षः, ष्टुत्वम् । **कक्षे इति** । शस्य षः, षस्य 'षढोः–' इति कः, षत्वम् । **कड्ढ्वे इति** । शस्य षः, तस्य जश्त्वेन डः, धस्य ष्टुत्वेन ढः । **णिसि चुम्बन इति** । णोपदेशोऽयम् । नुमि 'नश्च–' इत्यनुस्वारः, निंस्ते इत्यादि । **निंस्से इत्यादि** । नुमोऽनुस्वारः, थासः सेभावः । **दन्त्यान्तोऽयमिति** । दन्त्योष्मान्तोऽयमित्यर्थः । **बभ्रामेति** । 'नुम्विसर्जनीयशर्व्यवायेऽपि' इति सूत्रे वृत्त्यादौ दन्त्योष्मान्तत्वोक्तेरिति भावः । **णिजि शुद्धाविति** । णोपदेशोऽयम् । अनिट्सु इरित एव ग्रहणादयं सेट् । **निङ्क्ते इति** । नुमि निनज ते इति स्थिते जस्य कुत्वेन गः, तस्य चर्त्वेन कः, नस्य अनुस्वारे परसवर्णो ङकारः । निञ्जाते । निङ्क्षे निञ्जाथे निङ्ग्ध्वे । निञ्जे निञ्ज्वहे निञ्ज्महे । लिटि संयोगात्परत्वात् किर्त्वाभावान्नलोपो न । निनिञ्जे निनिञ्जाते इत्यादि । निञ्जिता ।

तङ् । **नमोवाकमिति** । 'नमस्ते रुद्र मन्यवे' इत्यादि नमोवचनम् । वचेर्घञ् । 'चजोः–' इति कुत्वम् । **ववसे इति** । वादित्वादेत्वाभ्यासलोपौ न । **णिसि चुम्बने** । **बभ्रामेति** । नुम् विसर्जनीय–' इति सूत्रे वृत्तिपदमञ्जर्यादिभिरुक्तं 'नुमादिभिः प्रत्येकं व्यवाये षत्वमिष्यते, तेन निंस्से निंस्स्व इत्यत्र न भवति' इति । तच्चास्य सान्तत्वे युज्यते । शान्तत्वे तु 'व्रश्च–' इत्यादिना षत्वे 'षढोः–' इति कत्वे कवर्गात्परत्वेन षत्वं दुर्वारमिति प्रत्युदाहरणमिदं न संगच्छत इति भावः । **णिजि शुद्धौ** । अनिट्केषु णिजिरिति गौडोत्यादिकस्य ग्रहणादयं सेडिति ध्वनयति । **निञ्जितेति** । **शिजि** अव्यक्ते शब्दे । क्तप्रत्यये शिञ्जितम् । आवश्यकणिन्यन्तान्ङीपि शिञ्जिनी । 'भूषणानां

१–आदेशप्रत्यययोरेव सस्य षत्वविधानादत्र षत्वाभावः ।

शब्दे । शिङ्क्ते । पिजि १०२८ वर्णे । संपर्चन इत्येके । उभयत्रेत्यन्ये । अवयव इत्यपरे । अव्यक्ते शब्द इतीतरे । पिङ्क्ते । पृजि इत्येके । पृङ्क्ते । वृजी १०२९ वर्जने । दन्त्योष्ठ्यादिः । ईदित् । वृक्ते वृजाते । वृत्ते । 'इदित्' इत्यन्ये । वृङ्क्ते । पृची १०३० संपर्चने । पृक्ते । षूङ् १०३१ प्राणिगर्भविमोचने । सूते । सुषुवे । सुषुविषे । सोता, सविता । 'भूसुवोः–' (सू २२२४) इति गुणनिषेधः । सुवै । सविषीष्ट । असविष्ट, असोष्ट । शीङ् १०३२ स्वप्ने । **२४४१ शीङः सार्वधातुके गुणः ।** **(७४--२१)** 'क्ङिति च' (सू २२१७) इत्यस्यापवादः । शेते शयाते । **२४४२ शीङो रुट् ।** **(७-१-६)** शीङः परस्य झादेशस्यातो रुडागमः स्यात् ।

निञ्जिष्यते । निङ्क्ताम् । अनिङ्क्त । निञ्जीत । निञ्जिषीष्ट । अनिञ्जिष्ट । अनिञ्जिष्यत । शिञ्जिपिजी अप्येवम् । **पृजि इत्येके इति ।** ऋदुपधोऽयम् । वृजीधातुः ऋदुपध ईदित्, अतो नुम् नेति भावः । **पृची संपर्चन इति ।** ऋदुपधोऽयम् । पपृचे इत्यादि । ईरादयः पृच्यन्ता अनुदात्तेतो गताः । षूङ्धातुः षोपदेशः, वेट्, ङित्वात्तङ् । **सूते इति ।** सुवाते सुवते । सूषे सुवाथे सूध्वे । सुवे सूवहे सूमहे । **सुषुविषे इति** 'स्वरति–' इति इड्विकल्पं बाधित्वा 'श्र्युकः किति' इति निषेधे प्राप्ते क्रादिनियमान्नित्यमिट् 'स्वरतिसूति–' इति इड्विकल्पं मत्वाह **सोता, सवितेति ।** तिङस्तासा व्यवधानाद् 'भूसुवोः–' इति न गुणनिषेध इति भावः । सोष्यते सविष्यते । सूताम् । सुवाताम् । सूष्व सूध्वम् । आटः पित्त्वाद् गुणे प्राप्ते आह **भूसुवोरिति । सुवै इति ।** सुवावहै सुवामहै । असूत सुवीत । सविषीष्ट सोषीष्ट इत्यादि स्पष्टम् । **शीङ् स्वप्ने ।** सेट् ङित्वात्तङ् । **शीङः सार्वधातुके ।** स्पष्टम् । 'सार्वधातुकार्धधातुकयोः' इत्येव सिद्धे किमर्थमिदमित्यत आह **क्ङितीति चेत्यस्यापवाद इति ।** झस्य अदादेशे सति शे अते इति स्थिते **शीङो रुट् ।** 'झोऽन्तः' इत्यतो झ इत्यनुवर्तते । 'अदभ्यस्तात्' इत्यतः अदित्यनुवृत्तं षष्ठ्या विपरिणम्यते, तदाह **शीङः परस्य झादेशस्येति ।** रुटि उकार उच्चारणार्थः । टित्वादाद्यवयवः । **शेध्वे इति ।** 'षीध्वं-

---

तु शिञ्जितम्' । 'मौर्वी ज्या शिञ्जिनी गुणः' इति चामरः । **सुषुविषे इति ।** 'स्वरति–' इति विकल्पं बाधित्वा 'श्र्युकः किति' इति निषेधे प्राप्ते क्रादिनियमान्नित्यमिट् । **शीङ्** स्वप्ने । **क्ङिति चेत्यस्येति ।** अन्यत्र 'सार्वधातुकार्धधातुकयोः' इत्यनेन सिद्धमिति भावः । **शीङो रुट् ।** 'झोऽन्तः' इत्यतो झ इत्यनुवर्तते । 'अदभ्यस्तात्' इत्यतोऽदिति च । तथा चेष्टानुरोधेनादिति प्रथमान्तस्य षष्ठ्यन्तत्वमाश्रित्य व्याचष्टे **झादेशस्यात इति ।** झस्यैव रुडागमे तु अदादेशो दुर्लभ इत्यदि-

शेरते। शेषे शेध्वे। शये शेवहे। शिश्ये। शयिता। अशयिष्ट।

अथ स्तौत्यन्ताः परस्मैपदिनः। ऊर्णुस्तूभयपदी। यु १०३३ मिश्रणे अमिश्रणे च। २४४३ **उतो वृद्धिर्लुकि हलि। (७-३-८९)** लुग्विषये उकारस्य वृद्धिः स्यात्पिति हलादौ सार्वधातुके, न त्वभ्यस्तस्य। यौति युतः युवन्ति। युयाव। यविता। युयात्, इह 'उतो वृद्धिः–' न, भाष्ये 'पिच्च

लुङ्लिटाम्' इत्युक्तेर्न ढः। **शिश्ये इति।** शिश्यिषे। शिश्यिढ्वे, शिश्यिध्वे। **शयितेति।** शयिष्यते। शेताम् शयाताम् शेरताम्। शेष्व शयाथाम् शेध्वम्। शयै शयावहै शयामहै। अशेत अशयाताम् अशेरत। अशेथाः अशयाथाम् अशेध्वम्। अशयि अशेवहि अशेमहि। शयीत। शयिषीष्ट। **अशयिष्टेति।** अशयिष्यत इत्यादि ज्ञेयम्।

स्तौत्यन्ता इति। ष्टुञ् स्तुतावित्यतः प्राक्तना इत्यर्थः। **ऊर्णुस्तूभयपदीति।** ञित्त्वादिति भावः। **यु मिश्रणेऽमिश्रणे चेति।** अमिश्रणं पृथग्भावः। सेडयम्। **उतो वृद्धिर्लुकि हलि।** 'नाभ्यस्तस्याचि पिति सार्वधातुके' इति अचिवर्जमनुवर्तते। लुकीति विषयसप्तमी, दर्शनाभावस्य लुकः परत्वासंभवात्। तदाह **लुग्विषय इत्यादिना। यौतीति।** गुणं बाधित्वा वृद्धिः। **युत इति।** अपित्त्वान्न वृद्धिः। **युवन्तीति।** अपित्त्वाद् वृद्ध्यभावे ङित्त्वाद् गुणाभावे उवङिति भावः। यौषि युथः युथ। यौमि युवः युमः। **युयावेति।** युयुवतुः युयुवुः। युयविथ युयुवथुः युयुव। युयाव, युयव युयुविव युयुविम। **यवितेति।** उवङं बाधित्वा परत्वाद् गुणः। यविष्यति। यौतु, युतात् युताम् युवन्तु। हौ अपित्त्वान्न वृद्धिः। युहि, युतात् युतम् युत। आटि पित्त्वेऽपि हलादित्वाभावान्न वृद्धिः। पित्त्वेन ङित्त्वाभावाद् गुणः। यवानि यवाव यवाम। अयौत् अयुताम् अयुवन्। अयौः अयुतम् अयुत। अयवम् अयुव अयुम। विधिलिङ्याह **युयादिति।** अत्र यासुडागमसहितस्य तिपः पित्त्वादुतो वृद्धिमाशङ्क्याह **इह उतो वृद्धिर्नेति।** कुत इत्यत

त्यस्याप्यनुवृत्तिः कृता। **शिश्ये इति।** 'एरनेकाचः–' इति यण्। शेताम्। शयाताम्। शेरताम्। शेष्व शयाथाम्। शेध्वम्। **उतो वृद्धिः।** 'नाभ्यस्तस्याचि पिति–' इत्यतो निषेधानुवृत्तिराह **न त्वभ्यस्तस्येति।** उतः किम्, एति। एषि। लुकीति किम्, सुनोति। जुहोति। हलि किम्, यवानि। यवाव। 'आडुत्तमस्य–' इत्याडागमः पित्। पिति किम्, युतः। स्तः 'नाभ्यस्तस्य–' इति किम्, योयोति। रोरोति। सार्वधातुके किम्, यूयात्। न चात्र ङिच्च पिन्नेति व्याख्यानान्निर्वाहः शङ्क्यः। 'किदाशिषि' इति यासुटः कित्त्वात्। केचित्तु युयात् स्तुयात् इत्यादावपि ङिच्च पिन्नेत्येतदनाश्रित्य

ङित्' 'ङिच्च पिन्न' इति व्याख्यानात्। विशेषविहितेन ङित्त्वेन पित्त्वस्य बाधात्। यूयात्। अयावीत्। रु १०३४ शब्दे। **२४४४ तुरुस्तुशम्यमः सार्वधातुके।** (७-३-९५) एभ्यः परस्य सार्वधातुकस्य हलादेस्तिङ ईड् वा स्यात्। 'नाभ्यस्तस्य-' (सू २५०३) इत्यतोऽनुवृत्तिसंभवे पुनः सार्वधातुकग्रहणमपिदर्थम्। रवीति, रौति। रुवीतः, रुतः। हलादेः किम्-रुवन्ति। तिङः किम्-शाम्यति। सार्व-धातुके किम्-आशिषि रूयात्। विध्यादौ तु रुयात्, रुवीयात्। अरावीत्।

आह **भाष्ये इति। व्याख्यानादिति।** 'हलः श्नः शानज्झौ' इति सूत्रव्याख्यावसरे वचनादित्यर्थः। ननु यासुडागमसहितस्य तिपः पित्त्वात् 'पिच्च ङिन्न' इत्युक्तवचनेन 'यासुट् परस्मैपदेषु' इति ङित्त्वस्याप्यभावात् 'क्ङिति च' इति गुणनिषेधाभावाद् गुणः स्यादित्यत आह **विशेषविहितेनेत्यादि बाधादित्यन्तम्।** 'यासुट् परस्मै-पदेषु-' इति विशेषविहितेन यासुटो ङित्त्वेन तत्सहितस्य पितो 'ङिच्च पिन्न' इति पित्त्व-प्रयुक्तङित्त्वनिषेधस्य बाधाद् ङित्त्वाद् गुणनिषेधो निर्बाध इत्यर्थः। आशीर्लिङ्याह **यूयादिति।** आर्धधातुकत्वान्न वृद्धिः। 'अकृत्सार्वधातुकयोः-' इति दीर्घः। यूया-स्ताम् इत्यादि। लुङ्याह **अयावीदिति।** सिचि वृद्धिः, 'इट ईटि' इति सिज्लोपः। अयाविष्टाम् इत्यादि। अयविष्यत्। **तुरुस्तु।** तु रु स्तु शमि अम् एषां समाहार-द्वन्द्वात् पञ्चम्येकवचनम्। 'उतो वृद्धिः-' इत्यतो हलीति 'भूसुवो' इत्यतस्तिङीति 'ब्रुव ईट्' इत्यतो ईडिति 'यङो वा' इत्यतो वा इति चानुवर्तते, तदाह **एभ्य इत्यादिना। नाभ्यस्तस्येति।** 'नाभ्यस्तस्याचि पिति सार्वधातुके' इत्यतः सार्वधातुके इत्यनु-वृत्तिसंभवे पुनः सार्वधातुकग्रहणं पिति इत्यस्यानुवृत्तिर्मा भूदित्येतदर्थमित्यर्थः। **रवीतीति।** ईट्पक्षे हलादित्वाभावाद् उतो वृद्धिर्नेति भावः। **रौतीति।** ईडभावे 'उतो वृद्धिः-' इति भावः। **रुवीतः, रुत इति।** अपित्त्वेऽपि ईड्विकल्प इति भावः। **रुवन्तीति।** अन्तादेशे कृते हलादित्वाभावादीडभावे उवङिति भावः। **शाम्यतीति।** श्यनस्तिङ्त्वभावादीड् नेति भावः। **आशिषि रूयादिति।** आर्धधातुकत्वादीडभावे 'अकृत्सार्वधातुकयोः-' इति दीर्घः। **विध्यादौ त्विति।** आदिना निमन्त्रणादिसंग्रहः। **रुयात् रुवीयादिति।** हलादिसार्वधातुकत्वाद् ईड्विकल्प इति भावः। ईडभावपक्षे हलादौ पिति सार्वधातुके 'उतो वृद्धिः-' इति

व्याचक्षते संज्ञापूर्वकविधेरनित्यत्वाद् वृद्धिर्न भवति। अन्यथा 'उत औत्' इत्येव वदेदिति। **तुरुस्तु।** तुः सौत्रो धातुरिति वक्ष्यति। **अपिदर्थमिति।** एभ्यः परस्य पितः सार्वधातुकस्येति प्राचो व्याख्यानं प्रामादिकम्, रुवीतः स्तुवीत इत्याद्य-सिद्ध्यापत्तेरिति भावः। शम्यमोरुदाहरणं तु शमीध्वम्। अभ्यमीति। अभ्यन्ति।

अराविष्यत्। 'तु' इति सौत्रो धातुर्गतिवृद्धिहिंसासु। अयं च लुग्विकरण इति स्मरन्ति। तवीति, तौति। तुवीतः, तुतः। तोता। तोष्यति। णु १०३५ स्तुतौ। नौति। नविता। टुक्षु १०३६ शब्दे। क्षौति। क्षविता। क्ष्णु १०३७ तेजने। क्ष्णौति। क्ष्णविता। स्नु १०३८ प्रस्रवणे। स्नौति। सुष्णाव। स्नविता। स्नुयात्। ऊर्णुञ् १०३९ आच्छादने। २४४५ ऊर्णोतेर्विभाषा। (७-३-९०) वा वृद्धिः स्याद्धलादौ पिति सार्वधातुके। ऊर्णौति, ऊर्णोति ऊर्णुतः ऊर्णुवन्ति। ऊर्णुते ऊर्णुवाते। ऊर्णुवते। 'ऊर्णोतेराम्नेति वाच्यम्' (वा २८०२) २४४६ न न्द्राः संयोगादयः। (६-१-३) अचः पराः संयोगादयो नदरा द्विर्न

बोध्यम्। ननु धातुपाठे तुधातोरदर्शनाद् धातुत्वाभावात्कथं ततः सार्वधातुकस्य ईड्विधिरित्यत आह तु इति सौत्रो धातुरिति। गतिवृद्धिहिंसास्विति। अत्र व्याख्यानमेव शरणम्। ननु शपा व्यवधानादस्य सार्वधातुकपरत्वं कथमित्यत आह अयं च लुग्विकरण इति स्मरन्तीति। अव्यवहितलिङ ईड्विधानमेवात्र बीजम्। शम्यमोस्तु शमीध्वम् अभ्यमीति इति वेदे शपो लुकि बोध्यम्। अयमनिट् हलादौ सार्वधातुके रुधातुवत्। आर्धधातुके तु नेट्, तदाह तोतेति। णु स्तुताविति। णोपदेशोऽयं सेट्। युधातुवद्रूपाणि। क्षुक्ष्णुस्नुधातवः सेटः। युधातुवद्रूपाणि। चुक्षाव। चुक्ष्णाव। सुष्णाव इति। षोपदेशोऽयमिति भावः। ऊर्णुञ्धातुरुभयपदी। सेट्। उतो वृद्धेर्नित्यं प्राप्तौ ऊर्णोतेर्विभाषा। 'उतो वृद्धिः–' इत्यतो वृद्धिरिति हलीति चानुवर्तते, 'नाभ्यस्तस्य–' इत्यतः 'पिति सार्वधातुके' इति च-इत्यभिप्रेत्य शेषपूरणेन सूत्रं व्याचष्टे वृद्धिः स्यादित्यादिना। लिटि 'इजादेः–' इति 'कास्प्रत्ययादाम्–' इति च आमि प्राप्ते आह ऊर्णोतेराम् नेति। ऊर्णोतेर्णुवद्भावस्य वक्ष्यमाणतया इजादित्वस्य अनेकाच्त्वस्य चाभावादिति भावः। णलि ऊर्णु अ इति स्थिते 'अजादेर्द्वितीयस्य' इति नु इति रेफसहितस्य द्वित्वे हलादिशेषे नकारस्य निवृत्तौ ऊरुनावेति प्राप्ते न न्द्राः संयोगादयः। 'एकाचो द्वे प्रथमस्य' इत्यतो द्वे इत्यनुवर्तते। 'अजादेर्द्वितीयस्य' इत्यतः अजादेरिति। अचासौ आदिश्चेति कर्मधारयात्

शम्यमोश्छन्दसि विकरणस्य लुकि सति हलादिसार्वधातुकमनन्तरं संभवतीति काशिकायामुक्तम्। आपिशलास्तु 'तुरुस्तुशम्यमः सार्वधातुके छन्दसि' इति पठन्ति, तन्मते सूत्रमिदं छन्दस्येव। ऊर्णोतेर्विभाषा। 'उतो वृद्धिः–' इति नित्ये प्राप्ते विभाषेयम्। हलादौ किम्, ऊर्णवानि। पिति किम्, ऊर्णुतः। सार्वधातुके किम्, ऊर्णुयात्। ऊर्णोतेराम्नेति। ऊर्णोतेर्णुवद्भावो वाच्यः' इति वक्ष्यमाणस्य आमभावोऽपि फलमिति भावः। न न्द्राः। अजादेरिति वर्तते। स च कर्मधारयः। आदिग्रहणस्य तु

भवन्ति। नुशब्दस्य द्वित्वम्, णत्वस्यासिद्धत्वात्। 'पूर्वत्रासिद्धीयमद्विर्वचने' (प १२७) इति त्वनित्यम्। 'उभौ साभ्यासस्य' (सू २६०६) इति लिङ्गात्। ऊर्णुनाव ऊर्णुनुवतुः ऊर्णुनुवुः। २४४७ विभाषोर्णोः। (१-२-३)

पञ्चमी। न्, द्, र्, एषां द्वन्द्वः, तदाह **अचः परा इति**। ननु णु इत्यस्य द्वित्वे खण्डद्वयेऽपि णकारः श्रूयेतेत्यत आह **नुशब्दस्य द्वित्वमिति**। **णत्वस्येति**। धातुपाठे ऊर्णु इति नकारस्य कृतणत्वस्य निर्देशः, द्वित्वे कर्तव्ये तस्य णत्वस्यासिद्धत्वादित्यर्थः। **लिङ्गादिति**। 'उभौ साभ्यासस्य' इत्यस्यायमर्थः—साभ्यासस्यानितेरुपसर्गस्थान्निमित्तात्परौ खण्डद्वयगतौ नकारौ णत्वं प्राप्नुत इति। प्राणिणत् इत्युदाहरणम्। अत्र 'अनितेः' इति णत्वे कृते 'पूर्वत्रासिद्धीयमद्विर्वचने' इति णत्वस्यासिद्धत्वाभावमाश्रित्य णि इत्यस्य द्वित्वादेव खण्डद्वये णकारश्रवणसिद्धेः 'उभौ साभ्यासस्य' इति वचनं 'पूर्वत्रासिद्धीयमद्विर्वचने' इत्यस्यानित्यतां गमयतीत्यर्थः। **ऊर्णुनावेति**। नुशब्दस्य द्वित्वे पूर्वनकारस्य 'रषाभ्याम्–' इति णत्वम्। द्वितीयस्य तु 'अट्कुप्वाङ्' इति न णत्वम्। 'उभौ साभ्यासस्य' इति लिङ्गादेव। **विभाषोर्णोः**। 'गाङ्कुटादिभ्यः–' इत्यतो ङिदित्यनुवर्तते, 'विज इट्' इत्यत

प्रकृतेऽनुपयोगस्तदेतदाह **अचः परा इति**। उन्दिदिषति इन्दिदिषति अड्डिडिषति। अर्चिचिषति। 'न न्द्राः' इति किम्, ईक्षतेः सनि ईचिक्षिषते। संयोगादयः किम्, प्राणिणिषति। अरिरिषति। अचः पराः किम्, इन्द्रीयितुमिच्छतीति क्यजन्तात्सनि इन्दिद्रीयिषति। इह नकारस्य द्वित्वाभावेऽपि दकारस्तु द्विरुच्यत एव। अचः परत्वाभावात्। **नुशब्दस्येति**। उपदेशे नकार एव। णत्वं तु 'रषाभ्याम्–' इत्यनेनेति भावः। **पूर्वत्रासिद्धीयमिति**। अत्र द्विर्वचनशब्देन षाष्ठमाष्टमिकं चोभयं गृह्यते। तत्र षाष्ठस्य ऊढिमाख्यद् औजिढद् इत्युदाहरणम्। आष्टमिकस्य तु द्रोग्धा द्रोग्धा द्रोढा द्रोढा इति। इहि त्रिपदीस्थं घत्वढत्वादिकं द्विर्वचने सिद्धमेव। असिद्धत्वे तु त्रिपादीस्थकार्यात्पूर्वमेव द्रोह् ता इत्यस्य द्वित्वे पश्चाद् 'वा द्रुह–' इह घत्वढत्वयोः प्रवृत्तौ द्रोग्धा द्रोढेत्यपि द्विर्वचनं कदाचित्स्यात्। न तु द्रोग्धा द्रोग्धेति समानजातीयस्यैव नियमेन द्विर्वचनं सिध्यति। किंच षट् सन्त इत्यत्र डस्य चर्त्वे टकारस्य द्वित्वं 'पूर्वत्रासिद्धीयमद्वित्वे' इत्युक्तेरिति मनोरमादावुक्तम्। अत एव सुध्युपास्य इत्यत्र धस्य जश्त्वेन दकारे व्यक्तिभेदाद्दकारस्यापि द्वित्वं सुवचमेवेत्याहुः। **अनित्यमिति**। अत एव हतिशब्दस्य द्वित्वमौजिढदित्यपि नामधातुषु वक्ष्यति। **उभौ साभ्यासस्येति**। अनितेरित्यनेन णत्वं कृत्वा द्विर्वचने कृते प्राणिणत् प्राणिणिषतीति सिद्धमिति सूत्रमिदं ज्ञापकमित्यर्थः। एवं च प्रणिनायेत्यादौ द्वितीयस्य णत्वाभावः सिद्धः। **विभाषोर्णोः**।

इडादिप्रत्ययो वा ङि स्यात्। ऊर्णुनुविथ, ऊर्णुनविथ। ऊर्णुविता, ऊर्णविता। ऊर्णोतु, ऊर्णौतु ऊर्णवानि ऊर्णवै। **२४४८ गुणोऽपृक्ते। (७-३-९१)** ऊर्णोतेर्गुणः स्यादपृक्ते हलादौ पिति सार्वधातुके। वृद्ध्यपवादः। **और्णोत्। और्णोः।** ऊर्णुयात्। ऊर्णुयाः, इह वृद्धिर्न, 'ङिच्च पिन्न' इति भाष्यात्। ऊर्णूयात्। ऊर्णविषीष्ट, ऊर्णुविषीष्ट। **और्णुवीत् और्णुविष्टाम्। २४४९ ऊर्णोतेर्विभाषा। (७-२-६)** इडादौ सिचि परस्मैपदे परे वा वृद्धिः स्यात्। पक्षे गुणः। **और्णावीत् और्णाविष्टाम् और्णाविषुः। और्णवीत्।** ष्णु १०४०

इडिति इत्यभिप्रेत्य शेषपूरणेन सूत्रं व्याचष्टे **इडादीति। ऊर्णुनुविथेति।** ङित्त्वपक्षे गुणाभावादुवङ्। **ऊर्णुनविथेति।** ङित्त्वाभावपक्षे गुणः। ऊर्णुनुवथुः ऊर्णुनुव। ऊर्णुनाव, ऊर्णुनव। लुटि तासि इटि ङित्त्वविकल्पं मत्वाह **ऊर्णविता, ऊर्णुवितेति।** ऊर्णविष्यति, ऊर्णुविष्यति। ऊर्णविष्यते, ऊर्णुविष्यते लङि और्णु त् इति स्थिते 'ऊर्णोतेर्विभाषा' इति वृद्धिविकल्पे गुणे च प्राप्ते **गुणोऽपृक्ते।** 'ऊर्णोतेर्विभाषा' इत्यत ऊर्णोतेरिति 'नाभ्यस्तस्य–' इत्यतः पिति सार्वधातुके इति 'उतो वृद्धिः–' इत्यतो हलीति चानुवर्तते, तदाह **ऊर्णोतेरित्यादि। वृद्ध्यपवाद इति।** 'ऊर्णोतेर्विभाषा' इति वृद्धिविकल्पस्यापवाद इत्यर्थः। ऊर्णुयात् इत्यत्र 'विभाषोर्णोः' इति वृद्धिविकल्पमाशङ्क्याह **इह वृद्धिर्नेति। भाष्यादिति।** तथा च यासुटो ङित्त्वेन पित्त्वाभावाच्च वृद्धिविकल्प इति भावः। न चैवं सति गुणनिषेधोऽपि न स्यादिति शङ्क्यम्, विशेषविहितेन यासुटो ङित्त्वेन ङिच्च पिन्नेति पित्त्वप्रयुक्तङित्वनिषेधस्य बाध इति 'यु मिश्रणे' इति धातावेवोक्तत्वादिति भावः। परस्मैपदे आशीर्लिङ्याह **ऊर्णूयादिति।** अकृत्सार्वधातुकयोरिति दीर्घः। ऊर्णूयास्तामित्यादि आत्मनेपदे लिङ्याह **ऊर्णविषीष्ट, ऊर्णुविषीष्टेति।** 'विभाषोर्णोः' इति ङित्त्वविकल्प इति भावः। लुङि परस्मैपदे और्णु ईत् इति स्थिते 'विभाषोर्णोः' इति ङित्त्वपक्षे गुणाभावे उवङि रूपमाह **और्णुवीदिति।** ङित्त्वाभावपक्षे गुणे नित्यं प्राप्ते **ऊर्णोतेर्विभाषा।** 'सिचि वृद्धिः परस्मैपदेषु' इत्यनुवर्तते, 'नेटि' इत्यत इटीति च, तदाह **इडादाविति।** आत्मनेपदे तु लुङि और्णविष्ट, और्णुविष्ट। और्णविष्यत्, और्णुविष्यत्। और्णविष्यत, और्णुविष्यत।

'गाङ्कुटादिभ्यः–' इत्यतो ङिदिति 'विज इट्' इत्यत इडिति चानुवर्तत इत्याशयेनाह **इडादिप्रत्यय इत्यादि।** तेन गुणविकल्पे पक्षे उवङ्। **गुणोऽपृक्ते।** 'नाभ्यस्तस्याचि–' इत्यतः पिति सार्वधातुके इति 'उतो वृद्धिर्लुकि हलि' इत्यतो हलीति चानुवर्तते, तदाह **हलादावित्यादि। ऊर्णोतेर्विभाषा।** 'सिचि वृद्धिः–' इति सूत्रं 'नेटि' इत्यत

अभिगमने। द्यौति। द्योता। षु १०४१ प्रसवैश्वर्ययोः। प्रसवोऽभ्यनुज्ञानम्। सोता। असौषीत्। कु १०४२ शब्दे। कोता। ष्टुञ् १०४३ स्तुतौ। स्तौति, स्तवीति। स्तुतः, स्तुवीतः। स्तुते, स्तुवीते। 'स्तुसुधूञ्भ्यः–' (सू २३८४) इतीट्। अस्तावीत्। 'प्राक्सितात्–' (सू २२७६) इति षत्वम्। अभ्यष्टौत्। 'सिवादीनां वा–' (सू २३५१)। पर्यष्टौत्, पर्यस्तौत्। ब्रूञ् १०४४ व्यक्तायां वाचि। २४५०
ब्रुवः पञ्चानामादित आहो ब्रुवः। (३-४-८४) ब्रुवो लटः परस्मैपदा-

---

द्यु अभिगमन इति। अनिट्। द्यौतीति। उतो वृद्धिः। सार्वधातुके लिटि च युधातुवत्। द्योतेति। द्योष्यति। अद्यौषीत्। षु प्रसवेति। षोपदेशोऽयम्। अनिट्। सौतीत्यादि द्युधातुवत्। एवं कु शब्दे इत्यपि। ष्टुञ् स्तुताविति। उभयपदी अनिट्। 'तुरुस्तुशम्यमः–' इति ईड्विकल्पम्, ईडभावपक्षे तु उतो वृद्धिं च मत्वाह स्तौति स्तवीतीति। स्तुवन्ति। स्तौषि, स्तवीषि। स्तुथः, स्तुवीथः स्तुथ, स्तुवीथ। स्तौमि, स्तवीमि स्तुवः, स्तुवीवः स्तुमः, स्तुवीमः। आत्मनेपदे लटि ईड्विकल्पं मत्वाह स्तुते, स्तुवीते इति। स्तुवाते, स्तुवते। स्तुषे, स्तुवीषे स्तुवाथे स्तुध्वे, स्तुवीध्वे। स्तुवे स्तुवहे, स्तुवीवहे स्तुमहे, स्तुवीमहे। लिटि तुष्टाव तुष्टुवतुः तुष्टुवुः। क्रादित्वात्थल्यपि नेड् भवति। तुष्टोथ तुष्टुवथुः तुष्टुव। तुष्टाव, तुष्टव तुष्टुव तुष्टुम। तुष्टुवे इत्यादि। स्तोता। तोष्यति स्तोष्यते। स्तौतु, स्तवीतु स्तुतात्, स्तुवीतात् स्तुताम्, स्तुवीताम् स्तुवन्तु। स्तुहि, स्तुवीहि, स्तुतात्, स्तुवीतात् स्तुतम्, स्तुवीतम् स्तुत, स्तुवीत। स्तवानि स्तवाव स्तवाम। स्तुताम्, स्तुवीताम् स्तुवाताम् स्तुवताम्। स्तुष्व, स्तुवीष्व स्तुवाथाम् स्तुध्वम्, स्तुवीध्वम्। स्तवै स्तवावहै स्तवामहै। लङि अस्तौत्, अस्तवीत् अस्तुताम्, अस्तुवीताम् अस्तुवन्। अस्तौः, अस्तवीः अस्तुतम्, अस्तुवीतम् अस्तुत, अस्तुवीत। अस्तवम् अस्तुव, अस्तुवीव अस्तुम, अस्तुवीम। अस्तुत, अस्तुवीत अस्तुवाताम् इत्यादि। विधिलिङि स्तुयात्, स्तुवीयात् इत्यादि। आत्मनेपदे स्तोषीष्टेत्यादि। लुङि सिचि इडभावे प्राप्ते आह स्तुसुधूञ्भ्य इति। तथा च 'इट ईटि' इति सिज्लोपे सिचि वृद्धौ अस्तावीदिति फलति। अस्ताविष्टामित्यादि। 'स्तुसुधूञ्भ्यः–' इत्यत्र परस्मैपदेष्वित्यनुवृत्तेरात्मनेपदे इट् न। अस्तोष्ट अस्तोषाताम्

इटीति चानुवर्तत इत्याशयेनाह इडादावित्यादि। स्तवीतीति। 'तुरुस्तुशम्यमः–' इति ईड्वा। 'स्तुसुधूञ्भ्यः–' इत्यत्र परस्मैपदेष्वित्युक्तेः आत्मनेपदे तु नेट्। अस्तोष्ट। अस्तोषाताम्। ब्रुवः पञ्चानाम्। 'विदो लटो वा' इत्यतो लटो वेति

१–'तस्य प्रसवे याम उर्वीः' इत्यादौ वेदे प्रसवशब्दस्याभ्यनुज्ञानार्थत्वदर्शनात्।

नामादितः पञ्चानां णलादयः पञ्च वा स्युर्ब्रुवश्चाहादेशः। अकार उच्चारणार्थः। आह आहतुः आहुः। २४५१ आहस्थः। (८-२-३५) झलि परे। चर्त्वम्। आत्थ आहथुः। २४५२ ब्रुव ईट्। (७-३-९३) ब्रुवः परस्य हलादेः पित ईट् स्यात्। आत्थ इत्यत्र स्थानिवद्भावात्प्राप्तोऽयं 'झलि' इति थत्वविधानान्न भवति। ब्रवीति ब्रूतः ब्रुवन्ति। ब्रूते। आर्धधातुकाधिकारे। २४५३ ब्रुवो वचिः।

इत्यादि। ब्रूञ् व्यक्तायां वाचीति। ब्रुवः पञ्चानाम्। 'परस्मैपदानां णल-तुस्–' इत्यत उत्तरसूत्रमिदम्। 'विदो लटो वा' इत्यतो लटो वेत्यनुवर्तते, तदाह ब्रुवो लट इति। आदितः पञ्चानामिति। तिप् तस् झि सिप् थस् इत्येषामित्यर्थः। णलादयः पञ्चेति। णल् अतुस् उस् थल् अथुस् इत्येते पञ्चेत्यर्थः। उच्चारणार्थ इति। तत्प्रयोजनमात्थेत्यत्रानुपदमेव व्यक्तं भविष्यति। आहेति। ब्रूधातोर्लटस्तिपो णलि प्रकृतेराहादेशः। सिपस्थलि प्रकृतेराहादेशे आह् थ इति स्थिते हस्य ढत्वे प्राप्ते आहस्थः। आह इति षष्ठ्यन्तम्। 'झलो झलि' इत्यतो झलीत्यनुवर्तते इत्यभिप्रेत्य शेषपूरणेन सूत्रं व्याचष्टे झलि पर इति। आह् इत्यस्य थकारः स्याज्झलीति फलितम्। 'अलोऽन्त्यस्य' इत्यन्त्यस्य भवति। चर्त्वमिति। आथ् थ इति स्थिते प्रथमथकारस्य खरि चेति चर्त्वे आत्थ इति रूपमित्यर्थः। आहादेशस्य अकारान्तत्वे तु हकाराद्कारस्य थकारादेशे हस्य ढत्वे चर्त्वे आट्त्थ इति स्यदिति बोध्यम्। पञ्चानां णलाद्यभावपक्षे आह ब्रुव ईट्। 'नाभ्यस्तस्य–' इत्यतः पितीति 'उतो वृद्धिः–' इत्यतो हलीति चानुवर्तते, तदाह ब्रुवः परस्येत्यादिना। ननु आत्थेत्यत्र आहादेशस्य स्थानिवत्त्वेन ब्रूत्वात्ततः परस्य थस्य ईडागमः स्यादित्यत्र आह आत्थेत्यत्रेति। स्थानिवद्भावात् प्राप्तोऽयमीडागमो न भवतीत्यन्वयः। कुत इत्यत आह झलि थत्वविधानादिति। 'आहस्थः' इति झलि परत आहादेशस्य थत्वं विधीयते। ईटि तु सति झला-दित्वाभावात्तन्निर्विषयं स्यात्। अत आत्थेत्यत्र ईड् नेति विज्ञायत इत्यर्थः। ब्रुवन्तीति। ब्रवीषि ब्रूथः ब्रूथ। ब्रवीमि ब्रूवः ब्रूमः। लट आत्मनेपदे आह ब्रूते इति। 'ब्रुवः पञ्चानाम्–' इत्यत्र परस्मैपदानामित्यनुवृत्तेराहादेशो न। ब्रुवाते ब्रुवते। ब्रूषे ब्रुवाथे ब्रूध्वे। ब्रुवे ब्रूवहे ब्रूमहे। ब्रुवो वचिः। ब्रुवो वचिरादेशः स्यादा-

वर्तते। ब्रुव इत्येतदादिमं पञ्चम्यन्तम्, अन्तिमं तु षष्ठ्यन्तमित्याशयेनाह ब्रुवो लट इत्यादि। चर्त्वमिति। प्रक्रियालाघवाद् 'आहस्तः' इत्येव सुवचमित्याहुः। ब्रुव ईट्। हलादेः किम्, ब्रवाणि। पितः किम्, ब्रूतः। झलीति थत्वविधानादिति।

(२-४-५३) उवाच ऊचतुः ऊचुः। उवचिथ, उवक्थ। ऊचे। वक्ता। ब्रवीतु, ब्रूतात्। 'ङिच्च पिच्न' इत्यपित्त्वादीण्न। ब्रवाणि ब्रवै। ब्रूयात्। उच्यात्। 'अस्यतिवक्ति-' (सू २४३८) इत्यङ्। **२४५४ वच उम्।** (७-४-२०) अङि परे। अवोचत्, अवोचत।

अथ शास्यन्ताः परस्मैपदिनः। इङ् त्वात्मनेपदी। इण् १०४५ गतौ। एति इतः। **२४५५ इणो यण्।** (६-४-८१) अजादौ प्रत्यये परे।

र्धधातुक इत्यर्थः। इकार उच्चारणार्थः। **उवाचेति**। अकिति द्वित्वे कृते 'लिट्यभ्यासस्य-' इति संप्रसारणमिति भावः। **ऊचतुरिति**। किति द्वित्वात्प्राग् 'वचिस्वपियजादीनाम्-' इति संप्रसारणे द्वित्वे कृते हलादिशेषे सवर्णपरत्वाद् 'अभ्यासस्यासवर्णे' इत्युवङभावे सवर्णदीर्घ इति भावः। वचिरनिट्सु परिगणितः। तस्य भारद्वाजनियमात्थलि वेट्, तदाह **उवचिथ, उवक्थेति**। इडभावे 'चोः कुः' 'ब्रुव ईट्' इत्यत्र 'नाभ्यस्तस्य-' इत्यतः सार्वधातुकग्रहणस्याप्यनुवृत्तेरीड् न। ऊचथुः ऊच। उवाच, उवच ऊचिव ऊचिम। क्रादिनियमादिट्। **ऊचे इति**। ऊचाते ऊचिरे। ऊचिषे ऊचाथे ऊचिध्वे। ऊचे ऊचिवहे ऊचिमहे। **वक्तेति**। वच्यादेशे इण्निषेधः। वक्ष्यति, वक्ष्यते। **ब्रवीतु ब्रूतादिति**। ननु तिबादेशस्य तातङः पित्त्वाद् 'ब्रुव ईट्' इति ईडागमः स्यादित्यत्र आह **ङिच्चेति**। ब्रूताम् ब्रुवन्तु। ब्रूहि, ब्रूतात् ब्रूतम् ब्रूत। **ब्रवाणीति**। आटः पित्त्वेन ङित्त्वाभावाद् न गुणनिषेध इति भावः। ब्रवाव ब्रवाम। ब्रूताम् ब्रुवाताम् ब्रुवताम्। ब्रूष्व ब्रुवाथाम् ब्रूध्वमिति सिद्धवत्कृत्य आह **ब्रवै इति**। आटः पित्त्वेन ङित्त्वाभावाद् गुणः। ब्रवावहै ब्रवामहै। लङि अब्रवीत् अब्रूताम् अब्रुवन्। अब्रवीः अब्रूतम् अब्रूत। अब्रवम् अब्रूव अब्रूम। विधिलिङयाह **ब्रूयादिति**। ब्रूयातामित्यादि। आशीर्लिङयाह **उच्यादिति**। वच्यादेशे 'वचिस्वपि-' इति संप्रसारणमिति भावः। उच्यास्ताम् इत्यादि। आत्मनेपदे आशीर्लिङि वक्षीष्ट वक्षीयास्ताम् इत्यादि। अकित्वान्न संप्रसारणम्। लुङि सिचि वच्यादेशे अवच् स् त् इति स्थिते आह **अस्यतीति**। अवच् अ त् इति स्थिते **वच उम्**। शेषपूरणेन सूत्रं व्याचष्टे **अङि पर इति**। 'ऋदृशोऽङि-' इत्यतस्तदनुवृत्तेरिति भावः। मित्त्वादन्त्यादचः परः, आद्गुणः, तदाह **अवोचदिति**। अवक्ष्यत्, अवक्ष्यत।

इङ् त्विति। 'इङ् अध्ययने' इति धातुस्तु ङित्त्वादात्मनेपदीत्यर्थः। **इण् गतावित** । 'इणो यण्' इत्यादौ विशेषणार्थो णकारः। **एतीति**। शपो लुकि तिपः पित्त्वेन ङित्त्वाभावाद् गुणः। **इत इति**। अपित्त्वेन ङित्त्वान्न गुणः। इ अन्तीत्यत्र ङित्त्वाद् गुणाभावे इयङि प्राप्ते **इणो यण्**। 'अचि श्नुधातु-' इत्यतः

इयङोऽपवादः । यन्ति । इयाय । २४५६ दीर्घ इणः किति । (७-४-६९) इणोऽभ्यासस्य दीर्घः स्यात्किति लिटि । ईयतुः ईयुः । इययिथ, इयेथ । ऐत् ऐताम् आयन् । इयात् ईयात् । २४५७ एतेर्लिङि । (७-४-२४) उपसर्गात्परस्य

अचीत्यनुवृत्तस्य अङ्गाधिकारलभ्याङ्गाक्षिप्तप्रत्ययविशेषणत्वात्तदादिविधिरित्यभिप्रेत्य शेषपूरणेन सूत्रं व्याचष्टे **अजादौ प्रत्यये पर इति । इयङोऽपवाद इति ।** इयङि प्राप्ते एव तदारम्भादिति भावः । गुणवृद्धी तु परत्वादस्य बाधिके । यथा— अयनम्, आयकः । **यन्तीति** । एषि इयः इय । एमि इवः इमः । **इयायेति** । द्वित्वे सति उत्तरखण्डवृद्धौ आयादेशे 'अभ्यासस्यासवर्णे' इति इयङ् । अतुसि तु द्वित्वे कित्वाद् गुणाभावे इ इ अतुस् इति स्थिते 'इणो यण्' इत्युत्तरखण्डस्य यणि इयतुरिति स्थिते दीर्घ इणः । 'अत्र लोपः–' इत्यतः अभ्यासस्येति 'व्यथो लिटि' इत्यतो लिटीति चानुवर्तते, तदाह **इणोऽभ्यासस्येति । ईयतुरिति ।** भारद्वाजनियमात्थलि वेडिति मत्वा आह **इययिथ, इयेथेति** । ईयथुः ईय । इयाय, इयय ईयिव ईयिम । एता । एष्यति । एतु, इतात् इताम् यन्तु । इहि, इतात् इतम् इत । अयानि अयाव अयाम । **ऐदिति** । लङि तिप इकार-लोपे इकारस्य गुणे आटो वृद्धिः । **आयन्निति** । झेरन्तादेशे इकारलोपे इ अन् इति स्थिते 'इणो यण्–' इति यणि कृते तस्याभीयत्वेनासिद्धत्वादाडिति भावः । ऐः ऐतम् ऐत । आयम ऐव ऐम । विधिलिङ्याह **इयादिति** । इयाताम् इयुरित्यादि । आशीर्लिङ्याह **ईयादिति** । 'अकृत्सार्वधातुकयोः–' इति दीर्घ इति भावः । ईयास्तामित्यादि । **एतेर्लिङि** । 'उपसर्गाद्ध्रस्व ऊहतेः' इत्यत उप-सर्गाद् ह्रस्व इति, 'केऽणः' इत्यतः अण इति, 'अयङ् यि क्ङिति' इत्यतः कितीति चानुवर्तते, तदाह **उपसर्गात्परस्येत्यादि** । इह आर्धधातुके इति प्रामादिकम् ।

ईडागमे कृते झलादित्वाभावादिति भावः । **इण् गतौ । इयङोऽपवाद इति ।** येन नाप्राप्तिन्यायेनेति भावः । गुणवृद्धी तु परत्वादस्य बाधिके । अयनम् । आयकः । **दीर्घ इणः किति** । 'अत्र लोपोऽभ्यासस्य' इत्यतोऽभ्यासस्येत्यनुवर्तते । 'व्यथो लिटि' इत्यतो लिटीति च । कितीति किम्, इयाय । अत्र वदन्ति—इह दीर्घे कृतेऽपि 'अभ्यासस्यासवर्णे' इतीयङा रूपसिद्धेः कितीति व्यर्थम् । न च दीर्घस्येयङि दीर्घ-विधानं व्यर्थमिति वाच्यम्, ईयतुः ईयुरित्यत्र 'वार्णादाङ्गं बलीयः' इति यणि कृते दीर्घविधेरावश्यकत्वात् । किं च लिटीत्यनुवर्तमानमपीह व्यर्थमेव, व्यावर्त्याभावादिति । एता । एष्यति । एतु । इतात् । इताम् । यन्तु । इहि । उत्तमे तु । अयानि । अयाव । अयाम । लङ्मध्यमे ऐः । ऐतम् । ऐत । उत्तमे तु आयम् । ऐव । ऐम । **ईया-**

इयोऽयो ह्रस्वः स्यात् किति ङिति। निरियात्। 'उभयत आश्रयणे नान्तादिवत्'। अभीयात्। अणः किम्—समेयात्। 'समीयात्' इति प्रयोगस्तु औवादिकस्य। २४५८ इणो गा लुङि। (२-४-४५) 'गातिस्था-'

पूर्वसूत्रेषु तदभावादनुवृत्तेरसंभवात् किति लिङीत्येव सिद्धश्च। ङितीति तु नानुवर्तते, इण आर्धधातुकलिङो ङित्त्वाभावात्। नन्वभीयादित्यत्रापि ह्रस्वः स्यादित्यत आह उभयत इति। अत्र एकादेशस्य ईकारस्य पूर्वान्तत्वे उपसर्गानुप्रवेशादिण्धातुत्वं न संभवति। परादित्वेन इण्धातुत्वाश्रयणे तु नोपसर्गात्परत्वम्, उपसर्गैकदेशस्य इकारस्य ईकारात्मना सत्त्वेन अभ् इत्यस्य उपसर्गत्वाभावात्। एकादेशस्य आदिवत्त्वमाश्रित्य इण्धातुत्वम्, अन्तवत्त्वमाश्रित्य तस्य उपसर्गानुप्रवेशश्चेत्यपि न संभवति। पूर्वपरशब्दाभ्यां अन्तादिशब्दाभ्यां च विरोधस्य पुरस्फूर्तिकतया विरुद्धातिदेशद्वयस्य युगपदसंभवादित्यर्थः। इदं च अन्तादिवत्सूत्रे भाष्ये स्पष्टम्। न च अभ् इति भान्तस्य एकदेशविकृतन्यायेन उपसर्गत्वाद् ईकारस्य परादिवत्त्वे ह्रस्वो दुर्वार इति वाच्यम्, लक्ष्यानुसारेण क्वचिद् एकदेशविकृतन्यायानाश्रयणादिति शब्देन्दुशेखरे विस्तरः। समेयादिति। आ इयात् एयात्। समेयादित्यत्र एकारस्य अनण्त्वान्न ह्रस्वः। प्रहणकसूत्रादन्यत्र पूर्वेणैव णकारेण प्रत्याहाराश्रयणादिति भावः। तर्हि क्वचित् समीयादिति प्रयोगः कथमित्याशङ्क्याह समीयादिति प्रयोगस्तु औवादिकस्येति। 'इट किट कटी गतौ' इति प्रश्लिष्टस्य इधातोराशीर्लिङि 'अकृत्सार्वधातुकयोर्दीर्घः' इति दीर्घो बोध्य इति भावः। लुङि विशेषमाह इणो गा लुङि। इण्धातोः गा इत्यादेशः स्याल्लुङीति सूत्रार्थः स्पष्टः। अगा स् त् इति स्थिते आह गातिस्थेतीति। लृङि ऐष्यत्। इड्

दिति। 'अकृत्सार्व-' इति दीर्घः। एतेर्लिङि। इहार्धधातुक इति स्वरूपकथनार्थं प्रक्षिप्तम्, किति लिङीत्येतावतैवेष्टसिद्धेः। उभयत आश्रयण इति। अन्तादिशब्दाववयवविशेषवाचिनौ। तत्र यदि पूर्वस्यावयवबुद्ध्या एकादेश आश्रीयते तदा तस्यैव परस्य कथमादिवद्भावः स्यात्। एवं परस्यादिवत्त्वे पूर्वस्यान्तवद्भावो न स्यादेकस्योभयापेक्षया पारतन्त्र्यविरोधादिति भावः। नन्वेवं रामौ इत्यस्य 'सुप्तिङन्तम्-' इति पदत्वं न स्यात्, परादित्वे रामेति प्रकृतेरभावात्। 'यस्मात्प्रत्ययविधिस्तदादे-स्तदन्तस्य ग्रहणम्' इति स्वीकाराद्राम इत्यस्य प्रकृतित्वात्, पूर्वान्तत्वे तु परत्र प्रत्ययाभावात्। अत्राहुः—पूर्वं पदसंज्ञा पश्चादेकादेश इति नोक्तदोषः। इह च ज्ञापकं 'सुपिसूतिसमाः' इति। विध्यादौ समीयादिति न भवत्येव। आशीर्लिङि तु 'अकृत्सार्व-' इति दीर्घे कृतेऽपि ह्रस्वत्वेन भाव्यमित्याशङ्क्याह औवादिकस्येति। इटकिटकटीत्यत्र

(सू २२२३) इति सिचो लुक्। अगात् अगाताम् अगुः। इङ् १०४६ अध्ययने। नित्यमधिपूर्वः। अधीते अधीयाते अधीयते। २४५६ गाङ् लिटि। (२-४-४९) इङो गाङ् स्याल्लिटि लावस्थायां विवक्षिते वा। अधिजगे अधिजगाते अधिजगिरे। अध्येता। अध्येष्यते। अध्यये। गुणायादेशयोः कृतयोरुपसर्गस्य यण्। 'पूर्वं धातुरुपसर्गेण–' इति दर्शनेऽन्तरङ्गत्वाद् गुणात्पूर्वं

अध्ययन इति। अधिरुपरिभावे। उपरिभावश्च पठने नियमपूर्वकत्वमिति भूवादिसूत्रे भाष्ये स्पष्टम्। नित्यमधिपूर्व इति। धातुपाठे वचनमिदम्। अधीते इत्यत्र धातुरुपसर्गं न व्यभिचरतीति भूवादिसूत्रे भाष्ये। अधीत इति। 'सार्वधातुकमपित्' इति ङित्वाद् गुणनिषेधे सवर्णदीर्घः। अजादौ तु इयङ्, तदाह अधीयाते अधीयते इति। अधीषे अधीयाथे अधीध्वे। अधीये अधीवहे अधीमहे। गाङ् लिटि। इङ इति। 'इङश्च' इत्यतस्तदनुवृत्तेरिति भावः। स्थानिवत्त्वादेव ङित्वे सिद्धे ङित्करणं 'गाङ्कुटादिभ्यः–' इत्यत्र 'इणो गा लुङि' इत्यस्य ग्रहणाभावार्थमिति भाष्यम्। ननु कृते गाङादेशे द्वित्वे अभ्यासजश्त्वे आल्लोपे अधिजगे इति रूपं वक्ष्यति। तदयुक्तम्, 'द्विर्वचनेऽचि' इति गाङादेशनिषेधाद् गाङादेशात् प्रागेव द्वित्वे सति उत्तरखण्डस्य गादेशे अधीगे इति रूपापत्तेरित्यत आह लावस्थायां विवक्षित वेति। तत्र लावस्थायामिति वार्तिकमते गाङादेशात् प्रागेव 'द्विर्वचनेऽचि' इति सूत्रं न प्रवर्तते, द्वित्वनिमित्ताचोऽभावात्। विवक्षिते इति भाष्यमते तु सुतरां 'द्विर्वचनेऽचि' इति न प्रवर्तते, अनैमित्तिकत्वादिति भावः। अधिजगिरे इति। अधिजगिषे अधिजगाथे अधिजगिध्वे। अधिजगे अधिजगिवहे अधिजगिमहे। लोटि अधीताम् अधीयाताम् अधीयताम्। अधीष्व अधीयाथाम् अधीध्वम् इति सिद्धवत्कृत्य आह अध्ययै इति। तत्र प्रक्रियां दर्शयति गुणायादेशयोरिति। 'पूर्वं धातुः साधनेन युज्यते पश्चादुपसर्गेण' इति 'सुट्कात्पूर्वः' इति सूत्रसिद्धान्तादिति भावः। तथा च इट एत्वे आटि वृद्धौ अधि इ ऐ इति स्थिते गुणे अयादेशे यणिति फलितम्। ननु 'पूर्वं धातुरुपसर्गेण युज्यते पश्चात्साधनेन' इत्यपि पक्षः 'सुट्कात्पूर्वः' इति सूत्रभाष्ये स्थितः। तथा च अधि इ ऐ इति स्थिते पूर्वं सवर्णदीर्घे सति गुणायादेशयोः कृतयोः अधयै

प्रश्लिष्टस्य इधातोराशीर्लिङि इदं रूपम्। वी गतीत्यत्र ईकारोऽपि धात्वन्तरं प्रश्लिष्यत इति मते तु विध्यादिलिङ्यपि भवत्येवेति बोध्यम्। गाङ् लिटि। लावस्थायामिति। वार्तिकमते तु एकादेशात्प्रागेव गाङादेशे 'द्विर्वचनेऽचि' इति सूत्रं न प्रवर्तते द्वित्वनिमित्ताचोऽभावात्। विवक्षित इति। भाष्यमते तु सुतरां न प्रवर्तते, अनै-

सवर्णदीर्घः प्राप्तः। 'णेरध्ययने वृत्तम्' (सू ३०६६) इति निर्देशान्न भवति। अध्यैत। परत्वादियङ्, तत आट्, वृद्धिः, अध्यैयाताम् अध्यैयत। अध्यैयि अध्यैवहि अध्यैमहि। अधीयीत अधीयीयाताम्। अधीयीध्वम्। अधीयीय। अध्येषीष्ट। २४६७ विभाषा लुङ्लृङोः। (२-४-५०) इङो गाङ् वा

इति स्यादित्याशङ्क्य निराकरोति **पूर्वं धातुरिति**। साधनेनेत्यस्य कारकबोधकेनेत्यर्थः, प्रत्ययेनेति यावत्। दर्शन इत्येतस्य मते इत्यर्थः। 'पूर्वं धातुरुपसर्गेण युज्यते पश्चात्साधनेन' इति पक्षे पूर्वप्रवृत्तिकत्वेन अन्तरङ्गत्वात् 'सार्वधातुकार्धधातुकयोः' इति गुणं बाधित्वा सवर्णदीर्घः प्राप्तो न भवतीत्यन्वयः। कुत इत्यत आह **णेरध्ययने वृत्तमिति निर्देशादिति**। अन्यथा ल्युटि अनादेशे अधि इ अन इति स्थिते पूर्वं सवर्णदीर्घे ततो गुणायादेशयोः कृतयोः अधयनमिति प्रसङ्गादिति भावः। वस्तुतस्तु पूर्वं धातुः साधनेन युज्यते इत्येव भाष्यसम्मतम्, पूर्वं धातुरुपसर्गेण, नैतत्सारमिति भाष्योक्तेरित्यन्यत्र विस्तरः। अध्ययावहै अध्ययामहै। लङ्याह **अध्यैतेति**। अधि आ इ त इति स्थिते 'आटश्च' इति वृद्धौ यणीति भावः। अधि इ आतामिति स्थिते आटि वृद्धौ यणि अध्यैतामिति प्राप्ते आह **परत्वादियङिति**। आटः प्रागेव परत्वादिकारस्य इयङि तत आटि वृद्धौ यणि अध्यैयातामिति रूपमित्यर्थः। **अध्यैयतेति**। 'आत्मनेपदेष्वनतः' इत्यदादेशः। अध्यैथाः अध्यैयाथाम् अध्यैध्वम् इति सिद्धवत्कृत्याह **अध्यैयि अध्यैवहि अध्यैमहीति**। विधिलिङ्याह **अधीयीतेति**। अधि इ त इति स्थिते सीयुटि सुटि सलोपे यलोपे अधि इ इत इति स्थिते धातुभूतस्य इकारस्य इयङि सवर्णदीर्घे इति भावः। **अधीयीयातामिति**। अधि इ आतामिति स्थिते सीयुटि सुटि सलोपे अधि इ ईयातामिति स्थिते धातुभूत इकारस्य इयङि सवर्णदीर्घ इति भावः। झस्य रन्भावे सीयुटि सकारयकारलोपे अधि इ ई रन् स्थिते धातुभूतस्य इकारस्य इयङि सवर्णदीर्घे अधीयीरन्, अधीयीथाः, अधीयीयाथाम् इति सिद्धवत्कृत्य आह **अधीयीध्वमिति**। ध्वमि सीयुटि सलोपे यलोपे अधि इ ई ध्वमिति स्थिते इङ इयङि सवर्णदीर्घे इति भावः। **अधीयीयेति**। इटोऽत् सीयुट् सलोपः। अधि इ ईय इति स्थिते इङ इयङि सवर्णदीर्घ इति भावः। अधीयीवहि अधीयीमहि। आशीर्लिङ्याह **अध्येषीष्टेति**। सीयुटि गुणः, यण् षत्वम्। अध्येषीयास्ताम् अध्येषीरन्। अध्येषीष्ठाः अध्येषीयास्थाम् अध्ये-

मिश्रितत्वादिति भावः। **निर्देशान्न भवतीति**। 'वार्णादाङ्गं बलीयः' इति समाधानं तु न प्रवर्तते, व्याश्रयत्वादिति भावः। **अध्यैयतेति**। 'आत्मनेपदेष्वनतः' इति

स्यात्। २४६१ **गाङ्कुटादिभ्योऽञ्णिन्ङित्।** (१-२-१) गाङादेशा-त्कुटादिभ्यश्च परेऽञ्णितः प्रत्यया ङितः स्युः। २४६२ **घुमास्थागापाजहातिसां हलि।** (६-४-६६) एषामात ईत्स्याद् हलादौ क्ङित्यार्धधातुके। अध्यगीष्ट, अध्यैष्ट। अध्यगीष्यत, अध्यैष्यत। इक् १०४७ स्मरणे। अयमप्य-

---

षीढ्वम्। अध्येषीय अध्येषीवहि अध्येषीमहि। लुङि आटि अधि आ इ त इति स्थिते **विभाषा लुङ्लृङोः।** शेषं पूरयति **इङो गाङ् वा स्यादिति।** 'इङश्च' इत्यतो 'गाङ् लिटि' इत्यतश्च तदनुवृत्तेरिति भावः। सिचि अधि अ गा स् त इति स्थिते **गाङ्कुटादिभ्यो।** ञ्च णच ञ्णौ, तौ इतौ यस्य स ञ्णित्, स न भवतीत्यञ्णित्। गाङ् च कुटादयश्चेति द्वन्द्वात्पञ्चमी। गाङिति ङकारा-नुबन्धाद् 'इणो गा लुङि' इत्यस्य न ग्रहणमित्युक्तम्। नापि 'गाङ् गतौ' इत्यस्यात्र ग्रहणम्, तत्र ङकारस्यात्मनेपदप्रापणेन चरितार्थत्वात्। इङादेशस्य गाङो ङकारो नात्मनेपदप्रापणेन चरितार्थः, स्थानिवत्त्वेनैव तत्सिद्धेः, तदाह **गाङादेशादिति।** एवं च सिचः ङित्त्वे आह **घुमास्था।** 'षो अन्तकर्मणि' इत्यस्य कृतात्वस्य निर्देशः। घु मा स्था गा पा जहाति सा एषां द्वन्द्वात्षष्ठी। 'आर्धधातुके' इत्यधि-कृतम्। 'आतो लोप इटि च' इत्यत आत इति 'ईद्यति' इत्यत ईदिति 'अनुदात्तो-पदेश—' इत्यतः क्ङिति इति चानुवर्तते, तदाह **एषामित्यादिना।** अध्यगी-

---

झस्य अन्। लङ् मध्यमे तु अध्यैथाः। अध्यैयाथाम्। अध्यैध्वम्। **अध्येषीष्टेति।** लिङः सीयुट्। अध्येषीयास्ताम्। अध्येषीरन्। **गाङ्कुटादिभ्यो।** इह गाङ् गतावित्यस्य न ग्रहणम्, तदर्थतया ङकारानुबन्धस्य तत्र चरितार्थत्वात्। आदेश-ङकारस्तु अचरितार्थः, स्थानिवद्भावेनैव तङः सिद्धत्वादत आह **गाङादेशादिति।** कुटादिस्तुदाद्यन्तर्गणः। केचित्तु कुट आदिर्येषां ते कुटादयः, कुटस्य आदिः कुटादिः; कुटादिश्च कुटादयश्च कुटादय इति समासद्वयमाश्रित्य कुटपूर्वस्य लिखधातोरपि ग्रहणाल्लिखनमिति प्रयोगः सिद्ध इत्याहुः। तच्च 'रलो व्युपधात्—' इति सूत्रस्थेन लिखित्वा लेखित्वा लिलिखिषति लिलेखिषति इति वृत्तिग्रन्थेन, 'शकुनिष्वालेखने' इति सौत्रप्रयोगेण च विरुध्यते। अञ्णिदिति किम्, घञि कोटः। पोटः। णलि चुकोट। पुपोट। **घुमास्था।** 'दीङो युडचि—' इत्यतः क्ङितीत्यनुवर्तते। आर्ध-धातुक इति चाधिक्रियत एव। क्ङिति किम्, दाता। धाता। हलादौ किम्, ददतुः। ददुः। अन्यथा आतो लोपात्परत्वादीत्वं स्यात्। आर्धधातुके किम्, मातः। माथः। **अध्यगीष्टेति।** सिचो ङित्त्वादीत्वम्। **इक् स्मरणे।** ककार इह 'इणवदिकः' इति विशेषणार्थः। एरित्युक्ते तु इट किट कटीत्यत्र प्रश्लिष्टस्य ईधातोरपि ग्रहणं स्यादि-

धिपूर्वः । 'अधीगर्थदयेशाम्-' (सू ६१३) इति लिङ्गात्। अन्यथा हि 'इगर्थ-' इत्येव ब्रूयात् । 'इण्वदिक इति वक्तव्यम्' (वा १२०७)। अधियन्ति । अध्यगात् । केचित्तु आर्धधातुकाधिकारोक्तस्यैवातिदेशमाहुः, तन्मते

ष्टेति । अधि अ गा स् त इत्यत्र आकारस्य ईकारे यणि सिचः षत्वे तकारस्य ष्टुत्वेन ट इति भावः । 'गातिस्था-' इति न सिज्लोपः, परस्मैपदाभावात् । अध्यगीषाताम् अध्यगीषत । अध्यगीष्ठाः अध्यगीषाथाम् अध्यगीढ्वम् । अध्यगीषि अध्यगीष्वहि अध्यगीष्महि । गाङभावपक्षे आह अध्यैष्टेति । अधि आ इ स् त इति स्थिते इकारस्य गुणे आटो वृद्धौ यणि षत्वष्टुत्वे इति भावः । अध्यैषाताम् अध्यैषत । अध्यैष्ठाः अध्यैषाथाम् अध्यैढ्वम् । 'धि च' इति सलोपः । अध्यैषि अध्यैष्वहि अध्यैष्महि । लृङ्याह अध्यगीष्यतेति । 'विभाषा लुङ्लृङोः' इति गाङादेशे स्ये तस्य 'गाङ्कुटादिभ्यः-' इति ङित्वे 'घुमास्था-' इति ईत्वे अटि यणि षत्वमिति भावः । अध्यगीष्येतामित्यादि । गाङभावपक्षे आह अध्यैष्यतेति । अध्यैष्येतामित्यादि । इक् स्मरणे । अयमपीति । इङ्धातुवदयमपि धातुर्नित्यमधिपूर्वक इत्यर्थः । ननु धातुपाठे इङमधिकृत्य नित्यमधिपूर्व इति वचनाद् भूवादिसूत्रभाष्याच्च इङो नित्यमधिपूर्वकत्वं युक्तम् । अस्य तु तथात्वे किं प्रमाणमित्यत आह अधीगर्थेति । तत्र हि अधीगर्थेत्यनेन स्मरणार्थकधातुर्विवक्षितः । इग्धातोरधिपूर्वकत्वाभावेऽपि स्मरणार्थकत्वे इगर्थेत्येतावतैव स्मरणार्थकधातुलाभात् तत्र अधीति व्यर्थं स्यात् । अत इग्धातुरयं नित्यमधिपूर्वक एव स्मरणार्थक इति विज्ञायत इत्यर्थः । इणवदिक इति । षष्ठ्यन्ताद्वतिः । इणो यत् कार्यम् 'इणो यण्' इत्यादि, तद् इको भवतीत्यर्थः । अध्येति, अधीत इति सिद्धवत्कृत्य आह अधियन्तीति । अन्तादेशे इयङपवादः । 'इणो यण्' इति यणिति भावः । अध्येषि अधीथः अधीथ । अध्येमि अधीवः अधीमः । अधीयाय । अतुसि तु द्वित्वे कृते अधि इ इ अतुस् इति स्थिते 'इणो यण्' इति द्वितीयस्य इकारस्य यणि प्रथमस्य इकारस्य 'दीर्घ इणः किति' इति दीर्घे सवर्णदीर्घे, अधीयतुः अधीयुः । अधीययिथ, अधीयेथ अधीयथुः अधीय । अधीयाय, अधीयय अधीयिव अधीयिम । अध्येता । अध्येष्यति । अध्येतु, अधीतात् अधीताम् अधियन्तु । अधीहि, अधीतात् अधीतम् अधीत । अध्ययानि अध्ययाव अध्ययाम । अध्यैत् अध्यैताम् अध्यायन् । अध्यैः अध्यैतम् अध्यैत । अध्यायम् अध्यैव अध्यैम—इति सिद्धवत्कृत्य लुङ्याह अध्यगादिति । इणवत्त्वाद् 'इणो गा लुङि' इति गादेशे 'गातिस्था-' इति सिचो

त्याहुः । केचित्त्विति । आर्धधातुकाधिकारे वार्तिकपाठात्तदधिकारोक्तानामेव कार्या-

यण्‌। तथा च भट्टिः- 'सलीलयो राघवयोरधीयन्' इति। वी १०४८ गतिव्याप्तिप्रजनकान्त्यसनखादनेषु। प्रजनं गर्भग्रहणम्। असनं क्षेपणं। वेति वीतः वियन्ति। वेषि। वेमि। वीहि। अवेत् अवीताम् अवियन्। अडागमे सत्यनेकाच्त्वाद्यणिति केचित्। अव्यन्। अत्र ईकारोऽपि धात्वन्तरं प्रश्लिष्यते।

लुका लुप्तत्वाद् 'घुमास्था--' इति ईत्वं न। अध्यगाताम्। अध्यगाम् अध्यगात। अध्यैष्यत्। केचित्त्विति। आर्धधातुके इत्यधिकारे 'इणो गा लुङि' इति सूत्रे एतद्वार्तिकपाठस्य भाष्ये दर्शनात्तदधिकारोक्तानामेव कार्याणामुपस्थितत्वादिति भावः। तन्मते यण् नेति। 'इणो यण्' इत्यस्य आर्धधातुकाधिकारस्थत्वाभावान्नातिदेश इत्यर्थः। तेन झोऽन्तादेशे इयङि सवर्णदीर्घे अधीयन्तीत्याद्यूह्यम्। राघवयोरधीयन्निति। 'अधीगर्थ-' इति षष्ठी। राघवौ स्मरन्नित्यर्थः। अधिपूर्वाद् इणधातोर्लटः शतरि शपो लुकि इकारस्य इयङि सवर्णदीर्घे अधीयदिति शत्रन्तात् सुबुत्पत्तौ सौ रूपम्। वी गतीति। 'अजेर्व्यघञपोः' इति सूत्रभाष्यरीत्या अस्य आर्धधातुके नास्ति प्रयोग इति शब्देन्दुशेखरे स्थितम्। वियन्तीति। एकाच्त्वाद्यणभावादियङिति भावः। लोटि वेतु, वीतात् वीताम् वियन्तु-इति सिद्धवत्कृत्याह वीहीति। हेरपित्त्वेन ङित्त्वान्न गुण इति भावः। वीतात् वीतम् वीत। वयानि वयाव वयाम। लङ्याह अवेदिति। अवियन्निति। वी अन् इति स्थिते परत्वादडागमात् प्रागियङि कृते अडागम इति भावः। मतान्तरमाह अडागमे सतीति। लावस्थायामडिति पक्षे इयङं बाधित्वा अनेकाच्त्वाद् यणि अव्यन्निति केचिदाहुरित्यर्थः। केचिदित्यस्वरसं सूचयति। तद्बीजं तु कृतेऽप्यटि यणि कर्तव्ये आभीयतया अटोऽसिद्धत्वादनेकाच्त्वाभावाद्यणभावादियङेवोचित इति शब्देन्दुशेखरे विस्तरः। अत्रेति। वी ई इति

णामुपस्थितत्वादतिदेश इति भावः। अधीयन्निति। स्मरन्नित्यर्थः। राघवयोरित्यत्र 'अधीगर्थदयेशां कर्मणि' इति षष्ठी। वी गति। अवियन्निति। अडागमात् परत्वादियङ्। अडागमे सतीति। कृताकृतप्रसङ्गित्वमात्रेण अटो नित्यत्वादिति भावः। अतएवापरितोषात् 'असिद्धवदत्राभात्' इति समानाश्रये यणि कर्तव्ये अटोऽसिद्धत्वादियङेवोचित इत्याशयेन वा केचिदित्युक्तम्। लावस्थायामेवाडागम इति पक्षे तु यणेवेति बोध्यम्। ईकारोऽपीति। प्रयुञ्जते च 'न हि तरणिरुदीते दिक्पराधीनवृत्तिः' इति, व्याख्यातं च मनोरमायाम्-कर्मव्यतिहारे तङ्। न च 'न गतिर्हिंसार्थेभ्यः' इति निषेधः शङ्क्यः, उत्पूर्वस्याविर्भावार्थत्वादिति। अत्र वदन्ति---व्यतिशब्दं विना कर्मव्यतिहारकल्पनं क्लेशावहम्। परकीयकर्म च कर्मव्यतिहारेऽपेक्ष्यते तच्चात्र नोपात्तम्। परस्परकरणं तु न संभवत्येव। ततश्चोदीते इति भावे

एति इतः इयन्ति । ईयात् । ऐषीत् । या १०४९ प्रापणे । प्रापणमिह गतिः । प्रणियाति । यातः यान्ति । २४६३ लङः शाकटायनस्यैव । (३-४-१११) आदन्तात्परस्य लङो झेर्जुस् वा स्यात् । अयुः, अयान् । यायात् यायाताम् । यायास्ताम् । अयासीत् । वा १०५० गतिगन्धनयोः । गन्धनं सूचनम् । भा १०५१ दीप्तौ । ष्णा १०५२ शौचे । श्रा १०५३ पाके । द्रा १०५४ कुत्सायां गतौ । प्सा १०५५ भक्षणे । पा १०५६ रक्षणे । पायास्ताम् । अपासीत् । रा १०५७ दाने । ला १०५८ आदाने । 'द्वावपि दाने' इति चन्द्रः । दाप् १०५९ लवने । प्रणिदाति, प्रनिदाति । दायास्ताम् । अदासीत् । ख्या १०६० प्रकथने । अयं सार्वधातुकमात्रविषयः । 'सस्थानत्वं नमः ख्यात्रे' (वा १२११)

सवर्णदीर्घे वी गतीति निर्देश इति भावः । **ईयादिति** । विधिलिङि आशीर्लिङि च रूपमिदं समानम् । 'स्कोः–' इति सलोपः । तत्र विधिलिङि ईयातामित्यादि, आशीषि तु ईयास्तामित्यादि, इति विशेषः । **ऐषीदिति** । सिचि वृद्धिः । **या प्रापण इति** । ननु गच्छतीत्यर्थे यातीति कथमित्यत आह **प्रापणमिह गतिरिति** । णिजर्थस्त्वविवक्षित इति भावः । **प्राणियातीति** । 'नेर्गद–' इति णत्वम् । ययौ । याता । यास्यति । यातु । अयात् अयाताम् । **लङः शकटायनस्यैव** । 'झेर्जुस्' इति 'आतः' इति चानुवर्तते, तदाह **आदन्तादिति** । **जुस् वेति** । शाकटायनग्रहणाद्विकल्पलाभ इति भावः । एवकारस्तु 'लिट् च' 'लिङाशिषि' इत्युत्तरार्थ इति भाष्ये स्पष्टम् । न च 'लोटो लङ्वत्' इत्यतिदेशाद् यान्तु इत्यत्रापि जुस्विकल्पः शङ्क्यः, 'नित्यं ङितः' इत्यतो ङित इत्यनुवृत्त्यैव सिद्धेर्लङ्ग्रहणस्य लङ्वद्भावमादाय प्रवृत्तिनिवारणार्थत्वात् । इदमपि भाष्ये स्पष्टम् । **अयानिति** । जुसभावे रूपम् । अयासीत् । ष्णाधातुः षोपदेशः । नस्य षत्वेन णत्वनिर्देशः । स्नाति । स्नायात्, स्नेयात् । **पा रक्षणे** । 'एर्लिङि' इति सूत्रे 'गातिस्था–' इत्यत्र च पिबतेरेव ग्रहणादेत्त्वसिज्लुकौ न, तदाह **पायास्ताम्** । **अपासीदिति** । **दाप् लवने** । घुत्वाभावात् 'शेषे विभाषा' इति णत्वविकल्पं मत्वाह **प्रणिदाति, प्रनिदातीति** । घुत्वाभावादाशीर्लिङि एत्वम्, लुङि लुक् च नेति मत्वाह **दायास्तामिति** । **अदासीदिति च** । **ख्या प्रकथने** । **अयं सार्वधातुकमात्रविषय इति** । मात्रशब्दोऽवधारणे । सार्वधातु वास्य ख्याधातोः प्रयोगः, न त्वार्धधातुक इत्यर्थः । कुत इत्यत आह **सस्थानत्वमिति** । 'चक्षिङः

निष्ठा ज्ञेया । तथा चोदये दिक्पराधीनवृत्तिस्तरणिर्नेत्यर्थः सुगम इति । **प्रणिदातीति** । 'शेषे विभाषा–' इति णत्वविकल्पः । **अदासीदिति** । अघुत्वान्न सिज्लुक् । **नमः**

इति वार्तिकं तद्भाष्यं चेह लिङ्गम्। सस्थानो जिह्वामूलीयः, स नेति ख्याञादेशस्य क्शादित्वे प्रयोजनमित्यर्थः। 'संपूर्वस्य ख्यातेः प्रयोगो न' इति न्यासकारः। प्रा १०६१ पूरणे। मा १०६२ माने। अकर्मकः। 'तनौ ममुस्तत्र न कैटभद्विषः' इति माघः। उपसर्गवशेनार्थान्तरे तु सकर्मकः। 'उदरं परि-

---

ख्यान्' इति सूत्रे ख्यास्थाने 'क्शान्' इति वक्तव्यम्। अस्य शकारस्य पूर्वत्रासिद्धमित्यधिकारे यकारो वक्तव्य इत्युक्त्वा 'प्रयोजनं सौप्रख्ये लुग्विधिः' इत्युपक्रम्य 'सस्थानत्वं नमः ख्यात्रे' इत्युक्तं वार्तिके। तत्र नञमध्याहृत्य नमः ख्यात्रे इति सस्थानत्वं न भवतीति व्याख्यातं भाष्ये। तदिदं वार्तिकं भाष्यं च ख्याधातोरस्य सार्वधातुके एव प्रयोग इत्यत्र ज्ञापकमित्यर्थः। तत्र सस्थानपदं व्याचष्टे **सस्थानो जिह्वामूलीय इति**। प्राचीनाचार्यसमयादिति भावः। **स नेति**। स जिह्वामूलीयो 'नमः ख्यात्रे' इत्यत्र न भवतीत्येतत् ख्याञादेशस्य क्शादित्वविधौ शस्य यत्वविधौ च प्रयोजनमित्यर्थः। **क्शादित्व इति**। यत्वविधावित्यस्याप्युपलक्षणम्। शकारस्थानिकयत्वस्यासिद्धत्वात्। 'शर्परे विसर्जनीयः' इति विसर्जनीय इष्टः सिध्यति, जिह्वामूलीयस्त्वनिष्टो न भवतीति भाष्यवार्तिकहृदयम्। ख्याधातोरस्यार्धधातुकेऽपि प्रयोगसत्त्वे तु तृजन्ते ख्यातृशब्दे यकारस्य शकारस्थानिकत्वाभावाद् असिद्धत्वाभावात् 'शर्परे विसर्जनीयः' इत्यस्याप्रवृत्तौ 'कुप्वोः—' इति जिह्वामूलीयो दुर्वारः स्यात्। ततश्चार्धधातुके सर्वत्र न ख्याधातोः प्रयोग इति विज्ञायते, ज्ञापकस्य सामान्यापेक्षत्वादिति भावः। **संपूर्वस्येति**। सार्वधातुकेऽपीति भावः। अत्र व्याख्यानमेव शरणम्। एवं च संख्याति इत्यादि नास्तीति फलितम्। संख्यादिशब्दास्तु ख्याञादेशस्यैति बोध्यम्। **मा मान इति**। माने परिमितिरिति भावः, तदाह **अकर्मक इति**। माति घृतं पात्रेऽस्मिन्निति उदाहरणम्। परिमितं भवतीत्यर्थः, संगृहीतं भवतीति यावत्। अत्रार्थे शिष्टप्रयोगसंवादं दर्शयति **तनौ ममुस्तत्रेति**। 'तनौ ममुस्तत्र न कैटभद्विषस्तपोधनाभ्यागमसंभवा मुदः' इति माघकाव्ये। तपोधनस्य—नारदस्य, अभ्यागमेन—आगमनेन, संभवा मुदः—संतोषाः, कैटभद्विषः—श्रीकृष्णस्य, तनौ—शरीरे, न ममुः—परिमिता न बभूवुः, आधिक्यात्त संगृहीता बभूवुरिति यावत्। **अर्थान्तरे त्विति**। परिच्छेदे

ख्यात्रे इति। यद्ययमार्धधातुकेऽपि प्रयुज्येत तर्हि तृजन्तेऽस्मिन्परे 'शर्परे विसर्जनीयः' इत्यस्याप्रवृत्त्या कुप्वोरिति जिह्वामूलीयो दुर्वारः स्यादेवेति तद्भावः। क्शादित्वे प्रजोजनमित्ति वार्तिककाराणुक्तिर्व्याकुप्येतेति भावः। **संपूर्वस्येत्यादि**। संख्यातीत्यादिप्रयोगो नास्त्येव। संख्येति प्रयोगस्तु ख्याञादेशस्येति न्यासकाराशयः।

माति मुष्टिना'। 'नेर्गद-' (सू २२८५) इत्यत्र नास्य ग्रहणम्। प्रणिमाति, प्रनिमाति। वच १०६३ परिभाषणे। वक्ति वक्तः। अयमन्तिपरो न प्रयुज्यते। बहुवचनपर इत्यन्ये। झिपर इत्यपरे। वग्धि। वच्यात्। उच्यात्। अवोचत्। विद १०६४ ज्ञाने। **२४६४ विदो लटो वा।** (३-४-८३) वेत्तेर्लटः परस्मैपदानां णलादयो वा स्युः। वेद विदतुः विदुः। वेत्थ विदथुः

त्वित्यर्थः। **उदरमिति**। 'उदरं परिमाति मुष्टिना कुतुकी कोऽपि दमस्वसुः किमु' इति नैषधकाव्ये। कोऽपि कुतुकी दमस्वसुः-दमयन्त्याः, उदरं मुष्टिना परिमाति किमु परिगृह्णातीत्यर्थः। **नास्य ग्रहणमिति**। घुप्रकृतिमाङिति भाष्यादिति भावः। एवं च 'शेषे विभाषाऽकखादौ-' इति णत्वविकल्प इति मत्वाह **प्रणिमाति, प्रनिमातीति**। ममौ। ममिथ, ममाथ। ममिव। माता। मास्यति। मातु। अमात्। अमासीत्। अमास्यत्। **वच परिभाषणे**। अनिट्। **अयमन्तीति**। लटि प्रथमपुरुषबहुवचनं नास्तीत्यर्थः। **बहुवचनपर इति**। न प्रयुज्यत इति शेषः। अस्मिन् पक्षे पुरुषत्रये बहुवचनं नास्ति। **झिपर इति**। न प्रयुज्यत इति शेषः। अस्मिन् पक्षे लिडादिष्वपि बहुवचनं नास्तीति भावः। तत्र लिटि अकिति 'लिट्यभ्यासस्य-' इति संप्रसारणम्, उवाच। किति तु 'वचिस्वपि-' इति संप्रसारणम्, ऊचतुः। उवचिथ, उवक्थ। ऊचिव। वक्ता। वक्ष्यति। वक्तु। अवक्। **वच्यादिति** विधिलिङि रूपम्। आशीर्लिङि 'वचिस्वपि-' इति संप्रसारणं मत्वाह **उच्यादिति**। **अवोचदिति**। लुङि 'अस्यतिवक्ति-' इति च्लेरङि 'वच उम्' इति भावः। **विद ज्ञान इति**। अनिट्सु लुग्विकरणस्याग्रहणाद् अयं सेट्। **विदो लटो वा**। 'परस्मैपदानां णलतुस्-' इत्यादिसूत्रमनुवर्तते। विद इति पञ्चमी, तदाह **वेत्तेर्लट इति**। विन्दतिविद्यत्योस्तु शेन श्यना च व्यवधानान्न नैते आदेशाः।

मा माने। **नास्येति**। घुप्रकृतिमाङ् इति पाठाद् ङितामेव तत्र ग्रहणम्, ततश्च 'शेषे विभाषा-' इति विकल्प एव प्रवर्तत इत्याह **प्रणिमाति। प्रनिमातीत्यादि**। **वच** परिभाषणे उवाच। वक्ता। वक्ष्यति। वक्तु। वक्तात्। अवक्। अवक्ताम्। **अयमन्तिपर इति**। तथा च वचन्ति, वक्ष्यन्ति, वचन्तु, अवचन्, अवोचन्, अवक्ष्यन्नित्येतेऽसाधवः। **बहुवचनपर इति**। अस्मिन् पक्षे लटि मध्यमे वक्थ। उत्तमे तु वच्मः। लिटि ऊचुः। मध्यमे ऊच। उत्तमे तु ऊचिम। लुटि वक्तारः। लिङि उच्यासुः, वच्यासुरित्यादयोऽप्यसाधवः। **झिपर इति**। अस्मिंस्तु पक्षे वक्थ, वच्मः, ऊच, ऊचिमेत्यादयः साधव इति दिक्। **विदो लटो वा**। पञ्चमीयं न तु षष्ठी, तेन विद्यतिविन्दत्योरव्यवहितपरस्य

विद। वेद विद्व विद्म। पक्षे वेत्ति वित्त इत्यादि। विवेद विविदतुः 'उषविद-' (सू २३४१) इत्याम्पक्षे विद इत्यकारान्तनिपातनान्न लघूपधगुणः। विदाञ्चकार। वेदिता। २४६५ विदांकुर्वन्त्वित्यन्यतरस्याम्। (३-१-४१) वेत्तेर्लोट्याम् गुणाभावो लोटो लुक् लोडन्तकरोत्यनुप्रयोगश्च वा निपात्यते। पुरुषवचने न विवक्षिते, इतिशब्दात्। २४६६ तनादिकृञ्भ्य उः। (३-१-७९) तनादेः कृञश्च उप्रत्ययः स्यात्। शपोऽपवादः। तनादित्वादेव सिद्धे कृञ्ग्रहणं गणकार्यस्यानित्यत्वे लिङ्गम्। तेन 'न विश्वसेदविश्वस्तम्' इत्यादि

इत्यादीति। विदन्ति। वेत्सि वित्थः वित्थ। वेद्मि विद्वः विद्मः। **विविदतुरिति**। विविदुः। विवेदिथ विविदथुः विविद। विवेद विविदिव विविदिम। **आम्पक्ष इति**। न लघूपधगुण इत्यन्वयः। कुत इत्यत आह **अकारान्तनिपातनादिति**। 'उषविद-' इति सूत्रे विदेरकारान्तत्वम् आम्संनियोगेन निपात्यत इत्यर्थः। आमि अतो लोपः। तस्य स्थानिवत्त्वाद् न लघूपधगुण इति भावः। **वेदितेति**। वेदिष्यतीत्यपि ज्ञेयम्। **विदांकुर्वन्त्वित्यन्यतरस्याम्**। 'कृञ् चानुप्रयुज्यते लिटि' इत्युत्तरमिदं सूत्रम्। इतिशब्दः प्रकारे। एवंजातीयकं वैकल्पेन प्रत्येतव्यमित्यर्थः। **वेत्तेरिति**। लुग्विकरणाद् विदधातोः लोटि परे आम्प्रत्ययो निपात्यत इत्यर्थः। **लोडन्तेति**। आमन्ताद्विदेः लोडन्तकृञ्धातोः अनुप्रयोगश्च निपात्यत इत्यर्थः। ननु 'विदांकुर्वन्तु-' इति लोटि प्रथमपुरुषबहुवचनस्यैव सूत्रे निर्देशात् कथं लोडन्तसामान्यानुप्रयोग इत्यत आह **पुरुषेति**। कुर्वन्त्विति प्रथमपुरुषो बहुवचनं च न विवक्षितमित्यर्थः। तयोस्तु नान्तरीयकमुच्चारणमिति भावः। **इतिशब्दादिति**। तस्य प्रकारवचनस्य लोकप्रयोगानुसारित्वादिति भावः। **तनादिकृञ्भ्य उः**। **शपोऽपवाद इति**। अनेन शब्विषय एवास्य प्रवृत्तिरिति सूचितम्। 'सार्वधातुके यक्' इत्यतः सार्वधातुकग्रहणस्य 'कर्तरि शप्' इत्यतः कर्तरीत्यस्य चानुवृत्तेरिति भावः। **तेनेति**। गणकार्यस्यानित्यतया 'श्वसेत्' इत्यत्र अदादिगणकार्यं शपो लुङ् न भवतीत्यर्थः। वस्तुतस्तु कृञ्ग्रहणस्यात्र भाष्ये प्रत्याख्यातत्वाद्

लटोऽभावान्नैते आदेशास्तदाह **वेत्तेरिति**। **लोटो लुगिति**। 'आमः' इति सूत्रे 'मन्त्रे घस-' इत्यतो लेरित्यनुवर्त्य आमः परस्य लेर्लुगिति व्याकुर्वतां मतेनेदमुक्तम्। निष्कर्षे तु तेनैव लुगिति बोध्यम्। **पुरुषवचन इति**। प्रथमपुरुषो बहुवचनं चेत्यर्थः। परस्मैपदमप्यविवक्षितमेवेति केषांचिन्मते कर्मव्यतिहारे तङ्, व्यतिविदांकुरुताम्, व्यतिविदांकुर्वातामित्यादि ज्ञेयम्। **तेनेति**। विश्वसेदित्यत्र शपो लुगभावः सिद्ध इति भावः। एवमप्यविश्वस्तमित्यत्रेडभावः कथमिति चेदागम-

सिद्धम्। विदांकरोतु । २४६७ अत उत्सार्वधातुके। (६-४-११०) उप्रत्ययान्तस्य कृञोऽकारस्य उत्स्यात्सार्वधातुके क्ङिति। उदिति तपरत्वसामर्थ्याच्च गुणः। विदांकुरुतात् विदांकुरुताम्। 'उतश्च-' (सू २३३४) इति हेर्लुक्। आभीयत्वेन लुकोऽसिद्धत्वादुत्वम्। विदांकुरु। विदांकरवाणि। अवेत् अविताम्। 'सिजभ्यस्त-' (सू २२२६) इति झेर्जुस्। अविदुः २४६८ दश्च। (८-२-७५) धातोर्दान्तस्य पदस्य सिपि परे रुः स्याद्वा। अवेः, अवेत्।

उक्तज्ञापनाभावाद् विश्वसेदित्यसंबद्धमेवेत्याहुः। विश्वस्तमित्यत्र तु आगमशास्त्रस्यानित्यत्वाद् नेडित्याहुः। **विदांकरोत्विति**। अत्र विदेर्लोटि आमि लोटो लुकि आमन्ताद्विदेः कृञो लोडन्तस्यानुप्रयोगः। तत्र लोटस्तिपि 'एरुः' इत्युत्वे शपं बाधित्वा उप्रत्यये ऋकारस्य गुणे रपरत्वे उकारस्य तिब्निमित्तो गुणः। तातङि तु ऋकारस्य गुणे रपरे तातङो ङित्त्वाद् उकारस्य गुणाभावे विदांकरुतात् इति स्थिते। **अत उत्**। **उप्रत्ययान्तस्येति**। 'उतश्च प्रत्ययात्-' इत्यतस्तदनुवृत्तेरिति भावः। **कृञोऽकारस्य उदिति**। 'नित्यं करोतेः' इत्यतस्तदनुवृत्तेरिति भावः। **क्ङितीति**। 'गमहन-' इत्यतस्तदनुवृत्तेरिति भावः। अकारस्य उत्वे कृते तस्य लघूपधगुणमाशङ्क्य आह **तपरेति**। इदं स्थानिवत्सूत्रे भाष्ये स्पष्टम्। **विदांकुरुतामिति**। विदांकुर्वन्त्वित्यपि ज्ञेयम्। 'न भकुर्छुराम्' इति निषेधाद् 'हलि च' इति दीर्घो न। **हेर्लुगिति**। विदांकुरु हि इति स्थिते 'अत उत्सार्वधातुके' इत्युत्त्वं परमपि बाधित्वा नित्यत्वाद् 'उतश्च प्रत्ययात्-' इति हेर्लुगित्यर्थः। तर्हि सार्वधातुकाभावात् कथमुत्त्वमित्यत आह **आभीयत्वेनेति**। **विदांकुर्विति**। विदांकुरुतात् विदांकुरुतम् विदांकुरुत। **विदांकरवाणीति**। आटः पित्त्वेन ङित्त्वाभावादुकारस्य गुण इति भावः। विदांकरवाव विदांकरवाम। लङ्याह **अवेदिति**। हल्ङ्यादिना सिपो लोपे विशेषमाह **दश्च**। 'सिपि धातो रुर्वा' इत्यनुवृत्तम्। द इति षष्ठ्यन्तेन धातुर्विशेष्यते, तदन्तविधिः, पदस्येत्यधिकृतम्, तदाह **धातोर्दान्तस्य पदस्येति**। अलोऽन्त्यस्येत्यन्त्यस्य ज्ञेयम्। **अवेदिति**। सिपो हल्ङ्यादिलोपे

शास्त्रस्यानित्यत्वादिति गृहाण। **अत उत्सार्व**। क्ङिति किम्, करोति। करोषि। **लुकोऽसिद्धत्वादिति**। सार्वधातुकग्रहणमुत्तरार्थमेव नात्रावश्यकम्। इह भूतपूर्वगत्या सार्वधातुकपरत्वमाश्रीयत इति वृत्तिमते त्वसिद्धत्ववर्णनस्योपयोगलेशोऽपि नास्तीति ज्ञेयम्। **दश्च**। 'सिपि धातोरुर्वा' इत्यनुवर्तते, पदस्येति 'झलां जशोऽन्ते' इत्यस्मादन्त इति च, तदाह **धातोर्दस्येत्यादि**। सिपि किम्, तिपि अवेत्। दान्तस्य धातोः सिपि रुर्वेत्येतावतैवेष्टसिद्धौ पदान्तानुवृत्तिर्मन्दप्रयोजनेत्याहुः।

अस १०६५ भुवि । असि । २४६९ **श्नसोरल्लोपः** । (६-४-१११) श्नस्यास्तेश्चाकारस्य लोपः स्यात्सार्वधातुके क्ङिति । स्तः सन्ति । 'तासस्त्योः–' (सू २१९१) इति सलोपः । असि स्थः स्थ । अस्मि स्वः स्मः । 'आर्धधातुके' (सू २४३२) इत्यधिकृत्य । २४७० **अस्तेर्भूः** । (२-४-५२) बभूव । भविता । अस्तु, स्तात् स्ताम् सन्तु । २४७१ **घ्वसोरेद्धावभ्यासलोपश्च** । (६-४-११९) घोरस्तेश्चैत्वं स्याद्धौ परेऽभ्यासलोपश्च । आभीयत्वेनैत्वस्यासिद्धत्वाद्धेर्धिः । 'श्नसोः–' (सू २४६९) इत्यल्लोपः । एधि । तातङ्पक्षे एत्वं न । परेण तातङा बाधात् । 'सकृद्गतौ–' (प ४१) इति न्यायात् । स्तात् स्तम् स्त । असानि असाव असाम । 'अस्तिसिचः–' (सू २२२५) इतीट् ।

दकारस्य रुत्वविकल्पः । अवित्तम् अवित्त । अवेदम् अविद्व अविद्म । विद्यात् विद्याताम् । विद्यात् विद्यास्ताम् । अवेदीत् । अवेदिष्यत् । **अस भुवीति** । भवनं भूः । सत्तायामित्यर्थः । **अस्तीति** । सस्य चर्त्वेऽपि सकार एव भवति, न तु तकारः, अल्पप्राणतया प्रयत्नभेदात् । **श्नसोरल्लोपः** । अत् इति लुप्तषष्ठीकं पदम् । श्न अस् अनयोर्द्वन्द्वात् षष्ठीद्विवचनम् । शकन्ध्वादित्वात् पररूपम् । श्नेति श्नम्प्रत्ययैकदेशनिर्देशः । 'अत उत्सार्वधातुके' इत्यतः सार्वधातुके इत्यनुवर्तते, 'गमहन–' इत्यतः क्ङितीति, तदाह **श्नस्येत्यादिना** । **अस्तेर्भूः** । असधातोर्भूभावः स्याद् आर्धधातुके परे इत्यर्थः । अस् हि इति स्थिते **घ्वसोरेद्धावभ्यासलोपश्च** । घु अस् अनयोर्द्वन्द्वः । एत् हौ इति च्छेदः । ननु अस् हि इति स्थिते 'हुझल्भ्यो हेर्धिः' इति धित्वं परत्वाद् बाधित्वा 'घ्वसोः–' इति सकारस्य एत्वे कृते हुझल्भ्यः परत्वाभावात् कथं धिभाव इत्यत आह **आभीयत्वेनेति** । तथा च अ ए धीति स्थिते आह **श्नसोरिति** । नन्वाशिषि अस् हि इति स्थिते तातङं बाधित्वा परत्वादेत्वं प्राप्नोतीत्यत आह **तातङ्पक्षे एत्वं नेति**। कुत इत्यत आह **परेणेति** । ननु कृते तातङि तस्य स्थानिवत्त्वेन हित्वात्तस्मिन्परे 'घ्वसोः–' इत्येत्वं कुतो नेत्यत आह **सकृद्गताविति** । सकृद् एकवारं गतौ प्रवृत्तौ विप्रतिषेधे विरोधे सति यद्बाधितं तद्बाधितमेव भवति, न तु पुनः प्रवर्तत इति तदर्थः । लङस्तिपि विशेषमाह **अस्तिसिच इति** । इकारलोपे आटि वृद्धौ 'अस्तिसिचः–'

तच्चिन्त्यम् , वेत्सीत्यत्र तिप्रसङ्गाच्चर्त्वस्यासिद्धत्वेन दान्तत्वात् । **श्नसोरल्लोपः** । 'अत उत्–' इति सूत्रात् अत इत्यनुवर्त्यात्ग्रहणं त्यक्तुं शक्यमित्याहुः । **श्नसोरिति**। शकन्ध्वादित्वात्पररूपमित्याह **श्नस्यास्तेश्चेति** । श्नस्योदाहरणं रुन्धः, रुन्धन्तीत्यादि । क्ङिति किम्, रुणद्धि, अस्ति । तपरकरणमास्तामासन्नित्यत्र याडागमे कृते तस्य लोपो माभूदित्येतदर्थम् । निष्कर्षस्तु अनुपदं स्फुटीभविष्यति । **घ्वसो-**

आसीत् । असोरल्लोपस्याभीयत्वेनासिद्धत्वादाट् । आस्ताम् आसन् । स्यात् । भूयात् । अभूत् । सिचोऽस्तेश्च विद्यमानत्वेन विशेषणादीपन । २४७२ **उपसर्गप्रादुर्भ्यामस्तिर्यच्परः ।** (८-३-८७) उपसर्गेणः प्रादुसश्च परस्यास्तेः सस्य षः स्याद्यकारेऽचि च परे । निष्यात् । प्रादुःष्यात् । निषन्ति । प्रादुःषन्ति ।

इति ईडागम इत्यर्थः । ननु तसादौ ङिति परत्वादाडागमात्प्राक् 'असोः–' इत्यल्लोपे सति अजादित्वाभावात् कथमाडित्यत आह **असोरल्लोपस्याभीयत्वेनेति** । **आस्तामिति** । अत्र कृते आडागमे तस्य लोपनिवृत्त्यर्थं 'असोरल्लोपः' इति तपरकरणम् । वस्तुतस्तु आट आभीयत्वेनासिद्धत्वादेव लोपो न भवतीति 'श्नसोरल्लोपः' इत्यत्र तपरकरणं व्यर्थमिति भाष्ये स्पष्टम् । **आसन्निति** । आसीः आस्तम् आस्त । आसम् आस्व आस्म । विधिलिङ्याह **स्यादिति** । स्याताम् स्युरित्यादि । आशीर्लिङि आर्धधातुकत्वाद् भूभावं मत्वाह **भूयादिति** । लुङि तु सिचि भूभावे 'गातिस्था–' इति सिचो लुकं मत्वाह **अभूदिति** । तत्र 'अस्तिसिचोऽपृक्ते' इति ईडागममाशङ्क्याह **सिचोऽस्तेश्चेति** । इह भूभावे सति अस्तेरश्रूयमाणत्वाद् ईरणेति भावः । **उपसर्गप्रादुर्भ्याम्** । उपसर्गः प्रादुस् अनयोर्द्वन्द्वः । इणकोरित्यधिकृतम् । तत्र इण इत्युपसर्गेण संबध्यते, न तु प्रादुसि, ततः परस्य अस्तेः सस्य इणः परत्वासंभवात् । कोरित्यपि असंभवान्न संबध्यते । अस्तिरिति षष्ठ्यर्थे प्रथमा । 'सहेः साडः सः' इत्यतः स इति षष्ठ्यन्तमनुवर्तते, मूर्धन्य इत्यधिकृतम् । य् अच् अनयोर्द्वन्द्वः । यचौ परौ यस्मादिति विग्रहः । यकारे अकारे च परे इति लभ्यते । तदाह **उपसर्गेण इति** । उपसर्गस्थादिण इत्यर्थः । **परस्येति** । अस्तेः सस्य विशेषणमिदम् । न त्वस्तेः । तेन प्रादुरासीदित्यत्र न षत्वम् । यकारपरकत्वे उदाहरति **निष्याद्, प्रादुष्ष्यादिति** । प्रादुस् इति सान्तमव्ययम् । सस्य षत्वे पूर्वस्य सस्य ष्टुत्वेन षः । षान्तत्वे तु प्रादुर्भ्यामिति रुत्वनिर्देशो नोपपद्यते । अच्प-

---

रेद्धा । एत्वमलोन्त्यस्य, लोपस्तु शित्वात्सर्वस्येति भाष्यादौ स्पष्टम्, देहि धेहि । **असिद्धत्वादाडिति** । नन्वेवमाटोऽसिद्धत्वात् 'असोः–' इत्यल्लोपो न भवेदिति तपरकरणं तत्र व्यर्थमिति चेत् । अत्राहुः—आभाच्छास्त्रस्यानित्यताज्ञापनाय तपरकरणम्, तेन देभतुरित्यादि सिद्धमिति । स्यादेतत्—अत्र केचिद् अद्ग्रहणस्य निष्फलत्वे तपरकरणस्य ज्ञापनार्थत्वं न सिध्येत् । न च 'अत उत्–' इति सूत्रस्थतपरकरणमेव ज्ञापनार्थमस्त्विति वाच्यम्, अस्येत्युक्तौ गौरवादर्धमात्रालाघवाय तत्र तपरत्वमिति सुवचत्वात् । तस्मादुक्तज्ञापनार्थमद्ग्रहणमावश्यकमित्याहुः । **उपसर्गप्रादुर्भ्याम्** । प्रादुस् इति सान्तमव्ययम् । प्रादुश्चेति पाठे प्रादुर्भ्या-

यत्परः किम्-अभिस्तः । **मृजूष् १०६६ शुद्धौ** । **२४७२ मृजेर्वृद्धिः ।** (७-२-११४) मृजेरिको वृद्धिः स्याद्धातुप्रत्यये परे । 'क्ङित्यजादौ वेष्यते-' (वा ५०२७) । 'व्रश्च-' (सू २९४) इति षः । मार्ष्टि मृष्टः मृजन्ति, मार्जन्ति । ममार्ज ममार्जतुः, ममृजतुः । ममार्जिथ, ममार्ष्ठ । मार्जिता, मार्ष्टा । मृड्ढि ।

रुत्वे उदाहरति **निषन्ति प्रादुष्षन्तीति** । **मृजूष् शुद्धाविति** । ऊदित्त्व-मिड्विकल्पार्थम् । 'षिद्भिदादिभ्योऽङ्' इत्यङर्थं षित्त्वम् । वस्तुतस्तु भिदादिगणे मृजाशब्दपाठादेव सिद्धेरिह षित्करणमनार्षमित्याहुः । **मृजेर्वृद्धिः** । 'इको गुणवृद्धी' इति परिभाषया इक इत्युपस्थितम् । मृजेरित्यवयवषष्ठी, तदाह **मृजेरिको वृद्धिः स्यादिति** । 'धातोः स्वरूपग्रहणे तत्प्रत्यये कार्यविज्ञानम्' इति परिभाषा-मभिप्रेत्य आह **धातुप्रत्यये पर इति** । धातोर्विहिते प्रत्यये इत्यर्थः । तेन परिमृड्भ्यामित्यत्र न वृद्धिरिति भावः । गुणापवादोऽयम् । **क्ङित्यजादौ वेष्यत इति** । मृजेर्वृद्धिरिति शेषः । 'इको गुणवृद्धी' इति सूत्रभाष्ये इदं पठितम् । **व्रश्चेति ष इति** । मृज् ति इति स्थिते ऋकारस्य वृद्धौ रपरत्वे जकारस्य व्रश्चेति षत्वे तकारस्य ष्टुत्वेन टकारे मार्ष्टीति रूपमित्यर्थः । **मृष्ट इति** । ङित्त्वान्न वृद्धिः नापि गुण इति भावः । **मृजन्ति, मार्जन्ति इति** । क्ङित्यजादाविति वृद्धि-विकल्प इति भावः । मार्क्षि मृष्ठः मृष्ठ । मार्ज्मि मृज्वः मृज्मः । **ममार्जेति** । णलि मृजेर्वृद्धिरिति भावः । अतुसादावजादौ किति वृद्धिविकल्पं मत्वाह **ममार्जतुः, ममृजतुरिति** । ममार्जुः ममृजुः इत्यपि ज्ञेयम् । ऊदित्त्वादिड्विकल्पं मृजेर्वृद्धिं च मत्वाह **ममार्जिथ, ममार्ष्ठेति** । इडभावे जस्य व्रश्चेति षः । थस्य ष्टुत्वेन ठ इति भावः । ममार्जथुः, ममृजथुः ममार्ज, ममृज । ममार्ज ममार्जिव, ममृजिव, ममृज्व ममार्जिम, ममृजिम, ममृज्म । लुट्याह **मार्जिता, मार्ष्टेति** । ऊदित्त्वादिटि

मिति निर्देशो न युज्यत इति प्राचां षान्तपाठः प्रामादिकः । **परस्येति** । अय-मस्तेः सस्य विशेषणं न त्वस्तेः, तेन प्रादुरस्तीत्यत्र न षत्वम् । उपसर्गेत्यादि किम्, दधि स्यात । अस्तेः किम्, परिस्रजति । **मृजू शुद्धौ** । अयं न षित्, भिदादिपाठसामर्थ्यात् । **मृजेर्वृद्धिः** । गुणापवादः । धातोः स्वरूपग्रहणे तत्प्रत्यये कार्यविज्ञानमित्याह **धातुप्रत्यय इति** । धातुप्रत्यये किम्, कंसपरिमृड्भ्याम् । **क्ङित्यजादाविति** । एतच्चान्येषां वैयाकरणानां मतम् 'इको गुणवृद्धी' इति सूत्रे

१—'मृजू' इति षकाररहितपाठ एव बहुत्रोपलभ्यते ।

२—केचित्त्विह क्रादिनियमाच्नित्यमिटमाहुः, क्रादिनियमस्य नञ्-वेत्युभय-प्रापितनिषेधनियामकत्वस्वीकारात् ।

अमार्ट्। अमार्जम्। अमार्जीत्, अमार्क्षीत्। रुदिर् १०६७ अश्रुविमोचने। २४७४ रुदादिभ्यः सार्वधातुके। (७-२-७६) रुद्, स्वप्, श्वस्, अन्, जक्ष् एभ्यो वलादेः सार्वधातुकस्येट् स्यात्। रोदिति रुदितः। हौ परत्वादिटि धित्वं न। रुदिहि। २४७५ रुदश्च पञ्चभ्यः। (७-३-९८) हलादेः पितः सार्वधातुकस्यापृक्तस्य ईट् स्यात्। २४७६ अड् गार्ग्यगालवयोः।

तदभावे च 'मृजेर्वृद्धिः' इति भावः। मार्जिष्यति, मार्क्ष्यति। मार्ष्टु, मृष्टात् मृष्टाम् मार्जन्तु, मृजन्तु। **मृड्ढीति**। हेरपित्वेन ङित्वान्न वृद्धिः। व्रश्चादिना जस्य षः, हेर्धिः, षस्य जश्त्वेन डः, धस्य ष्टुत्वेन ढः। मृष्टात् मृष्टम् मृष्ट। मार्जानि मार्जाव मार्जाम। लङ्याह **अमार्ट् इति**। तिप इकारलोपे वृद्धौ रपरत्वे हल्ङ्यादिना तकारलोपे व्रश्चादिना जस्य षः, तस्य जश्त्वचर्त्वे इति भावः। अमृष्टाम् अमार्जन्, अमृजन्। अमार्ट् अमृष्टम् अमृष्ट। **अमार्जमिति**। अमृज्व अमृज्म। मृज्यात् मृज्यास्ताम्। मृज्यास्ताम्। **अमार्जीत्, अमार्क्षीदिति**। ऊदित्वादिड्विकल्प इति भावः। इट्पक्षे अमार्जिष्टाम् अमार्जिषुरित्यादि सुगमम्। इडभावे अमार्ष्टाम् अमार्क्षुः। अमार्क्षीः अमार्ष्टम् अमार्ष्ट। अमार्क्ष्म अमार्क्ष्व अमार्क्ष्म। अमार्जिष्यत्, अमार्क्ष्यत्। रुदिर्धातुरिरित् सेट्। **रुदादिभ्यः**। इड्वलादेरित्यनुवृत्तिं मत्वाह **वलादेरिति**। **रुदित इति**। ङित्वान्न गुणः। रुदन्ति। रोदिषि रुदिथः रुदिथ। रोदिमि रुदिवः रुदिमः। रुरोद रुरुदतुः। रुरोदिथ। रुरुदिव रुरुदिम। रोदिता। रोदिष्यति। रोदितु, रुदितात् रुदिताम् रुदन्तु। रुद् हि इति स्थिते 'हुझल्भ्यः–' इति धित्वमाशङ्क्याह **हौ परत्वादिति**। **रुदिहीति**। हेरपित्वेन ङित्वान्न लघूपधगुण इति भावः। रुदितात् रुदितम् रुदित। रोदानि रोदाव रोदाम। **रुदश्च पञ्चभ्यः**। 'नाभ्यस्तस्य–' इत्यतः पिति सार्वधातुके इति 'उतो वृद्धिः–' इत्यतो हलीति 'गुणोऽपृक्ते' इत्यतः अपृक्ते इति 'ब्रुव ईट्' इत्यत ईडिति चानुवर्तते। रुद इति पञ्चमी। रुदादिभ्य इति विवक्षितम् इत्यभिप्रेत्य सूत्रशेषं पूरयति **हलादेरित्यादिना**। **अड्गार्ग्यगालवयोः**। अनयोर्मते रुदादिभ्यः पञ्चभ्यः परस्य हलादेः पितः सार्वधातुकस्य अपृक्तस्य अडागमः स्यादिति स्प-

---

भाष्यकृता स्वीकृतम्। **मृड्ढीति**। 'हुझल्भ्यः–' इति हेर्धिः। षत्वष्टुत्वजश्त्वानि। **वलादेः सार्वधातुकस्येति**। वलादेः किम्, रुदन्ति। सार्वधातुके किम्, रुरुदुः। **धित्वं नेति**। सकृद्गताविति न्यायात्, हेर्धिरिति स्थान्यादेशयोरिकार उच्चारणार्थ इत्यादिप्रागुक्तसमाधानाद्वेति भावः। **रुदश्च**। पञ्चभ्यः किम्, जागर्तेर्लङि अजागः। **प्रकृतिप्रत्ययेत्यादि**। हलादिपित्सार्वधातुकापृक्तापेक्षत्वाच

(७-३-९९) अरोदीत्, अरोदत् अरुदिताम् अरुदन्। अरोदीः, अरोदः। अरोदम्। प्रकृतिप्रत्ययविशेषापेक्षाभ्यामडीड्भ्यामन्तरङ्गत्वाद्यासुट्। रुद्यात्। अरुदत्, अरोदीत्। ञि ष्वप् १०६८ शये। स्वपिति स्वपितः। सुष्वाप सुषुपतुः सुषुपुः। सुष्वपिथ, सुष्वप्थ। २४७७ सुविनिर्दुर्भ्यः सुपिसूतिसमाः। (८-३-८८) एभ्यः सुप्यादेः सस्य षः स्यात्। 'पूर्वं धातुरुपसर्गेण

ष्टोऽर्थः। **अरोदीरिति**। अरुदितम् अरुदित इत्यपि ज्ञेयम्। **अरोदमिति**। अरुदिव अरुदिम इत्यपि ज्ञेयम्। ननु लिङस्तिपि यासुटं बाधित्वा परत्वाद् 'अड्गार्ग्यगालवयोः' इति 'रुदश्च पञ्चभ्यः' इति च अडीटौ स्यातामित्यत आह **प्रकृतिप्रत्ययेति**। हलादिपित्सार्वधातुकापृक्तपित्त्वाच्चेत्यपि ज्ञेयम्। लुङि 'इरितो वा' इत्यङ्पक्षे आह **अरुददिति**। अङभावपक्षे त्वाह **अरोदीदिति**। 'अस्तिसिचः–' इति ईट्। 'रुदश्च पञ्चभ्यः' इति तु नेह प्रवर्तते, सिचा व्यवहितत्वात्। **ञिष्वप् शय इति**। षोपदेशोऽयम्। आर्धधातुके अनिट्। **स्वपितीति**। 'रुदादिभ्यः–' इति इट्। **स्वपित इति**। स्वपन्ति। स्वपिषि स्वपिथः स्वपिथ। स्वपिमि स्वपिवः स्वपिमः। **सुष्वापेति**। द्वित्वे 'लिट्यभ्यासस्य–' इति संप्रसारणे पूर्वरूपे आदेशसकारत्वात् षत्वमिति भावः। **सुषुपतुरिति**। 'वचिस्वपि–' इति संप्रसारणे कृते द्वित्वादीति भावः। सुषुपुरित्यपि ज्ञेयम्। **सुष्वपिथ, सुष्वप्थेति**। भारद्वाजनियमात्थलि वेडेति भावः। सुषुपथुः सुषुप। सुष्वाप, सुष्वप सुषुपिव सुषुपिम। **सुविनिर्दुर्भ्यः**। कृतसंप्रसारणस्य स्वप्धातोः सुपीत्यनेन ग्रहणम्। सूतीत्यनेन सूतिशब्दः कृदन्तो गृह्यन्ते। समेत्यनेनापि समशब्दस्य ग्रहणम्। षष्ठ्यर्थे प्रथमा। 'सहेः साडः सः' इत्यतः स इति षष्ठ्यन्तमनुवर्तते। मूर्धन्य इत्यधिकृतम् तदाह **एभ्यः सुप्यादेरिति**। सुषुप्तिः, सुषूतिः, सुषम इत्युदाहरणानि। अत्र कृतसंप्रसारणस्य स्वप्धातोर्ग्रहणात् सुस्वप्न इत्यत्र न षत्वमिति भाष्यम्। नन्वेवं सति सुषुषुपतुरित्यत्र सुपूर्वस्य स्वपधातोः कथं षत्वम्। कृतसंप्रसारणस्य हि स्वपधातोः षत्वम्। तत्र यदि स्वप् अतुस् इति स्थिते पूर्वं द्वित्वे कृते पश्चाद् 'वचिस्वपि' इति संप्रसारणं तदा हलादिशेषे उत्तरखण्डस्यैव 'वचिस्वपि–' इति संप्रसारणम्, न त्वभ्यासस्य। अतुसः कित उत्तरखण्डव्यवहितत्वात्, 'न संप्रसारणे

बहिरङ्गत्वमडीटोः। **अरुददिति**। 'इरितो वा' इत्यङ्। **अरोदीदिति**। 'अस्तिसिच–' इति ईट्। 'रुदश्च–' इत्यनेन तु न, सिचा व्यवधानेन रुदादेः परत्वाभावात्। **सुषुपतुरिति**। 'वचिस्वपि–' इति संप्रसारणम्। ततो द्वित्वम्। **सुपिसूतिसमा इति**। सूतीति क्तिन्नन्तः। समेति पचाद्यजन्तः। सुषुप्तिः।

युज्यते'। किति लिटि परत्वात्संप्रसारणे षत्वे च कृते द्वित्वम्। 'पूर्वत्रासिद्धीयमद्विर्वचने' (प १२७) सुषुपतुः सुषुपुः। पिति तु द्वित्वेऽभ्यासस्य संप्रसारणम्। षत्वस्यासिद्धत्वात्ततः पूर्वं 'हलादिः शेषः' (सू २१७९)। नित्यत्वाच्च। ततः सुपिरूपाभावान्न षः। सुषुष्वाप। सुस्वप्ता। अस्वपीत्, अस्वपत्।

संप्रसारणम्' इति निषेधाच्च। ततश्च सु ससुप् अतुसित्यत्र पूर्वखण्डस्य कृतसंप्रसारणत्वाभावात् कथं षत्वम्। उत्तरखण्डस्य च सु इत्युपसर्गादव्यवहितपरत्वाभावात्कथमनेन षत्वम्, इण्कवर्गाभ्यां परत्वाभावेन आदेशप्रत्यययोः इत्यस्याप्युत्तरखण्डे अप्रवृत्तेः। यदि तु परत्वात्पूर्वं संप्रसारणे कृते पश्चाद् द्वित्वं तर्हि सुप् इत्यस्य द्वित्वप्रवृत्तेः प्रागेव षत्वमिति वक्तव्यम्। तत्तु न युज्यते। 'पूर्वं धातुः साधनेन युज्यते पश्चादुपसर्गेण' इति परिभाषया सु इत्युपसर्गसंबन्धस्य द्वित्वात्प्रागप्रवृत्तेः। तथा च कृतसंप्रसारणस्य अकृतषत्वस्य सुप् इत्यस्य द्वित्वे उत्तरखण्डस्यैव 'आदेशप्रत्यययोः' इति षत्वं स्यात्। न तु पूर्वखण्डस्य 'सात्पदाद्योः' इति निषेधात्। कृते हलादिशेषे सु इति पूर्वखण्डस्य सुब्रूपत्वाभावेन 'सुविनिर्दुर्भ्यः–' इत्यस्याप्यप्रवृत्तेः। न च एकदेशविकृतस्यानन्यत्वं शङ्क्यम्, एवमप्यभ्यासस्यानर्थकत्वेन अर्थवद्ग्रहणपरिभाषया षत्वस्य तत्राप्राप्तेः। तस्मादिह सुषुषुपतुरित्यत्र पूर्वखण्डे षत्वं दुरुपपादमित्याशङ्क्याह **पूर्वं धातुरित्यादिना**। लक्ष्यानुरोधादिह 'पूर्वं धातुरुपसर्गेण युज्यते पश्चात्साधनेन' इत्याश्रीयते। ततश्च द्वित्वात्प्रागेव परत्वात्संप्रसारणे सति सुप् इत्यस्य सु इत्युपसर्गपूर्वकत्वमादाय षत्वे च कृते सति पुनः प्रसङ्गविज्ञानात् षुप् इत्यस्य कृतषत्वस्य द्वित्वे सति खण्डद्वयेऽपि षकारश्रवणं निर्बाधमित्यर्थः। तदुक्तं भाष्ये– 'षुपिभूतो द्विरुच्यते' इति। ननु कृतषत्वस्य कथं द्वित्वम्, द्वित्वे कर्तव्ये षत्वस्यासिद्धत्वादित्यत आह **पूर्वत्रासिद्धीयमिति**। ननु तर्हि सुषुष्वापेत्यत्रापि पूर्वखण्डे षत्वं श्रूयेतेत्यत आह **पिति त्विति**। पिति णलि कित्वाभावाद् 'वचिस्वपि–' इत्यस्याप्रवृत्तौ कृते द्वित्वे 'लिट्यभ्यासस्य–' इति पूर्वखण्डस्य संप्रसारणम्। सु सुप् स्वप् अ इति स्थिते 'सुविनिर्दुर्भ्यः–' इति षत्वस्यासिद्धत्वाद् हलादिशेष इत्यर्थः। **नित्यत्वाच्चेति**। कृते अकृते च षत्वे हलादिशेषस्य प्राप्तेरिति भावः। **तत इति**। हलादिशेषोत्तरं सु इत्यस्यैव स्थित्या सुप् इति रूपस्याभावान्न ष इत्यर्थः। एकदेशविकृतत्वादनन्यत्वेऽपि अभ्या-

सुषूतिः। सुषमा। विषमः। **अद्विर्वचन इति**। तेन षत्वसहितस्य द्वित्वम्। **सुपि रूपाभावादिति**। 'एकदेशविकृतमनन्यवत्' इति तु न प्रवर्तते। तस्य स्थानिवत्सूत्रशेषत्वात्। षत्वस्य त्रैपादिकत्वेन तत्कार्यं प्रति स्थानिवत्त्वाभावादित्याहुः। वस्तुतस्तु 'स्थानिवदादेश–' इत्येतत् प्रति त्रिपादी सिद्धेत्युक्तम्। तस्मादिह समा-

स्वप्यात्। सुप्यात्। सुषुप्यात्। अस्वाप्सीत्। श्वस १०६९ प्राणने। श्वसिति। श्वसिता। अश्वसीत्, अश्वसत्। श्वस्यातम्। श्वस्यास्ताम्। 'ह्यन्तक्षण-' (सू २२९९) इति न वृद्धिः। अश्वसीत्। अन १०७० च। अनिति। आन। अनिता। आनीत्, आनत्। २४७८ अनितेः। (८-४-१९) उपसर्गस्था-न्निमित्तात्परस्यानितेर्नस्य णः स्यात्। प्राणिति। जक्ष १०७१ भक्षहसनयोः। जक्षिति जक्षितः। २४७९ अदभ्यस्तात्। (७-१-४) झस्य अत्स्यात्। अन्तापवादः। जक्षति। 'सिजभ्यस्त-' (सू २२२६) इति झेर्जुस्। अजक्षुः। अयमन्तस्थादिरित्युज्ज्वलदत्तो बभ्राम। रुदादयः पञ्च गताः।

सत्यार्थवत्त्वाभावान्न ष इति द्रष्टव्यम्। स्वप्ता। स्वप्स्यति। स्वपितु, स्वपितात् स्वपिताम् स्वपन्तु। स्वपिहि, स्वपितात् स्वपितम् स्वपित। स्वपानि स्वपाव स्वपाम। लङ्याह **अस्वपीत्, अस्वपदिति**। 'रुदश्च पञ्चभ्यः' इति ईटि 'अड्गार्ग्यगालवयोः' इत्यटि च रूपे। अन्यानि रुदिवद्रूपाणि। लिङ्याह **सुप्यादिति**। 'वचिस्वपि-' इति संप्रसारणमिति भावः। 'सुविनिर्दुर्भ्यः-' इति षत्वं मत्वाह **सुषुप्यादिति**। **अस्वाप्सीदिति**। अनिट्कत्वान्न सिज्लोप इति भावः। **श्वस प्राणन इति**। वलाद्यार्धधातुके सेडयम्। सार्वधातुके तु वलादौ 'रुदादिभ्यः-' इति इट्। लङस्तिपि 'रुदश्च-' इति ईटम् 'अड्गार्ग्य-' इत्यटं च मत्वाह **अश्वसीत्, अश्वसदिति**। विध्याशीर्लिङोः श्वस्यादिति सिद्धवत्कृत्याह **श्वस्याताम्। श्वस्यास्तामिति**। **अन चेति**। अनधातुरपि प्राणने वर्तते इत्यर्थः। सेडयम्। सार्वधातुकेऽपि वलादौ 'रुदादिभ्यः-' इति इट्। लङि ईडटौ मत्वाह **आनीत्, आनदिति**। **अनितेः**। 'रषाभ्यां नो णः' इत्यनुवर्तते। 'उपसर्गादसमासेऽपि-' इत्यत उपसर्गादिति, तदाह **उपसर्गस्थादिति**। भिन्नपदस्थत्वादप्राप्तौ वचनम्। जक्षधातुः सेट्। वलादौ सार्वधातुकेऽपि 'रुदादिभ्यः-' इति सेट्। **अदभ्यस्तात्। झस्येति**। 'झोऽन्तः-' इत्यतस्तदनुवृत्तेरिति भावः। **जक्षतीति**। 'जक्षित्यादयः षट्' इत्यभ्यस्तसंज्ञेति भावः। लङस्तिपि ईडटोः अजक्षीत् अजक्षत् इति सिद्धवत्कृत्याह **सिजभ्यस्तेति**। अदादेशापवादो जुस्। **अन्तस्थादिरिति**। तालव्यान्तस्थादिरित्यर्थः। **बभ्रामेति**। "जक्षन्

धानान्तरमूह्यमित्यन्ये। **अनितेः**। 'उपसर्गादसमासेऽपि-' इत्यत उपसर्गादिति वर्तते, 'रषाभ्याम्-' इत्यतो 'नो णः' इति च तदाह **उपसर्गस्थादित्यादि**। **अन्तापवाद इति**। 'झोऽन्तः' इत्यस्य अदादेशोऽपवादः, अस्य त्वपवादो जुसिति ज्ञेयम्। **बभ्रामेति**। 'जक्षन् क्रीडन् रममाणः' इत्युपनिषदि जशादित्वस्य निर्वि-

जागृ १०७२ निद्राक्षये । जागर्ति जागृतः जाग्रति । 'उषविद-' (सू २३४१) इत्याम्वा । जागरांचकार, जजागार। २४८० जाग्रोऽविचिण्णल्ङित्सु । (७-३-८५) जागर्तेर्गुणः स्याद्विचिण्णल्ङिद्भ्योऽन्यस्मिन्वृद्धिविषये प्रतिषेधविषये च । जजागरतुः । अजागः अजागृताम् । अभ्यस्तत्वाज्जुस् ।

क्रीडन् रममाणः" इत्युपनिषदि चवर्गतृतीयादित्वस्य निर्विवादत्वादिति भावः । जागृधातुः ऋकारान्तः सेट्, **जागर्तीति** । तिपि शपो लुकि ऋकारस्य गुणे रपरत्वम् । **जागृत इति** । ङित्त्वान्न गुणः । **जाग्रतीति** । 'जक्षित्यादयः षट्' इत्यभ्यस्तसंज्ञायाम् 'अदभ्यस्तात्' इति झेरदादेशः । ङित्त्वाद्गुणनिषेधे ऋकारस्य यणिति भावः । जागर्षि जागृथः जागृथ । जागर्मि जागृव जागृमः । लिटि 'कास्यनेकाच्-' इति नित्यमामि प्राप्ते आह **उषविदेत्याम् वेति** । **जागरामिति** । आमि ऋकारस्य गुणो रपरत्वं चेति भावः । आमभावे आह **जजागरेति** । अतुसादौ कित्त्वाद्गुणनिषेधे प्राप्ते **जाग्रोऽवि** । जाग्र इति षष्ठी । 'मिदेर्गुणः' इत्यतो गुण इत्यनुवर्तते, तदाह **जागर्तेर्गुणः स्यादिति** । अविचिण्णल्ङित्स्विति च्छेदः । वि चिण् णल् ङित् एषां द्वन्द्वे नञ्समासः, तदाह **विचिण्णल्ङिद्भ्योऽन्यस्मिन्निति** । चिण्णल्पर्युदासाद् वृद्धिविषयेऽप्यस्य प्रवृत्तिः । ङित्पर्युदासाद् गुणप्रतिषेधविषयेऽप्यस्य प्रवृत्तिः, तदाह **वृद्धिविषये प्रतिषेधविषये चेति** । **जजागरतुरिति** । अत्र कित्त्वेऽपि गुणः । जजागरुः । जजागरिथ जजागरथुः जजागर । जजागार, जजागर जजागरिव जजागरिम । विचिण्णल्ङित्सु तु न गुणः । वि—जागृविः । चिण्—अजागारि । णल्—जजागार । ङित्—जागृतः । वृद्धिविषये यथा—ण्वुलि जागरकः । प्रतिषेधविषये यथा—जजागरतुः । कित्त्वेऽपि गुण इत्याद्युक्तम् । जागरिता । जागरिष्यति । जागर्तु, जागृतात् जागृताम् जाग्रतु । जागृहि, जागृतात् जागृतम् जागृत जागराणि जागराव जागराम । लङ्याह **अजागरिति** । तिपि इकारलोपे हल्ङ्यादिना तकारलोपे रेफस्य विसर्ग इति भावः । अभ्यस्तत्वाज्झेः झेरदादेशे प्राप्ते आह **अभ्यस्तत्वाज्जुसिति** । 'सिजभ्यस्तविदिभ्यश्च' इत्यनेनेति भावः । जक्षित्यादित्वादभ्यस्तत्वम् ।

वादत्वात् । 'नाभ्यस्ताच्छतुः' इति निषेधेन 'जक्षन्' इति नुमश्छान्दसत्वेऽपि जक्षादित्वस्य तत्कल्पनाया अन्याय्यत्वात् । धातुवृत्त्यादौ जक्षादिपाठाच्च । **जाग्रोऽविचिण्णल्-ङिद्भ्योऽन्यस्मिन्निति** । जागृविः । विशब्देन वादिप्रत्ययो गृह्यते । इकारस्तूच्चारणार्थ इति वदतां मते क्वसावपि न भवति, जजागृवान् । जजागृवांसौ । चिण्, अजागारि । णल्, जजागार । ङित्, जागृतः ।

२४८१ जुसि च। (७-३-८३) अजादौ जुसीगन्ताङ्गस्य गुणः स्यात्। अजागरुः। अजादौ किम्-जागृयुः। आशिषि तु जागर्यात् जागर्यास्ताम् जागर्यासुः। लुङि अजागरीत्। 'जागृ इस्' इत्यत्र यण् प्राप्तः, तं सार्वधातुकगुणो बाधते, तं सिचि वृद्धिः, तां जागर्तिगुणः, तत्र कृते हलन्तलक्षणा वृद्धिः प्राप्ता, 'नेटि' (सू २२१८) इति निषिद्धा, ततः 'अतो हलादेः-' (सू २२८४) इति बाधित्वा 'अतो रान्तस्य' (सू २२१०) इति वृद्धिः प्राप्ता, 'ह्म्यन्त-' (सू २२९९) इति निषिध्यते। तदाहुः—

'गुणो वृद्धिर्गुणो वृद्धिः प्रतिषेधो विकल्पनम्।
पुनर्वृद्धिर्निषेधोऽतो यण्पूर्वाः प्राप्तयो नव॥' इति।

अजागृ उस् इति स्थिते 'सार्वधातुकमपित्' इति ङित्त्वादविचिण्णल्ङित्स्विति पर्युदासादप्राप्ते गुणे आह **जुसि च**। अङ्गस्येत्यधिकृतम्। 'मिदेर्गुणः' इत्यतो गुण इत्यनुवर्तते। 'इको गुणवृद्धी' इति परिभाषया इक इत्युपस्थितेन अङ्गस्य विशेषणात्तदन्तविधिः। 'क्सस्याचि' इत्यतोऽनुवृत्तेन अचीत्यनेन जुसीत्यस्य विशेषणात्तदादिविधिः, तदाह **अजादावित्यादिना**। **अजागरुरिति**। अजागः अजागृतम् अजागृत। अजागरम् अजागृव अजागृम। विधिलिङि यासुटो ङित्वान्न गुणः। जागृयात् जागृयाताम्। **जागृयुरिति**। जुसि चेत्यत्र अजादावित्युक्तेर्न गुण इति भावः। **आशिषि तु जागर्यादिति**। किदाशिषि इति यासुटः कित्त्वाद् 'जाग्रोऽविचिण्णल्ङित्सु' इति गुण इति भावः। जागृधातोर्लुङि सिचि इटि यणादिप्राप्तिक्रमं दर्शयति **जागृ इस् इत्यत्रेति**। **तत्र कृत इति**। 'जाग्रोऽविचिण्णल्-' इति गुणे रपरत्वे कृते अजागर् ईदिति स्थिते सतीत्यर्थः। **तदाहुरिति**। वृद्धा इति-

---

जागृथः। **वृद्धिविषय इति**। ण्वुलि जागरकः। घञि जागरः। णिचि जागरयति। न चैतेषु गुणे कृतेऽपि 'अत उपधायाः' इति वृद्धिः स्यादिति वाच्यम्, गुणविधेश्चिण्णल्प्रतिषेधस्य चानर्थक्यापत्तेः। **जुसि च**। चकारः स्पष्टप्रतिपत्त्यर्थः। 'क्सस्याचि' इत्यतोऽचीत्यनुवर्तत इत्याह **अजादाविति**। **जागृयुरिति**। एवं शृणुयुः चिनुयुरित्यादावपि गुणो नेति बोध्यम्। यासुटो ङित्वाच्छृणुयुरित्यादौ गुणो नेति प्राचोक्तिस्तु मनोरमायां दूषिता, 'जुसि च' इति गुणस्य निषेधापवादत्वादिति। केचित्तु—'जुसि च' इत्यत्र उसीत्यावर्त्य उसरूपे जुसीति व्याख्यानान्नोक्तदोष इत्याहुः। अजादौ जुसीति समाधानं तु भाष्यारूढम्। जागर्तेः सिच इटि कृते यणादिप्राप्तिक्रमं दर्शयति **जागृ इस् इत्यत्रेति**। **तत्र कृत इति**। हलन्तलक्षणाया वृद्धेर्जागर्तिगुणेन बाधस्तेन गुणेन हलन्तत्वसंपादनात्।

दरिद्रा १०७३ दुर्गतौ। दरिद्राति। २४८२ इद्दरिद्रस्य। (६-४-११४) दरिद्रातेरिकारः स्याद्धलादौ क्ङिति सार्वधातुके। दरिद्रितः। २४८३ **आभ्यस्तयोरातः**। (६-४-११२) अनयोरातो लोपः स्यात् क्ङिति सार्वधातुके। दरिद्रति। अनेकाच्त्वादाम्। दरिद्रांचकार। 'आत औ णलः' (सू २३७१) इत्यत्र ओ इत्येव सिद्धे औकारविधानं दरिद्रातेराल्लोपे कृते श्रवणार्थम्। अत एव ज्ञापकादाम्नेत्येके। ददरिद्रौ ददरिद्रतुरित्यादि। यत्तु णलि ददरिद्रेति तन्निर्मूलमेव। 'दरिद्रातेरार्धधातुके विवक्षिते आल्लोपो वाच्यः'

शेषः। अजागरिष्टाम् अजागरिषुः इत्यादि सुगमम्। दरिद्राधातुरादन्तः सेट्। दुर्गतिः धनहीनीभवनम्। **दरिद्रातीति**। धनहीनीभवतीत्यर्थः। **इद्दरिद्रस्य**। सौत्रो ह्रस्वः। 'गमहन–' इत्यतः क्ङितीत्यनुवर्तते। 'ई हल्यघोः' इत्यतो हलि इति 'अत उत्–' इत्यतः सार्वधातुके इति, तदाह **दरिद्रातेरिति**। 'आभ्यस्तयोः-' इत्याल्लोपापवादः। 'अलोऽन्त्यस्य, इत्यन्त्यस्य इकारः। **दरिद्रित इति**। 'सार्वधातुकमपित्' इति तसो ङित्त्वादाकारस्य इकारः। **आभ्यस्तयोरातः**। 'गमहन–' इत्यतो लोपः क्ङितीत्यनुवर्तते। 'अत उत्–' इत्यतः सार्वधातुके इति, तदाह **अनयोरिति**। श्नाप्रत्ययस्य अभ्यस्तस्य चेत्यर्थः। **दरिद्रतीति**। जक्षित्यादित्वादभ्यस्तत्वाद् 'अदभ्यस्तात्' इति झस्य अदादेशे आकारलोपः। दरिद्रासि दरिद्रिथः दरिद्रिथ। दरिद्रामि दरिद्रिवः दरिद्रिमः। लिटयाह **अनेकाच्त्वादामिति**। इदं च 'कास्प्रत्ययात्–' इति सूत्रभाष्ये स्पष्टम्। **दरिद्रांचकारेति**। आमि सवर्णदीर्घः। कैयटमतमाह **आत इति**। 'आत औ णलः' इत्यत्र प्रथमातिक्रमे कारणाभावाद् ओकार एव विधातुमुचितः। वृद्धौ सत्यां तावतैव ययौ इत्यादिसिद्धेः। तस्मादौकारविधानं दरिद्राधातोर्णलि 'दरिद्रातेरार्धधातुके लोपो वक्तव्यः' इत्याल्लोपे ददरिद्रौ इत्यौकारश्रवणार्थं संपद्यते। ओकारविधाने तु आल्लोपे सति वृद्धेरसंभवाद् ददरिद्रो इत्योकार एव श्रूयेतेत्यर्थः। **अत एवेति**। अस्मादेव

या हि गुणप्रवृत्तिसमये वृद्धिः सा बाध्यते नान्येति भावः। अजागरिष्टाम्। अजागरिषुः। अजागरीरित्यादि। **दरिद्रा। इद्दरिद्रस्य**। इद्दरिद इति वक्तुमुचितम्। **आभ्यस्त**। क्रीणन्ति। क्रीणते। पुनन्ति। पुनते। दधति। दधते। ङिति किम्, क्रीणाति। पुनाति। दधाति। अतः किम्, बिभ्रति। **ओ इत्येव सिद्धे इति**। प्रथमत्यागे मानाभावादिति भावः। **निर्मूलमेवेति**। यत्तु व्याख्यातृभिः समर्थ्यते आमोऽभावे आतो लोपे कृते आदन्तत्वाभावादौत्वं नेति, तन्न, 'आत औ णलः' इत्यत्र प्राथम्यादोकारे कर्तव्ये औकारविधानं दरिद्रातेराल्लोपेऽपि

(वा ४१४६)। 'लुङि वा' (वा ४१४२)। 'सनि ण्वुलि ल्युटि च न' (वा ४०२८)। दरिद्रिता। अदरिद्रात् अदरिद्रिताम् अदरिद्रुः। दरिद्रियात्।

दरिद्रातेः औकारश्रवणार्थाद् औकारविधानाद्दरिद्रातेर्लिटि आम् नेति विज्ञायते। आमि सति णल औत्वाप्रसक्तेरित्यर्थः। इदं च 'कास्यनेकाच आम्' इति सूत्रभाष्ये ध्वनितम्, कैयटेन स्पष्टीकृतम्। तन्निर्मूलमेवेति। 'कास्प्रत्ययात्–' इति 'कस्येकाच्–' इति सूत्रस्थभाष्यकैयटविरोधादिति भावः। ददरिद्रतुः ददरिद्रुः। ददरिद्रिथ ददरिद्रथुः ददरिद्र। ददरिद्रौ ददरिद्रिव ददरिद्रिम। आर्धधातुके विवक्षित इति। 'आतो लोप इटि च' इत्याल्लोपो दरिद्रातेर्भवन् क्ङिति अक्ङिति च अजाद्यार्धधातुके भवति। स च आर्धधातुके विवक्षिते ततः प्रागेव भवतीति वक्तव्यमित्यर्थः। तेन दरिद्रातीति दरिद्र, आल्लोपे कृते पचाद्यच् सिध्यति। आर्धधातुके परे आल्लोपप्रवृत्तौ तु 'श्याद्व्यधा–' इत्यादन्तलक्षणो णप्रत्ययः स्यात्। ततश्च कृते णप्रत्यये आल्लोपं बाधित्वा 'आतो युक् चिण्कृतोः' इति युकि दरिद्राय इति स्यात्। आर्धधातुके विवक्षिते ततः प्रागेव आल्लोपे तु कृते आदन्तत्वाभावाद् णप्रत्ययाभावे पचाद्यच्प्रत्ययो निर्बाधः। तदिदं भाष्ये स्पष्टम्। लुङि वेति। लुङि आल्लोपो वा वक्तव्य इत्यर्थः। 'अद्यतन्यां वेति वक्तव्यम्' इति वार्तिकार्थसंग्रहोऽयम्। अद्यतन्यामित्यनेन अद्यतनभूतार्थकधातुविहितलुङ्विभक्तिर्विवक्षिता, भाष्ये तस्या एवोदाहरणात्। सनि ण्वुलि ल्युटि च नेति। एतेषु दरिद्रातेराल्लोपो नेति वक्तव्यमित्यर्थः। ण्वुलि यथा—दरिद्रायकः, आतो युक्। ल्युटि यथा—दरिद्राणः, अनादेशे कृते आल्लोपाभावात् सवर्णदीर्घः। सनि यथा—दिदरिद्रासति। अनन्तरस्येति न्यायादस्य वार्तिकप्राप्तस्यैव लोपस्यायं निषेधः। तेन 'तनिपतिदरिद्राणामुपसंख्यानम्' इति दरिद्रातेः सन इट्पक्षे 'आतो लोप इटि च' इत्याल्लोपो भवत्येव—दिदरिद्रिषति। तदुक्तं भाष्ये—'न दरिद्रायके लोपो दरिद्राणे च नेष्यते। दिदरिद्रासतीत्येके दिदरिद्रिषतीति वा'। दरिद्रितेति। तासि इटि उदाहृतवार्तिकेन आल्लोपः। 'आतो लोप इटि च' इत्यस्य संभवेऽपि न्याय्यत्वादत्र वार्तिकोपन्यासः। दरिद्रिष्यति।

श्रवणार्थं सद् आमभावे लिङ्गमिति हरदत्तमाधवादिग्रन्थैः स्वग्रन्थेन च विरोधात्। तत्कथमौत्वस्याप्रवृत्तिर्भवेत्। यदप्युक्तम्—ओकारौकारयोर्द्विमात्रत्वाविशेषादौकारविधानमिति, तदपि स्वीयः, तस्मिन्पक्षे आमो दुर्वारत्वप्रसङ्गात्। विवक्षित इति। तेन दरिद्रातीति दरिद्र इति पचाद्यजेव भवति। परसप्तम्यां तु 'श्याद्व्यधा–' इत्यादन्तलक्षणो णः स्यात्। सति तु तस्मिन् 'आतो युक् चिण्कृतोः' इति युकि दरिद्राय इति स्यादिति भावः। सनि ण्वुलीति। एष्वाल्लोपो नेत्यर्थः। दिद

दरिद्र्यात्। अदरिद्रीत्। इट्सकौ, अदरिद्रासीत्। चकासृ १०७४ दीप्तौ। झस्य अत्। चकासति। चकासांचकार। 'धि च' (सू २२४३) इति सलोपः। सिच एवेत्येके। चकाद्धि। 'चकाधि' इत्येव भाष्यम्। २४८४ तिप्यनस्तेः।

दरिद्रातु, दरिद्रितात् दरिद्रिताम् दरिद्रतु। दरिद्रिहि, दरिद्रितात् दरिद्रितम् दरिद्रित। दरिद्राणि दरिद्राव दरिद्राम। लङ्याह **अदरिद्रादिति**। इत्वं मत्वाह **अदरिद्रितामिति**। **अदरिद्रुरिति**। जक्षित्यादित्वेन अभ्यस्तत्वाज्जुसिति भावः। अदरिद्राः अदरिद्रितम् अदरिद्रित। अदरिद्राम् अदरिद्रिव अदरिद्रिम। **दरिद्रियादिति**। विधिलिङि सार्वधातुकत्वदित्त्वमिति भावः। आशीर्लिङ्याह **दरिद्र्यादिति**। आतो लोप इति भावः। लुङि आतो लोपपक्षे आह **अदरिद्रीदिति**। अदरिद्रिष्टामित्यादि। आल्लोपाभावपक्षे त्वाह **इट्सकाविति**। अदरिद्रिष्यत्। **चकासृ दीप्ताविति**। ऋदित् सेट्। चकास्ति चकास्त इति सिद्धवत्कृत्याह **झस्य अदिति**। जक्षित्यादित्वेन अभ्यस्तत्वादिति भावः। **चकासतीति**। चकास्सि चकास्थः चकास्थ। चकास्मि चकास्वः चकास्मः। **चकासांचकारेति**। अनेकाच्त्वादामिति भावः। चकासिता। चकासिष्यति। चकास्तु चकास्ताम् चकासतु। हेर्धिभावे चकास् धि इति स्थिते 'धि च' इति सलोप इति सिद्धान्तः। तत्र मतान्तरमाह **सिच एवेत्येक इति**। 'धि च' इति लोपः सिच एवेत्येके मन्यन्ते इत्यर्थः। 'धिसकारे सिचो लोपश्चकाद्धीति प्रयोजनम्' इति वार्तिकादिति तदाशयः। अस्मिन्पक्षे सकारस्य जश्त्वेन दकारः, तदाह **चकाद्धीति**। एके इत्यस्वरसोद्भावनम्। तद्बीजं तु 'धिसकारे सिचो लोपः-' इति वार्तिकं प्रत्याख्याय सकारमात्रस्य 'धि च' इति लोपस्याभ्युपगमः, तदाह **चकाधीत्येव भाष्यमिति**। चकास्तात् चकास्तम् चकास्त। चकासानि चकासाव चकासाम। लङि अ चकास् त् इति स्थिते **तिप्यनस्तेः**। न अस्तिः अनस्तिः, तस्येति विग्रहः। पदस्येत्यधिकृतम्। 'झलां जशोऽन्ते' इत्यतः अन्ते इत्यनुवर्तते। 'ससजुषोः-' इत्यतः स

रिद्रासति। दरिद्रायकः। दरिद्राणम्। **अदरिद्रुरिति**। 'सिजभ्यस्त-' इति झेर्जुस्। 'लङः शाकटायनस्यैव' इत्यादन्तलक्षणो विकल्पस्तु न भवति। परत्वात् 'श्नाभ्यस्तयोः-' इत्याल्लोपे आकारान्तस्यैवाभावात्। 'ई हल्यघोः' इत्यत ईत्वमिह न शङ्क्यमेव, झेर्जुसि हलादिपरत्वाभावादिति भावः। ननु दरिद्रा झि इति स्थिते जुसः प्रागेव आल्लोपात्परत्वादपवादत्वाच्च ईत्वं स्यात्, मैवम्, अकृतव्यूहपरिभाषाया जागरूकत्वात्। ईत्वनिमित्तं हि हलादित्वम्, तच्च विनाशोन्मुखम्, जुसो भावित्वात्। **झस्य अदिति**। 'अदभ्यस्तात्' इत्यनेन। **तिप्यनस्तेः**। पदान्तस्य किम्,

(८-२-७३) पदान्तस्य सस्य दः स्यात् तिपि न स्वस्तेः । [ससजुषोरित्यस्यापवादः] अचकात्, अचकाद् । अचकासुः । २४८५ सिपि धातो रुर्वा । (८-२-७४) पदान्तस्य धातोः सस्य रुः स्याद्वा । पक्षे दः । अचकाः, अचकात् । शासु १०७१ अनुशिष्टौ । शास्ति । २४८६ शास इदङ्हलोः । (६-४-३४) शास उपधाया इत्स्यादङि हलादौ क्ङिति च । 'शासिवसि-' (सू २४१०) इति षः । शिष्टः । शासति । शशास शशासतुः । शास्तु, शिष्टात् शिष्टाम् शासतु । २४८७ शा हौ । (६-४-३५) शास्तेः शादेशः स्याद्धौ परे । तस्याभीयत्वेना-

इति षष्ठ्यन्तमनुवर्तते 'वसुस्रंसुध्वंस्वनडुहां दः' इत्यतो द इति, तदाह **पदान्तस्येत्यादिना** । अनस्तेः किम् ? 'सलिलं सर्वमा इदम्' । आः इत्यसधातोर्लङ्स्तिपि इकारलोपे 'बहुलं छन्दसि' इति 'अस्तिसिचः-' इति ईडभावे हल्ङ्यादिलोपे रूपम् । प्रकृते तु चकासेर्लङ्स्तिपो हल्ङ्यादिलोपे सकारस्य दत्वे 'वाऽवसाने' इति चर्त्वजश्त्वे इत्यभिप्रेत्याह **अचकात् अचकादिति** । **अचकासुरिति** । 'सिजभ्यस्त-'इति जुसिति भावः । **सिपि धातो रुर्वा** । पदस्येत्यधिकृतम् । 'झलां जशोऽन्ते' इत्यतः अन्ते इत्यनुवृत्तम् । 'ससजुषोः-' इत्यतः स इति लुप्तषष्ठीकमनुवर्तते, तदाह **पदान्तस्येति पक्ष इति** । वसुस्रंस्वित्यतः तदनुवृत्तेरिति भावः । सिपि धातुत्वस्य अव्यभिचाराद्धातोरित्युत्तरार्थम् । अचकासीत् । अचकासिष्यत् । शासुधातुरुदित् सेट् । **शास इदङ्हलोः** । 'अनिदितां हलः-' इत्यत उपाधायाः क्ङिति इत्यनुवर्तते, तदाह **शास उपधाया इति** । **शासतीति** । जक्षादित्वेन अभ्यस्तत्वाददादेश इति भावः । शास्सि शिष्ठः शिष्ठ । शास्मि शिष्वः शिष्मः । आशास्ते इत्यत्र तु नेत्वम्, अङ्योग्यस्य परस्मैपदिन एव ग्रहणादिति भाष्ये स्पष्टम् । **शशासेति** । शशासिथ । शासिता । शासिष्यति । शास् हि इति स्थिते आह **शा हौ** । शा इति लुप्तप्रथमाकम् । 'शास इदङ्-' इत्यतः शास इत्यनुवर्तते, तदाह **शास्तेरिति** ।

चकास्ति । सस्येति किम्, वशेर्लङि तिपि अवट् । तिपि किम्, क्विपि चकाः । अनस्तेः किम्, सर्वमा इदम् । आ इति लङि तिपि अस्ते रूपम् । 'बहुलं छन्दसि' इति ईट् न । **शास इदङ्हलोः** । अङि—अशिषत्, अशिषताम् । क्ङिति । शिष्टः । शिष्टवान् । शिष्यात् । शिष्यास्ताम् । अङ्साहचर्यात्परस्मैपद एवेत्वम् । नेह, आशास्ते । अन्ये तु यस्माच्छासेरङ् संभवति तस्यैवेत्वमिति व्याख्याय व्यतिशिष्टे व्यतिशिड्ढ्वे इत्यात्मनेपदेऽपि इत्वं स्वीकुर्वन्ति । **शा हौ** । पूर्वसूत्रे उपधापदान्वयानुरोधेन शास इत्यवयवषष्ठ्यपि इह स्थानषष्ठ्येव, उपधाया इत्यस्य निवृत्तत्वादित्याह **शास्तेः शादेश इति** । 'घि च' इति सलोपेन शाधीति रूपे सिद्धेऽपि

१-अयं पाठः क्वचिन्नास्ति ।

सिद्धत्वाद्धेर्धिः । शाधि । अशात् अशिष्टाम् अशासुः । अशात् , अशाः । शिष्यात् । 'सर्तिशास्ति–' (सू २३८२) इत्यङ् । अशिषत् । अशासिष्यत् । दीधीङ् १०७६ दीप्तिदेवनयोः । एतदादयः पञ्च धातवश्छान्दसाः । दीधीते । 'एरनेकाचः–' (सू २७२) इति यण् । दीध्याते । २४८८ यीवर्णयोर्दीधीवेव्योः । (७–४–५३) एतयोरन्त्यस्य लोपः स्याद्यकारे इवर्णे च परे । इति लोपं बाधित्वा नित्यत्वाट्टेरेत्वम् , दीध्ये । 'दीधीवेवीटाम्' (सू २१९०) इति गुणनिषेधः । दीध्यांचक्रे । दीधिता । दीधिष्यते । वेवीङ् १०७७ वेतिना तुल्ये । वी गतीत्यनेन तुल्येऽर्थे वर्तत इत्यर्थः ।

इत्वापवादः । ननु शास्तेः शाभावे सति झल्परत्वाभावात्कथं हेर्धिरित्यत आह तस्याभीयत्वेनेति । यद्यपि 'धि च' इति सलोपे शाधीति सिद्धम् । तथापि सलोपस्यासिद्धत्वात् 'शास इत्' इति इत्वं स्यात् । तन्निवृत्तये शाविधानमित्याहुः । लङ्याह अशादिति । 'तिप्यनस्तेः' इति दत्वे चर्त्वविकल्प इति भावः । अशासुरिति । अभ्यस्तत्वाज्जुसिति भावः । अशाः, अशादिति । 'सिपि धातोः–' इति रुत्वदत्वविकल्प इति भावः । अशिष्टम् अशिष्ट । अशासम् अशिष्व अशिष्म । शिष्यादिति । 'शास इत्–' इति इत्वे 'शासिवसि–' इति ष् इति भावः । अशिषदिति । अङि इत्वमिति भावः । दीधीङ्धातुरीकारान्तः । ङित्वादात्मनेपदी । एतदादयः पञ्चेति । इदं च माधवानुरोधेन । तत्त्वं त्वग्रे वक्ष्यते । जक्षित्यादित्वादभ्यस्तत्वाज्झस्य अदादेशः । दीध्यते । दीधीषे दीध्याथे दीधीध्वे । लट इडादेशे आह यीवर्णयोर्दीधीवेव्योः । यिश्च इवर्णश्चेति द्वन्द्वात्सप्तमी । यि इत्यत्र इकार उच्चारणार्थः । 'तासस्त्योः–' इत्यतो लोप इत्यनुवर्तते । 'अलोऽन्त्यस्य' इत्यन्त्यस्य लोपः, तदाह एतयोरित्यादि । आदीध्य गतः, आवेव्य गतः–अत्र ल्यपि ईकारस्य लोपः । इवर्णे उदाहरणं वक्ष्यते । इति लोपमिति । लट इडादेशे दीधी इ इत्यत्र 'यीवर्णयोः–' इति इवर्णपरत्वात्प्राप्तं लोपं परमपि बाधित्वा नित्यत्वाट्टेरेत्वमित्यर्थः । कृते अकृते च लोपे प्रवृत्तेरेत्वं नित्यम् । तस्मिन्कृते यीवर्णपरकत्वाभावान्न लोप इति भावः । गुणनिषेध इति । । दीधी आमिति स्थिते 'सार्वधातुकार्धधातुकयोः' इति प्राप्तस्य

सलोपस्यासिद्धत्वात् 'शास इत्–' इति इत्वं स्यात् , तद्वारणाय शाविधानमित्याहुः । यीवर्णयोः । य्वोरित्युक्तेऽपीष्टासिद्धौ यकारेकारयोरिति स्फुटप्रतिपत्तिर्न स्यादिति वर्णग्रहणं कृतम् । यिश्च इवर्णश्च यीवर्णौ तयोः । यिश्चेति इकार उच्चारणार्थो न तु विवक्षितस्तदाह यकारे इवर्णे चेति । यिवर्णयोरिति पाठस्तूचितः । लोपं बाधित्वेति । लोपस्य तूदाहरणम्—आदीध्य गतः, आवेव्य गतः । दीधिता ।

अथ त्रयः परस्मैपदिनः। षस १०७८ षस्ति १०७९ स्वप्ने। सस्ति सस्तः ससन्ति। ससास सेसतुः। सस्तु। सधि। 'पूर्वत्रासिद्धम्' (सू १२) इति सलोपस्यासिद्धत्वाद् 'अतो हेः' (सू २२०२) इति न लुक्। असत् असस्ताम्। असः, असत्। सस्यात्। असासीत्, अससीत्। सन्ति। सन्तः। संस्तन्ति। बहूनां

निषेध इत्यर्थः। **दीधितेति**। इति कृते इवर्णपरकत्वादीकारस्य लोप इति भावः। दीधीताम् दीध्याताम् दीध्यताम्। दीधोष्व दीध्याथाम् दीधीध्वम्। दीध्यै दीध्यावहै दीध्यामहै। अदीधीत अदीध्याताम् अदीध्यत। अदीधीथाः अदीध्याथाम् अदीधीध्वम्। अदीधि अदीधीवहि अदीधीमहि। दीधीत दीधीयाताम्। दीधिषीष्ट दीधिषीयास्ताम् दीधिषीरन्। अदीधिष्ट। अदीधिष्यत। वस्तुतस्तु छन्दसि दृष्टानुविधित्वादेषां पञ्चानां लोकानुसारेण रूपवर्णनमनुचितम्। **वेवीङ् वेतिना तुल्य इति**। दीधीवद्रूपाणि। इति जक्षित्यादयः।

षस षस्ति स्वप्न इति। षोपदशावेतौ। द्वितीय इदित्। तत्र षसधातोरुदाहरति **सस्तीति**। **ससन्तीति**। अनभ्यस्तत्वादन्तादेश एवेति भावः। एत्वाभ्यासलोपौ मत्वाह **सेसतुरिति**। सेसुः। सेसिथ सेसथुः सेस। ससास, ससस सेसिव सेसिम। ससिता। ससिष्यति। सस्तु, सस्तात् सस्ताम् ससन्तु। सस् हि इति स्थिते हेर्धिभावे 'धि च' इति सलोपं मत्वाह **सधीति**। तत्र धि इत्यस्य स्थानिवत्त्वेन हित्वाद् 'अतो हेः' इति लुकमाशङ्क्याह **पूर्वत्रेति**। सस्तात् सस्तम् सस्त। ससानि ससाव ससाम। लङ्याह **असदिति**। असस् त् इति स्थिते हल्ङ्यादिना तकारलोपे 'तिप्यनस्तेः' इति सस्य दत्वमिति भावः। **असस्तामिति**। अससन् इत्यपि ज्ञेयम्। लङः सिपि तु असस् स् इति स्थिते 'सिपि धातोः–' इति रुर्वा पक्षे दः, हल्ङ्यादिलोपः, तदाह **असः, असदिति**। असस्तम् असस्त। अससम् असस्व असस्म। लिङ्याह **सस्यादिति**। सस्याताम्। सस्यास्ताम् इत्यादि। लुङ्याह **असासीदिति**। 'अतो हलादेः–' इति वृद्धिविकल्प इति भावः। अससिष्यत्।

अथ षस्तिधातोरुदाहरति। **सन्तीति**। इदित्त्वान्नुम्। 'नश्च–' इत्यनुस्वारे सस् त् ति इति स्थिते, 'स्कोः–' इति सलोपे, परसवर्णे, 'झरो झरि' इति प्रथमतकारस्य लोपविकल्पे, एकतं द्वितं वा रूपमिति भावः। **संस्तन्तीति**।

दीधिष्यते। वेविता। वेविष्यते। यीवर्णयोरिति किम्, आदीध्यनम्। आवेव्यनम्। षस। **असदिति**। 'तिप्यनस्तेः' इति दत्वम्। **अस इति**। 'सिपि धातोः–' इति रुर्वा। पक्षे दः। **सन्तीति**। इदित्त्वान्नुमि सन्स् त् ति इति स्थिते 'स्कोः–'

समवाये द्वयोः संयोगसंज्ञा नेत्याश्रित्य 'स्कोः–' (सू ३८०) इति लोपाभावाद् संस्ति संस्तः संस्तन्ति इत्येके । वश १०८० कान्तौ । कान्तिरिच्छा । वष्टि उष्टः उशन्ति । वक्षि उष्ठः । उवाश ऊशतुः । वशिता । वष्टु, उष्टात् उष्टाम् । उड्ढि । अवट् औष्टाम् औशन् । अवशम् । उश्यात् । उश्यास्ताम् ।

अनभ्यस्तत्वादन्तादेश एवेति भावः । सिपि संस्त् सि इति स्थिते 'स्कोः–' इति सलोपे अनुस्वारस्य परसवर्णो नकारः । सवर्णपरत्वाभावाद् 'झरो झरि' इति तकारलोपो न । सन्त्सि सन्थः सन्थ । संस्मि संस्वः संस्मः । ससंस्त ससंस्ततुः । ससंस्तिथ । ससंस्तिव ससंस्तिम । संस्तिष्यति । सन्तु, सन्तात् सन्ताम् संस्तन्तु । संस्त् हि इति स्थिते हेर्धिभावे 'स्कोः–' इति सलोपे परसवर्णे सन्त् धि इति स्थिते 'झरो झरि' इति तकारस्य लोपः, सन्धि । लोपाभावे तकारस्य जश्त्वे सन्द्धि, सन्तात् सन्तम् सन्त । संस्तानि संस्ताव संस्ताम । लङस्तिपि असस्त् त् इति स्थिते हल्ङ्यादिलोपे संयोगादिलोपे संयोगान्तस्य लोपे असन् । असन्ताम् असंस्तन् । असन् असन्तम् असन्त । असंस्तम् असंस्व असंस्म । संस्यात् । असंस्तीत् । असंस्तिष्यत् । मतान्तरमाह **बहूनामिति** । **इत्याश्रित्येति** । तथा च प्रकृते लुङस्तिपि संस्त् ति इति स्थिते झलि परे अनुस्वारसकारतकाराणां त्रयाणां समवायात् स् त् इत्यनयोः संयोगसंज्ञाविरहात् 'स्कोः–' इति लोपाभावात् संस्तीत्याद्यूह्यमित्यर्थः । **वश कान्ताविति** । कान्तिरिच्छा । सेट् । **वष्टीति** । 'व्रश्च–' इति शस्य षत्वे तकारस्य ष्टुत्वेन टः । **उष्ट इति** । ङिति 'ग्रहिज्या–' इति संप्रसारणे रूपमिति भावः । **उवाशेति** । लिटि अकिति 'लिट्यभ्यासस्य–' इति संप्रसारणमिति भावः । **ऊशतुरिति** । परत्वाद् ग्रहिज्येति संप्रसारणे कृते द्वित्वे हलादिशेषे सवर्णदीर्घ इति भावः । उवशिथ ऊशथुः ऊश । उवाश, उवश ऊशिव ऊशिम । **वशितेति** । अनेन सेट्त्वं द्योतितम् । वशिष्यति । **उष्टामिति** । उशन्त्वित्यपि ज्ञेयम् । **उड्ढीति** । वश् हि इति स्थिते धिभावे अपित्त्वेन ङित्वाद् ग्रहिज्येति संप्रसारणे शस्य षत्वे धस्य ष्टुत्वेन ढकारे षस्य जश्त्वेन ड इति भावः । वशानि वशाव वशाम । लङ्याह **अवडिति** । हल्ङ्यादिलोपे शस्य षः, षस्य डः, तस्य चर्त्वविकल्प इति भावः । **औशन्निति** । अवट् औष्टम् औष्ट । **अवशमिति** । पित्त्वान्न संप्रसारणमिति भावः । औश्व औश्म । विध्याशीर्लिङोः

इति सलोपे 'झरो झरि सवर्णे' इति तकारस्य वा लोपः । **संस्ति संस्त इति** । इत्रापि पूर्ववत्सलोपो वा बोध्यः । **वश** कान्तौ । भाषायामप्यस्य प्रयोगो दृश्यते ।

अवाशीत्, अवशीत्। 'चर्करीतं च' १०८१ (ग. सू. ११९)। यङ्लुगन्तमदादौ बोध्यम्। ह्नुङ् १०८२ अपनयने। ह्नुते। जुह्नुवे। ह्नुवीत। ह्नोषीष्ट। अह्नोष्ट।

॥ इति तिङन्तेऽदादिप्रकरणम् ॥

उश्यादिति सिद्धवत्कृत्याह उश्याताम्। उश्यास्तामिति। अवशीत्, अवाशीत्। अवशिष्यत्। तदेवं दीधीङ् वेवीङ् षस षस्ति वश एते पञ्च धातवः छान्दसा एवेति माधवादयः। तत्र 'दीधीवेवीटाम्' इति सूत्रे दीधीवेव्योः छन्दोविषयत्वादिति भाष्यम्। 'जक्षित्यादयः षट्' इति सूत्रे षसिवशी छान्दसाविति भाष्यम्। एतद्भाष्यादेव षस्तिधातोर्नात्र पाठ इति प्रतीयते। अत एव 'षस शास्ति स्वप्ने' इति पाठमभ्युपगम्य श्तिपा निर्देशेन शास एवार्थभेदात् पुनः पाठ इति कैयट आह। अत्र वशधातोरपि छान्दसत्ववचनं प्रायिकम्, 'वष्टि भागुरिरल्लोपम्' 'जयाय सेनान्यमुशन्ति देवाः' इत्यादिप्रयोगदर्शनादित्यास्तां तावत्।

चर्करीतं चेति। धातुपाठे गणसूत्रमिदम्। 'चर्करीतम्' इति यङ्लुगन्तस्य संज्ञा पूर्वाचार्यसिद्धा, तदाह यङ्लुगन्तमदादाविति। तेन यङ्लुगन्ताच्छबेव विकरणः, तस्य लुक्, न तु श्यनादि विकरणान्तरम्। परस्मैपदिन इत्युपक्रमाद्यङ्लुगन्तस्य परस्मैपदित्वमेव। ह्नुङ् अपनयन इति। अनिडयम्। ह्नुत इति। ह्नुवाते ह्नुवते इत्यादि। जुह्नुव इति। जुह्नुवाते जुह्नुविरे। क्रादिनियमादिट्, जुह्नुविषे। जुह्नुविवहे। होता। ह्नोष्यते। ह्नुताम्। ह्नुष्व। ह्नवै ह्नवावहै। अह्नुत-इति सिद्धवत्कृत्य विधिलिङ्याह ह्नुवीतेति। आशीर्लिङ्याह ह्नोषीष्टेति। लुङ्याह अह्नोष्टेति।

इति श्रीवासुदेवदीक्षितविदुषा विरचितायां सिद्धान्तकौमुदीव्याख्यायां बालमनोरमाख्यायां लुग्विकरणं समाप्तम्।

'वष्टि भागुरिरल्लोपम्' 'जयाय सेनान्यमुशन्ति देवाः' इति। चर्करीतं च। गणसूत्रमिदम्। चर्करीतमिति यङ्लुगन्तस्य पूर्वाचार्याणां संज्ञा। अदादौ बोध्यमिति। तेन यङ्लुगन्तेषु 'अदिप्रभृतिभ्यः–' इति शपो लुग् भवतीति भावः। प्राचा तु चर्करीतमिति यङ्लुगन्तं परस्मैपदमित्युक्तम्, तच्चेहाप्रकृतत्वादुपेक्षितम्।

इति तत्त्वबोधिन्यामदादिप्रकरणम्।

अथ तिङन्ते जुहोत्यादिप्रकरणम् ॥ ४५ ॥

हु १०८३ दानादनयोः। 'आदाने च' इत्येके। 'प्रीणनेऽपि' इति भाष्यम्। दानं चेह प्रक्षेपः। स च वैधे आधारे हविषश्चेति स्वभावाल्लभ्यते। इतश्चत्वारः परस्मैपदिनः। २४८९ जुहोत्यादिभ्यः श्लुः। (२-४-७५) शपः श्लुः स्यात्। २४९० श्लौ। (६-१-१०) धातोर्द्वे स्तः। जुहोति जुहुतः। 'अदभ्यस्तात्' (सू २४७९) इत्यत्। 'हुश्नुवोः-' (सू २३८७) इति यण्। जुह्वति। २४९१ भीह्रीभृहुवां श्लुवच्च। (३-१-३९) एतेभ्यो

अथ श्लुविकरणा धातवो निरूप्यन्ते। हु दानादनयोरिति। दाने अदने चेत्यर्थः। भाष्यमिति। 'तृतीया च होश्छन्दसि' इति सूत्रस्थमिति शेषः। ननु यदि दानमिह प्रसिद्धं विवक्षितं तर्हि ब्राह्मणाय गां ददातीत्यत्र जुहोतीत्यपि प्रयोगः स्यादित्यत आह दानं चेह प्रक्षेप इति। नन्वेवमपि कूपे घटं प्रक्षिपति, आहवनीये जलं प्रक्षिपतीत्यत्रापि जुहोतीति प्रयोगः स्यादित्यत आह स चेति। स प्रक्षेपः विधिबोधिते आधारे आहवनीयादौ पुरोडाशादिहविष इति लभ्यते इत्यन्वयः। कुत इत्यत आह स्वभावादिति। अनादिसिद्धलोकव्यवहारादित्यर्थः। तथा च विधिबोधित आधारे विधिबोधितस्य देवतायै त्यज्यमानस्य हविषः प्रक्षेपे हुधातुर्वर्तते इति फलितम्। एतच्च पूर्वमीमांसायां तृतीये 'सर्वप्रदानं हविषस्तदर्थत्वात्' इत्यधिकरणे अध्वरमीमांसाकुतूहलवृत्तौ प्रपञ्चितमस्माभिः। जुहोत्यादिभ्यः श्लुः। शप इति। आदिप्रभृतिभ्यः–' इत्यतस्तदनुवृत्तेरिति भावः। हु अ इति स्थिते शपः श्लौ कृते हु ति इति स्थिते श्लौ। शेषं पूरयति धातोर्द्वे स्त इति। 'एकाचो द्वे–' इत्यतो 'लिटि धातोः–' इत्यतश्च तदनुवृत्तेरिति भावः। द्वित्वे कृते अभ्यासकार्यमभिप्रेत्याह जुहोतीति। यणिति। उवङपवाद इत्यर्थः। भीह्री। भी ह्री भृ हु एषां द्वन्द्वात्पञ्चम्यर्थे षष्ठी। 'कास्प्रत्ययात्–' इत्यत आम् लिटीत्यनुवर्तते, तदाह एतेभ्य इति। श्लुवदिति सप्तम्यन्ताद्वतिरित्य-

---

हु दाना। यद्यपि स्वत्वनिवृत्तिपूर्वकं परस्वत्वापादनमेव दानं तथापि प्रयोगमनुसृत्य व्याचष्टे प्रक्षेप इति। वैध इति। आहवनीयादौ। हविष इति। विधिबोधितद्रव्यस्येत्यर्थः। स्वभावादिति। तेन आहवनीये पुरोडाशे प्रक्षेप्तव्ये प्रमादेन कोपेन वा पाषाणः प्रक्षिप्तः पुरोडाशो वा गर्तादौ प तु प्रक्षेपो न होम इति ज्ञेयम्। परस्मैपदिन इति। तेन 'होष्ये' इति केषांचित्प्रयोगोऽसाधुरेव। 'स्मराग्नौ जुह्वानाः' इत्यानन्दलहरीप्रयोगस्तु साधुरेव। शानचोऽप्रवृत्तावपि चान-

क्रियाम्वा स्यात्, आमि श्लाविव कार्यं च। जुहवांचकार, जुहाव। होता। होष्यति। जहोतु, जुहुतात्। 'हेर्धिः' जुहुधि। आटि परत्वाद्गुणः। जुहवानि। परत्वाद् 'जुसि च' (सू २४८१) इति गुणः। अजुहवुः। जुहुयात्। हूयात्। अहौषीत्। ञि भी १०८४ भये। बिभेति। २४६२ भियोऽन्यतरस्याम्। (६-४-११५) इकारः स्याद्धलादौ क्ङिति सार्वधातुके। बिभितः, बिभीतः बिभ्यति। बिभयांचकार, बिभाय। भेता। ह्री १०८५ लज्जायाम्। जिह्रेति जिह्रीतः जिह्रियति। जिह्रयांचकार, जिह्राय। पॄ १०८६ पालनपूरणयोः।

भिप्रेत्याह **आमि श्लाविव कार्यं चेति**। **जुहवामिति**। आमि श्लाविव द्वित्वे गुण इति भावः। **जुहावेति**। जुहुवतुः। जुहविथ, जुहोथ। जुहुविव। **हेर्धिरिति**। 'हुझल्भ्यो हेर्धिः' इत्यनेनेति भावः। जुहवानीत्यत्र आटः पित्त्वेन अङित्त्वाद् गुणे प्राप्ते तं बाधित्वा 'हुश्नुवोः–' इति यणि प्राप्ते आह **आटि परत्वादिति**। 'हुश्नुवोः–' इत्यपेक्षया गुणः परत्वाद्भवतीत्यर्थः। लङि अजुहोत् अजुहुताम् इति सिद्धवत्कृत्य 'सिजभ्यस्त–' इति जुसि 'हुश्नुवोः–' इति यणमाशङ्कयाह **परत्वाज्जुसि चेति गुण इति**। **अजुहवुरिति**। अजुहोः अजुहुतम् अजुहुत। अजुहवम् अजुहुव अजुहुम। **अहौषीदिति**। सिचि वृद्धिः। अहौ-षामित्यादि। अहोष्यत्। **ञि भी भय इति**। अनिट् ईदन्तः। शपः श्लौ द्वित्वादि मत्वाह **बिभेतीति**। **भियोऽन्यतरस्याम्**। 'इद्दरिद्रस्य' इत्यत इदिति 'गमहन–' इत्यतः क्ङितीति 'ई हल्यघोः' इत्यतो हलीति 'अत उत्–' इत्यतः सार्वधातुके इति चानुवर्तते इत्यभिप्रेत्य शेषं पूरयति **इकारः स्यादित्यादिना**। **बिभ्यतीति**। 'अदभ्यस्तात्' इत्यत्। **बिभयामिति**। 'भीह्रीभृहुवां श्लुवच्च' इति श्लुवत्त्वाद् द्वित्वादीति भावः। **बिभायेति**। बिभ्यतु। बिभयिथ, बिभेथ। बिभ्यिव बिभ्यिम। **भेतेति**। भेष्यति। बिभेतु, बिभितात्, बिभीतात् बिभिताम्, बिभीताम् बिभ्यतु। बिभिहि, बिभीहि, बिभितात्, बिभीतात् बिभितम्, बिभीतम् बिभित, बिभीत। बिभयानि बिभयाव बिभयाम। अबिभेत् अबिभिताम्, अबिभीताम् अबि-भयुः। अबिभेः अबिभितम्, अबिभीतम् अबिभित, अबिभीत। अबिभयम् अबि-भिव, अबिभीव अबिभिम, अबिभीम। बिभियात्, बिभीयात् इत्यादि। आशी-र्लिङि भीयात् भीयास्ताम्। अभैषीत्। अभेष्यत्। **ह्री लज्जायामिति**। अनिट्। **जिह्रियतीति**। 'अदभ्यस्तात्' इत्यत्। इयङ्। **जिह्रयामिति**।

शन्तत्वात्। **आटाति**। 'आडुत्तमस्य–' इत्यनेन। **परत्वादिति**। 'हुश्नुवोः–' इति यणपेक्षया परत्वादित्यर्थः। **भियोऽन्यतरस्याम्**। सार्वधातुके किम्

२४९३ अर्तिपिपर्त्योश्च। (७-४-७७) अभ्यासस्येकारोऽन्तादेशः स्यात् श्लौ। २४९४ उदोष्ठ्यपूर्वस्य। (७-१-१०२) अङ्गावयवौष्ठ्यपूर्वो य ॠत् तदन्तस्याङ्गस्य उरस्यात्। गुणवृद्धी परत्वादिमं बाधेते। पिपर्ति। उत्वम्, रपरत्वम्, 'हलि च' (सू. ३५४) इति दीर्घः। पिपूर्तः पिपुरति। पपार। क्ङिति क्ङिति

'भीह्रीभृहुवाम्–' इत्याम्। श्लुवत्त्वाद् द्वित्वादीति भावः। जिह्रायेति। जिह्रयिथ, जिह्रेथ। जिह्रियिव। ह्रेता। ह्रेष्यति। जिह्रेतु, जिह्रीतात् जिह्रीहि। जिह्रयाणि। अजिह्रेत्। जिह्रीयात्। ह्रीयात्। अह्रैषीत्। अह्रेष्यत्। पॄधातुः सेट्। लटस्तिपि शपः श्लौ द्वित्वे पॄ पॄ इति स्थिते अर्तिपिपर्त्योश्च। 'अत्र लोपः–' इत्यस्मादभ्यासस्येति 'भृञामित्' इत्यस्माद् इदिति 'निजां त्रयाणाम्–' इत्यतः श्लाविति चानुवर्तते इत्यभिप्रेत्य शेषं पूरयति अभ्यासस्येत्यादिना। तथा च अभ्यासे ॠकारस्य इत्वे रपरत्वे हलादिशेषे उत्तरखण्डस्य गुणे रपरत्वे पिपर्तीति वक्ष्यति। तत्र उत्तरखण्डे ॠकारस्य उत्वं शङ्कितुमाह उदोष्ठ्य। 'ॠत इद्धातोः' इत्यत ॠत इत्यनुवर्तते। 'अङ्गस्य' इत्यधिकृतमिहानुवृत्तमावर्तते। एकमवयवषष्ठ्यन्तम् ओष्ठ्यस्य विशेषणम्, अपरं तु ॠता विशेष्यते, तदन्तविधिः, तदाह अङ्गावयवौष्ठ्येत्यादिना। 'अङ्गावयवेति' किम्? समीर्णः 'ॠ गतौ' क्र्यादिः, तस्मात्संपूर्वात् क्तप्रत्यये 'श्र्युकः किति' इति इण्निषेधे 'ॠत इद्धातोः' इति इत्वे रपरत्वे 'हलि च' इति दीर्घे 'रदाभ्याम्–' इति निष्ठानत्वे तस्य णत्वे समीर्ण इति रूपम्। तत्र मकारात्मकौष्ठ्यपूर्वत्वादित्वं बाधित्वा उत्वं स्यात्। अङ्गावयवेत्युक्तौ तु मकारस्य ओष्ठ्यस्य अङ्गावयवत्वाभावादुत्वं न भवति। तथा च प्रकृतेऽपि पॄतीत्यत्र इदमुत्वं स्यादिति शङ्का प्राप्ता। तां परिहरति गुणवृद्धी इति। इमामिति। उत्वविधिमित्यर्थः। पिपर्तीति। उत्वात्परत्वाद् गुण इति भावः। पिपॄ तस् इति स्थिते आह उत्वमिति। ङित्त्वेन गुणाभावाद् 'उदोष्ठ्य–' इत्युत्वमिति भावः। पिपुरतीति। अभ्यस्तत्वाददादेश ङित्त्वाद् गुणाभावादुत्वमिति भावः। पिपर्षि पिपूर्थः पिपूर्थ। पिपर्मि पिपूर्वः पिपूर्मः। लिटि णलयाह पपारेति। उत्वात्परत्वाद् वृद्धिरिति भावः। 'अर्तिपिपर्त्योश्च' इत्यभ्यासस्य नेत्वम्, तत्र श्लावित्यनुवृत्तेः। प्राप्त

भीयते। बेभीयते। हलादौ किम्, बिभ्यति। क्ङिति किम्, बिभेति। केचिदत्र हलादौ क्ङितीत्येतन्नातीवोपयुज्यते, इत्वविधानस्य बिभित इत्यादौ चरितार्थत्वात्, बिभ्यति बिभेतीत्यादौ यणादेः प्रवृत्तिसंभवादित्याहुः। अर्तिपिपर्त्योश्च। अर्तेरुदाहरणमियर्तीति वक्ष्यति। उदोष्ठ्य। अङ्गावयवेति किम्, ॠ गतौ क्र्यादिस्तस्मात् क्तप्रत्यये 'श्र्युकः किति' इति इण्निषेधात् समीर्ण इति भवति। अन्यथा

'ऋच्छत्यृताम्' (सू. २३८३) इति गुणे प्राप्ते। २४६५ शृदॄप्रां ह्रस्वो वा। (७-४-१२) एषां किति लिटि ह्रस्वो वा स्यात्। पक्षे गुणः। पप्रतुः पप्रुः, पपरतुः पपरुः। परिता, परीता। अपिपः अपिपूर्ताम् अपिपरुः। पिपूर्यात्। पूर्यात्। अपारीत् अपारिष्टाम्। ह्रस्वान्तोऽयम् इति केचित्। पिपर्ति पिपृतः पिप्रति। पिपृयात्। आशिषि प्रियात्। अपार्षीत्। पाणिनीयमते तु 'तं रोदसी पिपृतम्' इत्यादौ छान्दसत्वं शरणम्। डु भृञ् १०८७ धारणपोषणयोः।

इति। गुणे नित्यं प्राप्ते इत्यर्थः। शॄदॄप्राम्। शॄ दॄ पॄ एषां द्वन्द्वः। लिटीति। 'दयतेर्दिगि लिटि' इत्यतस्तदनुवृत्तेरिति भावः। यद्यपि पूर्वसूत्रेषु क्वापि कितीति न दृष्टं तथापि अस्य 'ऋच्छत्यृताम्' इति गुणापवादत्वाद् गुणस्य च तस्य किदर्थत्वात्कितीत्युक्तम्। पप्रतुरिति। पपॄ अतुस् इति स्थिते ऋकारस्य ह्रस्वे तस्य यणिति भावः। गुणपक्षे आह पपरतुरिति। गुण एव तु न विकल्पितः। गुणाभावे 'वार्णादाङ्गं बलीयः' इति यणं बाधित्वा 'उदोष्ठ्य-' इत्युत्त्वप्रसङ्गात्। पपरिथ पप्रथुः,पपरथुः पप्र,पपर। पपार,पपर पप्रिव,पपरिव। 'वृतो वा' इति दीर्घविकल्पं मत्वाह परिता, परीतेति। परिष्यति, परीष्यति। पिपर्तु, पिपूर्तात् पिपूर्ताम् पिपुरतु। पिपूर्हि, पिपूर्तात् पिपूर्तम् पिपूर्त। पिपराणि पिपराव पिपराम। लङ्याह अपिपरिति। अपि पॄ त् इति स्थिते गुणे रपरत्वे हल्ङ्यादिना तकारलोपे रेफस्य विसर्गः। अपिपरुरिति। अभ्यस्तत्वाद् जुस्। कृते 'जुसि च' इति गुणे रपरत्वम्। अपिपः अपिपूर्तम् अपिपूर्त। अपिपरम् अपिपूर्व अपिपूर्म। केचिदिति। अन्ये आचार्या इत्यर्थः। ह्रस्वान्तत्वपक्षे 'उदोष्ठ्य-' इत्युत्त्वं नेति मत्वाह पिपृत इति। ह्रस्वान्तस्य अनिट्त्वाल्लुडादौ पर्तेत्यादि। पिपृहि। अपार्षीदिति। ह्रस्वान्तस्य अनिट्त्वान्न सिज्लोप इति भावः। नन्वाचार्यान्तरसंमतं ह्रस्वान्तत्वं कुतोऽस्माभिरादर्तव्यम् इत्यत आह पाणिनीयेति। पाणिनिसंमतदीर्घान्तत्वस्यैवाश्रयणे 'तं रोदसी पिपृतम्' इत्यादौ 'उदोष्ठ्य-' इत्युत्त्वापत्त्या ऋकारस्य ह्रस्वस्य श्रवणानापत्त्या तद्विषये छान्दसत्वमेव शरणमनुसरणीयं स्यादित्यर्थः। डु

तु सम्पूर्ण इति स्यात्। शॄदॄप्राम्। शॄ हिंसायाम्। दॄ विदारणे-इमौ क्र्यादी। पक्षे गुण इति। 'ऋच्छत्यृताम्' इत्यनेन। पप्रतुरिति। ह्रस्वपक्षे यण्। ननु ह्रस्वग्रहणमिह मास्तु, गुणानुवृत्त्या तस्यैव विकल्पोऽस्तु। तथा च यणादेशेन पप्रतुः शश्रतुरित्यादि सिध्यत्येव। गुणपक्षे तु पपरतुः शशरतुरित्याद्यपि सिध्यतीति चेत्, नैवम्। गुणाभावपक्षे 'ॠत इद्धातोः' इतीत्वप्रसङ्गात्। न चान्तरङ्गत्वाद्यणेव स्यादिति वाच्यम्, वार्णादाङ्गस्य बलीयस्त्वात्। डुभृञ्। 'ड्वितः क्त्रिः'। भृत्रि-

२४९६ भृञामित्। (७-४-७६) भृञ् माङ् ओहाङ् एषां त्रयाणामभ्यासस्य इत्स्यात् श्लौ। बिभर्ति: बिभृतः बिभ्रति। बिभृध्वे। श्लुवद्भावाद् द्वित्वेत्वे। बिभरामास, बभार। बभर्थ। बभृव। बिभृहि। बिभराणि। अबिभः अबिभृताम् अबिभरुः। बिभृयात्। भ्रियात्। भृषीष्ट। अभार्षीत्। अभृत।

भृञिति। अनिडयं ञित्वादुभयपदी। श्लौ सति द्वित्वादौ बिभर्तीत्यादि स्थितम्। भृञामित्। भृञामिति बहुवचनाद् भृञादीनामिति लभ्यते। 'अत्र लोपः–' इत्यतः अभ्यासस्येति 'निजां त्रयाणां गुणः श्लौ' इत्यतः त्रयाणां श्लाविति चानुवर्तते, तदाह भृञ् माङित्यादिना। बिभ्रतीति। अभ्यस्तत्वाददादेशे यण्। बिभर्षि बिभृथः बिभृथ। बिभर्मि बिभृवः बिभृमः। बिभृते बिभ्राते बिभ्रते। बिभृषे बिभ्राथे–इति सिद्धवत्कृत्याह बिभृध्व इति। बिभ्रे बिभृवहे बिभृमहे। श्लुवद्भावादिति। 'भीह्रीभृहुवाम्–' इत्यनेन इति भावः। बिभरामासेति। अनुप्रयोगसामर्थ्यादस्तेः भूभावो नेति भावः। बभारेति। श्लावित्यनुवृत्तेः 'भृञामित्' इति नेत्वम्। बभ्रतुः बभ्रुः इत्यपि ज्ञेयम्। 'कृसृभृवृ–'इति लिटि इण्निषेधः। थल्यपि 'अचस्तास्वत्–' इति नित्यमिण्निषेधः, ऋदन्तत्वेन भारद्वाजमतेऽपि निषेधात्, तदाह बभर्थेति। बभ्रथुः बभ्र। बभार, बभर इति सिद्धवत्कृत्याह बभृवेति। कादित्वादिण्निषेध इति भावः। बभ्रे बभ्राते बभ्रिरे। बभृषे बभ्राथे बभृढ्वे। बभ्रे बभृवहे बभृमहे। भर्ता। भरिष्यते। बिभर्तु, बिभृतात् बिभृताम् बिभ्रतु–इति सिद्धवत्कृत्याह बिभृहीति। हेरपित्त्वेन ङित्त्वाद् गुणनिषेध इति भावः। बिभृतात् बिभृतम् बिभृत इति सिद्धवत्कृत्याह बिभराणीति। आटः पित्त्वेन ङित्त्वाभावान्न गुणनिषेध इति भावः। बिभराव बिभराम। लङ्याह अबिभरिति। अबिभृ त् इति स्थिते गुणे रपरत्वे हल्ङ्यादिलोपे रेफस्य विसर्ग इति भावः। अबिभरुरिति। अभ्यस्तत्वाद् झेर्जुस् 'जुसि च' इति गुणः। अबिभः अबिभृतम् अबिभृत। अबिभरम् अबिभृव अबिभृम। अबिभृत अबिभ्राताम् अबिभ्रत। अबिभृथाः अबिभ्राथाम् अबिभृध्वम्। अबिभ्रि अबिभृवहि अबिभृमहि। आशीर्लिङ्याह भ्रियादिति। 'रिङ्शयग्लिङ्क्षु' इति रिङ्। आत्मनेपदे आशीर्लिङ्याह भृषीष्टेति। 'उश्च' इति कित्त्वान्न गुणः। अभार्षीदिति। अनिट्त्वान्न सिज्लोपः। सिचि वृद्धिः रपरत्वमिति भावः। अभार्ष्टमित्यादि। आत्मनेपदे लुङ्याह अभृतेति। 'ह्रस्वादङ्गात्' इति सिचो लोपः। अभृषातामित्यादि।

मम्। भृञामित्। णिजां त्रयाणामित्यतोऽनुवर्तनादाह एषां त्रयाणामिति। केचित्तु कपिञ्जलाधिकरणन्यायेन त्रयाणामिति लभ्यत इत्याहुः। त्रयाणां किम्,

माङ् १०८८ माने शब्दे च। २४९७ ई हल्यघोः। (६-४-११३) श्नाभ्यस्तयोरात ईत्स्यात्सार्वधातुके क्ङिति हलि, न तु घुसंज्ञकस्य। मिमीते। 'श्नाभ्यस्तयोः–' (सू २४८३) इत्याल्लोपः। मिमाते। मिमते। ममे। मास्ता। ओ हाङ् १०८९ गतौ। जिहीते जिहाते जिहते। जहे। हाता। हास्यते। ओ हाक् १०९० त्यागे। परस्मैपदी। जहाति। २४९८ जहातेश्च। (६-४-११६) इत्स्याद्वा हलादौ क्ङिति सार्वधातुके। पक्षे ईत्वम्। जहितः, जहीतः। जहति।

माङ् मान इति। अनिट्। ङित्त्वादात्मनेपदी। श्लौ द्वित्वे 'भृञामित्' इति अभ्यासस्य इत्त्वे मि मा ते इति स्थिते। ई हल्यघोः। ई इति लुप्तप्रथमाकम्। 'श्नाभ्यस्तयोरातः' इत्यनुवर्तते। 'गमहन–' इत्यतः क्ङितीति 'अत उत्सार्वधातुके' इत्यतः सार्वधातुके इति चानुवर्तते, तदाह श्नाभ्यस्तयोरित्यादिना। आल्लोप इति। अजादौ क्ङिति सार्वधातुके इति शेषः। मिमते इति। अभ्यस्तत्वाददादेशः। मिमीषे मिमाथे मिमीध्वे। मिमे मिमीवहे मिमीमहे। ममे ममाते ममिरे। ममिषे ममाथे ममिध्वे। ममे ममिवहे ममिमहे। माता। मास्यते। मिमीताम् मिमाताम् मिमताम्। मिमीष्व मिमाथाम् मिमीध्वम्। मिमै मिमावहै मिमामहै। अमिमीत अमिमाताम् अमिमत। अमिमीथाः अमिमाथाम् अमिमीध्वम्। अमिमि अमिमीवहि अमिमीमहि। मिमीत मिमीयाताम् मिमीरन्। मिमीथाः मिमीयाथाम् मिमीध्वम्। मिमीय मिमीवहि मिमीमहि। मासीष्ट। अमास्त अमासाताम्। अमासत। अमास्थाः अमासाथाम् अमाध्वम्। अमासि अमास्वहि अमास्महि। अमास्यत। ओ हाङ् गताविति। अनिट्। ङित्त्वादात्मनेपदी। 'भृञामित्' इति इत्त्वम्। माङ्धातुवद्रूपाणि। अभ्यासे चुत्वं विशेषः, तदाह जिहीते इत्यादि। इति भृञादयस्त्रयो गताः। ओ हाक् त्याग इति। अनिट्। ओकारः ककारश्च इत्। जहातीति। श्लौ द्वित्वे अभ्यासचुत्वमिति भावः। तस्मादौ 'श्नाभ्यस्तयोरातः' इति नित्यमीत्त्वे प्राप्ते जहातेश्च। 'इद्दरिद्रस्य' इत्यत इदिति 'भियोऽन्यतरस्याम्' इत्यतः अन्यतरस्यामिति चानुवर्तते। 'गमहन–' इत्यतः क्ङितीति, 'अत उत्सार्वधातुके' इत्यतः सार्वधातुके इति 'ई हल्यघोः' इत्यतो हलीति च इत्यभिप्रेत्य शेषं

जहाति, श्लौ किम्, जहार। ई हल्यघोः। श्नाभ्यस्तयोरिति। लुनीते। पुनीते। क्ङितीति किम्, लुनाति। अघोः किम्, धत्तः। दत्तः। मिमीत इति। 'घुमास्था–' इतीत्वमिह न प्रवर्तते, तत्रार्धधातुक इत्यनुवृत्तेः। अन्यथा मातः, माथः, गाते, गासे—इत्यादावतिप्रसङ्गात्। अत एव काशिकायामुक्तमार्धधातुक इत्याधिकारो न ल्यपीति योगं यावदिति। जहातेश्च। क्ङितीति किम्, जहाति। सार्वधातुके

जहौ। जहितात्। २४९९ आ च हौ। (६-४-११७) जहातेर्हौ परे आ स्याच्चादिदीतौ। जहाहि, जहिहि, जहीहि। अजहात्। अजहुः। अजहाः। २५०० लोपो यि। (६-४-११८) जहातेरालोपः स्याद्यादौ सार्वधातुके। जह्यात्। 'एर्लिङि' (सू २३७४) हेयात्। अहासीत्। डु दाञ् १०९१ दाने। प्रणिददाति। दत्तः। ददति। दत्ते। ददौ। 'घ्वसोः-' (सू २४०१) इत्येत्वाभ्यासलोपौ। देहि। अददात् अदत्ताम् अददुः। दद्यात्। देयात्। अदात्

पूरयति इत्स्याद्धेति। जहतीति। अभ्यस्तत्वाददादेशे 'श्नाभ्यस्तयोः-' इत्यालोपः। जहाविति। जहतुः जहुः। जहिथ, जहाथ जहथुः जह। जहौ जहिव जहिम। हाता। हास्यति। जहितादिति। जहिताम्, जहीताम जहतु। आ च हौ। आ इति लुप्तप्रथमाकम्। जहातेरिति। 'जहातेश्च' इत्यतस्तदनुवृत्तेरिति भावः। चादिदीताविति। 'इद्दरिद्रस्य' इत्यत 'ई हल्यघोः' इत्यतश्च तयोरिह चकारेणानुकर्षादिति भावः। जहितात्, जहीतात् जहितम्, जहीतम् जहित, जहीत। जहानि जहाव जहाम। लङ्याह अजहादिति। अजहिताम्, अजहीताम् अजहुः। अजहा इति। अजहितम्, अजहीतम् अजहित, अजहीत। अजहाम् अजहिव, अजहीव अजहिम, अजहीम। लोपो यि। 'जहातेश्च' इत्यतो जहातेरिति 'श्नाभ्यस्तयोरातः' इत्यत आत इति, 'अत उत्सार्वधातुके' इत्यतः सार्वधातुके इति चानुवर्तते। यि इति सप्तम्यन्तं सार्वधातुकविशेषणम्। तदादिविधिः, तदाह जहातेरित्यादिना। 'जहातेश्च' इत्यस्यापवादः। आशीर्लिङ्याह एर्लिङीति। अहासीदिति। 'यमरम-' इति सगिटौ। अहास्यत्। डु दाञ्। उभयपदी अनिट्। प्रणिददातीति। 'नेर्गद-' इति णत्वम्। दत्त इति। ददा तस् इति स्थिते अघोरिति पर्युदासादीत्वाभावे 'श्नाभ्यस्तयोः-' इत्यालोपः। ददतीति। अभ्यस्तत्वाददादेशे 'श्नाभ्यस्तयोः-' इत्याल्लोप इति भावः। ददासि दत्थः दत्थ। ददामि दद्वः दद्मः। दत्ते इति। ददाते ददते। दत्से ददाथे दद्ध्वे। ददे दद्वहे दद्महे। ददौ इति। ददतुः ददुः। ददिथ, ददाथ ददथुः दद। ददौ ददिव ददिम। ददे ददाते ददिरे। ददिषे ददाथे ददिध्वे। ददे ददिवहे ददिमहे। दाता। दास्यति, दास्यते। ददातु, दत्तात् दत्ताम् ददतु। इति सिद्धवत्कृत्य देहि इत्यत्राह घ्वसोरिति। दत्तात् दत्तम् दत्त। ददानि ददाव ददाम। दत्ताम् ददाताम्

किम्, हीयते। चादिदीताविति। अत एव भट्टिः प्रायुङ्क्त—'जहिहि जहीहि जहाहि रामभार्याम्' इति। लोपो यि। सार्वेति किम्, हेयात्। प्रणिददातीति। 'नेर्गद-' इति णत्वम्। दत्त इति। 'श्नाभ्यस्तयोः-' इत्यालोपः। अघोरित्युक्त्वा-

अदाताम् अदुः । अदित । डु धाञ् १०१२ धारणपोषणयोः । 'दानेऽपि' इत्येके। प्रणिदधाति । २५०१ दधस्तथोश्च । (८-२-३८) द्विरुक्तस्य झषन्तस्य धाञ्धातोर्बशो भष् स्यात्तथयोः परयोः स्ध्वोश्च परतः । 'वचनसामर्थ्यादाल्लोपो न स्थानिवत्' इति वामनमाधवौ । वस्तुतस्तु 'पूर्वत्रासिद्धे न स्थानिवत्' । धत्तः दधति । धत्थः धत्थ । दध्वः दध्मः । धत्ते । धत्से । धद्ध्वे । धेहि । अधित ।

ददताम् । दत्स्व ददाथाम् दद्ध्वम् । ददै ददावहै ददामहै । लङ्याह अददादिति । अददुरिति । अभ्यस्तत्वाद् जुस् । अददाः अदत्तम् अदत्त । अददाम् अदद्व अदद्म । विधिलिङ्याह दद्यादिति । 'श्नाभ्यस्तयोः-' इत्याल्लोपः । आशीर्लिङि तु 'एर्लिङि' इत्येत्वमभिप्रेत्याह देयादिति । दासीष्ट । लुङ्याह अदादिति । 'गातिस्था-' इति सिचो लुगिति भावः । अदाः अदातम् अदात । अदाम् अदाव अदाम । लुङ्यात्मनेपदे आह अदितेति अदा स् त इति स्थिते 'स्थाघ्वोरिच्च' इति दाधातोरन्त्यस्य इकारः सिचः कित्त्वं च । कित्त्वान्न गुणः । 'ह्रस्वादङ्गात्' इति सिचो लोप इति भावः, अदिषाताम् अदिषत । अदिथाः अदिषाथाम् अदिढ्वम् । अदिषि अदिष्वहि अदिष्महि । अदास्यत्, अदास्यत । डु धाञ् । ञित्त्वादुभयपदी । अनिट् । प्रणिदधातीति । 'नेर्गद-' इति णत्वम् । तसि श्लौ द्वित्वे अभ्यासजश्त्वे 'श्नाभ्यस्तयोः-' इत्याल्लोपे दध् तस् इति स्थिते दधस्तथोश्च । धाधातोः कृतद्वित्वस्य दधा इत्यस्य दधः इति षष्ठ्यन्तम् । 'एकाचो बशः-' इत्यतो झषन्तस्य बशो भष् इत्यनुवर्तते । त थ् अनयोर्द्वन्द्वात् सप्तमीद्विवचनम् । तकारादकार उच्चारणार्थः । तकारथकारयोरिति लभ्यते । चकारात् स्ध्वोरिति समुच्चीयते । सकारे ध्वशब्दे चेति लभ्यते, तदाह द्विरुक्तस्येत्यादिना । तथा च अभ्यासे दकारस्य धकारः, तकारपरकत्वात् । ननु 'श्नाभ्यस्तयोः-' इत्याल्लोपस्य 'अचः परस्मिन्-' इति स्थानिवत्त्वान्न तकारपरकत्वम्, नापि झषन्तत्वमित्यत आह वचनसामर्थ्यादिति । वस्तुतस्त्विति । भष्भावस्य पूर्वत्रासिद्धीयत्वादेव तस्मिन् कर्तव्ये आल्लोपस्य स्थानिवत्त्वाप्रसक्तेर्वचनसामर्थ्याश्रयणक्लेशो वृथेति भावः । धत्त इति । धस्य चर्त्वेन त इति भावः । दधतीति । 'अदभ्यस्तात्' इत्यदादेशे 'श्नाभ्यस्तयोः-' इत्याल्लोपः । धत्थ

दीत्वं तु न । अदादिति । 'गातिस्था-' इति सिचो लुक् । दधस्तथोश्च । दध इति कृतद्विर्वचनाभ्यासकार्यो धाञेव गृह्यते न तु दध धारण इत्ययमिति व्याचष्टे द्विरुक्तस्येति । झषन्तस्य किम्, दधाति । नन्वेवं धत्त इत्यादावपि न स्यादाल्लोपस्य स्थानिवत्त्वेनाझशन्तत्वादत आह वचनसामर्थ्यादिति ।

अथ त्रयः स्वरितेतः। णिजिर् १०९३ शौचपोषणयोः। २५०२ निजां त्रयाणां गुणः श्लौ। (७-४-७५) णिजिर् विजिर् विष्लृ एषामभ्यासस्य गुणः स्याच्छ्लौ। नेनेक्ति नेनिक्तः नेनिजति। नेक्ता। नेक्ष्यति। नेनेक्तु। नेनिग्धि। २५०३ नाभ्यस्तस्याचि पिति सार्वधातुके। (७-३-८७) लघूपधगुणो न स्यात्। नेनिजानि। अनेनेक् अनेनिक्ताम् अनेनिजुः। नेनिज्यात्।

इति। थकारपरकत्वाद् भष्। धत्थ। दधामि। दध्व इति। परनिमित्ताभावान्न भष्। दध्मः। धत्ते इति। दधाते दधते। धत्से इति। स्कारपरकत्वाद्भषिति भावः। दधाथे। धद्ध्वे इति। दध् ध्वे इति स्थिते ध्वशब्दपरकत्वाद्भषिति भावः। दधे दध्वहे दध्महे। दधौ। दधे। धाता। धास्यति, धास्यते। दधातु, धत्तात् धत्ताम् दधतु। धेहीति। 'ध्वसोः–' इत्येत्त्वाभ्यासलोपाविति भावः। धत्तात् धत्तम् धत्त। दधानि दधाव दधाम। धत्ताम् दधाताम् दधताम्। धत्स्व दधाथाम् धद्ध्वम्। दधै दधावहै दधामहै। अदधात्, अधत्त। दध्यात्, दधीत। धेयात्, धासीष्ट। अधात्। अधितेति। 'स्थाघ्वोरिच' इति इत्वे 'ह्रस्वादङ्गात्' इति सिचो लोप इति भावः। अधास्यत्, अधास्यत। णिजिर्। धातुः, अनिडयं णोपदेश इरित्। इकारस्य प्रत्येकमित्त्वाभावान्न नुम्। इकारस्य स्वरितत्वप्रतिज्ञाबलादात्मगे फले आत्मनेपदं भवत्येव। तस्मादयमप्युभयपदी। एवं विजिरपि ज्ञेयः। निजां त्रयाणाम्। निजामिति बहुवचनात्तदादीनां ग्रहणम्। 'अत्र लोपः–' इत्यतः अभ्यासस्येत्यनुवर्तते, तदाह णिजिर् इत्यादिना। नेनेक्तीति। श्लौ द्वित्वे हलादिशेषे उत्तरखण्डस्य तिपमाश्रित्य गुणे पूर्वखण्डस्यानेन गुणे चोः कुत्वमिति भावः। अभ्यस्तत्वाददादेशं मत्वाह नेनिजतीति। नेनेक्षि नेनिक्थः नेनिक्थ। नेनेज्मि नेनिज्वः नेनिज्मः। नेनिक्ते नेनिजाते नेनिजते। नेनिक्षे नेनिजाथे नेनिग्ध्वे। नेनिजे नेनिज्वहे नेनिज्महे। निनेज निनिजतुः निनिजुः। निनेजिथ निनिजथुः निनिज। निनेज निनिजिव निनिजिम। निनिजे निनिजाते निनिजिरे। निनिजिषे निनिजाथे निनिजिध्वे। निनिजे निनिजिवहे निनिजिमहे। नेक्ता। नेक्ष्यति। नेनेक्तु, नेनिक्तात् नेनिक्ताम् नेनिजतु। नेनिग्धीति। अपित्त्वेन ङित्त्वान्न गुणः। हेर्धिः। नेनिक्तात् नेनिक्तम् नेनिक्त। 'आडुत्तमस्य–' इति पित्त्वेन अङित्वाल्लघूपधगुणे प्राप्ते नाभ्यस्तस्याचि। 'मिदेर्गुणः' इत्यतो गुण इति 'पुगन्त–' इत्यतो लघूपधस्येति चानुवर्तते इत्यभिप्रेत्य शेषं पूरयति लघूपधगुणो न स्यादिति।

निजाम्। श्लाविति किम्, निनेज। नाभ्यस्तस्य। अभ्यस्तस्य किम्, द्वेषाणि। अचि किम्, वेवेष्टि। पिद्ग्रहणम् 'उतो वृद्धिर्लुकि हलि' इत्युत्तरार्थम्। सार्वेति किम्, निनेज।

निज्यात्। अनिजत्, अनैक्षीत्, अनिक्त। विजिर् १०१४ पृथग्भावे। वेवेक्ति, वेविक्ते। विवेजिथ। अत्र 'विज इट्' (सू २५३६) इति ङित्त्वं न, 'ओ विजी' इत्यस्यैव तत्र ग्रहणात्। 'णिजिविजी रुधादावपि'। विष्लृ १०१५ व्याप्तौ। वेवेष्टि, वेविष्टे। लृदित्वादङ्, अविषत्। तङि क्सः। अजादौ 'क्सस्याचि' (सू २३३७) इत्यल्लोपः। अविक्षत अविक्षाताम् अविक्षन्त।

अथ आगणान्तात्परस्मैपदिनश्छान्दसाश्च। घृ १०१६ क्षरणदीप्त्योः। 'जिघर्म्यग्निं हविषा घृतेन'। 'भृञामित्' (सू २४९६)। 'बहुलं छन्दसि' (सू ३५१८) इतीत्वम्। हृ १०१७ प्रसह्यकरणे। 'अयं स्रुवोऽभिजिहर्ति

नेनिजानीति। नेनिजाव नेनिजाम। नेनिक्ताम् नेनिजाताम् नेनिजताम्। नेनिग्ध्व नेनिजाथाम् नेनिग्ध्वम्। नेनिजै नेनिजावहै नेनिजामहै। लङि परस्मैपदे आह **अनेनेगिति। अनेनिजुरिति**। अभ्यस्तत्वाज्जुसिति भावः। अनेनेक् अनेनिक्तम् अनेनिक्त। अनेनिजम्। 'नाभ्यस्तस्य–' इति न गुणः। अनेनिज्व अनेनिज्म। निज्यात्। लुङ्याह **अनिजदिति**। इरित्त्वादङिति भावः। **अनिक्तेति**। 'झलो झलि' इति सिज्लोपः। अनिक्षाताम् इत्यादि। विजिरपि णिजिर्वत्। **अन्येति**। थलि इट्पक्षे 'विज इट्' इति विहितं ङित्त्वं नेत्यर्थः। अतो न गुणनिषेध इति भावः। **ओ विजी इत्यस्यैवेति**। व्याख्यानादिति भावः। **रुधादावपीति**। ततश्च 'रुधादिभ्यः श्नम्' इति श्नम्विकरणावपि ताविति भावः। **विष्लृ व्याप्तौ इति**। लृदित्, उभयपदी, अनिट्। णिजेरिव रूपाणि। **वेवेष्टीति**। ष्टुत्वेन तकारस्य टः। सिपि 'षढोः–' इति षस्य कत्वम्। वेवेक्षि वेविष्ठः। वेविड्ढि। **अविषदिति**। लृदित्वादङिति भावः। **तङि क्स इति**। 'शल इगुपधात्–' इत्यनेनेति भावः। **आगणान्तादिति**। जुहोत्यादिगणसमाप्तिपर्यन्तमित्यर्थः। घृधातुरनिट्। तिपि श्लौ द्वित्वे अभ्यासकार्ये गुणे रपरत्वे जघर्ति। जघृतः जघ्रति। 'जघर्म्यग्निं हविषा घृतेन' इति बह्वृचमन्त्रपाठः। 'जिघर्म्यग्निं मनसा घृतेन' इति तैत्तिरीयपाठः। अत्र इत्त्वमभ्यासस्याह **भृञामिदिति**। ननु तत्र त्रयाणामेव ग्रहणमित्यत आह **बहुलमिति**। इत्त्वं छान्दसमिति भावः। जघार जघ्रतुः। जघर्थ। जघ्र। जघ्रिव। घरिष्यति। जघर्तु, जघृतात् जघ्रतु। जघृहि। जघराणि। अजघः अजघृताम् अजघरुः। अजघरम् अजघृव। जघृयात्। घ्रियात्। अघार्षीत्। अघरिष्यत्। **हृ प्रसह्यकरण इति**। घृधातुवद्रूपाणि। **अयं स्रुवो अभिजिहर्ति होमानिति**। स्रुवे साध्यमाने याजमानो मन्त्रः। अत्रापि अभ्यासस्य

बहुलं छन्दसीतीत्वमिति। एतच्च पूर्वोक्तान्वयि। **इयर्तीति**। अभ्यासस्य

होमान्'। ऋ १०९८ सृ १०९९ गतौ। 'बहुलं छन्दसि' (सू ३४९८) इत्येव सिद्धे 'अर्तिपिपर्त्योश्च' (सू २४९३) इतीत्वविधानादयं भाषायामपि। 'अभ्यासस्यासवर्णे' (सू २२९०) इतीयङ्। इयर्ति इयृतः इयृति। आर आरतुः। 'इडत्त्यर्ति–' (सू २३८४) इति नित्यमिट्। आरिथ। अर्ता। अरिष्यति। इयराणि। ऐयः ऐयृताम् ऐयरुः। इयृयात्। अर्यात्। आरत्। ससर्ति। मस

इत्वं छान्दसमिति भावः। **ऋ सृ गताविति**। इमावनिटौ। तत्र ऋधातोः छान्दसत्वेऽपि लोकेऽपि क्वचित् प्रयोगं समर्थयति **बहुलमिति**। 'भृञामित्' 'अर्तिपिपर्त्योश्च' 'बहुलं छन्दसि' इति सूत्रस्थितिः। तत्र बहुलं छन्दसीत्येव ऋधातोरित्वसिद्धेः 'अर्तिपिपर्त्योश्च' इत्यर्तिग्रहणाल्लोकेऽपि ऋधातोः श्लुविकरणस्य प्रयोगो विज्ञायत इत्यर्थः। एतच्चात्रैव सूत्रे भाष्ये स्पष्टम्। अत एव भाष्यात् श्लुविकरणस्यैव ऋधातोः 'अर्तिपिपर्त्योश्च' इत्यत्र ग्रहणम्। पिपर्तिसाहचर्याच्च, श्लावित्यस्य अभ्यासग्रहणस्य चानुवृत्तेश्चेत्यलम्। **अभ्यासस्यासवर्णे इति**। शपः श्लौ ऋ ति इति स्थिते द्वित्वे उरदत्त्वं बाधित्वा 'अर्तिपिपर्त्योश्च' इत्यभ्यासऋकारस्य इत्त्वे रपरत्वे हलादिशेषे उत्तरखण्डस्य ऋकारस्य गुणे रपरत्वे इ अर् ति इति स्थिते 'अभ्यासस्यासवर्णे' इति इयङि इयर्ति इति रूपमित्यर्थः। **इयृत इति**। पूर्ववदेव द्वित्वादि। तसः अपित्त्वेन ङित्त्वाद् गुणनिषेध इति भावः। **इयृतीति**। पूर्ववदेव द्वित्वादि। अभ्यस्तत्वाददादेशः। ङित्त्वान्न गुणः। उत्तरखण्डस्य ऋकारस्य यण् रेफ इति भावः। इयर्षि इयृथः। इयर्मि इयृवः इयृमः। लिट्याह **आरेति**। थलि 'अचस्तास्वत्–' इति 'ऋतो भारद्वाजस्य' इति नित्यमिण्निषेधे प्राप्त आह **इडत्त्यर्तीति नित्यमिडिति**। आरिथ। आरिम। **अर्तेति**। अनिट्त्वादिति भावः। **अरिष्यतीति**। 'ऋद्धनोः स्ये' इति इडिति भावः। इयर्तु, इयृतात् इयृताम् इयृतु। इयृहि, इयृतात् इयृतम् इयृत। **इयराणीति**। आटः पित्त्वेन अङित्त्वान्न गुणनिषेध इति भावः। इयराव इयराम। लङ्याह **ऐय इति**। श्लौ ऋ त् इति स्थिते द्वित्वे अभ्यासस्य इत्त्वे रपरत्वे हलादिशेषे इयङि उत्तरखण्डस्य गुणे रपरत्वे च हल्ङ्यादिलोपे रेफस्य विसर्गे इयः इति स्थिते आटि वृद्धौ ऐयः इति रूपमिति भावः। न च लावस्थायामडिति पक्षे आटि वृद्धौ रपरत्वे आर् त् इति स्थिते द्वित्वे हलादिशेषे सवर्णदीर्घे हल्ङ्यादिलोपे रेफस्य विसर्गे आः इति स्यादिति शङ्क्यम्, 'बहुलं छन्दस्यमाङ्योगेऽपि' इति बहुलग्रहणेन त्र लावस्थायामाडि-

---

इयङ्, अभ्यासादुत्तरस्य तु गुणः। **इयृतीति**। 'अदभ्यस्तात्' इत्यत्। **अर्यादिति**। 'गुणोऽर्ति–' इति गुणः। **आरदिति**। 'सर्तिशास्ति–' इत्यङि 'ऋद-

११०० भर्त्सनदीप्त्योः । बभस्ति । 'घसिभसोर्हलि च' (३५५०) इत्युपधालोपः । 'झलो झलि' (सू २२८१) इति सलोपः । बब्धः । बप्सति । कि ११०१ ज्ञाने । चिकेति । तुर ११०२ त्वरणे । तुतोर्ति तुतूर्तः तुतुरति ।

त्यस्यानाश्रयणादित्याहुः । **ऐयरुरिति** । ऐयः ऐयृतम् एयृत । ऐयरम् ऐयृव ऐयृम । विधिलिङ्याह **इयृयादिति** । यासुटो ङित्त्वाद् गुणनिषेध इति भावः । इयृयाताम् इत्यादि । आशीर्लिङ्याह **अर्यादिति** । 'अकृत्सार्वधातुकयोः—' इति दीर्घः प्राप्तः । तं बाधित्वा 'रिङ् शयग्लिङ्क्षु' इति रिङ् प्राप्तः । तं बाधित्वा 'गुणोऽर्तिसंयोगाद्योः' इति गुण इति भावः । लुङ्याह **आरदिति** । 'सर्तिशास्त्यर्तिभ्यश्च' इत्यङि 'ऋदृशोऽङि—' इति गुण इति भावः । आरिष्यत् । तदेवम् ऋधातुं निरूप्य सृधातुं निरूपयति **ससर्तीति** । ससृतः सस्रति इत्यादि सुगमम् । ससार । ससर्थ । सस्रव । सर्ता । सरिष्यति । ससर्तु । असस: अससृताम् अससरुः । सस्रियात् । स्रियात् । असरत् । **भस भर्त्सनेति** । अयं सेट् । **बभस्तीति** । श्लौ भस् ति इति स्थिते द्वित्वे अभ्यासजश्त्वमिति भावः । बभस् तस् इति स्थिते आह **घसिभसोरिति** । 'घसिभसोर्हलि च' इत्यस्यायमर्थः—छन्दसि अनयोरुपधाया लोपः स्याद् हलादावजादौ च क्ङिति परे इति । तथा च बभस् तस् इत्यत्र उपधालोपे 'झलो झलि' इति सकारलोपे तकारस्य 'झषस्तथोः—' इति धत्वे भकारस्य जश्त्वमिति भावः । **बप्सतीति** । अभ्यस्तत्वाददादेशे बभस् अति इति स्थिते 'घसिभसोः—' इत्युपधालोपे भकारस्य चर्त्वमिति भावः । बभस्सि बब्धः बब्ध । बभस्मि बप्स्वः बप्स्मः । बभास बप्सतुः बप्सुः । बभसिथ बप्सथुः बप्स । बभास, बभस बप्सिव बप्सिम । भसिता । भसिष्यति । बभस्तु, बब्धात् बब्धाम् बप्सतु । बब्धि, बब्धात् बब्धम् बब्ध । बभसानि बभसाव बभसाम । अबभः अबब्धाम् अबप्सुः । अबभः अबब्धम् अबब्ध । अबप्सम् अबप्स्व अबप्स्म । बप्स्यात् । भस्यात् । अभासीत्, अभसीत् । अभसिष्यत् । **कि ज्ञाने । चिकेतीति** । किधातोस्तिपि श्लौ द्वित्वे अभ्यासचुत्वे उत्तरखण्डस्य गुण इति भावः । चिकितः चिक्यति । चिकेषि चिकिथः चिकिथ । चिकेमि चिकिवः चिकिमः । चिकाय चिक्यतुः चिक्युः । चिकयिथ, चिकेथ । चिक्यिव । केता । केष्यति । चिकेतु, चिकितात् चिकिताम् चिक्यतु । चिकिहि । चिकयानि । अचिकेत् अचिकिताम् अचिकयुः । अचिकेः । अचिकयम् अचिकिव । चिकियात् । कीयात् । अकैषीत् । अकेष्यत् । **तुर त्वरण इति । तुतूर्त इति** । 'हलि च' इति दीर्घः । तुतोर्षि तुतूर्थः तुतूर्थ । तुतोर्मि तुतूर्वः । तुतोर । तुतुरतुः । तुतोरिथ ।

शोऽङि—' इति गुणः । **बब्ध इति** । तसस्तकारस्य 'झषस्तथोः—' इति धत्वम् ।

धिष ११०३ शब्दे। दिधेष्टि दिधिष्टः। **धन ११०४ धान्ये।** दधन्ति दधन्तः दधनति। **जन ११०५ जनने।** जजन्ति। **२५०४ जनसनखनां सञ्झलोः। (६-४-४२)** एषामाकारोऽन्तादेशः स्याज्झलादौ सनि झलादौ क्ङिति च। जजातः जज्ञति। जजंसि। जजान। जजायात्, जजन्यात्। जायात्, जन्यात्।

तुतुरिव। तोरिता। तोरिष्यति। तुतोर्तु, तुतूर्तात् तुतूर्ताम् तुतुरतु। तुतूर्हि। तुतुराणि। अतुतोः अतुतूर्ताम् अतुतुरुः। अतुतोः। अतुतोरम् अतुतूर्व। तुतूर्यात्। तूर्यात्। अतोरीत्। अतोरिष्यत्। **धिष शब्दे सेट्। दिधेष्टीति।** श्लौ द्वित्वादौ लघूपधगुणे तकारस्य ष्टुत्वमिति भावः। दिधिषति। दिधेषि दिधिष्ठः। दिधेष्मि दिधिष्वः। दिधेष दिधिषतुः। दिधेषिथ। दिधिषिव। धेषिता। धेषिष्यति। दिधेष्टु, दिधिष्टात्। दिधिषतु। दिधिड्ढि। दिधिषाणि। अदिधेट् अदिधिष्टाम् अदिधिषुः। अदिधिषम् अदिधिष्व। दिधिष्यात्। धिष्यात्। अधेषीत्। अधेषिष्यत्। **धन धान्य इति।** धान्यार्जन इत्यर्थः। **दधन्त इति।** चमूष् सहने इति धातोः चचंसे इतिवद् 'अनुनासिकस्य क्वि-' इति न दीर्घः। दधंसि दधन्थः। दधन्मि दधन्वः दधन्मः। दधान दधनतुः। दधनिथ। दधनिव। धनिता। धनिष्यति। दधन्तु, दधन्तात् दधन्ताम् दधनतु दधंहि। दधनानि। अदधन् अदधन्ताम् अदधनुः। अदधन् अदधन्तम् अदधन्त। अदधनम् अदधन्व अदधन्म। दधन्यात्। धन्यात्। अधानीत्, अधनीत्। अधनिष्यत्। **जन जनन इति।** उत्पत्तौ अकर्मकः। उत्पादने सकर्मकः। **जनसन।** 'विड्वनोः-' इत्यत आदित्यनुवर्तते। तदाह **एषामाकारोऽन्तादेश इति।** सन् झल् इत्यनयोः द्वन्द्वात् सप्तमीद्विवचनम्। सनि झलि चेति लभ्यते। 'अनुदात्तोपदेश-' इत्यतो झलि क्ङितीत्यनुवर्तते। तत्र झलीत्यनुवृत्तेन सन् विशेष्यते। तदादिविधिः। झलादौ सनीति लभ्यते। क्ङितीत्यनुवृत्तं तु एतत्सूत्रस्थेन झला विशेष्यते। तदादिविधिः। झलादौ क्ङितीति लभ्यते। तथा च झलादौ सनीति झलादौ क्ङितीति च परनिमित्तद्वयं लब्धम्, तदाह **झलादौ सनि झलादौ क्ङिति चेति।** सन्विशेषणं झलादाविति किम्? जिजनिषति। सिसनिषति। चिखनिषति। अथ क्ङितोर्झल्विशेषणस्य प्रयोजनमाह **जज्ञतीति।** जजन अति इति स्थिते

तुतूर्त इति। 'हलि च' इति दीर्घः। **धन** धान्ये। धान्यार्जन इत्यर्थः। **दधन्त इति।** छान्दसत्वाद् 'अनुनासिकस्य-' इति नेह दीर्घ इत्याहुः। **जनसनखनाम्।** जन जनने, जनी प्रादुर्भावे इत्युभयोरपि ग्रहणम्। झलादौ सनि सिषासति। **जज्ञतीति।** 'गमहन-' इत्युपधालोपः। **जजायादिति।** 'ये विभाषा' इति वा

गा ११०६ स्तुतौ । 'देवाञ्जिगाति सुम्नयुः' । जिगीतः जिगति ।

॥ इति तिङन्तेषु जुहोत्यादिप्रकरणम् ॥

अथ तिङन्ते दिवादिप्रकरणम् ॥ ४६ ॥

दिवु ११०७ क्रीडाविजिगीषाव्यवहारद्युतिस्तुतिमोदमदस्वप्नकान्तिगतिषु । शूषन्ताः परस्मैपदिनः । २५०५ दिवादिभ्यः श्यन् । (३-१-६९)

अतोर्ङित्त्वेऽपि झलादित्वाभावादात्त्वाभावे 'गमहन-' इत्युपधालोपे नकारस्य श्चुत्वेन ञकार इति भावः । 'जनसनखनां सन्-' इत्याश्रित्य योगविभागेन उक्तार्थसिद्धिं चाश्रित्य झल्ग्रहणं त्वत्र सूत्रे प्रत्याख्यातं भाष्ये । **जजंसीति** । 'नश्च-' इत्यनुस्वारः । जजाथः जजाथ । जजन्मि जजन्वः जजन्मः । **जजानेति** । जज्ञतुः । सेडयम् । जजनिथ जज्ञथुः । जज्ञिव । जनिता । जनिष्यति । जजन्तु, जजातात् । जजाहि । जजनानि । अजजन् अजजाताम् अजजुः । अजजनम् अजजन्व । विधिलिङि 'ये विभाषा' इति मत्वाह **जजायात्, जजन्यात् इति** । अजनीत्, अजानीत् । अजनिष्यत् । **गा स्तुतौ । देवान् जिगातीति** । 'भृञामित्' इत्यत्र 'बहुलं छन्दसि' इति वचनादभ्यासस्य इत्त्वमिति भावः । **जिगीत इति** । 'ई हल्यघोः' इति ईत्वम् । **जिगतीति** । अभ्यस्तत्वाददादेशे 'श्नाभ्यस्तयोः-' इत्याल्लोपः । जिगासि जिगीथः जिगीथ । जिगामि जिगीवः । जगौ जगतुः । जगिथ, जगाथ । जगिव । गाता । गास्यति । जिगातु, जिगीतात् जिगीताम् जिगतु । जिगीहि । जिगानि । अजिगात् अजिगीताम् अजिगुः । अजिगाः । अजिगाम् अजिगीव । जिगीयात् । आशिषि गेयात् । अगासीत् । अगास्यत् ।

इति श्रीवासुदेवदीक्षितविदुषा विरचितायां सिद्धान्तकौमुदीव्याख्यायां बालमनोरमाख्यायां श्लुविकरणं समाप्तम् ।

अथ श्यन्विकरणधातवो निरूप्यन्ते । **दिवु क्रीडेति** । उदिदयम् । तेन क्त्वायामिड्विकल्पः । निष्ठायां च नेट् । **शूषन्ताः इति** । जृष् झृष् वयोहानौ इत्येतत्पर्यन्ता इत्यर्थः । **दिवादिभ्यः श्यन्** 'कर्तरि शप्' इत्यतः कर्तरीति

आत्वम् । एवं जायादित्यत्रापि । **जिगातीति** । 'बहुलं छन्दसि' इति इत्वम् ।

इति तत्त्वबोधिन्यां जुहोत्यादिप्रकरणम् ।

दिवु क्रीडा । उदित्करणं क्त्वायामिड्विकल्पार्थं निष्ठायामनिडर्थं च । देवित्वा । द्यूत्वा । द्यूतम् । क्रीडायाम्, दीव्यन्ति माणवकाः । विजिगीषायाम्, शत्रुं

शपोऽपवादः। 'हलि च' (सू ३५४) इति दीर्घः। दीव्यति। दिदेव। देविता। देविष्यति। दीव्यतु। अदीव्यत्। दीव्येत्। दीव्यात्। अदेवीत्। अदेविष्यत्। षिवु ११०८ तन्तुसन्ताने। परिषीव्यति। परिषिषेव। न्यषेवीत्, न्यसेवीत्। स्रिवु ११०९ गतिशोषणयोः। ष्ठिवु १११० निरसने। केचिदिहेमं न पठन्ति। ष्णुसु ११११ अदने। 'आदाने' इत्येके। 'अदर्शने' इत्यपरे। सुष्णोस। ष्णसु १११२ निरसने। स्नस्यति। सस्नास। क्नसु १११३ ह्वरणदीप्त्योः। ह्वरणं कौटिल्यम्। चक्नास। व्युष १११४ दाहे। वुव्योष। प्लुष १११५ च। नृती १११६ गात्रविक्षेपे। नृत्यति। ननर्त। २५०६ सेऽसिचि कृतचृतच्छृदतृदनृतः। (७-२-५७) एभ्यः परस्य सिजिभन्नस्य सादेरार्धधातुकस्य इड्वा स्यात्। नर्तिष्यति, नर्त्स्यति। नृत्येत्। नृत्यात्। अनर्तीत्। त्रसी १११७

'सार्वधातुके यक्' इत्यतः सार्वधातुके इति चानुवर्तते इत्यभिप्रेत्याह-**शपोऽपवाद इति**। शकारनकारावितौ। दिव् य ति इति स्थिते आह **हलि चेति दीर्घ इति**। श्यनः अपित्त्वेन ङित्त्वान्न गुण इति भावः। दीव्यतः। दीव्यन्ति इत्यादि सुगमम्। **दिदेवेति**। दिदिवतुः। दिदेविथ। दिदिविव। सेट्त्वं सूचयन्नि **देवितेति**। षिवुधातुरपि सेट्, षोपदेशः, दिवुधातुवत्। **परिषीव्यतीति**। 'परिनिविभ्यः सेव-' इति षत्वमिति भावः। **परिषिषेवेति**। स्थादिष्वभ्यासस्य इति नियमस्तु न, तत्र प्राक्सितादित्यनुवृत्तेरिति भावः। 'सिवादीनां वाड्व्यवायेऽपि' इति मत्वाह **न्यषेवीत्, न्यसेवीदिति** स्रिवुधातुस्तु रेफवान्। **ष्ठिवु निरसन इति**। 'सुब्धातुष्ठिवुष्वष्कतीनाम्' इति न सत्वम्। ष्ठीव्यति इत्यादि सुगमम्। आर्धधातुकेषु तु शब्विकरणस्थष्ठिवुधातुवद्रूपाणि। ष्णसुधातुश्च षोपदेशः **नृती गात्रेति**। 'श्वीदितः-' इत्याद्यर्थमीदित्त्वम्। सेडयम्। **सेऽसिचि**। से असिचि इति च्छेदः। सप्तमी षष्ठ्यर्थे। कृत चृत छृत तृद नृत् एषां समाहारद्वन्द्वात् सप्तमी। 'उदितो वा' इत्यतो वेति आर्धधातुकस्येति चानुवर्तते। तदाह **एभ्य इत्यादिना**। नित्यमिटि

दीव्यति। विजिगीषते इत्यर्थः। कान्तिरिच्छा। श्रुतेः पृथग्ग्रहणात्। **षिवु**। **परिषिषेवेति**। 'स्थादिष्वभ्यासेन-' इति नियमो नेह प्रवर्तते, तत्र प्राक् सिता-दित्यनुवृत्तेः। अस्य चाप्राक्सितीयत्वात्। तेनाभ्यासस्य षत्वं 'परिनिविभ्यः-' इत्यनेन भवत्येव। **न्यषेवीदिति**। 'सिवादीनां वा-' इति विकल्पः। **नृती**। ईदित्करणं 'श्वीदित-' इति निष्ठायामिण्निषेधार्थम्। यद्यपि 'सेसिचि-' इति इटो विकल्पितत्वात् 'यस्य विभाषा' इत्यनेनैवेष्टं सिध्यति, तथापि 'यस्य विभाषा' इत्यस्यानित्यत्वज्ञाप-नार्थमीदित्करणम्, तेन 'धावितमिभराजधिया' इत्यादि सिद्धम्। **सेऽसिचि**। **नर्ति-**

उद्वेगे। 'वा भ्राश-' (सू २३२१) इति श्यन्वा। त्रस्यति, त्रसति। त्रेसतुः, तत्रसतुः। कुथ १११८ पूतीभावे। पूतीभावो दौर्गन्ध्यम्। पुथ ११११ हिंसायाम्। गुध ११२० परिवेष्टने। क्षिप ११२१ प्रेरणे। क्षिप्यति। क्षेप्ता। पुष्प ११२२ विकसने। पुष्प्यति। पुपुष्प। तिम ११२३ ष्टिम ११२४ ष्टीम ११२५ आर्द्रीभावे। तिम्यति। स्तिम्यति। स्तीम्यति। व्रीड ११२६ चोदने लज्जायां च। व्रीड्यति। इष ११२७ गतौ। इष्यति। षह ११२८ षुह ११२९ चक्यर्थे। चक्यर्थस्तृप्तिः। सह्यति। सुह्यति। जॄष् ११३० झॄष् ११३१ वयोहानौ। जीर्यति। जजरतुः, जेरतुः। जरिता, जरीता। जीर्येत्। जीर्यात्। 'जॄस्तन्भु-'

प्राप्ते विकल्पार्थमिदं वचनम्। **अनर्तीदिति**। 'सेऽसिचि-' इत्यत्र असिचि इत्युक्तेर्नित्यमिडिति भावः। **त्रसी उद्वेगे**। 'वा जॄभ्रमुत्रसाम्' इत्येत्वाभ्यासविकल्पौ मत्वाह **त्रेसतुः, तत्रसतुरिति**। **कुथ पूतीभाव इति**। पवित्रीभवने इत्यर्थः। दुर्गन्धकरणे इति वा। 'पूतिगन्धस्तु दुर्गन्धः' इत्यमरः। **तिम ष्टिम ष्टीमेति**। द्वितीयतृतीयौ षोपदशौ। द्वितीय इदुपधः। तृतीयस्तु ईदुपधः। **षह षुहेति**। षोपदेशौ। **चक्यर्थस्तृप्तिरिति**। यद्यपि 'चक तृप्तौ प्रतिघाते च' इत्युक्तम्। तथापि तृप्तिरेवेह विवक्षिता व्याख्यानात्। सुहेः 'नपुंसके भावे क्तः' इति क्तप्रत्यये सुहितशब्दः। सुहितस्तृप्तिरिति 'पूरणगुण-' इति सूत्रे कैयटः। **जॄष् झॄष् वयोहानाविति**। सेट्कौ। **जीर्यतीति**। 'ॠत इद्धातोः' इति इत्वे 'हलि च' इति दीर्घ इति भावः। अतुसादौ 'ॠच्छत्यॄताम्' इति गुणे रपरत्वे 'वा जॄभ्रमुत्रसाम्' इत्येत्वाभ्यासलोपविकल्प इति भावः। जजरिथ। 'वॄतो वा' इति मत्वाह **जरिता, जरीतेति**।

ष्यति, नर्त्स्यतीति। निनर्तिषति। निनृत्सति। कर्तिष्यति। कर्त्स्यति। चिकर्तिषति। चिकृत्सति। इत्यादि ज्ञेयम्। **अनर्तीदिति**। असिचीत्युक्त्वादिह नित्यमिट्। **त्रेसतुरिति**। 'वा जॄभ्रमुत्रसाम्' इत्येत्वाभ्यासलोपौ। **कुथ**। पूतीभावः पवित्रीभवनम्। कुथ्यति भूमिः। पवित्रीभवतीत्यर्थः। **पुष्प** विकसने। 'कालात्साधु-' इत्यत्र पुष्प्यतेः शत्रन्तः। पचाद्यचि पुष्पम्। संज्ञायां कन्। पुष्पकम्। **व्रीड**। 'गुरोश्च हलः' इत्यप्रत्यये टाप्। व्रीडा। घञि तु व्रीडः। अत एव 'व्रीडमावहति मे स संप्रति' इति कालिदासः। 'व्रीडादिवाभ्यासगतैर्विलिल्ये' इति माघश्च। **षह षुह**। 'परिनिविभ्यः-' इत्यत्र सहेत्यकार उच्चारणार्थ इति षत्वमिह भवति। परिषह्यति। 'तीषसह-' इतीड्विकल्पस्तु नास्य भवति सहेति शबन्तनिर्देशात्, किं तु 'षह मर्षणे' इत्यस्यैव स इत्यात्रेयादयः। सहेति निर्देशस्योभयत्र तुल्यत्वे 'तीषसह-' इत्यत्र शपा निर्देशः। 'परिनिविभ्यः-' इत्यत्र तु नेत्यर्धजरतीयमिदं हेयमेव।

(सू २२११) इत्यङ्वा । 'ऋदृशोऽङि गुणः' (सू २४०६) । अजरत्, अजारीत् । अजारिष्टाम् । झीर्यति । जझरतुः । अझारीत् । षूङ् ११३२ प्राणिप्रसवे । सूयते । सुषुवे । 'स्वरतिसूति–' (सू २२७९) इति विकल्पं बाधित्वा 'श्र्युकः किति' (सू २३८१) इति निषेधे प्राप्ते क्रादिनियमान्नित्यमिट् । सुषुविषे । सुषुविवहे । सोता, सविता । दूङ् ११३३ परितापे । दीङ् ११३४ क्षये । दीयते । २५०७ दीङो युडचि क्ङिति । (६–४–६३) दीङः परस्याजादेः क्ङित आर्धधातुकस्य युट् स्यात् । 'वुग्युटावुवङ्यणोः सिद्धौ वक्तव्यौ' (वा ४०६२)। दिदीये । २५०८ मीनातिमिनोतिदीङां ल्यपि च । (६–१–५०)

षूङ् प्राणिप्रसव इति । प्रसव उत्पादनम् । षोपदेशोऽयम् । विकल्पमिति । परमपीति शेषः । निषेधे प्राप्त इति । पुरस्तात्प्रतिषेधकाण्डारम्भसामर्थ्यादिति भावः । दूङ् परिताप इति । पीडने पीडितीभवने वेत्यर्थः । आद्ये सकर्मकः । द्वितीये अकर्मकः । दीङः क्षय इति । क्षयो ह्रासो नाशो वा । दीङो युडचि । 'आर्धधातुके' इत्यधिकृतम् अचा विशेष्यते । तदादिविधिः । दीङ इति पञ्चमी । सप्तमी षष्ठ्यर्थे । तदाह दीङ परस्येत्यादिना । दिदी ए इति स्थिते परत्वाद् 'एरनेकाचः–' इति यणि प्राप्ते नित्यत्वाद् युट् । टकार इत् । उकार उच्चारणार्थः । टित्त्वादाद्यवयवः । दिदीये इति रूपमिति भावः । ननु युटि कृतेऽपि तस्यासिद्धत्वाद्यण् दुर्वारः । तथा च दिद्ष्ये इति स्यात् । इकारो न श्रूयेत यकारद्वयं श्रूयेत इत्यत आह वुग्युटाविति । मीनातिमिनोति । 'आदेच उपदेशेऽशिति' इत्यत

तत्त्वं तु प्रयोगमनुसृत्य महद्भिरेव निर्धार्यम् । नपुंसके भावे क्तः । सुहितं तृप्तिः । अतएव 'पूरणगुण–' इति सूत्रे सुहितार्थास्तृप्त्यर्था इति व्याख्यातम् । जेरतुरिति । 'ऋच्छत्यृताम्' इति गुणे कृते 'न शसदद–' इति गुणशब्देन भावितस्य निषेधाद् 'अत एकहल्मध्ये–' इत्यप्रवृत्तौ 'वा जॄभ्रमुत्रसाम्' इत्येत्वाभ्यासलोपविकल्पः । षूङ् । प्रसव उत्पत्तिः । मृत्पिण्डो घटं सूयत इत्यादिप्रयोगाभावात्प्राणि त्युक्तम् । 'स्वादय ओदितः' इति वक्ष्यमाणत्वाद् 'ओदितश्च' इति निष्ठानस्य नत्वम् । प्रसूनम् । विकल्पमिति । परमपीति शेषः । निषेधे प्राप्त इति । पुरस्तात्प्रतिषेधकाण्डारम्भसामर्थ्यादिति भावः । दीङो । पञ्चमीत्यभिप्रायेण व्याचष्टे परस्येति । अजादेरिति । ङः सीत्यत्रेव उभयनिर्देशे पञ्चमीनिर्देशो बलीयानिति सप्तम्याः षष्ठीकल्पनम् । अचि किम्, देदीयते । क्ङितीति किम्, उपदानम् । आभीयत्वेनासिद्धत्वमाशङ्क्याह वुग्युटाविति । दिदीये इति । परत्वाद्यणं बाधित्वा नित्यत्वादादौ युट् । सति तु यणि ईकारस्य श्रवणं न स्यादिति युटः सिद्धत्वमुक्तम् ।

एषामात्त्वं स्याल्ल्यपि चकारादशित्येज्निमित्ते। दाता। दास्यते। अदास्त। अदास्थाः। डीङ् ११३५ विहायसा गतौ। डीयते। धीङ् ११३६ आधारे। धीयते। दिध्ये। धेता। मीङ् ११३७ हिंसायाम्। हिंसा अत्र प्राणवियोगः। मीयते। रीङ् ११३८ श्रवणे। रीयते। लीङ् ११३९ श्लेषणे। २५०९ विभाषा लीयतेः। (६-१-५१) लीयतेरिति यका निर्देशो न तु श्यना।

आदित्यनुवर्तते, तदाह **एषामात्त्वं स्याल्ल्यपीति**। चकाराद् एचः अशितीति परनिमित्तं समुच्चीयते। तत्र एच इत्यनन्तरं निमित्ते इति शेषः। एज्निमित्ते अशिति प्रत्यये च परे इति फलितम्, तदाह **चकारादशित्येज्निमित्त इति**। इति समुच्चीयत इति शेषः। लुङ्याह **अदास्तेति**। इह आत्त्वे कृते घुत्वे सत्यपि 'स्थाघ्वोरिच्च' इति न भवति, 'स्थाघ्वोरित्त्वे दीङः प्रतिषेधः' इति घुसंज्ञासूत्रस्थभाष्यपठितवार्तिकादिति भावः। **धीङ् आधार इति**। आधार आधारणम्। स्थापनमिति यावत्। **लीङ् श्लेषण इति**। लीयते। लिल्ये। लिलियिषे। **विभाषा लीयतः**। ननु लीयतेरिति श्यना निर्देशाद् 'लीङ् श्लेषणे' इति श्नाविकरणस्य ग्रहणं न स्यादित्यत आह **यका निर्देश इति**। 'सार्वधातुके यक्' इति विहितयका लीयतेरिति निर्देशः। स च श्यन्श्नान्तसाधारणः, यक उभयत्रापि साधारण्यादिति भावः। 'मीनातिमिनोति-' इत्यतो ल्यपीति 'आदेचः-' इत्यत आदिति एच

मीनातीति। मीञ् हिंसायाम्। डुमिञ् प्रक्षेपणे। प्रमाय। उपदाय। प्रमातव्यम्। उपदातव्यम्। एज्निमित्त इति विषयसप्तमी। तेन आदागत्वं पश्चाद्ल्यप् 'आतो युक्-' इति युक्। उपदाय इति सिध्यति। अन्यथा एरचि कृते तत आत्वे उपदा इति स्यात्। **अदास्तेति**। डीङः प्रतिषेधः। 'स्थाघ्वोरिच्च' इति न घुत्वमित्यदितेति रूपं न भवतीत्येके। अन्ये तु 'स्थाघ्वोरिच्च' इत्येतत्तु न भवति दीङोऽनुकरणे दारूपासंभवेनाघुत्वात्। अत एव प्रनिदातेत्यादौ 'नेर्गद-' इति णत्वमपि न भवतीत्याहुः। अयं भावः—'दो अवखण्डने' इत्यादेर्दारूपत्वं संभवति। 'आदेच उपदेशे-' इत्यस्यानैमित्तिकत्वात्। दीङस्तु एज्निमित्तप्रत्ययविषये आत्वं दा इत्यनुकरणे एज्निमित्तस्याभावित्वान्न घुत्वम्। एवं च घुप्रकृतित्वमपि नास्तीति णत्वस्याप्रसक्तिरिति। **डीङ्**। डीनः। डीनवान्। स्वादिषु पाठसामर्थ्यान्निष्ठायामिण्न। इटि हि सति व्यवधानाद् 'ओदितश्च' इति नत्वं न स्यादिति। स्वादिषु पाठसामर्थ्यादिड्व्यवधानेऽपि णत्वमस्त्विति न शङ्क्यम्, इष्टानुरोधात्। डयित इति प्रयोगस्तु भौवादिकस्य। 'निष्ठा शीङ्-' इत्यत्र निष्ठेति योगविभागादकित्त्वे गुण इत्याहुः। मीङ् हिंसायाम्। मीञ् इति क्र्यादौ। **प्राणवियोग इति**। मीयते प्राणैर्वियुज्यत

लीलीङोरात्त्वं वा स्यादेज्विषये ल्यपि च । लेता, लाता । लेष्यते, लास्यते । 'एज्विषये' किम्-लीयते । लिल्ये । व्रीङ् ११४० वृणोत्यर्थे । व्रीयते । विव्रिये । 'स्वादय ओदितः' (ग सू २६६) । तत्फलं तु निष्ठानत्वम् । पीङ् ११४१ पाने । पीयते । माङ् ११४२ माने । मायते । ममे । ईङ् ११४३ गतौ । ईयते । अयांचक्रे । प्रीङ् ११४४ प्रीतौ । सकर्मकः । प्रीयते । पिप्रिये ।

अथ चत्वारः परस्मैपदिनः । शो ११४५ तनूकरणे २५१० **ओतः श्यनि** । (७-३-७१) लोपः स्याच्छ्यनि । श्यति श्यतः श्यन्ति । शशौ शशतुः । शाता । शास्यति । 'विभाषा घ्राधेट्-' (सू २३७६) इति सिचो वा लुक् । लुगभावे 'यमरम-' (सू २३७७) इतीट्सकौ । अशात् अशाताम् अशुः । अशासीत् अशासिष्टाम् । छो ११४६ छेदने । छ्यति । षो ११४७

इति च अनुवर्तते । तदाह **लीलीङोरित्यादिना । स्वादय ओदित इति** । धातुपाठपठितं गणसूत्रमिदम् । 'षूङ् प्राणिप्रसवे' इत्यारभ्य ओङन्ता ओदित्कार्यभाज इत्यर्थः । **निष्ठानत्वमिति** । 'ओदितश्च' इत्यनेनेति भावः । **प्रीङ् प्रीताविति** । प्रीतिस्तुष्टिः । 'मुत्प्रीतिः प्रमदो हर्षः' इत्यमरः । एवं सत्यकर्मकः । यथा—फलमूलादिना हरिः प्रीयते । हृष्यतीत्यर्थः । यदा तु प्रीतिः तर्पणं 'प्रीञ् तर्पणे' इति क्रैयादिकात् क्तिनि प्रीतिशब्दनिष्पत्तिः, तदा तु सकर्मकः, तदाह **सकर्मक इति । प्रीयत इति** । तर्पयतीत्यर्थः ।

अथ चत्वारः परस्मैपदिन इति । 'दो अवखण्डने' इत्यन्ता इति भावः । **शो तनूकरणे** । अनिट् । **ओतः श्यनि** । 'घोर्लोपो लेटि वा' इत्यतो लोप इत्यनुवर्तते इत्यभिप्रेत्य शेषं पूरयति **लोपः स्यादिति । शशाविति** । 'आदेच-' इत्यात्त्वे णल औत्वमिति भावः । **शशतुरिति** । शशिथ, शशाथ । शशिव । **शास्यतीति** । श्यतु । अश्यत् । श्येत् । शायात् । लुङि सिचि विशेषमाह **विभाषा घ्रेति** । सिचो लुक्पक्षे आह **अशादिति** । 'आतः' इति जुसिति मत्वाह **अशुरिति** । सिचो लुगभावे सगिटौ मत्वाह **अशासी-**

इत्यर्थः । **लीङ्** । ली श्लेषण इति क्र्यादौ । **यकेति** । 'सार्वधातुके यक्' इति विहितेन । **न तु श्यनेति** । अन्यथा लीङ् इत्येव ब्रूयादिति भावः । यका निर्देशस्य फलमाह **लीलीङोरिति** । ल्यपि । विलाय । विलीय । **व्रीङ्** वृणोत्यर्थे । वरणम् । वृञ् वरण इति स्वादौ पठिष्यमाणत्वात् । वरणे इति वक्तव्ये वृणोत्यर्थे इति वचनं वैचित्र्यार्थम् । व्री वरण इति क्र्यादौ । **माङ्** । **मायत इति** । 'घुमास्था-' इतीत्वं तु न । तत्रार्धधातुक इत्यधिकारात् । **दोऽन्त** । अन्तकर्म

अन्तकर्मणि । स्यति । ससौ । अभिष्यति । अभ्यष्यत् । अभिससौ । दो ११४८ अवखण्डने । द्यति । ददौ । प्रणिदाता । देयात् । अदात् ।

अथात्मनेपदिनः पञ्चदश । जनी ११४९ प्रादुर्भावे । २५११ ज्ञाजनोर्जा । (७-३-७९) अनयोर्जादेशः स्याच्छिति । जायते । जज्ञे जज्ञाते जज्ञिरे । जनिता । जनिष्यते । 'दीपजन–' (सू २३२८) इति वा चिण् । २५१२ जनिवध्योश्च । (७-३-३५) अनयोरुपधाया वृद्धिर्न स्याच्चिणि ञ्णिति

दिति । छोधातुरपि शोधातुवत् । षो अन्तकर्मणीति । समापने विनाशने वेत्यर्थः । शोधातुवद्रूपाणि । षोपदेशोऽयम् । स्यतीति । 'ओतः श्यनि' इति लोपः । अभिष्यतीति । 'उपसर्गात्–' इति षत्वम् । अभ्यष्यदिति । 'प्राक्सि-तात्–' इति षत्वम् । अभिससाविति । स्थादिष्विति नियमाद् न षः । दो अव-खण्डने । प्रणिदातेति । 'नेर्गद–' इति णत्वम् । देयादिति । आशीर्लिङि एर्लिङीत्येत्वम् । अदादिति । 'गातिस्था–' इति सिचो लुक् ।

अथात्मनेपदिन इति । वाश्र शब्दे इत्यन्ता इत्यर्थः । जनी प्रादुर्भावे इति । 'श्वीदितो निष्ठायाम्' इत्याद्यर्थमीदित्त्वम् । ज्ञाजनोर्जा । शितीति । 'ष्ठिवुक्लमुचमाम्–' इत्यतस्तदनुवृत्तेरिति भावः । जायते इति । ज्ञाधातोस्तु श्नाविकरणत्वाद् जानातीत्युदाहरणम् । उभयत्रापि जादेशस्य ह्रस्वान्तत्वे 'अङ्गकार्ये कृते पुनर्नाङ्गकार्यम्' इति परिभाषया 'अतो दीर्घो यञि' इत्यप्राप्तेर्जादेशस्य दीर्घा-न्तत्वमाश्रितम् । जज्ञे इति । 'गमहन–' इत्युपधालोपे नस्य श्चुत्वेन ञः । जायेत । जनिषीष्ट । लुङि अजन त इति स्थिते आह दीपेति । वा चिणीति । च्लेः इति शेषः । अजन् इ त इति स्थिते उपधावृद्धौ प्राप्तायाम् जनिवध्योश्च । 'अत उप-धायाः' इत्यत उपधाया इति 'मृजेर्वृद्धिः' इत्यतो वृद्धिरिति 'नोदात्तोपदेशस्य–' इत्यतो नेति 'आतो युक्–' इत्यतः चिण्कृतोरिति 'अचो ञ्णिति' इत्यतो ञ्णितीति चानुवर्तते, तदाह अनयोरिति । दीपीधातुरीदित् । 'दीपजन–' इति च्लेः

नाशनम् । 'राघवस्य शरैर्घोरैर्घोरं रावणमाहवे' इति । राघवेति संबुद्ध्यन्तम् । स्यति लोगमध्यमैकवचनम् । अभ्यष्यतीति । 'उपसर्गात्सुनोति–' इति षत्वम् । अभ्य-ष्यदिति । 'प्राक्सितादड्व्यवायेऽपि' इति षत्वम् । अभिससाविति । 'स्थादिषु–' इति नियमान्न षत्वम् । दो अवखण्डने । अवेत्युपसर्गप्रयोगो वैचित्र्यार्थः। खण्डने इत्येतावत्युक्तेऽपीष्टसिद्धेः । प्रणिदातेति । 'नेर्गद–' इति णत्वम् । देया-दिति । 'एर्लिङि' इत्येत्वम् । अदादिति । 'गातिस्था–' इति सिचो लुक् । ज्ञाजनोर्जा । जानाति । शिति किम्, ज्ञाता । ज इति ह्रस्वोच्चारणेऽपि 'अतो दीर्घो

कृति च। अजनि, अजनिष्ट। दीपी ११२० दीप्तौ। दीप्यते। दिदीपे। अदीपि, अदीपिष्ट। पूरी ११२१ आप्यायने। पूर्यते। अपूरि, अपूरिष्ट। तूरी ११२२ गतित्वरणहिंसनयोः। तूर्यते। तुतूरे। धूरी ११२३ गूरी ११२४ हिंसागत्योः। धूर्यते। दुधूरे। गूर्यते। जुगूरे। घूरी ११२५ जूरी ११२६ हिंसावयोहान्योः। शूरी ११२७ हिंसास्तम्भनयोः। चूरी ११२८ दाहे। तप ११२९ ऐश्वर्ये वा। अयं धातुरैश्वर्ये वा श्यनं तङ च लभते। अन्यदा तु शब्विकरणः परस्मैपदीत्यर्थः। केचित्तु वाग्रहणं वृतुधातोराद्यवयवमिच्छन्ति। तप्यते। तेपे। तप्स्यते। 'पत' इति व्यत्यासेन पाठान्तरम्। 'द्युत धामानि युतः पत्यमानः'। वृतु ११३० वरणे। वृत्यते। पक्षान्तरे वावृत्यते। 'ततो वावृत्यमाना सा रामशालां न्यविक्षत'

चिण्विकल्पं मत्वाह **अदीपि, अदीपिष्टेति**। पूरीधातुरपि ईदित्। 'दीपजन–' इति चिण्विकल्पं मत्वाह **अपूरि, अपूरिष्टेति**। तूरी इत्यादयोऽपि 'चूरी दाहे' इत्यन्ता ईदित एव। **तप ऐश्वर्ये वेति**। श्यन् आत्मनेपदं चेति शेषः। उभयोः प्रकृतत्वादित्यभिप्रेत्य शेषं पूरयति **श्यनं तङं चेति**। **अन्यदा त्विति**। ऐश्वर्यादन्यत्रार्थे वृत्तिदशायामित्यर्थः। **केचित्त्विति**। तप ऐश्वर्ये वा वृतु वरणे इति धातुपाठे स्थितम्। तत्र 'वावृतु वरणे' इत्येवं वाशब्दं वृतु इत्यस्य आद्यवयवमिच्छन्तीत्यर्थः। एवं च तप ऐश्वर्ये इत्येव स्थितम्। अस्मिन्पक्षे तपधातोः नित्यमेव श्यन् तङ् चेति भावः। **तप्यते इति**। ईष्टे इत्यर्थः। प्रथम-पक्षे ऐश्वर्ये तपतीत्यपि भवति। **पत इतीति**। तपधातोस्तकारपकारयोः क्रमव्यत्यासेन 'पत ऐश्वर्ये वा' इति पाठान्तरमित्यर्थः। एवं व्यत्यासेन पाठे प्रयोगं दर्शयति **द्युत धामानि युतः पत्यमान इति**। प्रवायुमच्छा बृहतीत्यृचः एकदेशोऽयम्। पत्यमान इत्यस्य ईशान इत्यर्थः। अत्र लटः शानच् आत्मनेपदं श्यन् च। **पक्षान्तरे इति**। वावृतु इति पाठपक्षे इत्यर्थः। **वावृत्यते इति**। वृणोतीत्यर्थः। अपेक्षते इति यावत्। वावृतुधातोः प्रयोगं दर्शयति **ततो वावृत्यमानेति**। अपेक्ष-माणेत्यर्थः। **न्यविक्षतेति**। 'नेर्विशः' इत्यात्मनेपदम्। 'शल इगुपधात्–' इति क्सः।

यञि' इति दीर्घे सिद्धे आग्रहणमङ्गवृत्तपरिभाषाज्ञापनार्थम्। अन पाधातोः पिबादेशे कृते गुणो न भवति पिबादेशस्यादन्तत्वाश्रयणं तूपायान्तरमित्याहुः। **ञिति णिति कृति चेति**। ञिति कृत्युदाहरणं घञि जनः। णिति कृति तु जनकः। जनयतीत्यत्रोपधावृद्धौ सत्यां 'जनीजॄष्–' इति मित्त्वाद् 'मितां ह्रस्वः' इति ह्रस्वः। **दीपी** दीप्तौ। ईदित्त्वान्निष्ठायामिण्न। दीप्तः। एवं पूरीत्यादेरीदित्त्वात्पूर्ण इत्यादि ज्ञेयम्। **केचित्त्विति**। तेषां मते ऐश्वर्ये तप्यते इत्येव प्रयोगो न तु तपतीति। **न्यविक्ष-**

इति भट्टिः। क्लिश ११६१ उपतापे। क्लिश्यते। क्लेशिता। काशृ ११६२ दीप्तौ। काश्यते। वाशृ ११६३ शब्दे। वाश्यते। ववाशे।

अथ पञ्च स्वरितेतः। मृष ११६४ तितिक्षायाम्। मृष्यति मृष्यते। ममर्ष ममृषे। शुचिर् ११६५ पूतीभावे। पूतीभावः क्लेदः। शुच्यति, शुच्यते। शुशोच, शुशुचे। अशुचत्, अशोचीत्, अशोचिष्ट। णह ११६६ बन्धने। नह्यति, नह्यते। ननाह। नेहिथ, ननद्ध। नेहे। नद्धा। नत्स्यति। अनात्सीत्। रञ्ज ११६७ रागे। रज्यति, रज्यते। शप ११६८ आक्रोशे। शप्यति, शप्यते।

अथैकादशानुदात्तेतः। पद ११६९ गतौ। पद्यते। पेदे। पत्ता। पत्स्यते। पत्सीष्ट। २५१३ चिण् ते पदः। (३-१-६०) पदश्च्लेश्चिण् स्यात्तशब्दे परे। प्रण्यपादि। अपत्साताम् अपत्सत। खिद ११७० दैन्ये। खिद्यते। चिखिदे। खेत्ता। अखित्त। विद ११७१ सत्तायाम्। विद्यते। वेत्ता। बुध ११७२ अवगमने। बुध्यते। बुबुधे। बोद्धा। भोत्स्यते। भुत्सीष्ट। अबोधि, अबुद्ध

अथ पञ्च स्वरितेत इति। 'शप आक्रोशे' इत्यन्ता इत्यर्थः। शुच्यतीति। क्लिन्नं भवतीत्यर्थः। अशुचदिति। इरित्त्वादङिति भावः। णह बन्धन इति। णोपदेशोऽयम्। अनिट्। ननाहेति। नेहतुः। भारद्वाजनियमात्थलि वेट् इति मत्वाह नेहिथ, ननद्धेति। इट्पक्षे 'थलि च सेटि' इत्येत्वाभ्यासलोपौ। इडभावे तु 'नहो धः' इति हस्य ध इति भावः। रञ्ज रागे। अनिट्। रज्यतीति। 'अनिदिताम्–' इति नलोप इति भावः। ररञ्ज ररञ्जतुः। ररञ्जिथ, ररङ्क्थ। ररञ्जिव। रङ्क्ता इत्यादि।

अथैकादशेति। 'लिश अल्पीभावे' इत्यन्ता इत्यर्थः। पद गतौ। अनिट्। चिण् ते पदः। पदश्च्लेरिति। 'च्लेस्सिच्' इत्यतः च्लेरित्यनुवर्तते इति भावः। तशब्दे इति। आत्मनेपदप्रथमैकवचने इत्यर्थः। इदं च भाष्ये स्पष्टम्। प्रण्यपादीति। च्लेश्चिणि उपधावृद्धौ 'चिणो लुक्' इति तशब्दस्य लोपः। 'नेर्गद–' इति णत्वमिति भावः। विद सत्तायाम्। वेत्तेति। अनि-

---

तेति। निपूर्वाद्दिशतेर्लुङि 'शल इगुपधा–' इति क्सः। 'नेर्विशः' इति तङ्। वाशृ शब्दे। 'मन्दिवाशि–' इत्युरच्। वाशुरा रात्रिः। तितिक्षायामिति। 'गुप्तिज्किद्भ्यः–' इति सन्। तत्र हि 'तिजेः क्षमायाम्' इत्युक्तम्। ईशुचिर्। ईदित्त्वान्निट्। शुक्तम्। क्लिन्नमित्यर्थः। ननद्धेति। 'नहो धः' इति धत्वम्। चिण् ते पदः। तशब्द इति। सामर्थ्यादात्मनेपदप्रथमपुरुषैकवचनम्। तशब्दे किम्, अपत्थाः। प्रण्यपादीति। 'चिणो लुक्' इति तशब्दस्य लुक्। 'नेर्गद–'

अभुत्साताम् । युध ११७३ संप्रहारे । युध्यते । युयुधे । योद्धा । अयुद्ध । कथं 'युध्यति' इति । युधमिच्छतीति क्यच् । 'अनुदात्तेत्त्वलक्षणमात्मनेपदमनित्यम्' (प ४७) इति वा । अनो रुध ११७४ कामे । अनुरुध्यते । अण ११७५ प्राणने । अण्यते । आणे । अणिता । 'अन' इति दन्त्यान्तोऽयमित्येके । मन ११७६ ज्ञाने । मन्यते । मेने । मन्ता । युज ११७७ समाधौ । समाधिश्चित्तवृत्तिनिरोधः । अकर्मकः । युज्यते । योक्ता । सृज ११७८ विसर्गे । अकर्मकः । 'संसृज्यते सरसिजैररुणांशुभिन्नैः' । ससृजिषे । स्रष्टा । स्रक्ष्यते । 'लिङ्सिचौ-' (सू २३००) इति कित्त्वान्न गुणो नाप्यम् । सृक्षीष्ट । असृष्ट असृक्षाताम् । लिश

ङिति भावः । लिटि क्रादिनियमादिट् । एवं बुधधातुरपि । बोद्धेति । तासि 'झषस्तथोः-' इति तकारस्य धकारः । भोत्स्यते इति । 'एकाचः-' इति भष् । भुत्सीष्टेति । 'लिङ्सिचौ-' इति कित्त्वम् । 'दीपजन-' इति चिण्विकल्पं मत्वाह अबोधि, अबुद्धेति । कथं युध्यतीति । आत्मनेपदित्वादिति भावः । समाधत्ते युधमिति । युध्शब्दो भावक्विबन्तः । युधमिच्छतीत्यर्थे 'सुप आत्मनः-' इति क्यजन्तात् परस्मैपदमित्यर्थः । अनुदात्तेत्त्वप्रयुक्तमात्मनेपदमनित्यमिति समाधानं त्वनुचितम्, तस्य भाष्यानारूढत्वेन अप्रामाणिकत्वात् । अत एव 'व्यत्ययो बहुलम्' इति सूत्रभाष्ये 'प्रतीपमन्य ऊर्मिर्युध्यति' इत्यत्र व्यत्ययेन परस्मैपदमित्येव समाहितम् । अनो रुध काम इति । अनु इत्युपसर्गात्परो रुधधातुः कामे वर्तते इत्यर्थः । युज समाधौ । अनिट् । अकर्मक इति । चित्तवृत्तेर्धात्वर्थान्तर्भावादिति भावः । अर्थान्तरे तु सकर्मकोऽपि भवति, 'सृजियुज्योः सकर्मकयोः कर्मवद्भावः' इति कर्मवत्सूत्रवार्तिकात् । एतच्च कर्मकर्तृप्रक्रियायां स्पष्टीभविष्यति । सृज विसर्ग इति । अनिट् । विसर्गः संबन्ध उपसर्गवशात्, तदाह अकर्मक इति । संसृज्यते इति । अरुणांशुभिन्नैः अरुणकिरणविकसितैः सरसिजैः कमलैः संसृज्यते संबध्नातीत्यर्थः । कमलिनीति शेषः । कर्तरि लकारोऽयम्, न त्वयं कर्मणि लकारः, अकर्मकत्वात् । अर्थान्तरे तु सकर्मकोऽयमिति कर्मकर्तृप्रक्रियायां वक्ष्यते । लिट्याह ससृजिषे इति । क्रादिनियमादिडिति भावः । स्रष्टेति । 'सृजिदृशोर्झल्यमकिति' इत्यमागमे ऋकारस्य यणि व्रश्चादिना जस्य षः ष्टुत्वेन तकारस्य ट इति भावः । स्रक्ष्यते इति । पूर्ववदमि, जस्य षत्वे 'षढोः-' इति षस्य कत्वे सस्य षत्वमिति भावः । आशीर्लिङ्याह सृक्षीष्टेति । अत्र लघूपधगुणमाशङ्क्याह लिङ्सिचाविति । नाप्यमिति । 'सृजि-

---

इति धत्वम् । अबोधीति । 'दीपजनबुध-' इति चिण् । अनो रुध कामे । अनोः परो रुधधातुः कामे । काम इच्छा । दिवादिषु पाठसामर्थ्याद् 'रुधादिभ्यः-'

११७९ अल्पीभावे। लिश्यते। लेष्टा। लेक्ष्यते। लिक्षीष्ट। अलिक्षत अलिक्षाताम्।

अथागणान्तात्परस्मैपदिनः। राधः ११८० अकर्मकाद् वृद्धावेव। एवकारो भिन्नक्रमः। राधोऽकर्मकादेव श्यन्। उदाहरणमाह, वृद्धाविति। यन्मह्यमपराध्यति। द्रुह्यतीत्यर्थः। विराध्यन्तं क्षमेत कः। द्रुह्यन्तमित्यर्थः। राध्यत्योदनः। सिध्यतीत्यर्थः। कृष्णाय राध्यति। दैवं पर्यालोचयतीत्यर्थः। दैवस्य धात्वर्थेऽन्त-

---

दृशोर्झल्यम्-' इत्यमागमो नास्तीत्यर्थः। अकित्येव तद्विधानादिति भावः। लुङ्याह असृक्षेति। 'झलो झलि' इति सिचो लोपः। 'लिङ्सिचावात्मनेपदेषु' इति। सिचः कित्वान्न गुणः, नाप्यमिति भावः। लिश अल्पीभावे। लिक्षीष्टेति। 'लिङ्सिचौ–' इति कित्वान्न गुणः। अलिक्षतेति। 'शल इगुपधात्–' इति क्सः।

आ गणान्तादिति। दिवादिगणसमाप्तिपर्यन्तमित्यर्थः। राधोऽकर्मकाद् वृद्धावेवेति। श्यनिति शेषः। राधधातोरकर्मकाद् वृद्धावेवार्थे श्यन्निति प्रतीयमानोऽर्थः। एवं सति अकर्मकादिति व्यर्थम्। राधेरर्थान्तरे च श्यन् न स्यात्। इष्यते हि अपराध्यतीत्यादौ द्रोहार्थेऽपि श्यन्, तत्राह एवकारो भिन्नक्रम इति। यस्मिन् क्रमे वृद्धावित्यत ऊर्ध्वम् एवकारः पठितः ततोऽन्यः क्रमो यस्य स भिन्नक्रम इत्यर्थः। वृद्धावित्यत ऊर्ध्वं पठित एवकारः अन्यत्र निवेशनीय इति यावत्। तदेव दर्शयति राधोऽकर्मकादेव श्यनिति। एवं चार्थान्तरेऽपि श्यन् सिध्यति। शत्रुं हिनस्तीत्यर्थे शत्रुमपराध्नोतीत्यत्र सकर्मकत्वाद् न श्यनिति भावः। तर्हि वृद्धावित्यस्य किं प्रयोजनमित्याशङ्क्य अकर्मकक्रिया एवंविधेति प्रदर्शनार्थं तत्, नतु परिसंख्यानार्थमित्याह उदाहरणमाह वृद्धावितीति। एवं च वृद्धिग्रहणमकर्मकक्रियामात्रोपलक्षणमिति भावः। तथाविधार्थान्तराण्युदाहरति यन्मह्यमित्यादिना। 'क्रुधद्रुह–' इति संप्रदानत्वम्। कृष्णाय राध्यतीति। 'राधीक्ष्योर्यस्य विप्रश्नः' इति संप्रदानत्वम्। दैवमिति। कृष्णस्य किमिदानीं

इति श्रमं बाधित्वा श्यन्। नाप्यमिति। 'सृजिदृशोर्झल्यमकिति' इत्यकित्येव विधानात्। लिश। आतपादिनानल्पस्य अल्पभावोऽल्पीभावः। लिक्षीष्टेति। 'लिङ्सिचावात्मनेपदेषु' इति कित्वान्न गुणः। अलिक्षतेति। 'शल इगुपधाद्–' इति क्सः। राधोऽकर्मकात्। भिन्नक्रमं दर्शयति अकर्मकादेवेति। राधो वृद्धावेव श्यन्निति व्याख्यायामकर्मकादिति विशेषणं व्यर्थं स्याद् वृद्धावस्याकर्मकत्वात्। अकर्मकात्किम्, शत्रुमपराध्नोति। हिनस्तीत्यर्थः। राध संसिद्धाविति स्वादौ। राधो हिंसायामित्यनुवादाद्धिंसायामप्ययम्। उदाहरणमाहेति। अकर्मकत्वप्रयोजकस्य यस्य कस्यचिदर्थस्येति भावः। अकर्मके श्यन्नन्तस्य प्रयोगान्दर्शयति यन्मह्य-

भावाज्जीवत्यादिवदकर्मकत्वम्। रराध रराधतुः। रराधिथ। 'राधो हिंसायाम्' (सू २४३२) इत्येत्वाभ्यासलोपाविह न। हिंसार्थस्य सकर्मकतया दैवादिकत्वायोगात्। राद्धा। रात्स्यति। अयं स्वादिश्चुरादिश्च। व्यध ११८१ ताडने। 'ग्रहिज्या-' (सू २४१२) इति संप्रसारणम्। विध्यति। विव्याध विविधतुः। विव्यधिथ, विव्यद्ध। व्यद्धा। व्यत्स्यति। विध्येत्। विध्यात्। अव्यात्सीत्। पुष ११८२ पुष्टौ। पुष्यति। पुपोष। पुपोषिथ। पोष्टा। पोक्ष्यति। 'पुषादि-' (सू २३४३) इत्यङ्। अपुषत्। शुष ११८३ शोषणे। अशुषत्। तुष ११८४

शुभमशुभं वेति पृष्टो दैवज्ञः तस्य शुभाशुभसूचकादित्यादिग्रहस्थितिं ज्योतिश्शास्त्रतः परीक्षत इति यावत्। ननु पर्यालोचने दैवस्य कर्मत्वात्कथमिह अकर्मकतेत्यत आह **दैवस्येति**। ननु 'राधोऽकर्मकाद् वृद्धावेव' इत्यत्र वृद्धिग्रहणस्य उपलक्षणतया हिंसार्थकस्यापि राधेर्दैवादिकत्वाद् रराधतुः इत्यादौ 'राधो हिंसायाम्' इति वक्ष्यमाणावेत्वाभ्यासलोपौ स्यातामित्यत आह **राध इति**। **इह नेति**। रराधतुः इत्यादौ राधेर्हिंसार्थकत्वे 'राधो हिंसायाम्' इति वक्ष्यमाणावेत्वाभ्यासलोपौ न स्त इत्यर्थः। कुत इत्यत आह **हिंसार्थस्येति**। नोन्मिषत्येवैषा शङ्का, राधेरकर्मकस्यैव दैवादिकत्ववचनात्। हिंसार्थकस्य च राधेः सकर्मकतया दैवादिकत्वाभावादुक्तशङ्काया अनुन्मेषादित्यर्थः। ननु राध्नोति राधयति इति कथमित्यत आह **अयं स्वादिश्चुरादिश्चेति**। रराधिथ। क्रादिनियमाद् नित्यमिट्, दीर्घाकारवत्त्वेन 'उपदेशेऽत्वतः' इत्यस्याप्रवृत्तेः अजन्तोऽकारवानित्यत्र च ह्रस्वाकारस्यैव विवक्षितत्वात्। राद्धा। अरात्सीत्। **व्यध ताडन इति**। चतुर्थान्तोऽयम्। अनिट्। **विध्यतीति**। श्यनो ङित्त्वाद् 'ग्रहिज्या-' इति यकारस्य संप्रसारणे पूर्वरूपे विध्यतीति रूपमित्यर्थः। वकारस्य तु न संप्रसारणम् 'न संप्रसारणे संप्रसारणम्' इति निषेधात्। **विव्याधेति**। द्वित्वे कृते अभ्यासस्य 'लिट्यभ्यासस्य-' इति संप्रसारणमिति भावः। **विविधतुरिति**। परत्वाद् 'ग्रहिज्या-' इति संप्रसारणे कृते द्वित्वमिति भावः। भारद्वाजनियमात्थलि वेडित्याह **विव्यधिथ, विव्यद्धेति**। 'लिट्यभ्यासस्य-' इति संप्रसारणम्। अनिट्पक्षे 'झषस्तथो-' इति धः। **अव्यात्सीदिति**। हलन्तलक्षणा वृद्धिः। **पुष पुष्टौ**। अनिट्। **पुपोषिथेति**। अजन्ताकारवत्त्वाभावात् क्रादिनियमान्नित्यमिट्। **अपुषदिति**। पुषाद्यङ्। ङित्त्वान्न गुणः। शुषधातुरनिट्। **अशुषदिति**। पुषाद्यङिति भावः। एवमग्रेऽपि। तुष् दुष्

मित्यादिना। **कृष्णायेति**। 'राधीक्ष्योः-' इति चतुर्थी। **अपुषदिति**। ङित्त्वाद् गुणाभावः। **शुष**। शोष्टा। शोक्ष्यति। 'श्लिष आलिङ्गने' इति सूत्रं योग-

प्रीतौ। दुष ११८५ वैकृत्ये। श्लिष ११८६ आलिङ्गने। श्लिष्यति। शिश्लेष। श्लेष्टा। श्लेक्ष्यति। २५१४ श्लिषः—असात्परस्यानिटश्च्लेः क्सः स्यात्। पुषाद्यङोऽपवादो न तु चिणः। पुरस्तादपवादन्यायात्।—आलिङ्गने। (३-१-४६) श्लिषश्च्लेरालिङ्गने एव क्सो नान्यत्र। योगविभागसामर्थ्यात् 'शल इगुपधात्–' (सू २३३६) इत्यस्याप्ययं नियमः। अश्लिक्षत्कन्यां

श्लिष् एते अनिटः। लुङि श्लिषः च्लेः सिजादेशे प्राप्ते **श्लिषः**। च्लेरिति 'शल इगुपधात्–' इत्यतः अनिटः क्स इति चानुवर्तते, तदाह **असात्परस्येत्यादिना**। ननु 'शल इगुपधात्–' इत्येव क्से सिद्धे किमर्थमिदमित्यत आह **पुषाद्यङोऽपवाद इति**। 'शल इगुपधात्–' इति क्सं बाधित्वा परत्वात् पुषाद्यङ् स्यात्, तन्निवृत्तये पुनः क्सविधिरित्यर्थः। ननु श्लिष इति क्सः यथा परमपि पुषाद्यङं बाधते। तथा 'चिण्भावकर्मणोः–' इति चिणमपि परं बाधेत, एवं सति 'उपाश्लेषि कन्या देवदत्तेन' इत्यत्र कर्मणि लुङि 'चिण्भावकर्मणोः' इति च्लेश्चिण् न स्यादित्यत आह **न तु चिण इति**। 'श्लिषः' इति क्सविधिः 'चिण् भावकर्मणोः' इति चिण्विधेर्न बाधक इत्यर्थः। कुत इत्यत आह **पुरस्तादिति**। 'शल इगुपधादनिटः क्सः' 'श्लिषः' 'पुषादिद्युताद्यॢदितः परस्मैपदेषु' 'चिण् भावकर्मणोः' इति सूत्रक्रम इति भावः। **आलिङ्गने**। श्लिष इति पूर्वसूत्रे यदनुवृत्तं तत्सर्वमिहानुवर्तते, श्लिष इति च। तथा च आलिङ्गने विद्यमानात् श्लिषेः परस्य च्लेः क्सः स्यादिति लभ्यते। 'श्लिषः' इति पूर्वसूत्रेणैव सिद्धे नियमार्थमिदम्, तदाह **श्लिषश्च्लेरालिङ्गने एव क्सो नान्यत्रेति**। नन्वयं नियमः 'अनन्तरस्य–' इति न्यायात् श्लिष इति सूत्रप्राप्तस्यैव स्यात्, नतु 'शल इगुपधात्–' इत्यस्यापीत्यत आह **शल इगुपधादित्यस्याप्ययं नियम इति**। कुत इत्यत आह **योगविभागसामर्थ्यादिति**। यदि 'श्लिषः' इति प्राप्त एव क्स आलिङ्गन एव इति नियम्येत तर्हि योगविभागो व्यर्थः स्यात्। 'श्लिष आलिङ्गने' इत्येकसूत्रत्वे सत्यपि अनालिङ्गने क्सो नेत्यस्यार्थस्य सिद्धत्वात्। अतः 'शल इगुपधात्–' इति क्सोऽपि श्लिषेरालिङ्गने एव न त्वनालिङ्गनेऽपि इति नियमो विज्ञायत इत्यर्थः।

विभागेन व्याचष्टे **श्लिष इति। अनिटश्च्लेः क्स इति**। एतच्च 'च्लेः सिच्', 'शल इगुपधात्–' इत्यतोऽनुवर्तत इति भावः। अनिटः किम्, 'श्लिषु दाहे' इति भौवादिकस्य सेटो माभूत्। अश्लेषीत्। 'शल इगुपध–' इति सिद्धे पुनः क्सविधिः किमर्थ इत्यत आह **पुषाद्यङिति**। **सामर्थ्यादिति**। यदि हि श्लिष इति प्राप्त एव क्सो नियम्येत तर्हि योगविभागो व्यर्थः स्यादिति भावः। **शल इगुपधा-**

देवदत्तः। 'आलिङ्गन एव' इति किम्—समाश्लिषज्जतु काष्ठम्। (आङ्) प्रत्यासत्ताविह श्लिषिः। कर्मण्यनालिङ्गने सिजेव, न तु क्सः। एकवचने चिण्। अश्लेषि अश्लिक्षाताम् अश्लिक्षत। अश्लिष्ठाः। अश्लिड्ढ्वम्। अव ११८७ विभा-

---

अश्लिक्षत् कन्यां देवदत्त इति। आलिङ्गदित्यर्थः। अत्र पुषादिङं बाधित्वा अनेन क्सः। **समाश्लिषज्जतु काष्ठमिति।** जतु लाक्षा। स च काष्ठसंश्लेषोत्पद्यते इति स्थितिः। जतु च काष्ठं चेति समाहारद्वन्द्वः। 'उपाश्लिषत् जतु काष्ठं च' इत्येव भाष्यम्। अत्र श्लिषेरालिङ्गनार्थकत्वाभावान्न क्सः, किंतु पुषाद्यङेवेति भावः। नन्वजादित्वाभावेन आडागमस्यासंभवात् समाश्लिषदित्ययुक्तमित्यत आह **आङिति।** समाश्लिषत् इत्यत्र श्लिषेः प्राग् आङ् उपसर्ग एव, न त्वाडागम इति भ्रमितव्यमित्यर्थः। नन्वालिङ्गनं समाश्लेषणं तथा च समाश्लिषज्जतु काष्ठम् इत्यत्रापि श्लिषेरालिङ्गनार्थकत्वात् क्सो दुर्वार इत्यत **आह प्रत्यासत्ताविहेति।** इह समाश्लिषज्जतु काष्ठम् इत्यत्र श्लिषिः प्रत्यासत्तौ संयोगे वर्तते नतु बाह्वादिना संवलनात्मकसम्बन्धविशेषरूपे आलिङ्गने इत्यर्थः। नन्वालिङ्गने एव श्लिषश्च्लेः क्सः न त्वनालिङ्गने इति नियमाद् अनालिङ्गने 'शल इगुपधात्—' इत्यपि क्सो न भवतीत्युक्तमयुक्तम्। समाश्लिषज्जतु काष्ठमित्यत्रानालिङ्गने 'शल इगुपधात्—' इति क्सं बाधित्वा परत्वाद् पुषाद्यङ एव प्राप्त्या क्सस्याप्रसक्तेरित्यत आह **कर्मणीति।** अनालिङ्गनवृत्तेः श्लिषधातोः कर्मणि लुङि च्लेस्सिजेव भवति, न तु पुषाद्यङ्, तस्य परस्मैपदविषयत्वात् कर्मणि लुङश्च 'भावकर्मणोः' इत्यात्मनेपदनियमात्। तस्य च 'शल इगुपधात्—' इति प्राप्तः क्स उक्तेन नियमेन अनालिङ्गनेऽपि वार्यते इति युक्तमित्यर्थः। यदुक्तम् आलिङ्गने श्लिषश्च्लेः क्सः पुषाद्यङ एवापवादः नतु चिणः इति, तस्य प्रयोजनमाह **एकवचने चिणिति।** तदेवोदाहृत्य दर्शयति **अश्लेषीति।** आलिङ्गिता कन्या देवदत्तेनेत्यर्थः। श्लिषेरालिङ्गनार्थकात् कर्मणि लुङि प्रथमैकवचने तशब्दे परे 'चिण् भावकर्मणोः' इति च्लेश्चिणि कृते 'चिणो लुक्' इति तशब्दस्य लुक्। अत्र श्लिष इति क्सस्य पुषाद्यङ्मात्रापवादत्वाच्चिण्वादत्याभावाच्चिण्

दित्यस्यापीति। तेन कर्मण्याताम्प्रभृतिष्वनालिङ्गने सिजेव भवति न तु क्सः। समाश्लिक्षत जतूनि काष्ठैरिति क्सप्रत्यये सति तु समाश्लिक्षन्तेति स्यादिति भावः। **प्रत्यासत्ताविति।** आलिङ्गनं हि प्राणिकर्तृकं न तु काष्ठादिकर्तृकमिति भावः। श्लिषश्च्लेरालिङ्गन एव क्स इति व्याख्यानस्य फलं दर्शयते **कर्मणीत्यादिना।** अश्लिक्षातामित्यादौ यद्यपि क्ससिचोर्विशेषो नास्ति 'क्सस्याचि' इत्यकारलोपात्तथापि थासादावस्त्येव विशेष इति ध्वनयन्नुदाहरति **अश्लिष्ठाः।**

षितो मर्षणे। विभाषित इत्युभयपदीत्यर्थः। शक्यति शक्यते वा हरिं द्रष्टुं शक्तः। शशाक। शेकिथ, शशक्थ। शेके। शक्ता। शक्ष्यति, शक्ष्यते। अशकत्, अशक्त। सेट्कोऽयमित्येके। तन्मतेनानिट्कारिकासु लृदित्पठितः। शकिता। शकिष्यति। ष्विदा ११८८ गात्रप्रक्षरणे। घर्मस्रुताविल्यर्थः। अयं ञीदिति न्यासकारादयः। नेति हरदत्तादयः। स्विद्यति। सिष्वेद। सिष्वेदिथ। स्वेत्ता। अस्विदत्। क्रुध ११८९ क्रोधे। क्रोद्धा। क्रोत्स्यति। क्षुध ११९० बुभुक्षायाम्। क्षोद्धा। कथं क्षुधित इति। संपदादिक्विबन्तात्तारकादित्वादितजिति माधवः।

निर्बाध इति भावः। समाश्लिषि जतुना काष्ठम्' इत्यत्र तु अनालिङ्गनात् च्लेश्चिणो निर्बाधत्वादश्लेषीति निर्बाधमेव। एवं च आलिङ्गने अनालिङ्गनेऽपि श्लिषः कर्मणि लुङि एकवचने तशब्दे परे च्लेश्चिणेवेति स्थितम्। अथानालिङ्गने श्लिषः कर्मणि लुङि 'शल—' इति क्सोऽपि नेति यदुक्तं तदुदाहृत्य दर्शयति अश्लिक्षाताामिति। अनालिङ्गने श्लिषः कर्मणि लुङः आताम चलेः क्साभावात् सिचि 'षढोः—' इति षस्य कत्वे सस्य षत्वे रूपमिति भावः। नन्वश्लिक्षातामित्यत्र सत्यपि क्से 'क्सस्याचि' इत्यकारलोपे इष्टं सिद्धमित्यस्वरसात्कर्मणि लुङि झादावुदाहरति अश्लिक्षतेत्यादि। अश्लिष् स् झ इति स्थिते झोऽन्तादेशं बाधित्वा 'आत्मनेपदेष्वनतः' इत्यदादेशे षस्य कत्वे सिचः सस्य षत्वे अश्लिक्षतेतीष्यते। च्लेः क्से तु सति अश्लिष् स झ इति स्थिते 'क्सस्याचि' इत्यकारलोपाप्रसक्तेरतः परत्वाद् 'आत्मनेपदेष्वनतः' इत्यदादेशो न स्यादिति भावः। अश्लिष्ठा इति। श्लिषेः कर्मणि लुङस्थासि च्लेः सिचि 'झलो झलि' इति सिचो लोपे ष्टुत्वे अश्लिष्ठा इति रूपमिष्यते। क्से तु 'झलो झलि' इत्यसंभवादश्लिक्षथाः इति स्यादिति भावः। अश्लिड्ढ्वमिति। श्लिषः कर्मणि लुङो ध्वमि सिचि 'झलो झलि' इति सस्य लोपे षस्य जश्त्वेन डकारे ष्टुत्वेन धस्य ढः। क्से तु सति अश्लिक्षध्वम् इति स्यादिति भावः। शक विभाषित इति। मर्षणे अर्थे शकधातुर्विकल्पित इत्यर्थः। विकल्पश्च प्रवृत्तपरस्मैपदविषयक एव, न तु दिवादिपाठविषयकः, व्याख्यानात्, तदाह उभयपदीति। मर्षणमिह सामर्थ्यम्। शक्यति शक्यते वा हरिं द्रष्टुं भक्त इति। समर्थो भवतील्यर्थः। सेट्कोऽयमित्येके इति। स्वमते त्वनिट्क एवेति भावः। ननु अनिट्कारिकासु लृदितः शकेः पाठात् कथमनिट्क्त्वमित्यत आह तन्मते नेति। ये सेट्त्वं शकेर्वदन्ति तन्मतमवलम्ब्य अनिट्कारिकासु शकिः लृदित्पठित इत्यर्थः। संपदादिक्विबन्तादिति। क्षुध्यत

अश्लिड्ढ्वमिति। न्यासकारादय इति। तथा च तन्मते 'श्वीतः क्तः' इति

वस्तुतस्तु 'वसतिक्षुधोः-' (सू ३०४६) इतीट् वक्ष्यते। शुध ११९१ शौचे। शुध्यति। शुशोध। शोद्धा। षिधु ११९२ संराद्धौ । ऊदित्पाठः प्रामादिकः। सिध्यति। सेद्धा। सेत्स्यति। असिधत्। रध ११९३ हिंसासंराद्ध्योः। संराद्धिर्निष्पत्तिः। रध्यति। 'रधिजभोरचि' (सू २३०२) इति नुम् ररन्ध ररन्धतुः। **२५१५ रधादिभ्यश्च। (७-२-४५)** रध्, नश्, तृप्, दृप्, द्रुह्, मुह्, ष्णुह्, ष्णिह्, एभ्यो वलाद्यार्धधातुकस्य वेट् स्यात्। ररन्धिथ, ररद्ध। ररन्धिव, रेध्व। **२५१६ नेट्यलिटि रधेः। (७-१-६२)** लिड्वर्जे इटि रधेर्नुम् न स्यात्। रधिता, रद्धा। रधिष्यति, रत्स्यति। अङि तु नुम्। 'अनिदिताम्-' (सू ४१५ इति नलोपः। अरधत्। णश ११९४ अदर्शने। नश्यति। ननाश नेशतुः। नेशिथ। **२५१७ मस्जिनशोर्झलि। (७-१-६०)**

इति क्षुध्, भावे क्विप्। क्षुध् अस्य संजाता क्षुधित इति विग्रहः। **वसतिक्षुधोरिति।** वसेः क्षुधेश्च क्त्वानिष्ठयोरिडागमः स्यादिति तदर्थः। **वक्ष्यत इति।** करिष्यति शेषः। **षिधु संराद्धाविति।** निष्पत्तावित्यर्थः। **प्रामादिक इति।** माधवादिसंमतत्वादिति भावः। **रध हिंसेति।** सेट्। चतुर्थान्तोऽयम्। **ररन्धतुरिति।** एत्वाभ्यासलोपौ बाधित्वा परत्वान्नुमि संयोगात्परत्वेन अकित्वात् श्नलोपो नेति भावः। **रधादिभ्यश्च।** 'आर्धधातुकस्येड्वलादेः' इत्यनुवर्तते। स्वरतिसूति-' इत्यतो वेति चेत्याभिप्रेत्य शेषं पूरयति **वलाद्यार्धधातुकस्य वेडिति।** 'आर्धधातुकस्य-' इति नित्ये प्राप्ते विकल्पोऽयम्। लुटि तासि इटि 'रधिजभोरचि' इति नुमि प्राप्ते **नेट्यलिटि रधेः।** 'इदितो नुम् धातोः' इत्यतो नुमित्यनुवर्तते, तदाह **लिड्वर्जे इटीति। अङि त्विति।** एषाथङि कृते सतीत्यर्थः। **अरधदिति।** 'मो अहं द्विषतेऽरधम्।' **णश अदर्शन इति।** णोपदेशोऽयं सेट्। 'रधादिभ्यश्च' इति वेट्। तत्र इट्पक्षे आह **नेशिथेति।** 'थलि च सेटि' इत्येत्त्वाभ्यासलोपाविति भावः। इडभावपक्षे ननाश थ इति स्थिते

वर्तमाने क्तो भवति। आदित्त्वाद्विष्ठायां नेट्। स्विन्नः। 'विभाषा भावादिकर्मणोः'। स्विन्नम्। स्वेदितमित्यादि सिद्धम्। **षिधु।** संराद्धिर्निष्पत्तिः। 'उदितो वा' इति क्त्वायामिड्विकल्पः। इट्पक्षे 'रलो व्युपधात्-' इति वा कित्वम्। सिधित्वा। सेधित्वा। सिद्ध्वा। **प्रामादिक इति।** ऊदित्त्वेत्यनुवादाद्धिसामर्थ्ययम्। नत्वनुदात्तेषु सिध्यतेः पाठो व्यर्थः स्यादिति भावः। **रधादिभ्यश्च।** 'स्वरतिसूति-' इत्यतो वेत्यनुवर्तते। योगविभागो वैचित्र्यार्थः। गणनिर्देशाच्च लुकि रारधितेत्येव न तु रारद्धेति। **नेट्यलिटि।** इटीति किम्, रन्धकः। अलिटीति किम्,

नुम् स्यात् । ननंष्ठ । नेशिव, नेश्व । नेशिम, नेश्म । नशिता, नंष्टा । नशिष्यति, नङ्क्ष्यति । नश्येत् । नश्यात् । अनशत् । प्रणश्यति । २५१८ **नशेः षान्तस्य ।** (८-४-३६) णत्वं न स्यात् । प्रनंष्टा । अन्तग्रहणं भूतपूर्वप्रतिपत्त्यर्थम् । प्रनङ्क्ष्यति, नशिष्यति । तृप ११९५ प्रीणने । प्रीणनं तृप्तिस्तर्पणं च । 'नाग्निस्तृप्यति काष्ठानाम्' । 'पितॄनतार्प्सीत्' इति भट्टिः । इत्युभयत्र दर्शनात् । ततर्पिथ, ततर्प्थ, तत्रप्थ । तर्पिता, तर्प्ता, त्रप्ता । 'स्पृशमृशकृष-' इति सिज्वा । अतर्पीत्, अतार्प्सीत्, अत्राप्सीत्, अतृपत् । दृप ११९६ हर्षमोहनयोः । मोहनं गर्वः । दृप्यतीत्यादि । 'रधादिस्वादिमौ वेट्कावमर्थमनुदात्तता ।' द्रुह ११९७

मस्जिनशोर्झलीति । **नुम् स्यादिति ।** 'इदितो नुम्-' इत्यतस्तदनुवृत्तेरिति भावः । **ननंष्ठेति ।** व्रश्चादिषत्वम् । ष्टुत्वम् । **प्रणश्यतीति ।** 'उपसर्गादसमासे-' इति णत्वम् । **नशेः षान्तस्य ।** 'रषाभ्याम्-' इत्यतो ण इति 'न भाभू-' इत्यतो नेति चानुवर्तते इत्यभिप्रेत्य शेषं पूरयति **णत्वं न स्यादिति ।** 'षान्तस्य' इति किम् ? प्रणश्यति । **भूतपूर्वेति ।** पूर्वं षकारस्य सत इदानीमादेशवशेन षान्तत्वाभावेऽपि णत्वनिषेधप्राप्त्यर्थमन्तग्रहणमित्यर्थः । **प्रनङ्क्ष्यतीति ।** अत्र षस्य कत्वे कृतेऽपि भूतपूर्वगत्या षान्तत्वान्न णत्वमिति भावः । **तृप प्रीणने ।** **तृप्तिस्तर्पणं चेति ।** आद्ये अकर्मकः । द्वितीये सकर्मकः । रधादित्वादिडिति मत्वाह **ततर्पिथ, ततर्प्थेति, तत्रप्थेति च ।** 'अनुदात्तस्य चर्दुपधस्य-' इत्यमिति भावः । ततृपिव, ततृप्व । **सिज्वेति ।** पक्षे पुषादित्वादङिति भावः । रधादित्वादिड्विकल्पः । तत्र सिचि इट्पक्षे आह **अतर्पीदिति ।** इडभावपक्षे आह **अतार्प्सीदिति ।** हलन्तलक्षणा वृद्धिरिति भावः । 'अनुदात्तस्य च-' इत्यम्पक्षे आह **अत्राप्सीदिति ।** पुषाद्यङ्पक्षे आह **अतृपदिति ।** ङित्त्वान्न गुण इति भावः । **दृप हर्ष इति ।** तृपधातुवत् । ननु रधादित्वादेव वेट्कत्वादनिट्कारिकासु तृप्यतिदृप्यत्योः पाठो व्यर्थ इत्यत आह **रधादित्वा-**

ररन्धिव । दृढि कृते रधाद्यागात्परत्वेनाकित्त्वान्नलोपो न । **नंष्टेति ।** 'नशेर्वा' इति कुत्वमिह न शङ्क्यं पदान्त एव तद्विधानात् । अन्यथा नष्टं नाष्टिरित्यादि न सिध्येत् । **प्रणश्यतीति ।** 'उपसर्गादसमासेऽपि-' इति णत्वम् । **नशेः ।** 'न भाभूपूकमिगमि-' इत्यतो नेत्यनुवर्तते, तदाह **णत्वं न स्यादिति ।** षस्येत्युक्तेऽपि पदस्येत्यस्य विशेषणेन षान्तस्येति लाभादन्तग्रहणं व्यर्थं सज्ज्ञापयतीत्याह **भूतपूर्वेति ।** **काष्ठानामिति ।** कर्मणः शेषत्वविवक्षायां षष्ठी । **तत्रप्थेति ।** 'अनुदात्तस्य

---

१ 'प्रीणनं च' इति क, ख. ।

जिघांसायाम्। 'वा द्रुहमुह–' (सू ३२७) इति वा घः। पक्षे ढः। दुद्रोहिथ, दुद्रोग्ध, दुद्रोढ। द्रोहिता, द्रोग्धा, द्रोढा। द्रोहिष्यति, ध्रोक्ष्यति। ढत्वघत्व-योस्तुल्यं रूपम्। अद्रुहत्। मुह ११९८ वैचित्ये। वैचित्यमविवेकः। मुह्यति। मुमोहिथ, मुमोग्ध, मुमोढ। मोहिता, मोग्धा, मोढा। मोहिष्यति, मोक्ष्यति। अमुहत्। ष्णुह ११९९ उद्गिरणे। स्नुह्यति। सुष्णोह। सुष्णोहिथ, सुष्णोग्ध, सुष्णोढ। सुष्णुहिव, सुष्णुह्व। स्नोहिता, स्नोग्धा, स्नोढा। स्नोहिष्यति, स्नोक्ष्यति। अस्नुहत्। ष्णिह १२०० प्रीतौ। स्निह्यति सिष्णेह। वृत्। रधादयः समाप्ताः। पुषादयस्तु आ गणान्तादिति सिद्धान्तः। शमु १२०१ उपशमे। २५१६ शमामष्टानां दीर्घः श्यनि। (७-३-७४) शमादीना-मित्यर्थः। प्रणिशाम्यति। शेमतुः। शेमिथ। शमिता। अशमत्। तमु १२०२ काङ्क्षायाम्। ताम्यति। तमिता। अतमत्। दमु १२०३ उपशमे। उपशम इति ण्यन्तस्य। तेन सकर्मकोऽयम्। न तु शमिवदकर्मकः। अदमत्। श्रमु १२०४

दिमौ वेट्कावमर्थमनुदात्तता इति। द्रुह जिघांसायाम्। अनुदात्त-त्वाभावेऽपि रधादित्वाद्वेट्। तत्र इडभावे आह वा द्रुहमुह इति। ध्रोक्ष्य-तीति। 'वा द्रुह–' इति घत्वपक्षे दकारस्य भषि घस्य चर्त्वे सस्य षत्वे रूपम्। ढत्वपक्षेऽपि 'षढोः–' इति कत्वे एतदेव रूपम्, तदाह ढत्वघत्वयोस्तुल्यं रूपमिति। अद्रुहदिति। पुषादित्वादङिति भावः। मुह। स्तुरनुदात्तत्वाभावेऽपि रधादित्वाद् वेट्। मुमोहिथेति। इट्पक्षे रूपम्। अनिट्पक्षे तु 'वा द्रुहमुह–' इति घत्वं मत्वाह मुमोग्धेति। ढत्वपक्षे आह मुमोढेति। मोक्ष्यतीति। घत्वढत्वयोस्तुल्यं रूपम्। ष्णुह स्नोहेति। षोपदेशौ। तदाह सुष्णोह। स्निष्णे-हेति। थलादावनिट्पक्षे 'वा द्रुह–' इति घत्वविकल्पः। पक्षे ढः। इति रधादयः। आ गणान्तादिति। दिवादिगणसमाप्तिपर्यन्ताः पुषादय इत्यर्थः। सिद्धान्त इति। माधवादिभिस्तथाऽभ्युपगमादिति भावः। उपशम इति। उपशमो नाश इन्द्रियनिग्रहश्च। शमामष्टानाम्। स्पष्टम्। बहुवचनात् शमादिग्रहणम्, तदाह शमादीनामिति। 'शमस्तमुर्दमुरथ श्रमुर्भ्रमुरपि क्षमुः। क्लमुर्मदो नेत्येतेऽष्टौ शमादय इति स्थितिः।' दमु उपशम इति। ननु शमु दमु उपशमे इत्येव पठितुं युक्तमित्यत आह उपशम इति ण्यन्तस्येति। शमधातोर्हेतुमण्ण्यन्तात् घञि 'नोदात्तोपदेशस्य–' इति वृद्ध्यभाव इत्यर्थः। ततः किमित्यत आह तेनेति। ततश्च

चर्दुपधस्य–' इति विकल्पेनामागमः। रधादय इति। रधनशतृपदृपद्रुहमुहष्णुह-ष्णिह इत्यर्थः। शमु। उदित्त्वात्क्त्वायां वेट्। शमित्वा। शान्त्वा। 'यस्य

तपसि खेदे च । श्राम्यति । अश्रमत् । भ्रमु १२०५ अनवस्थाने । 'वा भ्राश-' (सू २३२१) इति श्यन्वा । तत्र कृते 'शमामष्टानाम्-' इति दीर्घः । भ्राम्यति । लुङ्यङ् । अभ्रमत् । शेषं भ्वादिवत् । क्षमू १२०६ सहने । क्षाम्यति । चक्षमिथ, चक्षन्थ । चक्षमिव, चक्षण्व । चक्षमिम, चक्षण्म । क्षमिता, क्षन्ता । अक्षमत् । भ्वादिस्तु षित् । 'अषितः क्षाम्यतेः क्षान्तिः क्षमूषः क्षमते क्षमा' । क्लमु १२०७ ग्लानौ । क्लाम्यति, क्लामति । शपीव श्यन्यपि 'ष्ठिवुक्लमु-' (सू २३२०) इत्येव दीर्घे सिद्धे शमादिपाठो घिनुणर्थः । अङ् । अक्लमत् । मदी १२०८ हर्षे । माद्यति । अमदत् । शमादयोऽष्टौ गताः ।

असु १२०९ क्षेपणे । अस्यति । आस । असिता । २५२० अस्यतेस्थुक् । (७-४-१७) अङि परे । आस्थत् । अस्य पुषादित्वादङि सिद्धे

शाम्यतीत्यस्य शमयतीत्यर्थः । **शेषं भ्वादिवदिति** । आर्धधातुकेषु शप्पक्षे च भ्वादिवदेवेत्यर्थः । **क्षमू सहने** । ऊदित्त्वात् थलि वलादौ च इड्विकल्पः, तदाह **चक्षमिथेत्यादि** । षित्त्वाषित्त्वयोः फलभेदं श्लोकार्धेन संगृह्णाति **अषित इति** । अषितः क्षाम्यतेः श्यविकरणपठितस्य क्षमधातोः क्तिनि क्षान्तिः इति रूपम् । अषित्त्वात् 'षिद्भिदादिभ्यः-' इत्यङ् न । क्षमूषस्तु भौवादिकात् षित आत्मनेपदे शपि क्षमते इति रूपम्, क्तिनं बाधित्वा षित्त्वादङि क्षमेति रूपं चेत्यर्थः । **क्लमु ग्लानौ** । नन्वस्य शमादिगणाद् बहिरेव दिवादिगणे पाठोऽस्तु । न च 'शमामष्टानाम्' इति दीर्घार्थः शमादिगणे अस्य पाठ इति वाच्यम्, 'ष्ठिवुक्लमुचमां शिति' इत्येव शपि परे इव श्यनि परेऽपि दीर्घसिद्धेः । न च 'ष्ठिवुक्लमुचमां शिति' इत्यत्रैव क्लमुग्रहणं त्यज्यतामिति वाच्यम्, शपि दीर्घार्थं तस्यावश्यकत्वादित्याशङ्क्य परिहरति **शपीव श्यन्यपीत्यादि घिनुणर्थ इत्यन्तम्** । 'शमित्यष्टाभ्यो घिनुण्' इति विधानादिति भावः । **शमादय इति** । 'शमु उपशमे' इत्यारभ्य 'मदी हर्षे' इत्यन्ता अष्टौ शमादयो वृत्ता इत्यर्थः ।

असु क्षेपणे **अस्यतेस्थुक्** । शेषं पूरयति **अङि परे इति** । 'ऋदृशोऽङि-' इत्यतस्तदनुवृत्तेरिति भावः । थुकि ककार इत्, उकार उच्चारणार्थः, कित्त्वादस्धातोरन्त्यावयवः । ननु पुषादित्वादेवास्यतेश्च्लेरङि सिद्धे 'अस्यतिवक्तिख्यातिभ्योऽङ्' इत्यत्र अस्यतिग्रहणं व्यर्थमित्याशङ्क्य निराकरोति **अस्य**

विभाषा' इति निष्ठायामनिट् । शान्तः । **भ्रमु** अनवस्थाने । **शेषमिति** । श्यनि दीर्घो लुङि अङ् च विशेष उक्तस्ततोऽन्यदित्यर्थः । **चक्षण्वेति** । 'म्वोश्च' इति मस्य नत्वे कृते णत्वम् । **शमादिपाठ इति** । 'शमित्यष्टाभ्यो घिनुण्' । **शमादय इति** ।

'अस्यतिवक्ति–' (सू २४३८) इति वचनं तङर्थम् । तङ् तु 'उपसर्गादस्यत्यूह्योः' (वा ६२०) इति वक्ष्यते । पर्यास्यत । यसु १२१० प्रयत्ने । **२५२१ यसोऽनुसर्गात् । (३-१-७१) । २५२२ संयसश्च । (३-१-७२)** श्यन्वा स्यात् । यस्यति, यसति । संयस्यति, संयसति । 'अनुपसर्गात्' किम्-प्रयस्यति । जसु १२११ मोक्षणे । जस्यति । तसु १२१२ उपक्षये । दसु १२१३ च । तस्यति । अतसत् । दस्यति । अदसत् । वसु १२१४ स्तम्भे । वस्यति । ववास ववसतुः । 'न शसदद–' (सू २२६३) इति निषेधः । वशादिरयमिति मते तु, वेसतुः वेसुः । व्युष १२१५ विभागे । अयं दाहे पठितः, अर्थभेदेन त्वङर्थं पुनः पठ्यते । अव्युषत् । ओष्ठ्यादिर्दन्त्यान्तोऽयम्, व्युस इति केचित् । अयकारो वुस इत्यन्ये । प्लुष १२१६ दाहे । अप्लुषत् । पूर्वत्र पाठः सिजर्थं

पुषादित्वादिति । तङर्थमिति । पर्यास्यतेत्यत्र आत्मनेपदे अङर्थमस्यतिवक्तीत्यत्र अस्यतिग्रहणमित्यर्थः, पुषाद्यङः परस्मैपदमात्रविषयतया आत्मनेपदे अप्रसक्तेरिति भावः । नन्वस्यतेः केवलपरस्मैपदित्वादात्मनेपदं दुर्लभमित्यत आह **तङ् तु उपसर्गादिति । वक्ष्यते इति ।** पदव्यवस्थायामिति शेषः । **यसु प्रयत्ने । यसोऽनुपसर्गात् । संयसश्च ।** सूत्रद्वयमिदम् । **श्यन् वा स्यादिति ।** शेषपूरणमिदम् । 'दिवादिभ्यः श्यन्' इत्यतः 'वा भ्राश–' इत्यतश्च तदनुवृत्तेरिति भावः । अनुपसर्गाद्यसः श्यन् वा स्यादिति प्रथमसूत्रार्थः । सोपसर्गात्तु नित्य एव श्यन्, अनुपसर्गादिति पर्युदासात् । संपूर्वाद् यसेर्नित्यमेव श्यनः प्राप्तौ द्वितीयसूत्रम् । **व्युष विभागे । अयमिति ।** दिवादिगण एव पुषादिभ्यः प्रागयं धातुः पठित इत्यर्थः । पौनरुक्त्यमाशङ्क्याह **अर्थभेदेन त्वङर्थं पठ्यत इति ।** विभागात्मके अर्थविशेषे एव पुषाद्यङर्थमिह पुनः पाठ इत्यर्थः । **अव्युषदिति ।** 'व्युष दाहे' इति पूर्वं पठितस्य तु सिजेव । अव्योषीत् । **ओष्ठ्यादेरिति ।** दन्त्योष्ठ्यादिदन्त्योष्मान्तोऽयमिति केचिन्मन्यन्त इत्यर्थः । **अयकार इति ।** दन्त्योष्ठ्यादिदन्त्योष्मान्तो यो धातुरुक्तः स एवायं यकाररहित इत्यन्ये मन्यन्त इत्यर्थः । अयकारमिति पाठे क्रियाविशेषणम् । **प्लुष दाहे ।** ननु दिवादिगणे परस्मैपदिषु

शमूतमूदमूश्रमूभ्रमूक्षमूक्लमूमद इत्यर्थः । **यसोऽनुप ।** अत्र वदन्ति—यस इत्येवास्तु । ततः समः नियमार्थमिदम् । सोपसर्गाद्यसश्चेत्संपूर्वकादेवेति । एवं च पूर्वसूत्रेऽनुपसर्गादिति [illegible] न यसश्चेति ग्रहणं त्यक्तुं [illegible] । **इहापि पठित इति ।** व्युष दाह इत्यासमेव [illegible] पठित इत्यर्थः । **अङर्थमिति ।** दाहे पठितस्य तु सिजेव । [illegible] । [illegible]

इत्याहुः। तद् भ्वादिपाठेन गतार्थमिति सुवचम्। विस १२१७ प्रेरणे। बिस्यति। अबिसत्। कुस १२१८ संश्लेषणे। अकुसत्। बुस १२१९ उत्सर्गे। मुस १२२० खण्डने। मसी १२२१ परिणामे। परिणामो विकारः। समी इत्येके। लुठ १२२२ विलोडने। उच १२२३ समवाये। उच्यति। उवोच ऊचतुः। मा भवानुचत्। भृशु १२२४ भ्रंशु १२२५ अधःपतने। बभर्श। अभृशत्। अनिदिताम्–' (सू ४१५) इति नलोपः। भ्रश्यति। अभ्रशत्। वृश १२२६ वरणे। वृश्यति। अवृशत्। कृश १२२७ तनूकरणे। कृश्यति। ञि तृषा १२२८ पिपासायाम्। हृष १२२९ तुष्टौ। श्यन्नेवौ भौवादिकाद्विशेषः। रुष १२३० रिष १२३१ हिंसायाम्। 'तीषसह–' (सू २३४०) इति वेट्। रोषिता, रोष्टा। रेषिता, रेष्टा। डिप १२३२ क्षेपे। कुप १२३३ क्रोधे। गुप १२३४ व्याकुलत्वे। युप १२३५ रुप १२३६ लुप १२३७ विमोहने। युप्यति। रुप्यति। लुप्यति। लोपिता। लुप्यतिः सेट्कः। अनिट्कारिकासु लिपिसाहचर्यात्तौदादिकस्यैव ग्रहणात्। लुभ १२३८ गार्ध्ये। गार्ध्यमाकाङ्क्षा। 'तीषसह–' (सू २३४०) इति वेट्। लोभिता, लोब्धा। लोभिष्यति। लुभ्येत्। लुभ्यात्। अलुभत्। भ्वादेरवृत्कृतत्वाल्लोभतीत्यपीत्याहुः। क्षुभ १२३९ संचलने। क्षुभ्यति। णभ १२४० तुभ १२४१ हिंसायाम्। क्षुभिनभितुभयो द्युतादौ क्र्यादौ च पठ्यन्ते। तेषां द्युतादित्वादङ् सिद्धः। क्र्यादित्वात्परस्मै सिज्भवत्येव। इह पाठस्तु श्यनर्थः।

पुषादिभ्यः प्राग् अस्य पाठः क्वचिद् दृश्यते। तत्र पौनरुक्त्यशङ्कां परिहरति **पूर्वत्र पाठः सिजर्थ इति**। पुषादावेव पाठे सति अङेव श्रूयेत नतु सिच्। पुषादेः प्रागपि पाठे तु तस्य अङभावात् सिच् श्रूयेत। तथा च सिचः कदाचित् श्रवणार्थः पूर्वं पाठ इत्यर्थः। आहुरित्यस्वरसोद्भावनम्। तद्बीजं दर्शयति **तद् भ्वादीति**। तद् दिवादिगणे पुषादिभ्यः पूर्वमस्य पठनं भ्वादिपाठेनैव संपन्नप्रयोजनकमिति सुष्ठु वक्तुं शक्यमित्यर्थः। एवं च भ्वादिपाठात् शब्विकरणो लुङि सिचः श्रवणं च सिध्यति। पुषादौ पाठात्तु श्यन्विकरणः अङ् च सिध्यति। अतो दिवादिगणे पुषादिभ्यः प्रागस्य पाठो व्यर्थ एवेति भावः। एतदेवाभिप्रेत्य मूले दिवादिगणे पुषादिगणात् प्राक् प्लुष दाहे इति न पठितमिति बोध्यम्। **मसी परिणाम इति**। ईदित्त्वं 'श्वीदितः–' इत्येतदर्थम्। मस्यति। **समी इत्येके इति**। सम्यति। **भृशु भ्रंशु अधःपतने**। द्वितीयधातोराह **अनिदितामिति**। **युप रुप लुप विमोहन इति**। धातुवृत्त्यादिविरोधादुदित्पाठो लेखकप्रमादादायातः। **इह पाठस्त्विति**। क्षुभिनभितुभीनाम् इह दिवादिगणे पाठस्य श्यनेव प्रयोजन-

क्लिदू १२४२ आर्द्रीभावे। क्लिद्यति। चिक्लेदिथ, चिक्लेत्थ। चिक्लिदिव, चिक्लिद्व। चिक्लिदिम, चिक्लिद्म। क्लेदिता, क्लेत्ता। ञि मिदा १२४३ स्नेहने। 'मिदेर्गुणः' (सू २३४६)। मेद्यति। अमिदत्। द्युतादिपाठादेव अमिदत् अमेदिष्टेति सिद्धे इह पाठः अमेदीदिति मा भूदिति। द्युतादिभ्यो बहिरेवात्मनेपदिषु पाठस्तूचितः। ञि क्ष्विदा १२४४ स्नेहनमोचनयोः। ऋधु १२४५ वृद्धौ। आनर्ध। आर्धत्। गृधु १२४६ अभिकाङ्क्षायाम्। अगृधत्। वृत्। पुषादयो दिवादयश्च वृत्ताः। केचित्तु पुषादिसमाप्त्यर्थमेव वृत्करणम्। दिवादिस्तु भ्वादिवदाकृतिगणः। तेन क्षीयते सूयतीत्यादिसिद्धिरित्याहुः।

॥ इति तिङन्ते दिवादिप्रकरणम् ॥

अथ तिङन्ते स्वादिप्रकरणम् ॥ ४७ ॥

षुञ् १२४७ अभिषवे। अभिषवः स्नपनं पीडनं स्नानं सुरासन्धानं च।

मित्यर्थः। वस्तुतस्तु पुषादेः प्रागेव एषां त्रयाणां पाठो युक्त इति भावः। **ञि मिदा स्नेहने। अमिददिति।** ननु भ्वाद्यन्तर्गणे द्युतादौ 'ञि मिदा स्नेहने' इत्यात्मनेपदिषु पठितः। लुङि तु 'द्युद्भ्यो लुङि' इत्यत्र परस्मैपदविकल्पः उक्तः। द्युताद्यङ् तु परस्मैपद एव न तु तङि। एवं च द्युतादिपाठादेव परस्मैपदपक्षे अङि अमिददिति तङि तु अङभावे अमेदिष्टेति सिद्धम्। तथा च पुषादावस्य पाठो व्यर्थः। तद्बहिर्दिवादौ पाठादेव श्यन्सिद्धेरित्याशङ्क्यते **द्युतादिपाठादेवेत्यादिना सिद्धे इत्यन्तेन।** तामिमां शङ्कां परिहरति **इह पाठः अमेदीदिति मा भूदितीति।** पुषादावस्य पाठः अमेदीदिति व्यावृत्त्यर्थ इत्यर्थः। पुषादिभ्यः प्रागेव दिवादावस्य पाठे तु तस्माल्लुङि अङसंभवादमेदीदिति स्यादिति भावः। नन्वेवं सति भ्वाद्यन्तर्गणे द्युतादावस्य पाठो व्यर्थः। द्युतादिभ्यो बहिरेवात्मनेपदिषु पठ्यताम्। एवं च अमेदिष्टेति सिद्धम्। इह पुषादौ पाठात्तु अमिददिति सिद्धमित्याशङ्क्येष्टापत्त्या परिहरति **द्युतादिभ्यो बहिरेवात्मनेपदिषु पाठस्तूचित इति।** सूचित इति पाठे तु सुतरामुचित इति व्याख्येयम्। **ञि क्ष्विदेत्यादि।** व्यक्तम्।

इति श्रीवासुदेवदीक्षितविदुषा विरचितायां सिद्धान्तकौमुदीव्याख्यायां बालमनोरमाख्यायां श्यन्विकरणं समाप्तम्।

अथ श्नुविकरणा धातवो निरूप्यन्ते। षुञ्धातुः षोपदेशः। अनिट्। इत

तत्र स्नाने अकर्मकः । २५२३ स्वादिभ्यः श्नुः । (३-१-७३) सुनोति । सुनुतः । 'हुश्नुवोः-' (सू २३८७) इति यण् । सुन्वन्ति । सुन्वः, सुनुवः । सुन्वहे, सुनुवहे । सुषाव । सुषुवे । सोता । सुनु । सुनवानि । सुनवै । सुनुयात् । सूयात् । 'स्तुसुधूञ्भ्यः-' (सू २३८५) इतीट् । असावीत् । असोष्ट ।

आरभ्य ञित्वादुभयपदिनः । **सुरासंधानमिति** । सुरोत्पादनमित्यर्थः । **स्वादिभ्यः श्नुः** । कर्त्रर्थे सार्वधातुके स्वादिभ्यः श्नुः स्यादित्यर्थः । शपोऽपवादः । **सुनोतीति** । लटस्तिपि श्नुः, शकार इत् शित्त्वेन सार्वधातुकत्वात् 'सार्वधातुकमपित्' इति ङित्त्वात्तस्मिन् परे धातोर्न गुणः । श्नोस्तु तिपमाश्रित्य गुण इति भावः । **सुनुत इति** । तसो ङित्त्वात् श्नोर्न गुण इति भावः । सुनु अन्ति इति स्थिते 'अचि श्नुधातु-' इति उवङमाशङ्क्याह **हुश्नुवोरिति** । सुनोषि सुनुथः सुनुथ । सुनोमि । वसि मसि च 'लोपश्चास्यान्यतरस्यां म्वोः' इत्युकारलोपविकल्पं मत्वाह **सुन्वः सुनुव इति** । सुन्मः सुनुम इत्यपि ज्ञेयम् । अथ लटस्तङि सुनुते सुन्वाते सुन्वते । सुनुषे सुन्वाथे सुनुध्वे । सुन्वे । इति सिद्धवत्कृत्याह **सुन्वहे, सुनुवहे इति** । लोपश्चास्य-' इत्युकारलोपविकल्प इति भावः । सुन्महे, सुनुमहे इत्यपि ज्ञेयम् । **सुषावेति** । सुषुवतुः सुषुवुः । सुषविथ, सुषोथ सुषुवथुः सुषुव । सुषाव, सुषव सुषुविव सुषुविम । अथ लिटस्तङ्याह **सुषुवे इति** । सुषुवाते सुषुविरे । सुषुविषे सुषुवाथे सुषुविध्वे । सुषुवे सुषुविवहे सुषुविमहे । **सोतेति** । अनिट्त्वसूचनमिदम् । सोष्यति, सोष्यते । सुनोतु, सुनुतात् सुनुताम् सुन्वन्तु । इति सिद्धवत्कृत्याह **सुनु इति** । 'उतश्च प्रत्ययात्-' इति हेर्लुक् । सुनुतात् सुनुतम् सुनुत । **सुनवानीति** । 'हुश्नुवोः-' इति यणं बाधित्वा परत्वाद् गुणः, आटः पित्त्वेन अङित्त्वादिति भावः । सुनवाव सुनवाम । लोटस्तङि सुनुताम् सुन्वाताम् सुन्वताम् । सुनुष्व सुन्वाथाम् सुनुध्वम् । इति सिद्धवत्कृत्याह **सुनवै इति** । 'हुश्नुवोः-' इति यणं बाधित्वा परत्वाद् गुणः, आटः पित्त्वेन ङित्त्वाभावादिति भावः । सुनवावहै सुनवामहै । असुनोत् असुनुताम् असुन्वन् । असुनोः । असुनवम् असुनुव, असुन्व । असुनुत असुन्वाताम् असुन्वत । इत्याद्यूह्यम् । विधिलिङ्याह **सुनुयादिति** । यासुटो ङित्त्वात् श्नोर्न गुण इति भावः । **सूयादिति** । आशीर्लिङि 'अकृत्सार्वधातुकयोः-' इति दीर्घ इति भावः । सोषीष्ट । लुङि परस्मैपदे सिचि इण्निषेधे प्राप्ते आह **स्तुसुधूञ्भ्य इति** ।

षुञ् । **सुन्व इति** । 'लोपश्चास्या-' इत्युकारस्य वा लोपः । **सुनवानीति** । 'आडुत्तमस्य-' इत्यादि कृते 'हुश्नुवोः-' इति यणं बाधित्वा परत्वाद् गुणः ।

अभिषुणोति। अभ्यषुणोत्। अभिसुषाव। २५२४ सुनोतेः स्यसनोः। (८-३-११७) स्ये सनि च परे सुञः षो न स्यात्। विसोष्यति। षिञ् १२४८ बन्धने। सिनोति। विसिनोति। सिषाय। सिष्ये। सेता। शिञ् १२४९ निशाने। ताजन्त्यादिः। शेता। डु मिञ् १२५० प्रक्षेपणे। 'मीनातिमिनोति-' (सू २५०८) इत्यात्वम्। ममौ। ममिथ, ममाथ। मिम्य। माता। मीयात्।

इडिति। असाविष्टामित्यादि। लुङस्तङ्याह असोष्टेति। असोषातामित्यादि। असोष्यत्, असोष्यत। 'उपसर्गात् सुनोति-' इति षत्वं मत्वा आह अभिषुणोतीति। षात्परत्वाण्णत्वम्। अभ्यषुणोदिति। 'प्राक् सितादड्व्यवायेऽपि' इति षत्वम्। अभिसुषावेति। 'स्थादिष्वभ्यासेन-' इति नियमादभ्यासस्य न षः। 'आदेशप्रत्यययोः' इत्युत्तरखण्डस्य षः। सुनोतेः स्यसनोः। 'अपदान्तस्य मूर्धन्यः' इत्यधिकृतम्। 'न रपर-' इत्यतो नेत्यनुवर्तते, तदाह षो न स्यादिति। स्ये उदाहरति विसोष्यतीति। अत्र 'उपसर्गात् सुनोति-' इति प्राप्तः षो न भवति। सनि तु अभिसुसूरित्युदाहरणम्। सुञः सनि द्वित्वे अभिसुसूस इति सनन्तात् क्विपि अतो लोपे अभिसुसूस् इत्यस्मात् सोर्हल्ङ्यादिलोपे सस्य रुत्वे 'र्वोरुपधायाः-' इति दीर्घे रेफस्य विसर्गः। सुसूषति इति तु नोदाहरणम्, 'स्तौतिण्योरेव षण्यभ्यासात्' इति नियमादेव षत्वाभावसिद्धेरित्यलम्। षिञ् बन्धन इति। षोपदेशः अनिट् च। सुञ इव रूपाणि। विसिनोतीति। 'सात्पदाद्योः' इति षत्वनिषेधः। 'उपसर्गात्सुनोति-' इति तु न षः, सुनोत्यादिष्वनन्तर्भावादिति भावः। सिषायेति। णलि वृद्धौ आयादेशः। अतुसादौ 'एरनेकाचः-' इति यण्। सिष्यतुरित्यादि। लिटस्तङ्याह सिष्ये इति। सिषि ए इति स्थिते 'एरनेकाचः-' इति यणिति भावः। सिष्याते सिष्यिरे इत्यादि। असैषीत्। शिञ् निशान इति। षिञ्वत्। डु मिञ् प्रक्षेपण इति। मिनोति। उपदेशे एजन्तत्वादात्वे अप्राप्ते आह मीनातिमिनोतीत्यात्वमिति। एज्विषये अशितीति शेषः। ममाविति। आत्वे कृते णल औत्वमिति भावः। अतुसादावेज्विषयत्वाभावान्नात्वम्। 'एरनेकाचः-' इति यण्। मिम्यतुः। मिम्युः। भारद्वाजनियमात् थलि वेडिति मत्वाह ममिथ, ममाथेति। थलः पित्त्वेन अकित्त्वादेज्विषयत्वम्। इट्पक्षे 'आतो लोपः-' इति भावः। मिम्यथुः मिम्य। ममौ मिम्यिव

सुनोतेः स्यसनोः। 'न रपर-' इत्यस्मान्नेत्यनुवर्तनादाह षो न स्यादिति। सनि तु अभिसुसूः। सन्नन्तादस्मात्क्विप्यतो लोपे रुत्वे कृते दीर्घः। सुसूषतीत्येतत्तु नोदाहरणम् 'स्तौतिण्योरेव षणि' इति नियमेनैव षत्वाभावसिद्धेः। एतच्च काशि-

मासीष्ट । अमासीत् अमासिष्टाम् । अमास्त । चिञ् १२५१ चयने । प्रणि-
चिनोति । २५२५ विभाषा चेः । (७-३-५८) अभ्यासात्परस्य चिञः
कुत्वं वा स्यात्सनि लिटि च । प्रणिचिकाय, चिचाय । चिक्ये, चिच्ये । अचैषीत्,
अचेष्ट । स्तृञ् १२५२ आच्छादने । स्तृणोति । स्तृणुते । 'गुणोऽर्ति–' (सू २३८०)
इति गुणः । स्तर्यात् । २५२६ ऋतश्च संयोगादेः । (७-२-४३)
ऋदन्तात्संयोगादेः परयोर्लिङ्सिचोरिड् वा स्यात्तङि । स्तरिषीष्ट, स्तृषीष्ट । अस्त-
रिष्ट, अस्तृत । कृञ् १२५३ हिंसायाम् । कृणोति । कृणुते । चकार । चकर्थ ।

मिम्यिम । लिटस्तङ्याह **मिम्ये इति** । एशः कित्वादेज्विषयत्वाभावाच्च नात्त्वमिति
भावः । मिम्याते मिम्यिरे । मिम्यिषे मिम्याथे मिम्यिध्वे । मिम्ये मिम्यिवहे मिम्यि-
महे । **मातेति** । एज्विषयत्वादशित्त्वाच्च आत्त्वमिति भावः । मास्यति, मास्यते ।
सार्वधातुकेषु धुवत् । **मीयादिति** । आशीर्लिङि परस्मैपदे यासुटः कित्वादे-
ज्विषयत्वाभावादात्त्वाभावे 'अकृत्सार्व–' इति दीर्घ इति भावः । आशीर्लिङि तङि
आह **मासीष्टेति** । एज्विषयत्वादात्त्वमिति भावः । लुङि परस्मैपदे सिचि आत्त्वे
'यमरम–' इति सगिटौ मत्वाह **असासीदिति** । सकि सिच इटि सिज्लोपः ।
अमास्तेति । लुङि तङि सिचि आत्त्वमिति भावः । अमासाताम् अमासत इत्यादि ।
चिञ् चयन इति । चयनं रचना । अनिट् । सार्वधातुके धुवद्रूपाणि ।
प्रणिचिनोतीति । 'नेर्गद–' इति णत्वमिति भावः । **विभाषा चेः** । 'चजोः
कुघिण्ण्यतोः' इत्यतः कुग्रहणमनुवर्तते । 'अभ्यासाच्च' इत्यतः अभ्यासादिति
'सन्लिटोर्जेः' इत्यत सन्लिटोरिति च, तदाह **अभ्यासादित्यादिना** । **स्तृञ्
आच्छादन इति** । अनिट् । लिटि तस्तार अतुसादौ 'ऋतश्च संयोगादेर्गुणः'
इति गुणः । वृद्धिविषयेऽपि परत्वादस्य प्रवृत्तिः । तस्तरतुः । ऋदन्तत्वात्थल्यपि
नित्यं नेट् । तस्तर्थ । तस्तरिव । तस्तरे तस्तराते तस्तरिरे । तस्तरिषे ।
तस्तरिवहे । स्तर्ता । 'ऋद्धनोः स्ये' स्तरिष्यति । आशीर्लिङि परस्मैपदे यासुटः
कित्वाद्गुणनिषेधे प्राप्ते आह **गुणोऽर्तीति गुण इति** । तङि आशीर्लिङि स्तृ-
षीष्ट इति स्थिते **ऋतश्च संयोगादेः** । 'लिङ्सिचोरात्मनेपदेषु' इत्यनुवर्तते ।
'इट् सनि वा' इत्यत इड्वेति, तदाह **ऋदन्तादित्यादिना** । लुङि परस्मैपदे

कार्यां स्पष्टम् । **चिञ्** । चयनं रचनाविशेषः । **विभाषा चेः** । 'चजोः–' इति सूत्रात्
कुरनुवर्तते 'सन्लिटोर्जेः' इत्यतः सन्लिटोरिति च । सन्युदाहरणम् । चिकीषति । चिची-
षति । **ऋतश्च संयोगादेः** । 'इट् सनि वा' इत्यत इट् वेत्यनुवर्तते । 'लिङ्-
सिचोः–' इति सूत्रादात्मनेपदेष्विति च, तदाह **इड् वा स्यात्तङीति** । तङि

चक्रे। क्रियात्। कृषीष्ट। अकार्षीत्, अकृत। वृञ् १२५४ वरणे। २५२७ **बभूथाततन्थजगृम्भववर्थेति निगमे।** (७-२-६४) एषां वेदे इडभावो निपात्यते। तेन भाषायां थलीट्। ववरिथ। ववृव। ववृवहे। वरिता, वरीता। २५२८ **लिङ्सिचोरात्मनेपदेषु।** (७-२-४२) वृङ्वृञ्भ्यामृदन्ताच्च परयोर्लिङ्सिचोरिड् वा स्यात्तङि। २५२९ **न लिङि।** (७-२-३९) वृतो लिङ इटो दीर्घो न स्यात्। वरिषीष्ट, वृषीष्ट। अवारीत्, अवरिष्ट, अवृ-

---

अस्तार्षीत्। लुङस्तङि त्वाह **अस्तरिष्ट, अस्तृतेति।** 'ऋतश्च संयोगादेः–' इति इट्पक्षे गुणः। इडभावपक्षे तु 'ह्रस्वादङ्गात्' इति सिचो लोपः। कृञ् **हिंसायाम्** **चकर्थेति।** 'कृसृभृवृ' इति थल्यपि नित्यमिण्निषेधः। चकृव। **क्रियादिति।** आशीर्लिङि 'रिङ् शयग्लिङ्क्षु' इति रिङ्। **कृषीष्टेति।** 'उश्च' इति कित्त्वान्न गुणः। **अकार्षीदिति।** सिचि वृद्धिः रपरत्वम्। **अकृतेति।** 'ह्रस्वादङ्गात्' इति सिचो लोपः। **वृञ् वरणे।** सेट्। ववार ववुः। **बभूथाततन्थ।** निगमो वेदः, तदाह **एषां वेद इति।** ननु 'कृसृभृवृ–' इति निषेधादेव थलि ववर्थेति सिद्धे किमर्थं ववर्थग्रहणमित्यत आह **तेन भाषायां थलीडिति।** निगमे एव वृणोतेस्थलि इण्निषेध इति नियमलाभादिति भावः। ववे ववाते। ववृषे। 'वृतो वा' इति मत्वाह **वरिता वरीतेति। लिङ्सिचोः।** 'इट् सनि वा' इत्यत इड्वा इत्यनुवर्तते। 'वृतो वा' इत्यतो वृत इति तदाह **वृङ्वृञ्भ्यामित्यादिना। न लिङि।** 'वृतो वा' इत्यतो वृत इत्यनुवर्तते। लिङीति षष्ठ्यर्थे सप्तमी। 'आर्धधातुकस्येट्–' इत्यत इडित्यनुवृत्तं षष्ठ्या विपरिणम्यते। 'ग्रहोऽलिटि–' इत्यतो दीर्घ इत्यनुवर्तते। तदाह **वृत इति।** वृङ्वृञ्भ्यामृकारान्ताच्चेत्यर्थः। **वरिषीष्टेति।** इट्पक्षे 'वृतो वा' इति प्राप्तो दीर्घो न भवति। **वृषीष्टेति।** इडभावपक्षे 'उश्च' इति कित्त्वान्न गुणः। **अवारीदिति।** लुङि परस्मैपदे सिचि वृद्धिः। अवारिष्टाम् अवारिषुः। 'सिचि च परस्मैपदेषु' इति निषेधादिह 'वृतो वा' इति न दीर्घः।

किम्, स्तर्यात्। अस्तार्षीत्। **बभूथाततन्थ।** भूधातोस्तनोतेश्च थलि इडभावो निपात्यते। 'त्वं हि होता प्रथमो बभूथ'। 'येनान्तरिक्षमुर्वाततन्थ'। भाषायां तु बभूविथ। तेनिथ। 'जगृम्भाते दक्षिणमिन्द्र हस्तम्'। भाषायां तु जगृहिम। वृणोतेस्थलि क्रादिसूत्रेणेण्निषेधे सिद्धेऽपि निगम एव निषेधो नान्यत्रेति नियमार्थं ववर्थग्रहणम्। 'ववर्थ त्वं हि ज्योतिषाम्'। भाषायां तु ववरिथ। ववृषे। **लिङ्सिचोः।** वृत इत्यनुवर्तते। आत्मनेपदेषु किम्, अवारीत्। अवारिष्टाम्। अवारिषुः। 'सिचि च परस्मैपदेषु' इति निषेधादिह 'वृतो वा' इति न दीर्घः।

रीष्ट, अवृत । धुञ् १२५५ कम्पने । धुनोति । धुनुते । अधौषीत् । अधोष्यत् । दीर्घान्तोऽप्ययम् । धूनोति, धूनुते । 'स्वरतिसूति–' (सू २२७९) इति वेट् । दुधविथ, दुधोथ । किति लिटि तु 'श्र्युकः–' (सू २३८१) इति निषेधं बाधित्वा क्रादिनियमान्नित्यमिट् । दुधुविव । 'स्तुसुधूञ्भ्यः–' (सू २२८९) इति नित्यमिट् । अधावीत्, अधविष्ट, अधोष्ट ।

अथ परस्मैपदिनः । टु दु १२५६ उपतापे । दुनोति । हि १२५७ गतौ वृद्धौ च । २५३० हिनुमीना । (८–४–१५) उपसर्गस्थान्निमित्तात्परस्य एतयोर्नस्य णः स्यात् । प्रहिणोति । २५३१ हेरचङि । (७–३–५६) अभ्यासात्परस्य हिनोतेर्हस्य कुत्वं स्यान्न तु चङि । जिघाय । पृ १२५८ प्रीतौ । पृणोति । पर्ता । स्पृ १२५९ प्रीतिपालनयोः । 'प्रीतिचलनयोः' इत्यन्ये । 'चलनं जीवनम्' इति स्वामी । स्पृणोति । पस्पार । स्मृ इत्येके । स्मृणोति । पृणोत्यादयस्त्रयोऽपि छान्दसा इत्याहुः । आप्लृ १२६० व्याप्तौ । आप्नोति आप्नुतः आप्नुवन्ति । आप्नुवः । आप्ता । आप्नुहि । लृदित्त्वादङ् । आपत् ।

लुवस्तङि सिचि 'लिङ्सिचोः–' इति इट्पक्षे 'वृतो वा' इति दीर्घविकल्पं मत्वाह **अवरिष्ट, अवरीष्टेति** । **अवृतेति** । इडभावपक्षे 'ह्रस्वादङ्गात्' इति सिचो लोपः । **धुञ् कम्पन इति** । ह्रस्वान्तोऽयमनिट् । धुञ इव रूपाणि । **दीर्घान्तोऽप्ययमित्यादि** । व्यक्तम् ।

अथ परस्मैपदिन इति । राध साध संसिद्धाविस्येतत्पर्यन्ता इत्यर्थः । 'टु दु उपतापे' इत्यारभ्य 'स्मृ इत्येके' इत्येतत्पर्यन्ता धातवो ह्रस्वान्ताः । **हि गताविति** । प्रहिणोतीत्यत्र भिन्नपदत्वाद् णत्वेऽप्राप्ते आह **हिनुमीना** । हिनु मीना अनयोर्द्वन्द्वात्षष्ठीद्विवचनस्य आर्षो लुक् । 'रषाभ्यां नो णः–' इत्यनुवर्तते । 'उपसर्गादसमासेऽपि–' इत्यत उपसर्गादिति च । तदाह **उपसर्गस्थादिति** । **हेरचङि** । 'चजोः–' इति सूत्रात् कुग्रहणमनुवर्तते । 'अभ्यासाच्च' इत्यतः अभ्यासादिति । 'हो हन्तेः–' इत्यतो ह इति षष्ठ्यन्तमनुवर्तते, तदाह **अभ्यासात्परस्येति** । **जिघायेति** । जिघ्यतुः । जिघयिथ, जिघेथ । जिघ्यिव । **आप्लृ व्याप्तौ** । अनिट् । **आप्नुवन्तीति** । संयोगपूर्वकत्वाद् 'हुश्नुवोः–' इति न यण् । **आप्नुव इति** ।

हिनु मीना । प्रमीणाति । **हेरचङि** । जेघीयते । अचङीति किम्, अजीहयत् । इह णयन्तस्य धात्वन्तरत्वात्केवलस्य त्वभ्यासनिमित्तप्रत्ययपरत्वाभावात्कुत्वप्राप्तिरेव नास्तीत्यचङीति निषेधो व्यर्थः सन् ज्ञापयति णयधिकस्यापि कुत्वं भवतीति । तेन जिघापयिषतीत्यादि सिद्धम् । **आप्नुहीति** । संयोगपूर्वत्वाद् 'उतश्च प्रत्ययात्–'

शक्लृ १२६१ शक्तौ। अशकत्। राध १२६२ साध १२६३ संसिद्धौ। राध्नोति। **२५३२ राधो हिंसायाम्।** (६-४-१२३) एत्वाभ्यासलोपौ स्तः किति लिटि सेटि थलि च। अपरेधतुः। रेधुः। रेधिथ। राद्धा। साध्नोति। साद्धा। असात्सीत् असाद्धाम्।

अथ द्वावनुदात्तेतौ। अशू १२६४ व्याप्तौ संघाते च। अश्नुते। **२५३३ अश्नोतेश्च।** (७-४-७२) दीर्घादभ्यासादवर्णात्परस्य नुट् स्यात्। आनशे। अशिता, अष्टा। अशिष्यते, अक्ष्यते। अश्नुवीत। अक्षीष्ट, अशिषीष्ट। आशिष्ट, आष्ट आक्षाताम्। ष्टिघ १२६५ आस्कन्दने। स्तिघ्नुते। तिष्टिघे। स्तेघिता।

अथ आगणान्तात्परस्मैपदिनः। तिक १२६६ तिग १२६७ गतौ च।

संयोगपूर्वकत्वाद् 'लोपश्चास्य–' इति नोकारलोपविकल्पः। **आप्नुहीति।** संयोगपूर्वकत्वादेव 'उतश्च प्रत्ययात्–' इति हेर्न लुक्। **शक्लृ शक्ताविति।** शक्नोति। शशाक शेकतुः। शशक्थ, शेकिथ। शेकिव। शक्ता। शक्ष्यति। **अशकदिति।** लृदित्त्वादङ्। **राध साध संसिद्धौ।** अनिटौ। दीर्घाकारवत्त्वाद् 'अत एकहल्–' इत्यप्राप्तावाह **राधो हिंसायाम्।** 'घ्वसोः–' इत्यत एदिति अभ्यासलोप इति च अनुवर्तते। 'गमहन–' इत्यतः कितीति, 'अत एकहल्मध्ये–' इत्यतो लिटीति 'थलि च सेटि' इति सूत्रं चानुवर्तते, तदाह **एत्वेत्यादिना अपरेधतुरिति।** उपसर्गवशादिह हिंसायां वृत्तिः। अन्यत्र रराधतुः। थल्यपि क्रादिनियमान्नित्यमिट्। 'उपदेशेऽत्वतः' इत्यत्र तपरकरणादिह नेण्निषेधः, तदाह **रेधिथेति। राद्धेति।** 'झषस्तथोः–' इति धः।

अशू व्याप्ताविति। ऊदित्त्वाद्वेट्। **अश्नुते इति।** अश्नुवाते अश्नुवते। संयोगपूर्वकत्वाद् 'हुश्नुवोः–' इति न यण्। **अश्नोतेश्च।** 'अत लोपः–' इत्यतः अभ्यासस्येत्यनुवर्तते, 'तस्मान्नुट्–' इति च। तच्छब्देन 'अत आदेः' इति कृतदीर्घः अकारः परामृश्यते, तदाह **दीर्घादिति। आनशे इति।** आनशिषे आनक्षे। आनशिवहे, आनश्वहे। **अष्टेति।** व्रश्चादिना शस्य षत्वे ष्टुत्वम्। विधिलिङ्याह **अश्नुवीतेति।** आशीर्लिङि ऊदित्त्वादिड्विकल्पं मत्वाह **अक्षीष्ट, अशिषीष्टेति।** लुङि सिच इट्पक्षे आह **आशिष्टेति।** अनिट्पक्षे 'झलो झलि' इति सिचो लोपं मत्वाह **आष्टेति।** ष्टिघधातुः षोपदेशः। सेट्। आ गणान्ता-

---

इति हेर्लुङ् न। **राधो हिंसायाम्।** अत इत्यनुवर्तमानेऽपि सामर्थ्यादकारमात्रं स्थानित्वेनाश्रीयते। **अश्नोतेश्च।** 'तस्मान्नुड–' इत्यनुवर्तत इत्याहुः। **दीर्घादिति।** श्नुविकरणनिर्देशः किम्, क्र्यादेरश भोजन इत्यस्य माभूत्। आश। आशतुः।

घादास्कन्दने। तिक्नोति। तिग्नोति। षघ १२६८ हिंसायाम्। सघ्नोति। ञि धृषा १२६९ प्रागल्भ्ये। धृष्णोति। दधर्ष। धर्षिता। दम्भु १२७० दम्भने। दम्भनं दम्भः। दभ्नोति। ददम्भ। 'श्रन्थिग्रन्थिदम्भिस्वञ्जीनां लिटः कित्वं वा' इति व्याकरणान्तरमिहाप्याश्रीयत इत्युक्तम्। 'अनिदिताम्–' (सू ४१५) इति नलोपः। तस्याभीयत्वादसिद्धत्वेन एत्वाभ्यासलोपयोरप्राप्तौ 'दम्भेश्च एत्वाभ्यासलोपौ वक्तव्यौ' (वा ४१५२)। देभतुः, ददम्भतुः, इदं कित्वं पिद्विद्विषयकमिति सुधाकरादयः। तन्मते तिप्सिप्मिप्सु देभ देभिथ देभ इति रूपान्तरं बोध्यम्। अपिद्विषयकमिति न्यासकारादिमते तु ददम्भ ददम्भिथ ददम्भेत्येव। दभ्यात्। ऋधु १२७१ वृद्धौ। तृप प्री ने इत्येके। क्षुभ्नादित्वाण्णत्वं न। तृप्नोति। 'छन्दसि' (गण १९७)। आगणान्तादधिकारोऽयम्। अह १२७२ व्याप्तौ। अह्नोति। दघ १२७३ घातने पालने च। दघ्नोति। चमु १२७४ भक्षणे। चम्नोति। रि १२७५ क्षि १२७६ चिरि १२७७ जिरि १२७८ दाश १२७९ दृ १२८० हिंसायाम्। रिणोति। क्षिणोति। अयं भाषायामपीत्येके। 'न तद्यशः शस्त्रभृतां क्षिणोति'। ऋक्षोरयेक एवाजादिरित्यन्ये। ऋक्षिणोति। चिरिणोति। जिरिणोति। दाश्नोति। दृणोति। दृत्।

॥ इति तिङन्ते स्वादिप्रकरणम् ॥

दिति। स्वादिगणसमाप्तिपर्यन्तमित्यर्थः। इत्युक्तमिति। भ्वादाविति भावः। कित्त्वपक्षे आह अनिदितामिति नलोप इति। नन्वनिदितामिति नलोपे सति 'अत एकहल्मध्ये–' इत्येत्त्वसिद्धेः 'दम्भेश्च' इति व्यर्थमित्यत आह तस्याभीयत्वादिति। नलोपस्येत्यर्थः। दभ्यादिति। आशीर्लिङि 'अनिदिताम्–' इति नलोपः। छन्दसीति। गणसूत्रमिदम्। तद्व्याचष्टे आगणान्तादिति। रि क्षि इति। रि क्षि चिरि जिरि दाश दृ इति षड् धातवः। आद्यद्वितीयवैकारान्तौ, तदाह रिणोति। क्षिणोतीति। अयं भाषायामपीति। क्षिधातुरित्यर्थः। तत्र प्रयोगं दर्शयति न तद्यश इति। दृदिति। स्वादयो वृत्ता इत्यर्थः।

इति श्रीवासुदेवदीक्षितविदुषा विरचितायां सिद्धान्तकौमुदीव्याख्यायां बालमनोरमाख्यायां श्नुविकरणं समाप्तम्।

ञिधृषा। शूलेन धृष्णोति प्रगल्भते इति शूलधृक् शूलधृषौ। 'ऋत्विक्दधृक्–' इति क्विन्‌विधानादन्यत्रापि एतदन्तविषये कुत्वम्। दम्भु। लोकदम्भनाय विहितकाललोभनं दम्भः … अयं सेट्कः। अनुदात्तेषु श्यना निर्देशात्। अह व्याप्तौ … 'अह्नोत्यर्थेत्' इति अत्र इति 'तस्यादित उदात्तमर्धह्रस्वम्' इत्य-

अथ तिङन्ते तुदादिप्रकरणम् ॥ ४८ ॥

तुद १२८१ व्यथने। इतः षट् स्वरितेतः। २५३४ तुदादिभ्यः शः। (३-१-७७) तुदति, तुदते। तुतोद। तुतोदिथ। तुतुदे। तोत्ता। अतौत्सीत्, अतुत्त। णुद १२८२ प्रेरणे। नुदति, नुदते। नुनोद, नुनुदे। नोत्ता। दिश १२८३ अतिसर्जने। अतिसर्जनं दानम्। देष्टा। दिक्षीष्ट। अदिक्षत्, अदिक्षत। भ्रस्ज १२८४ पाके। 'ग्रहिज्या–' (सू १४१२) इति संप्रसारणम्। सस्य श्चुत्वेन शः। शस्य जश्त्वेन जः। भृज्जति, भृज्जते। २५३५ भ्रस्जो रोपधयो रमन्यतरस्याम्। (६-४-४७) भ्रस्जो

अथ शविकरणा धातवो निरूप्यन्ते। **इत षडिति**। 'ऋषी गतौ' इत्यतः प्रागित्यर्थः। **तुदादिभ्यः शः**। कर्त्रर्थे सार्वधातुके परे तुदादिभ्यः शः स्यात् स्वार्थे इत्यर्थः। शबपवादः। **तुदतीति**। लघूपधगुणं बाधित्वा नित्यत्वात् शे कृते तस्य अपित्त्वात् 'सार्वधातुकमपित्' इति ङित्त्वान्न गुण इति भावः। अजन्ताकारवत्त्वाभावात् क्रादिनियमाल्लिटि यल्यपि नित्यमिट्, तदाह **तुतोदिथेति**। **तोत्तेति**। अनिडिति भावः। **अतौत्सीदिति**। हलन्तलक्षणा वृद्धिः। णुदधातुर्णोपदेशः। अनिट्। दिशधातुरप्यनिट्। **देष्टेति**। व्रश्चेति षत्वे ष्टुत्वम्। स्ये तु 'षढोः–' इति षस्य कत्वं च, देक्ष्यति। **दिक्षीष्टेति**। 'लिङ्सिचौ–' इति कित्त्वान्न गुणः। 'शल इगुपधात्–' इति क्सं मत्वाह **अदिक्षत्, अदिक्षतेति**। **भ्रस्ज पाके**। अनिट् भ्रस्ज् अ ति इति स्थिते आह **ग्रहिज्येति**। ङित्त्वाद्रेफस्य संप्रसारणमृकारः पूर्वरूपं चेति भावः। भृस्ज् अ ति इति स्थिते आह **सस्येत्यादि**। णलि भ्रस्ज् अ ति इति स्थिते **भ्रस्जो रोपधयोः**। भ्रस्ज इत्यवयवषष्ठी। रोपधयोरिति स्थानषष्ठी। रश्च उपधा च तयोरिति विग्रहः।

त्रास्माभिरुपपादितम्। अन्ये त्वाहुः—'शतचक्रं यो ३ ह्यो वर्तनिः' इत्यत्र अह्य इति षष्ठ्यन्तमेव। 'घेर्ङिति' इति गुणस्तु अह्रिशब्दस्य च्छान्दसत्वान्नेति। **रिक्षि**। एते षट् धातवः। एक एवाजादिरिति मते तु पञ्च धातवः।

इति तत्त्वबोधिन्यां स्वादिप्रकरणम्।

तुदतीति। परमपि लघूपधगुणं बाधित्वा नित्यत्वात् श इत्येके। अकृतव्यूहपरिभाषया गुणो न प्रवर्तत इत्यन्ये। **भ्रस्ज** पाके। भर्जनरूपः पाकोऽत्र धात्वर्थो न त्वोदनादेः पाकस्तत्र प्रयोगाभावादित्याहुः। भ्रस्जो इति केषांचित्पाठे तु 'ओदितश्च' इति निष्ठानत्वप्रसक्त्या भृष्टः भृष्टवानिति न सिध्येत्। **भ्रस्जो रोपधयोः**। रम्यकार उच्चारणार्थः। रमित्यस्यान्त्यादचः परत्वे 'रोपधयोः' इति षष्ठी-

रेफस्योपधायाश्च स्थाने रमागमो वा स्यादार्धधातुके । मित्वादन्त्यादचः परः । स्थानषष्ठीनिर्देशाद्रोपधयोर्निवृत्तिः । बभर्ज बभर्जतुः । बभर्जिथ, बभर्ष्ठ । बभर्ज ।

रेफादकार उच्चारणार्थः । रेफस्य उपधायाश्च स्थाने इति लभ्यते । 'आर्धधातुके' इत्यधिकृतम्, तदाह **भ्रस्जो रेफस्येत्यादिना** । रमि मकार इत् अकार उच्चारणार्थः, तदाह **मित्वादन्त्यादचः पर इति** । तथा च रेफाकारादुपरि सकारात् प्राग् रेफ आगम इति फलितम् । भ्र र् स् ज् अ इति स्थितम् । ननु रम आगमत्वे रोपधयोरिति कथं स्थानषष्ठीनिर्देश इत्यत आह **स्थानेति** । स्थानं प्रसङ्गः । रेफस्य उपधायाश्च उच्चारणप्रसङ्गे सति अकारादुपरि रेफः प्रयोज्यः । भकारादुपरि रेफः जकारात्प्राक्सकारश्च न प्रयोज्याविति लब्धम् । तथा च तयोर्निवृत्तिः फलितेति भावः । एवं च भर्ज् अ इति स्थिते द्वित्वादौ रूपमाह **बभर्जेति** । अतुसादावपि संयोगात्परत्वात्कित्वाभावाद् 'ग्रहिज्या–' इति संप्रसारणं न भवति । भारद्वाजनियमात्थलि वेडिति मत्वाह **बभर्जिथ, बभर्ष्ठेति** । इडभाव-

---

निर्देशस्य वैयर्थ्यमाशङ्क्याह **निवृत्तिरिति** । अयं भावः—स्थानविशेषलाभाय मित्वस्य करणान्न रोपधयोः स्थाने रम् भवति । यत्र ह्यनिर्धारितः स्थानषष्ठ्या निर्दिश्य विधीयते स तत्स्थाने भवति । यथा 'इको यणचि' इत्यादौ यणादिः । प्रकृते तु रमो निर्दिष्टस्थानिकत्वाद्रोपधयोः स्थाने न भवति । एवं चास्य आदेशागमत्वे भवतो यथा श्नमः प्रत्ययागमत्वे इति । अन्ये त्वेतादृग् व्याख्यानमयुक्तमिति मत्वा 'सनः क्तिचि' इत्यतो लोपमनुवर्त्य भ्रस्जो रोपधयोर्लोपः रम् तु आगम एवेत्याहुः । अपरे तु 'भ्रस्जो रसरन्यतरस्याम्' इत्येव सूत्रमस्तु । रसः ऋ इति च्छेदः । रस इति रेफाकारसकाराणां यः संघातस्तस्य ऋ इत्यादेशः स्यादित्यर्थः । ततश्च अक्ङिति भर्जको भर्जनं बभर्जेत्यादि सिध्यति । ऋकाराभावपक्षे तु भ्रज्जको भ्रज्जनं बभ्रज्जेत्यादि । क्ङिति तु ऋकारपक्षे भृष्टिः भृज्ज्यादित्यादि । तदभावे संप्रसारणे सति तदेव रूपम् । एवं च बरीभृज्ज्यत इत्यादौ रीको रेफस्य निवृत्तिं वारयितुम् 'अनुदात्तोपदेश–' इत्यत उपदेशग्रहणमनुवर्त्यमिदानीं तु नानुवर्त्यम्, क्ङिति रमागमं बाधित्वा संप्रसारणमिति पूर्वविप्रतिषेधश्च न कर्तव्य इति महदेव लाघवमित्याहुः । इदं च रसोर्वचनात्सिद्धमिति वार्तिकाशयवर्णनमेव न त्वपूर्वम् । वचनादित्यस्य वा ऋवचनादिति च्छेदः । भाष्यकारैस्तु 'सूत्रं भिद्यते यथान्यासमेवास्तु' इति वदद्भिरस्याः कल्पनायां दुष्टत्वं सूचितं तच्च मनोरमायां स्पष्टमेव । तथा हि रेफाकारसकारसमुदायस्य ऋभावे पञ्च दोषाः । अपिल्लिटि बभर्जतुः बभर्जुरित्यादीष्यते, बभृजतुः बभृजुरित्यादि स्यात् । न चात्र गुणेन निर्वाहः । ऋभावे सति 'असंयोगाल्लिट् कित्'

रमभावे, बभ्रज्ज बभ्रज्जतुः। बभ्रज्जिथ। 'स्कोः–' (सू ३८०) इति सलोपः। 'व्रश्च–' (सू २९४) इति षः। बभ्रष्ठ। बभ्रज्ज। भ्रष्टा, भर्ष्टा। भ्रक्ष्यति,

---

पक्षे बभ्रज् थ इति स्थिते 'व्रश्च–' इति जस्य षः। ष्टुत्वेन थस्य ठ इति भावः। बभर्जिथ। लिटस्तङ्याह **बभर्जे इति**। बभर्जाते इत्यादि सुगमम्। रमभावे आह **बभ्रज्जेति**। णलि भ्रस्ज् अ इति स्थिते द्वित्वे हलादिःशेषे अभ्यासजश्त्वे बभ्रस्ज् अ इति स्थिते सस्य श्चुत्वेन शकारे शस्य जश्त्वेन जकार इति भावः। लिट्यभ्यासस्य–' इति संप्रसारणस्य न प्रसक्तिः, अभ्यासे हलादिःशेषेण रेफाभावात्। **बभ्रज्जतुरिति**। संयोगात्परत्वादकित्त्वाद् 'ग्रहिज्या–' इति न संप्रसारणमिति भावः। **बभ्रज्जिथेति**। भारद्वाजनियमादिट्पक्षे रमभावपक्षे रूपम्। तत्र इडभावपक्षे बभ्रस्ज् थ इति स्थिते आह **स्कोरिति**। **व्रश्चेति ष इति**। जस्येति शेषः। रमभावपक्षे लिटस्तङ्याह **बभ्रज्जेति**। बभ्रज्जाते। बभ्रज्जिषे इत्यादि सुगमम्। **भ्रष्टेति**। रमभावपक्षे रूपम्। **भर्ष्टेति**। रमागमे भर्ज् ता इति स्थिते जस्य 'व्रश्च–'

इति कित्त्वप्रवृत्त्या तन्निषेधात्। 'सनीवन्त–' इति इड्विकल्पाद्बिभर्क्षतीत्यादि इष्यते, बिभृक्षतीत्यादि स्यात्। अभावे 'हलन्ताच्च' इति सनः कित्त्वप्रवृत्तेः। लिङ्सिचो-स्तङि भर्क्षीष्ट अभर्ष्टेत्यादीष्यते। भृक्षीष्ट अभृष्टेत्यादि स्यात्। लिङ्सिचावात्मने-पदेषु' इति कित्त्वात् णिजन्ताच्चङि अबभर्जदित्येष्यते। अबीभृजदित्यादि स्यात्। इररामपवादत्वेन 'उर्ऋत्' इति ऋत्वप्रवृत्तौ 'सन्वल्लघुनि–' इति सन्वद्भावात् 'सन्यतः' इतीत्वे 'दीर्घो लघोः' इति प्रवृत्तेः। यद्यपि 'उर्ऋत्' इत्यस्य वैकल्पिक-त्वादबभर्जदिति सिध्यत्येव तथापि पक्षे अबीभृजदित्यनिष्टं स्यादिति बोध्यम्। भ्रजिर्भृजी भर्जने इति भ्वादेस्तादृशं रूपमिष्टमिति चेत्। मैवम्, भर्जनार्थे हि तादृग् रूपमिष्टं न तु पाकसामान्ये। उभयोरेकार्थत्वात्प्रयोगभेदे प्राचीनाश्रयत्वारो दोषास्तु दृढा एव। न हि तेऽपि धात्वन्तरेण सुपरिहराः। भ्वादिहादि भृजेरपि धातोर्गुणाभावादनुदात्तत्वेन आत्मनेपदित्वाच्च बभर्जतुरित्यादेरप्यत्र तेनाप्यसिद्धेः। तथा भृजेरुदात्तत्वेन ततः परेषां सन्लिङ्सिचामिडागमप्रसङ्गात्। बिभर्क्षति भर्क्षीष्ट अभर्ष्टेत्यादिरपि तेन न सिध्यति। एतेन भ्रस्जेर्भृजिरादेश इति पक्षोऽपि निरस्तः पूर्वोक्तदूषणगणप्रसङ्गात्। किं च अस्मिन्पक्षे वक्ष्यमाणं आधिक्यं दोषः। बधादेशवत्सा-भ्यासस्य भृज्ज्यादेशे पुनर्द्विर्वचनस्य दुर्लभत्वात्तस्य निवर्त्तनात् अभ्यासस्येति निषेधात्। स्वीकृतेऽपि द्विर्वचने हमिथ्रीकोऽभ्यासस्य स्तुरेवेति सनादेरहिरं चारुसेता नाभ-र्जिष्यतीत्यादि रूपं नैव सिध्येत्। यदि तु लाघवं परमपेक्ष्य तत्रस्थं विकारशेषं तर्हि भ्रस्जे रसोरिति पठित्वा रसिति समुदायस्य अरेव विधीयतां तत्र च [illegible]

भर्चयंति। 'क्ङिति रमागमं बाधित्वा संप्रसारणं पूर्वविप्रतिषेधेन' (वा ४०७८) भृज्ज्यात् भृज्ज्यास्ताम्। भर्क्षीष्ट, भ्रक्षीष्ट। अभार्क्षीत्, अभ्राक्षीत्। अभर्ष्ट, अभ्रष्ट। क्षिप १२८५ प्रेरणे। क्षिपति, क्षिपते। क्षेप्ता। अक्षैप्सीत्, अक्षिप्त। कृष १२८६ विलेखने। कृषति, कृषते। क्रष्टा, कर्ष्टा। कृष्यात्। कृक्षीष्ट। 'स्पृशमृश-' (वा १८२३) इति सिज्वा। पक्षे क्सः। सिचि अम्वा। अक्राक्षीत्, अकार्क्षीत्, अकृक्षत। तङि 'लिङ्सिचौ-' (सू २३००) इति कित्त्वादम्न।

इति षः, ष्टुत्वेन तकारस्य ट इति भावः। एवं **भ्रक्ष्यति, भर्क्ष्यतीति**। 'षढोः-' इति कत्वे सस्य षत्वमिति विशेषः। भृज्जतु। अभृज्जत्। भृज्जेत्। ननु आशीर्लिङि भ्रस्ज् यात् इति स्थिते **यासुटः** कित्त्वाद् ग्रहिज्या-' इति संप्रसारणे पूर्वरूपे सकारस्य श्चुत्वेन शकारे शस्य जश्त्वेन जकारे भृज्ज्यात् इति रूपं वक्ष्यति। तदयुक्तम्, संप्रसारणं बाधित्वा ररत्वाद् रमागमे कृते भर्ज्यात् इति प्रसङ्गादित्यत आह **क्ङिति रमागममिति**। आशीर्लिङस्तङि सीयुटि रमागमपक्षे आह **भर्क्षीष्टेति**। रमभावे तु अकित्त्वात्संप्रसारणाभावादाह **भ्रक्षीष्टेति**। लुङि परस्मैपदे रमागमविकल्पं मत्वाह **अभार्क्षीत्, अभ्राक्षीदिति**। आत्मनेपदे सिचि रमागमविकल्पं मत्वाह **अभर्ष्ट, अभ्रष्टेति**। 'झलो झलि' इति सिज्लोपः। **क्षिप प्रेरण इति**। अनिट्। अजन्ताकारवत्त्वाभावात् क्रादिनियमात्थलि नित्यमिट्। चिक्षेपिथ। एवं कृषधातुरपि। चकर्षिथ। लुटि तासि 'अनुदात्तस्य चर्दुपधस्य-' इत्यमागमविकल्पः। अमागमाभावे गुणे रपरत्वम्, तदाह **क्रष्टा, कर्ष्टेति**। आशीर्लिङि परस्मैपदे आह **कृष्यादिति**। कित्त्वाद् झलादित्वाभावाच्च अमागमो गुणश्च नेति भावः। आशीर्लिङस्तङ्याह **कृक्षीष्टेति**। 'लिङ्सिचौ-' इति कित्त्वादमागमो गुणश्च नेति भावः। लुङि परस्मैपदे आह **स्पृशमृशेति सिज्वेति। पक्षे इति**। सिजभावपक्षे 'शलः-' इति क्स इत्यर्थः। **सिचि अम्वेति**। सिच्पक्षे 'अनुदात्तस्य च-' इत्यमागमविकल्प इत्यर्थः। क्से तु कित्त्वादमागमो नेति भावः। **अक्राक्षीदिति**। सिचि अमागमे रूपम्। **अकार्क्षीदिति**। सिचि अमभावपक्षे हलन्तलक्षणा वृद्धिरिति भावः। क्सादेशपक्षे

दोष इति। अयमत्र संग्रहः—'रस ऋचेदपिक्लिट्सन्लिङ्सिच्चङ्परणिच्सु ते। दोषो भ्रस्जेर्भृजौ चैवं दोषो यङ्लुकि चाधिकः। साभ्यासस्य हि भृज्भावो भवेद्धन्तेर्वधिर्यथा। द्वित्वे पुनर्न लभ्येत स्थानिवत्त्वाद्वधेरिव। तस्मादस्तु यथान्यासं स्वातन्त्र्येऽस्तु रसोरिति'। **पूर्वविप्रतिषेधेनेति**। नित्यत्वादित्यपि सुवचम्। न च संप्रसारणात्पूर्वं धातो रेफस्य पश्चात्तु रमागमे रेफस्येति शब्दान्तरप्राप्त्या संप्रसारणस्य नित्यत्वं नेति शङ्क्यम्। लक्ष्यानुरोधेन कृताकृतप्रसङ्गित्वेनापि क्वचिन्नित्यत्व-

अकुष्ट अकुक्षाताम् अकुक्षत। अकुक्षत अकुक्षाताम् अकुक्षन्त। ऋषी १२८७ गतौ। परस्मैपदी। ऋषति। आनर्ष। जुषी १२८८ प्रीतिसेवनयोः। आत्मनेपदिनश्चत्वारः। जुषते। ओ विजी १२८९ भयचलनयोः। प्रायेणायमुत्पूर्वः। उद्विजते। २५३६ विज इट्। (१-२-२) विजेः पर इडादिः प्रत्ययो ङिद्वत्। उद्विजिता। उद्विजिष्यते। ओ लजी १२९० ओ लस्जी १२९१ व्रीडायाम्। लजते। लेजे। लज्जते। ललज्जे।

आह अकुक्षदिति। कित्त्वादमागमो गुणश्च नेति भावः। तङीति। तङि सिच्पक्षे अकुष् स् त इति स्थिते 'लिङ्सिचौ–' इति कित्त्वादम् नेत्यर्थः। गुणोऽपि नेति ज्ञेयम्। अकुष्टेति। 'झलो झलि' इति सिज्लोप इति भावः। अकुक्षतेति। सिच्पक्षे अनतः परत्वाददादेश इति भावः। क्सादेशपक्षे आह अकुक्षतेति। कित्त्वादम् नेति भावः। अकुक्षन्तेति। क्सादेशपक्षे अ कुक्ष झ इति स्थिते अच्परकत्वाभावात् 'क्सस्याचि' इत्यकारलोपाभावादतः परत्वाददादेशाभावे अन्तादेश इति भावः। ऋषी गताविति। सेट्। आनर्षिथ। आनर्षिव। अर्षिता। आर्षीत्। ओ विजी भयेति। सेट्। उद्विजितेत्यादौ लघूपधगुणे प्राप्ते विज इट्। 'गाङ्कुटादिभ्यः–' इत्यतो ङिदित्यनुवर्तते, तदाह विजेः पर इत्यादि। उद्विजिता। उद्विजिषीष्ट। उदविजिष्ट।

स्वीकारात्। विज इट्। इह 'वृद्धिर्यस्य–' इति सूत्रान्मण्डूकप्लुत्या यस्यादिरिति अनुवर्तते तेन इडादिप्रत्ययो लभ्यत इति मनोरमायां स्थितम्। नव्यास्तु इह इडित्यनेनोत्तमैकवचनं न गृह्यते। तथा च सति विजिषीयेत्यत्रैव स्यान्न तूद्विजितेत्यादौ। ततश्चेष्टसिद्ध्यर्थमिडागमो गृह्यते तस्य तु ङित्त्वं व्यर्थम्। तन्निमित्तगुणस्याप्राप्तेरतो लक्षणया इड्वान् गृह्यते। इट्प्रत्ययस्यादिरिति फलितार्थकथनमिडादिप्रत्ययो ङिद्वदिति। एवं च इडादिरिति लाभाय यस्यादिरित्यनुवर्तनक्लेशो व्यर्थ एवेत्याहुः। इह ओविजीति तुदादिः रुधादिश्च गृह्यते न तु विजिर् पृथग्भावे इति जुहोत्यादिर्व्याख्यानात्। यस्त्वत्र हरदत्तेन जुहोत्यादेरग्रहणे हेतुरुक्तः तस्यानिट्कत्वादिति। तदयुक्तम्। क्रादिनियमेन लिटि इट्संभवात्। न च तत्र कित्त्वेन गतार्थत्वादिटो ङित्त्वं व्यर्थमिति वाच्यम्, अपित्क्विटः कित्त्वेऽपि विवेजिथेत्यत्र पित्त्वेन ङित्त्वाभावात्। धम्रश्चेति। अत्र नव्याः—वव्रश्चेत्यादौ 'लिट्यभ्यासस्य–' इत्यभ्यासावयवयोर्द्वयोरपि यणोः संप्रसारणप्रसक्तौ पूर्वस्य यणो निषेधाय 'न संप्रसारणे–' इति सूत्रं स्वीक्रियते। ततश्च अतएव ज्ञापकात्परस्य प्रथमं संप्रसारणमिति परिकल्प्य आ पादपरिसमाप्तेरङ्गाधिकार इति पक्षमभ्युपगम्य उरदत्वस्याङ्गाक्षिप्तप्रत्ययनिमित्तकत्वस्वीकाराद् 'अचः

अथ परस्मैपदिनः । ओ व्रश्चू १२९२ छेदने । 'ग्रहिज्या–' (सू २४१२) वृश्चति । वव्रश्च वव्रश्चतुः । वव्रश्चिथ, वव्रष्ठ । 'लिट्यभ्यासस्य–' (सू २४०८) इति संप्रसारणं रेफस्य ऋकारः । 'उरत्' (सू २२४४) । तस्य च 'अचः परस्मिन्–' (सू ५०) इति स्थानिवद्भावाद् 'न संप्रसारणे–' (सू ३६३)

व्रश्च्धातुरूदित्त्वाद्वेट् । ग्रहिज्येति । लटि व्रश्च् अ ति इति स्थिते शस्यापित्त्वेन ङित्त्वाद् 'ग्रहिज्या–' इति रेफस्य संप्रसारणमृकारः पूर्वरूपं चेति भावः, तदाह वृश्चतीति । वृश्चतः वृश्चन्तीत्यादि । वव्रश्चेति । णलि रूपमिदम् । थलि च प्रक्रिया अनुपदं वक्ष्यते । अतुसादौ संयोगात्परत्वेन कित्त्वाभावाद् 'ग्रहिज्या–' इति न संप्रसारणम्, तदाह वव्रश्चतुरिति । ऊदित्त्वात्थलादौ वेट्, तदाह वव्रश्चिथ, वव्रष्ठेति । धातुपाठे व्रश्चू इत्यत्र व्रस् च् इति स्थिते सस्य श्चुत्वेन शकारनिर्देशः । तथा च वव्रश्च् थ इति स्थिते श्चुत्वस्यासिद्धत्वात् 'स्कोः–' इति सकारलोपे, चस्य 'व्रश्च–' इति षत्वे, ष्टुत्वेन थस्य ठत्वे, वव्रष्ठेति रूपम् । वव्रश्चिव । ननु णलि थलि च अकिति द्वित्वे कृते 'लिट्यभ्यासस्य–' इत्यभ्यासावयवयोर्वकाररेफयोर्द्वयोरपि संप्रसारणं स्याद् । न च 'न संप्रसारणे संप्रसारणम्' इति वकारस्य संप्रसारणनिषेधः शङ्क्यः, पूर्वं वकारस्य संप्रसारणसंभवादित्यत आह लिट्यभ्यासेति । 'न संप्रसारणे–' इति निषेधादेव ज्ञापकात् प्रथमं रेफस्य ऋकारः संप्रसारणमित्यर्थः । तस्य संप्रसारणसंपन्नस्य ऋकारस्य अकारविधिं स्मारयति उरदिति । ननु ऋकारस्य अकारे कृते वकारस्य संप्रसारणं स्यात्, संप्रसारणपरकत्वविरहेण 'न संप्रसारणे–' इति निषेधाप्रवृत्तेरित्यत आह तस्य चेति । अकारस्येत्यर्थः । न च उरदत्त्वस्य परनिमित्त-

---

परस्मिन्–' इति स्थानिवद्भावप्रवृत्त्या संप्रसारणपरत्वमाश्रित्य वकारस्य संप्रसारणनिषेधः कथंचिदुपपद्यते । परस्य संप्रसारणम्, परस्य यणः संप्रसारणमिति वा सूत्रिते परस्यैव संप्रसारणं न तु पूर्वस्य यण इत्यर्थलाभाद् उक्तक्लेशं विनैव वव्रश्च यून इत्यादि सर्वं सिध्यति । न चैवं 'लिटि वयो यः' 'वेञः' इत्यत्र संप्रसारणनिषेधाय नञोऽनुवृत्तिर्न लभ्येतेति वाच्यम्, 'न लिटि वयो यः' इति सूत्रकरणे बाधकाभावाद् 'न संप्रसारणे–' इति यथाश्रुतसूत्रप्रणयने त्वन्ततो मात्राद्वयस्याधिक्याच्च । एवं च लघूपायेनेष्टसिद्धौ 'न संप्रसारणे–' इति सूत्रारम्भो ज्ञापयति निमित्तभेदाभावेऽपि स्थानिभेदे पुनरपि कार्यं प्रवर्तते इति । तथा च सुध्युपास्य इत्यादौ धकारस्य द्वित्वे कृते पुनरुकारात्परस्य दकारस्यापि द्वित्वमिति प्रक्रियाकारादिव्याख्यानं सूत्रकाराभिप्रेतमेव । यदि स्थानिभेदेऽपि निमित्तैक्ये कार्याप्रवृत्तिः क्वचिद् दृश्यते

इति वत्वोत्वं न । व्रश्चिता, व्रष्टा । व्रश्चिष्यति, व्रक्ष्यति । वृश्च्यात् । अव्रश्चीत्, अव्राक्षीत् । **व्यच १२९३ व्याजीकरणे ।** विचति । विव्याच विविचतुः । व्यचिता । व्यचिष्यति । विच्यात् । अव्याचीत्, अव्यचीत् । 'व्यचेः कुटादित्वमनसि' (वा १४२६) इति तु नेह प्रवर्तते । 'अनसि' इति पर्युदासेन कृन्मात्रविषयत्वात् । **उछि १२९४ उञ्छे ।** उञ्छति । **उछी १२९५ विवासे ।** उच्छति । ऋच्छ

क्त्वाश्रवणात् कथं स्थानिवत्त्वमिति वाच्यम्, आपादपरिसमाप्तेरधिकारः इत्यभ्युपगम्य अप्रातिप्रत्ययनिमित्तकत्वाभ्युपगमात् । 'लक्ष्ये लक्षणस्य सकृदेव प्रवृत्तिः' इति न्यायस्तु 'न संप्रसारणे–' इति निषेधादेव न स्थानिभेदे प्रवर्तते इति ज्ञायते । अत एव सुद्ध्युपास्य इत्यादौ धकारस्य द्वित्वे कृते पूर्वधकारस्य जश्त्वेन दकारे तस्य द्वित्वमित्यास्तां तावत् । आशीर्लिङ्याह **वृश्च्यादिति** । कित्वात् संप्रसारणमिति भावः । **अव्रश्चीदिति** । ऊदित्वादिट्पक्षे 'नेटि' इति हलन्तलक्षणवृद्धिनिषेधः । इडभावे हलन्तलक्षणवृद्धिं मत्वाह **अव्राक्षीदिति** । अव्रश्च् सीत् इति स्थिते हलन्तलक्षणा वृद्धिः । श्चुत्वस्यासिद्धत्वात् 'स्कोः–' इति सलोपः । 'व्रश्च–' इति चस्य षः, तस्य 'षढोः–' इति कः, सस्य षत्वमिति भावः । 'नकारजावनुस्वारपञ्चमौ झलि धातुषु । सकारजः शकारः श्चे षाट्टवर्गस्तवर्गजः ॥' इत्याहुः । **व्यच व्याजीकरणे ।** सेट् । शे 'ग्रहिज्या–' इति संप्रसारणं मत्वाह **विचतीति** । **विव्याचेति** । 'लिट्यभ्यासस्य–' इत्यभ्यासयकारस्य संप्रसारणम् । 'न संप्रसारणे–' इति न वकारस्य । **विविचतुरिति** । कित्त्वाद् 'ग्रहिज्या–' इति संप्रसारणे कृते द्वित्वादीति भावः । विव्यचिथ । विविचिव । **विच्यादिति** । आशीर्लिङि कित्त्वाद्यकारस्य संप्रसारणम् । 'अतो हलादेः–' इति वृद्धिविकल्पं मत्वाह **अव्याचीत्, अव्यचीदिति** । ननु 'व्यचेः कुटादित्वमनसि' इति व्यचेः कुटादित्ववचनात् व्यचिता, व्यचिष्यति, इत्यादावपि 'गाङ्कुटादिभ्यः–' इति ङित्त्वात् संप्रसारणं स्यादित्यत आह **व्यचेरिति** । **कृन्मात्रेति** । अवधारणे मात्रशब्दः । 'उछि उञ्छे' 'उछी विवासे' इति भ्वादौ पठितौ । इह तयोः पाठस्तु शविकरणार्थः । तेन उञ्छती उञ्छन्ती, उच्छती उच्छन्ती इति 'आच्छीनद्योः–' इति नुम्विकल्पः

तत्र तु 'ज्ञापकसिद्धं न सर्वत्र' इति स दोषः परिहियतामित्याहुः । **अव्रश्चीदिति** । ऊदित्वात्पक्षे इट् । 'वदव्रज–' इति वृद्धेः 'नेटि' इति निषेधः । **अव्राक्षीदिति** । 'स्कोः–' इति सलोपः । 'व्रश्च–' इति षः । षढोरिति कः । ततः सस्य षत्वम् । न चात्र सकारस्य कथं लोप इति वाच्यम्, धातुपाठे सकारस्य पाठात् । तदाहुः— 'नकारजावनुस्वारपञ्चमौ झलि धातुषु । सकारजः शकारश्च षाट्टवर्गस्तवर्गजः' इति ।

१२९६ गतीन्द्रियप्रलयमूर्तिभावेषु। 'ऋच्छत्यृताम्' (सू २३८३) इति गुणः। द्विहल्ग्रहणस्यानेकहलुपलक्षणत्वान्नुट्। आनर्च्छ आनर्च्छतुः। ऋच्छिता। मिच्छ १२९७ उत्क्लेशे। उत्क्लेशः पीडा। मिमिच्छ। अमिच्छीत्। जर्ज १२९८ चर्च १२९९ झर्झ १३०० परिभाषणभर्त्सनयोः। त्वच १३०१ संवरणे। तत्वाच। ऋच १३०२ स्तुतौ। आनर्च। उब्ज १३०३ आर्जवे। उज्झ १३०४ उत्सर्गे। लुभ १३०५ विमोहने। विमोहनमाकुलीकरणम्। लुभति। लोभिता, लोब्धा। लोभिष्यति। रिफ १३०६ कत्थनयुद्धनिन्दाहिंसादानेषु। रिफति। रिरेफ। रिह इत्येके। 'शिशुं न विप्रा मतिभी रिहन्ति'। तृप १३०७ तृम्फ १३०८ तृप्तौ। आद्यः प्रथमान्तः। द्वितीयो द्वितीयान्तः। द्वावपि द्वितीयान्तावित्यन्ये। तृपति। ततर्प। तर्पिता। 'स्पृशमृश–' इति सिज्विकल्पः पौषादिकस्यैव। अङपवादत्वात्। तेनात्र नित्यं सिच्। अतर्पीत्। तृम्फति। शस्य ङित्वाद् 'अनिदिताम्–' (सू ४१५) इति नलोपे 'शे तृम्फादीनां नुम् वाच्यः' (वा ४३२१) आदिशब्दः प्रकारे। तेन येऽत्र नकारानुषक्तास्ते तृम्फादयः। तृम्फन्ति। ततृम्फ। तृफ्यात्। तुप १३०९ तुम्प १३१० तुफ १३११ तुम्फ १३१२ हिंसायाम्। तुपति। तुम्पति। तुफति। तुम्फति। दृप १३१३ दृम्फ १३१४ उत्क्लेशे। प्रथमः प्रथमान्तः। द्वितीयो द्वितीयान्तः। प्रथमो द्वितीयान्त इत्येके। दृपति। दृफति। दृम्फति। ऋफ १३१५ ऋम्फ १३१६ हिंसायाम्। ऋफति। आनर्फ। ऋम्फति। ऋम्फांचकार। गुफ १३१७ गुम्फ

सिध्यति। भ्वादौ पाठस्तु पित्स्वरार्थ इत्यन्यत्र विस्तरः। **ऋच्छ गतीति**। 'छे च' इति तुकि तस्य श्चुत्वेन चकारनिर्देशः। ऋच्छति। णलि लघूपधत्वाभावाद् गुणे अप्राप्ते आह **ऋच्छत्यृतामिति**। द्वित्वे उरदत्वे हलादिशेषे 'अत आदेः' इति दीर्घे आ अर्च्छ इति स्थिते बहुहल्त्वाद् द्विहल्त्वाभावान्नुटि अप्राप्ते आह **द्विहल्ग्रहणस्येति**। **आनर्च्छेति**। 'इजादेः–' इत्यत्र अनृच्छ इति पर्युदासादाम् न। **ऋच्छितेति**। 'ऋच्छत्यृताम्' इत्यत्र लिटीत्यनुवृत्तेर्न गुण इति भावः। लुभधातुः सेट्। 'तीषसह' इति वेडिति मत्वाह **लोभिता, लोब्धेति**। **शिशुं नेति**। नशब्द इवार्थे। विप्राः शिशुमिव मतिभिः रिहन्ति हिंसन्ति इत्यर्थः। तृपधातुः श्यन्विकरण एवानिट्। **अङपवादत्वादिति**। अपवादस्य उत्सर्ग-

---

व्यच। व्याजीकरणं छद्मकरणम्। **पर्युदासेनेति**। प्रसज्यप्रतिषेधे हि वाक्यभेदोऽसमर्थसमासश्च प्रसज्येतेति भावः। **कुन्मात्रविषयत्वादिति**। तेन उद्विचिता उद्विचितुमित्यत्र संप्रसारणं भवति। व्यचिता व्यचिषेत्यादौ तु तिङ्विषये न

१३१८ ग्रन्थे । गुफति । जुगोफ । गुम्फति । जुगुम्फ । उभ १३१९ उम्भ १३२० पूरणे । उभति । उवोभ । उम्भति । उम्भांचकार । शुभ १३२१ शुम्भ १३२२ शोभार्थे । शुभति । शुम्भति । दृभी १३२३ ग्रन्थे । दृभति । चृती १३२४ हिंसाग्रन्थनयोः । चर्तिता । 'सेऽसिचि–' (सू २५०६) इति वेट् ।

समानदेशत्वादिति भावः । **चृती हिंसाग्रन्थनयोरिति** ग्रन्थनं विस्रंसनम् । चृततीत्यादि सुगमम् । "अथास्य योक्त्रं विचृतेत्" इत्याश्वलायनः । विस्रंसयेदित्यर्थः, उपसर्गवशात् । 'यजमानो मेखलां विचृतते' इत्यापस्तम्बसूत्रे तु

भवति । विव्याचेत् । ऋफति । आनर्फ । ऋम्फति । ऋम्फांचकार । **गुफ** । कुटादित्वे जातेऽपि न क्षतिः 'गाङ्कुटादिभ्यः–' इति सूत्रे अञ्णितः प्रत्यया ङितः स्युरित्युक्तत्वात् । उत्तमे णलि तु णित्त्वाभावपक्षे ङित्त्वात्संप्रसारणे विव्यचेति न सिध्यदिति अनसीति पर्युदास आवश्यक इति बोध्यम् । 'उछि उञ्छे' 'उछी विवासे' । इमौ भ्वादिगणे व्याख्यातौ । इह पाठस्तु उच्छति उञ्छतीत्यत्र 'शाच्छोर्नद्योः–' इति नुम्विकल्पार्थः । पूर्वपाठस्तु स्वरार्थः । तथाहि उञ्छति-उञ्छतीत्यादौ पिद्वचने शप्तिबादीनां पित्त्वादनुदात्तत्वे धातुस्वरेणाद्युदात्तं पदम् । शे तु प्रत्ययस्वरेण मध्योदात्तमिति । न च 'सति शिष्टस्वरबलीयस्त्वमन्यत्र विकरणेभ्यः' इति वक्ष्यमाणत्वात्कथमिह मध्योदात्ततेति वाच्यम्, कुरुत इत्यादौ तप्रादेर्विकरणात्परत्वेन तत्स्वरस्योदात्तस्य विकरणस्वरापेक्षया प्रबलत्वेऽपि शस्य धातोः परत्वेन धातुस्वरापेक्षया शस्वरस्योदात्तस्य प्रबलत्वात् । **उपलक्षणत्वादिति** । अत एव अदुपधस्य चेद् अभ्रोतेरेवेति नियममाश्रित्य द्विहल्ग्रहणं भाष्यकारैः प्रत्याख्यातम् । अन्यथा तत्र संगच्छेतेति भावः । **आनर्च्छेति** । अनृच्छ इति पर्युदासान्नाम् । नव्यास्तु 'ऋच्छत्यृताम्' इति लिटि परे गुणविधानसामर्थ्यादामभावः सेद्ध इति 'इजादेः–' इति सूत्रे अनृच्छ इत्येतत्स्पष्टप्रतिपत्त्यर्थमित्याहुः । अन्ये तु 'ऋच्छत्यृताम्' इत्यत्र तौदादिकऋच्छेरिति सर्वैरेव व्याख्यातत्वाद् गणान्तरेऽपि ऋच्छिरस्तीत्यनुमीयते तद्धातोस्तु लिट्याम्निवारणाय अनृच्छ इत्येतदावश्यकमित्याहुः । **मिच्छ** । उत्क्लेशः क्लेश उत्क्लेशः । **ऋच** स्तुतौ । ऋच्यते स्तूयते देवतादिकमनयेति ऋक् । बाहुलकादिह करणे क्विप् । लोभिता । लोब्धा । 'तीषसह–' इति वेट् । **शिशुं न विप्रा इति** । नशब्द इवार्थे । विप्रा ब्राह्मणाः शिशुमिव मतिभी रिहन्ति हिंसन्ति । न्यूनीकुर्वन्तीत्यर्थः **चृती** हिंसाग्रन्थनयोः । ईदित्करणं 'श्वीदितो निष्ठायाम्' इतीडिनषेधार्थम् । यद्यप्यस्य वेट्कत्वान्निष्ठायामिडिनषेधः सिध्यति तथापि 'यस्य विभाषा' इत्यस्यानित्यतां ज्ञापयितुमीदित्करणम् । तेन 'धावितमिभराजधिया' इत्यादि

चर्तिष्यति, चर्त्स्यति । अचर्तीत् । विध १३२५ विधाने । विधति । वेधिता । जुड १३२६ गतौ । तवर्गपञ्चमान्त इत्येके । जुडति । 'मरुतो जुनन्ति' । मृड १३२७ सुखने । मृडति । मर्डिता । पृड १३२८ च । पृडति । पृण १३२९ प्रीणने । पृणति । पपर्ण । वृण १३३० च । वृणति । मृण १३३१ हिंसायाम् । तुण १३३२ कौटिल्ये । तुतोण । पुण १३३३ कर्मणि शुभे । पुणति । मुण १३३४ प्रतिज्ञाने । कुण १३३५ । शब्दोपकरणयोः । शुन १३३६ गतौ । द्रुण १३३७ हिंसागतिकौटिल्येषु । घुण १३३८ घूर्ण १३३९ भ्रमणे । षुर १३४० ऐश्वर्यदीप्त्योः । सुरति । सुषोर । आशिषि सूर्यात् । कुर १३४१ शब्दे । कुरति । कूर्यात् । अत्र 'न भकुर्छुराम्' (सू १६२९) इति निषेधो न । करोतेरेव तत्र ग्रहणमित्याहुः । खुर १३४२ छेदने । मुर १३४३ संवेष्टने । क्षुर १३४४ विलेखने । घुर १३४५ भीमार्थशब्दयोः । पुर १३४६ अग्रगमने । वृहू १३४७ उद्यमने । दन्त्योष्ठ्यादिः । पवर्गादिरित्यन्ये । तृहू १३४८ स्तृहू १३४९ तृंहू १३५० हिंसार्थाः । तृहति । ततर्ह । स्तृहति । तस्तर्ह । तर्हिता, तर्ढा । स्तर्हिता, स्तर्ढा । अतृंहीत्, अताङ्क्षीद् अतार्ढाम् । इषु १३५१ इच्छायाम् । 'इषुगमि–' (सू २४००) इति छः । इच्छति । एषिता, एष्टा । एषिष्यति । इष्यात् । ऐषीत् । मिष १३५२ स्पर्धायाम् । मिषति । मेषिता । किल १३५३ श्वैत्यक्रीडनयोः । तिल १३५४ स्नेहने । चिल १३५५ वसने । चल १३५६ विलसने । इल १३५७ स्वप्नक्षेपणयोः । विल १३५८ संवरणे । दन्त्योष्ठ्यादिः । बिल

तद् आर्षः । षुधातुः षोपदेशः । **कुर शब्दे** । **करोतेरेवेति** । व्याख्यानमेवात्र शरणम् । वृहूधातुः ऋदुपधः । ऊदित्त्वाद्वेट्कः । **पवर्गादिरिति** । पवर्गतृतीयादिरित्यर्थः । **तृहू स्तृहू तृंहू इति** । त्रयोऽपि ऋकारवन्तः । तृतीयोऽनुस्वारवान् । ऊदित्त्वाद्वेट् । **तर्ढेति** । तृहेस्तासि ढत्वधत्वष्टुत्वढलोपाः । एवं स्तर्ढा । तृण्ढा । अतर्हीत्, अतार्क्षीत्, अस्तर्हीत्, अस्तार्क्षीत्, इति सिद्धवत्कृत्याह **अतृंहीत्, अताङ्क्षीदिति** । तृंहेरिडभावपक्षे हलन्तलक्षणवृद्धौ रपरत्वम् । हस्य ढः, ढस्य कः, षत्वम् । अनुस्वारस्य परसवर्णो ङकार इति भावः । **अतार्ढामिति** । तृंहेस्तसस्तामि सिचि इडभावपक्षे लोपे हलन्तलक्षणवृद्धौ ढत्वधत्वष्टुत्वढलोपा इति

सिद्धमित्याहुः । **कुर शब्दे** । **करोतेरेवेति** । सुप्रसिद्धत्वात् । कुर्यादित्युक्ते हि लोकानां कृञ एवोपस्थितिर्भवति न त्वस्येति भावः । **मुर संवेष्टने** । इगुपधलक्षणः कः । मुरो दैत्यः । मुरारिर्विष्णुः । **क्षुर विलेखने** । विलेखनं छेदनम् । केशान् क्षुरति । 'इगुपध–' इति कः । क्षुरः शस्त्रम् । **तिल स्नेहने** । तिलति । 'इगुपध–' इति कप्रत्यये तिलः ।

१३२१ भेदने । ओष्ठ्यादिः । णिल १३६० गहने । हिल १३६१ भावकरणे । शिल १३६२ षिल १३६३ उञ्छे । मिल १३६४ श्लेषणे । लिख १३६५ अक्षरविन्यासे । लिलेख । कुट १३६६ कौटिल्ये । 'गाङ्कुटादिभ्यः–' (सू २४६१) इति ङित्त्वम् । चुकुटिथ । 'अञ्णित्' इति किम्–चुकोट । कुटिता । पुट १३६७ संश्लेषणे । कुच १३६८ संकोचने । गुज १३६९ शब्दे । गुड १३७० रक्षायाम् । डिप १३७१ क्षेपे । छुर १३७२ छेदने । 'न भकुर्छुराम्' (सू १६२३) इति न दीर्घः । छुर्यात् । स्फुट १३७३ विकसने । स्फुटति । पुस्फोट । मुट १३७४ आक्षेपमर्दनयोः । त्रुट १३७५ छेदने । 'वा भ्राश–' (सू २३२१) इति श्यन्वा। त्रुट्यति, त्रुटति । तुत्रोट । त्रुटिता । तुट १३७६ कलहकर्मणि । तुटति । तुतोट । तुटिता । चुट १३७७ छुट १३७८ छेदने । जुड १३७९ बन्धने । कड १३८० मदे । लुट १३८१ संश्लेषणे । कृड १३८२ घनत्वे । घनत्वं सान्द्रता । चकर्ड । कृडिता । कुड १३८३ बाल्ये । पुड १३८४ उत्सर्गे । घुट १३८५ प्रतिघाते । तुड १३८६ तोडने । तोडनं भेदः । थुड १३८७ स्थुड १३८८ संवरणे । थुडति । तुथोड । तुस्थोड । खुड छुड इत्येके । स्फुर १३८९ स्फुल १३९० संचलने । स्फुर स्फुरणे, स्फुल संचलने इत्येके । २५३७ स्फुरतिस्फुलत्योर्निर्निविभ्यः । (८–३–७६) षत्वं वा स्यात् । निष्फुरति, निःस्फुरति । स्फर

भावः । एवं अस्ताढीम् । अताएढीम् । स्फुर स्फुरणे । स्फुरतिस्फुलत्योः । मूर्धन्य इत्यधिकृतम् । 'सिवादीनां वा–' इत्यतो वेत्यनुवर्तते, तदाह षत्वं वा

तिल गतौ तेलतीति शपि गतम् । लिख अक्षरविन्यासे । लिखितुं लिखिष्यतीति प्रयोगः प्रामादिकः । यत्तु कैश्चित् कुटस्यादिः कुटादिः कुट आदिर्येषां ते कुटादयः कुटादिश्च कुटादयश्च कुटादय इत्येकशेषं स्वीकृत्य लिखितुमित्यादि समर्थितम् । तदसत् । लेखिता लेखिष्यतीत्यादौ गुणनिषेधापत्तेः । न चेष्टापत्तिः । वृत्तिकारहरदत्तादिग्रन्थविरोधात् । 'गाङ्लिखादिभ्यः' इत्येव सूत्रितव्ये कुटादिभ्य इति पठनस्य स्वारस्यभङ्गापत्तेश्च । किं च 'शकुनिष्वालेखने' इति सौत्रप्रयोगोऽपि विरुध्यत इति प्रागेवोक्तमित्यास्तां तावत् । लिखापयतीति प्रयोगस्तु मनोरमायामित्थं समर्थितः । अपनम् आपः प्राप्तिः लिखस्यापो लिखापस्तं करोति । स्फुट विकसने । स्फुटत्यर्थोऽस्मादिति स्फोटः स च पदस्फोटवाक्यस्फोटादिभेदेनानेकविधः । कड मदे । कुटादिकार्याभावेऽपि डान्तानुरोधेनायं कुटादौ पठितः । भ्वादौ पठितस्य पुनरत्र पाठः शतरि नुम्विकल्पार्थः । पूर्वं पाठस्तु उच्छतीत्यादाविव कडतीत्यादौ आद्युदात्तार्थः । स्फुरतिस्फुलत्योः । 'सिवादीनाम्–' इत्यतो वेत्यनुवर्तनादाह षत्वं वा

इत्यकारोपधं केचित्पठन्ति। पस्फार। स्फुड १३९१ चुड १३९२ ब्रुड १३९३ संवरणे। क्रुड १३९४ भृड १३९५ निमज्जने इत्येके। गुरी १३९६ उद्यमने। अनुदात्तेत्। गुरते। जुगुरे। गुरिता। णू १३९७ स्तवने। दीर्घान्तः। 'परिणूत-गुणोदयः'। इतश्चत्वारः परस्मैपदिनः। नुवति। अनुवीत्। धू १३९८ विधूनने। धुवति। गु १३९९ पुरीषोत्सर्गे। जुगुविथ, जुगुथ। गुता। गुष्यति। अगुषीत्। 'ह्रस्वादङ्गात्' (सू २३६९) अगुताम् अगुषुः। ध्रु १४०० गतिस्थैर्ययोः। ध्रुव इति पाठान्तरम्। आद्यस्य ध्रुवतीत्यादि गुवतिवत्। द्वितीयस्तु सेट्। दुध्रुविथ। ध्रुविता। ध्रुविष्यति। ध्रुव्यात्। अध्रुवीत् अध्रुविष्टाम्। कुङ् १४०१ शब्दे। दीर्घान्त इति कैयटादयः। कुविता। अकुविष्ट। ह्रस्वान्त इति न्यासकारः। कुता। अकुत। कूत्। कुटादयो वृत्ताः।

पृङ् १४०२ व्यायामे। प्रायेण व्याङ्पूर्वः। रिङ्। इयङ्। व्याप्रियते। व्यापप्रे व्यापप्राते। व्यापरिष्यते। व्यापृत व्यापृषाताम्। मृङ् १४०३ प्राण-त्यागे। २५३८ म्रियतेर्लुङ्लिङोश्च। (१-३-६१) लुङ्लिङोः शितश्च प्रकृतिभूतान्मृङस्तङ् स्यान्नान्यत्र। ङित्वं स्वरार्थम्। म्रियते। ममार। मम्रथ।

स्यादिति। णू स्तवन इति। णोपदेशः। परिणूतेति। 'श्र्युकः किति' इति नेट्। कुङ् शब्दे। दीर्घान्त इति। ततश्चायं सेट्।

पृङ् व्यायाम इति। ह्रस्वान्तोऽयमनिट्। 'ऋद्धनोः स्ये' इति इटं मत्वाह व्यापरिष्यते इति। मृङ्धातुरनिट्। म्रियतेः। 'अनुदात्तङितः—' इत्यत आत्मनेपदमित्यनुवर्तते। चकारेण 'शदेः शितः' इत्यतः शित इत्य-नुकृष्यते। प्रकृतिभूतादित्यध्याहार्यम्, तदाह लुङ्लिङोरिति। तङ् स्यादिति। आत्मनेपदं स्यादित्यर्थः, म्रियमाण इत्यत्र आनस्यापि इष्टत्वात्। ननु ङित्वादेव सिद्धे किमर्थमिदमित्याशङ्क्य नियमार्थमित्याह नान्यत्रेति। तर्हि ङित्त्वं व्यर्थमित्यत आह ङित्त्वं स्वरार्थमिति। 'तास्यनुदात्तेन्ङिददुपदेशाल्ल-सार्वधातुकमनुदात्तम्—' इत्येतदर्थमित्यर्थः। म्रियते इति। शे कृते रिङियङ-

---

स्यादिति। परिणूतेति। 'श्र्युकः किति' इतीण्निषेधः। म्रियतेर्लुङ्लिङोश्च। चात् शित इति अनुकृष्यते, तदाह शितश्च प्रकृतिभूतादिति। तङिति। आत्मनेपदमित्यर्थः। तेन म्रियमाणे इति सिद्धम्। स्वरार्थमिति। मा हि मृतेत्यत्र 'तास्यनुदात्तेन्ङिददुपदेशाल्लसार्वधातुकमनुदात्तम्' इत्यनेन ङितः परस्य लादेशसार्व-धातुकस्यानुदात्तत्वे कृते धातुरुदात्तः। ङित्त्वाभावे तु प्रत्ययस्योदात्तत्वे धातुरनुदात्तः स्यात्। न च सिज्लोपस्यासिद्धत्वाद् ङितः परत्वं लसार्वधातुकस्य दुरुपपादमिति

मम्रिव। मर्तासि। मरिष्यति। मृषीष्ट। अमृत।

अथ परस्मैपदिनः सप्त। रि १४०४ पि १४०५ गतौ। लघूपधगुणादन्तरङ्गत्वादियङ्। रियति। पियति। रेता। पेता। धि १४०६ धारणे। क्षि १४०७ निवासगत्योः। षू १४०८ प्रेरणे। सुवति। सविता। कॄ १४०९ विक्षेपे। किरति किरतः। चकार चकरतुः। करिता, करीता। कीर्यात्। अकारीत्। **२५३९ किरतौ लवने** (६-१-१४०) उपात्किरतेः सुडागमः स्याच्छेदेऽर्थे। उपस्किरति। 'अडभ्यासव्यवायेऽपि सुट् कात्पूर्व इति वक्तव्यम्' (वा ३६९९)। उपास्किरत् उपचस्कार। **२५४० हिंसायां प्रतेश्च** (६-४-१४१) उपात्प्रतेश्च किरतेः सुट् स्याद्धिंसायाम्। उपस्किरति। प्रतिस्किरति। गॄ १४१० निगरणे। **२५४१ अचि विभाषा** (८-२-२१) गिरतेः रेफस्य लत्वं वा स्यादजादौ। गिरति, गिलति। जगार, जगाल। जगरिथ, जगलिथ।

विति भावः। ऋदन्तत्वाद् भारद्वाजमतेऽपि नेडित्याह **ममर्थेति। मम्रिवेति।** क्रादिनियमादिट्। मर्ता। 'ऋद्धनोः स्ये' इति इटं मत्वाह **मरिष्यतीति। रि पि गतावीति।** द्वाविमावनिटौ। ननु शे कृते तिपमाश्रित्य इकारस्य परत्वाल्लघूपधगुणः स्यादित्यत आह **अन्तरङ्गत्वादियङिति। कॄ विक्षेप इति।** दीर्घान्तोऽयं सेट्। **किरतीति।** 'ॠत इद्धातोः' इति इत्वं रपरत्वम्। **चकरतुरिति।** कित्त्वेऽपि 'ऋच्छत्यॄताम्' इति गुण इति भावः। 'वृतो वा' इति मत्वाह **करिता, करीतेति। किरतौ लवने। उपादिति।** 'उपात् प्रतियत्न–' इत्यतस्तदनुवृत्तेरिति भावः। **सुडागम इति।** 'सुट् कात्पूर्वः' इत्यतस्तदनुवृत्तेरिति भावः। 'अडभ्यासव्यवायेऽपि' इति वार्तिकम्। 'सुट् कात्पूर्वः' इत्यनुवृत्तिलभ्यम्। **हिंसायां प्रतेश्च।** चकारादुपादिति समुच्चीयते, तदाह **उपादिति। गॄ निगरण इति।** निगरणं भक्षणम्। सेट्। **अचि विभाषा।** 'ग्रो यङि' इत्यतो ग

तस्य कथमनुदात्तता स्यादिति शङ्क्यम्, ङित्त्वसामर्थ्यात् सिज्लोपस्यासिद्धत्वं नेति सुवचत्वात्। अमृतेत्यत्राडागमस्यैवोदात्तत्वाद् मृङो ङित्त्वस्य न किंचित्प्रयोजनमिति भ्रमनिवारणाय मा हि मृतेति माङः प्रयोगे 'तिङ्ङतिङः' इति तिङन्तनिघातेऽपि ङित्त्वं व्यर्थमेव स्याद् इति हिशब्दप्रयोगः। हिप्रयोगे तु 'हि च' इत्यनेन तिङन्तनिघातनिषेधादिष्टस्वरः सिध्यतीति बोध्यम्। **रि पि गतौ।** परत्वाल्लघूपधगुणः स्यादित्याशङ्कायामाह **अन्तरङ्गत्वादिति। किरतौ लवने।** 'उपात्प्रतियत्ने' इति सूत्रादुपादिति वर्तते। लवने किम्, उपकिरति। **हिंसायां प्रतेश्च।** चादुपात् 'उरोविदारं प्रतिचस्करे नखैः' इति माघः। कर्मणि लिट्। 'ऋच्छत्यॄताम्'

गरिता, गलिता । दृङ् १४११ आदरे । आद्रियते आद्रियेते । आदद्रे । आदद्रिषे । आदर्ता । आदरिष्यते । आदृषीष्ट । आदृत आदृषाताम् । धृङ् १४१२ अवस्थाने । ध्रियते ।

अथ परस्मैपदिनः षोडश । प्रच्छ १४१३ ज्ञीप्सायाम् । पृच्छति । पप्रच्छ पप्रच्छतुः । पप्रच्छिथ, पप्रष्ठ । प्रष्टा । प्रक्ष्यति । अप्राक्षीत् । वृत् । किरादयो वृत्ताः । सृज १४१४ विसर्गे । 'विभाषा सृजिदृशोः' (सू २४०४) ससर्जिथ, सस्रष्ठ । स्रष्टा । स्रक्ष्यति । 'सृजिदृशोर्झल्यमकिति' (सू २४०५) इत्यमागमः ।

इत्यनुवर्तते । 'कृपो रो लः' इत्यतो रो ल इति तदाह **गिरतेरिति । अजादाविति** । 'धातोः कार्यमुच्यमानं तत्प्रत्यये भवति' इति परिभाषालब्धस्य प्रत्ययस्य अचा विशेषणात्तदादिविधिः । तेन गिरात्रित्यादौ नेति 'मृजेर्वृद्धिः' इति सूत्रभाष्ये स्पष्टम् । **दृङ् आदर इति** । ह्रस्वान्तोऽयम् । अनिट् । **आद्रियते इति** । रिङ् इयङ् । 'ऋद्धनोः स्ये' इति इटं मत्वाह **आदरिष्यते इति । आदृषीष्टेति** । 'उश्च' इति कित्त्वान्न गुणः । **आदृतेति** । 'ह्रस्वादङ्गात्' इति सलोपः । **प्रच्छ ज्ञीप्सायामिति** । ज्ञातुमिच्छा ज्ञीप्सा । अनिडयम् । **पृच्छतीति** । शस्य ङित्त्वाद् 'ग्रहिज्या–' इति रेफस्य संप्रसारणम् ऋकारः पूर्वरूपं चेति भावः । **पप्रच्छतुरिति** । संयोगात् परत्वेन कित्त्वाभावान्न संप्रसारणमिति भावः । भारद्वाजनियमात्थलि वेडिति मत्वाह **पप्रच्छिथ, पप्रष्ठेति** । इडभावपक्षे व्रश्चादिना छस्य षः, थस्य ष्टुत्वेन ठ इति भावः । पप्रच्छिव । **प्रष्टेति** । छस्य व्रश्चेति षः, तकारस्य ष्टुत्वेन टः । न च षत्वस्यासिद्धत्वात् पूर्वं तुकि ततः छस्य षत्वे, ष्टुत्वयोः प्रट्ष्टेति स्यादिति वाच्यम्, व्रश्चेति सूत्रे सतुक्कस्य छस्य ग्रहणात् । **किरादयो वृत्ता इति** । न चैवं सति 'किरश्च पञ्चभ्यः' इत्यत्र पञ्चग्रहणं व्यर्थं किरादीनां पञ्चत्वादिति वाच्यम्, तस्य 'रुदादिभ्यः सार्वधातुके' इत्युत्तरार्थत्वात् । **सृज विसर्गे** । अनिट् । सृजति । ससर्ज ससृजतुः । अजन्ताकारवत्त्वाभावेऽपि

इति गुणः । दृङ् आदरे । 'तथाद्रियन्ते न बुधाः सुधामपि' इति श्रीहर्षः । **प्रच्छ** ज्ञीप्सायाम् । ज्ञातुमिच्छा ज्ञीप्सा । अत्र ज्ञपिर्ज्ञाने । 'आप्ज्ञप्यृधामीत्', 'अत्र लोपः–' इत्यभ्यासलोपः । ण्वुलि । प्रच्छकः । पृच्छाशब्दात् 'तत्करोति–' इति णिजन्ताण्ण्वुलि तु पृच्छकः । पृच्छाशब्दस्तु भिदादेराकृतिगणत्वादङि संप्रसारणे बोध्यः **किरादयो वृत्ता इति** । एते च 'भूषाकर्मकिरादिसनाम्' इति वक्ष्यमाणयक्चिणादिनिषेधवार्तिके उपयोक्ष्यन्ते । 'किरश्च पञ्चभ्यः' इत्यत्र पञ्चभ्य इत्येतदुत्तरसूत्रेऽनुवृत्त्यर्थमिति बोध्यम् । **ससर्जिथेति** । 'विभाषा सृजिदृशोः' इति थलि वेट् ।

सृजेत्। सृज्यात्। अस्राक्षीत्। टु मस्जो १४१५ शुद्धौ। मज्जति। ममज्ज। 'मस्जिनशोर्झलि' (सू २५१७) इति नुम्। 'मस्जेरन्त्यात्पूर्वो नुम् वाच्यः' (वा ३२१)। संयोगादिलोपः। ममङ्क्थ, ममज्जिथ। मङ्क्ता। मङ्क्ष्यति। अमाङ्क्षुः। रुजो १४१६ भङ्गे। रोक्ता। रोक्ष्यति। अरौक्षीत् अरौक्ताम्। भुजो १४१७ कौटिल्ये। रुजिवत्। छुप १४१८ स्पर्शे। छोप्ता। अच्छौप्सीत्। रुश १४१९ रिश १४२० हिंसायाम्। तालव्यान्तौ। रोष्टा। रोक्ष्यति। लिश १४२१ गतौ। अलिक्षत्। स्पृश १४२२ संस्पर्शने। स्प्रष्टा, स्पर्ष्टा। स्प्रक्ष्यति, स्पर्क्ष्यति। अस्प्राक्षीत्, अस्पार्क्षीत्, अस्पृक्षत्। विच्छ १४२३ गतौ। 'गुपूधूप–' (सू २३०३) इत्यायः। आर्धधातुके वा। विच्छायति। विच्छायांचकार। विविच्छ। विश १४२४ प्रवेशने। विशति। वेष्टा। मृश १४२५ आमर्शने। आमर्शनं स्पर्शः। अम्राक्षीत्, अमार्क्षीत्, अमृक्षत्। णुद १४२६ प्रेरणे।

'विभाषा सृजिदृशोः–' इति थलि वेट् इति मत्वाह **ससर्जिथ, सस्रष्ठेति**। इडभावे 'व्रश्च–' इति जस्य षः, थस्य ष्टुत्वेन ठः, पित्त्वेन अकित्त्वात् 'सृजिदृशोः–' इत्यमागम इति भावः। ससृजिव। **टु मस्जो शुद्धौ मज्जतीति**। सस्य श्चुत्वेन शः, तस्य जश्त्वेन ज इति भावः। **ममङ्क्थेति**। मस्जेर्द्वित्वे हलादिशेषे ममस्ज् थ इति स्थिते 'स्कोः–' इति सकारलोपे ममज् थ इति स्थिते जस्य कुत्वेन गकारे, 'मस्जिनशोः–' इति नुमि, तस्यानुस्वारे, तस्य परसवर्णो ङकारः, गस्य चर्त्वेन क इति बोध्यम्। यद्यपि अकारात् परत्र नुमि सत्यपि इदं सिध्यति, तथापि अन्त्यात् पूर्वो नुमित्यस्य मग्न इत्यादौ नलोपः फलम्। अन्यथा उपधात्वाभावात्तस्य लोपो न स्यादिति भावः। एवं **मङ्क्तेति**। मङ्क्ष्यति इत्यत्र तु सस्य षत्वं विशेषः। 'रुजो भङ्गे' इत्यारभ्य 'विच्छ गतौ' इत्यतः प्रागनिटः। 'अनुदात्तस्य चर्दुपधस्य–' इत्यम्विकल्पं मत्वाह **स्प्रष्टा, स्पर्ष्टेति**। **णुद प्रेरणे**। णोपदेशोऽयम्। 'विश प्रवेशने' इत्यारभ्य 'शद्लृ शातने' इत्यन्त अनिटः। तत्र अदुपधस्य थलि वेट्। अन्यस्य तु नित्यमेवेट्। मृशेः 'अनुदात्तस्य च–' इत्यम्विकल्पः, तदाह **अम्राक्षीत्, अमार्क्षीदिति**। 'स्पृशमृश–' इति सिज्वेति भावः। सिजभावे 'शल इगुपधात्–' इति क्सं मत्वाह **अमृक्षदिति**। णुद-

---

विच्छ गतौ। तुदादिपाठसामर्थ्यादायप्रत्ययान्तादपि शो न तु शप्। तेन विच्छायति विच्छायन्तीति नुम्विकल्पः। केचित्तु तुदादिपाठसामर्थ्यादायप्रत्ययस्य पाक्षिकत्वं स्वीकृत्य विच्छति विच्छन्तीति नुम्विकल्पं विच्छति विच्छतः विच्छन्तीत्यादिरूपाणि वोदाजहुस्तेषां तु मते तुदादिपाठस्य केवले चरितार्थत्वादायप्रत्ययान्तत्वाच्छ-

कर्त्रभिप्रायेऽपि फले परस्मैपदार्थः पुनःपाठः। षद्लृ १४२७ विशरणगत्यवसादनेषु। सीदति इत्यादि भौवादिकवत्। इह पाठो नुम्विकल्पार्थः। सीदती, सादन्ती। ज्वलादौ पाठस्तु णार्थः। सादः। स्वरार्थश्च। शबनुदात्तः। शस्तूदात्तः। शद्लृ १४२८ शातने। स्वरार्थ एव पुनः पाठः। शता तु नास्ति। 'शदेः शितः' (सू २३६२) इत्यात्मनेपदोक्तेः।

अथ षट स्वरितेतः। मिल १४२९ संगमे। मिल संश्लेषणे इति पठितस्य पुनः पाठः कर्त्रभिप्राये तदर्थः। मिलति, मिलते। मिमेल, मिमिले। मुच्लृ १४३० मोक्षणे। २५४९ शे मुचादीनाम्। (७-१-५९) नुम् स्यात्। मुञ्चति, मुञ्चते। मोक्ता। मुच्यात्, मुक्षीष्ट। अमुचत्, अमुक्त

धातुर्णोपदेशः। ननु तनादिगण एवास्मिन् स्वरितेत्सु पठितस्य किमर्थमिह पाठ इत्यत आह **कर्त्रभिप्रायेऽपीति**। षद्लृधातोर्भ्वादौ पठितादेव सीदति इत्यादिसिद्धेः इह पाठो व्यर्थ इत्यत आह **इह पाठ इति**। सीदन्ती इति शविकरणात् शत्रन्ताद् ङीपि 'आच्छीनद्योः–' इति नुम्विकल्पार्थं इह पाठ इत्यर्थः। भ्वादावेव पाठे तु 'शप्श्यनोर्नित्यम्' इति नित्यो नुम् स्यादिति भावः। तर्हि भ्वाद्यन्तर्गणे ज्वलादावस्य पाठो व्यर्थ इत्यत आह **ज्वलादाविति**। 'ज्वलितिकसन्तेभ्यः–' इति कर्तरि णप्रत्ययार्थ इति भावः। तदुदाहृत्य दर्शयति **साद इति**। उभयत्र पाठस्य फलान्तरमाह **स्वरार्थश्चेति**। तदेव विशदयति **शबनुदात्त इति**। 'अनुदात्तौ सुप्पितौ' इति पित्स्वरेणेति भावः। **शस्तूदात्त इति**। 'प्रत्ययः' 'आद्युदात्तश्च' इत्यनेनेति भावः। ननु 'शद्लृ शातने' इत्यस्य भ्वादौ पाठादेव सिद्धे इह पाठो व्यर्थ इत्यत आह **स्वरार्थ एवेति**। प्रागुक्तपित्त्वापित्त्वकृतस्वरभेदार्थ एवेत्यर्थः। ननु शत्रन्ताद् ङीपि उक्तरीत्या नुम्विकल्पार्थोऽपि कुतो न स्यादित्यत आह **शता तु नास्तीति**। शदेर्लटः शानजेव, नतु शत्रादेश इत्यर्थः। कुत इत्यत आह **शदेः शित इतीति**। **मिल संगमे**। **पठितस्येति**। अस्मिन्नेव तुदादिगणे परस्मैपदिषु पठितस्येत्यर्थः। **तदर्थ इति**। पूर्वत्र पाठस्तु कर्त्रभिप्रायेऽपि परस्मैपदार्थ इत्यर्थः। **मुच्लृ मोक्षणे। शे मुचादीनाम्**। **नुम् स्यादिति**। शेषपूरणमिदम्। 'इदितो नुम्–' इत्यतस्तदनुवृत्तेरिति भावः। **मुक्षीष्टेति**। 'लिङ्सिचौ–' इति कित्त्वान्न गुण इति भावः। **अमुचदिति**। लृदित्त्वादङिति भावः। लुङि तङ्याह **अमुक्तेति**। 'झलो झलि' इति सिज्लोप इति भावः।

वेव। तेन विच्छायन्तीति नित्यमेव 'शप्श्यनोः–' इति नुम्। **पठितस्येति**। अस्मिन्नेव गणे परस्मैपदिषु पठितस्येत्यर्थः। **तदर्थ इति**। पूर्वपाठस्तु

अमुञ्चाताम्। लुप्लृ १४३१ छेदने। लुम्पति। लुम्पते। अलुपत्, अलुप्त। विद्लृ १४३२ लाभे। विन्दति, विन्दते। विवेद, विविदे। व्याघ्रभूत्यादिमते सेट्कोऽयम्। वेदिता। भाष्यादिमतेऽनिट्कः। वेत्ता। परिवेत्ता। परिवर्जने। ज्येष्ठं परित्यज्य दारानग्नींश्च लब्धवानित्यर्थः। तृन्तृचौ। लिप १४३३ उपदेहे। उपदेहो वृद्धिः। लिम्पति, लिम्पते। लेप्ता। 'लिपिसिचि-' (सू २४१८) इत्यङ्। तङि तु वा। अलिपत्, अलिपत, अलिप्त। षिच १४३४ क्षरणे। सिञ्चति, सिञ्चते। असिचत्, असिचत, असिक्त। अभिषिञ्चति। अभ्यषिञ्चत्। अभिषिषेच।

अथ त्रयः परस्मैपदिनः। कृती १४३५ छेदने। कृन्तति। चकर्त। कर्तिता। कर्तिष्यति, कर्त्स्यति। अकर्तीत्। खिद १४३६ परिघाते। खिन्दति। चिखेद। खेत्ता। अयं दैन्ये दिवादौ रुधादौ च। पिशि १४३७ अवयवे। पिंशति। पेशिता। अयं दीपनायामपि। 'त्वष्टा रूपाणि पिंशतु' वृत्। मुचादयस्तुदादयश्च वृत्ताः।

॥ इति तिङन्ते तुदादिप्रकरणम् ॥

लिप उपदेहे। **तङि तु वेति।** 'आत्मनेपदेष्वन्यतरस्याम्' इत्यनेनेति शेषः। **षिच क्षरणे।** **अभिषिञ्चतीति।** 'उपसर्गात्सुनोति-' इति षः। **अभ्यषिञ्चदिति** 'प्राक्सितादड्व्यवायेऽपि' इति षत्वम्। **अभिषिषेचेति।** 'स्थादिष्वभ्यासेन-' इति षः।

कृती छेदन इति। ईदित्त्वं 'श्वीदित-' इत्येतदर्थम्। 'सेऽसिचि-' इति वेडिति मत्वाह **कर्तिष्यति, कर्त्स्यतीति।** **पिशि अवयव इति।** अवयवक्रियायामित्यर्थः। **रूपाणि पिंशत्विति।** प्रकाशयत्वित्यर्थः।

इति श्रीवासुदेवदीक्षितविदुषा विरचितायां सिद्धान्तकौमुदीव्याख्यायां बालमनोरमाख्यायां शविकरणं समाप्तम्।

संश्लेषणे कर्त्रभिप्रायेऽपि परस्मैपदार्थः। **षिच** क्षरणे। षिचिरिति केचिदिरितं पठन्ति। तत्तु फलाभावादुपेक्ष्यम्। इह 'लिपिसिचिह्वश्च' इति च्लेरङ् विधीयते स चाप्राप्तविधिः। इरित्त्वे तु विकल्पेन प्राप्तौ नित्यार्थो विधिरिति फलाभावः। **पिंशत्विति।** दीपयत्वित्यर्थः। इति तुदादयः।

अथ तिङन्ते रुधादिप्रकरणम् ॥ ४६ ॥

रुधिर् १४३८ आवरणे । नव स्वरितेत इरितश्च । २५४३ **रुधादिभ्यः श्नम्** । (३-१-७८) शपोऽपवादः । मित्त्वादन्त्यादचः परः । नित्यत्वाद्गुणं बाधते । रुणद्धि । 'श्नसोरल्लोपः' (सू २४६६)। णत्वस्यासिद्धत्वादनुस्वारः । परसवर्णः । तस्यासिद्धत्वाण्णत्वं न । 'न पदान्त-' (सू ५१) इति सूत्रेणानुस्वारपरसवर्णयोरल्लोपो न स्थानिवत् । रुन्द्धः । रुन्धन्ति । रुन्द्धे । रोद्धा । रोत्स्यति । रोत्स्यते । रुणद्धु, रुन्द्धात् । रुन्द्धि । रुणधानि । रुणधै । अरुणत् अरुन्द्धाम् । अरुणत्, अरुणः । अरुणधम् । अरुधत्, अरौत्सीत्, अरुद्ध ।

अथ श्नम्विकरणा धातवो निरूप्यन्ते । **रुधादिभ्यः श्नम्** । कर्त्रर्थे सार्वधातुके परे रुधादिभ्यः श्नम्प्रत्ययः स्यात् स्वार्थे इत्यर्थः, तदाह **शपोऽपवाद इति** । श्नमि शमावितौ । मित्त्वस्य फलमाह **मित्त्वादन्त्यादचः पर इति** । प्रत्ययत्वात् शकारस्येत्संज्ञा । शकारनिर्देशस्तु 'श्नसोरल्लोपः' 'श्नान्नलोपः' इत्यत्र विशेषणार्थः । न तु सार्वधातुकसंज्ञार्थः, फलाभावात् । न च 'सार्वधातुकमपित्' इति ङित्त्वे गुणनिषेधः फलमिति शङ्क्यम्, श्नमः पूर्वस्य इगन्तस्य अङ्गत्वाभावादेव गुणाप्रसक्तेः । ननु श्नमः प्राक् परत्वाल्लघूपधगुणे कृते पश्चात् श्नमि रोणद्धि इति स्यादित्यत आह **नित्यत्वाद्गुणं बाधत इति** । कृते अकृते च गुणे प्रवृत्तेः श्नम् नित्यः । तस्मिन् सति लघूपधत्वाभावान्न गुण इति भावः । **रुणद्धीति** । रुनध् ति इति स्थिते 'झषस्तथोः-' इति धत्वे णत्वमिति भावः । रुनध् तस् इति स्थिते प्रक्रियां दर्शयति **श्नसोरल्लोप इति** । क्ङिति सार्वधातुके तद्विधेरिति भावः । रुन्ध् तस् इति स्थिते नस्य णत्वमाशङ्क्याह **णत्वस्यासिद्धत्वादिति** । ननु कृते परसवर्णे तस्य नस्य णत्वमस्त्वित्यत आह **तस्यासिद्धत्वादिति** । परसवर्णसंपन्ननस्येत्यर्थः । नन्विह अल्लोपस्यै 'अचः परस्मिन्-' इति स्थानिवत्त्वात् कथमनुस्वारपरसवर्णावित्यत आह **न पदान्तेति** । **रुन्द्ध इति** । 'झषस्तथोः-' इति धः । **रुन्धन्तीति** । रुणत्सि रुन्द्धः रुन्द्ध । रुणध्मि रुन्ध्वः रुन्ध्मः । **रुन्द्धे इति** । रुन्धाते रुन्धते । रुन्त्से रुन्धाथे रुन्द्ध्वे । रुन्धे रुन्ध्वहे रुन्ध्महे । रुरोध । रुरोधिथ । **अरुणदिति** । लङि हल्ङ्यादिना तिपो लोपः । धस्य चर्त्वविकल्पः ।

रुधादिभ्यः श्नम् । प्रत्ययत्वेऽपि मित्त्वादन्त्यादचः परः । प्रत्ययसंज्ञाफलं तु शस्येत्संज्ञा । शस्योच्चारणं तु 'श्नसोरल्लोपः', 'श्नान्नलोपः' इत्यत्र विशेषणार्थं न तु सार्वधातुकसंज्ञार्थं फलाभावात् । न चापित्सार्वधातुकस्य ङित्त्वे गुणनिषेधः फलमिति शङ्क्यम्, इगन्तस्याङ्गत्वाभावात् । **अरुण इति** । सिपि दश्चेति रुर्वा ।

भिदिर् १४३९ विदारणे। भिनत्ति। भिन्ते। भेत्ता। भेत्स्यति। अभिनत्, अभिनः। अभिनदम्। अभिन्त। अभिदत्, अभैत्सीत्, अभित्त। छिदिर् १४४० द्वैधीकरणे। अच्छिदत्, अच्छैत्सीत्। रिचिर् १४४१ विरेचने। रिणक्ति, रिङ्क्ते। रिरेच। रिरिचे। रेक्ता। अरिणक्। अरिचत्, अरैक्षीत्। अरिक्त। विचिर् १४४२ पृथग्भावे। विनक्ति। विङ्क्ते। क्षुदिर् १४४३ संपेषणे। क्षुणत्ति, क्षुन्ते। क्षोत्ता। अक्षुदत्, अक्षौत्सीत्, अक्षुत्त। युजिर् १४४४ योगे। योक्ता। उ छृदिर् १४४५ दीप्तिदेवनयोः। छृणत्ति, छृन्ते। चच्छर्द। 'सेऽसिचि-' (सू २५०६) इति वेट्। चच्छृदिषे, चच्छृत्से। छर्दिता। छर्दिष्यति, छर्त्स्यति। अच्छृदत्, अच्छर्दीत्, अच्छर्दिष्ट। उतृदिर् १४४६ हिंसानादरयोः। तृणत्ती-त्यादि। कृती १४४७ वेष्टने। परस्मैपदी। कृणत्ति। आर्धधातुके तौदादिकवत्। ञि इन्धी १४४८ दीप्तौ। अथ आत्मनेपदिनः। २५४४ श्नान्नलोपः। (६-४-२३) श्नमः परस्य नस्य लोपः स्यात्। 'श्नसोरल्लोपः' (सू २४६१)। इन्द्धे। इन्त्से।

सिपि तु हल्ङ्यादिना लुप्ते 'दश्च' इति रुत्वविकल्पं मत्वाह **अरुणत्, अरुण इति**। रुन्ध्यात्। रुन्धीत रुत्सीष्ट। इरित्त्वादङ्विकल्पं मत्वाह **अरुधत्, अरौत्सी-दिति**। अङभावे सिचि हलन्तलक्षणा वृद्धिः। लुङस्तङ्याह **अरुद्धेति**। 'झलो झलि' इति सिज्लोपः। **भिनत्तीति**। भिन्तः भिन्दन्ति। भिनत्सि भिन्त्थः भिन्त्थ। भिनद्मि भिन्द्वः भिन्द्मः। **भिन्त्ते इति**। भिन्दाते भिन्दते। भिन्त्से भिन्दाथे। भिन्द्ध्वे। भिन्दे भिन्द्वहे। बिभेद। बिभेदिथ। बिभिदिव। बिभिदे। बिभिदिषे। **अभिनत्, अभिन इति**। 'दश्च' इति रुर्वेति भावः। **अभि-न्तेति**। लङि तङि रूपम्। लुङः परस्मैपदे आह **अभिदत्, अभैत्सीदिति**। इरित्त्वादङ् वेति भावः। लुङि तङ्याह **अभित्तेति**। 'झलो झलि' इति सिज्लोपः। अभित्सातामित्यादि। **उ छृदिरिति**। उकार इत् 'उदितो वा' इति क्त्वायामिड्विकल्पार्थः। **ञि इन्धी दीप्तौ**। ईदित्त्वं 'श्वीदितः-' इत्येतदर्थम्। श्नमि कृते इ न न् ध् ते इति स्थिते **श्नान्नलोपः**। श्नम्प्रत्ययैकदेशस्य श्न इत्यस्य आदिति पञ्चमी। नेति लुप्तषष्ठीकम्, तदाह **श्नमः परस्य नस्येति**। नकारस्येत्यर्थः। अकार उच्चारणार्थः। तथा च इन ध् ते इति स्थिते आह **श्नसोरल्लोप इति**।

एवमभिन इत्यत्रापि। **उच्छृदिर्**। उकारः क्त्वायामिड्विकल्पार्थः। छृत्वा। छर्दित्वा। इट्पक्षे 'न क्त्वा सेट्' इति कित्त्वनिषेधाद् गुणः। **श्नान्नलोपः**। अस्य मुख्यो-दाहरणम्। अनक्ति। भनक्ति। आदित्युत्सृष्टमकारानुबन्धस्य श्नमो ग्रहणमित्याह **श्नमः परस्येति**। एवं च 'यजयाच-' इति विश्नशब्दस्यापि नुटि विश्नानामित्यत्र

इन्धिता । इनधै । ऐन्द्ध । ऐन्द्धाः । खिद् १४४९ दैन्ये । खिन्ते । खेत्ता । विद् १४५० विचारणे । विन्ते । वेत्ता ।

अथ परस्मैपदिनः । शिष्लृ १४५१ विशेषणे । शिनष्टि शिंष्टः शिंषन्ति । शिशेषिथ । शेष्टा । शेक्ष्यति । हेर्धिः । जश्त्वम् । ष्टुत्वम् । 'झरो झरि–' (सू ७१) इति वा डलोपः । अनुस्वारपरसवर्णौ । शिण्ढि, शिण्ड्ढि ।

तथा च इन्ध् ते इति स्थिते 'झषस्तथोः–' इति तकारस्य धत्वे पूर्वधस्य जश्त्वे परिनिष्ठितमाह **इन्द्धे इति** । यद्यपि 'अनिदिताम्–' इत्येवात्र नलोपः सिध्यति । तथापि अनक्ति इत्याद्यर्थं सूत्रमिहापि न्याय्यत्वादुपन्यस्तमिति बोध्यम् । इन्धते । इन्द्ध्वे । इन्द्धाम् । इन्त्स्व । इन्द्ध्वम् । **इनधै इति** । श्नमि उत्तरमस्य इट एत्वे आटि वृद्धौ इन न् ध् ऐ इति स्थिते श्नमल्लोपे आटः पित्त्वेन ङित्त्वाभावात् 'श्नसोरल्लोपः' इत्यभावे रूपमिति भावः । अत्र नलोपार्थमपि श्नस लोप इत्यावश्यकम्, आटः पित्त्वेन ङित्त्वाभावाद् 'अनिदिताम्–' इत्यस्याप्रवृत्तेः । इनधावहै । लङ्याह **ऐन्द्धेति** । **ऐन्द्धा इति** । 'झषस्तथोः–' इति थस्य धः । इन्धीत । लुङि ऐन्धिष्ट । **शिष्लृ विशेषणे** अनिट् । **शिशेषिथेति** । अजन्ताकारवत्त्वाभावात् क्रादिनियमान्नित्यमिट् । शिनष् हि इति स्थिते श्नल्लोपे शिन्ष् हि इति स्थिते आह **हेर्धिरिति** । शिन् ष् धि इति स्थिते आह **जश्त्वमिति** । 'झलां जश् झशि' इति षस्य ड इति भावः । **ष्टुत्वमिति** । धस्य ढ इति भावः । यद्यपि जश्त्वस्यासिद्धत्वात्ततः प्रागेव ष्टुत्वस्य उपन्यासो युक्तः । तथापि जश्त्वं ष्टुत्वमिति प्रक्रियाप्रदर्शनमात्रपरं क्रमस्तु न विवक्षितः । **झर इति** । जश्त्वसंपन्नस्य डस्य लोपविकल्प इत्यर्थः । **अनुस्वारपरसवर्णाविति** । नकारस्य 'नश्च–' इत्यनुस्वारे सति तस्य परसवर्णो णकार इत्यर्थः । 'न पदान्त–' इति निषेधान्नल्लोपः स्थानिवत् । डस्य लोपपक्षे उदाहरति **शिण्ढीति** । डस्य लोपाभावे उदाहरति **शिण्ड्ढीति** । वस्तुतस्तु सानुस्वार एव पाठ उचितः, 'दीर्घादाचार्याणाम्' इत्युत्तरम् 'अनुस्वारस्य ययि परसवर्णः' 'वा पदान्तस्य' 'तोर्लि' 'उदः स्थास्तम्भोः पूर्वस्य' 'झयो होऽन्यतरस्याम्' 'शश्छोऽटि' इति षट्सूत्रपाठोत्तरं 'झलां जश् झशि' 'अभ्यासे चर्च' 'खरि च' 'वावसाने' 'अणोऽप्रगृह्यस्यानुनासिकः' इति पञ्चसूत्रपाठ इति भाष्यसंमताष्टाध्यायीपाठे परसवर्णदृष्ट्या 'झलां जश् झशि' इत्यस्य 'झरो झरि–' इत्यस्य चासिद्धत्वेन यय्परत्वाभावे परसवर्णाप्राप्तेरिति शब्देन्दुशेखरे स्थितम् । शिष्टात्

लक्षणप्रतिपदोक्तप्रत्ययग्रहणपरिभाषयोः प्रवृत्त्या नलोपशङ्कैव नास्तीत्याहुः । **इन्धे** । **इन्त्से** । श्नमो नकारस्यानुस्वारपरसवर्णौ । 'अनिदिताम्–' इति नलोपस्तु न

शिनषाणि । अशिनट् । लृदित्वादङ् । अशिषत् । पिष्लृ १४५२ संचूर्णने । पिपेष । पेष्टा । पेक्ष्यति । पिनष्टि । भञ्जो १४५३ आमर्दने । भनक्ति । बभञ्जिथ बभङ्क्थ । भङ्क्ता । भुज १४५४ पालनाभ्यवहारयोः । भुनक्ति । भोक्ता । भोक्ष्यति । अभुनक् । तृह १४५५ हिसि १४५६ हिंसायाम् । २५४५ तृणह इम् । (७-३-९२) तृहः श्नमि कृते इमागमः स्याद्धलादौ पिति । तृणेढि तृण्ढः ।

शिष्टम् शिष्ट । **शिनषाणीति** । आटः पित्त्वेन ङित्त्वाभावात् 'श्नसोः–' इत्यल्लोपो नेति भावः । **अशिनडिति** । लङस्तिपो हल्ङ्यादिलोपे षस्य जश्त्वमिति भावः । अशिंष्टाम् अशिंषन् । अशिनट् अशिंष्टम् । अशिंष्ट । अशिनषम् अशिंष्व अशिंष्म । **भञ्जो आमर्दने** । **भनक्तीति** । श्नमि भ न न् ज् ति इति स्थिते 'श्नान्न लोपः' इति नलोप इति भावः । भङ्क्तः भञ्जन्तीत्याद्यूह्यम् । भारद्वाज-नियमात्थलि वेडिति मत्वाह **बभञ्जिथ, बभङ्क्थेति** । **भङ्क्तेति** । अनिडिति भावः । **भुज पालनेति** । 'भुजोऽनवने' इति तङ् वक्ष्यते–भुङ्क्ते भुञ्जाते इत्यादि । **तृह हिसि हिंसायाम्** । आद्य ऋदुपधः । सेट् । श्नमि कृते णत्वे तृणह् ति इति स्थिते **तृणह इम्** । तृणह इति षष्ठी । कृतश्नमः तृहधा-तोर्निर्देशः । 'नाभ्यस्तस्य–' इत्यतः पितीति 'उतो वृद्धिः–' इत्यतो हलीति चानु-वर्तते । फलितमाह **तृहः श्नमि कृते इति** । मित्त्वादन्त्यादचः परः । श्नमि कृते इत्यनुक्तौ तु येन नाप्राप्तिन्यायेन इमागमेन श्नम् बाध्येत, 'सत्यपि संभवे बाधनं भवति' इति न्यायात् । अन्यथा 'ब्राह्मणेभ्यो दधि दीयताम्, तक्रं कौण्डिन्याय' इत्यत्र तक्रेण दधि न बाध्येत । श्नमा शप् च न बाध्येत, देशभेदेन उभयसंभवादिति भावः । **तृणेढीति** । तृणह् ति इति स्थिते इमागमे आद्गुणे तृणेह् ति इति स्थिते ढत्वधत्वष्टुत्वढलोपा इति भावः । **तृण्ढ इति** । तसि श्नमि कृते, तृणह् तस् इति स्थिते, तसः अपित्त्वादिमागमाभावे 'श्नसोः–' इत्यल्लोपे ढत्वधत्वष्टुत्वढलोपा इति भावः । तृंहन्ति । तृणेक्षि तृण्ढः तृण्ढ । तृणेह्मि

भवति । अल्लोपस्य 'असिद्धवदत्र–' इत्यसिद्धत्वात्स्थानिवत्त्वाद्वा । **भञ्जो** । ओदित्करणं निष्ठानत्वार्थम् । भग्नः । **भुज** पालनादौ । 'भुजोऽनवने' इत्यात्मनेपदं वक्ष्यते । भुङ्क्ते । भुञ्जाते । **तृणह इम्** । तृह इति वक्तव्ये सश्नमो ग्रहणं विशेषविहितेन इमा श्नमो बाधो माभूदित्येवमर्थम् । न च तौदादिकस्य तृह इत्यस्य व्यावृत्त्यर्थमेवा-स्त्विति शङ्क्यम्, ततः परस्य हलादेः पितः सार्वधातुकस्य विकरणेन व्यवधानात् । 'नाभ्यस्तस्याचि पिति–' इत्यतः पितीति 'उतो वृद्धिः–' इत्यतो हलीति च वर्तते, तदाह **हलादौ पितीति** । 'प्रत्ययलोपे प्रत्ययलक्षणम्' इति सूत्रस्थभाष्यकारीयनिष्कर्षे तु हलीति नानुवर्तते किं तु पितीति अनुवर्तत एव । तेन तृढ इत्यत्र नातिप्रसङ्गः । न

ततर्ह । तर्हिता । अतृणेट् । हिनस्ति । जिहिंस । हिंसिता । उन्दी १४५७ क्लेदने। उनत्ति उन्तः उन्दन्ति । उन्दांचकार । औनत् औन्ताम् औन्दन् । औनः, औनत् । औनदम् । अञ्जू १४५८ व्यक्तिम्रक्षणकान्तिगतिषु । अनक्ति अङ्क्तः अञ्जन्ति । आनञ्ज । आनञ्जिथ, आनङ्क्थ । अङ्क्ता, अञ्जिता । अङ्ग्धि । अनजानि । आनक् । २५४६ अञ्जेः सिचि । (७-२-७१) अञ्जेः सिचो

तृंह्वः तृंह्मः । ततर्हेति । ततृहतुः । ततर्हिथ । ततृहिव । तर्हितेति । सेडिति भावः । तर्हिष्यति । तृणेढु, तृण्ढात् तृण्ढाम् तृंहन्तु । तृण्ढि, तृण्ड्ढ, तृण्ढात् तृण्ढम् तृण्ढ । तृणहानि तृणहाव तृणहाम । अतृणेडिति । लङ्स्तिपि श्नमि इम् हल्ङ्यादिलोपः, ढत्वजश्त्वे इति भावः । अतृण्ढाम् अतृंहन् । अतृणेट् अतृण्ढम् अतृण्ढ । अतृणहम् अतृंह्व अतृंह्म । तृंह्यात् । तृह्यात् । अतर्हीत् । अतर्हिष्यत् । हिंसिधातोरुदाहरति हिनस्तीति । इह श्नमि इदित्त्वान्नुमि च कृते 'श्नान्न लोपः' इति नुमो लोप इति भावः । हिंस्तः हिंसन्ति । हिनस्सि हिंस्थः हिंस्थ । हिनस्मि हिंस्वः हिंस्मः । जिहिंसेति । किति इदित्त्वान्नलोपो न । जिहिंसतुः । जिहिंसिथ । हिंसितेति । सेडिति भावः । हिंसिष्यति । हिनस्तु हिंस्ताम् । हौ श्नमि नुमि कृते 'श्नान्नलोपः' इति नुमो लोपे हेरपित्त्वेन ङित्त्वात् 'श्नसोः–' इत्यल्लोपे 'धि च' इति सलोपे, हिन्धि इति रूपम् । हिंस्तात् । हिनसानि । अहिनत् अहिंस्ताम् अहिंसन् । सिपि रुर्वा–अहिनः अहिनत् अहिंस्तम् । अहिन-सम् अहिंस्व । हिंस्यात् हिंस्याताम् । आशीर्लिङि श्नमभावान्नुमेव । इदित्त्वान्न-लोपो न । हिंस्यादित्येव । हिंस्यास्ताम् । अहिंसीत् । अहिंसिष्यत् । उन्दी क्लेदने । उनन्तीति । उनत्सि उन्त्थः । उनद्मि उन्द्वः । उन्दा-मिति । 'इजादेश्च–' इत्याम् । उन्दिता । उन्दिष्यति । उनत्तु, उन्तात् । उन्द्धि । उन-दानि । लङ्याह औनदिति । औन्ताम् औन्दन् । औनः, औनत् । औनदम् । औन्द्व । उन्द्यात् । उद्यात् । अञ्जूधातुः नोपधः कृतपरसवर्णनिर्देशः । ऊदित्त्वा-द्वेट् । अनक्तीति । श्नमि कृते परसवर्णस्यासिद्धत्वात् 'श्नान्न लोपः' इति नकार-लोपे जस्य कुत्वेन गः, तस्य चर्त्वेन क इति भावः । अङ्क्त इति । नलोपे अल्लोपे जस्य कुत्वेन गः गस्य चर्त्वेन कः, श्नमो नस्य परसवर्णो ङ इति भावः । अञ्जन्तीति । नलोपाल्लोपौ । श्नमो नस्य परसवर्णो ञ इति भावः । अनक्षि अङ्क्थः । अनज्मि अञ्ज्वः । अङ्ग्धीति । हौ श्नमि धिभावे नलोपाल्लोपौ ।

च हलीत्यननुवृत्तौ तृणहानीत्यत्रातिप्रसङ्ग इति वाच्यम्, अचि नेत्यनुवर्तनात् । उन्दी । क्लेदनमार्द्रीभावः । अञ्जू । व्यक्तिर्विवचनम् । म्रक्षणं स्निग्धता । अञ्जेः

नित्यमिट् स्यात्। आञ्जीत्। तञ्चू १४५९ संकोचने। तनक्ति। तङ्क्ता, तञ्चिता। ओ विजी १४६० भयचलनयोः। विनक्ति विङ्क्तः। 'विज इट्' (सू २२३६) इति ङित्त्वम्। विविजिथ। विजिता। अविनक्। अविजीत्। वृजी १४६१ वर्जने। वृणक्ति। वर्जिता। पृची १४६२ सम्पर्के। पृणक्ति। पपर्च।

॥ इति तिङन्ते रुधादिप्रकरणम् ॥

अथ तिङन्ते तनादिप्रकरणम् ॥ ५० ॥

अथ सप्त स्वरितेतः। तनु १४६३ विस्तारे। 'तनादिकृञ्भ्य उः' (सू २४६६) तनोति। तन्वः, तनुवः। तनुते। ततान, तेने। तनु। अतनीत्,

---

जस्य कुत्वेन गकारः, नस्य परसवर्णो ङकार इति भावः। अनजानीति। 'श्नान्लोपः'। आटः पित्त्वादल्लोपो न। लङ्याह आनगिति। आङ्क्ताम् आञ्जन्। अञ्ज्यात्। अज्यात्। अञ्जेः सिचि। 'इडत्यर्ति-' इत्यत इडित्यनुवर्तते। ऊदित्वादेव सिद्धे नित्यार्थमिदम्। तदाह अञ्जेरित्यादिना। तञ्चू संकोचने। नोपधः कृतपरसवर्णनिर्देशः। अञ्जूवद्रूपाणि यथायोग्यमूह्यानि। ओ विजीति। ओकार इत्। अनिट्सु इरितो ग्रहणादयं सेट्।

इति श्रीवासुदेवदीक्षितविदुषा विरचितायां सिद्धान्तकौमुदीव्याख्यायां बालमनोरमाख्यायां श्नम्विकरणं समाप्तम्।

अथ उविकरणधातवो निरूप्यन्ते तनुधातुरुदित्। 'उदितो वा' इति प्रयोजनम्। तनादिकृञ्भ्य उः। कर्त्रर्थे सार्वधातुके तनादिभ्यः कृञश्च उप्रत्ययः स्यात् स्वार्थे इत्यर्थः। शपोऽपवादः। तनोतीति। उप्रत्ययस्य तिपमाश्रित्य गुणः। तसादौ तु ङित्वान्न गुणः। तनुतः। झोऽन्तादेशे कृते 'इको यणचि' इति यण्। तन्वन्ति। तनोषि तनुथः तनुथ। तनोमि। 'लोपश्चास्यान्यतरस्याम्-' इत्युकारलोपविकल्पमभिप्रेत्याह तन्वः, तनुव इति। लङ्याह तनुते इति। तन्वाते तन्वते। तनुषे तन्वाथे तनुध्वे। तन्वे तनुवहे, तन्वहे तनुमहे, तन्महे। ततानेति। तेनतुः। तेनिथ। तेन। तेनिव। लङ्याह तेने इति। तेनाते तेनिरे। तेनिषे तेनाथे तेनिध्वे। तेने तेनिवहे तेनिमहे। तनिता। तनिष्यति। तनिष्यते। तनोतु, तनुतात् तनुताम् तन्वन्तु। 'उतश्च प्रत्ययात्-' इति हेर्लुकं मत्वाह तन्विति। तनुतात् तनुतम् तनुत। तनवानि तनवाव तनवाम। अतनोत् अतनुताम् अतन्वन्।

सिचि। नित्यमिट् स्यादिति। विभाषाग्रहणं नानुवर्तत इति भावः। सिचि किम्, अङ्क्ता। पृची। ईदित्त्वान्निष्ठायां नेट्। पृक्तः। 'अपृक्त एकाल्-' इत्यत्र नञ्पूर्वः।

इति तत्त्वबोधिन्यां रुधादिप्रकरणम्।

अतानीत्। २५४७ तनादिभ्यस्तथासोः। (२-४-७९) तनादेः सिचो वा लुक्स्यात्तथासोः। थासा साहचर्यादेकवचनतशब्दो गृह्यते। तेनेह न। यूयमतनिष्ट, अतानिष्ट। 'अनुदात्तोपदेश-' (सू २४२८) इत्यनुनासिकलोपः। तङि। अतत, अतनिष्ट। अतथाः, अतनिष्ठाः। षणु १४६४ दाने। सनोति, सनुते। 'ये विभाषा' (सू २३१९)। सायात्, सन्यात्। 'जनसन-'(सू २५०४) इत्यात्वम्। असात्, असनिष्ट। असाथाः, असनिष्ठाः। क्षणु १४६५ हिंसायाम्। क्षणोति, क्षणुते। 'ह्मयन्त-' (सू २२९९) इति न वृद्धिः। अक्षणीत्। अक्षत, अक्षणिष्ट। अक्षथाः, अक्षणिष्ठाः। क्षिणु १४६६ च। उप्रत्ययनिमित्तो लघूपध-

---

अतनोः। अतनवम् अतन्व, अतनुव। तनुयात्। तन्वीत। तनिषीष्ट। अतो हलादेरिति वृद्धिविकल्पं मत्वाह **अतनीत्, अतानीदिति**। अतनिष्टाम् अतनिषुः। अतनीः अतनिष्टम् अतनिष्ट। अतनिषम् अतनिष्व अतनिष्म। वृद्धिपक्षे अतानिष्टामित्यादि। अतनिष्यत्। लुङः तङि प्रथमैकवचने मध्यमपुरुषैकवचने च विशेषमाह **तनादिभ्यस्तथासोः**। 'गातिस्था-' इत्यतः सिच इति 'ण्यक्षत्रियार्ष-' इत्यतो लुगिति 'विभाषा घ्राधेट्-' इत्यतो विभाषेति चानुवर्तते, तदाह **तनादेरित्यादिना**। **एकवचनतशब्दो गृह्यत इति**। न तु लुङादेशपरस्मैपदमध्यमपुरुषबहुवचनतादेशोऽपीत्यर्थः। **यूयमिति**। लुङि मध्यमपुरुषबहुवचने सिचि वृद्धिविकल्पे सति अतनिष्ट अतानिष्टेत्यत्र सिचो नायं लुग्विकल्प इत्यर्थः। तदेवं प्रत्युदाहरणमुक्त्वा सूत्रस्योदाहरणं वक्ष्यन् प्रक्रियां दर्शयति **अनुदात्तोपदेशेत्यनुनासिकलोपः तङीति**। तङि प्रथमैकवचने तशब्दे मध्यमपुरुषैकवचने थासि च सिचो लुकि 'अनुदात्तोपदेश-' इति नकारस्य लोप इत्यर्थः, तदाह **अतत, अतनिष्टेति**। **अतथाः, अतनिष्ठा इति च**। अतनिषाथामित्यादि सुगमम्। **षणु दाने**। षोपदेशोऽयम्। तनुवद्रूपाणि। **असातेति**। सिचो लुक्पक्षे रूपम्। **असनिष्टेति**। इट्। झलादिपरकत्वाभावादात्त्वं नेति भावः। क्षणुधातुरदुपधः। "वज्रेऽध्वर्युः क्षणवीत" इति तैत्तिरीये। **क्षिणु चेति**। इदुपधः। अयमपि हिंसायामित्यर्थः। "वज्रेऽध्वर्युः क्षिणवीत" इति शाखान्तरं शाबरभाष्ये उदाहृतम्। ननु क्षिणोतीत्यत्र उप्रत्ययमाश्रित्य इकारस्य लघूपधगुणः कस्मान्नेत्यत आह **उप्रत्ययनिमित्त इति**।

अतनिष्ट, अतानिष्टेति। 'तस्थस्थमिपाम्-' इति तादेशः। 'अतो हलादेः-' इति वा वृद्धिः। **अततेति**। 'तनादिभ्यस्तथासोः' इति सिज्लुक्यनुनासिकलोपः। **अतनिष्टेति**। लुगभावपक्षे इट्। **षणु दाने**। नान्तोऽयं। णकारस्तु लाक्षणिकः। तेन यङ्लुकि संसन्ति संसन्त इत्यादावनुस्वारपरसवर्णौ। क्षणु

गुणः 'संज्ञापूर्वको विधिरनित्यः' (प ९४) इति न भवतीत्यात्रेयादयः। भवत्येवेत्यन्ये। चिणोति, चेणोति। चेणितासि। चेणितासे। अचेणीत्। अचित, अचेणिष्ट। ऋणु १४६७ गतौ। ऋणोति, अर्णोति अर्णुतः अर्ण्वन्ति। आनर्ण। आनृणे। अर्णितासि। आर्णीत्, आर्त, आर्णिष्ट। आर्थाः, आर्णिष्ठाः। तृणु १४६८ अदने। तृणोति, तर्णोति। तृणुते, तर्णुते। घृणु १४६९ दीप्तौ। जघर्ण, जघृणे।

अथ द्वावनुदात्तेतौ वनु १४७० याचने। वनुते। ववने। चान्द्रमते परस्मैपदी। वनोति। ववान। मनु १४७१ अवबोधने। मनुते। मेने। डु कृञ् १४७२ करणे। करोति। 'अत उत्सार्वधातुके' (सू २४६७)। कुरुतः। यण्। 'न भकुर्छुराम्' (सू १६२९) इति न दीर्घः। कुर्वन्ति। २५४८ नित्यं करोतेः। (६-४-१०८) करोतेः प्रत्ययोकारस्य नित्यं लोपः स्याद्वमयोः परयोः। कुर्वः कुर्मः। चकर्थ। चकृव। कर्ता। करिष्यति। २५४९ ये च। (६-४-१०९) कृञ उलोपः स्याद्यादौ प्रत्यये परे। कुर्यात्। आशिषि क्रियात्। कृषीष्ट।

ऋणु गतौ। अत्रापि क्षिणुवद् मतभेदाल्लघूपधगुणतदभावौ, तदाह ऋणोति, अर्णोतीति। एवमग्रेऽपि। अर्ण्वन्तीति। 'इको यणचि' इति यणिति भावः। डु कृञ् करणे। करोतीति। उप्रत्ययमाश्रित्य ऋकारस्य गुणः रपरत्वम्। उकारस्य तु तिपमाश्रित्य गुणः। कुरुत इति। तसो ङित्त्वादुकारस्य न गुणः। कुरु अन्ति इति स्थिते आह यणिति। 'इको यणचि' इत्यनेनेति शेषः। उकारस्य यणि कुर्व् अन्ति इति स्थिते 'हलि च' इति दीर्घमाशङ्क्याह न भेति। वसि मसि च 'लोपश्चास्यान्यतरस्याम्-' इत्युकारलोपविकल्पे प्राप्ते नित्यं करोतेः। 'उतश्च प्रत्ययात्-' इत्यनुवर्तते, 'लोपश्चास्यान्यतरस्याम्-' इत्यतो लोपः, म्वोरिति च, तदाह करोतेरिति। चकर्थेति। 'कृसृभृवृ-' इति नेडिति भावः। अजन्तत्वेऽपि ऋदन्तत्वाद् भारद्वाजमतेऽपि नेट्। करिष्यतीति। करोतु, कुरुतात्। कुरु। करवाणि। कुरुताम्। कुर्वाताम्। करवै करवावहै करवामहै। अकरोत् अकुरुताम्। अकुरुत अकुर्वाताम्। विधिलिङि कुरु यात् इति स्थिते ये च। 'लोपश्चास्यान्यतरस्याम्-' इत्यतो लोप इति अस्येति चानुवर्तते। अस्येत्यनेन पूर्वसूत्रे उत इत्युपात्तः उत्परामृश्यते। 'नित्यं करोतेः' इत्यतः करोतेरित्यनुवर्तते। अङ्गाक्षिप्तः प्रत्ययो यकारेण विशेष्यते तदादिविधिः, तदाह कृञ उलोप इति। आशिषि क्रियादिति। 'रिङ् शयग्लिङ्क्षु' इति रिङिति भावः। कृषीष्टेति। 'उश्च' इति कित्त्वान्न गुण

हिंसायाम्। क्षिणु च। इमावपि लाक्षणिकणकारौ। तेन क्षिणन्ति। क्षेणन्ति

अकार्षीत्। 'तनादिभ्यः–' (सू २२४७) इति लुकोऽभावे 'ह्रस्वादङ्गात्' (सू २३६१) इति सिचो लोपः। अकृत। अकृथाः। **२५५० संपरिभ्यां करोतौ भूषणे। (६-१-१३७)। २५५१ समवाये च। (६-१-१३८)** संपरिपूर्वस्य करोतेः सुट् स्याद् भूषणे संघाते चार्थे। संस्करोति। अलंकरोतीत्यर्थः। संस्कुर्वन्ति। सङ्घीभवन्तीत्यर्थः। संपूर्वस्य क्वचिदभूषणेऽपि सुट्। 'संस्कृतं भक्षाः' (सू १२१७) इति ज्ञापकात्। 'परिनिविभ्यः–' (सू २२७९) इति षः। परिष्करोति। 'सिवादीनां वा–' (सू २३५१)। पर्यष्कार्षीत्, पर्यस्कार्षीत्। **२५५२ उपात्प्रतियत्नवैकृतवाक्याध्याहारेषु च। (६-१-१३९)** उपात्कृञः सुट् स्यादेष्वर्थेषु। चात्प्रागुक्तयोरर्थयोः। प्रतियत्नो गुणाधानम्। विकृतमेव वैकृतं विकारः। वाक्यस्याध्याहारः आकाङ्क्षितैकदेशपूरणम्। उपस्कृता कन्या। अलङ्कृतेत्यर्थः। उपस्कृताः ब्राह्मणाः। समुदिता इत्यर्थः। एधोदकस्योपस्कुरुते गुणाधानं करोतीत्यर्थः। उपस्कृतं भुङ्क्ते। विकृतमित्यर्थः। उपस्कृतं ब्रूते। वाक्याध्याहारेण ब्रूते इत्यर्थः। **२५५३ सुट्कात्पूर्वः। (६-१-१३५)**

इति भावः। **अकार्षीदिति**। सिचि वृद्धौ रपरत्वमिति भावः। ननु लुङस्तावि अकृ स् त इति स्थिते 'तनादिभ्यस्तथासोः' इति सिचो लुकि अकृतेतीष्टं सिध्यति। सिचो लुगभावे तु सकारः श्रूयेतेत्यत आह **तनादिभ्य इत्यादि। संपरिभ्याम्। समवाये च। करोतेः सुट् स्यादिति**। 'सुट् कात्पूर्वः' इत्यतो 'नित्यं करोतेः' इत्यतश्च तदनुवृत्तेरिति भावः। **प्रागुक्तयोरिति**। भूषणसमवाययोरित्यर्थः। ननु 'संपरिभ्याम्–' इति सुट् पदद्वयापेक्षत्वाद् बहिरङ्गः। 'लिटि धातोः–' इति द्वित्वं तु प्रकृतिप्रत्ययमात्रापेक्षत्वादन्तरङ्गम्। ततश्च संचस्कार इत्यत्र परमपि सुटं बाधित्वा द्वित्वे कृते अभ्यासात्प्रागेव सुटि प्राप्ते **सुट् कात्पूर्वः**। षष्ठस्याद्यपादे इदं सूत्रम्। 'संपरिभ्यां करोतौ भूषणे' 'समवाये च' 'उपात्प्रतियत्न–' इत्यारभ्य 'अनुदात्तं पदमेकवर्जम्' इत्यतः प्रागिदमधिकृतं वेदितव्यमित्यर्थः। एवं च कात्पूर्वं इत्युक्तेरभ्यासात् प्राग् न सुडिति भावः। नन्वभ्यासेन व्यवधानात्कथमिह उत्तरखण्डस्य सुट्। संस्करोतीत्यादौ अव्यवहिते सुड्विधिश्चरितार्थत्वात्। किं च समस्करोत् इत्यत्र अटा व्यवधानात् कथं सुट्। नह्यडागमः कृञ्भक्तः अङ्गभक्तत्वात्। विकरणान्तस्यैवाङ्गत्वा-

---

इत्यत्रानुस्वारपरसवर्णौ। **सिचो लोप इति**। न चास्मिन्पक्षे प्रत्ययलक्षणप्रवृत्त्या अकृतेत्यत्र गुणः स्यादिति वाच्यम्, 'उश्च' इति सिचः कित्त्वेन तन्निषेधात्। 'संपर्युपेभ्यः–' इति वृत्तिस्थपाठं विहाय भाष्यवार्तिकानुसारेणाह **संपरिभ्यामिति**।

इति तत्त्वबोधिन्यां तनादिप्रकरणम्।

'अडभ्यासव्यवायेऽपि' इत्युक्तम् । संचस्कार 'कात्पूर्वः' इत्यादि भाष्ये प्रत्याख्यातम् । तथा हि 'पूर्वं धातुरुपसर्गेण युज्यते' । अन्तरङ्गत्वात्सुट् । ततो द्वित्वम् । एवं च 'ऋतश्च संयोगादेर्गुणः' (सू २३७१) संचस्करतुः । 'कृसृभृवृ-' (सू २२९३) सूत्रे 'ऋतो भारद्वाजस्य' (सू २२९६) इति सूत्रे च 'कृञोऽसुट इति वक्तव्यम्' (वा ४४०१) । तेन ससुट्कात्परस्येट् । संचस्करिथ । सचस्करिव । 'गुणोऽर्ति-' (सू २३८०) इति सूत्रे 'नित्यं छन्दसि' (सू ३५८७) इति सूत्राद् नित्यम् इत्यनुवर्तते । नित्यं यः संयोगादिस्तस्येत्यर्थात् सुटि गुणो न । संस्क्रियात् । 'ऋतश्च संयोगादेः' (सू २५२६) इति लिङ्सिचोर्नेट् । 'एकाच उपदेशे-' (सू २२४६) इति सूत्रात् उपदेशे इत्यनुवर्त्य उपदेशे यः संयोगादिः इति व्याख्यानात् । संस्कृषीष्ट समस्कृत समस्कृषाताम् ।

॥ इति तिङन्ते तनादिप्रकरणम् ॥

अथ तिङन्ते क्र्यादिप्रकरणम् ॥ ५१ ॥

डु क्रीञ् १४७३ द्रव्यविनिमये २५५४ क्र्यादिभ्यः श्ना । (३-१-८१)

दित्यत आह अडभ्यासव्यवायेऽपीत्युक्तमिति । वार्तिकमिति शेषः । अटा अभ्यासेन च व्यवधानेऽपि संपर्यादिभ्यः परस्मात् कात्पूर्वः सुडित्यर्थः । इत्यादीति । सुट् इत्येवाधिकृतमस्तु 'कात्पूर्वः' इति 'अडभ्यासव्यवायेऽपि' इति च मास्त्वित्येवं भाष्ये प्रत्याख्यातमित्यर्थः । तदेवोपपादयितुं प्रतिजानीते तथा हीति । पूर्वं धातुरुपसर्गेण युज्यते इति । पश्चात्साधनेनेति शेषः । ततश्च पूर्वोपनिपतितधातूपसर्गसम्बन्धनिमित्तकं कार्यं पश्चादनुपतिष्यद्धातुप्रत्ययसंबन्धनिमित्तकात्कार्यादन्तरङ्गम् , प्रथमोपस्थितत्वात् । तदुक्तं भाष्ये—'पूर्वं धातुरुपसर्गेणेति कृत्वा धातूपसर्गयोः कार्यमन्तरङ्गम्' इति । तदाह अन्तरङ्गत्वात्सुट् । ततो द्वित्वमिति । तथा सुटि कृते स्कृ इत्यस्य द्वित्वे उरदत्वे रपरत्वे 'शर्पूर्वाः खयः' इति रेफसकारयोर्निवृत्तौ अभ्यासचुत्वे संचस्कारेति रूपसिद्धेः 'कात्पूर्वः' इति 'अडभ्यासव्यवायेऽपि' इति च न कर्तव्यमिति भावः । एवं समस्करोदित्यत्रापि विकरणान्ताङ्गभक्ताडागमापेक्षया अन्तरङ्गत्वात् प्रथमं सुड् भविष्यतीति कृत्वा अड्व्यवायेऽपीत्यंशो न कर्तव्य इत्यूह्यम् । पूर्वं धातुरुपसर्गेणेत्याश्रयणे फलान्तरमप्याह एवं चेति । उक्तरीत्या अन्तरङ्गत्वात् सुटि कृते संस्कृ इत्यस्माल्लिटः अतुसि 'ऋतश्च संयोगादेर्गुणः' इति गुणे संचस्करतुरिति सिध्यति । 'पूर्वं धातुः साधनेन युज्यते' इत्याश्रयणे तु चकतुरिति परिनिष्ठितस्य समित्युपसर्गयोगात्संयोगादित्वाभावाद् गुणस्यासिद्धिरिति भावः । ननु संचस्करिव, संचस्करिथ इत्यत्र च 'कृसृभृवृ-' इति 'ऋतो भारद्वाजस्य'

क्रीणादि। 'ई हल्यघोः' (सू २४१७) क्रीणीतः । ईत्वात्पूर्वं झेरन्तादेशः। परत्वान्नित्यत्वादन्तरङ्गत्वाच्च । एवं झस्य अन्भावः ततः 'श्नाभ्यस्तयोः-' (सू २४८३) इत्याल्लोपः। क्रीणन्ति । क्रीणीते क्रीणाते क्रीणते। चिक्राय चिक्रियतुः। चिक्रयिथ, चिक्रेथ । चिक्रियिव । चिक्रियिषे । क्रेता । क्रेष्यति । क्रीयात्। क्रेषीष्ट। अक्रैषीत्। अक्रेष्ट। प्रीञ् १४७४ तर्पणे कान्तौ च। कान्तिः कामना। प्रीणाति। प्रीणीते। श्रीञ् १४७५ पाके । मीञ् १४७६ हिंसायाम्। 'हिनुमीना' (सू २२३०)। प्रमीणाति प्रमीणीतः । 'मीनातिमिनोति-' (सू २५०८) इत्येज्विषये आत्वम्। ममौ मिम्यतुः। ममिथ, ममाथ। मिम्ये। माता। मास्यति। मीयात्। मासीष्ट। अमासीत् अमासिष्टाम्। अमास्त। षिञ् १४७७ बन्धने। सिनाति। सिनीते। सिषाय। सिष्ये । सेता। स्कुञ् १४७८ आप्रवणे। २५५५ स्तन्भुस्तुन्भुस्कन्भुस्कुन्भुस्कुञ्भ्यः श्नुश्च। (३-१-८२) चात् श्ना। स्कुनोति। स्कुनुते। स्कुनाति। स्कुनीते। चुस्काव। चुस्कुवे। स्कोता। अस्कौषीत्। अस्कोष्ट। स्तन्भ्वादयश्चत्वारः सौत्राः । सर्वे रोधनार्थाः

इति च इण्निषेधः स्यादित्यत आह **कृसृभृवृ सूत्रे इत्यादि**। नन्वाशीर्लिङि संस्क्रिषीष्टेत्यत्र 'गुणोऽर्तिसंयोगाद्योः' इति गुणः कुतो नेत्यत आह **गुणोऽर्तीत्यादि**। ननु तर्हि संस्कृषीष्ट इति लिङि, समस्कृत समस्कृषाताम् इति लुङि च 'ऋतश्च संयोगादेः' इति इट् कुतो नेत्यत आह **ऋतश्चेत्यादि**।

इति श्रीवासुदेवदीक्षितविदुषा विरचितायां सिद्धान्तकौमुदीव्याख्यायां बालमनोरमाख्यायां उविकरणनिरूपणं समाप्तम्।

अथ श्नाविकरणधातवो निरूप्यन्ते। **डु क्रीञिति। क्र्यादिभ्यः श्ना।** कर्त्रर्थे सार्वधातुके परे क्र्यादिभ्यः श्नाप्रत्ययः स्यात् स्वार्थे इत्यर्थः। शपोऽपवादः। **क्रीणातीति**। श्नाप्रत्ययस्य अपित्सार्वधातुकत्वेन ङित्त्वादीकारस्य न गुण इति भावः। **ई हल्यघोरिति**। हलादौ क्ङिति सार्वधातुके ईत्वमिति भावः। क्री णा झि इति स्थिते 'ई हल्यघोः' इति ईत्वमाशङ्क्याह **ईत्वात्पूर्वमिति**। **नित्यत्वादिति**। अकृते कृते च ईत्वे अन्तादेशस्य प्रवृत्तेरिति भावः। **एवं झस्येति**। क्री णा झ इति स्थिते 'आत्मनेपदेष्वनतः' इत्यदादेशोऽपि ईत्वात्पूर्वमित्यर्थः। **तत इति**। अन्तादेशाददादेशाच्च पश्चादित्यर्थः। अजादौ क्ङिति सार्वधातुके श्नाप्रत्ययस्य आल्लोपः। भारद्वाजनियमात्थलि वेडिति मत्वाह **चिक्रयिथ, चिक्रेथेति। चिक्रियिवेति**। क्रादिनियमादिडिति भावः। क्रीणातु। क्रीणीहि।

एवं झस्याद्भाव इति। 'आत्मनेपदेष्वनतः' इत्यनेन। **सौत्रा इति**।

इत्येके । माधवस्तु प्रथमतृतीयौ स्तम्भार्थौ, द्वितीयो निष्कोषणार्थश्चतुर्थो धारणार्थ इत्याह । सर्वे परस्मैपदिनः । नलोपः । विष्टभ्नोति, विष्टभ्नाति । अवष्टभ्नोति, अवष्टभ्नाति । अवतष्टम्भ । 'जृस्तम्भु-' (सू २२६१) इत्यङ् वा । व्यष्टभत् । व्यष्टम्भीत् । स्तुभ्नोति । स्तुभ्नाति । २५५६ वेः स्कभ्नातेर्नित्यम् । (८-३-७७) वेः परस्य स्कभ्नातेः सस्य षः स्यात् । विष्कभ्नोति । विष्कभ्नाति । स्कुभ्नोति, स्कुभ्नाति । २५५७ हलः श्नः शानज्झौ । (३-१-८३) हलः परस्य श्नः शानजादेशः स्याद्धौ परे । स्तभान । स्तुभान । स्कभान । स्कुभान । पक्षे स्तुभ्नुहि इत्यादि । युञ् १४७९ बन्धने । युनाति । युनीते । योता । क्नूञ् १४८० शब्दे । क्नूनाति । क्नूनीते । क्नविता । द्रूञ् १४८१ हिंसायाम् । द्रूणाति । द्रूणीते । पूञ् १४८२ पवने । २५५८ प्वादीनां ह्रस्वः । (७-३-८०) शिति परे । पुनाति । पुनीते । पविता । लूञ् १४८३ छेदने । लुनाति । लुनीते । स्तॄञ् १४८४ आच्छादने । स्तृणाति । स्तृणीते । तस्तार तस्तरतुः । स्तरिता, स्तरीता । स्तृणीयात् । स्तृणीत । आशिषि स्तीर्यात् । 'लिङ्सिचो – (सू २२२८)

अक्रीणात् । अक्रीणीत । क्रीणीयात् । क्रीणीत । **सौत्रा इति** । नोपधा इत्यपि ज्ञेयम् । **नलोप इति** । 'अनिदिताम्–' इत्यनेनेति भावः । **विष्टभ्नोतीति** । 'स्तम्भेः' इति षत्वम् । **अवष्टभ्नोतीति** । 'अवाच्चालम्बना वदूर्ययोः' इति षत्वम् । **अवतष्टम्भेति** । 'स्थादिष्वभ्यासेन–' इति षत्वम् । **व्यष्टभदिति** । 'प्राक्सितात्–' इति षत्वम् । **स्तभानेति** । श्नाप्रत्ययस्य शानजादेशे कृते 'अतो हेः' इति लुक् । **प्वादीनां ह्रस्वः** । 'ष्ठिवुक्लमुचमाम्–' इत्यतः शितीत्यनुवर्तते इत्यभिप्रेत्य शेषं पूरयति **शिति परे इति** । **पवितेति** । ऊकारान्तत्वात् सेडिति भावः । **स्तॄञ् आच्छादने** । सेट् । **तस्तरतुरिति** । कित्त्वेऽपि 'ऋच्छत्यॄताम्' इति

नकारोपधा इत्यपि ज्ञेयाः । **विष्टभ्नोतीति** । 'अनिदिताम्–' इति नलोपः । 'स्तम्भेः' इति षत्वम् । **वेः स्कभ्नातेर्नित्यम्** । 'सिवादीनां वा' इत्यतो वेति नानुवर्तते इति ध्वननार्थमिह नित्यग्रहणम् । **विस्कभ्नोतीति** । स्कभ्नातेरित्यत्र श्नाविशिष्टं रूपं न विवक्षितं किं तु धातुमात्रम् । अन्यथा विष्कम्भिता विष्कम्भितमित्यादावपि षत्वं न स्यात् । न चेष्टापत्तिः, माधवादिग्रन्थविरोधादिति भावः । **हलः श्नः** । **स्तभानेति** । 'अतो हेः' इत्यारम्भसामर्थ्यात्सांनिपातपरिभाषया अप्रवृत्तेर्हेर्लुक् । अतएव जहीत्यत्र हिलोपवारणायेयं परिभाषा नोपन्यस्तेत्याहुः । यत्तु केश्चित् शानजादेशो धातुपाठपठितेभ्यः परस्य श्नो भवति न तु सौत्रेभ्य इति व्याख्याय स्तभ्नीहीत्युदाहृतं तन्निष्प्रमाणं माधवादिग्रन्थविरुद्धं च । **प्वादीनां ह्रस्वः** ।

इति वेट्। 'न लिङि' (सू २२२१)। स्तरिषीष्ट। 'उश्च' (सू २३६८) इति कित्त्वम्। स्तीर्षीष्ट। 'सिचि च परस्मैपदेषु' (सू २३६२) इति न दीर्घः। अस्तारीत् अस्तारिष्टाम्। अस्तरीष्ट, अस्तरिष्ट, अस्तीर्ष्ट। कॄञ् १४८५ हिंसायाम्। कृणाति। कृणीते। चकार। चकरे। वॄञ् १४८६ वरणे। वृणाति वृणीते। ववार। ववरे। वरिता, वरीता। आशिषि 'उदोष्ठ्यपूर्वस्य' (सू २४९४)। वूर्यात्। वरिषीष्ट, वूर्षीष्ट। अवारीत् अवारिष्टाम्। अवरिष्ट, अवरीष्ट, अवूर्ष्ट। धूञ् १४८७ कम्पने। धुनाति। धुनीते। दुधविथ, दुधोथ। दुधुविव। धविता, धोता। 'स्तुसुधूञ्भ्यः–' (सू २३८५) इतीट्। अधावीत्। अधविष्ट, अधोष्ट।

अथ बध्नात्यन्ताः परस्मैपदिनः। शॄ १४८८ हिंसायाम्। 'शॄदॄप्रां ह्रस्वो

गुणः। स्तरिता, स्तरीतेति। 'वृतो वा' इति दीर्घविकल्पः। आशिषि स्तीर्यादिति। 'ॠत इद्धातोः' इति इत्त्वे रपरत्वे 'हलि च' इति दीर्घः। स्तॄ षीष्ट इति स्थिते आह लिङ्सिचोरिति वेडिति। 'वृतो वा' इति दीर्घविकल्पनिषेधसूत्रं स्मारयति। न लिङीति। वृत इटो दीर्घो नेत्यर्थः। इडभावपक्षे स्तॄषीष्ट इत्यत्र गुणमाशङ्क्याह उश्चेति कित्त्वमिति। लुङि परस्मैपदे सिचि अस्तारिष्टाम् इत्यत्र 'वृतो वा' इति इटो दीर्घविकल्पे प्राप्ते आह सिचि चेति। अस्तरीष्ट, अस्तरिष्टेति। 'वृतो वा' इति दीर्घः। अस्तीर्ष्टेति। 'लिङ्सिचोः–' इति इडभावपक्षे ॠत इत्त्वे 'हलि च' इति दीर्घ इति भावः। कॄञ् हिंसायाम्। चकरे इति। 'ऋच्छत्यॄताम्' इति गुणः। वॄञ् वरण इति। आशिषीति। वॄ यात् इति स्थिते 'उदोष्ठ्यपूर्वस्य' इति ॠकारस्य उत्त्वमित्यर्थः, तत्र दन्त्योष्ठ्यपूर्वस्यापि ग्रहणादिति भावः। ॠत उत्त्वे रपरत्वे 'हलि च' इति दीर्घ इति बोध्यम्। वरिषीष्ट, वूर्षीष्टेति। 'लिङ्सिचोः–' इति वेट्। इडभावे 'उश्च' इति कित्त्वाद् गुणाभावे उत्त्वे रपरत्वे 'हलि च' इति दीर्घ इति भावः। अवारिष्टामिति। 'सिचि च–' इति इटो न दीर्घ इति भावः। अवरिष्ट, अवरीष्टेति। 'वृतो वा' इति सिच इटो दीर्घविकल्प इति भावः। दुधविथ, दुधोथेति। 'स्वरतिसूतिसूयतिधूञूदितः–' इति वेडिति भावः। शॄ हिंसायाम्। सेट्। णलि शशार। शॄ अतुस् इत्यत्र कित्त्वेऽपि 'ऋच्छ-

---

'ष्ठिवुक्लमुचमाम्–' इत्यतः शितीत्यनुवर्तत इत्याह शिति पर इति। न लिङीति। अनेन वृत इटो लिङि दीर्घो नेति स्मारितम्। उदोष्ठ्य। दन्तोष्ठ्योऽपि ओष्ठ्यग्रहणेन गृह्यत इत्याह वूर्यादिति। वरिषीष्टेति। 'लिङ्सिचोरात्मनेपदेषु' इति वेट्। अवूर्ष्टेति। 'उश्च' इति लिङ्सिचोः कित्त्वाद् गुणाभावे सत्युत्त्वम्। हलः। संप्रसारणस्येत्यनुवर्तते। अङ्गस्येत्यवयवषष्ठी। हल इति पञ्चमी तदेतदाह

वा' (सू २४६५) इति ह्रस्वपक्षे यण्। अन्यदा 'ऋच्छत्यृताम्'। (सू २३८३) इति गुणः। शश्रतुः, शशरतुः। 'श्र्युकः किति' (सू २३८१) इति निषेधस्य क्रादिनियमेन बाधः। शशरिथ, शश्रिथ। शरिता, शरीता। शृणीहि। शीर्यात्। अशारिष्टाम्। पॄ १४८९ पालनपूरणयोः। पप्रतुः, पपरतुः। आशिषि पूर्यात्। वॄ १४९० वरणे। भरणे इत्येके। भॄ १४९१ भर्त्सने। भरणेऽप्येके। मॄ १४९२ हिंसायाम्। मृणाति। ममार। दॄ १४९३ विदारणे। ददरतुः, दद्रतुः। दद्रुः। जॄ १४९४ वयोहानौ। झॄ इत्येके। धॄ इत्यन्ये। नॄ १४९५ नये। कॄ १४९६ हिंसायाम्। ॠ १४९७ गतौ। ॠणाति। अरांचकार। अरिता, अरीता। आर्यात् आर्यास्ताम्। ईर्यात्। आरीत् आरिष्टाम्। गॄ १४९८ शब्दे। ज्या १४९९ वयोहानौ। 'ग्रहिज्या–' (सू २४१२)। २५५९ हलः। (६–४–२) अङ्गावयवाद्धलः परं यत्संप्रसारणं तदन्ताङ्गस्य दीर्घः स्यात्। इति दीर्घे कृते। 'प्वादीनां ह्रस्वः' (सू २५२८)। जिनाति। जिज्यौ जिज्यतुः। री १५०० गतिरेषणयोः। रेषणं वृकशब्दः। ली १५०१ श्लेषणे। 'विभाषा लीयतेः' (सू १५०१) इत्येज्विषये आत्वं वा। ललौ, लिलाय। लाता, लेता। व्ली १५०२ वरणे। व्लिनाति। प्ली १५०३ गतौ। वृत्। ल्वादयो वृत्ताः। प्वादयोऽपीत्येके। व्री १५०४ वरणे। भ्री १५०५ भये। भरणे इत्येके। क्षीष् १५०६

त्यृताम्' इति नित्ये गुणे प्राप्ते आह **शृदॄप्रामिति**। गुणापवादे पाक्षिके ह्रस्वे कृते ऋकारस्य यणि रेफ इत्यर्थः। शशरिथ। पॄधातुरपि शॄधातुवत्। **आशिषि पूर्यादिति**। 'उदोष्ठ्यपूर्वस्य' इत्युत्वमिति भावः। **दॄ विदारणे**। 'शॄदॄप्राम्–' इति ह्रस्वविकल्पं मत्वाह **ददरतुः, दद्रतुरिति**। **ॠ गतौ**। **अरांचकारेति**। व्यपदेशिवत्त्वेन गुरुमत्त्वादाम्। लङ्याह **आर्णादिति**। **ज्या वयोहानौ**। अनिट्। ज्या ना ति इति स्थिते 'ग्रहिज्या–' इति संप्रसारणे पूर्वरूपे च जिनातीति स्थिते **हलः**। दिग्योगे पञ्चम्येषा। हलः परस्येति लभ्यते। 'संप्रसारणस्य' इति सूत्रमनुवर्तते। 'अङ्गस्य' इत्यधिकृतमिहानुवृत्तमावर्त्यते एकमवयवषष्ठ्यन्तं हल इत्यत्रान्वेति अङ्गावयवाद्धल इति लभ्यते। द्वितीयं तु स्थानषष्ठ्यन्तं संप्रसारणेन विशेष्यते। तदन्तविधिः। 'ढ्रूलोप–' इत्यतो दीर्घ इत्यनुवर्तते, तदाह **अङ्गावयवादित्यादिना**। उदाहरणं तु वीतः, शूनः, जीनः। 'हलः' इति किम्? उतः उतवान्। 'अङ्गावयवात्' किम्? निरुतम्। 'तदन्ताङ्गस्य' इति किम्? विध्यति।

अङ्गावयवादिति। अङ्गावयवात्किम्, निरुतम्। दुरुतम्। तदन्ताङ्गस्य किम्, विध्यति। **क्षीष् हिंसायाम्**। षित्त्वादङ्। क्षिया हेतिक्षियायाम्। क्षियाशीरित्यादौ

हिंसायाम्। एषां त्रयाणां ह्रस्वः। केषांचिन्मते तु न। ज्ञा १५०७ अवबोधने। 'ज्ञाजनोर्जा' (सू २५११) जानाति। दीर्घनिर्देशसामर्थ्यान्न ह्रस्वः। बन्ध १५०८ बन्धने। बध्नाति। बबन्धिथ, बबन्द्ध। बन्द्धा बन्द्धारौ। भन्त्स्यति। बधान। अभान्त्सीत्। 'पूर्वत्रासिद्धम्' (सू १२) इति भष्भावात्पूर्वं 'झलो झलि' (सू २२८१) इति सिज्लोपः। प्रत्ययलक्षणेन सादिप्रत्ययमाश्रित्य भष्भावो न। प्रत्ययलक्षणं प्रति सिज्लोपस्यासिद्धत्वात्। अबान्द्धाम्। अभान्त्सुः। वृङ् १५०९ संभक्तौ। वृणीते। वव्रे। वव्रृषे। वव्रृढ्वे। वरिता, वरीता। अव-

---

धूषामिति। मीश्रीधीषामित्यर्थः। ल्वादय एव वृत्ताः, न तु प्वादय इति मते इति भावः। ज्ञा अवबोधने। शिति जादेशं स्मारयति ज्ञाजनोर्जेति। दीर्घनिर्देशेति। प्वादित्वेऽपि आकारोच्चारणसामर्थ्यान्न ह्रस्व इति भावः। बन्ध बन्धने। अनिट्। नोपधः। बध्नातीति। 'अनिदिताम्–' इति नलोप इति भावः। भारद्वाजनियमात्थलि वेडिति मत्वाह बबन्धिथ, बबन्द्धेति। अकित्त्वान्नलोपो न। अनिट्पक्षे तु 'झषस्तथोः–' इति थस्य धः। बन्द्धेति। तासि 'झषस्तथोः–' इति तकारस्य धः। भन्त्स्यतीति। 'एकाचः–' इति बस्य भष्, धस्य चर्त्वेन तः। बधानेति। 'हलः श्नः शानज्झौ' इति शानच्। अभान्त्सीदिति। हलन्तलक्षणा वृद्धिः। भष्भावः। अबान्द्धामित्यत्र सकारपरकत्वाद् भष्भावमाशङ्क्याह पूर्वत्रेत्यादि। ननु कृते सिज्लोपे प्रत्ययलक्षणमाश्रित्य सकारपरकत्वाद् भष् दुर्वार इत्यत आह प्रत्ययलक्षणेनेति। अबान्द्धामिति। 'झषस्तथोः–'

क्षिया धर्मव्यतिक्रम आचारभेद इति वक्ष्यति। दीर्घनिर्देशसामर्थ्यादिति। ननु दीर्घग्रहणेनाऽकृतपरिभाषा ज्ञाप्यत इत्याकरे स्थितम्। अन्यथा ज्ञाजनोर्ज इति ब्रूयात्। 'अतो दीर्घो यञि' इति दीर्घसिद्धेः। तथा च दीर्घनिर्देशसामर्थ्यस्योपक्षयात्कथमिह ह्रस्वाभावसिद्धिरिति चेत्। अत्राहुः—ह्रस्वाभावे सत्येव दीर्घनिर्देश उक्तपरिभाषाया ज्ञापकः। सति तु ह्रस्वे पुनरङ्गकार्यं प्रवृत्तमेवेति न ज्ञापकः। तथा च ह्रस्वाभावसिद्धौ न किंचिद्बाधकमिति। किं च 'अङ्गवृत्ते पुनरङ्गवृत्तावविधिः' इत्येव परिभाषाशरीरम्। तच्चोक्तज्ञापकात्सिद्धम्। यदि तु 'भ्यसो भ्यम्' इति सूत्रे भाष्ये परिनिष्ठितस्येत्येव पाठस्तर्हि स्वतन्त्रमेवेदं वचनं न तु ज्ञापकसिद्धमिति पक्षोऽपि युष्मदस्मच्छब्दगतमनोरमाग्रन्थादवगम्यते। तस्मिंस्तु पक्षे दीर्घग्रहणसामर्थ्यं नोपक्षीणमिति सम्यगेवायं ग्रन्थ इति। केचित्तु संज्ञापूर्वकविधेरनित्यत्वान्न ह्रस्व इति व्याख्येयमित्याहुः। बध्नातीति। 'अनिदिताम्–' इति नलोपः। अभान्त्सीदिति। 'वदव्रज–' इति वृद्धिः। भष्भावः। अबान्धामिति। 'झषस्तथोः–' इति तस्य धत्वम्।

रिष्ट, अवरीष्ट, अवृत । श्रन्थ १५१० विमोचनप्रतिहर्षयोः । इतः परस्मैपदिनः । श्रश्नाति । 'श्रन्थिग्रन्थि–' इत्यादिना कित्त्वपक्षे एत्त्वाभ्यासलोपावप्यत्र वक्तव्यौ इति हरदत्तादयः । श्रेथतुः श्रेथुः । इदं कित्त्वं पितामपीति सुधाकरमते श्रेथिथ । अस्मिन्नपि पक्षे णलि शश्राथ । उत्तमे तु शश्राथ, शश्रथेति माधवः । तत्र मूलं मृग्यम् । मन्थ १५११ विलोडने । श्रन्थ १५१२ ग्रन्थ १५१३ सन्दर्भे । अर्थभेदाच्छ्रन्थेः पुनः पाठः । रूपं तूक्तम् । कुन्थ १५१४ संश्लेषणे । संक्लेशे इत्येके । कुथ्नाति । चुकुन्थ । कुथ इति दुर्गः । चुकोथ । मृद १५१५ क्षोदे । मृद्नाति । ममर्द । मृड १५१६ च । अयं सुखेऽपि । मृडुस्वम् । मृड्णाति । गुध १५१७ रोषे । गुध्नाति । कुष १५१८ निष्कर्षे । कुष्णाति । कोषिता । २५६० निरः कुषः । (७-२-४६) निरः परात्कुषो वलादेरार्धधातुकस्य इड्वा स्यात् । निष्कोषिता, निष्कोष्टा । निरकोषीत्, निरकुक्षत् । क्षुभ १५१९ संचलने । 'क्षुभ्नादिषु च' (सू ७९२) । क्षुभ्नाति क्षुभ्नीतः । क्षोभिता । क्षुभाण । णभ १५२० तुभ १५२१ हिंसायाम् । नभ्नाति । तुभ्नाति । नभते तोभते इति शपि नभ्यति तुभ्यति इति श्यनि । क्लिशू १५२२ विबाधने । 'शात्' (सू ११२) इति श्चुत्वनिषेधः । क्लिश्नाति । क्लेशिता, क्लेष्टा । अक्लेशीत्, अक्लिक्षत् । अश १५२३ भोजने । अश्नाति । आश । उ ध्रस १५२४ उञ्छे । उकार इत् । ध्रस्नाति । उकारो धात्ववयव इत्येके । उध्रसांचकार । इष १५२५

इति तस्य धः । **श्रन्थ विमोचने । श्रन्थिग्रन्थीत्यादिनेति** । 'श्रन्थिग्रन्थिदम्भिस्वञ्जीनां लिटः कित्त्वं वा' व्याकरणान्तरेणेत्यर्थः । **अस्मिन्नपि पक्षे इति** । पितामपीदं कित्त्वमिति सुधाकरमतेऽपि प्रथमपुरुषणलि शश्राथ । उत्तमपुरुषणलि तु शश्राथ शश्रथ इति माधव आहेत्यर्थः । **तत्र मूलमिति** । कित्त्वपक्षे एत्त्वाभ्यासलोपावित्यारभ्य माधव इत्यन्तसन्दर्भे मूलं नास्तीत्यर्थः । संयुक्तहलमध्यस्थत्वादेवंविधवार्तिकादर्शनाच्चेति भावः । **कुष निष्कर्षे । निरः कुषः** । 'आर्धधातुकस्येड्वलादेः' इत्यनुवर्तते । 'स्वरतिसूति–' इत्यतो वेति च, तदाह **निरः परादिति । निरकुक्षदिति** । इडभावपक्षे 'शल–' इति क्स इति भावः । **अश भोजने । आशेति** । द्विहल्त्वाभावान्न नुडिति भावः ।

'झरो झरि' इति वा लोपः । वृङ् संभक्तौ । भक्तिर्भजनम् । **श्रन्थ । कित्त्वपक्ष इति** । श्रन्थिग्रन्थिदम्भिस्वञ्जीनां लिटः कित्त्वं वेति व्याकरणान्तरमित्युक्तत्वात् । **निरः कुषः** । 'स्वरति–' इति सूत्राद्वेत्यनुवर्तते 'आर्धधातुकस्येट्–' इत्यधिक्रियत एव, तदाह **वलादेरित्यादि** । निरः किम्, कोषिता । कोषितुम् । **निरकु-**

आभीक्ष्ण्ये। पौनःपुन्यं भृशार्थो वा आभीक्ष्ण्यम्। इष्णाति। 'तीषसह-' (सू २३४०) इत्यत्र सहिना साहचर्यादकारविकरणस्य तौदादिकस्यैव इषेर्ग्रहणं न तु इष्यतीष्णात्योरित्याहुः। एषिता। वस्तुतस्तु इष्णातेरपि इड्विकल्प उचितः। तथा च वार्तिकम्-'इषेस्तकारे श्यन्प्रत्ययात्प्रतिषेधः' (वा ४४३५) इति। विष १५२६ विप्रयोगे। विष्णाति। वेष्टा। प्रेष १५२७ प्लुष १५२८ स्नेहनसेवनपूरणेषु। प्रष्णाति। प्लुष्णाति। पुष १५२९ पुष्टौ। पोषिता। मुष १५३० स्तेये। मोषिता। खच १५३१ भूतप्रादुर्भावे। भूतप्रादुर्भावोऽतिक्रान्तोत्पत्तिः। खच्ञाति। वान्तोऽयमित्येके। २५६१ च्छ्वोः शूडनुनासिके च। (६-४-१९) सतुक्कस्य छस्य वस्य च क्रमात् श् ऊठ् एता-

इष आभीक्ष्ण्ये। तासि 'तीषसह-' इति इड्विकल्पमाशङ्क्याह तीषसहेत्यत्रेति। सहेति शपा निर्देशबलेन भौवादिक एव सहधातुरत्र निर्दिष्टः। तत्साहचर्यात् तौदादिकस्यैव इषेर्ग्रहणम्, अकारविकरणत्वसामान्यादिति भावः। इषेस्तकारे श्यन्प्रत्ययादिति। श्यन् प्रत्ययो यस्मादिति बहुव्रीहिः। श्यन्विकरणपठितादिषेस्तकारे परे 'तीषसह-' इति विधिर्नेत्यर्थः। इष्णातेस्तकारे इड्विकल्पः फलित इति भावः। प्रुष प्लुषेति। आद्यो दीर्घोपधः। पुष पुष्टौ। पोषितेति। अनिट्सु श्यन्विकरणस्यैव पुषेर्ग्रहणादयं सेडिति भावः। 'पुषादिद्युतादि-' इत्यत्र श्यन्विकरणपुषादेरेव ग्रहणादङ् न। खच भूतप्रादुर्भावे। अतिक्रान्तोत्पत्तिरिति। दशममासादौ उत्पत्तियोग्यस्य एकादशादिमासादिषूत्पत्तिरित्यर्थः। खच्ञातीति। नस्य श्चुत्वेन ञ इति भावः। वान्तोऽयमिति। 'खव भूतप्रादुर्भावे' इत्येवं दन्त्योष्ठ्यान्तमेके पठन्तीत्यर्थः। च्छ्वोः शूडनुनासिके च। च्छ् व् अनयोर्द्वन्द्वात् षष्ठीद्विवचनम्। छकारात्प्राक् तुकः श्चुत्वेन चकारस्य निर्देशः। शूठ् इति छेदः। श् ऊठ् अनयोः समाहारद्वन्द्वात् प्रथमा। चकारेण क्विझलोः क्ङितीत्यनुवर्तते, तदाह सतुक्कस्य इत्यादि। यथा विश्नः प्रश्नः,

द्यादिति। इडभावे कर्म। सहिना साहचर्यादिति। यद्यपि षह षुह चक्यर्थे इति दिवादिरपि सहिरस्ति तथापि सहेति शपा निर्देशाद् भौवादिकेनैव सहिना साहचर्यमित्याहुः। श्यन्प्रत्ययादिति। बहुव्रीहिरयम्। श्यन्प्रत्ययवत इषेस्तकारे परत इड्विकल्पप्रतिषेध इति वार्तिकार्थः। तथा च दैवादिकाद्विकल्पो नेति फलितम्। एवं च 'तीषसह-' इत्यत्र इष्णातेरपि ग्रहणमिति बोध्यम्। पोषितेति। अनिट्केषु पुष्येति श्यना निर्देशादयं सेडिति भावः। च्छ्वोः शूडनु। च्छ्वोरिति सतुक-

१ पुस्तकान्तरेषु तु सर्वत्र 'प्रुष' इति ह्रस्वोपधः पाठ एवोपलभ्यते।

वादेशौ स्तोऽनुनासिके क्वौ झलादौ च क्ङिति। खौनाति। चखाव। खविता। शानचः परत्वादूठि कृते हलन्तत्वाभावान्न शानच्। हेठ १५३२ च। च्छुरवम्। हेठ्याति। ग्रह १५३३ उपादाने। स्वरितेत्। 'ग्रहिज्या–' (सू २४१२)। गृह्णाति। गृह्णीते। २५६२ ग्रहोऽलिटि दीर्घः। (७-२-३७) एकाचो ग्रहेर्विहितस्येटो दीर्घः स्यान्न तु लिटि। ग्रहीता। लिटि तु जग्रहिथ। गृह्यात्।

विच्छधातोः प्रच्छधातोश्च औणादिके नङ्प्रत्यये अन्तरङ्गत्वात् 'छे च' इति तुकि कृते सति सतुकस्य छस्य शकार आदेशः। वकारस्य ऊठमुदाहरति **खौनातीति**। खव् ना ति इति स्थिते वकारस्य ऊठ्, ठकार इत्, 'एत्येधत्यूठ्सु' इति वृद्धिरिति भावः। खौनीतः खौनन्तीत्यादि। खव् ना हि इति स्थिते 'हलः श्नश्शानज्झौ' इति शान जादेशमाशङ्क्याह **शानचः परत्वादिति**। **हेठ चेति**। हेठधातुरपि भूत-प्रादुर्भावे वर्तते इत्यर्थः। **ग्रह उपादान इति**। अदुपधः। स्वरितेत्त्वादुभयपदी। क्किति ङिति च संप्रसारणं स्मारयति **ग्रहिज्येति**। **गृह्णाति, गृह्णीते इति**। श्ना-प्रत्ययस्य ङित्त्वादिकस्य संप्रसारणे पूर्वरूपमिति भावः। णलि द्वित्वे कृते 'लिट्यभ्या-सस्य–' इति संप्रसारणे उरदत्वे रपरत्वे हलादिशेषे अभ्यासचुत्वे उपधावृद्धिः। जग्राह। अतुसादौ क्ङिति परत्वाद् 'ग्रहिज्या–' इति संप्रसारणे कृते द्वित्वादि। जगृहतुः जगृहुः। जग्रहिथ जगृहथुः जगृह। जग्राह, जग्रह जगृहिव जगृहिम। जगृहे जगृहाते जगृहिरे। जगृहिषे जगृहाथे जगृहिढ्वे, जगृहिध्वे। जगृहे जगृहिवहे जगृ-हिमहे। **ग्रहोऽलिटि दीर्घः**। ग्रह इति दिग्योगे पञ्चमी। 'आर्धधातुकस्येट्–' इत्यत इडित्यनुवृत्तं षष्ठ्यन्तं विपरिणम्यते। 'एकाच उपदेशेऽनुदात्तात्' इत्यत एकाच इति च, तदाह **एकाच इत्यादि**। 'एकाचः' किम्? यङ्लुकि माभूत्। जाग्रहिता। 'विहितस्य' इति किम्? ग्राहितम्। णिलोपे कृते ग्रहधातोः परत्वेऽपि विहितत्वाभावादिटो न दीर्घः। न च णिलोपस्य स्थानिवत्त्वाद् न ग्रहधातोः पर इडिति वाच्यम्, दीर्घविधौ स्थानिवत्त्वनिषेधात्। अलिटि इत्यस्य फलमाह **लिटि तु जग्रहिथेति**। **गृह्यादिति**। आशीर्लिङि यासुटः किंत्वात्संप्रसारणमिति

स्यानुकरणम्। चुत्वेन तकारस्थाने चकार इत्याह **सतुकस्येति**। एवं च सूत्रे छका-रात्पूर्वं चकारो ज्ञेयः। सतुकस्य किम्, विच्छप्रच्छाभ्यां नङ्प्रत्यये छकारस्य शकारे कृते तुकोऽश्रवणं यथा स्यात्। अकृतव्यूहपरिभाषा त्वनित्या अस्मादेव सतुकग्रह-णात्। तेनातिक्रान्तो भवन्तमतिभवन्कानित्यादि सिद्धमित्याहुः। सूत्रस्थेन चशब्देन क्किझलोः क्ङितीत्यनुकृष्यत इत्याह **क्वावित्यादि**। ग्रहो लिटि दीर्घः। एकाचः

---

१ 'हिठ च' इति पुस्तकान्तरे पाठः।

ग्रहीषीष्ट। 'ह्ययन्त-' (सू २२११) इति न वृद्धिः। **अग्रहीष्टाम्। अग्रहीष्ट अग्रहीषाताम् अग्रहीषत**।

॥ इति तिङन्ते क्रयादिप्रकरणम् ॥

अथ तिङन्ते चुरादिप्रकरणम् ॥ ५२ ॥

चुर १५३४ स्तेये। **२५४३ सत्यापपाशरूपवीणातूलश्लोकसेनालोमत्वचवर्मवर्णचूर्णचुरादिभ्यो णिच्**। (३-१-२५) एभ्यो णिच् स्यात्। चूर्णान्तेभ्यः। 'प्रातिपदिकाद्धात्वर्थे-' (ग सू २०३) इत्येव सिद्धे तेषामिह

भावः। लिङस्तङ्याह **ग्रहीषीष्टेति**। 'ग्रहोऽलिटि-' इति दीर्घः। 'न लिङि' इति इटो दीर्घनिषेधस्तु न, तत्र वृत इत्यनुवृत्तेः। **अग्रहीष्टामिति**। 'ग्रहोऽलिटि-' इति दीर्घः। अग्रहीषु। अग्रहीरित्यादि। लुङस्तङ्याह **अग्रहीष्टेति**। 'ग्रहोऽलिटि-' इति दीर्घः। **अग्रहीषतेति**। अग्रहीष्ठाः इत्यादि सुगमम्।

इति श्रीवासुदेवदीक्षितविदुषा विरचितायां सिद्धान्तकौमुदीव्याख्यायां बालमनोरमाख्यायां श्नाविकरणनिरूपणं समाप्तम्।

अथ स्वार्थिकणिजन्ताः चुरादिधातवो निरूप्यन्ते। **चुर स्तेय इति**। रेफादकार उच्चारणार्थः, न त्वित्संज्ञकः, प्रयोजनाभावात्, 'णिचश्च' इति पदव्यवस्थाया वक्ष्यमाणत्वाच्च। एवमग्रेऽपि। **सत्याप**। सत्याप पाश रूप वीणा तूल श्लोक सेना लोमन् त्वच् वर्मन् वर्ण चूर्ण चुरादि एषां द्वन्द्वात्पञ्चमी, तदाह **एभ्यो णिच् स्यादिति**। कस्मिन्नर्थे इत्याकाङ्क्षायामाह **चूर्णान्तेभ्य इति**। सत्यादिभ्यः चूर्णान्तेभ्यो द्वादशभ्यः करोत्याचष्टे इत्याद्यर्थे 'प्रातिपदिकाद्धात्वर्थे बहुलम्' इति वक्ष्यमाणेन सिद्धमेवार्थनिर्देशनमित्यर्थः ननु तेनैव सिद्धत्वादिह चूर्णान्तानुक्रमणं व्यर्थमित्यत आह **तेषामिह ग्रहणं प्रपञ्चार्थमिति**। न च तेभ्यः स्वार्थे एव णिजिवधिरस्त्विति वाच्यम्, 'सत्यस्य तु कृञ्यापुग् निपात्यते।

किम्, जाग्रहिता। जाग्रहिष्यति। इत्यादौ यङ्लुकि माभूत्। विहितस्येति किम्, ग्राहितम्। न चात्र णिलोपस्य स्थानिवद्भावाद् ग्रहेः परत्वं नेति वाच्यम्। दीर्घविधौ स्थानिवत्त्वनिषेधात्। त्रैपादिकदीर्घविधावेव स्थानिवत्त्वनिषेध इत्यभ्युपगमे तु विहिते विशेषणं व्यर्थमेवेत्याहुः। प्रकृतस्येटो ग्रहणाद् ग्राहिता ग्राहिष्यत इत्यादौ चिण्वदिटो न दीर्घः। **ग्रहिषीष्टेति**। वृत इत्यनुवृत्तेः 'न लिङि' इति दीर्घनिषेधो न प्रवर्तते। **अग्रहीषातामिति**। लुङात्मनेपदद्विवचनम्।

इति तत्त्वबोधिन्यां क्रयादिप्रकरणम्।

सत्यापपाश। एतस्योदाहरणानि अग्रे नामधातुषु स्फुटीभविष्यन्तीति

ग्रहणं प्रपञ्चार्थम्। चुरादिभ्यस्तु स्वार्थे। 'पुगन्त–' (सू २१८९) इति गुणः। 'सनाद्यन्ताः–' (सू २३०४) इति धातुत्वम्। तिप्शबादि गुणायादेशौ। चोरयति। २५६४ णिचश्च। (१-३-७४) णिजन्तादात्मनेपदं स्यात्कर्तृगामिनि क्रियाफले। चोरयति, चोरयते। चोरयामास। चोरयिता। चोर्यात्। चोरयिषीष्ट। 'णिश्रि–' (सू २३११) इति चङ्। 'णौ चङि–' (सू २३१४) इति ह्रस्वः। द्वित्वम्। 'हलादिः शेषः' (सू २१७९)। 'दीर्घो लघोः' (सू २३१८) इत्यभ्यासदीर्घः। अचूचुरत्, अचूचुरत। चिति १५३५ स्मृत्याम्। चिन्तयति। अचिचिन्तत्। चिन्त इति पठितव्ये इदित्करणं णिचः पाक्षिकत्वे

सत्यं करोति सत्यापयति' इत्यादिभाष्यविरोधादिति भावः। नामधातुप्रकरणे सत्यादिचूर्णान्तानामुदाहरणानि मूल एव स्फुटीभविष्यन्ति। **चुरादिभ्यस्तु स्वार्थे इति**। अर्थान्तरस्यानिर्देशादिति भावः। अत्र 'धातोरेकाचः–' इत्यतो धातोरित्यनुवर्तते। चुरादिभ्यो धातुभ्यो णिजिति फलितम्। ततश्च णिच आर्धधातुकत्वं सिध्यति। अन्यथा धातोरिति विहितत्वाभावादार्धधातुकत्वं न स्यादिति बोध्यम्, तदाह **पुगन्तेति गुण इति**। णिचि कृते चुर् इ इति स्थिते णिच आर्धधातुकत्वात्तस्मिन् चकारादुकारस्य 'पुगन्तलघूपधस्य–' इति गुण इत्यर्थः। **णिचश्च**। 'अनुदात्तङितः–' इत्यत आत्मनेपदमिति 'स्वरितञितः कर्त्रभिप्राये क्रियाफले' इति चानुवर्तते। प्रत्ययग्रहणपरिभाषया णिजन्तादिति लभ्यते, तदाह **णिजन्तादित्यादिना। चोरयतीति**। चोरयिष्यति, चोरयिष्यते। चोरयतु, चोरयताम्। अचोरयत्, अचोरयत। चोरयेत्, चोरयेत। आशीर्लिङि परस्मैपदे आह **चोर्यादिति**। 'णेरनिटि' इति णिलोप इति भावः। आशीर्लिङि आत्मनेपदे आह **चोरयिषीष्टेति**। लुङ्याह **णिश्रीत्यादि। दीर्घो लघोरिति**। 'सन्वल्लघुनि–' इति सन्वद्भावविषयत्वादिति भावः। **चिति स्मृत्याम्। चिन्तयतीति**। इदित्वान्नुमि णिजन्तात्तिङ उत्पत्तिरिति भावः। ननु इदित्करणं मास्तु प्रक्रियालाघवात्। 'चिन्त स्मृत्याम्' इत्येवोच्यताम्। न च नलोपनिवृत्त्यर्थमिदित्वमिति वाच्यम्, चिन्तयति चिन्तयांचकार इत्यादौ णिचः क्ङित्त्वाभावादेव नलोपस्याप्रसक्तेः। न च णिजभावे आशीर्लिङि चिन्त्यादिति कर्मलकारे यकि चिन्त्यते

नास्माभिरुपपाद्यन्ते। त्वचशब्दोऽकारान्तः। **प्रपञ्चार्थमिति**। सत्यापग्रहणं तु आपुगर्थमिति ज्ञेयम्। अन्ये त्वाहुः—सापेक्षेभ्योऽपि णिजर्थमेषामुपादानम्। अन्यथा रमणीयं घटं करोतीत्यादाविव रमणीयं रूपयतीत्यादावपि णिज् न स्यादिति। **अचूचुरदिति**। अत्र प्राचा व्याख्यात्रा 'सन्वल्लघुनि–' इति सन्वद्भाव इत्युक्तं तद्भ्रमसात्।

लिङ्गम्। तेन चिन्त्यात्, चिन्त्यत इत्यादौ नलोपो न। चिन्तति। चिन्तेत्। एतच्च ज्ञापकं सामान्यापेक्षमित्येके। 'अत एकहल्-' (सू २२६०) इत्यत्र वृत्तिकृता जगाण जगणतुरित्युदाहृतत्वात्। विशेषापेक्षमित्यपरे। अत एव 'आ धृषाद्वा' (ग सू २०२) इत्यस्य न वैयर्थ्यम्। यत्रि १५३६ संकोचे। यन्त्रयति। यन्त्र इति पठितुं शक्यम्। यत्तु इदित्करणाद्यन्त्रतीति माधवेनोक्तं तच्चिन्त्यम्। एवं

इत्यत्र च नलोपनिवृत्त्यर्थमिदित्त्वमिति शङ्क्यम्। चुरादिणिचो नित्यत्वेन णिचं विना केवलात् चिन्त्यात् चिन्त्यते इति प्रयोगस्य शशशृङ्गायमाणत्वादित्यत आह **चिन्तेत्यादि**। **तेनेति**। पाक्षिकत्वेनेत्यर्थः। तथा च कदाचित् चिन्त्यात् चिन्त्यते इति प्रयोगस्य सत्त्वात् तत्र नलोपनिवृत्त्यर्थमिदित्करणमिति भावः। ननु तथापि यत्र नलोपप्रसक्तिस्तत्रैव चिन्त्यात् चिन्त्यते इत्यत्र णिज्विकल्पः स्यात्, नतु चिन्ततीत्यादौ, शपा व्यवधानेन तत्र नलोपस्याप्रसक्तेरित्याशङ्क्य ज्ञापकमिदं चिन्तधातुसामान्यापेक्षमित्यभिप्रेत्योदाहरति **चिन्तति। चिन्तेदिति**। ज्ञापकमिदं चुरादित्वसामान्यापेक्षमिति मतान्तरमाह **एतच्चेति**। ज्ञापकस्य चुरादित्वसामान्यापेक्षत्वे वृद्धसंमतिमाह **अत एकेति**। ज्ञापकस्य चितिधातुमात्रविषयकत्वे गणधातोः चौरादिकस्य जगणतुरित्युदाहरणानुपपत्तिः स्पष्टैवेति भावः। **विशेषापेक्षमिति**। चितिधातुमात्रविषयमित्यर्थः। इदमेव मतं युक्तमित्याह **अत एवेति**। सर्वस्यापि चुरादेर्णिज्विकल्पे सति 'आ धृषाद्वा' इति कतिपयचुराद्यन्तर्गणपठितानां णिज्विकल्पविधिवैयर्थ्यमिति भावः। **यत्रि सङ्कोचे**। **यन्त्रयतीति**। अकारस्य उपधात्वाभावान्न वृद्धिः। **अययन्त्रदिति**। अकारस्य गुरुत्वादलघुत्वाल्लघुपरकत्वाभावात् सन्वद्भावाभावाद् इत्त्वदीर्घौ न। एवमग्रेऽपि संयोगान्तधातूनां ज्ञेयम्। **पठितुं शक्यमिति**। नलोपाभावस्तु इदित्त्वस्य न फलम्, नकारस्य उपधात्वाभावादेव नलोपस्याप्रसक्तेरिति भावः। **तच्चिन्त्यमिति**। यन्त्र्याद् इत्यणिजन्ते

सन्वद्भावविषये हि जायमानो दीर्घः सन्वद्भावं नापेक्षत इति। **सामान्यापेक्षमिति**। सर्वेऽपि चुरादयो विकल्पेन णिचं लभन्त इत्येतदर्थकमित्यर्थः। न चैवम् 'आधृषाद्वा' इति व्यर्थमिति वाच्यम्, ज्ञापकसिद्धस्यासार्वत्रिकत्वात्। एवं चास्मिन्पक्षे आधृषीयाणामैच्छिको विकल्पः, अन्येषां तु शिष्टप्रयोगाद्व्यवस्थित इत्यर्थः। **जगाण। जगणतुरिति**। वृत्तौ चकाण चकणतुरिति प्रचुरः पाठस्तस्मिंस्तु पाठे नास्त्येव प्रकृतार्थसिद्धिः। केचित्तु णिजभावे गणयामासेत्यादिरूपाभावेऽपि गणधातोरदन्तत्वाद्गणामासेत्याभा भवितव्यमिति जगाणेत्यादिपाठश्चिन्त्य इत्याहुः। **न वैयर्थ्यमिति**। वैयर्थ्यशङ्कापि नेत्ययमेव पक्षो युक्त इति भावः। न च पूर्वोक्तपक्षस्य

कुद्रितन्त्रिमन्त्रिषु। स्फुडि १५३७ परिहासे। स्फुण्डयति। इदित्करणात्स्फुण्डति। स्फुटि इति पाठान्तरम्। स्फुण्टयति। लक्ष १५३८ दर्शनाङ्कनयोः। कुद्रि १५३९ अनृतभाषणे। कुन्द्रयति। लड १५४० उपसेवायाम्। लाडयति। मिदि १५४१ स्नेहने। मिन्दयति, मिन्दति। ओ लडि १५४२ उत्क्षेपणे। ओलण्डयति, ओलण्डति। ओकार इदित्येके। लण्डयति, लण्डति। उकारादिरयमित्यन्ये। उलण्डयति। जल। १५४३ अपवारणे। जल इत्येके। पीड १५४४ अवगाहने। पीडयति। **२५६५ भ्राजभासभाषदीपजीवमीलपीडामन्यतरस्याम्।** (७-४-३) एषामुपधाया ह्रस्वो वा स्याच्चङ्परे णौ। अपीपिडत्, अपिपीडत्। नट १५४५ अवस्पन्दने। अवस्पन्दनं नाट्यम्। श्रथ १५४६ प्रयत्ने। प्रस्थाने इत्येके। बध १५४७ संयमने। बाधयति। बन्ध इति

सत्यपि नकारस्य अनुपधात्वादेव लोपाप्रसक्त्या इत्त्वस्य प्रयोजनाभावादिति भावः। एवं 'कुद्रि अनृतभाषणे' 'तन्त्रि कुटुम्बधारणे' 'मन्त्रि गुप्तभाषणे' इति चुरादौ पठिष्यमाणेष्वपि इदित्त्वं त्यक्तुं शक्यमित्यर्थः। **लड उपसेवायाम्। लाडयतीति** णिचि अत उपधावृद्धिः। एवमग्रेऽपि ज्ञेयम्। अलीलडत्। **पीड अवगाहने। भ्राजभास।** 'णौ चङ्युपधाया ह्रस्वः' इत्यनुवर्तते, तदाह **एषामिति।** नित्ये उपधाह्रस्वे प्राप्ते विकल्पोऽयम्। ह्रस्वपक्षे लघुपरकत्वात्सन्वत्त्वादभ्यासदीर्घ इत्यभिप्रेत्याह **अपीपिडदिति।** अत्र उत्तरखण्डे ह्रस्वः, पूर्वखण्डे तु दीर्घः। ह्रस्वाभावपक्षे तु लघुपरकत्वाभावात् सन्वत्त्वविरहान्नाभ्यासदीर्घ इति मत्वाह **अपिपीडदिति।** अत्र उत्तरखण्डे दीर्घः, पूर्वखण्डे ह्रस्वः। **नट अवस्पन्दन इति।** अवस्पन्दनं नाट्यम्। नाटयति। अनीनटत्। **श्रथ प्रयत्ने।** श्राथयति। अशिश्रथत्। सन्वत्त्वविधौ अनेकहल्व्यवधानेऽपि लघुपरत्वं न विरुध्यते, 'अत्स्मृदृत्वर-'

शिथिलत्वे जगाण जगणतुरिति वृत्तिप्रयोगः कथं संगच्छतामिति शङ्क्यम्, भ्वादेराकृतिगणत्वात् तत्रत्यधातोस्तद्रूपसिद्धेः। **तच्चिन्त्यमिति।** यन्त्रितन्त्रिमन्त्र्यादिषु इकारो व्यर्थ एवं न तु ज्ञापनार्थः। तेषां संयोगान्तत्वात् यन्त्रतन्त्रमन्त्र इति नकारे पठितेऽपि 'अनिदिताम्-' इति लोपो न लभ्यते नकारस्यानुपधात्वात्। चिन्त्यादित्यत्र तु चिन्त स्मृत्यामिति नकारोपधपाठे नलोपः स्यादेवेति तद्वारणाय क्रियमाण इकारस्तु ज्ञापक इति भावः। **लड** स्नेहपूर्विका सेवोपसेव। लाडयति पुत्रम्। लडयोरभेदाल्लालयति। **ओकार इदित्येके इति।** ओदित्करणम् 'ओदितश्च' इति धातोरव्यवहितस्य निष्ठातकारस्य नत्वार्थमिति तद्बलान्नेडित्येके। लण्ड्णः। ओदिद्बलादिड्व्यवधानेऽपि नत्वमित्यन्ये। लण्डिनः। **पीड** अवगाहने। 'भ्राजभास-' इति

चान्द्रः । पॄ १५४८ पूरणे । पारयति । दीर्घोच्चारणं णिचः पाक्षिकत्वे लिङ्गम् । तद्धि सेट्कत्वाय । एवं च पृणातिपिपर्तिभ्यां परिता परीता इत्यादिसिद्धावपि परति, परतः इत्यादिसिद्धिः फलम् । ऊर्ज १५४९ बलप्राणनयोः । पक्ष १५५० परिग्रहे ।

इति इत्वापवादस्य अत्वस्य विधानाल्लिङ्गात् । अन्यथा अपप्रथदित्यादौ अनेकहल्व्यवधानाद् लघुपरत्वाभावादेव इत्वाप्रसक्त्या किं तेन । **पॄ पूरणे** । ननु ह्रस्वान्त एवायं धातुर्निर्दिश्यताम् । तावतैव पारयतीत्यादिसिद्धेः । न च णिजभावपक्षे परिता परिष्यतीत्यत्र इडर्थं दीर्घोच्चारणम् ऋदन्तत्वे अनिट्कत्वप्रसङ्गादिति वाच्यम्, चुरादिणिचो नित्यत्वेन ततो णिजभावस्य शशशृङ्गायमाणत्वादित्यत आह **दीर्घोच्चारणं णिचः पाक्षिकत्वे लिङ्गमिति** । पॄधातोरिति शेषः । णिचः पाक्षिकत्वे तु परितेत्यदौ पर्तेत्यादिवारणाय दीर्घोच्चारणमर्थवदिति भावः । ननु ह्रस्वान्तत्वेऽपि परितेत्यादौ इट् कुतो न स्यादित्यत आह **तद्धि सेट्कत्वायेति** । हि यतः तद् दीर्घोच्चारणं परितेत्यादौ सेट्कत्वार्थम् ऋदन्तत्वे तु इण्न स्यात्, 'ऊदॄदन्तैः' इत्यनिट्कारिकासु ऋदन्तस्य पर्युदासेन ऋदन्तस्यानिट्कत्वावगमादिति भावः । ननु पॄधातोः णिचः पाक्षिकत्वज्ञापकस्य किं फलम् । अविकरणश्नुविकरणपठिताभ्यामेव पॄधातुभ्यां परितेत्यादिसिद्धेरित्यत आह **एवं चेति** । उक्तरीत्या पॄधातोः णिचः पाक्षिकत्वे ज्ञापिते सतीत्यर्थः । **परतीति** । 'उदोष्ठ्यपूर्वस्य' इत्युत्वं तु न भवति । पराभ्यां गुणवृद्धिभ्यां बाधादिति भावः । **ऊर्जे बलेति** । 'सन्वल्लघुनि—' इति सूत्रं द्वेधा व्याख्यातं प्राक् । तत्र चङि 'न न्द्राः—' इति निषेधात्, जि इति णिजन्तस्य द्वित्वे उत्तरखण्डे चङ्परे णौ लघोरभावात् प्रथमव्याख्याने अभ्यासस्य तथाविधलघुपरकत्वविरहात् सन्वत्त्वविरहान्नाभ्यासदीर्घः, और्जिजत् । द्वितीयव्याख्याने तु चङ्परे णौ यदङ्गं ऊर्ज् इत्येतत् तदीयस्याभ्यासस्य चङमादाय वा णिचं लुप्तमादाय वा लघुपरकत्वादभ्यासस्य दीर्घः, और्जीजत् ।

ह्रस्वपक्षे सन्वद्भावविषयत्वाद् 'दीर्घो लघोः' इत्यभ्यासस्य दीर्घः । ह्रस्वाभावपक्षे तु न दीर्घ इत्याह **अपीपिडदित्यादि** । **पॄ** पूरणे । **दीर्घोच्चारणमित्यादि** । पारयतीत्यादिरूपाणि ह्रस्वोच्चारणेऽपि सिध्यन्तीति परतीत्याद्यर्थं दीर्घोच्चारणमित्यर्थः । अत्र वदन्ति—धातुपाठकृता पाणिनिना विशिष्यैव उदात्ता अनुदात्ताश्च पठिताः, न हि ऋकारान्ताः सेट्का इति । तेन परिभाषितं येनेत्थं तस्याशयः कल्प्येत । कविकल्पद्रुमे त्वस्य नित्यण्यन्तत्वमुक्तमिति । एवं चास्मिन्पक्षे दीर्घोच्चारणं व्यर्थमिति फलितम् । अन्ये तु दीर्घोच्चारणं परिता परीतेत्यादौ 'वॄतो वा' इति इटो दीर्घविकल्पार्थम् । ततश्च णिज्विकल्पः सिद्ध एवेति परतीत्यादिरूपमाहुः । **ऊर्ज** । ऊर्जयति-

वर्ण १५५१ चूर्ण १५५२ प्रेरणे । वर्ण वर्णने इत्येके । प्रथ १५५३ प्रख्याने । प्राथयति । 'नान्ये मितोऽहेतौ' इति वक्ष्यमाणत्वान्नास्य मित्त्वम् । २५६६ **अत्स्मृदृत्वरप्रथम्रदस्तॄस्पशाम् ।** (७-४-९५) एषामभ्यासस्याकारोऽन्तादेशः स्याच्चङ्परे णौ । इत्वापवादः । अपप्रथत् । पृथ १५५४ प्रक्षेपे । पर्थयति । २५६७ **उर्ऋत् ।** (७-४-७) उपधाया ऋवर्णस्य स्थाने ऋत्स्याद्वा चङ्परे णौ । इरारामपवादः । अपीपृथत्, अपपर्थत् । पथ इत्येके । पाथयति । षम्ब

एवमेव एवंजातीयकेषु द्रष्टव्यम् । **प्रथ प्रख्याने । प्राथयतीति ।** णिचि उपधावृद्धिरिति भावः । नन्वस्य घटादिकत्वेन मित्त्वाद्ध्रस्वः स्यादित्यत आह **नान्ये इति ।** ज्ञपादिपञ्चकव्यतिरिक्तचुरादिषु मित्त्वनिषेधादिति भावः । घटादिकस्य तु मित्त्वाद्धेतुमण्णिचि प्रथयतीत्येव भवति । न च चौरादिकस्यैव मित्त्वार्थं घटादावनुवादः किं न स्यादिति वाच्यम्, 'नान्ये मितोऽहेतौ' इति निषेधादित्यलम् । **अत्स्मृ । अभ्यासस्येति ।** 'अत्र लोपोऽभ्यासस्य' इत्यतस्तदनुवृत्तेरिति भावः । **चङ्परे णाविति ।** 'सन्वल्लघुनि–' इत्यतः चङ्परे इत्यनुवर्तते । चङ् परो यस्मादिति बहुव्रीहिः । अन्यपदार्थस्तथा णिरेवेति भावः । **इत्त्वेति ।** 'सन्यतः' इति इत्त्वस्यापवाद इत्यर्थः । **अपप्रथदिति ।** अत्र अत्त्वविधानादेव सन्वत्त्वविधौ अनेकहल्व्यवधानेऽपि लघुपरकत्वमिति विज्ञायते । अन्यथा येन नाव्यवधानन्यायाद् एकहल्व्यवधानस्यैवाश्रयाद् अत्र सन्वत्त्वविरहादेव इत्वाप्रवृत्त्या किं तेन । संयोगे परे गुरुत्वान्नाभ्यासदीर्घः । **पृथ प्रक्षेपे ।** ऋदुपधः । **पर्थयतीति ।** णिचि लघूपधगुणः, रपरत्वम् । **उर्ऋत् ।** ऋ इत्यस्य उरिति षष्ठ्यन्तं रूपम् । 'णौ चङ्युपधायाः–' इत्यनुवर्तते । 'जिघ्रतेर्वा' इत्यतो वेति, तदाह **उपधाया इति ।** ननु ऋकारस्य ऋकारविधिर्व्यर्थ इत्यत आह **इररारामपवाद इति ।** कृत संशब्दने । अचीकृतत् इत्यादौ 'उपधायाश्च' इति इत्त्वे रपरत्वे इर् प्राप्तः, अमीमृजदित्यत्र तु 'मृजेर्वृद्धिः' इत्यार् प्राप्तः, प्रकृतपृथधातौ तु चङि णिलोपे प्रत्ययलक्षणेन णिच्चमाश्रित्य लघूपधगुणे रपरत्वे अर् प्राप्तः, तेषामपवाद इत्यर्थः । **अपीपृथदिति ।** णिचमाश्रित्य प्राप्तं गुणं बाधित्वा ऋकारे, द्वित्वे, इरदत्त्वे, हलादिशेषे, सन्वत्त्वादित्वे, दीर्घे रूपमिति भावः । **अपपर्थदिति ।** ऋत्वाभावपक्षे

बलवान्भवति । जीवति वेत्यर्थः । **उर्ऋत् ।** 'जिघ्रतेर्वा' इत्यतो वेति वर्तते । **इररारामिति ।** ऋकारोपधे तु 'उपधायाश्च' इत्यचीकृतदित्यादौ इर् प्राप्तः, अमीमृजदित्यत्र मृजेर्वृद्धिरार् प्राप्तः, इतरेषाम् ऋदुपधानां गुणेन अपीपृथदित्यादावर् इति विवेकः नन्विह उरित्यनूद्यमानः सवर्णान् गृह्णाति, ऋदिति विधीयमानस्तु न

१२५५ सम्बन्धने । सम्बयति । अससम्बत् । शम्ब १२५६ च । अशशम्बत् । साम्ब इत्येके । भक्ष १२५७ अदने । कुट्ट १२५८ छेदनभर्त्सनयोः । पूरणे इत्येके । कुट्टयति । पुट्ट १२५९ चुट्ट १२६० अल्पीभावे । अट्ट १२६१ षुट्ट १२६२ अनादरे । अट्टयति । अयं दोपधः । ष्टुत्वस्यासिद्धत्वाद् 'न न्द्राः–' (सू २४४६) इति निषेधः । आट्टिटत् । लुण्ठ १२६३ स्तेये । लुण्ठयति । लुण्ठति इति 'लुठि स्तेये' इति भौवादिकस्य । शठ १२६४ श्वठ १२६५ असंस्कारगत्योः । श्वठि इत्येके । तुजि १२६६ पिजि १२६७ हिंसाबलादाननिकेतनेषु । तुञ्जयति । पिञ्जयति । इदित्करणात् तुञ्जति पिञ्जति । तुज पिज इति केचित् । लजि लुजि इत्येके । पिस १२६८ गतौ । पेसयति । पेसति इति तु शपि गतम् । षान्त्व १२६९ सामप्रयोगे । श्वल्क १२७० वल्क १२७१ परिभाषणे । ष्णिह १२७२ स्नेहने । स्फिट इत्येके । स्मिट १२७३ अनादरे । अषोपदेशत्वान्न षः । असिस्मिटत् । ष्मिङ् अनादरे इत्येके । ऊित्वस्यावयवेऽच-

---

द्विर्वचनेऽचीति निषेधाद् गुणात्प्राग् द्वित्वे उरदत्वे हलादिशेषे ऋकारस्य णिचमाश्रित्य गुणे रपरत्वे अपपर्थदित्यत्र लघुपरकत्वाभावेन सन्वत्त्वविरहादित्त्वदीर्घौ नेति भावः । **अट्ट षुट्ट अनादरे । अयं दोपध इति ।** अट्टधातुरित्यर्थः । दकारस्य ष्टुत्वचर्त्वाभ्यां निर्देश इति भावः । दोपधत्वस्य प्रयोजनमाह **ष्टुत्वस्येति ।** तथा च दकारं विहाय टि इत्यस्य द्वित्वे आद् दिटत् इति स्थिते दस्य ष्टुत्वे चर्त्वे च आट्टिटत् इति रूपमिष्टं सिध्यति । स्वाभाविकटोपधत्वे तु 'न न्द्राः–' इति निषेधाभावात् टकारद्वयसहितस्य णयन्तस्य द्वित्वे हलादिशेषेणाभ्यासे प्रथमटकारस्य अनिवृत्तौ आटिट्टदिति अनिष्टं रूपं स्यादिति भावः ।

गृह्णाति । तथा च अचीक्लृपदित्यत्र 'उर्ऋत्' इत्यनेन ऋवर्णे सति अचीकृपदिति प्रसज्येतेति चेत् । मैवम् । लत्वस्यासिद्धत्वेन प्रथमम् 'उर्ऋत्' इत्यस्य प्रवृत्तौ पश्चात् 'कृपो रो लः' इत्यनेन ऋकारैकदेशस्य लृकारैकदेशविधानादिष्टसिद्धेः । न च चलीक्लृप्यत इत्यादौ रीगागमादेर्लत्वार्थं 'कृपो रो लः' इत्यस्यावश्यकत्वेऽपि कृपूधातुः 'क्लृपू सामर्थ्ये' इत्येव पठ्यताम् । एवं हि प्रक्रियालाघवं लभ्यते । ऋकारैकदेशस्य लृकारैकदेश इति व्याख्यानक्लेशोऽपि न भवतीति वाच्यम् । अचीक्लृपदित्यत्र 'उर्ऋत्' इत्यस्य प्रवृत्तावनिष्टरूपप्रसङ्गात् । 'कृपो रो लः' इत्यनेन ऋकारैकदेशस्य लृकारैकदेश इत्यभ्युपगमे तु उक्तव्याख्यानक्लेशध्रौव्यात् । इदं च कैयटरीत्योक्तम् । नन्विदं चोद्यमम् 'ऋत उत्' इत्यनेन तपरकरणेन लृवर्णग्राहकत्वे रूपसिद्धेः स्पष्टत्वात् । **अयं दोपध इति ।** टोपधत्वे त्वाटिट्टदिति स्यादिति भावः । **शठ श्वठ ।** शाठयति ।

रितार्थत्वाण्णिजन्तात्तङ् । स्माययते । श्लिष १५७४ श्लेषणे । पथि १५७५ गतौ । पन्थयति, पन्थति । पिच्छ १५७६ कुट्टने । छदि १५७७ संवरणे । छन्दयति, छन्दति । श्रण १५७८ दाने । प्रायेणायं विपूर्वः । । विश्राणयति । तड १५७९ आघाते । ताडयति । खड १५८० खडि १५८१ कडि १५८२ भेदने । खाडयति । खण्डयति । कण्डयति । कुडि १५८३ रक्षणे । गुडि १५८४ वेष्टने । रक्षणे इत्येके । कुठि इत्यन्ये । अवकुण्ठयति, अवकुण्ठति । गुठि इत्यपरे । खुडि १५८५ खण्डने । वटि १५८६ विभाजने । वडि इत्येके । मडि १५८७ भूषायां हर्षे च । भडि १५८८ कल्याणे । छर्द १५८९ वमने । पुस्त १५९० बुस्त १५९१ आदरानादरयोः । चुद १५९२ संचोदने । नक्क १५९३ धक्क १५९४ नाशने । णोपदेशलक्षणे पर्युदस्तोऽयम् । प्रनक्कयति । चक्क १५९५ चुक्क १५९६ व्यथने । चक्ष १५९७ शौचकर्मणि । तक्ष १५९८ प्रतिष्ठायाम् । तुल १५९९ उन्माने । तोलयति । अतूतुलत् । कथं तुलयति तुलना इत्यादि । '–अतुलोपमाभ्यां–' (सू ६३०) इति निपातनादादन्तस्य तुलाशब्दस्य सिद्धौ ततो णिच् । दुल १६०० उत्क्षेपे । पुल १६०१ महत्त्वे । चुल १६०२ समुच्छ्राये । मूल १६०३ रोहणे । कल १६०४ विल १६०५ क्षेपे । बिल १६०६ भेदने । तिल १६०७ स्नेहने । चल १६०८ भृतौ । पाल १६०९ रक्षणे । लूप १६१०

ष्मिङ् अनादरे । ननु णिचश्चेत्यात्मनेपदसिद्धेः किमर्थं ङित्करणमित्यत आह **णिजन्तात्तङिति ।** तङेवेत्यर्थः । अकर्त्रभिप्रायेऽपि फले णिजन्तादात्मनेपदार्थं ङित्करणमिति यावत् । ननु कृतेऽपि ङित्करणे णिजन्तस्य ङित्त्वाभावात् कथमुक्तप्रयोजनलाभ इत्यत आह **ङित्त्वस्य अवयवे अचरितार्थत्वादिति ।** ण्यन्तावयवे ष्मिङ्धातौ ङित्त्वं व्यर्थम्, तस्य णिचं विना प्रयोगाभावात् । ततश्चावयवे श्रुतं ङित्त्वं ण्यन्तादेव कार्यं साधयतीत्यर्थः । **स्माययते इति ।** णिचि वृद्धौ आयादेशे स्मायि इति ण्यन्ताल्लटस्तिपि शपि गुणायादेशाविति भावः । असिष्मयत । **तुल उन्माने । कथमिति ।** लघूपधगुणप्रसङ्गादिति भावः । **तुलनेति ।** 'ण्यासश्रन्थो युच्' इति भावः । समाधत्ते **अतुलोपमाभ्यामिति । आदन्तस्येति ।** तुलधातोर्ण्यन्तात्पचाद्यचि निपातनाद् गुणाभावे स्त्रीत्वे तुलाशब्द आदन्तः । ततस्तन्करोति तदाचष्टे इति णिचि इष्ठवत्त्वात् टिलोपे तुलि इति ण्यन्ताल्लटस्तिपि युचि

असंस्कृतो भवति गच्छति वेत्यर्थः । **स्माययत इति ।** आत्वं तु नेह भवति । 'नित्यं स्मयतेः' इति निर्देशेन 'स्मिङ् ईषद्धसने' इति भौवादिकादेव हेतुमण्णौ तद्विधानात् । **श्रण दाने ।** विश्राणनं वितरणम् । **चुद संचोदने ।** 'ण्यासश्रन्थः–' इति

हिंसायाम्। शुल्ब १६११ माने। शूर्प १६१२ च। चुट १६१३ छेदने। मुट १६१४ संचूर्णने। पडि १६१५ पसि १६१६ नाशने। पण्डयति, पण्डति। पंसयति, पंसति। व्रज १६१७ मार्ग १६१८ संस्कारगत्योः। शुल्क १६१९ अतिस्पर्शने। चपि १६२० गत्याम्। चम्पयति, चम्पति। क्षपि १६२१ क्षान्त्याम्। क्षम्पयति, क्षम्पति। छजि १६२२ कृच्छ्रजीवने। श्वर्त १६२३ गत्याम्। श्वभ्र १६२४ च। ज्ञप १६२५ मिच्च। अयं ज्ञाने ज्ञापने च वर्तते।

२५६८ मितां ह्रस्वः। (६-४-९२) मितामुपधायाः ह्रस्वः स्याण्णौ परे। ज्ञपयति। यम १६२६ च परिवेषणे। चान्मित्। परिवेषणमिह वेष्टनम्। न तु

च तुलयतीति तुलनेति च रूपम्। आकारलोपस्य 'अचः परस्मिन्–' इति स्थानिवत्त्वान्न गुण इति भावः। **व्रज मार्गेति**। व्राजयति। मार्गयति। यद्वा। मार्गेति न धात्वन्तरम्। व्रजधातुर्मार्गसंस्कारे गतौ चेत्यर्थः। **ज्ञप मिच्चेति**। ज्ञपधातुर्णिचं लभते, मित्संज्ञश्चेत्यर्थः। मित्त्वकार्यभागिति वा। धातुपाठे अर्थनिर्देशाभावादाह **अयमिति**। प्रच्छ ज्ञीप्सायामित्यत्र ज्ञाने 'श्लाघह्नुङ्स्थाशपां ज्ञीप्स्यमानः' इत्यत्र ज्ञापने च प्रयोगदर्शनादिति भावः। **मितां ह्रस्वः**। 'ऊदुपधाया गोहः' इत्यत उपधाया इति 'दोषो णौ' इत्यतो णाविति चानुवर्तते, तदाह **मितामुपधाया इत्यादिना**। **ज्ञपयतीति**। णिचि उपधावृद्धौ ह्रस्व इति भावः। **यम च परिवेषणे**। **चान्मिदिति**। इति अनुकृष्यते इति शेषः। यमधातुः परिवेषणे णिचं लभते, मित्कार्यभाक् चेत्यर्थः। मित्संज्ञक इति वा। **परिवेषणमिह**

युचि चोदना। **व्रज मार्ग**। व्राजयति। मार्गयति। केचित्तु मार्गेति न धात्वन्तरं किं तु व्रजेत्येक एव धातुर्मार्गसंस्कारे गतौ चेति व्याचख्युः। **ज्ञप मिच्च**। चाद्गताविर्त्येके। ज्ञपधातुर्णिचं लभते मित्संज्ञकश्चेत्यन्ये। **ज्ञाने ज्ञापने चेति**। 'प्रतिपज्ज्ञप्तिचेतनाः'। प्रच्छ ज्ञीप्सायामित्यत्र ज्ञाने। 'श्लाघह्नुङ्–' इति सूत्रे ज्ञीप्स्यमानो बोधयितुमिष्यमाण इति व्याख्याया ज्ञापने च प्रयोगदर्शनादिति भावः। **वेष्टनमिति**। 'परिवेषस्तु परिधिः' इत्यमरः। **न त्वित्यादि**। अयं भावः—घटादौ 'यमोऽपरिवेषणे' इति पठितं तत्र परिवेषणमिति हेतुमण्ण्यन्तस्य रूपम्। हेतुमण्ण्यन्तस्य हि भोजना वेष्टना चार्थः। तथा च अपरिवेषण इत्यनेन भोजनातो वेष्टनातश्चान्यत्र मित्त्वनिषेधेऽपि तयोरर्थयोस्त्वमन्तत्वादेव मित्त्वसिद्धेरिति। यद्यपि घटादौ 'यच्छतिर्भोजनातोऽन्यत्र मित्' इति व्याख्यातं तथाप्यत्रत्यग्रन्थानुगुण्येनोपलक्षणतया तद्व्याख्येयमित्याहुः। अत्रेदं बोध्यम्—घटादौ 'यमोऽपरिवेषणे' इत्यत्र परिपूर्वकस्य विषेर्णिजन्तस्य ल्युटि रूपम्, 'यम च परिवेषणे' इत्यत्र तु केवलस्यैव ल्युटि रूपं

भोजना, नापि वेष्टना। यमयति चन्द्रम्। परिवेष्टत इत्यर्थः चह १६२७ परिकल्पने। चहयति। अचीचहत्। कथादौ वक्ष्यमाणस्य तु अदन्तत्वेनाग्लोपित्वाद्दीर्घसन्वद्भावौ न। अचचहत्। चप इत्येके। चपयति। रह १६२८ त्यागे इत्येके। अरीरहत्। कथादेस्तु अररहत्। बल १६२९ प्राणने। बलयति। चिञ्

वेष्टनमिति। 'परिवेषस्तु परिधिः' इति कोशादिति भावः। न तु भोजनमिति। भुजेर्हेतुमण्ण्यन्तात् स्त्रियामित्यधिकारे 'ण्यासश्रन्थो युच्' क्लीबत्वं लोकात्। भोजनेत्येव क्वचित्पाठः। भोक्तुः पात्रे भोज्यद्रव्योपकल्पनमिह न परिवेषणमित्यर्थः। भोजनायां यमेर्हेतुमण्ण्यन्तस्य अमन्तत्वादेव मित्त्वसिद्धेरिति भावः। परिवेष्टत इत्यर्थ इति। अनेन इह परिविषेर्ण्यन्तास्ल्युटि परिवेषणशब्द इति सूचितम्। न च वेष्टनेऽप्यर्थे यमेरमन्तत्वादेव सिद्धे मित्त्वविधिर्व्यर्थ इति वाच्यम्, 'न कम्यमिचमाम्' इति मित्त्वप्रतिषेधप्रकरणस्थे 'यमोऽपरिवेषणे' इति घटाद्यन्तर्गणसूत्रे अपरिवेषणे इति पर्युदासेन भोजनतोऽन्यत्र वेष्टनेऽर्थे मित्त्वनिषेधस्य प्राप्तौ मित्त्वप्रापणार्थत्वाद् 'यमोऽपरिवेषणे' इत्यत्र परिवेषणशब्देन भोजनाया एव विवक्षितत्वेन वेष्टने यमेर्मित्त्वनिषेधस्य प्रसङ्गात्। अत एव यमिर्भोजनातोऽन्यत्र न मिदिति व्याख्यातं मूलकृता। भोजनायां तु 'यमोऽपरिवेषणे' इति मित्त्वनिषेधविधौ भोजनायाः पर्युदासादेव तत्र मित्त्वनिषेधाभावादमन्तत्वादेव मित्त्वप्राप्तेरिह चुरादौ परिवेषणशब्देन वेष्टनमेव विवक्षितं न तु भोजनेत्यास्तां तावत्। चह परिकल्पन इति। इत आरभ्य 'चिञ् चयने' इत्येतत्पर्यन्तं चेत्यनुवर्तते। अतस्तेषां मित्त्वाद् णिचि ह्रस्वः, तदाह चहयतीति। नन्वनेनैव सिद्धे अग्रे चुराद्यन्तर्गणे कथादावस्य पाठो व्यर्थ इत्यत आह कथादाविति। कथादयोऽदन्ता इति वक्ष्यन्ते। तस्माण्णिचि अल्लोपे चहयतीत्यादौ अल्लोपस्य स्थानिवत्त्वाद् वृद्ध्यभावे मित्त्वाद् ह्रस्वे च न विशेषः। तथापि अदन्तात् चङि णौ अल्लोपे सति अग्लोपितया सन्वत्त्वदीर्घयोरभावे अचचहदिति रूपमस्ति फलमित्यर्थः। चप इत्येके इति। 'चह परिकल्पने' इत्यस्य स्थाने चप इत्येके पठन्तीत्यर्थः। 'रह त्यागे' इत्येके इत्यपि तथैव व्याख्येयम्। एवं च ज्ञपादिषु पञ्चसु चहधातुः चपधातुः रहधातुर्वा अन्यतमस्तृतीयः, बलधातुश्चतुर्थः, चिञ्धातुः पञ्चमः, इति कृत्वा ज्ञपादिपञ्चानां मतत्रयेऽपि पञ्चत्वात् ज्ञपादिपञ्चकत्वस्य न विरोधः। 'रह त्यागे' इत्यस्यापि कथादिपाठफलमाह कथादेस्तु अररहदिति। अदन्तत्वेन अग्लोपित्वान्न दीर्घसन्वत्त्वे

न तु णिजन्तस्य। तथा च भोजनावद्वेष्टनाया अपि परिवेषणशब्दार्थत्वादुभयत्राप्यमन्तत्वेनैव मित्त्वं सिध्यति। वेष्टने तु अपरिवेषण इत्यनेन अमन्तत्वप्रयुक्तमित्त्वस्य

१ 'परिकल्कने' इति क्वाचित्कः पाठः।

१६३० चयने। २५६९ चिस्फुरोर्णौ। (६-१-५४) आत्वं वा स्यात्।
२५७० अर्तिह्रीव्लीरीक्नूयीक्ष्माय्यातां पुङ्णौ। (७-३-३६) एषां पुक् स्याण्णौ। चपयति, चययति। ञित्करणसामर्थ्यादस्य णिज्विकल्पः। चयते। प्रणिचयति, प्रनिचयति। 'नान्ये मितोऽहेतौ' (ग सू १८८)। अहेतौ स्वार्थे णिचि ज्ञपादिभ्योऽन्ये मितो न स्युः तेन शमादीनाममन्तत्वप्रयुक्तं मित्त्वं न।

इति भावः। **बल प्राणने**। च इत्यनुवृत्त्या मित्त्वस्यानुकर्षणाद्ध्रस्वं मत्वाह **बलयतीति**। **चिस्फुरोर्णौ**। 'आदेच उपदेशे–' इत्यत आदिति 'विभाषा लीयतेः' इत्यतो विभाषेति चानुवर्तते इति मत्वा शेषं पूरयति **आत्वं वा स्यादिति**। चिञो णिचि आत्वे चा इ इति स्थिते **अर्तिह्री**। अर्ति ह्री व्ली री क्नूयी क्ष्मायी आत् एषां द्वन्द्वात् षष्ठी। पुक् णौ इति छेदः, तदाह–**एषां पुक् स्याण्णौ इति**। पुकि ककार इत्, उकार उच्चारणार्थः कित्त्वादन्तावयवः। चाप् इ इति स्थिते चेत्यनुवर्त्य मित्त्वस्यानुकर्षणेन मित्त्वाद्ध्रस्वे चपि इत्यस्मात्तिबादौ परिनिष्ठितमाह **चपयतीति**। आत्वाभावपक्षे त्वाह **चययतीति**। चेर्णिचि वृद्धौ आयादेशे मित्त्वादुपधाह्रस्व इति भावः। ननु चिञ्धातोरिह ञित्करणं व्यर्थम्, णयन्ताद् णिचश्चेत्येव उभयपदसिद्धेः। चौरादिकस्यास्य नित्यं णयन्तत्वेन चयति चयते इति केवलस्याण्यन्तस्य शशश्रृङ्गायमाणत्वादित्यत आह **ञित्करणसामर्थ्यादिति**। एवं च णिजभावपक्षे उभयपदार्थमिह ञित्करणमर्थवदिति भावः। 'शेषे विभाषाऽकखादौ–' इति णत्वविकल्पं मत्वाह **प्रणिचयति, प्रनिचयति इति**। 'नान्ये मितोऽहेतौ' इति चुरादिगणसूत्रम्। अहेताविति च्छेदः। 'हेतुमति च' इति सूत्रेण विहितो णिच् हेतुशब्देन विवक्षितः। स न भवतीत्यहेतुः स्वार्थणिच्। तस्मिन्परे इति लभ्यते। किमपेक्षया अन्ये इत्याकाङ्क्षायां इतः प्राक् पठितज्ञपादिचिञन्तेभ्य इति लभ्यते, तदाह **अहेतौ स्वार्थे णिचीत्यादिना**। अहेतावित्यस्य व्याख्यानं स्वार्थे णिचीति। **तेनेति**। ज्ञपादिचिञन्तव्यतिरिक्तचुरादीनां मित्त्वनिषेधेनेत्यर्थः। **शमादीनामिति**। शम

निषेधेऽपि 'यम च परिवेषणे' इत्यनेन मित्त्वं सिध्यतीति दिक्। **चिस्फुरोर्णौ**। 'आदेच उपदेशे–' इत्यत आदित्यनुवर्तते 'विभाषा लीयतेः' इत्यतो विभाषाग्रहणं च' तदाह **आत्वं वा स्यादिति**। **अर्तिह्री**। परत्वादन्तरङ्गत्वाच्च आदौ पुक् पश्चाद्गुणः। अर्पयति। ह्रेपयति। व्लेपयति। रेपयति। यलोपः। क्नोपयति। क्ष्मापयति। स्थापयति। **चपयतीति**। वर्णग्रहणे लक्षणप्रतिपदोक्तपरिभाषा न प्रवर्तते। 'आतोऽनुपसर्गे' इति कबाधनाय 'ह्वावामश्च' इत्यारम्भादिति भावः। **ज्ञपा-**

घट्ट १६३१ चलने । मुस्त १६३२ सङ्घाते । खट्ट १६३३ संवरणे । षट्ट १६३४ स्फिट्ट १६३५ चुबि १६३६ हिंसायाम् । पुल १६३७ सङ्घाते । पूर्ण इत्येके । पुण इत्यन्ये । पुंस १६३८ अभिवर्धने । टकि १६३९ बन्धने । टङ्कयति, टङ्कति । धूस १६४० कान्तिकरणे । धूसयति । दन्त्यान्तः । मूर्धन्यान्त इत्येके । तालव्यान्तः इत्यपरे । कीट १६४१ वर्णे । चूर्ण १६४२ संकोचने । पूज १६४३ पूजायाम् । अर्क १६४४ स्तवने । तपने इत्येके । शुठ १६४५ आलस्ये । शुठि १६४६ शोषणे । शुण्ठयति, शुण्ठति । जुड १६४७ प्रेरणे । गज १६४८ मार्ज १६४९ शब्दार्थौ । गाजयति । मार्जयति । मर्च १६५० च । मर्चयति । घृ १६५१ प्रस्रवणे । स्रावणे इत्येके । पचि १६५२ विस्तारवचने । पञ्चयति । पञ्चति इति व्यक्तार्थस्य शपि गतम् । तिज १६५३ निशाने । तेजयति । कॄत १६५४ संशब्दने ।

२५७१ उपधायाश्च । (७-१-१०१) धातोरुपधाभूतस्य ॠत इत्स्यात् । रपरत्वम् । 'उपधायां च' (सू २२६५) इति दीर्घः । कीर्तयति । 'उॠत्' (सू २२६७) **अचीकृतत् , अचिकीर्तत्** । वर्ध १६५५ छेदनपूरणयोः । कुबि

आलोचने अम रोगे इत्यादीनामग्रे चुरादौ पठिष्यमाणानामित्यर्थः । अमन्तत्वेनेति 'जनीजॄष्क्नसुरञ्जोऽमन्ताश्च' इत्यमन्तत्वनिमित्तकमित्यर्थः । **कॄत संशब्दने** । **उपधायाश्च** । 'ॠत इद्धातोः' इत्यनुवर्तते, तदाह **धातोरित्यादिना** । चङि 'उॠत्' इत्युपधाया ऋत्वपक्षे आह **अचीकृतदिति** । उपधाया ऋत्वे कृत् इत्यस्य द्वित्वे उरदत्वे लघुपरतया सन्वत्त्वादित्वे 'दीर्घो लघोः' इति दीर्घ इति भावः । ऋत्वाभावपक्षे आह **अचिकीर्तदिति** । ॠत इत्वे रपरत्वे 'उपधायां च' इति दीर्घे कीर्त् इत्यस्य द्वित्वे हलादिशेषे अभ्यासहस्वे कुत्वमिति भावः । लघुपरकत्वाभावेन सन्वद्भावविषयत्वाभावान्नाभ्यासदीर्घः ।

दिभ्य इति । मुख्यमते पञ्च शपादयः । मतान्तरे तु सप्त । **पूर्ण इत्येके** । **पूणेत्यन्ये इति** । ईदृशेषु पाठशुद्धिर्निर्णेतुमशक्या । अतएव क्षीरस्वामिनोक्तम्— 'पाठेऽर्थे चागमभ्रंशान्महतामपि मोहतः । न विद्मः किं जहीमोऽत्र किमुपादद्महे वयम्' इति । पूल । पूर्णादिषु पाठे भ्रंशः । वजधातोर्मार्गसंस्कारोऽर्थ उत संस्कार एवेत्यर्थे भ्रंशः । आगमभ्रंशात् शास्त्रभ्रंशात् । **चूर्ण संकोचने** । प्रेरणे पठितस्य पुनः पाठोऽर्थभेदकृतः । **मर्च चेति** । क्वचिद्धातुपाठेऽस्यादृष्टत्वेऽपि नायमप्रामाणिक इति मन्तव्यम् । 'मिदचोऽन्त्यात्परः' इति सूत्रे कैयटेनास्योपन्यस्तत्वात् । 'मर्तो मर्तं मर्चयति द्रवेण' इति प्रयोगदर्शनाच्च । **उपधायाश्च** । 'ॠत इद्धातोः' इति वर्तते, तदाह **धातोरुपधाया इति** । ननु 'ॠत इद्धातोः' इति सूत्रे धातोॠत इति

१६५६ आच्छादने। कुम्बयति कुभि इत्येके। लुबि १६५७ तुबि १६५८ अदर्शने। अर्दने इत्येके। ह्लप १६५९ व्यक्तायां वाचि। क्लप इत्येके। चुटि १६६० छेदने। इल १६६१ प्रेरणे। एलयति। ऐलिलत्। म्रच १६६२ म्लेच्छने। म्लेच्छ १६६३ अव्यक्तायां वाचि। ब्रूस १६६४ बर्ह १६६५ हिंसायाम्। केचिदिह गर्ज गर्द शब्दे, गर्ध अभिकाङ्क्षायाम्, इति पठन्ति। गुर्द १६६६ पूर्वनिकेतने। जसि १६६७ रक्षणे। मोक्षणे इति केचित्। जंसयति, जंसति। ईड १६६८ स्तुतौ। जसु। १६६९ हिंसायाम्। पिडि १६७० सङ्घाते। रुष १६७१ रोषे। रुट इत्येके। डिप १६७२ क्षेपे। ष्टुप १६७३ समुच्छ्राये।

आ कुस्मादात्मनेपदिनः 'कुस नाम्नो वा' इति वक्ष्यते। तमभिव्याप्येत्यर्थः। अकर्तृगामिफलार्थमिदम्। चित १६७४ सञ्चेतने। चेतयते। अचीचितत। दशि १६७५ दंशने। दंशयते। अददंशत। इदित्त्वाण्णिजभावे दंशति। आकुस्मीयमात्मनेपदं णिच्संनियोगेनैवेति व्याख्यातारः। नलोपे सञ्जिसाहचर्याद् भ्वादेरेव ग्रहणम्। दसि १६७६ दर्शनदंशनयोः। दंसयते, दंसति। दस इत्यप्येके। डप १६७७ डिप १६७८ संघाते। तत्रि १६७९ कुटुम्बधारणे। तन्त्रयते। चान्द्रा धातुद्वयमिति मत्वा कुटुम्बयते इत्युदाहरन्ति मत्रि १६८० गुप्तपरिभाषणे। स्पश

आकुस्मादित्यत्र आङभिविधाविति मत्वाह **तमभिव्याप्येति**। ननु 'णिचश्च' इति सिद्धे आत्मनेपदविधानं व्यर्थमित्यत आह **अकर्तृगामीति**। ननु 'दशि दंशने' णिजभावे दंशति इति कथम्। आकुस्मीयत्वेन णिजभावेऽपि तङो दुर्वारत्वादित्यत आह **आकुस्मीयमिति**। 'दंशसञ्जस्वञ्जां शपि' इति नलोपमाशङ्क्याह

वैयधिकरण्येन व्याख्याने सिद्धमिष्टमिति किमनेन सूत्रेणेति चेत्। मैवम्। तथा हि सति ऋकारीयतीत्यत्रापि इत्वप्रसङ्गात्। **अर्दन इत्येक इति**। अत्र वदन्ति— अर्दने लुबितुबी भ्वादौ पठितौ तयोस्तत्र पाठो वृथा स्यात्। इदित्त्वादेव लुम्बति तुम्बतीत्यादिरूपसिद्धेः। अदर्शने त्वर्थेऽर्थभेदाद् भ्वादिपाठः सार्थक इत्यर्दनार्थत्वं चौरादिकयोरयुक्तमित्यस्वरसादेक इत्युक्तमिति। **म्रक्ष** म्लेच्छने। म्रक्षणेऽप्ययम्। तच्च तैलादिनाऽभ्यञ्जनम्। म्रक्षयति। अमम्रक्षत्। **गुर्द पूर्व** निकेतने। गुर्दयति। पूर्वयति। केचित्तु पूर्वनिकेतने इति पठित्वा गुर्दधातुः पूर्वनिवासे वर्तते इति व्याचक्षते। **जसु** हिंसायाम्। क्त्वायामिड्विकल्पार्थमुदित्करणमिति तत्सामर्थ्यादस्य णिजनित्यः। जासयति। जसति। जसित्वा। जस्त्वा। जस्तम्। **चित** संचेतने। संचेतनं मूर्च्छाद्यवस्थानिवृत्त्युत्तरकालिकं ज्ञानम्। **दंशतीति**। इह 'दंशसञ्ज-' इति नलोपमाशङ्क्याह **सञ्जिसाहचर्यादिति**। **स्पश**। स्पाशयते। 'अत्स्मृदृत्वर-'

१६८१ ग्रहणसंश्लेषणयोः। तर्ज १६८२ भर्त्स १६८३ तर्जने। बस्त १६८४ गन्ध १६८५ अर्दने। बस्तयते। गन्धयते। विष्क १६८६ हिंसायाम्। हिष्क इत्येके। निष्क १६८७ परिमाणे। लल १६८८ ईप्सायाम्। कूण १६८९ संकोचे। तूण १६९० पूरणे। भ्रूण १६९१ आशाविशङ्कयोः। शठ १६९२ श्लाघायाम्। यक्ष १६९३ पूजायाम्। स्यम १६९४ वितर्के। गूर १६९५ उद्यमने। शम १६९६ लक्ष १६९७ आलोचने। 'नान्ये मितः-' इति मित्त्व-निषेधः। कुत्स १६९८ अवक्षेपणे। त्रुट १६९९ छेदने। कुट इत्येके। गल १७०० स्रवणे। भल १७०१ आभण्डने। कूट १७०२ आप्रदाने। अवसादने इत्येके। कुट्ट १७०३ प्रतापने। वञ्चु १७०४ प्रलम्भने। वृष १७०५ शक्तिबन्धने। शक्तिबन्धनं प्रजननसामर्थ्यं, शक्तिबन्धश्च। वर्षयते। मद १७०६ तृप्तियोगे। मादयते। दिवु १७०७ परिकूजने। गॄ १७०८ विज्ञाने। गारयते। विद १७०९ चेतनाख्याननिवासेषु। वेदयते।

नलोपे सञ्जीति। स्पश ग्रहणेति। अपस्पशत। 'अत्स्मृदॄत्वर-' इति अभ्यासस्य अत्त्वमित्त्वापवादः। **गूर उद्यमने।** अयं दीर्घोपधः। गूरयते। तुदादौ तु 'गुरी उद्यमने' इति ह्रस्वोपधः। दिवादौ तु 'घूरी, गूरी हिंसागत्योः' इति दीर्घोपध एवेति केचित्। ह्रस्वोपध इत्यन्ये। विदधातोरर्थभेदे विकरणभेदं संगृह्णाति

इत्यादिनाऽभ्यासस्य अत्वम्। इत्वापवादः। अपस्पशत्। **तर्ज भर्त्स** तर्जने। तर्जयते। भर्त्सयते। 'तर्जयन्निव केतुभिः' इति प्रयोगस्तु णिजन्तादस्मा-द्धौवादिकात् तर्जतेर्वा हेतुमण्णिचि बोध्यः। **भ्रूण**। भ्रूणयते। 'भ्रूणोऽर्भके स्त्रैण-गर्भे' इत्यमरः। **गूर** उद्यमने। दीर्घोपधोऽयम्। गूरयते। ह्रस्वोपधस्तु दिवादौ तुदादौ चेति मनोरमायां स्थितम्। यद्यपि तुदादौ गुरी उद्यमने इति पाठाद्ध्रस्वोपध एव तथापि दिवादौ घूरी गूरी हिंसागत्योरिति पाठाद्नास्ति ह्रस्वोपध इति नव्याः। **शम लक्ष**। ननु 'निशामय तदुत्पत्तिम्' इत्यत्र शामय इत्येतत् शमु उपशम इत्य-स्माण्णिचि रूपं चेद् अमन्तत्वान्मित्त्वे सति ह्रस्वेन भाव्यमित्याशङ्क्य कथमनेन सिद्ध-मिति वदन्ति। आकुस्मीयत्वात्तङि निशामयस्वेति रूपस्य सर्वसंमतत्वादिति चेत्। अत्राहुः—स्वार्थण्यन्तादस्माद्धेतुमण्णिचि निशामयेति रूपम्। न चार्थासंगतिः। 'निवृत्तप्रेषणाद्धातोः प्राकृतेऽर्थे णिजुच्यते' इति सिद्धान्तादिति। **कुत्स** अवक्षेपणे। 'यूनश्च कुत्सायाम्' इति निर्देशादङ्। कुत्सा। 'ण्यासश्रन्थ-' इति युच्। कुत्सना। **भल**। आभण्डनं निरूपणमित्याहुः। **वञ्चु** प्रलम्भने। ल्युटि वचनम्। उदित्क-रणस्य क्त्वायामिड्विकल्पार्थत्वाण्णिजनित्यः। वञ्चयति। वञ्चति। वञ्चित्वा। वञ्चित्वा।

सत्तायां विद्यते ज्ञाने वेत्ति विन्ते विचारणे ।
विन्दते विन्दति प्राप्तौ श्यन्लुक्श्नम्शेष्विदं क्रमात् ॥

मान १७१० स्तम्भे । मानयते । यु १७११ जुगुप्सायाम् । यावयते । कुस्म १७१२ नाम्नो वा (ग सू १९९) । कुस्म इति धातुः कुत्सितस्मयने वर्तते । कुस्मयते । अचुकुस्मत । अथवा कुस्म इति प्रातिपदिकम् । ततो धात्वर्थे णिच् । इत्याकुस्मीयाः । चर्च १७१३ अध्ययने । बुक्क १७१४ भषणे । शब्द १७१५ उपसर्गादाविष्कारे च । वाग्भाषणे । प्रतिशब्दति । प्रतिश्रुतमाविष्करोतीत्यर्थः । अनुपसर्गाच्च आविष्कारे इत्येव । शब्दयति । कण १७१६ निमीलने

सत्तायां विद्यते इत्यादिश्लोकेन । कुस्म नाम्नो वा । गणसूत्रम् । कुस्मेति पृथक्पदम् अविभक्तिकम्, तदाह **कुस्म इति धातुरिति ।** कुत्सितस्मयने वर्तते इति शेषपूरणं व्याख्यानादिति भावः । **कुस्मयते इति ।** आकुस्मीयत्वादकर्तृगेऽपि फले आत्मनेपदम् । आकुस्मादात्मनेपदिन इत्यत्र आङभिविधावित्याश्रयणादिति भावः । **अचुकुस्मतेति ।** उकारस्य गुरुतया अभ्यासस्य लघुपरकत्वाभावान्न सन्वत्त्वमिति भावः । नाम्नो वेत्यंशं व्याचष्टे **अथवेति ।** नाम प्रातिपदिकम्, तस्माद्वा णिज्भवतीत्यर्थः । तच्च प्रातिपदिकं कुस्मशब्दात्मकमेव गृह्यते प्रत्यासत्त्या । तथा च कुस्मेति धातोः कुस्मेति प्रातिपदिकाद्वा णिजिति फलितम् । तत्र धातोः णिचः स्वार्थिकत्वमभिप्रेत्य प्रातिपदिकाद् णिचि विशेषमाह **तत इति ।** तस्मात् प्रातिपदिकादित्यर्थः । **धात्वर्थे इति ।** करोतीत्यर्थे आचष्टे इत्यर्थे वेत्यर्थः । न च 'तत्करोति तदाचष्टे' इत्येव प्रातिपदिकात् णिच् सिद्ध इति वाच्यम्, 'आकुस्मादात्मनेपदिनः' इत्यात्मनेपदनियमार्थत्वात् । **इत्याकुस्मीयाः । शब्द उपसर्गादिति ।** उपसर्गात्परः शब्दधातुः आविष्कारे वर्तते इत्यर्थः । **अनुपसर्गाच्चेति ।** अनुपसर्गात्परोऽपि शब्दधातुः णिचं लभते इत्यर्थः । आविष्कारे इत्यस्यैवानुवृत्त्यर्थं

वक्त्वा । 'वञ्चिलुञ्च्यृतश्च' इति सेटः क्त्वः कित्त्वविकल्पनात् पाक्षिको नलोपः । इडभावे तु नित्यम् । निष्ठायां तु वक्तम् । 'यस्य विभाषा' इतीण्निषेधो नाम्नो वेति वाशब्दं व्याचष्टे **अथ वेति । प्रातिपदिकमिति ।** 'अन्येष्वपि दृश्यते' इति सूत्रे अन्येभ्योऽपीति वक्ष्यमाणत्वात्कुपूर्वात्स्मयतेर्डप्रत्यये टिलोपे 'कुगति–' इति समासे च निष्पन्नमित्यर्थः । यद्यपि कुपूर्वस्य स्मिङो लङादिषु कुस्मयते इत्यादि सिद्धं तथापि प्रकुस्मयते इत्यादि न सिध्येदुपसर्गस्य धातुना व्यवधानायोगात् । कुस्मयाञ्चक्रे इत्याद्यर्थमपि कुस्मेति पाठोऽर्थवान् । इत्याकुस्मीयाः । **चर्च ।** सर्वोऽपि चुरादिर्णिच् पाक्षिक इति पक्षे । 'गुरोश्च हलः' इत्यप्रत्ययः । चर्चा । **कण निमी-**

काणयति। 'णौ चङ्युपधाया ह्रस्वः' (सू २३१४) 'काणयादीनां वा' (वा ४६१३) इति विकल्प्यते। अचीकणत्, अचकाणत्। जभि १७१७ नाशने। जम्भयति, जम्भति। षूद १७१८ क्षरणे। सूदयति। असूषुदत्। जसु १७१९ ताडने। जासयति, जसति। पश १७२० बन्धने। पाशयति। अम १७२१ रोगे। आमयति। 'नान्ये मित–' इति निषेधः। अम गत्यादौ शपि गतः। तस्माद्धेतुमण्णौ 'न कम्यमिचमाम्' इति निषेधः। आमयति। चट १७२२ स्फुट १७२३ भेदने। विकासे शशपोः स्फुटति स्फोटते इत्युक्तम्। घट १७२४ सङ्घाते। घाटयति। 'हन्त्यर्थाश्च' (ग सू २००)। नवगणयामुक्ता अपि हन्त्यर्थाः स्वार्थे णिचं लभन्ते इत्यर्थः। दिवु १७२५ मर्दने। उदित्वादिवत्वीत्यपि अर्ज १७२६ प्रतियत्ने। अयमर्थान्तरेऽपि द्रव्यमर्जयति। घुषिर् १७२७ विशब्दने। घोषयति। 'घुषिरविशब्दने' (सू ४०६३) इति सूत्रे 'अविशब्दने' इति निषेधा ल्लिङ्गादनित्योऽस्य णिच्। घोषति। इरित्वादङ् वा। अघुषत्, अघोषीत्।

पृथगुक्तिः। शब्द आविष्कारे चेत्येतावत्येवोक्ते अनुपसर्गाद्भाषणेऽपि स्यात्, तदाह **आविष्कारे इत्येवेति।** **काणयादीनामिति।** इदं वार्तिकं 'भ्राजभासभाष–' इति सूत्रे भाष्ये पठितम्। 'काणि राणि श्राणि भाणि हेठि लोपयः षट्काणयादयः' इति भाष्यम्। **अचीकणदिति।** ह्रस्वत्वपक्षे लघुपरत्वादभ्यासस्य सन्वत्त्वमिति भावः। **शशपोरिति।** शविकरणे शब्विकरणे चेत्यर्थः। **हन्त्यर्थाश्चेति।** गणसूत्रमिदम्। हन हिंसागत्योरिति हनधातोर्हिंसा गमनं चार्थः। एतदर्थकाः ये धातवो भ्वादिषु नवसु गणेषु पठिताः ते सर्वेऽपि चुरादौ पठिताः प्रत्येतव्या इत्यर्थः। ततश्च तेभ्यः स्वार्थे णिजपि पक्षे भवतीति फलितम्, तदाह **नवगणयामित्यादि। दिवु मर्दने। उदित्वादिति।** उदित्करणम् 'उदितो वा' इति क्त्वायामिड्विकल्पार्थम्। द्यूत्वा, देवित्वा। इडभावे ऊठ्। इटि तु 'न क्त्वा सेट्' इति कित्त्वनिषेधाद् गुण इति स्थितिः। अस्य नित्यण्यन्तत्वे सति णिचा व्यवहितत्वेन क्त्वायामिड्विकल्पस्य अप्रसक्तेरुदित्करणं व्यर्थं सज्ज्ञापयति अस्य दिवुधातोः णिज्विकल्प इतीति भावः। **घुषिर् विशब्दने।** विशब्दनं शब्देन स्वाभिप्रायाविष्करणं प्रतिज्ञानं च। भ्वादौ त्वयं धातुरविशब्दनार्थकः पठितः। **घोषयतीति।** शब्देन

लने। एकनेत्रनिमीलन एवायं शब्दः स्वभावात्। काणः। **काणयादीनामिति।** एते हेतुमण्ण्यन्तेषु वक्ष्यन्ते। **हन्त्यर्थाश्च।** तेन घातयति हन्तीत्येतौ समानार्थौ। **अर्ज।** प्रतियत्नो गुणाधानम्। **अर्जयतीति।** संगृह्णातीत्यर्थः। **घुषिर्।** अविशब्दनं प्रतिज्ञानम्। **निषेधाल्लिङ्गादिति।** घुषिरविशब्दन इति सूत्रेण अवि-

णयन्तस्य तु अजूघुषत्। आङः क्रन्द १७२८ सातत्ये। औवादिकः क्रन्दधातुराह्वानार्थे उक्तः। स एवाङ्पूर्वो णिचं लभते सातत्ये। आक्रन्दयति। अन्ये तु 'आङ्पूर्वो घुषिः क्रन्दसातत्ये' इत्याहुः। आघोषयति। लस १७२९ शिल्पयोगे। तसि १७३० भूष १७३१ अलङ्करणे। अवतंसयति, अवतंसति। भूषयति। अर्ह १७३२ पूजायाम्। ज्ञा १७३३ नियोगे। आज्ञापयति। भज १७३४ श्राणने। श्रधु १७३५ प्रसहने। अशशर्धत्, अशीशृधत्। यत १७३६

स्वाभिप्रायमाविष्करोतीत्यर्थः, प्रतिजानीते इति वा। लिङ्गादिति। इणिनषेधप्रकरणे 'घुषिर् अविशब्दने' इति सूत्रम्। अविशब्दनार्थकाद् घुषधातोः निष्ठायामिण्न स्यादित्यर्थः। यथा घुष्टा रज्जुः। प्रसारितेत्यर्थः। अविशब्दने इति किम्? अवघुषितं वाक्यम्। प्रतिज्ञातमित्यर्थः। अत्र विशब्दनार्थकत्वादेणिनषेध इति स्थितिः। तत्र विशब्दनार्थकस्य घुषधातोः चौरादिकत्वेन णयन्तत्वनियमाणिणचा व्यवधानात्ततः परा निष्ठा नास्त्येवेति इणिनषेधे विशब्दनपर्युदासो व्यर्थः सन् चौरादिकस्यास्य विशब्दनार्थकस्य घुषेः णिचो विकल्पं गमयति। एवं च अवघुषितं वाक्यमित्यत्र चौरादिकघुषेर्विशब्दनार्थकस्य नेष्ठायाम् इणिनषेधो नेति भाष्ये स्पष्टम्। इरित्वादङ् वेति। णिजभावपक्षे इति शेषः। ननु इरित्वादेव णिज्विकल्पे सिद्धे 'घुषिर् विशब्दने' इति इणिनषेधसूत्रे अविशब्दने इति पर्युदासस्य णिज्विकल्पज्ञापकत्वाश्रयणक्लेशो भाष्ये व्यर्थ इति चेत्, न—अत एव भाष्यादिरित्वाभावविज्ञानात्। एवं च 'घुषिर् विशब्दने' इत्यत्र घुषिरित्यस्य इका निर्देशमाश्रित्य प्रथमान्तत्वमेवाश्रयणीयम्। इरित्वादङ्वेति मूलं तु भाष्यविरोधादुपेक्ष्यमेवेत्यास्तां तावत्। आङः क्रन्द सातत्य इति। आङः परः क्रन्दधातुः आह्वानसातत्येऽर्थे णिचं लभते इत्यर्थः। यद्वा आङ् इत्यनन्तरं घुषिरित्यनुवर्तते। क्रन्दसातत्ये इत्यर्थनिर्देशः, तदाह अन्ये त्विति। लस शिल्पयोग इति। कौशले इत्यर्थः। तसि भूषेति। अत्र तसिः प्रायेण अवपूर्वः, तदाह अवतंसयतीति। ज्ञा नियोग इति। आङ्पूर्वः, तदाह आज्ञापयतीति। आदन्तत्वात् पुक्। अजिज्ञपत्। यत

शब्दने निष्ठाया इणिनषिध्यते विशब्दनार्थादेतस्मादनन्तरा निष्ठा नास्त्येव णिचा व्यवधानात्। अतो घुषिरविशब्दन इति भौवादिकादेव निष्ठाया इणिनषेधो भवेदिति किं विशब्दनप्रतिषेधेन तत्स्थानेनैव विशब्दनप्रतिषेधेनानित्योऽस्य णिजिति ज्ञाप्यते इति भावः। इरित्करणादपि णिज्विकल्पः सिध्यतीति केचित्। शिल्पयोग इति। क्रियाकौशलं शिल्पम्। यत निकारोपस्कारयोः। यत्नो वा प्रैषो वा निकारः। निकारोपस्कारयोरिति पाठान्तरम्। क्रियानिघण्टौ 'यत्ने प्रैषे निराकारे

निकारोपस्कारयोः। रक १७३७ लग १७३८ आस्वादने। रघ इत्येके। रग इत्यन्ये। अञ्चु १७३९ विशेषणे। अञ्चयति। उदित्वमिड्विकल्पार्थम्। अत एव विभाषितो णिच्। अञ्चति। एवं श्वयुजसुप्रभृतीनमपि बोध्यम्। लिगि १७४० चित्रीकरणे। लिङ्गयति, लिङ्गति। मुद १७४१ संसर्गे। मोदयति सक्तून्घृतेन। त्रस १७४२ धारणे। ग्रहणे इत्येके। वारणे इत्यन्ये। उध्रस १७४३ उञ्छे। उकारो धात्ववयव इत्येके। नेत्यन्ये। ध्रासयति। ध्रसति। उध्रासयति। मुच १७४४ प्रमोचने मोदने च। वस १७४५ स्नेहच्छेदापहरणेषु। चर १७४६ संशये। च्यु १७४७ सहने। हसने चेत्येके। च्यावयति। च्युस इत्येके। च्योसयति। भुवोऽवकल्कने १७४८। अवकल्कनं मिश्रीकरणमित्येके। चिन्तनमित्यन्ये। भावयति। कृपेश्च १७४९ कल्पयति। 'आ स्वदः सकर्मकात्' (ग सू २०१) स्वदिमभिव्याप्य संभवत्कर्मभ्य एव णिच्। ग्रस १७५० ग्रहणे। ग्रासयति फलम्। पुष १७५१ धारणे। पोषयत्याभरणम्। दल १७५२ विदारणे। दालयति। पट १७५३ पुट १७५४ लुट १७५५ तुजि १७५६ मिजि

निकारेति। तालव्यान्तःस्थादिः। यत्नो वा प्रैषो वा निकारः। यातयति। अयीयतत्। **अञ्चु विशेषण इति**। व्यावर्तने इत्यर्थः। **उदित्त्वमिति**। 'उदितो वा' इत्यण्यन्तात् क्त्वायामिड्विकल्पार्थमित्यर्थः। ण्यन्तात्तु णिचा व्यवधानाद् इड्विकल्पस्य न प्रसक्तिरिति भावः। नन्वस्य नित्यण्यन्तत्वादण्यन्तत्वम् असिद्धमित्यत आह **अत एवेति। च्यु सहन इति**। च्यावयति। अचुच्यवत्। **भुवोऽवकल्कने इति**। अवकल्कनवृत्तेर्भूधातोर्णिच् स्यादित्यर्थः। **कृपेश्चेति**। अवकल्कनवृत्तेः कृपेः णिच् स्यादित्यर्थः। **कल्पयतीति**। 'कृपो रो लः' इति लत्वम्। **आस्वदः सकर्मकादिति**। आङभिविधौ, तदाह **स्वदिमभिव्याप्येति**। तत्र 'ष्वद आस्वादने' इत्यस्य अकर्मकत्वादाह **संभवत्कर्मभ्य इति**। इत आरभ्य

पादपे चाप्युपस्कृतौ। निर्यातोऽयं धान्यधनयोः प्रतिदाने' इत्युक्तम्। अस्यार्थः—यत्नादर्थेषु चतुर्षु यतधातुं प्रयुञ्जीत। निसः परभागे चेत्प्रयुज्यते तदाऽयं धान्यधनयोः प्रतिदाने च वर्तत इति। ऋणं निर्यातयति। प्रतिददातीत्यर्थः। **अञ्चु** विशेषणे। विशेषणं व्यावर्तनम्। 'भुवोऽवकल्कने'। भूधातोर्णिच् स्यात्। **भावयतीति**। मिश्रीकरोति चिन्तयति वेत्यर्थः। **कृपेश्च**। कृपेर्णिच् स्यादवकल्कने। **आस्वदः**। **अभिव्याप्येति**। आकुस्मादिति पूर्वत्र आधृषादागर्वादिति परत्र च आङोऽभिविध्यर्थतायाः सर्वसंमतत्वेन तन्मध्यपतितेऽत्रापि तथैव व्याख्यानमुचितमिति भावः। अन्ये त्वाङ्पूर्वकात्स्वदः सकर्मकाण्णिजिति व्याचख्युः। आस्वदीयेषु धातवः सर्वे

१७५७ पिजि १७५८ लुजि १७५९ भजि १७६० लघि १७६१ त्रसि १७६२ पिसि १७६३ कुसि १७६४ दशि १७६५ कुशि १७६६ घट १७६७ घटि १७६८ बृहि १७६९ बर्ह १७७० वल्ह १७७१ गुप १७७२ धूप १७७३ विच्छ १७७४ चीव १७७५ पुथ १७७६ लोकृ १७७७ लोचृ १७७८ णद १७७९ कुप १७८० तर्क १७८१ वृतु १७८२ वृधु १७८३ भाषार्थाः। पाटयति। पोटयति। लोटयति। तुञ्जयति। तुञ्जति। एवं परेषाम्। घाटयति। घण्टयति। २५७२ -नाग्लोपिशास्वृदिताम्। (७-४-२) णिच्यग्लोपिनः शास्तेः ऋदितां चोपधाया ह्रस्वो न स्याच्चङ्परे णौ। अलुलोकत्। अलुलोचत्। वर्तयति। वर्धयति। उदित्वाद् वर्तति। वर्धति। रुट १७८४ लजि १७८५ अजि १७८६ दसि १७८७ भृशि १७८८ रुशि १७८९ शीक १७९० रुसि १७९१ नट १७९२ पुटि १७९३ जि १७९४ चि १७९५ रघि १७९६ लघि १७९७ अहि १७९८ रहि १७९९ महि १८०० च। लडि १८०१ तड १८०२ नल १८०३ च। पूरी १८०४ आप्यायने। ईदित्त्व निष्ठायामिण्निषेधाय। अत एव णिज्वा।। पूरयति, पूरति। रुज १८०५ हिंसायाम्। ष्वद १८०६ आस्वादने। स्वाद इत्येके। असिष्वदत्। दीर्घस्य त्वषोपदेशत्वाद् असिस्वदत्। इत्यास्वदीयाः।

आस्वदीयाः सकर्मकाः। स्वदिस्त्वकर्मकः। **पट पुटेति**। एकत्रिंशद् धातवः। आद्यास्त्रयष्टान्ताः। आद्यद्वितीयौ पवर्गप्रथमादी। चतुर्थाद्या एकादश इदितः। त्रिसिपिसी इदुपधौ। अदुपधौ इत्येके। षोडशसप्तदशावृदितौ। अलुलोकत् अलुलोचत् इत्यत्र उपधाह्रस्वे प्राप्ते **नाग्लोपि**। 'णौ चङ्युपधायाः–' इत्यनुवर्तते। णाविस्यावर्तते। एकमग्लोपिन इत्यत्रान्वेति। द्वितीयं तु निषेधे परनिमित्तम्, तदाह **णिच्यग्लोपिन इत्यादि**। **अलुलोकदिति**। ऋदित्त्वान्नाग्लोपीति निषेधेन उपधाह्रस्वाभावे सति लघुपरकत्वाभावान्नाभ्यासदीर्घ इति भावः। **उदित्त्वादिति**। 'वृतु वृधु' इत्युदित्वम् 'उदितो वा' इत्यण्यन्तात् क्त्वायामिड्विकल्पार्थम्। ण्यन्तात्तु णिचा व्यवधानाद् नेड्विकल्पप्रसक्तिः। अतो णिज्विकल्पो विज्ञायते इति भावः। **पूरी आप्यायने। इण्निषेधायेति**। अण्यन्तात् क्त्वायामिण्निषेधार्थमीदित्त्वम्। ण्यन्तात्तु णिचा व्यवधानादप्रसक्तेः। अतो णिज्विकल्पो विज्ञायते इत्यर्थः। स्वदधातुः षोपदेशः, तदाह **असिष्वददिति**। आदेशसकारत्वात्षः। अभ्या-

---

सकर्मकाः। **घाटयतीति**। अयं चुरादावेव संघाते गतः, पुनः पाठस्तु अर्थभेदात्। **स्वाद इत्येके इति**। अस्मिन्मते पूर्वत्राप्यास्वादः सकर्मकादिति पाठ्यम्। ननु दीर्घपाठो व्यर्थः। ह्रस्वपाठेऽप्युपधावृद्ध्या स्वादयतीति रूपाणां तुल्यत्वादत

'आ धृषाद्वा' (ग सू २०२) इत ऊर्ध्वं विभाषितणिचो धृषधातुमभिव्याप्य। युज १८०७ पृच १८०८ संयमने। योजयति, योजति। अयौजीत्। पर्चयति, पर्चति। पर्चिता। अपर्चीत्। अर्च १८०९ पूजायाम्। षह १८१० मर्षणे। साहयति। 'स एवायं नागः सहति कलभेभ्यः परिभवम्'। ईर १८११ क्षेपे। ली १८१२ द्रवीकरणे। लाययति, लयति। लेता। वृजी १८१३ वर्जने। वर्जयति, वर्जति। वृञ् १८१४ आवरणे। वारयति, वरति, वरते। वरिता, वरीता। जॄ १८१५ वयोहानौ। जारयति, जरति। जरिता, जरीता। ज्रि १८१६

सेकाकारस्य संयोगपरकत्वेन गुरुत्वान्नाभ्यासदीर्घः। **दीर्घस्य त्विति**। दीर्घमध्यस्य त्वित्यर्थः। **अषोपदेशत्वादिति**। ह्रस्वमध्यस्यैव स्वेदः षोपदेशेषु परिगणनादिति भावः। **इत्यास्वदीयाः**।

आ धृषाद्वेति। गणसूत्रम्। **विभाषितणिच इति**। विकल्पितणिचकाः प्रत्येतव्या इत्यर्थः। आकभिव्याप्ताविति मत्वाह **धृषधातुमभिव्याप्येति**। णिजभावपक्षे आह **अयौजीदिति**। **अर्च पूजायामिति**। अयमनुदात्तेदिति शाकटायनः। अर्चयते। अर्चते। अस्य भ्वादौ पाठः अनार्ष। अनेनैव सिद्धेः। नच परस्मैपदार्थं भ्वादावर्चेः पाठ इति वाच्यम्, भ्वादौ तस्यप्यात्मनेपदीयतायाः शाकटायनसंमतत्वेन माधवोक्तेः। एवमत्रत्यानामाधृषीयाणां भ्वादौ परस्मैपदिषु पाठः प्रामादिक एवेत्याहुः। **ली द्रवीकरणे**। **लाययतीति**। 'लीलोः–' इति नुक् तु न, लासाहचर्याद् हेतुमण्णावेवास्य प्रवृत्तेः। **लेतेति**। 'विभाषा लीयतेः' इत्यात्त्वं तु न, तत्र श्यन्विकरणयोरेव यका निर्देश इति भाष्यात्। **वृञ् आवरणे**। **वरिता, वरीतेति**। 'वृतो वा' इति दीर्घः। आशीर्लिङि व्रियात्। आत्मनेपदे तु 'लिङ्सिचोः–' इति वेट्। वृषीष्ट, वरिषीष्ट। इडभावपक्षे 'उश्च' इति कित्वान्न

आह **दीर्घस्य त्विति**। 'सः स्विदिस्वदिसहीनां च' इति सूत्रेण अभ्यासेणः परस्य सस्य सकारो न तु षत्वमिति वक्ष्यमाणत्वात्सन्नन्तेऽपि सिस्वादयिषतीत्यादि रूपं तुल्यमेवेत्यभिप्रेत्याह **असिस्वददिति**। इत्यास्वदीयाः। **आधृषाद्वा**। व्याख्यानात्, योग्यताबलाद्वा णिजिति संबध्यते। **अयौजीदिति**। णिजभावपक्षे अनिट्कोऽयमिति भावः। **ली द्रवीकरणे**। लिनातिलीयत्योर्यका निर्देश इति भाष्यकारोक्तत्वाद् 'विभाषा लीयतेः' इत्यात्वमिह न प्रवर्तत इति ध्वनयति। **लेतेति**। **वरीतेति**। 'वृतो वा' इति वा दीर्घः। लिङि वूर्यात्। आत्मनेपदे तु वृषीष्ट। वरिषीष्ट। 'लिङ्सिचोरात्मनेपदेषु' इति वेट्। 'न लिङि' इति इटो दीर्घनिषेधः। इडभावपक्षे 'उश्च' इति कित्वान्न गुणः। लुङि अवारीत। अवारिष्टम्।

च। त्राययति, त्रयति। त्रेता। रिच १८१७ वियोजनसम्पर्चनयोः। रेचयति, रेचति। रेक्ता। शिष १८१८ असर्वोपयोगे। शेषयति, शेषति। शेष्टा। अशिषत्। अयं विपूर्वोऽतिशये। तप १८१९ दाहे। तापयति, तपति। तप्ता। तृप १८२० तृप्तौ। 'संदीपने' इत्येके। तर्पयति, तर्पति। तर्पिता। छृदी १८२१ संदीपने। छर्दयति, छर्दति। छर्दिता। छर्दिष्यति। 'सेऽसिचि–' (२२०१) इति विकल्पो न। साहचर्यात्तत्र रौधादिकस्यैव ग्रहणात्। चृप छृप दृप सन्दीपने इत्येके। चर्पयति। छर्पयति। दृभी १८२२ भये। दर्भयति, दर्भति। दर्भिता। दृभ १८२३ संदर्भे। अयं तुदादावीदित्। श्रथ १८२४ मोक्षणे। हिंसायामित्येके। मी १८२५ गतौ। माययति, मयति। मेता। ग्रन्थ १८२६ बन्धने। ग्रन्थयति, ग्रन्थति। शीक १८२७ आमर्षणे। चीक १८२८ च। अर्द १८२९ हिंसायाम्। स्वरितेत्। अर्दयति, अर्दति, अर्दते। हिसि १८३० हिंसायाम्। हिंसयति, हिंसति। हिनस्ति इति श्नमि गतम्। अर्ह १८३१ पूजायाम्। आङः षद १८३२ पद्यर्थे। आसादयति, आसीदति,। 'पाघ्रा–' (सू २३६०) इति सीदादेशः। आसत्ता। आसात्सीत्। शुन्ध १८३३ शौचकर्मणि। शुन्धिता। अशुन्धीत् अशुन्धिष्टाम्। छद १८३४ अपवारणे। स्वरितेत्। जुष १८३५ परितर्कणे। परितर्कणमूहो हिंसा वा। परितर्पणे इत्यन्ये। परितर्पणं परितृप्तिक्रिया। जोषयति, जोषति। प्रीतिसेवनयोर्जुषत इति तुदादौ। धूञ् १८३६ कम्पने। णाविस्यधिकृत्य 'धूञ्प्रीञोर्नुग्वक्तव्यः' (वा ४२१९)। धूनयति, धवति, धवते। केचित्तु 'धूञ्प्रीञोः–' इति पठित्वा प्रीणातिसाहचर्याद् धुनातेरेव नुकमाहुः। धावयति। अयं स्वादौ क्र्यादौ तुदादौ च, स्वादौ ह्रस्वश्च तथा च

गुणः। 'न लिङि' इति इटो न दीर्घः। अत्रृत। त्रि चेति। ह्रस्वान्तोऽयम्। रिच वियोजन इति। अनिडयम्। ततश्च णिजभावपक्षे नेट्, तदाह रेक्तेति। शिष असर्वेति। अयमप्यनिट्, तदाह शेष्टेति। अशिषदिति। 'शल इगुपधात्–' इति क्सः। अयं विपूर्वोऽतिशय इति। वर्तते इति शेषः। अयमस्माद्विशिष्ट इत्यत्र अधिक इति गम्यते। तृप तृप्ताविति। अनिट्सु श्यना निर्देशादयं सेट्, तदाह तर्पितेति। छृदी संदीपन इति। ईदित्त्वं निष्ठाया-

---

अवारिषुः। 'सिचि च परस्मैपदेषु' इति दीर्घनिषेधः। आत्मनेपदे तु। अवरिष्ट। अवरीष्ट। इडभावे सिचो लोपः। अवृत। रिच। णिजभावे अयमनिडित्याह रेक्तेति। अशिषदिति। 'शल इगुपधात्–' इति क्सः। तृप। अनिट्सु श्यना निर्देशादयं सेडिति ध्वनयति तर्पितेति। छृदी। ईदित्वान्निष्ठायामनिट्। ऋवर्णा-

कविरहस्ये—

'धूनोति चम्पकवनानि धुनोत्यशोकं चूतं धुनाति धुवति स्फुटितातिमुक्तम्।
वायुर्विधूनयति चम्पकपुष्परेणून् यत्कानने धवति चन्दनमञ्जरीश्च ॥'

प्रीञ् १८३७ तर्पणे । प्रीणयति। 'धूञ्प्रीञोः–' इति हरदत्तोक्तपाठे तु प्राययति, प्रयति प्रयते। श्रन्थ १८३८ ग्रन्थ १८३९ सन्दर्भे। आप्लृ १८४० लम्भने । आपयति, आपति। आप्ता। आपत्। स्वरितेदयमित्येके। आप्ते। तनु १८४१ श्रद्धोपकरणयोः । उपसर्गाच्च दैर्घ्ये। तानयति वितानयति तनति वितनति। चन श्रद्धोपहननयोः इत्येके । चानयति चनति । वद १८४२ सन्देशवचने । वादयति। स्वरितेत् । वदति, वदते। अनुदात्तेदित्येके। ववदतुः। ववदिथ। ववदे। वद्यात्। वच १८४३ परिभाषणे। वाचयति, वचति। वक्ता। अवाक्षीत्। मान १८४४ पूजायाम्। मानयति, मानति। मानिता। विचारणे तु भौवादिको नित्यसन्नन्तः। स्तम्भे तु मानयते। इत्याकुस्मीयाः । मन्यते इति दिवादौ। मनुते इति तनादौ च । भू १८४५ प्राप्तावात्मनेपदी। भावयते, भवते। णिच्संनियोगेनैवात्मनेपदमित्येके। भवति। गर्ह १८४६ विनिन्दने। मार्ग १८४७ अन्वेषणे। कठि १८४८ शोके। उत्पूर्वोऽयमुत्कण्ठायाम्। कण्ठते इत्यात्मनेपदी गतः। मृजू १८४९ शौचालङ्कारयोः। मार्जयति, मार्जति। मार्जिता, मार्ष्टा। मृष १८५० तितिक्षायाम्। स्वरितेत्। मर्षयति, मर्षति मर्षते। मृष्यति, मृष्यते इति दिवादौ। सेचने अपि मर्षति। धृष १८५१ प्रसहने। धर्षयति, धर्षति। इत्याधृषीयाः।

मिणिनषेधार्थम् । धुवति स्फुटितेति। शनिकरणस्य रूपम् । शस्य ङित्वाद् गुणाभावे उवङ्। प्रीञ् तर्पणे। प्रीणयतीति। 'धूञ्प्रीञोः–' इति वार्तिकान्नुगिति भावः। हरदत्तेति। अनेन भाष्यासंमतत्वं सूचितम् । उपसर्गाच्चेति। दैर्घ्ये तु उपसर्गादनुपसर्गाच्च परस्तनुधातुराधृषीयो वेदितव्य इत्यर्थः। श्रद्धोपकरणयोस्त्वनुपसर्गादेवेति भावः। वच परिभाषणे। अवाक्षीदिति। अस्यतिवक्ति–' इति लुका निर्देशादङ् नेति भावः। 'वचिस्वपि–' इति संप्रसारणम्, उच्यात्। इत्याधृषीयाः।

नस्य णत्वम्। क्ष्रणः। क्ष्रणवान्। ह्रस्वश्चेति। धुञ् कम्पने इत्यर्थः। अवाक्षीदिति। 'अस्यतिवक्ति–' इति लुका निर्देशादङ् नेति भावः 'वचिस्वपि–' इति संप्रसारणम्। उच्यात्। धृष प्रसहने। केचिदित्वादितमाहुस्तन्मते धृष्टो मुख्यमते तु धर्षितः। नन्वत्र 'निष्ठा शीङ्–' इत्यादिना सेरिनष्ठायाः किरवनिषेधाद् गुणेन भाव्य-

अथादन्ताः। कथ १८५२ वाक्यप्रबन्धे। अल्लोपस्य स्थानिवद्भावान्न वृद्धिः। कथयति। अग्लोपित्वान्न दीर्घसन्वद्भावौ। अचकथत्। वर १८५३ ईप्सायाम्। वरयति। वारयतीति गतम्। १८५४ संख्याने। गणयति। २५७३ ई च गणः। (७-४-९७) गणेरभ्यासस्य ईत्स्यात् चङ्परे णौ। चादत्।

अथादन्ता इति। वक्ष्यन्ते इति शेषः। अन्ते अकारो नेत्संज्ञकः, नाप्युच्चारणार्थ इति भावः। तत्र कथधातोर्णिचि अतो लोपे कथि इत्यस्मात् तिपि शपि गुणे अयादेशे कथयतीति रूपं वक्ष्यति। तत्र णिचमाश्रित्य उपधावृद्धिमाशङ्क्याह अल्लोपस्य स्थानिवद्भावादिति। 'अचः परस्मिन्–' इत्यनेनेति भावः। अत्रेदमवधेयम्। स्थानिनि सति शास्त्रीयं यत्कार्यं तदेव स्थानिवदादेशोऽनल्विधाविल्यत्रातिदिश्यते। यत्तु स्थानिनि सति निमित्तव्याघातान्न भवति तस्याभावस्य अशास्त्रीयत्वान्नातिदेशः। अन्यथा नायक इत्यत्र ईकारस्थानिकस्य ऐकारस्य आयादेशानापत्तेः। ईकारे स्थानिनि सति आयभावस्य दृष्टत्वेन तस्याप्यैकारे अतिदेशप्रसङ्गात्। 'अचः परस्मिन्–' इत्यत्र तु स्थानिनि सति यत् शास्त्रीयं कार्यं प्रसज्यते तस्य, तदभावस्य चाशास्त्रीयस्याप्यतिदेश इति भाष्ये स्पष्टम्। अतोऽत्र थकारादकारे सति प्रसक्तस्य उपधावृद्ध्यभावस्य अशास्त्रीयत्वेऽप्यतिदेश इति सिद्धम्। लुङि चङि अचकथत् इत्यत्र सन्वत्त्वमाशङ्क्याह अग्लोपित्वादिति। सन्वत्त्वनिषेधे जायमानोऽभ्यासदीर्घः सन्वत्त्वं नापेक्षत इति पृथगुक्तिः। एवं वरादौ सर्वत्र ज्ञेयम्। गण संख्याने। चङि अल्लोपस्य स्थानिवत्त्वात् दीर्घसन्वद्भावयोरभावे अजगणदित्येव प्राप्ते आह ई च गणः। 'सन्वल्लघुनि–' इत्यतः चङ्परे इति, 'अत्र लोपः–' इत्यतः अभ्यासस्येति चानुवर्तते, तदाह गणेरभ्यासस्येति।

मिति चेत्। अत्राहुः—आदित्साहचर्यादादित एव ञिधृषेत्यस्य तत्र ग्रहणात्। न च आदितो निग्राया इड् दुर्लभ इति शङ्क्यम्। 'विभाषा भावादिकर्मणोः' इति तत्संभवादिति। इत्याधृषीया युजादयः। अथादन्ता इति। वक्ष्यमाणेषु धातुषु अन्त्यावयवोऽकारो न तूच्चारणार्थ इत्यर्थः। स्थानिवत्त्वान्न वृद्धिरिति। 'अचः परस्मिन्–' इति सूत्रेणेत्यर्थः। न च स्थानिनि सति यत्कार्यं तदेव स्थानिवदित्यनेनातिदिश्यते न त्वादेशप्रयुक्तं वार्यते। अन्यथा नायकः पावक इत्यादि न सिध्येदिति वृद्धिरत्र दुर्वारेति वाच्यम्, 'अचः परस्मिन्' इत्यत्र स्थानिवदित्यनुवर्त्य शब्दाधिकारपक्षाश्रयेण भावाभावावुभावप्यतिदिश्येते इति सिद्धान्तात्। स्थानिनि सत्यभवन्त्या वृद्धेरादेशेऽप्यभावात्। स्थानिनि सति यन्न भवति तदादेशेऽपि न भवतीत्यत्र तु 'न पदान्त–' इति सूत्रस्थयलोपादिग्रहणमेव लिङ्गमिति दिक्। ई च गणः।

अजगणत्, अजीगणत्। शठ १८५५ श्वठ १८५६ सम्यगवभाषणे। पठ १८५७ वठ १८५८ ग्रन्थे। रह १८५९ त्यागे। अररहत्। स्तन १८६० गदी १८६१ देवशब्दे। स्तनयति। गदयति। अजगदत्। पत १८६२ गतौ वा। वा णिजन्तः। वा अदन्त इत्येके। आद्ये पतयति, पतति। पतयांचकार। अपतीत्। द्वितीये पातयति अपीपतत्। पष १८६३ अनुपसर्गात्। गतावित्येव। पषयति। स्वर १८६४ आक्षेपे। अस्वरयति। रच १८६५ प्रतियत्ने। रचयति। कल १८६६ गतौ संख्याने च। चह १८६७ परिकल्कने। परिकल्कनं दम्भ शाठ्यं च। मह १८६८ पूजायाम्। महयति। महति इति अपि गतम्। सार १८६९ कृप १८७० श्रथ १८७१ दौर्बल्ये। सारयति। कृपयति। श्रथयते। स्पृह १८७२ ईप्सायाम्। भाम १८७३ क्रोधे। अबभामत्। सूच १८७४ पैशुन्ये। सूचयति। अषोपदेशत्वान्न षः। असुसुचत्। खेट १८७५ भक्षणे। तृतीयान्त इत्येके।

'अत्स्मृदृत्वर-' इति पूर्वसूत्रादद्ग्रहणं चकारादनुकृष्यते, तदाह चादिति। स्तनगदी देवशब्द इति। पर्जन्यगर्जन इत्यर्थः। स्तनश्च गदिश्चेति द्वन्द्वः। गदीति इका निर्देशः। गदेत्यकारान्तात् इकि अल्लोपे गदीति निर्देशः। एवं च प्राकरणिकमदन्तत्वं न व्याहन्यते। पत गतौ वेति। गत्यर्थे पतधातुः णिचं वा लभत इत्यर्थः, तदाह वा णिजन्त इति। आधृषीयत्वाभावाद् विकल्पविधिः। यद्वा वाशब्दस्य अदन्तत्व एवान्वयः। णिच् तु नित्य एव, तदाह वा अदन्त इत्येक इति। प्रथमपक्षे तु अदन्तत्वमेव, तदाह आद्ये पतयतीति। अल्लोपस्य स्थानिवत्त्वान्न वृद्धिः। पतयांचकारेति। णिजभावेऽप्यदन्तत्वात् 'कास्यनेकाच्-' इत्याममिति भावः। चङि अपपतत्। अल्लोपित्वान्न दीर्घसन्वत्त्वे। द्वितीये पातयतीति। तकारादकारस्य उच्चारणार्थत्वादुपधावृद्धिरिति भावः। अपीपतदिति। अल्लोपित्वाभावाद्दीर्घसन्वत्त्वे इति भावः। कृपयतीति। अदन्तस्य तस्य धात्वन्तरत्वात् 'कृपो रो लः' इति न भवति। स्पृह ईप्सायाम्। आप्तुमिच्छा ईप्सा। अबभामदिति। चङि अल्लोपस्य स्थानिवत्त्वान्नोपधाह्रस्वः। सूच पैशुन्ये। अषोपदेशत्वादिति। अनेकाच्त्वादिति भावः। खेट भक्षणे। तृतीयान्त इति। टवर्गतृतीयान्त इत्यर्थः।

'अत्स्मृदृत्वर-' इत्यत्र योऽन् स चकारेण समुच्चीयते। स्तन गदी। गदीत्यत्र इका निर्देशादतो लोपः। अनेकाच्त्वेनाषोपदेशत्वात्षत्वं न। तिस्तनयिषति। 'स्तनिहृषिपुषि-' इति णेरिष्णुच् 'अयामन्ता-' इत्ययादेशः। 'स्तनयित्नुर्बलाहकः'। पत गतौ वा। गणसूत्रमिदम्। कृपयतीति। 'कृपो रो लः' इति न प्रवर्तते।

स्रोट इत्यन्ये । चोट १८७६ क्षेपे । गोम १८७७ उपलेपने । अजुगोमत् । कुमार १८७८ क्रीडायाम् । अचुकुमारत् । शील १८७९ उपधारणे । उपधारणम्भ्यासः । साम १८८० सान्त्वप्रयोगे । अससामत् । साम सान्त्वने इत्यतीतस्य तु असीषमत् । वेल १८८१ कालोपदेशे । वेलयति । काल इति पृथग्धातुरित्येके । कालयति । पल्पूल १८८२ लवनपवनयोः । वात १८८३ सुखसेवनयोः । गतिसुखसेवनेषु इत्येके । वातयति । अववातत् । गवेष १८८४ मार्गणे । अजगवेषत् । वास १८८५ उपसेवायाम् । निवास १८८६ आच्छादने । भाज १८८७ पृथक्कर्मणि । सभाज १८८८ प्रीतिदर्शनयोः । प्रीतिसेवनयोरित्यन्ये । सभाजयति । ऊन १८८९ परिहाणे । ऊनयति । 'ओः पुयण्जि-' (सू २५७७)

साम सान्त्वप्रयोगे । सान्त्वप्रयोगः अकटुभाषणम् । **अससामदिति** । अल्लोपस्य स्थानिवत्त्वान्नोपधाह्रस्वः । ननु साम सान्त्वने इति कथादेः प्राक् चुरादौ पाठो व्यर्थः अनेनैव सिद्धेरित्यत आह **साम सान्त्वन इत्यतीतस्य तु असीषमदिति** । पूर्वपठिते सामधातौ मकारादकारस्य उच्चारणार्थतया उपधाह्रस्वः दीर्घसन्वत्त्वे चेत्यर्थः । यद्यपि साम सान्त्वप्रयोगे इत्येव प्राक् चुरादौ पठितम्, तथापि सान्त्वनस्य सामप्रयोगादनन्यत्वात्तथोक्तिरिति भावः । **गवेष मार्गणे** । मार्गणम् अन्वेषणम् । चङि अल्लोपस्य स्थानिवत्त्वान्नोपधाह्रस्वः, तदाह **अजगवेषदिति । निवास आच्छादने** । अनिनिवासत् । **ऊन परिहाणे** । परिहाणं न्यूनीभावः । **ऊनयतीति** । णावतो लोप इति भावः । ननु लुङि चङि ऊन इ अ त् इति स्थिते णिलोपे 'चङि' इत्यजादेर्द्वितीयस्य नशब्दस्य द्वित्वे अतो लोपे अग्लोपित्वेन सन्वत्त्वाभावादभ्यासे इत्त्वदीर्घयोरभावे आटो वृद्धौ औननदिति रूपं वक्ष्यति । तदनुपपन्नम्, द्वित्वात्प्रागेव परत्वादतो लोपे कृते निशब्दस्य द्वित्वे औनिनदित्येवमभ्यासे इकारश्रवणप्रसङ्गात् । न च द्वित्वे कार्ये अतो लोपस्य 'द्विर्वचनेऽचि' इति निषेधः शङ्क्यः, अल्लोपनिमित्तस्य णिचो द्वित्वनिमित्तत्वाभावाद् इत्यत आह **ओः पुयण्जीत्यादि** । 'ओः पुयण्ज्यपरे' इति सूत्रे ओः पयोरपर-

---

तत्र कृपू सामर्थ्ये इत्यस्य ग्रहणात्, कृपप्रकृतिकणिजन्तस्य तु धात्वन्तरत्वात् । **स्पृह** । आप्तुमिच्छा ईप्सा । **अवभामदिति** । अल्लोपस्य स्थानिवत्त्वाद् 'णौ चङि-' इत्युपधाह्रस्वो न । **सूच** । पिशुनो दुर्जनस्तस्य कर्म पैशुन्यम् । **अषोपदेशत्वादिति** । अनेकाच्त्वादिति भावः । **साम सान्त्वन इत्यतीतस्य त्विति** । अयं तु धातुरितः प्राक् मूलपुस्तके न कुत्रापि दृष्टः पुस्तकान्तरेषु मृग्यः । केचित्तु साम सान्त्वने इत्यस्य क्वाप्यपठितत्वेऽपि षान्त्व सामप्रयोगे इति प्राक्पठितमेव । तत्र च षान्त्व सामेति

इति सूत्रे पययोरिति वक्तव्ये वर्गप्रत्याहारजकारग्रहो लिङ्गं 'णिचि अच आदेशो

योरित्येव वक्तव्ये पु इति पवर्गस्य यणिति प्रत्याहारस्य जकारस्य च ग्रहणं लिङ्गमित्यन्वयः। कुत्र लिङ्गमित्यत आह **णिच्चीत्यादि**। द्वित्वे कार्ये णिजिनिमित्तकः अच आदेशो न स्यादित्यत्र लिङ्गमिति पूर्वेणान्वयः। तथाहि 'ओः पुयण्ज्यपरे' इति सूत्रम्। सनि परे यदङ्गं तदवयवाभ्यासोवर्णस्य इकारः स्यात् अवर्णपरकेषु पवर्गयणजकारेषु परत इति तदर्थः। पूङ् पिपावयिषति, भू बिभावयिषति, यु यियावयिषति, रु रिरावयिषति, लूञ् लिलावयिषति, जु जिजावयिषति इत्युदाहरणानि। अत्र द्वित्वं प्रत्ययनिमित्ते णिचि 'द्विर्वचनेऽचि' इति निषेधाप्रवृत्त्या द्वित्वात् प्रागेव परत्वाद् वृद्ध्यावादेशयोः कृतयोः अभ्यासेऽकारस्य ह्रस्वे सति 'सन्यतः' इत्येव इत्वसिद्धेः पवर्गयणप्रत्याहारजकारग्रहणं व्यर्थम्। पकारयकारग्रहणं तु न व्यर्थम्। पिपावयिषति यियावयिषतीत्यत्र उक्तरीत्या 'सन्यतः' इति इत्वसिद्धावपि पिपविषते यियविषतीत्यत्र पूङ्धातोर्युधातोश्च अजन्तात् सनि अभ्यासे इत्वार्थं तदावश्यकत्वात्। तत्र हि 'इको झल्' इति सनः कित्वात् 'श्र्युकः किति' इति प्राप्तमिनिषेधं बाधित्वा 'स्मिपूङ्रञ्ज्वशां सनि' इति 'सनीवन्तर्धभ्रस्जदम्भुश्रिस्वृयूर्णुभरज्ञपिसनाम्' इति च सूत्राभ्यामिटि कृते इडादेः सनो द्वित्वनिमित्तत्वेन इटोऽपि द्वित्वनिमित्ततया 'द्विर्वचनेऽचि' इति गुणावादेशयोर्निषेधे सति पू यु इत्यनयोर्द्वित्वे अभ्यासे अकाराभावेन 'सन्यतः' इत्यस्याप्रवृत्त्या तत्र इत्वार्थं पयोरित्यावश्यकम्। वर्गप्रत्याहारजकारग्रहणं तु 'द्वित्वे कार्ये णावच आदेशो न' इत्यनाशयेन व्यर्थमेव।

धातुद्वयं प्रयोगे वर्तते। प्रयोगश्च सान्त्वप्रयोगपरः। स च सान्त्वनमेवेत्येवं ग्रन्थकाराशयं वर्णयित्वा स्थितस्य गतिं समर्थयन्ते। **गवेष**। मार्गणमन्वेषणम्। **ऊन परिहाणे**। अस्माण्णौ चङि द्वित्वात्परत्वादन्तरङ्गत्वाच्च अल्लोपेन 'अजादेर्द्वितीयस्य' इति णिचा सह द्वित्वे औनिनदित्यनिष्टं प्रसज्येत, किं तु औननदित्येवं रूपमिष्टम्। तच्च नशब्दस्य द्वित्वं विना न संभवति। न च 'द्विर्वचनेऽचि' इति सूत्रेण द्वित्वे कर्तव्ये अल्लोपस्य स्थानिवद्भावाभिषेधाद्वा नशब्दस्य द्वित्वं सिध्यतीति वाच्यम्, णिचो द्वित्वनिमित्तत्वाभावादत आह **ओः पुयण्जीत्यादि**। संपूर्णसूत्रं लिङ्गमिति केषांचिद् भ्रमं निवर्तयितुमाह **पयोरिति**। अयं भावः—'स्मिपूङ्रञ्ज्वशां सनि', 'सनीवन्तर्ध–' इति सूत्राभ्यां पूङ्यौतिभ्यां परस्य सन इडागमे कृते 'द्विर्वचनेऽचि' इति स्थानिवद्भावादादेशनिषेधाद्वा उवर्णान्तस्यैव द्वित्वमिति पुपविषते युयविषतीत्यनिष्टं प्रसज्येत। ततश्चाभ्यासोवर्णस्येत्वार्थं पयोरित्यपेक्षितम्। अन्यथा पिपविषते यियविषतीति न सिध्येदिति। **वर्गप्रत्याहारेति**। पुयण्जीति वर्गादिग्रहण-

न स्याद् द्वित्वे कार्ये' इति । यत्र द्विरुक्तावभ्यासोत्तरखण्डस्याद्योऽच् प्रक्रियायां

तदाश्रयणे तु बिभावयिषतीत्यादिषु णिचि लुप्ते सति 'चङि' इति द्वित्वे कार्ये प्रत्ययलक्षणमाश्रित्य णि चे गुणावादेशयोः प्रतिषेधे सति उवर्णान्तानां द्वित्वे अभ्यासे अकाराभावेन 'सन्यतः' इत्यस्याप्रवृत्त्या वर्गप्रत्याहारजकारग्रहणमर्थवत् । अतः द्वित्वे कार्ये णावच आदेशो नेति विज्ञायत इत्यर्थः । ननु 'कृत संशब्दने' अस्माद् णौ 'उपधायाश्च' इति ऋत इत्वे रपरत्वे किर्त् इत्यस्मात् लुङि चङि णिलोपे द्वित्वे हलादिशेषे कस्य चुत्वे उत्तरखण्डे इकारस्य 'उपधायां च' इति दीर्घे अचिकीर्तदिति रूपमिष्यते । तन्न युज्यते, द्वित्वे कर्तव्ये णावच आदेशस्य निषिद्धतया इत्त्वात्प्रागेव कृत् इत्यस्य द्वित्वे, उरदत्वे, रपरत्वे, हलादिशेषे, कस्य चुत्वे, उत्तरखण्डे, ऋत इत्वे, रपरत्वे, उपधादीर्घे, अचकीर्तदित्यापत्तेरित्यत आह यत्र द्विरुक्तावित्यादि । यत्र धातौ चङि द्विर्वचने कृते अभ्यासोत्तरखण्डस्य आद्योऽच् अवर्णो लभ्यते तत्रैव द्वित्वे कार्ये णावच आदेशो नेत्ययं निषेध इत्यन्वयः । यद्यपि धातोरवयवस्य एकाचो द्वित्वे कृते अभ्यासोत्तरखण्डे द्वितीयस्याचोऽभावादाद्योऽजिति

फलं तु अबीभवत् अपीपवत् अरीरवत् अलीलवत् अजीजवत् बिभावयिषति पिपावयिषति रिरावयिषति लिलावयिषतीत्यादिरूपसिद्धिरिति वाच्यम् । तद् दुरुपपादम् । णिचि परत्वादन्तरङ्गत्वाच्च वृद्ध्यादौ कृते द्वित्वे सत्यभ्यासे उवर्णस्य दुर्लभत्वादकारस्य 'सन्यतः' इतीत्वेन रूपसिद्धेश्च । ततो वर्गादिग्रहणं व्यर्थं सदुक्तार्थे ज्ञापकमिति भावः । ज्ञापनफलं तु यत्र 'ओः पुयण्ज्–' इत्यस्याप्राप्तिस्तत्र बोध्यम् । तद्यथा—चुच्चावयिषति । चङि अचुच्चवत् । उडुरिवाचरति उडवति । 'सर्वप्रातिपदिकेभ्यः–' इत्याचारे क्विप् तदन्ताद्धातोर्णौ सन् । उडुडावयिषति । चङि औडुडवत् । तु इति सौत्रो धातुस्ततो णौ सन् । तुतावयिषति । चङि अतूतवत् । नुनावयिषति । अनूनवत् । पुस्फारयिषति । अपुस्फुरत् । 'चिस्फुरोर्णौ' इति वा आत्वम् । अपुस्फरदित्यादिष्वभ्यासे उकारश्रवणं भवति ज्ञापनात्, अन्यथा चित्तावयिषतीत्यादि प्रसज्येत । तदेतत्सकलमभिप्रेत्य वार्तिककृतोक्तम् 'ओः पुयण्जिषु वचनं ज्ञापकं णौ स्थानिवद्भावस्य' इति । स्थानिवद्भावः प्रतिषेधस्याप्युपलक्षणम् । अच आदेशो न स्यादिति । प्रतिषेधपक्षो मुख्य इत्यभिप्रेत्येदमुक्तम् । प्रतिषेधः स्थानिवद्भावस्याप्युपलक्षणमिति बोध्यम् । नन्वेवं कृत संशब्दन इति धातोर्णौ चङि इरादेशात्प्रागेव कृत इत्यस्य द्वित्वे उरदत्वे च अचकीर्तदिति स्यान्न तु अचिकीर्तदित्यत आह यत्र द्विरुक्ताविति । आद्योऽजिति । चङ्सहितस्योत्तरखण्डत्वमभ्युपेत्येदमुक्तम् । अन्ये तु आद्यग्रहणं स्पष्टप्रतिपत्त्यर्थं धातोरवयवस्यैकाचो द्वित्वे सत्यभ्यासोत्तरखण्डे अज्द्वयासंभवादित्याहुः ।

परिनिष्ठिते रूपे वाऽवर्णो लभ्यते तत्रैवायं निषेधः, ज्ञापकस्य सजातीयापेक्षत्वात्। तेन अचिकीर्तत् इति सिद्धम्। प्रकृते तु नशब्दस्य द्वित्वम्, तत उत्तर-

---

र्थ्यर्थमेव। तथापि स्पष्टार्थं तदित्याहुः। नन्वभ्यासोत्तरखण्डः यावोऽजवर्णो लभ्यते इत्यत्र किमवर्णो द्वित्वप्रवृत्तिवेलायां विवक्षित उत परिनिष्ठिते रूपे विवक्षितः? नाद्यः, क्षुधातोर्ण्यन्तात् सनि चुक्षावयिषतीत्यत्र क्षु इत्यस्य द्वित्वे कृते अभ्यासोत्तरखण्डे प्रक्रियादशायामवर्णाभावेन वृद्ध्यावादेशयोर्निषेधाप्रवृत्त्या द्वित्वात् प्रागेव परत्वाद् वृद्ध्यावादेशयोः क्षाव् इत्यस्य द्वित्वे चिक्षावयिषतीत्यापत्तेः। न द्वितीयः, ऊन इ अ त् इति स्थिते सति न इत्यस्य द्वित्वे अभ्यासोत्तरखण्डे अल्लोपे सत्यवर्णाभावेन णौ अल्लोपस्य निषेधाप्रवृत्त्या द्वित्वात् प्रागेव परत्वादतो लोपे सति नि इत्यस्य द्वित्वे औनिनदित्यापत्तेरित्यत आह **प्रक्रियायां परिनिष्ठिते रूपे वेति।** न त्वमुकत्रैवेत्याग्रह इति भावः। सजातीये पुयण्जाम् अभ्यासोत्तरखण्डे अवर्णपरत्वनियमादिति भावः। **सिद्धमिति।** प्रक्रियायां परिनिष्ठिते वा उत्तरखण्डे अवर्णाभावादृत इत्त्वस्य न निषेध इति भावः एवं च चुक्षावयिषति इत्यत्र क्षु इत्यस्य द्वित्वे प्रक्रियादशायामभ्यासोत्तरखण्डे अवर्णाभावेऽपि परिनिष्ठिते रूपे तत्सत्त्वाद् णौ गुणावादेशयोर्भवत्येव द्वित्वे कार्ये निषेधः। औननदित्यत्रापि णौ भवत्येवाल्लोपस्य निषेध इत्याह **प्रकृते त्विति।** औननदित्यत्रेत्यर्थः। **नशब्दस्येति।** अल्लोपात्प्रागेव नशब्दस्य द्वित्वाश्रयणे प्रक्रियादशायामुत्तरखण्डे अवर्णलाभादल्लोपस्य निषेधे सति नशब्दस्यैव द्वित्वं न तु नि शब्दस्येति भावः।

औजढत् औननदित्यादौ परिनिष्ठिते अवर्णस्यालाभादाह **प्रक्रियायामिति।** चुक्षावयिषतीत्यादौ प्रक्रियायामवर्णो न लभ्यते इत्याह **परिनिष्ठिते रूपे वेति।** वाशब्दोऽनास्थायाम्। कश्चिदवर्णपरत्वं विवक्षितं न तु अमुकत्रैवेत्याग्रह इति भावः। **सजातीयापेक्षत्वादिति।** पुयण्जोरभ्यासोत्तरखण्डे अवर्णपरा भवन्ति। अतस्तथैव ज्ञापकमित्यर्थः। अतएव भाष्यकृता पवर्गादेरन्यस्मिन्नपि हलि अवर्णपरे एव स्थानिवत्त्वमिति अचिकीर्तदित्यादौ नातिव्याप्तिरिति सिद्धान्तितम्। ननु 'ओः पुयण्जि–' इति सूत्रे णिचि इति नास्ति, तथा च णिच्यच आदेशो न स्यादित्यर्थे कथमिदं ज्ञापकं भवेत्। न च सामान्यतो द्वित्वे कार्ये अच आदेशो न स्यादित्येव ज्ञाप्यतामिति वाच्यम्, दिद्यवनीयिषति निनवयिषतीत्यादावभ्यासे उकारश्रवणप्रसङ्गादिति चेत्। अत्राहुः––येन नाव्यवधानमित्येकेन प्रत्ययेन द्वित्वनिमित्तप्रत्ययस्य व्यवधानमाश्रीयते। तच्च णेरेव संभवतीति णिज्विषयकमेव ज्ञापकम्, दिद्यवनीयिषतीत्यत्र तु ल्युटा क्यचा व्यवधानादनेकव्यवधानमिति न तद्विषयकं ज्ञापनमिति। आसे-

खण्डेऽल्लोपः, औननत्। मा भवानूननत्। ध्वन १८१० शब्दे। अदध्वनत्।

तत इति। नशब्दस्य द्वित्वानन्तरमुत्तरखण्डे अल्लोप इति भावः। अत्र नशब्द-द्वित्वार्थमेव ऊनधातोरदन्तत्वं स्थितम्। फलान्तरं सूचयन्नाह मा भवान् ऊन-

न्मते आचारक्विबन्ताद्ध्वनशब्दात्सनि दुदवनिषतीति स्यात्, तच्च नेष्यते, णौ स्थानिवद्भावस्य ज्ञापकमिति वार्तिकोक्तेः। स्थानिवत्त्वेन प्रतिषेधेन वा णावेवाभ्यासे उकारेण भवितव्यम्। अतो वार्तिककारवचनादेव णौ स्थानिवदिति स्वीकर्तव्यम्। तथा च न पूर्वोदाहरणेषु दोष इति दिक्। फलितमाह **प्रकृते त्विति**। **औननदिति**। 'नोनयति ध्वनयति—' इति चङ्निषेधस्त्विह न। तत्र छन्दसीत्यनुवृत्त्या 'मा त्वावतो जरितुः काममूनयीः' इत्यादिवेदे एव तन्निषेधात्। यद्यपि परिनिष्ठित एवावर्णपरत्वमित्याशयेन उवर्णादेश एव स्थानिवत्स्यान्नान्य इति वदतां बोपदेवादीनां मते औनिनदित्येव भाव्यम्, अवर्णादेशस्य स्थानिवत्त्वे तु परिनिष्ठितरूपे अवर्णपरत्वालाभात्तथापि अचिकीर्तदित्यादौ स्थानिवत्त्वमाशङ्क्य उत्तरभागे अवर्णाभावादिति भाष्यकारोक्तपरिहारपर्यालोचनया उवर्णादेश एव स्थानिवदिति नियमो नास्तीत्यौननदिति रूपं निर्बाधमेव। किं च उवर्णादेश एवेति नियमे 'लोपः पिबतेरीच्चाभ्यासस्य' इति सूत्रे अपीप्यदित्यत्र पिबतेर्णौ 'शाच्छासा—' इत्यादिना युकि चङि उपधालोपे तस्य स्थानिवत्त्वात्पाय्शब्दस्य द्वित्वमिति वृत्तिग्रन्थो विरुध्येत। अपि च 'शुष्किका शुष्कजङ्घा च क्षामिमानौजढत्तथा' इति वैयाघ्रपद्यवार्तिकस्य औजढदिति प्रयोगोऽपि विरुध्येत। एतद्धि पूर्वत्रासिद्धमित्यस्य प्रयोजनकथनवार्तिकम्। तथा— शुष्किकेत्यत्र तु 'उदीचामातः—' इतीत्वविकल्पो न, 'शुषः कः' इति कत्वस्यासिद्धत्वेन यकपूर्वत्वाभावात्। शुष्कजङ्घेत्यत्र कत्वस्यासिद्धत्वादेव 'न कोपधायाः' इति पुंवद्भावनिषेधो न। क्षामिमानित्यत्र तु 'मादुपधायाः—' इति वत्वं न। 'क्षायो मः' इति मत्वस्यासिद्धत्वात्। वहेः क्तान्तारिण्णिचि चङि औजढदित्यत्र ढत्वस्यासिद्धत्वाण्णौ कृतस्य टिलोपस्य स्थानिवत्त्वाच्च ह्तशब्दस्य द्वित्वं 'कुहोश्चुः' 'अभ्यासे चर्च'। सन्वदित्वं तु अनग्लोपीति प्रतिषेधान्न भवति। एवं काशिकायामपि 'पूर्वत्रासिद्धम्' इति सूत्रे औजढदित्युदाहृत्य ऊढिमाख्यदौजिढदित्येतत्तु क्तिन्नन्तस्य ऊढिशब्दस्य भवतीत्युक्तम्, तदपि विरुध्येत, उवर्णादेश एव स्थानिवदिति नियमे णौ कृतस्य टिलोपस्यात्र स्थानिवत्त्वाभावेन ह्तशब्दस्य ह्तिशब्दस्य वा द्वित्वासंभवात्। एवं चाङ्कधातोर्णौ ट्यल्लोपे चङि स्थानिवत्त्वात्कशब्दस्य द्वित्वे आचकदिति रूपमेव सर्वसंमतं न त्वाचिकदिति बोपदेवोक्तमिति बोध्यम्। नन्वचिकीर्तदित्यादौ स्थानिवत्त्वमाशङ्क्योत्तरभाग अवर्णाभावादिति वदन्भाष्यकारो न बोपदेवग्रन्थस्य प्रतिकूलः। उत्तरभागे परिनिष्ठित-

कूट १८९१ परितापे। परिदाहे इत्यन्ये। संकेत १८९२ ग्राम १८९३ कुण १८९४ गुण १८९५ चामन्त्रणे। चात्कूटोऽपि। कूटयति। संकेतयति। ग्रामयति। कुणयति। गुणयति। पाठान्तरम्—केत श्रावणे निमन्त्रणे च। केतयति। निकेतयति। कुण गुण चामन्त्रणे। चकारात्केतेति। कूण १८९६ संकोचने इति। स्तेन १८९७ चौर्ये। अतिस्तेनत्।

आ गर्वादात्मनेपदिनः। पद १८९८ गतौ। पदयते। अपपदत। गृह १८९९ ग्रहणे। गृहयते। मृग १९०० अन्वेषणे। मृगयते। मृग्यति इति कण्ड्वादिः। कुह १९०१ विस्मापने। शूर १९०२ वीर १९०३ विक्रान्तौ। स्थूल १९०४ परिबृंहणे। स्थूलयते। अतुस्थूलत। अर्थ १९०५ उपयाच्ञायाम्। अर्थयते। आर्तथत। सत्र १९०६ सन्तानक्रियायाम्। असससत्रत।

नदिति। अग्लोपित्वान्नोपधाह्रस्व इति भावः। पाठान्तरमिति। केत श्रावणे इत्यादि ज्ञेयमित्यर्थः। चकारात्केतेति। समुच्चीयते इति शेषः। संकोचने इतीति। इतिशब्दः पाठान्तरसमाप्तौ। स्तेन चौर्ये। अनेकाच्त्वान्न षोपदेशोऽयमिति मत्वाह अतिस्तेनदिति।

गृह ग्रहणे। ऋदुपधोऽयम्। गृहयते इति। अल्लोपस्य स्थानिवत्त्वान्न गुण इति भावः। लुङि अजगृहत। अग्लोपित्वान्न सन्वत्त्वम्। मृग अन्वेषणे। मृगयते इति। इहाप्यल्लोपस्य स्थानिवत्त्वान्न गुणः। 'मार्ग अन्वेषणे' इत्याधृषीयस्य तु मार्गयति मार्गति इति च गतम्। अर्थ उपायाच्ञायाम्। अर्थयते इति। अर्थ इ इति स्थिते अतो लोपः। न तु 'अचो ञ्णिति' इति वृद्धिः, वृद्धेर्लोपो बलीयानिति न्यायात्। 'अर्थवेदयोः-' इत्यापुक्तु न, तत्र प्रातिपदिकस्य

रूपे अवर्णपरत्वमुवर्णादेशस्यैव संभवति नान्यस्येत्याशयेनैव भाष्यकारेण तथोक्तमिति वक्तुं शक्यत्वादिति चेत्। मैवम्। तथा हि सति यत्र 'ओः पुयण्जि-' इत्यस्याप्रसिस्तत्राप्युवर्णादेश एव स्थानिवद् ज्ञापकस्य सजातीयापेक्षत्वादित्येवमेव भाष्यकारो वदेत्, ऋजुमार्गेण सिध्यतोऽर्थस्य वक्रेण साधनायोगादिति दिक्। सङ्केत। चत्वारोऽत्र धातवः। पाठान्तरमिति। संकोचन इत्येतत्पर्यन्तम्। अनेकाच्त्वेनाषोपदेशत्वात्षत्वं नेति ध्वनयति अतिस्तेनदिति। गृहयते इति। अल्लोपस्य स्थानिवत्त्वान्न गुणः। लुङि अजगृहत्। अग्लोपान्न सन्वद्भावः। मृगयते इति। मार्गयति मार्गतीति तु मार्ग अन्वेषण इत्याधृषीयस्य। अर्थ। अर्थयते इति। 'वृद्धेर्लोपो बलीयान्' इत्यल्लोपान्न वृद्धिः। बोपदेवस्तु वृद्धौ कृतायां पुकि चाऽर्थापयते इति रूपमाह तद्भ्रमसात्। न च 'अर्थवेदसत्यानाम्-' इत्यापुक् स्यादेवेति वाच्यम्,

अनेकाच्त्वाच्च षोपदेशः। सिसत्रयिषते। गर्व १६०७ माने। गर्वयते। अदन्तत्वसामर्थ्याण्णिज्विकल्पः। धातोरन्त उदात्तः, लिटि आम् च फलम्। एवमग्रेऽपि। इत्यागर्वीयाः।

सूत्र १६०८ वेष्टने। सूत्रयति। असुसूत्रत्। मूत्र १६०९ प्रस्रवणे। मूत्रयति, मूत्रति। रूक्ष १६१० पारुष्ये। पार १६११ तीर १६१२ कर्मसमाप्तौ। अपपारत्। अतितीरत्। पुट १६१३ संसर्गे। पुटयति। धेक १६१४ दर्शने इत्येके। अदिधेकत्। कत्र १६१५ शैथिल्ये। कत्रयति, कत्रति। कर्त इत्यप्येके। कर्तयति, कर्तति। 'प्रातिपदिकाद्धात्वर्थे बहुलमिष्ठवच्च' (ग सू २०३)।

ग्रहणात्। **गर्व माने।** अभिमाने इत्यर्थः। ननु कथादावस्य पाठो व्यर्थः, अदन्तत्वे फलाभावात्। न च सन्वत्त्वनिवृत्तये अग्लोपित्वाय अदन्तत्वमिति शङ्क्यम्, लघुपरकत्वाभावादेव तदप्रसक्तेः। नाप्यल्लोपस्य स्थानिवद्भावाद् उपधावृद्धिनिवृत्त्यर्थमदन्तत्वमिति शङ्क्यम्, गकारादकारस्यानुपधात्वादेव तदप्रसक्तेरित्यत आह **अदन्तत्वसामर्थ्याण्णिज्विकल्प इति।** ननु गर्वते इत्यत्र णिजभावेऽप्यदन्तत्वं निष्फलमिति कथं तस्य विकल्पज्ञापकतेत्यत आह **धातोरन्त उदात्त इति।** तेन गर्वते इत्यत्र वकारादकार उदात्तः फलति। अदन्तत्वाभावे तु गकारादकार उदात्तः स्यादिति भावः। **लिट्याम् चेति।** गर्वाचक्रे इत्यत्र 'कास्यनेकाचः—' इत्याम्प्रत्ययोऽप्यदन्तत्वस्य फलमित्यर्थः। अन्यथा अनेकाच्त्वाभावादाम् न स्यादिति भावः। **एवमग्रेऽपीति।** 'मूत्र प्रस्रवणे' इत्यादावित्यर्थः। **इत्यागर्वीयाः।**

सूत्र वेष्टने। अनेकाच्त्वादषोपदेशत्वार्थमस्य अदन्तत्वमिति न ततोऽस्य णिज्विकल्पः। **कत्र शैथिल्ये। कर्त इत्यपीति।** अदन्तत्वसामर्थ्यादस्य णि-

---

तत्र प्रातिपदिकस्य ग्रहणात्। **अदन्तत्वसामर्थ्यादिति।** कथादिषूपधावृद्धिदीर्घसन्वद्भावविरहेण णारभामप्रभृतीनामुपधाह्रस्वस्य गृहमृगप्रभृतीनामुपधागुणस्य च व्यावर्तनेनादन्तत्वं सार्थकम्। इह त्वदन्तत्वे प्रागुक्तफलाभावाण्णिचः पाक्षिकत्वं ज्ञापयतीति भावः। ननु अदन्तत्वसार्थकत्वाय वाल्लोप इति प्राचोक्तमेवाभ्युपगम्यतामिति चेत्। अत्राहुः—चिन्तयतेरिदित्वं सामान्यापेक्षं ज्ञापकमिति मते इह अदन्तत्वस्य फलं स्पष्टमेव। विशेषापेक्षं ज्ञापकमिति मते तु तत्र तत्र आकार इकार ईकार उकार ऊकारश्चेत्यनुबन्धा यथा ज्ञापकतया स्वीकृताः तथा अदन्ततापि णिज्विकल्पमेव ज्ञापयतु, क्लृप्तेनैव णिज्विकल्पेन कृतार्थत्वे अपूर्वस्य लोपबाधस्य कल्पनाया अन्याय्यत्वात्। एवं हि सति मतद्वयेऽप्येकरूपमेव फलं लभ्यत इति। **असुसूत्रदिति।**

प्रातिपदिकाद्धात्वर्थे णिच् स्यात्, इष्ठे यथा प्रातिपदिकस्य पुंवद्भावरभावटिलोपविन्मतुब्लोपयणादिलोपप्रस्थस्फाद्यादेशभसंज्ञास्तद्वण्णावपि स्युः। पटुमाचष्टे

ण्विकल्प इति मत्वाह **कर्तयति, कर्तंतीति**। **प्रातिपदिकाद्धात्वर्थे बहुलमिष्ठवच्च**। चुरादिगणसूत्रमिदम्। इष्ठवदिति सप्तम्यन्ताद्वतिः। तेन भुवमाचष्टे भावयतीत्यत्र 'इष्ठस्य यिट् च' इति यिडागमो न भवति, तदाह **इष्ठे यथेति**। अत्र धात्वर्थे इत्यनेन करणम् आख्यानं दर्शनं वचनं श्रवणमित्यादि गृह्यते। **पुंवद्भावेति**। अतिशयेन पट्वी पटिष्ठेत्यत्र 'भस्याढे-' इति पुंवत्त्वम्। प्रढिष्ठ इत्यत्र 'र ऋतो हलादेर्लघोः' इति रभावः। अतिशयेन साधुः साधिष्ठ इत्यत्र टिलोपः। अतिशयेन स्रग्वी स्रजिष्ठ इत्यत्र 'विन्मतोर्लुक्' इति विनो लुक्। अतिशयेन गोमान् गविष्ठ इत्यत्र मतुपो लुक्। अतिशयेन स्थूलः स्थविष्ठ इत्यादौ

अनेकाच्त्वान्न षत्वम्। **प्रातिपदिकादिति**। यदि सुबन्ताण्णिच् स्यात्तदा स्रजयतीत्यादौ कुत्वं स्यादिति भाव इति केचित्। तन्न, इष्ठवद्भावेन भत्वे कुत्वस्याप्रसक्तेः। अत्र बहुलं णिच् स्यात्। स च णिच् इष्ठवद्भवतीत्यन्वयपक्षे वाक्यमपि भवतीत्याह **पटुमाचष्ट इति**। धात्वर्थ इत्यनेन करणाख्यानादिर्गृह्यत इति भावः। ननु बहून्याचष्टे भावयतीत्यत्र 'इष्ठस्य यिट् च' इति णिचोऽपि यिट् स्यात्। अत्राहुः—टेरिति सूत्रे 'णाविष्ठवत्प्रातिपदिकस्य' इति वार्तिके प्रातिपदिकग्रहणं प्रत्ययकार्याणामतिदेशो माभूदित्येवमर्थम्। तेनात्र णिचो यिण्न भवति, तदभावे भूभावेनापि न भवितव्यं संनियोगशिष्टत्वात्, किं तु बहयतीत्येव भवितव्यमिति मतान्तरम्। एतच्च तत्रैव सूत्रे कैयटे स्पष्टमिति। अन्ये त्वाहुः—इष्ठवदिति हि सप्तम्यन्ताद्वतिर्णावित्युपमेये सप्तमीदर्शनात्तेन इष्ठनि परे पूर्वस्य यत्कार्यं तदतिदिश्यते न त्विष्ठनोऽपीति। **पुंवद्भावेति**। अतिशयेन पट्वी पटिष्ठेत्यत्र 'भस्याढे तद्धिते' इति पुंवद्भावः। क्रशिष्ठः द्रढिष्ठः इत्यत्र 'र ऋतो हलादेः-' इति रभावः। साधिष्ठ इत्यादौ टिलोपः। अतिशयेन स्रग्वी स्रजिष्ठ इत्यत्र 'विन्मतोर्लुक्' इति विनो लुक्। अतिशयेन गोमान् गविष्ठ इत्यादौ मतुपो लुक्। स्थविष्ठ इत्यादौ 'स्थूलदूर-' इत्यादिना यणादिलोपः। प्रेष्ठ इत्यादौ 'प्रियस्थिर-' इत्यादिना प्रस्थाद्यादेशः। **तद्वण्णावपीति**। पुंवद्भावस्योदाहरणमेणीमाचष्टे एतयति। टिलोपेनैव संनियोगशिष्टत्वान्ङकारनिवृत्तौ सिद्धायां पुंवद्भावग्रहणं दरदमाचष्टे दारदयतीत्यादिसिध्यर्थमिति बोध्यम्। द्रढयतीत्यादौ रभावः। स्रग्विणमाचष्टे स्रजयतीत्यत्र विनो लुक्। गोमन्तमाचष्टे गवयतीत्यत्र मतुपो लुक्। अन्तरङ्गपरिभाषया वृद्धिरत्र न भवति। प्रियमाचष्टे प्रापयति। स्थिरमाचष्टे स्थापयतीत्यादौ तु वृद्धिर्भवत्येव। 'द्वयोः' इति निर्देशेन तस्याः परिभाषायाः

पटयति। परत्वाद् वृद्धौ सत्यां टिलोपः, अपीपटत्। 'णौ चङि–' (सू २३१४) इत्यत्र भाष्ये तु 'वृद्धेर्लोपो बलीयान्' इति स्थितम्, अपपटत्। 'तत्करोति

'स्थूलदूरयुव–' इत्यादिना यणादिलोपः पूर्वस्य च गुणः। अतिशयेन प्रियः प्रेष्ठ इत्यादौ 'प्रियस्थिर–' इत्यादिना प्रस्थाद्यादेशः। अतिशयेन स्रग्वी स्रजिष्ठ इत्यत्र भत्वान्न कुत्वम्। एते इष्ठ इव णावपि परतः स्युरित्यर्थः। **पटयतीति**। पटुमाचष्टे इत्याद्यर्थे णिच्। इष्ठवत्त्वात् 'टेः' इति टिलोप इति भावः। ननु उकारस्य टेर्लोपे सति अग्लोपित्वात् सन्वत्त्वं न स्यादित्यत आह **परत्वाद् वृद्धौ सत्यां टिलोप इति**। 'अचो ञ्णिति' इति उकारस्य वृद्धौ कृतायामौकारस्य टेर्लोपः। अकृतायां तु वृद्धौ उकारस्य टेर्लोपः। ततश्च 'शब्दान्तरस्य प्राप्नुवन् विधिरनित्यः' इति न्यायेन टिलोपः अनित्यः। वृद्धिस्तु टिलोपे कृते सति नैव भवतीति साप्यनित्या। एवं च वृद्धिटिलोपयोरुभयोर्मध्ये परत्वाद् उकारस्य वृद्धिः औकारः। तस्यावादेशात्प्रागेव परत्वाद् वार्णादाङ्गस्य बलीयस्त्वाच्च औकारस्य टेर्लोप इत्यर्थः। एवं च अनग्लोपित्वात् सन्वत्त्वमिति मत्वाह **अपीपटदिति**। एतच्च 'मुण्डमिश्र–' इति सूत्रे भाष्यकैयटयोः स्पष्टम्। **स्थितमिति**। तथा च वृद्धेः प्रागुकारस्य लोपे अग्लोपित्वान्न सन्वत्त्वमित्यर्थः। भाष्ये उभयथा दर्शनाद्रूपद्वयमपि साध्विति बोध्यम्। शब्देन्दुशेखरे तु 'वृद्धेः लोपो बलीयान्' इति 'णौ चङि–' इति सूत्रभाष्यमेव प्रमाणम्, 'मुण्डमिश्र–' इति सूत्रभाष्यं त्वेकदेशयुक्तिरिति प्रपञ्चितम्। अत्र पुंवद्भावा-

---

अनित्यत्वज्ञापनादिति दिक्। **परत्वाद् वृद्धाविति**। लोपः शब्दान्तरप्राप्त्याऽनित्यः। वृद्धिरप्यनित्या। उभयोरनित्ययोः परत्वाद् वृद्धिः। तस्यां कृतायामौकारस्यावादेशात्प्रागेव परत्वाद्वार्णादाङ्गस्य बलीयस्त्वाच्च लोप इत्यर्थः। एवं चानग्लोपित्वाद्दीर्घसन्वद्भावौ स्त इत्याह **अपीपटदिति**। इह टिलोपस्य स्थानिवद्भावेन व्यवधानाद्दीर्घसन्वद्भावौ नेति न भ्रमितव्यम्। स्थानिवत्त्वेऽप्यङ्गस्य णिच्परत्वानपायात्। चङ्परे णौ यल्लघ्विति पक्षेऽपि अभ्यासस्य आदिष्टादचः पूर्वत्वेन स्थानिवत्त्वमेव नास्तीति दीर्घसन्वद्भावौ स्त एव। केचित्तु चङ्परे णौ यल्लघ्विति पक्षे पटुशब्दोकारस्य वृद्धौ कृतायां णिच्परं लघु दुर्लभमिति सन्वद्भावाप्राप्त्या अपपटदित्येव रूपम्। प्रथमं टिलोपः पश्चाद् द्विर्वचनमिति मत्वा अभ्यासस्य आदिष्टादचः पूर्वत्वेन स्थानिवत्त्वमेव नास्तीति मनोरमोक्तं यत्, तन्नादर्तव्यम्। णिच्यच आदेशो न स्याद् द्वित्वे कर्तव्ये इति निषेधपक्षस्य मुख्यतया प्रागुक्तत्वेन प्रथमं टिलोपस्य दुरुपपादत्वादित्याहुस्तन्मन्दम्। अपीपटदित्यत्र द्वितीयाच्पर्यन्तस्य प्रथमावयवस्य द्वित्वमिति हि निर्विवादम्। तथा च द्वितीयस्याचो द्वित्वकरणात्प्रथमं टिलोपः स्यादेवेति। **वृद्धेर्लोप इति**। कृता-

तदाचष्टे' (ग सू २०४)। पूर्वस्यैव प्रपञ्चः । करोत्याचष्टे इति धात्वर्थमात्रे णिजर्थः। लडर्थस्त्वविवक्षितः। 'तेनातिक्रामति' (ग सू २०५) । अश्वेनाति-

---

दिकमुदाह्रियते । एनीमाचष्टे एतयति, पुंवद्भावाद् ङीब्नकारयोर्निवृत्तिः । दृढमाचष्टे द्रढयति, 'र ऋतः–' इति रभावः । स्रग्विणमाचष्टे स्रजयति, 'विन्मतोः–' इति विनो लुक् । गोमन्तमाचष्टे गवयति, मतुपो लुक्, अक्कृतपरिभाषया न वृद्धिः । स्थूलमाचष्टे स्थवयति इत्यादिषु यणादिलोपः । प्रियमाचष्टे प्रापयति, स्थिरमाचष्टे स्थापयति इत्यादिषु प्रस्थस्फाद्यादेशाः । अत्र वृद्धिर्भवत्येव, द्वयोरिति निर्देशेन अकृतपरिभाषाया अनित्यत्वाश्रयणात् । स्रग्विणमाचष्टे स्रजयति, सुबन्ताद् विहितस्य विनो लुकि अन्तर्वर्तिविभक्त्या पदत्वात् प्राप्तं कुत्वं भत्वान्न भवति। **तत्करोति तदाचष्टे** । इदमपि चुरादिगणसूत्रम् । प्रातिपदिकादित्यनुवर्तते । तत्करोति तदाचष्टे इति चार्थे प्रातिपदिकाण्णिच् स्यादित्यर्थः । आचारक्विबिव प्राति-पदिकादेवेदम् । ननु 'प्रातिपदिकाद्धात्वर्थे–' इत्येव सिद्धे किमर्थमिदमित्यत आह **पूर्वस्यैव प्रपञ्च इति** । ननु करोति आचष्टे इति वर्तमाननिर्देशादकरोदित्याद्यर्थेषु न स्यादित आह **करोत्याचष्टे इत्यादि । लडर्थ इति** । उपलक्षणम् । तेन भूते भविष्यति द्वित्वे बहुत्वे च प्रत्ययो भवत्येव । **तेनातिक्रामति** । इदमपि गणसूत्रम् । 'प्रातिपदिकाद्धात्वर्थे–' इत्यस्यैव प्रपञ्चः । वाचा अतिकामति वाचयति

कृतप्राप्तिमात्रेण लोपो नित्यः । वृद्धिस्त्वनित्या, टिलोपे सति स्थानिनः पूर्वत्र कर्तव्यायां लोपस्य स्थानिवत्त्वात्, स्वविधौ स्वस्य स्थानिवत्त्वाभावाच्च । अस्मिंस्तु पक्षे 'मुण्डमिश्र–' इति सूत्रे हलिकल्योरदन्तत्वनिपातनस्य वैयर्थ्यमेव । वृद्धेः प्राक् टिलोपे सति अग्लोपित्वसंभवात् । तथा चादन्तत्वनिपातनसामर्थ्याट्टिलोपात्पूर्वं वृद्धिरेवेत्यनग्लोपित्वादपीपटदित्येव रूपं साध्विति प्रतीयते । भाष्यद्वयप्रामाण्याद्रूपद्वयमपि साध्विति बहवः । **लडर्थस्त्विवति** । करोत्याचष्टे इति हि कर्तरि वर्तमाने लडेकवचनम् । लडर्थाविवक्षायां तु ण्यन्ताद्भावकर्मणोः भूतभविष्यतोर्द्वित्वबहुत्वयोश्च प्रत्ययो भवत्येवेति भावः । यद्यप्येकत्वादिसंख्या लडर्थो न भवति, तथापि लडादेशतिङर्थोऽपीह लडर्थत्वेन गृहीत इति ज्ञेयम् । **तेनातिक्रामति** । तृतीयाप्रकृतिभूतात्प्रातिपदिकाण्णिच् । तृतीयान्ताण्णिजित्यन्ये । एवं तत्करोतीत्यत्रापि द्वितीयाप्रकृतिभूताद् द्वितीयान्ताद्वा णिच् । न च सुबन्ताण्णिचि वाचं करोत्याचष्टे वाचाऽतिकामति वा वाचयतीत्यत्र कुत्वं स्यादिति शङ्क्यम् इष्ठवद्भावेन भसंज्ञया पदसंज्ञाया बाधात् । यशस्विनमाचष्टे यशयति स्रग्विणमाचष्टे स्रजयतीत्यादौ विनो लुकि प्राप्तस्य पदकार्यस्य बाधार्थं भसंज्ञातिदेशस्यावश्यकत्वात् 'तत्करोति–'

क्रामति अश्वयति। हस्तिनातिक्रामति हस्तयति। 'धातुरूपं च' (ग सू २०६) णिच्प्रकृतिर्धातुरूपं प्रतिपद्यते। चशब्दोऽनुक्तसमुच्चयार्थः। तथा च वार्तिकम्—'आख्यानात्कृतस्तदाचष्टे कृल्लुक् प्रकृतिप्रत्यापत्तिः प्रकृतिवच्च कारकम्' (वा १७६६) इति। कंसवधमाचष्टे कंसं घातयति। इह कंसं हन् इ इति स्थिते,

२५७४ **हनस्तोऽचिण्णलोः।** (७-३-३२) हन्तेस्तकारोऽन्तादेशः स्याच्चिण्णल्वर्जे ञिति णिति। नन्वत्राङ्गसंज्ञा धातुसंज्ञा च कंसविशिष्टस्य प्राप्ता।

इत्यत्र कुत्वं तु न शङ्क्यम्, असुबन्तादेव प्रातिपदिकात् प्रत्ययोत्पत्तेः। **धातुरूपं चेति।** इदमपि गणसूत्रम्। णिच्प्रकृतिरिति प्रतिपद्येत इति चाध्याहृत्य व्याचष्टे **णिच्प्रकृतिर्धातुरूपं प्रतिपद्यत इति।** ननु प्रातिपदिकाद् धात्वर्थे णिज् भवति णिच्प्रकृतिर्धातुरूपं च प्रतिपद्यते इति प्रतीयमानार्थाश्रयणे भुक्तमाचष्टे भुक्तयतीति न स्यात्। भुक्तशब्दस्य भुजधातुरादेशः स्यादित्यत आह **चशब्दोऽनुक्तसमुच्चयार्थ इति।** किमनुक्तं समुचीयते इत्यत आह **तथा च वार्तिकमिति। आख्यानात् कृत इति।** 'हेतुमति च' इति सूत्रे इदं वार्तिकं स्थितम्। आख्यानं वृत्तकथाप्रबन्धः तद्वाचिनः कृदन्तात् कंसवधादिशब्दात् तदाचष्टे इत्यर्थे णिचि कृते णिच्प्रकृत्यवयवभूतस्य कृतो लुक्, तस्यैव कृतो या प्रकृतिः हनादिधातुरूपा, तस्याः प्रत्यापत्तिः–आदेशादिविकारपरित्यागेन स्वरूपेणावस्थानं भवतीत्यर्थः। प्रकृतिवच्च कारकम् इत्यंशस्तु मूल एव व्याख्यास्यते। कंसवधमाचष्टे कंसं घातयतीत्युदाहरणम्। हननं वधः, 'हनश्च वधः' इति भावे हनधातोः अप्प्रत्ययः प्रकृतेः वधादेशश्च। कंसस्य वधः कंसवधः, तदन्वाख्यानपरवाक्यसन्दर्भो विवक्षितः। तमाचष्टे इत्यर्थे णिच्। अप्प्रत्ययस्य कृतो लुक् प्रकृतिभूतस्य हनधातोर्वधादेशस्य च निवृत्तिः। तथा च फलितं दर्शयति **इह कंसं हन् इ इति स्थिते इति।' हनस्तोऽचिण्णलोः।** हन इति षष्ठी। त इत्यत्र अकार उच्चारणार्थः, तदाह **हन्तेस्तकार इति।** अन्तादेश इत्यलोऽन्त्यपरिभाषया सिद्धम्। **ञिति णिति**

इत्यादिनिर्देशानुगुणत्वाच्च सुबन्तात्णिजिति पक्ष एव ज्यायानित्याहुः। **णिच्प्रकृतिरिति।** वधशब्दो णिच्प्रकृतिरिदानीं तु कृल्लुक्यवशिष्टभाग एव प्रकृतिरित्यर्थः। **आख्यानात्कृत इति।** यद्यपि वधशब्दः कृदन्तः, स आख्यानं न भवति, तथाप्याख्यानवाची कृदन्तश्च कंसवधशब्दो भवत्येव, कृद्ग्रहणे गतिकारकपूर्वस्यापि ग्रहणात्। **कृल्लुगिति।** 'हनश्च वधः' इति विहितस्य अप्प्रत्ययस्य लुक्। **प्रकृतिप्रत्यापत्तिरिति।** विकारपरित्यागेन स्वरूपेणावस्थितिरित्यर्थः, तदेतत्सकलमभिप्रेत्याह **कंसं हन् इ इति स्थिते इति। कंसविशिष्टस्येति।** तस्मादेव णिचो

ततश्चाड्द्वित्वयोर्दोषः । किं च कुत्वतत्वे न स्याताम्, धातोः स्वरूपग्रहणे तत्प्रत्यये कार्यविज्ञानात् । सत्यम्, प्रकृतिवच्च इति चकारो भिन्नक्रमः–कारकं च, चात्कार्यम् । हेतुमण्णिचः प्रकृतेर्हन्त्यादेर्हेतुमण्णौ यादृशं कारकं धातावन-

---

चेति । 'अचो ञ्णिति' इत्यतस्तदनुवृत्तेरिति भावः । तथा च हनो नकारस्य तत्वे 'हो हन्तेः–' इति कुत्वेन हस्य घकारे घातीति ण्यन्तं फलितम् । ततो लटि घातयति इति रूपं स्थितम् । कृतो लुकि समासनिवृत्तौ सुब्लुकोऽपि निवृत्तौ कंसमिति च स्थितम् । 'आख्यानात् कृतः–' इति वार्तिकस्थं प्रकृतिवच्च कारकमित्यंशं शङ्कोत्तरत्वेन योजयिष्यन् शङ्कामवतारयति **नन्विति** । **कंसविशिष्टस्येति** । कंसवधशब्दस्यैवेत्यर्थः । तस्मादेव णिचो विधानादिति भावः । ननु कंसवधशब्दस्य अङ्गत्वे का हानिरित्यत आह **ततश्चेति** । कंसवधशब्दस्याङ्गत्वाद् अड्द्वित्वयोर्विषये दोषः स्यात् । कंसशब्दात्पूर्वमडागमः स्यात् । कंस् इत्यस्य द्विर्वचनं स्यात् । इष्यते तु कंसमजीघतत् इत्येवं हनधातोरेवोभयमित्यर्थः । **किं चेति** । कंसं घातयतीति कुत्वतत्वे न स्यातामित्यर्थः । कुत इत्यत आह **धातोरिति** । धातोर्हन इत्यादितत्तत्स्वरूपेण ग्रहणे सति तत्प्रत्यये–धातोर्विहितप्रत्यये कार्यविज्ञानमिति परिभाषयेत्यर्थः । तेन वार्त्रघ्नमित्यत्र 'हनस्तोऽचिण्णलोः' इति तत्वं न भवतीति 'हनस्तोऽचिण्णलोः' इति सूत्रे भाष्ये स्पष्टम् । तथा च प्रकृते कंसं घातयतीत्यत्र 'हो हन्तेः–' इति कुत्वं हनस्तोऽचिण्णलोः' इति तत्वं च न स्याताम्, अत्र णिचः प्रातिपदिकाद्विहितत्वेन धातोर्विहितत्वाभावादित्यर्थः । अत्र प्रत्ययलक्षणेन कृदन्ततया कृत्प्रकृत्यर्थस्य कर्मत्वेन कंसस्येति षष्ठी स्यादित्यप्याक्षेपो बोध्यः, तत्परिहारस्यापि वक्ष्यमाणत्वात् । तामिमां शङ्कामर्धाङ्गीकारेण परिहरति **सत्यमिति** । कंसवधशब्दस्यैव ङ्गत्वमित्यादाङ्गीक्रियते, दोषापादनं तु नाङ्गीक्रियत इत्यर्थः । **प्रकृतिवच्चेतीति** । 'आख्यानात् कृतः–' इति वार्तिके प्रकृतिवच्चेति चकारो भिन्नक्रमः, प्रकृतिवदित्यनन्तरपठितः चकारः कारकमित्यस्मादूर्ध्वं निवेशनीय इति भावः । तदेवाभिनीय दर्शयति **कारकं चेति** । चकारोऽयमनुक्तसंग्रहार्थं इत्याह **चात्कार्यमिति** । समुच्चीयत इति शेषः । तथा च कारकं कार्यं च प्रकृतिवदिति फलितम् । अत्र प्रकृतिशब्देन हेतुमण्णिचः प्रकृति-

---

विधानादिति भावः । **दोष इति** । कशब्दात्पूर्वमडागमः कंस इत्यस्य द्विर्वचनं स्यादित्यर्थः । **किं चेति** । एवं च कंसमजीघतदितीष्टं न सिध्येदेति भावः । **तत्प्रत्यये** धातोर्विहितप्रत्यये । तेन वार्त्रघ्नमित्यत्र 'हनस्त–' इति तत्वं न भवतीति ज्ञेयम् । उक्तदोषान्परिहरति **सत्यमिति** । प्रकृतिवच्चेति चकारोऽनुक्तसंग्रहार्थं इत्याह **चात्कार्यमिति** । यद्यप्यन्यतरातिदेशेनाप्यड्द्विवचने सिध्यतः, तथापि धातावनन्त-

न्तभूतं द्वितीयान्तं यादृशं च कार्यं कुत्वतत्वादि तदिहापीत्यर्थः । कंसमजीघतत् । 'कर्तृकरणाद्धात्वर्थे' (ग सू २०७) कर्तुर्व्यापारार्थं यत्करणं न तु चक्षुरादिमात्र-

---

विवक्षिता, व्याख्यानात् । प्रकृताविव प्रकृतिवत् । सप्तम्यन्ताद्वतिः, तदाह **प्रकृते-र्हन्यादेर्हेतुमण्णाविति** । प्रयुज्यमाने सतीति शेषः । कारकमित्यस्य विवरणं द्वितीयान्तमिति । द्वितीयातृतीयादिकारकविभक्त्यन्तमित्यर्थः । हन्ति कंसं कृष्णः तं प्रेरयतीत्यर्थे कंसं घातयति, कंसमजीघतदित्यादौ हेतुमण्ण्यन्ते प्रयुज्यमाने यद् द्विती-यादिकारकविभक्त्यन्तं यच्च कार्यं कुत्वतत्वाड्द्वित्वादि तत्सर्वम् 'आख्यानात् कृतः–' इत्य-स्योदाहरणे कंसवधमाचष्टे कंसं घातयति, कंसवधमाचष्ट कंसमजीघतदित्यादावपि भवतीति फलितम् । तत्र कारकमित्यनेन कंसात् षष्ठी निरस्ता, उदाहृतहेतुमण्ण्यन्त-स्थले कृद्योगाभावेन कर्मणि द्वितीयाया एव सत्त्वात् । कार्यमित्यनेन तु कुत्वतत्वे कंसस्य अड्द्वित्वनिरासश्चेति बोध्यम् । आख्यानशब्दश्च कथंचिद् वृत्तानुवादपरः, न तु भारता-दिप्रसिद्धकंसवधादिकथापरः । तेन राजागमनमाचष्टे राजानमागमयतीत्यादि सिध्यति । द्वितीयान्तमित्यत्र द्वितीयाग्रहणमुपलक्षणम् । तेन पुष्ययोगमाचष्टे पुष्येण योजयतीति सिध्यतीति भाष्ये स्पष्टम् । **कर्तृकरणाद्धात्वर्थे** । इदमपि गणसूत्रम् । प्रातिपदिका-द्धात्वर्थे इत्यस्यैव प्रपञ्चः । कर्तुः करणं कर्तृकरणम्, न तु कर्ता च करणं च इति द्वन्द्वः, व्याख्यानात्, तदाह **कर्तुर्व्यापारार्थमिति** । अभिमतफलोत्पादनार्थमित्यर्थः । साध-कतममिति यावत् । नन्वेवं सति करणाद्धात्वर्थे इत्येव सिद्धे कर्तृग्रहणं व्यर्थमित्यत आह

भूतद्वितीयान्तादिलाभाय कारकातिदेशः । कार्यातिदेशस्तु कुत्वतत्वादिलाभायेति विवेकः । इह भारतभागवतादिप्रसिद्धे कंसवधाद्युपाख्याने एव णिजिति नाग्रहः, किं तूपाख्यानमात्रे । तेन राजागमनमाचष्टे राजानमागमयतीत्यादि सिध्यति । इह कृत्प्र-कृतौ राज्ञः कर्तृत्वेऽपि गमेर्हेतुमण्णौ 'गतिबुद्धि–' इत्यनेन तस्य कर्मत्वमिति द्विती-यान्तमेव रूपातिदेशबलात्स्वीक्रियते । देवदत्तपाकमाचष्टे देवदत्तेन पाचयतीत्यत्र तु देवदत्तस्य कर्तृत्वानपायात्तृतीयैव भवति । रुक्मिणीहरणमाचष्टे इत्यादौ 'हृक्रोरन्य-तरस्याम्' इति विकल्पाद् रुक्मिणीं रुक्मिण्या वा हारयतीति प्रयोगः । **कर्तृकरणा-दिति** । कर्तृग्रहणाभावे चक्षुषा पश्यति चक्षयतीत्यादावेव स्यान्न तु करिभिरवब-भ्राति अवकरयतीत्यादौ । लोके इन्द्रियाणामेव करणत्वेन सुप्रसिद्धत्वात्, अतस्तत्सं-ग्रहार्थं कर्तृग्रहणमिति मनोरमायां स्थितम् । नव्यास्तु—साधकतमत्वेन विवक्षितं यत् तत्करणशब्देन गृह्यते, न तु लोकप्रसिद्धकरणमेव । अन्यथा 'कर्तृकरणयोस्तृतीया' इत्यादावपि लोकप्रसिद्धकरणग्रहणप्रसक्त्या बाणेन हत इत्यादि रूपं न सिध्येत् । तथा च कर्तृग्रहणं विनाप्यवकरयतीति रूपसिद्धौ न किंचिद्बाधकमिति व्याख्याय कर्तृ-

मित्यर्थः। असिना हन्ति असयति। वस्क १११६ दर्शने। चित्र १११७ चित्रीकरणे। आलेख्यकरण इत्यर्थः। कदाचिद्दर्शने। चित्र इत्ययमद्भुतदर्शने णिचं लभते। चित्रयति। अंस १११८ समाघाते। वट १११९ विभाजने। लज ११२० प्रकाशने। वटि लजि इत्येके। वण्टयति। लञ्जयति। अदन्तेषु पाठबलाददन्तत्वे वृद्धिरित्यन्ये। वण्टापयति। लञ्जापयति। शाकटायनस्तु कथादीनां सर्वेषां पुकमाह। तन्मते कथापयति गणापयति इत्यादि। मिश्र ११२१ सम्पर्के। संग्राम ११२२ युद्धे। अयमनुदात्तेत्, अकारप्रश्लेषात्। अससङ्ग्रामत। स्तोम ११२३ श्लाघायाम्। अतुस्तोमत्। छिद्र ११२४ कर्णभेदने।

न तु चक्षुरादिमात्रमिति। कर्तृग्रहणं विहाय करणादित्येवोक्तौ चक्षुरादीन्द्रियमेव सुप्रसिद्धत्वात् करणादिति शब्देन गम्येत। अतः कर्तृग्रहणमित्याहुः। वस्तुतस्तु 'साधकतमं करणम्' इति शास्त्रप्रसिद्धकरणस्य ग्रहणौचित्यात् कर्तृग्रहणं स्पष्टार्थमेव। केचित्तु कर्तृकरणादिति द्वन्द्वमाश्रित्य देवदत्तेन वाचयति देवदत्तयतीति कर्तुरुदाजहुः। **कदाचिद्दर्शने इति**। चित्रेत्यनुवर्तते, तदाह **चित्र इत्ययमिति**। कदाचिद्दर्शने इत्यस्य विवरणम्—अद्भुतदर्शने इति। चित्र चित्रीकरणकदाचिद्दर्शनयोरित्येव सुवचम्। **वटि लटि इत्येके इति**। ननु कथादावनयोः पाठो व्यर्थः। इदितोरनयोः टकारजकारान्तयोरदन्तत्वस्याप्रसक्तेः फलाभावाच्चेत्यत आह **अदन्तेष्विति**। अदन्तेषु पाठबलाद् वण्ट लञ्जेति कदाचिददन्तत्वमप्यनयोर्विज्ञायते। अदन्तत्वस्य च फलाभावादतो लोपं बाधित्वा 'अचो ञ्णिति' इति वृद्धौ 'अर्तिह्री–' इति पुगित्यर्थः, फलितमाह **वण्टापयतीति**। **शाकटायनस्त्विति**। ऋषिविशेषोऽयम्। **संग्राम युद्धे**। गणसूत्रमिदम्। युद्धवाचि संग्रामेति प्रातिपदिकं करोत्यर्थे णिचं लभत इत्यर्थः। ननु 'प्रातिपदिकाद्धात्वर्थे–' इत्येव सिद्धे किमर्थमिदमित्यत आह **अनुदात्तेदिति**। एतदात्मनेपदार्थमिति भावः। ननु संग्रामशब्दस्य प्रातिपदिकस्य अकारान्तत्वात् कथमनुदात्तेत्त्वमित्यत आह **अकारप्रश्लेषादिति**। संग्रामशब्दादनुदात्तानुनासिकं पररूपेण प्रश्लिष्य निर्देशादिति भावः। **अससंग्रामतेति**। लुङि चङि संग्रामशब्दस्य ण्यन्तस्य अङ्गत्वात् ततः प्रागडिति

करणादित्यत्र समाहारद्वन्द्वं मत्वा देवदत्तेन पाचयति देवदत्तयतीत्युदाजहुः। **कदाचिद्दर्शने**। चित्रकरणकदाचिद्दर्शनयोरिति सुवचम्। **अदन्तेषु पाठबलादिति**। अदन्तस्य फलान्तराभावादतोलोपं बाधित्वा वृद्धिरित्यर्थः। **संग्राम**। संग्रामेति युद्धवाचि प्रातिपादिकं करोत्यर्थे णिचं लभते। **अनुदात्तेदिति**। एतच्च 'भृशादिभ्यो भुवि–' इति सूत्रे कैयटेनोक्तम्। **अकारप्रश्लेषादिति**। तेन प्रश्लिष्ट-

करणभेदन इत्यन्ये । कर्णं इति धात्वन्तरमित्यन्ये । अन्ध १९२५ दृष्ट्युपघाते । उपसंहार इत्यन्ये । आन्दधत् । दण्ड १९२६ दण्डनिपातने । अङ्क १९२७ पदे लक्षणे च । आञ्चकत् । अङ्ग १९२८ च । आञ्जगत् । सुख १९२९ दुःख १९३० तत्क्रियायाम् । रस १९३१ आस्वादनस्नेहनयोः । व्यय १९३२ वित्त-समुत्सर्गे । अवव्ययत् । रूप १९३३ रूपक्रियायाम् । रूपस्य दर्शनं करणं वा रूपक्रिया । छेद १९३४ द्वैधीकरणे । अचिच्छेदत् । छद १९३५ अपवारणे इत्येके । छदयति । लाभ १९३६ प्रेरणे । व्रण १९३७ गात्रविचूर्णने । वर्ण १९३८ वर्णक्रियाविस्तारगुणवचनेषु । वर्णक्रिया वर्णकरणम् । सुवर्णं वर्णयति । कथां वर्णयति । विस्तृणातीत्यर्थः । हरिं वर्णयति । स्तौतीत्यर्थः । 'बहुलमेतन्नि-दर्शनम् (ग सू २०८) । अदन्तधातुनिदर्शनमित्यर्थः । बाहुलकादन्येऽपि बोध्याः । तद्यथा—पर्ण १९३९ हरितभावे । अपपर्णत् । विष्क १९४० दर्शने । क्षिप १९४१ प्रेरणे । वस १९४२ निवासे । तुत्थ १९४३ आवरणे । एवमान्दो-लयति । प्रेङ्खोलयति । विडम्बयति । अवधीरयति इत्यादि । अन्ये तु दशगणी-पाठो बहुलम् इत्याहुः । तेनापठिता अपि सौत्रलौकिकवैदिका बोध्याः । अपरे

भावः । एतच्च मृशादिसूत्रे कैयटे स्पष्टम् । अग्लोपित्वान्नोपधाह्रस्वः । **सुख दुःख तत्क्रियायाम्** । सुखानुकूले दुःखानुकूले च व्यापारे इत्यर्थः । सुख दुःखेति प्रातिपदिकाभ्यां तत्करोतीत्यर्थे णिच् स्यादिति यावत् । 'प्रातिपदिकाद्धात्वर्थे–' इत्येव आभ्यां णिजित्याहुः । **बहुलमेतन्निदर्शनम्** । गणसूत्रमिदम् । एतेषां कथादीनाम् अदन्तानां निदर्शनं पाठ इत्यर्थः, तदाह **अदन्तेति** । बहुलग्रहणस्य फलमाह **बाहुलकादिति** । **अपपर्णदिति** । अग्लोपित्वान्न सन्वत्त्वमिति भावः । **क्षिप प्रेरणे** । क्षिपयति । अग्लोपस्य स्थानिवत्त्वान्न गुणः । एवमग्रेऽपि । **वस निवासे** । वसयति । अदन्तत्वान्नोपधावृद्धिः । आन्दोलयतीत्यादौ अदन्तत्वेन अग्लोपित्वान्नोप-धाह्रस्वः । तदेवं बहुलमेतन्निदर्शनम् इत्यस्य कथाद्यदन्तविषयत्वमुक्त्वा मतान्तरमाह **अन्ये त्विति** । भ्वादिः, अदादिः, जुहोत्यादिः, दिवादिः, स्वादिः, तुदादिः, रुधादिः, तनादिः, क्र्यादिः, चुरादिरिति दशगणी, तद्बहिर्भूता अपि सौत्राः जुप्रभृतयः, लौकिकाः प्रेङ्खोलादयः, वैदिकाः 'तद्वचांसि रात्रिभिरसुभ्नन्' इत्यादौ

स्येत्संज्ञा प्रकृत्यकारस्य तु इष्ठवदिति टिलोपः । तथा च अग्लोपादसंप्रामतेत्यत्र नोपधाह्रस्वः । **सुख दुःख** । तच्छब्देन सुखदुःखे प्रातिपदिकार्थौ परामृश्येते । 'प्रातिपदिकाद्धात्वर्थे–' इत्येव सिद्धे अनयोः पाठः सोपसर्गात्प्रत्ययार्थ इत्येके । सुख-दुःखाभ्यां तत्क्रियायामेव णिच् स्यान्न त्वाचष्ट इत्यस्मिन्नर्थे इत्येतदर्थः पाठ इत्यन्ये ।

तु नवगणीपाठो बहुलम् इत्याहुः। तेनापठितेभ्योऽपि क्वचित्स्वार्थे णिच्। 'रामो राज्यमचीकरत्' इति यथेत्याहुः। चुरादिभ्य एव बहुलं णिजित्यर्थ इत्यन्ये। सर्वे पक्षाः प्राचां ग्रन्थे स्थिताः। 'णिङङ्गान्निरसने' (ग सू २०९)। अङ्गवाचिनः प्रातिपदिकान्निरसनेऽर्थे णिङ् स्यात्। हस्तौ निरस्यति हस्तयते। पादयते। 'श्वेताश्वाश्वतरगालोडिताह्वरकाणामश्वतरेतकलोपश्च' (ग सू २१०)। श्वेताश्वादीनां चतुर्णामश्वादयो लुप्यन्ते, णिङ् च धात्वर्थे।। श्वेताश्वमाचष्टे, तेनातिक्रामति वा, श्वेतयते। अश्वतरमाचष्टे अश्वयते। गालोडितं वाचां विमर्शः, तत्करोति गालो-डयते। आह्वरयते। केचित्तु णिचमेवानुवर्तयन्ति। तन्मते परस्मैपदमपि। 'पुच्छादिषु धात्वर्थे इत्येव सिद्धम्' (ग सू २११)। णिजन्तादेव बहुलवचना-दात्मनेपदमस्तु। मास्तु 'पुच्छभाण्ड-' (सू २६७६) इति णिङ्विधिः। सिद्धशब्दो ग्रन्थान्ते मङ्गलार्थः।

इति तिङन्ते चुरादिप्रकरणम्।

सुभादयश्च संगृहीता भवन्तीत्यर्थः। मतान्तरमाह अपरे त्विति। चुरादिभिन्ना उदाहृता ये नव गणाः तेभ्योऽपि क्वचित् स्वार्थे णिच् बहुलग्रहणादस्माल्लभ्यत इत्यर्थः। मतान्तरमाह चुरादिभ्य एवेति। वस्तुतस्तु भूवादिसूत्रे पाठेन धातु-संज्ञेति भाष्यप्रतीकमुपादाय स पाठो नोपलक्षणार्थः, किंतु इयत्ताप्रतिपादनार्थ इति कैयट आह। एवं च बहुलमेतन्निदर्शनम् इति गणसूत्रमनार्षमिति शब्देन्दुशेखरे स्थितम्। णिङङ्गान्निरसने इति। गणसूत्रम्। स्पष्टम्। ङित्वान्नित्यमात्म-नेपदम्। श्वेताश्वाश्वतरगालोडिताह्वरकाणामश्वतरेतकलोपश्च। इदमपि गणसूत्रम्। श्वेताश्वादीनामिति। श्वेताश्व अश्वतर गालोडित आह्वरक एषा-मित्यर्थः। अश्वादय इति। श्वेताश्वशब्दे अश्वशब्दः, अश्वतरशब्दे तरशब्दः, गालोडितशब्दे इतशब्दः, आह्वरकशब्दे कशब्दश्च लुप्यन्ते इत्यर्थः। णिङ् चेति। चकारलभ्यमिदम्। धात्वर्थे इति। 'प्रातिपदिकाद्धात्वर्थे' इत्यतस्तदनुवर्तते। निरसन इति निरसनमिति भावः। विमर्श इति। विवेचनमित्यर्थः। केचित्त्विति। श्वेताश्वेत्यादिसूत्रे णिचमेवानुवर्तयन्ति न तु णिङमित्यर्थः। णिच्णिङोः फलभेदं दर्शयति तन्मते इति। पुच्छादिषु धात्वर्थे इत्येव सिद्धमिति। धातुपाठं रचयितुर्भीमसेनस्य वाक्यमिदमित्याहुः 'प्रातिपदिकाद्धात्वर्थे-' इति णिचि सिद्धे 'पुच्छभाण्डचीवराण्णिङ्' इति न कर्तव्यमित्यर्थः। ननु नित्यात्मनेपदार्थं 'पुच्छ-

---

पुच्छादिष्विति। भीमसेनस्य वाक्यम्। ग्रन्थान्त इति। भू सत्तायामित्यादि-धातुपाठस्यान्त इत्यर्थः। इति तत्त्वबोधिन्यां चुरादिप्रकरणम्।

अथ तिङन्ते णिच्प्रकरणम् ॥ ५३ ॥

२५७५ तत्प्रयोजको हेतुश्च। (१-४-५५) कर्तुः प्रयोजको हेतुसंज्ञः कर्तृसंज्ञश्च स्यात्। **२५७६ हेतुमति च। (३-१-२६)** प्रयोजकव्यापारे

भाण्ड-' इति णिङ्विधिरावश्यक इत्यत आह **णिजन्तादेव बहुलवचनादिति।** 'बहुमेतन्निदर्शनम्' इति बहुलग्रहणादित्यर्थः। ननु पुच्छादिषु धात्वर्थ इत्येव णिजित्येव सिद्धे सिद्धशब्दो व्यर्थ इत्यत आह **सिद्धशब्द इति।** धातुपाठात्मकग्रन्थसमाप्तौ सिद्धशब्दप्रयोगो मङ्गलार्थ इत्यर्थः। पस्पशाह्निकभाष्ये 'द्द सिद्धे शब्दार्थसंबन्धे' इति वार्तिकग्रन्थस्यादिमवार्तिकव्याख्यावसरे सिद्धशब्दोपादानं मङ्गलार्थमित्युक्तम्। 'मङ्गलादीनि मङ्गलमध्यानि मङ्गलान्तानि च शास्त्राणि प्रथन्ते' इति भूवादिसूत्रस्थभाष्याद् ग्रन्थान्तेऽपि मङ्गलस्य कर्तव्यतासिद्धिः।

इति श्रीवासुदेवदीक्षितविदुषा विरचितायां सिद्धान्तकौमुदीव्याख्यायां
बालमनोरमाख्यायां चुरादिनिरूपणं समाप्तम्।

अथ 'हेतुमति च' इति णिज्विधिं वक्ष्यन् हेतुसंज्ञामाह **तत्प्रयोजको हेतुश्च।** 'स्वतन्त्रः कर्ता' इति पूर्वसूत्रोपात्तः कर्ता तच्छब्देन परामृश्यते। तस्य कर्तुः प्रयोजकः, प्रवर्तयिता तत्प्रयोजकः, तदाह **कर्तुः प्रयोजको हेतुसंज्ञ इति।** चकारः पूर्वसूत्रोपात्तां कर्तृसंज्ञां समुच्चिनोति, तदाह **कर्तृसंज्ञश्चेति।** देवदत्तः पचति, तं प्रेरयति यज्ञदत्त इत्यत्र देवदत्तस्यैव पाकानुकूलव्यापारात्मकपचधात्वर्थाश्रयत्वरूपकर्तृत्वसत्त्वात् प्रयोजकस्य तदभावादिह कर्तृसंज्ञाविधिः। प्रयोजकस्य प्रयोज्यकर्त्रा अन्यथासिद्धत्वाद्धेतुत्वाप्राप्तौ हेतुसंज्ञाविधिः। **हेतुमति च।** 'सत्यापपाश-' इत्यतो णिजित्यनुवर्तते। हेतुः प्रयोजक आधारतया अस्यास्तीति हेतुमान्-प्रयोजकनिष्ठः प्रेषणादिव्यापारः, तस्मिन् वाच्ये णिच् स्यादित्यर्थः। 'धातोरेकाचो हलादेः-' इत्यतो धातोरित्यनुवर्तते, तदाह **प्रयोजकव्यापार इति।** प्रेषणादावित्यादिशब्देन अध्येषणानुमत्युपदेशानां ग्रहणम्। तत्र भृत्यादेर्निकृष्टस्य प्रवर्तना प्रेषणम् आज्ञे-

---

तत्प्रयोजको हेतुश्च। तच्छब्देन 'स्वतन्त्रः कर्ता' इति पूर्वसूत्रोपात्तः कर्ता परामृश्यते। तस्य कर्तुः प्रयोजकः प्रेरकः, तद्व्यापारानुकूलव्यापारवानित्यर्थः। चकार एकसंज्ञाधिकारबाधनार्थस्तदाह **हेतुसंज्ञः कर्तृसंज्ञश्चेति।** हेतुसंज्ञायाः प्रयोजनं 'भीस्म्योर्हेतुभये' 'भियो हेतुभये षुक्' इत्यादौ प्रयोजकस्य हेतुत्वेन व्यवहारः। कर्तृसंज्ञायास्तु 'लः कर्मणि च भावे च-' इति सूत्रेण प्रयोजके वाच्ये लकारादयः। **हेतुमति च।** स्वनिष्ठाधारतानिरूपिताधेयतासंबन्धेन हेतुर्यत्रास्ति स हेतुमान्व्यापारः, तस्मिन्वाच्ये णिजित्याहुः। **प्रयोजकव्यापार इति।** प्रयो-

प्रेषणादौ वाच्ये धातोर्णिच्स्यात् । भवन्तं प्रेरयति भावयति । 'णिचश्च' (सू २२६४) इति कर्तृगे फले आत्मनेपदम् । भावयते । भावयांबभूव । २५७७

त्यर्थः । समानस्याधिकस्य च सख्याचार्यादेः प्रवर्तना अध्येषणा । अनुमतिः राजादेः संमतिः । ज्वरितस्य कषायपाने हितावबोधनेन प्रवर्तना उपदेशः । हनना-द्भीत्या पलायमानस्य निरोधाचरणमपि प्रयोजकव्यापारः । प्रयोजकनिष्ठप्रवर्तनायां णिजिति फलितम् । एते तु विशेषाः प्रकरणादिना अवगम्यन्ते । कुलालो घटं करोतीत्यत्र तु न णिच् प्रयोज्यप्रयोजकोभयसमभिव्याहार एव तत्प्रवृत्तेरित्यन्यत्र विस्तरः । **भवन्तमिति** । देवदत्तो यज्वा भवति । तं प्रेरयति याजक इत्यार्थे भूधात्वर्थस्य भवनस्य मुख्यकर्ता यज्वा, तस्य यज्वभवने प्रवर्तयिता याजकादिः प्रयोजकः, तन्निष्ठायां प्रेरणायां भूधातोर्णिच् वृद्ध्यावादेशौ, भावीति णिजन्तम् । तस्माद्भवनानुकूलव्यापारार्थकाद् लटि भावयतीति रूपम् । भवन्तं प्रेरयतीति फलितोऽर्थः । **भावयांबभूवेति** । कर्तृगामिन्यपि क्रियाफले भूधातोरनात्मनेपदि-

---

जकश्चेतनाचेतनसाधारण्येन विवक्षितः । स च क्वचित्सिद्धः क्वचित्फलरूपः । देवदत्तः पाचयति गमयतीत्यादौ सिद्धः । भिक्षा वासयति संग्रामो वासयतीत्यादौ तु फलरूपः । **प्रेषणादाविति** । भृत्यादेर्निकृष्टस्य प्रवर्तना प्रेषणा । आज्ञेत्यर्थः । आदिशब्देनाध्येषणानुमत्यादीनामुपादानम् । समानस्याधिकस्य वा ऋत्विगाचार्यादेः प्रवर्तना अध्येषणम्, प्रार्थनेत्यर्थः । अनुमतिस्तु राजादेः संमतिः, तां विना यागादिक्रिया न निष्पद्यत इत्यनुमतिमात्रेण राजादिः प्रयोजकः । अनुमत्यादीत्यादिशब्देनात्रोपदेशानुग्रहयोरुपादानम् । ज्वरितः कषायं पिबेदित्युपदेशमात्रेण वैद्यादिः प्रयोजकः ॥ यस्तु केनचिद्धन्तुमिष्टं पलायमानं निरुणद्धि सोऽपि हन्तुरनुग्राहकत्वेन प्रयोजकः । सर्वेऽप्येते विशेषाः कथं णिच्प्रत्ययगम्या इति चेत् । अत्राहुः—सर्वानुगतं प्रवर्तनासामान्यं णिचोऽर्थः, विशेषास्त्वर्थप्रकरणादिगम्या इति । नन्वेवं णिचो लोडादीनां च पर्यायता स्यात्ततश्च इदानीं पृच्छतु भवानिति वक्तव्ये प्रच्छयतीति णिजपि प्रयुज्येतेति चेत् । मैवम् । कर्तुः प्रयोजको हि हेतुः प्रैषविषयो यः संबोध्यो देवदत्तादिः स तु नाद्यापि प्रश्नकर्तृत्वेनावधारितः । तथा च प्रयोज्यप्रवृत्त्युपहिता या प्रयोजकनिष्ठप्रवृत्तिः सा णिजर्थस्तदनुपहिता प्रयोजकप्रवृत्तिस्तु लोडर्थ इत्युभयोर्भेदः । उक्तं च—'द्रव्यमात्रस्य तु प्रैषे पृच्छादेर्लोड् विधीयते । सक्रियस्य प्रयोगस्तु यदा स विषयो णिचः' इति । अस्यार्थः—कर्तृत्वेनानवधारितस्य देवदत्तादेस्तु प्रैषे प्रच्छ शीप्सायामित्यादेर्लोड् भवति । प्रयोज्यप्रवृत्त्युपहितप्रवृत्त्याश्रयस्य प्रयुक्तिस्तु यदा सा णिचो विषय इति । किं च प्रयोक्तृनिष्ठा प्रयुक्तिर्लोडर्थः, प्रयोक्त्रप्रयोक्तृकर्तृका

ओः पुयण्ज्यपरे। (७-४-८०) सनि परे यदङ्गं तदवयवाभ्यासोकारस्येत्वं स्यात्पवर्गयण्जकारेष्ववर्णपरेषु परतः। अबीभवत्। अपीपवत्। मूङ्। अमीमवत्। अयीयवत्। अरीरवत्। अलीलवत्। अजीजवत्। २५७८ **स्रवतिशृणोतिद्रवतिप्रवतिप्लवतिच्यवतीनां वा।** (७-४-८१) एषामभ्यासोकारस्य इत्वं वा स्यात्सन्यवर्णपरे धात्वक्षरे परे। असिस्रवत्, असुस्रवत्।

त्वाद् अनुप्रयुज्यमानादपि नात्मनेपदमिति भावः। **ओः पुयण्।** उ इत्यस्य ओरिति षष्ठी। पुयण्जि इति छेदः। पुश्च यण् च ज् चेति समाहारद्वन्द्वात्सप्तमी। अः परो यस्मादिति बहुव्रीहिः। 'सन्यतः' इत्यस्मात्सनीत्यनुवर्तते। अङ्गस्येत्यधिकृतम्। 'अत्र लोपः—' इत्यस्मादभ्यासस्येति, 'भृञामित्' इत्यस्मादिदिति चानुवर्तते, तदाह **सनि परे इत्यादिना। अबीभवदिति।** भू इ अत् इति स्थिते द्वित्वे कार्ये णौ अच आदेशस्य निषेधाद् वृद्ध्यावादेशाभ्यां प्रागेव भू इत्यस्य द्वित्वे उत्तरखण्डस्य वृद्ध्यावादेशयोः कृतयोरुपधाह्रस्वे अभ्यासे अकाराभावेन 'सन्यतः' इत्यस्याप्रवृत्त्या सन्वत्त्वादनेन इत्त्वे दीर्घ इति भावः। **अपीपवदिति।** पूङ्धातो रूपम्। मूङित्यस्माद्धातोरमीमवदिति रूपमित्यर्थः। **अयीयवदिति।** युधातो रूपम्। **अरीरवदिति।** रुधातो रूपम्। **अलीलवदिति।** लूञ्धातो रूपम्। **अजीजवदिति।** जुः सौत्रो धातुः जुचङ्क्रम्येत्यत्र निर्दिष्टः। ननु भू भू इति द्वित्वोत्तरं वृद्ध्यावादेशयोः कृतयोः उपधाह्रस्वे तस्य स्थानिवत्त्वेन लघुपरत्वाभावात् सन्वत्त्वाप्रसक्त्या कथमिहाभ्यासोवर्णस्य इत्त्वमिति चेद् न, आरम्भसामर्थ्यादेव स्थानिवत्त्वाप्रवृत्तेरित्यलम्। **स्रवतिशृणोति।** अपर इत्यनुवर्तते, न तु पुयण्जि इति,

---

तु णिजर्थः। पच देवदत्तेत्यत्र हि वक्तैव प्रेरकः। पाचयतीत्यादौ वक्तृभिन्नः, पाचयामीत्यादौ तु वक्तेति दिक्। **ओः पुयण्जि।** पुयण्जीति समाहारद्वन्द्वात्सप्तम्येकवचनम्। अपर इति बहुव्रीहिः। 'अत्र लोपोऽभ्यासस्य' इत्यतः अभ्यासस्येत्यनुवर्तते। 'भृञामित्' इत्यत इद्ग्रहणं 'सन्यतः' इत्यतः सनीति च। अङ्गस्येति तु अधिक्रियत एव, तदेतदभिप्रेत्याह **सनि परे यदङ्गमित्यादि।** अपरे किम्, बुभूषति। पवर्गयण्जीति किम्, ऊर्णुनविषति। **अबीभवदित्यादि।** भू सत्तायाम्। पूङ् पवने। मूङ् बन्धने। यु मिश्रणादौ। रु शब्दे। लूञ् छेदने। जु गतौ। सौत्रोऽयं धातुः 'जुचंक्रम्य—' इत्यत्र निर्दिष्टः। ननु भू भू इति द्वित्वोत्तरं वृद्ध्यावादेशौ भवतस्ततः कृतस्य 'णौ चङि—' इति ह्रस्वस्य स्थानिवद्भावेन लघुपरत्वाभावात्सन्वद्भावाप्रवृत्त्याऽबीभवदित्यादावभ्यासोवर्णस्येत्वं दुर्लभमिति चेत्। अत्राहुः—आरम्भसामर्थ्यादेव न स्थानिवत्त्वमिति। **स्रवतिशृणोति।** अपर इत्यनुवर्तते

'नाग्लोपि-' (सू २५७२) इति ह्रस्वनिषेधः। अशशासत्। अडुढौकत्। अचीचकासत्। मतान्तरे अचचकासत्। अग्लोपि इति सुब्धातुप्रकरणे उदाहरिष्यते। णयन्तादिणिचि पूर्वविप्रतिषेधादपवादत्वाद्वा वृद्धिं बाधित्वा णिलोपः।

पवर्गजकारयोरसंभवात् स्रवत्यादौ यणः सत्त्वेऽप्यव्यभिचारात्, तदाह **अवर्णपरे धात्वक्षर इति**। अक्षरशब्दो वर्णपरः। **असिस्रवत्, असुस्रवदिति**। द्विहल्व्यवधानेन लघुपरकत्वाभावान्न सन्वत्त्वमिति भावः। अशिश्रवत्, अशुश्रवत्। अदिद्रवत्, अदुद्रवत्। अपिप्रवत्, अपुप्रवत्। अपिप्लवत्, अपुप्लवत्। अचिच्यवत्, अचुच्यवत्। अथ शासुधातोरशशासदित्यत्राह **नाग्लोपीति**। **अडुढौकदिति**। ढौकृ गतावित्यस्य ऋदित्त्वादिति भावः। **अचीचकासदिति**। चकासृ दीप्तौ। ऋदित्त्वान्नोपधाह्रस्वः। चङ्परे णौ यदङ्गं तस्य योऽभ्यासो लघुपर इति पक्षे सन्वत्त्वम् अभ्यासदीर्घश्चेति भावः। **मतान्तरे त्विति**। अङ्गं यत्र द्विरुच्यते इति मते चङ्परे णौ यल्लघु तत्परो योऽङ्गस्य अभ्यास इति मते चेत्यर्थः। **अग्लोपीतीति**। अग्लोपिन उपधाह्रस्वनिषेधे मा भवानूननदिति उदाहृतम्। अतितिरायदित्याद्युदाहरणान्तरं सुब्धातुनिरूपणे वक्ष्यते इत्यर्थः। ननु 'चुर स्तेये' इत्यस्मात्स्वार्थे णिचि उपधागुणे चोरि इति रूपम्। तस्माद्धेतुमण्णौ प्रथमस्य णेर्लोपे सति चोरि इत्येव हेतुमण्ण्यन्तम्। तस्माल्लटि तिपि शपि गुणे अयादेशे चोरयतीत्येव रूपमिष्यते। तन्नोपपद्यते, हेतुमण्णौ परे प्रथमस्य णेर्लोपं बाधित्वा परत्वाद् वृद्धौ आयादेशे चोराय् इ इत्यस्माल्लटि चोराययतीत्यापत्तेरित्यत आह **णयन्तादिणचीति**। णयन्तादिणचि वृद्धिं बाधित्वा णिलोप इत्यन्वयः। कुत इत्यत आह **पूर्वविप्रतिषेधादिति**। 'णयल्लोपावियङ्यण्गुणवृद्धिदीर्घेभ्यः पूर्वविप्रतिषेधेन' इति वार्तिकेनेति भावः। **अपवादत्वाद्वेति**। 'कमु कान्तौ' इति धातौ द्विधा प्रपञ्चितत्वादिति भावः।

न तु पुयण्जीति, पवर्गजकारयोरसंभवाद्यणः संभवेऽप्यव्यभिचारात्तदाह **अवर्णपरे धात्वक्षरे इति**। अक्षरशब्दोऽत्र वर्णपरः। अवर्णपरे किम्, शुश्रूषति। श्रुणोत्यादेरुदाहरणं तु अशिश्रवत्, अशुश्रवत्। अदिद्रवत्, अदुद्रवत्। अपिप्रवत्, अपुप्रवत्। अचिच्यवत्, अचुच्यवत्। **अडुढौकदिति**। ढौकृ गतौ। चङ्परे णौ यदङ्गं तस्य योऽभ्यासो लघुपर इति पक्षाश्रयेणाह **अचीचकासदिति**। **मतान्तर इति**। 'अङ्गं यत्र द्विरुच्यते' इति मते चङ्परे णौ यल्लघु तत्परो योऽङ्गस्याभ्यास इति मते चेत्यर्थः। **सुब्धातुप्रकरण इति**। अतितिरायत्। असस्भ्रायत्। अविविष्वद्रायत्। अदिदेवद्रायत्। इत्याद्युदाहरिष्यत इत्यर्थः। **वृद्धिं बाधित्वेति**। 'णयल्लोपावियङ्-' इत्यादिवचनाण्णिलोपाशप्रत्याख्यानपक्षेऽपवाद-

चोरयति। 'णौ चङि-' (सू २३१४) इति ह्रस्वः। 'दीर्घो लघोः' (सू २३१८)। न भग्लोपित्वाद् द्वयोरप्यसम्भवः, णयाकृतिनिर्देशात्। अचूचुरत्। २५७६ णौ च संश्चङोः। (६-१-३१) सन्परे चङ्परे च णौ श्वयतेः संप्रसारणं वा स्यात्। 'संप्रसारणं तदाश्रयं च कार्यं बलवत्' (प १२१) इति वचनात्संप्रसारणं पूर्वरूपम्। अशूशवत्। अलघुत्वान्न दीर्घः। अशिश्वयत्।

अथ ण्यन्तात्णौ प्रथमस्य णेर्लोपे चोरि इत्यस्माल्लुङि चङि अचोर् इ अ त् इति स्थिते प्रक्रियां दर्शयति **णौ चङीति ह्रस्व इति**। ततो हेतुमण्णेर्लोपे चुर् इत्यस्य द्वित्वे सन्वद्भावविषयत्वादाह **दीर्घो लघोरिति**। तथा च अचूचुरदिति सिद्धम्। ननु उपधाह्रस्वः अभ्यासदीर्घश्चेति द्वयमपि चङ्परे णौ विहितम्। तदुभयमप्यत्र प्रत्ययलक्षणमाश्रित्य प्रथमणिचमादाय न संभवति, तस्य द्वितीयणिचा व्यवहितत्वेन चङ्परकत्वाभावात्। नापि द्वितीयणिचमादाय तदुभयसंभवः, द्वितीयणिच्प्रकृतेः प्रथमण्यन्तस्य णिलोपमादाय अग्लोपित्वादित्याशङ्क्य परिहरति **न चेति**। अग्लोपित्वाद् द्वयोरपि उपधाह्रस्वाभ्यासदीर्घयोरसंभवो न शङ्क्य इत्यर्थः। कुत इत्यत आह **णयाकृतिनिर्देशादिति**। चङ्परे णावित्यत्र णावित्यस्य चङ्परकणित्वजात्याश्रयैकानेकणिज्व्यक्तिपरकत्वं विवक्षितम्। तथा च णिद्वयस्य चङ्परकत्वाभावेऽपि णित्वस्य चङ्परकत्वमस्तीति ह्रस्वदीर्घयोरस्ति प्रवृत्तिरिति भावः। अत्र जातिनिर्देशः अयुक्त इति शब्देन्दुशेखरे प्रपञ्चितम्। टु ओ श्वि गतिवृद्ध्योः अस्माद्धेतुमण्णौ वृद्ध्यायादेशयोः श्वायीत्यस्माद् लडादौ श्वाययतीति रूपम्। लुङि चङि अश्वि इ अ त् इति स्थिते विशेषमाह **णौ च संश्चङोः**। 'विभाषा श्वेः' इति सूत्रमनुवर्तते। 'ष्यङः संप्रसारणम्' इत्यतः संप्रसारणमिति च, तदाह **सन्पर इत्यादिना**। नन्वन्तरङ्गत्वात् संप्रसारणात्पूर्वं वृद्ध्यायादेशयोः कृतयोः पश्चात् संप्रसारणे पूर्वरूपे अशीशवदिति स्यात्, अशूशवदिति न स्यात्, इत्यत आह **संप्रसारणं तदाश्रयं च कार्यं बलवदिति**। इदं वचनं 'लिट्यभ्यासस्य-' इति सूत्रभाष्ये स्थितम्। एवं च अश्वि इ अत् इत्यत्र

स्यादित्यर्थः। **असंभव इति**। तथा च अचुचोरदित्येव रूपमिति भावः। **णयाकृतिनिर्देशादिति**। चङ्परे णावित्यत्र चङ्परे णित्वे इत्यर्थः। तेन णिद्वये सत्यपि णित्वं चङ्परमस्तीति ह्रस्वदीर्घयोरस्ति संभव इति भावः। एतेन अवीवदद्वीणां परिवादकेनेत्यादौ सन्वद्भावो व्याख्यातस्तत्रापीत्थमेव, पूर्वपक्षसिद्धान्तयोस्तुल्यत्वात्। **णौ च**। विभाषा श्वेरित्यनुवर्तते। संश्चङोरिति णावित्यस्य विशेषणं 'ह्वः संप्र-' इत्यतः संप्रसारणमनुवर्तत एवेत्याह **सन्परे चङ्पर इति**। **वचनादिति**।

२५८० स्तम्भुसिवुसहां चङि । (८-३-११६) उपसर्गनिमित्त एषां सस्य षो न स्याच्चङि । अवातस्तम्भत् । पर्यसीषिवत् । न्यसीषहत् । आटिटत् । आशिशत् । बहिरङ्गोऽप्युपधाह्रस्वो द्वित्वात्प्रागेव, ओणेर्ऋदित्करणाल्लिङ्गात् । मा

वृद्धयायादेशाभ्यां प्रागेव वकारस्य संप्रसारणमुकार इति फलितम् । **पूर्वरूपमिति ।** ततश्च शु इत्यस्य द्वित्वे उत्तरखण्डस्थ णिचमाश्रित्य वृद्ध्यावादेशयोरुपधाह्रस्वे सन्वत्त्वविषयत्वादभ्यासदीर्घे फलितमाह **अशूशवदिति ।** संप्रसारणाभावपक्षे अशिश्वयदित्यत्र अभ्यासदीर्घमाशङ्क्याह **अलघुत्वादिति ।** संयोगपरकत्वादिति भावः । अवपूर्वात्स्तम्भेर्ण्यन्तादवष्टम्भयतीत्यादि । 'अवाच्चालम्बनाविदूर्ययोः' इति षत्वम् । चङि अवातस्तम्भदित्यत्र षत्वे प्राप्ते **स्तम्भुसिवु ।** 'उपसर्गनिमित्तस्य प्रतिषेधः' इति वार्तिकम् । न रपरसृपीत्यतो नेत्यनुवर्तते । 'सहेः साडः सः' इत्यतः स इति षष्ठ्यन्तमनुवर्तते । मूर्धन्य इत्यधिकृतम्, तदाह **उपसर्गनिमित्त इत्यादि ।** स्तम्भुः सौत्रो धातुः । 'षिवु तन्तुसन्ताने' 'षह मर्षणे' । **पर्यसीषिवत्, न्यसीषहदिति ।** 'परिनिविभ्यः सेव–' इत्युपसर्गनिमित्तं षत्वं न । अभ्यासनिमित्तं तु षत्वं भवत्येव । **आटिटत्, आशिशत् इति** आट् इ अ त्, आश् इ अ त् इति स्थिते 'णौ चङि–' इत्युपधाह्रस्वात् प्रागन्तरङ्गत्वात् 'चङि' इति द्वित्वमाशङ्क्याह **बहिरङ्गोऽपीति ।** उपधाह्रस्वः चङ्परणिपरत्वेन बहिरङ्गः । द्वित्वं तु चङ्मात्रापेक्षत्वादन्तरङ्गम् । अथापि द्वित्वात् प्रागेव उपधाह्रस्व इत्यर्थः । कुत इत्यत आह **ओणेरिति ।** 'ओणृ अपनयने' इति धातोः ऋदित्करणम् औणिणदित्यत्र 'नाग्लोपि–' इति उपधाह्रस्वप्रतिषेधार्थम् । यदि तु उपधाह्रस्वात्प्रागेव अन्तरङ्गत्वाद् द्वित्वं स्यात् तदा ओण् इ अ त् इत्यत्र 'अजादेर्द्वितीयस्य' इति णि इत्यस्य णिचा सह द्वित्वे सति पश्चादोकारस्य चङ्परे णौ उपधात्वाभावादेव ह्रस्वस्याप्रसक्तत्वाद् ऋदित्करणं व्यर्थं स्यात् । द्वित्वात्प्रागेव उपधाह्रस्व इत्यभ्युपगमे तु ओण् इ अ त् इत्यस्यामवस्थायां प्राप्तस्य ह्रस्वस्य निषेधार्थमृदित्करणमर्थवत् । अतः

इयं च परिभाषा 'लिट्यभ्यासस्योभयेषाम्' इत्यत्र वच्यादीनां ग्रह्यादीनामनुवृत्त्यैवेष्टसिद्धावुभयेषांग्रहणसामर्थ्याल्लभ्यते । अन्यथा ववश्चेत्यत्र हलादिःशेषे कृते वस्य संप्रसारणं स्यादित्याहुः । **स्तम्भुसिवु ।** स्तम्भुः सौत्रः । षिवु तन्तुसंताने । षह मर्षणे । स्तम्भतेः 'स्तन्भेः' इत्यनेन प्राप्तिरन्ययोस्तु 'परिनिविभ्यः–' इत्यनेनेति विवेकः । **आटिटत् । आशिशदिति ।** णिचा सह द्वित्वात्सन्वद्भावो नेति तद्विषये विहितो यो 'दीर्घो लघोः' इति दीर्घः स न प्रवर्तते । **ऋदित्करणाल्लिङ्गादिति ।** यदि पूर्वं द्विर्वचनं भवेत्तदा णिशब्दस्य द्वित्वे सत्युपधाह्रस्वस्याप्राप्तेस्तत्प्रति-

भवानिदिधत् । एजादावेधातौ विधानान्न वृद्धिः, मा भवान्प्रेदिधत् । 'नन्द्राः-' (सू २४४६) इति नदरायां न द्वित्वम्। औन्दिदत्। आड्डिडत्। आर्चिचत्। उब्ज आर्जवे। उपदेशे दकारोपधोऽयम्। 'भुजन्युब्जौ पाण्युपता-

---

बहिरङ्गोऽप्युपधाह्रस्वो द्वित्वात् प्रागेवेति विज्ञायत इत्यर्थः। ननु आटिटत् आशिशत् इत्यत्र द्वित्वप्रवृत्त्यनन्तरमुपधाह्रस्वस्याभावेऽपि 'आटश्च' इति वृद्धौ आटिटत् आशिशत् इति सिध्यत्येवेति किमनेन ज्ञापनेनेत्यत आह **मा भवानिदिधदिति**। एधू इ अ त् इति स्थिते पूर्वं द्वित्वप्रवृत्तौ धि इत्यस्य द्वित्वे पश्चादेकारस्य ह्रस्वो न स्यात्। द्वित्वात्प्रागेव उपधाह्रस्वे तु इध् इ अ त् इति स्थिते धि इत्यस्य द्वित्वे माङ्योगादाडभावे इदिधदिति इष्टं सिध्यतीत्यर्थः। ननु मा भवान् प्रेदिधदित्यत्र प्र इदिधदिति स्थिते कृतेऽपि ह्रस्वे एकदेशविकृतन्यायेन एधधातुत्वाद् 'एत्येधत्यूठ्सु' इति वृद्धिः स्यादित्यत आह **एजादावेधताविति**। अवर्णादेजाद्योरेत्येधत्योरिति व्याख्यातत्वादिति भावः। **औन्दिददिति**। उन्द् इ अ त् इति स्थिते दि इत्यस्य द्वित्वमिति भावः। **आड्डिडदिति**। अड्डधातुर्दोपधः। ष्टुत्वसंपन्नो डकारः। अड्डि अ त् इति स्थिते ष्टुत्वस्यासिद्धत्वेन दकारात्परस्य डि इत्यस्य द्वित्वमिति भावः। **आर्चिचदिति**। अर्च् इ अ त् इति स्थिते रेफात् परस्य चि इत्यस्य द्वित्वमिति भावः। **उब्ज आर्जव इति**। ननु चङि बिज इत्यस्य द्वित्वे हलादिशेषे औबिब्जदिति रूपं स्यात्। औब्जिजदित्येव तु इष्यते, तत्राह **उपदेशे दकारोपधोऽयमिति**। ततश्च 'न न्द्राः-' इति दकारस्य द्वित्वनिषेधाद् जि इत्यस्यैव द्वित्वमिति भावः। तर्हि दकारः कुतो न श्रूयत इत्यत आह **भुजन्युब्जाविति**। ननु द्वित्वात् प्रागन्तरङ्गत्वाद् दकारस्य बकारादेशे सति 'न न्द्राः-' इति निषेधस्य कथमिह प्रवृत्ति-

---

षेधार्थमृदित्करणं व्यर्थं स्यादतस्तदुक्तेऽर्थे ज्ञापकमेव। **एजादावेधताविति**। 'एत्येधत्यूठ्सु' इति सूत्रे एजाद्योरेत्येधत्योरिति व्याख्यातत्वादिति भावः। न च मा भवान्प्रेदिधदित्यत्र 'णौ चङि-' इति ह्रस्वे कृते नायमेधतिरिति वृद्धेरप्रवृत्तौ किमेधतेरेजादिविशेषणेनेति वाच्यम्, एकदेशविकृतस्यानन्यत्वात्। न चैवमपि 'अजादेर्द्वितीयस्य' इति धिशब्दस्थाने धिधिशब्दादेशे सति वभ्रसोरिव प्रकृतिप्रत्ययविभागसंमोह इति वाच्यम्, 'द्विःप्रयोगो द्विर्वचनं षाष्ठम्' इति भाष्ये सिद्धान्तितत्वात्। अन्यथा इहैव प्रेदिधदित्यत्र णिलोपो न स्यात्। जिघांसतीत्यादौ सनः सकारेण विशिष्टस्य द्वित्वे कृते कुत्वं च न स्यादिति दिक्। **उब्ज आर्जव इति**। अयमुपध्मानीयोपध इति वार्तिककृतोक्तम्। तस्य 'झलां जश् झशि' इति जश्त्वेन बकारे कृते उब्जिता उब्जितुमिति रूपम्। एतच्चायोगवाहानां शर्षु पाठस्य फलम्।

पयोः' (सू २८७७) इति सूत्रे निपातनाद्दस्य बः। स चान्तरङ्गोऽपि द्वित्वविषये 'न न्द्राः–' (सू २४४६) इति निषेधाज्जिशब्दस्य द्वित्वे कृते प्रवर्तते। न तु ततः प्राक्, दकारोच्चारणसामर्थ्यात्। औब्जिजत्। अजादेरित्येव। नेह–

रित्यत आह स चेति। ननु द्रु गतौ द्रावयति चङि द्रु इत्यस्य द्वित्वे उत्तरखण्डस्य वृद्ध्यावादेशयोः उपधाह्रस्वे 'स्रवति शृणोति–' इत्यभ्यासस्य इत्त्वे अदिद्रवदिति इष्यते। तन्नोपपद्यते, 'न न्द्राः–' इति दकारस्य द्वित्वनिषेधादित्यत आह अजादेरित्येवेति। 'न न्द्राः–' इत्यत्र अजादेरित्यनुवर्तत एवेत्यर्थः। आदिभूतदच इति व्याख्यातं प्राक्। ततश्च आदिभूतादचः परा नदरा द्विर्न भवन्तीति फलितम्। नेहेति।

भाष्यकारादयस्तूपध्मानीयोपधपाठे उब्जिजिषतीति रूपं न सिध्येत्। यदि 'पूर्वत्रासिद्धीयमद्विर्वचने' इत्याश्रित्य बकारोत्तरं द्वित्वं क्रियते, यदि वा अस्यानित्यतामाश्रित्य बकारात्पूर्वमेवोपध्मानीयस्य द्वित्वमुभयथापि इष्टरूपासिद्धिः, आद्ये उबिब्जिषति, द्वितीये तूपध्मानीयस्याच्त्वात्तदादेः 'अजादेर्द्वितीयस्य' इति द्वित्वे हलादिःशेषे द्वितीयोपध्मानीयस्य जश्त्वेन बकारे पश्चात्प्रथमस्यापि तथैव बकारे उब्ब्जिषतीत्यापत्तेः। ततश्चेष्टसिद्धये दकारोपधोऽयं स्वीकार्यः। भुजन्युब्जाविति निपातनादुपधादकारस्य बो भवतीति वाक्यं कल्प्यते, तच्च 'स्तोः श्चुना श्चुः' इत्यस्याग्रे। तदयमर्थः—श्चुना योगे उद्जेर्दकारस्य बकार इति। 'अभ्युद्रः समुद्रः' इत्यत्र तु उब्जिता उब्जितुमित्यत्रैव चवर्गयोगो नास्तीति न बकारः। दकारोपधे चास्मिन्स्वीकृते 'न न्द्राः–' इति निषेधाज्जिशब्दस्य द्वित्वे ततो बकारे च उब्जिजिषतीति सिध्यति रूपम्। न च 'पूर्वत्रासिद्धीयमद्विर्वचने' इति बकारोत्तरं द्विर्वचने सति स्यादेवानिष्टमिति वाच्यम्, द्विर्वचने हि त्रैपादिकं सिद्धं न तु तन्निषेधेऽपि। तथा च निषेधे त्रिपादीस्थस्यासिद्धत्वात् 'न न्द्राः–' इति निषेधः प्रवर्तते। यद्वा तादृशवाक्यमिह न कल्प्यते, किं तु 'भुजन्युब्जौ–' इति निपातनेन दस्य ब इति। न चैवं बकारसहितस्य द्वित्वप्रसङ्गः, धातौ दकारोच्चारणसामर्थ्यात्। न चाभ्युद्र इत्यादावपि बकारश्रवणप्रसङ्गः, अकुत्वविषय एव बकारनिपातनाभ्युपगमात्। यद्वा अभ्युद्र इत्यादि रूपं द्रुधुपसर्गाद्द्रमेर्डप्रत्यये ज्ञेयम्। उद्जेस्तु घञि अनभिधानात् प्रयोगाभाव इति वदन्ति। तदेतद्भाष्यादिमतमभिप्रेत्याह उपदेशे दकारोपध इत्यादि। अजादेरित्येवेति। 'न न्द्राः–' इत्यत्र अजादेरित्यनुवर्तते, तेन आदिभूतादचः परा एव नदरा द्विर्नोच्यन्ते, नान्ये इत्यर्थः। ननु लावस्थायामेव अडिति भाष्यकारोक्तपक्षे अदिद्रपदित्यत्र अजादित्वमस्त्येव, न्याय्यश्च प्रथममट्, परत्वादन्तरङ्गत्वाच्चेति चेत्। अत्राहुः—द्वितीयस्येत्यप्यत्रानुवर्तते तत्सामर्थ्याच्च नित्यं द्वितीयस्येति तदर्थः। तेन लावस्था-

अदिद्रपत्। २५८१ रभेरशब्लिटोः। (७-१-६३) रभेर्नुम्स्यादचि न तु शब्लिटोः। २५८२ लभेश्च। (७-१-६४) अररम्भत्। अललम्भत्। 'हेरचङि' (सू २५३१) इति सूत्रे अचङि इत्युक्तेः कुत्वं न। अजीहयत्। 'अत्स्मृदृत्वरप्रथम्रदस्तॄस्पशाम्' (सू २५६६)। असस्मरत्। अददरत्। तपरत्व-

---

प्रकृते आदिभूतादचः परत्वाभावान्न दकारद्वित्वनिषेध इत्यर्थः। अदिद्रपदिति पाठे द्राधातोर्णिचि पुकि द्रापि इत्यस्माद्रूपम्। ननु लावस्थायामडिति पक्षे अचः परत्वमस्त्येवेति चेत्, न, 'न न्द्राः–' इत्यत्र 'लिटि धातोः–' इत्यतो धातोरित्यनुवर्त्य धातुसंज्ञाकालिकादादेरचः परा नदराः द्विर्नेति व्याख्यानादित्याहुः। **रभेरशब्लिटोः**। 'इदितो नुम्धातोः' इत्यतो नुमिति 'रधिजभोरचि' इत्यतः अचीति चानुवर्तते, तदाह **रभेर्नुमित्यादि**। **लभेश्च**। लभेरपि नुम् स्याद् अचि, न तु शब्लिटोरित्यर्थस्य स्पष्टत्वादनुक्तिः। **अररम्भदिति**। नुमि कृते संयोगपरत्वेन अकारस्य लघुत्वाभावान्न सन्वत्त्वमिति भावः। 'हि गतौ वृद्धौ च' इत्यस्माच्चङि अजीहयदित्यत्र 'हेरचङि' इति हकारस्य कुत्वं नेत्याह **हेरचङीति**। 'अत् स्मृदृत्वर–' इति सूत्रं चुरादौ 'प्रथ प्रख्याने' इति धातौ व्याख्यातम्। **असस्मरदिति**। अत्र 'सन्यतः' इतीत्त्वे प्राप्ते अत्त्वम्। अत एव ज्ञापकादनेकहल्व्यवधानेऽपि लघुपरत्वमित्युक्तं प्राक्। संयोगपरत्वेन लघुत्वाभावान्नाभ्यासदीर्घः।

मटि कृतेऽपि धातुसंज्ञाप्रवृत्तिकाले अजादित्वाभावान्नोक्तदोषः। नित्यं द्वितीयस्यैकाचो ये नदरास्तेषामेव निषेधात्। न चैवं नित्यं द्वितीयस्येति व्याख्ययैव इष्टसिद्धावजादेरित्यस्यात्रानुवृत्तिर्मास्त्विति वाच्यम्, इन्दिद्रीयिषतीत्यत्र दकारस्यापि द्वित्वनिषेधापत्तेः। अजादेरित्युक्तौ त्वादिभूतादचः परत्वं दकारस्य नेति सिद्धमिष्टम्। न च अजादेरित्युक्तावपि चन्दिद्रीयिषतीत्यत्र दोषः स्यादेव, आद्यवयवस्य हल्त्वान्नकारस्य द्वित्वनिषेधाप्रसङ्गादिति वाच्यम्, अजादेरिति कर्मधारयात् पञ्चमीत्युक्तत्वात्। इह च एकदेशे स्वरितत्वं प्रतिज्ञाय अच इत्येवानुवर्त्यताम्। अथवा आदेरित्यस्याप्यनुवर्तनमस्तु तस्य नावयवपरत्वम्, किंतु पूर्ववर्तिमात्रपरत्वं शब्दाधिकाराश्रयणादिति ज्ञेयम्। नन्वेवमुत्तरार्थतया द्वितीयस्येति ग्रहणस्य सार्थकत्वे स्थिते द्वितीयस्येति न वक्तव्यमिति भाष्यं विरुध्येतेति चेत्। मैवम्। यस्मिन्सूत्रे पठितं तत्र मास्त्विति तदाशयात्। न च अजादेरित्येतावत्युक्ते यस्य कस्यचिदेकाचो द्वित्वं स्यादिति वाच्यम्, प्रथमस्यैकाचः पूर्वेणैव सिद्धेः पुनरारम्भो द्वितीयस्य द्वित्वार्थमिति सुवचत्वात्। **रभेरशब्लिटोः**। 'रधिजभोः–' इत्यतोऽचीति 'इदितः–' इत्यतो नुमिति चानुवर्तते। अचि किम्, आरब्धम्। अशब्लिटोः किम्, रभते, रेभे। **लभेश्च**। योगविभागः 'आङो

सामर्थ्यादत्र लघोर्न दीर्घः। २५८३ विभाषा वेष्टिचेष्ट्योः। (७-४-९६) अभ्यासस्यात्त्वं वा स्याच्चङ्परे णौ। अववेष्टत्, अविवेष्टत्। अचचेष्टत्, अचिचेष्टत्। 'भ्राजभास-' (सू २५६५) इत्यादिना वोपधाह्रस्वः। अबिभ्रजत, अबभ्राजत्। 'काण्यादीनां वेति वक्तव्यम्' (वा ४६१३)। णयन्ताः कणरणभणश्रणलुपहेठाः काण्यादयः षड् भाष्ये उक्ताः। ह्वायिवाणिलोठिलापयश्चत्वारोऽधिका न्यासे। चाणिलोटी इत्यप्यन्यत्र। इत्थं द्वादश। अचीकणत्, अचकाणत्। २५८४

अददरदिति। दॄ विदारणे इत्यस्य रूपम्। अत्रापि 'सन्यतः' इत्यस्यापवादः अत्त्वम्। 'दीर्घो लघोः' इति दीर्घमाशङ्क्याह **तपरत्वसामर्थ्यादिति**। अतत्वरत्। अपप्रथत्। अमम्रदत्। अतस्तरत्। अपस्पशत्। **विभाषा वेष्टिचेष्ट्योः**। 'अत्र लोपः-' इत्यस्मादभ्यासस्येत्यनुवर्तते। 'अत् स्मृदृत्वर-' इत्यतः अदिति 'सन्वल्लघुनि-' इत्यतः चङ्परे इति। चङ् परो यस्मादिति बहुव्रीहिः, णाविस्यार्थिकम्, तदाह **अभ्यासस्यात्त्वमिति**। **अबिभ्रजदिति**। उपधाह्रस्वपक्षे लघुपरत्वात् सन्वत्त्वादभ्यासस्य इत्त्वम्। 'दीर्घो लघोः' इति तु न, संयोगपरत्वादलघुत्वात्। **काण्यादीनां वेति**। 'णौ चङ्युपधायाः-' इति ह्रस्व इति शेषः। **णयन्ताः कणरणेति**। 'कण निमीलने, रण शब्दे, भण शब्दे, श्रण दाने, लुप छेदने, हेठ विबाधायाम्' इति षड् धातवो णयन्ताः काण्यादयो भाष्ये पठिता इत्यर्थः। **ह्वायीति**। 'ह्वेञ् स्पर्धायां शब्दे च' आत्त्वे युकि च निर्देशः, 'वण शब्दे' दन्त्योष्ठ्यादिः, 'लुठ प्रतीघाते' टवर्गद्वितीयोपधः, 'लप व्यक्तायां वाचि' इति चत्वारो णयन्ता भाष्योक्तेभ्योऽधिका न्यासग्रन्थे पठिता इत्यर्थः। **चाणिलोटी इति**। 'चण दाने' तालव्यादिः। 'लुट स्तेये' टवर्गप्रथमान्तो भ्वादिः। चुरादौ भाषार्थकोऽपि। एतावपि णयन्तौ द्वौ भाष्यन्यासग्रन्थाभ्यामन्यत्र क्वचिद् ग्रन्थे पठितौ इत्यर्थः। **इत्थं द्वादशेति**। अनेन मतभेदेन काण्यादयो द्वादशेत्यर्थः। **अचीकणदिति**। उपधाह्रस्वपक्षे लघुपरत्वात् सन्वत्त्वदीर्घौ च। **अचकाणदिति**। उपधाह्रस्वाभावपक्षे रूपम्। अरीरणत्, अरराणत्। अबीभणत्, अबभाणत्। अशिश्रणत्, अश-

---

यि-' इत्यत्र लभेरेवानुवृत्तिर्यथा स्यादिति। **काण्यादीनामिति**। कण निमीलने। रण शब्दे। भण शब्दे। श्रण दाने। लुप्लृ छेदने। हिठ विबाधायाम्। षट्। ह्वेञ् स्पर्धायां शब्दे च। वण शब्दे। लुट प्रतिघाते। लुप्लृ छेदने। लोपीति णिजन्तनिर्देशः। लापयति इति पाठान्तरे लप व्यक्तायां वाचि। केचित्तु लपहेठ इति पठन्ति। न्यासे चत्वारः। श्रण दाने। लुठ स्तेये। भ्वादिः। चुरादौ दण्डकपाठे भाषार्थकोऽपि। अरीरणत्, अरराणत्। अबीभणत्, अबभाणत्। अशिश्रणत्,

---

१ धातु पाठे तु 'हेठ' इति दृश्यते।

स्वापेश्चङि । (६-१-१८) यन्तस्य स्वपेश्चङि संप्रसारणं स्यात् । असूषुपत् ।
२५८५ शाच्छासाह्वाव्यावेपां युक् । (७-३-३७) णौ परे । पुकोऽपवादः । शाययति । छाययति । साययति । ह्वाययति । व्याययति । **२५८६ ह्वः संप्रसारणम् । (६-१-३२)** सन्परे चङ्परे च णौ ह्वः संप्रसारणं स्यात् । अजूहवत्,

---

श्राणत् । अलूलुपत्, अलुलोपत् । अजीहिठत, अजिहेठत् । अजूहवत्, अजुहावत् । अवीवणत्, अववाणत् । अलूलुठत्, अलुलोठत् । अलीलपत्, अललापत् । अचीचणत्, अचचाणत् । अलूलुटत्, अलुलोटत् । **स्वापेश्चङि संप्रसारणमिति** । ष्यङः संप्रसारणमित्यतस्तदनुवृत्तेरिति भावः । **असूषुपदिति** । 'संप्रसारणं तदाश्रयं च कार्यं बलवत्' इति वचनात्कृते संप्रसारणे द्वित्वं पूर्वरूपं सन्वत्त्वदीर्घौ षत्वमिति भावः । **शाच्छासा** । शो तनूकरणे, छो छेदने, षो अन्तकर्मणि, ह्वेञ् स्पर्धायां शब्दे च, व्येञ् संवरणे, एषां कृतात्त्वनिर्देशः । 'वेञ् तन्तुसंताने' 'पा पाने' भ्वादिः । एषां द्वन्द्वात् षष्ठीबहुवचनम् । **णौ परे इति** । शेषपूरणमिदम् । आदन्तलक्षणपुकोऽपवादः । युकि ककार इत्, उकार उच्चारणार्थः, कित्त्वादन्तागमः । अत्र 'लुग्विकरणालुग्विकरणयोरलुग्विकरणस्य ग्रहणम्' इति वचनात् 'पा रक्षणे' इति न गृह्यते । तस्य तु पालयतीति रूपमनुपदमेव वक्ष्यति । **शाययतीति** । लुङि अशीशयत् । **छाययतीति** । अचिच्छयत् । **साययतीति** । असीषयत् । **ह्वाययतीति** । लुङि तु विशेषो वक्ष्यते । **व्याययतीति** । अविव्ययत् । वाययति । अवीवयत् । पाययति । लुङि तु विशेषो वक्ष्यते । **ह्वः संप्रसारणम्** । ह्वेञः कृतात्त्वस्य ह्व इति षष्ठी । 'णौ च संश्चङोः' इत्यनुवृत्तिमभिप्रेत्याह **सन्पर इत्यादि** । **अजूहवदिति** । ह्वा इ अ त् इति स्थिते 'संप्रसारणं तदाश्रयं च कार्यं बलवत्' इति वचनात्

अशश्राणत् । अलूलुपत्, अलुलोपत् । अजीहिठत्, अजिहेठत् । **स्वापेश्चङि** । चङि किम्, स्वापयति । **असूषुपदिति** । इह संप्रसारणोत्तरं द्वित्वम् । **शाच्छासा** । शो तनूकरणे । छो छेदने । षोऽन्तकर्मणि । ह्वेञ् स्पर्धायाम् । व्येञ् संवरणे । वेञ् तन्तुसंताने । पा पाने । 'लुग्विकरणालुग्विकरण–' इति परिभाषया 'पा रक्षणे' इति नेह गृह्यते । तस्य तु पालयतीति रूपमनुपदं वक्ष्यति । शाययति । अशीशयत् । छाययति । अचिच्छयत् । साययति । असीषयत् । ह्वाययति । अजूहवत् । व्याययति । अविव्ययत् । वाययति । अवीवयत् । पाययति । अपीप्यत् । इह शाच्छासादीनां कृतात्त्वानां निर्देशः पुकः प्राप्तिं ध्वनयितुम् । तत्प्रयोजनं त्वस्मिन् प्रकरणे लक्षणप्रतिपदोक्तपरिभाषाया अप्रवृत्तिः । तेन घ्यापयति, क्षापयतीत्यादि सिद्धम् । **ह्वः संप्र** । 'णौ च संश्चङोः' इति वर्तते, तदाह **सन्पर इत्यादि** ।

अजुहावत्। २५८७ **लोपः पिबतेरीच्चाभ्यासस्य**। (७-४-४) पिबतेरुपधाया लोपः स्याद् अभ्यासस्य ईदन्तादेशश्च चङ्परे णौ। अपीप्यत्। 'अर्तिह्री-' (सू २५७०) इति पुक्। अर्पयति। ह्रेपयति। व्लेपयति रेपयति। यलोपः। क्नोपयति। क्ष्मापयति। स्थापयति। २५८८ **तिष्ठतेरित्**। (७-४-५) उपधाया इदादेशः स्याच्चङ्परे णौ। अतिष्ठिपत्। २५८९ **जिघ्रतेर्वा**। (७-४-६) अजिघ्रिपत्, अजिघ्रपत्। 'उर्ऋत्' (सू २५६७)। अचीकृतत्,

---

कृते संप्रसारणे पूर्वरूपे च हु इत्यस्य द्वित्वे उत्तरखण्डस्य वृद्ध्यावादेशयोः कृतयोरुपधाह्रस्वे सन्वत्त्वदीर्घाविति भावः। अत्र कृते संप्रसारणे पूर्वरूपे च ह्रस्वाभावान्न युक्। पाधातोर्णौ युगागमे पायि इत्यस्माल्लुङि चङि द्वित्वादौ अपीप्य् अ त् इति स्थिते **लोपः पिबतेः। चङ्परे णाविति**। 'णौ चङ्युपधायाः-' इत्यतस्तदनुवृत्तेरिति भावः। **अपीप्यदिति**। 'नानर्थकेऽलोऽन्त्यविधिः-' इत्यस्य अनभ्यासविकार इति निषेधादभ्यासान्त्यस्य ईत्वम्। इह उपधालोपे कृते अग्लोपित्वादलघूपधत्वाच्च सन्वत्त्वदीर्घयोरप्राप्तावीत्वविधिः। **अर्तिह्री इति पुगिति**। क्रमेणोदाह्रियते इति शेषः। **अर्पयतीति**। ऋधातोरुदाहरणम्। वृद्धिं बाधित्वा नित्यत्वात् पुक्, गुणः। **ह्रेपयतीति**। 'ह्री लज्जायाम्' इत्यस्य रूपम्। **व्लेपयतीति**। व्ली विशरणे इत्यस्य रूपम्। **रेपयतीति**। री क्षये इत्यस्योदाहरणम्। 'क्नूयी शब्दे' इत्यस्य क्नोपयतीत्युदाहरिष्यन्नाह **यलोप इति**। क्नूयीधातोर्णौ पुकि 'लोपो व्योः-' इति यलोप इत्यर्थः। ततः क्नूप् इ इति स्थिते अलघूपधत्वेऽपि पुगन्तत्वाद् गुणः। **क्ष्मापयतीति**। 'क्ष्मायी विधूनने' अस्माण्णौ पुकि यलोपः। आदन्तस्योदाहरति **स्थापयतीति**। लुङि चङि अतिष्ठप् अ त् इति स्थिते **तिष्ठतेरित्**। 'णौ चङ्युपधायाः-' इत्यनुवर्तते, तदाह **उपधाया इति**। **जिघ्रतेर्वा**। घ्राधातोरुपधाया इद्वा स्याच्चङ्परे णावित्यर्थः। अजिघ्रप् अ त् इति स्थिते उपधाया इत्वविकल्पः। **उर्ऋदिति**। धातोरुपधाया ऋकारस्य ऋद्वा चङ्परे णाविति व्याख्यातं चुरादौ। **अचीकृतदिति**। कृत् इ अ त् इति स्थिते ऋत्वपक्षे कृत् इत्यस्य द्वित्वे उरदत्वे हलादिशेषे अभ्यास-

---

अजूहवत्, अजुहावदिति। 'काण्यादीनां वा-' इति ह्रस्वविकल्पः। **अपीप्यदिति**। उपधालोपस्य द्वित्वे कर्तव्ये प्रतिषेधात् कृते लोपे स्थानिवद्भावाद्वा पाय-शब्दस्य द्वित्वे हलादिःशेषे ईकारः। स च अनभ्यासविकार इति निषेधादन्त्यस्यादेशः। इहाग्लोपित्वादलघूपधत्वाच्च सन्वदित्त्वदीर्घयोरप्राप्तावीत्वं विधीयते। **व्लेपयतीत्यादि**। व्ली वरणे। रीङ् क्षये। क्नूयी शब्दे उन्दे च। क्ष्मायी विधूनने। **तिष्ठतेरित्**। तकारो मन्दप्रयोजनः। श्तिपा निर्देशो यङ्लुङ्निवृत्त्यर्थः। अता-

अचिकीर्तत् । अवीवृतत् , अववर्तत् । अमीमृजत् , अममार्जत् । 'पातेर्णौ लुग्वक्तव्यः' (वा ४५२०) । पुकोऽपवादः । पालयति । **२५६० वो विधूनने जुक् ।** (७-३-३८) वातेर्जुक्स्याण्णौ कम्पेऽर्थे । वाजयति । कम्पे किम्-केशान्वापयति । 'विभाषा लीयतेः' (सू २५०६) । **२५६१ लीलोर्नुग्लु-**

चुत्वे सन्वत्त्वाद् इत्वे तस्य दीर्घे रूपम् । **अचिकीर्तदिति** । कृत् इ अ त् इति स्थिते 'उर्ऋत् इत्युपधाया ऋत्वाभावपक्षे उपधायाश्चेति इत्वे रपरत्वे किर्त् इत्यस्य द्वित्वे उत्तरखण्डे उपधायां चेति दीर्घे रूपम् । **अवीवृतदिति** । 'वृतु वर्तने' । णिचि लघूपधगुणं बाधित्वा उर्ऋत् । चङि वृत् इत्यस्य द्वित्वे उरदत्वे सन्वत्त्वाद् इत्वं दीर्घश्चेति भावः । **अववर्तदिति** । ऋत्वाभावपक्षे वृत् इत्यस्य द्वित्वे उरदत्वे उत्तरखण्डस्य लघूपधगुणे रूपम् । लघुपरकत्वाभावान्न सन्वत्त्वदीर्घौ । **अमीमृजदिति** । उपधाया ऋत्वपक्षे रूपम् । **अममार्जदिति** । उपधाया ऋत्वाभावपक्षे द्वित्वे उरदत्वे उत्तरखण्डे 'मृजेर्वृद्धिः' इति वृद्धौ रपरत्वे रूपम् । लघुपरत्वाभावान्न सन्वत्त्वम् । **पातेर्णौ लुगिति** । लुगागम इत्यर्थः । **पुकोऽपवाद इति** । आदन्तलक्षणपुकोऽपवाद इत्यर्थः । यद्यपि 'पाल रक्षणे' इति धातोरेव सिद्धम् , तथापि पुको निवृत्तिः फलम् । **वो विधूनने** । 'ओ वै शोषणे' इति धातोः कृतात्वस्य व इति षष्ठ्यन्तम् । 'अर्तिह्री–' इत्यतो णावित्यनुवर्तते, तदाह **वातेरित्यादि** । पुकोऽपवादो जुक् । **केशान्वापयतीति** । सुगन्धीकरोतीत्यर्थः । अत्र वैधातोः पुगेव । वाधातोस्त्विह न ग्रहणम् , लुग्विकरणत्वात् । केचित्तु वातेरेवात्र ग्रहणम्, नतु वेञः, नापि वै इत्यस्य, लाक्षणिकत्वात् सानुबन्धकत्वाच्चेत्याहुः ।

स्थपत् । लटि तास्थापयतीति । **'उर्ऋत्'** । चुरादौ व्याख्यातम् । **अचिकीर्तदिति** । ऋदादेशाभावपक्षे 'उपधायाश्च' इतीत्वे रपरत्वम् 'उपधायां च' इति दीर्घः । **पुकोऽपवाद इति** । आदन्तत्वात्पुकः प्राप्तिः । एवं च लुगागमस्य पुङ्निवृत्तिरेव फलम् । पालयतीति रूपस्य पाल रक्षणे इति धातुनापि सिद्धेरिति भावः । **वो विधू** । लुग्विकरणाऽलुग्विकरणपरिभाषया ओवै शोषणे इत्यस्यैव ग्रहणम्, न तु वा गतिगन्धनयोरित्यस्य । लक्षणप्रतिपदोक्तपरिभाषा त्वस्मिन्प्रकरणे न प्रवर्तते इत्युक्तं प्राक् । ओवै शोषणे इत्यस्य रूपमिति वदन् वामनोऽप्यत्रानुकूलः । वज गताविति धातुना वाजयतीति रूपे सिद्धे जुगागमस्य पुङ्निवृत्तिरेवेहापि फलम् । **वातेरिति** । वायतेरिति वक्तुं युक्तम् । आत्वविधायकसूत्रं स्मारयति **विभाषा लीयतेरिति** । लीयतेरिति यका निर्देशो न तु श्यना । अन्यथा विभाषा लीङ इत्येवावदयत् । तेन लीलीङोरुभयोरप्यात्वं भवति । **लीलोः** । लीङ् श्लेषणे दिवादिः ।

काचन्यतरस्यां स्नेहनिपातने। (७-३-३९) लीयतेर्लातेश्च क्रमान्नुग्लुकावागमौ वा स्तो णौ स्नेहद्रवे। विलीनयति, विलाययति। विलालयति, विलापयति वा घृतम्। ली ई इति ईकारप्रश्लेषादात्वपक्षे नुग्न। स्नेहद्रवे किम्-लोहं विलापयति। **'प्रलम्भनाभिभवपूजासु लियो नित्यमात्वमशिति वाच्यम्'**

आत्वविधायकसूत्रं स्मारयति **विभाषा लीयतेरिति**। लीलीङोरात्वं वा स्यादेज्विषये ल्यपि च इति व्याख्यातं प्राक् श्यन्विकरणे। तत्र 'लीयतेः' इति यका निर्देशः, न तु श्यना। तेन 'ली श्लेषणे' इति श्नाविकरणस्य 'लीङ् श्लेषणे' इति श्यन्विकरणस्य च ग्रहणमिति च प्रागुक्तं न विस्मर्तव्यम्। **लीलोः**। ली ला इत्यनयोः षष्ठीद्विवचनम्। **णाविति**। 'अर्तिह्री-' इत्यतस्तदनुवृत्तेरिति भावः। स्नेहस्य तैलस्य निपातनं द्रावणं स्नेहनिपातनम्, तदाह **स्नेहद्रवे इति**। आत्वाभावपक्षे आह **विलीनयतीति**। लीलीङोरीकारान्तयोर्नुकि रूपम्। द्रवीकरोतीत्यर्थः। लीलीङोरात्वनुगभावपक्षे आह **विलाययतीति**। लाधातोर्लुगागमे आह **विलालयतीति**। अत्र लातेरादादिकस्य कृतात्वलीयतेश्च ग्रहणम्, व्याख्यानात्। **विलापयतीति**। लुगागमाभावे रूपम्। ननु कृतात्वस्य लीधातोरपि एकदेशविकृतन्यायेन लीत्वान्नुक् स्यादित्यत आह **ली ई इति। लोहं विलापयतीति**। नुग्लुकोरभावादात्वपक्षे पुक्। आत्वाभावे तु वृद्धयायादेशाविति भावः। **प्रलम्भनाभिभवेति**। प्रलम्भनं वञ्चना। अभिभवः

ली श्लेषणे क्र्यादिः। लाग्रहणेन ला आदाने अदादिः कृतात्वौ लीलीङौ च त्रयोऽपि गृह्यन्ते। लीयतेरिति औचित्यादिहापि यका निर्देश इत्युभयोरपि ग्रहणम्। न च 'निरनुबन्धकग्रहणे न सानुबन्धकस्य ग्रहणम्' इति परिभाषया सूत्रेऽपि लीङो न ग्रहणमिति वाच्यम्, इयं हि परिभाषा 'वामदेवाड्ड्यड्ड्यौ' इत्यत्र डित्वेन ज्ञापिता। ज्ञापनं च उत्सर्गतः सजातीयापेक्षमिति प्रत्ययग्रहणविषयत्वमस्याः कल्प्यते। यथा सदव्ययतव्यसमानाधिकरणेनेत्यत्र तव्यस्यैव ग्रहणं न तु तव्यतः, अत एव 'जॄव्रश्च्योः क्त्वि' इति सूत्रे जॄणातिजीर्यत्योरुभयोर्ग्रहणमिति न्यासकृतोक्तम्। अतोऽत्र लीलीङोर्ग्रहणमिति सम्यगेव। न चैवं 'दिव औत्' इत्यत्र निरनुबन्धपरिभाषया दिविति प्रातिपदिकस्यैव ग्रहणं न तु धातोरिति ग्रन्थः कथं संगच्छत इति वाच्यम्, उत्सर्गतः प्रत्ययग्रहणविषयत्वेन क्वचिदन्यत्रापि प्रवृत्तौ बाधकाभावादिति वदन्ति। **विलीनयतीति**। लीलीङोरिकारान्तयोर्नुकि रूपम्। **विलाययतीति**। नुगभावपक्षे तयोरेव रूपम्। **विलालयतीति**। लातेः कृतात्वयोर्लीलीङोश्च लुकि रूपम् **विलापयतीति**। लुगभावपक्षे आदन्तानां तेषामेव रूपम्। **लोहं विलापयतीति**। नुग्लुकोरभावादात्वपक्षे पुक्। आत्वाभावे तु वृद्ध्यायादेशौ। **प्रलम्भनेति**।

(वा ३४८३) २५६२ **लियः संमाननशालिनीकरणयोश्च** । (१-३-७०) लीङ्लियोर्ण्यन्तयोरात्मनेपदं स्यादकर्तृगेऽपि फले पूजाभिभवयोः प्रलम्भने चार्थे । जटाभिर्लापयते । पूजामधिगच्छतीत्यर्थः । श्येनो वर्तिकामुल्लापयते । अभिभवतीत्यर्थः । बालमुल्लापयते वञ्चयतीत्यर्थः । २५६३ **विभेतेर्हेतुभये** । (६-१-५६) विभेतेरेच आत्वं वा स्यात्प्रयोजकाद्भयं चेत् । २५६४ **भीस्म्योर्हेतुभये** । (१-३-६८) आभ्यां ण्यन्ताभ्यामात्मनेपदं स्याद्धेतोश्चेद्भयस्मयौ । सूत्रे भयग्रहणं धात्वर्थोपलक्षणम् । मुण्डो भापयते । २५६५ **भियो हेतुभये षुक्** । (७-३-४०) भी ई इति ईकारः प्रश्लिष्यते । ईकारान्तस्य भियः षुक्स्यात्णौ हेतुभये । भीषयते । २५६६ **नित्यं स्मयतेः** । (६-१-५७)

तिरस्कारः । पूजा प्रसिद्धा । ऐश्वर्येषु लीलीङोः एज्विषये नित्यमात्वं वक्तव्यमित्यर्थः । **लियः संमानन** । लि१ इति लीलीङोर्ग्रहणम् । 'अनुदात्तङितः–' इत्यत आत्मनेपदमिति 'णेरणौ–' इत्यतो णेरिति चानुवर्तते । 'णिचश्च' इति सिद्धे अकर्त्रभिप्रायार्थमिदम् । संमाननं पूजालाभः । शालिनीकरणम् अभिभवः । चकाराद् 'गृधिवञ्च्योः–' इति पूर्वसूत्रात्प्रलम्भनग्रहणं समुच्चीयते, तदाह **लीङ्लियोरित्यादिना** । **विभेतेर्हेतुभये** । 'आदेच उपदेशे–' इत्यत एच इति आदिति चानुवर्तते । 'विभाषा लीयतेः' इत्यतो विभाषेति, 'चिस्फुरोः–' इत्यतो णाविति च । हेतुभयं प्रयोजकाद्भयम् । तदाह **विभेतेरेच इत्यादिना** । **भीस्म्योर्हेतुभये** । 'अनुदात्तङितः–' इत्यत आत्मनेपदमिति 'णेरणौ–' इत्यतो णेरिति चानुवर्तते । हेतुः प्रयोजकः, तदाह **आभ्यां ण्यन्ताभ्यामित्यादि** । अकर्त्रभिप्रायार्थमिदम् । ननु हेतोश्चेद् भयस्मयावित्यनुपपन्नम्, सूत्रे स्मयग्रहणाभावादित्यत आह **सूत्रे भयेति** । सूत्रे भयग्रहणं स्मिङ्धात्वर्थस्य स्मयस्याप्युपलक्षणमित्यर्थः । **मुण्डो भापयते इति** । अत्र आत्वं षुक् आत्मनेपदं च । भिय आत्वाभावपक्षे विशेषमाह **भियो हेतुभये षुक्** । **भी ई इति** । द्वयोः सवर्णदीर्घे भीशब्दात् षष्ठीति भावः । इदं च स्थानिवत्सूत्रे भाष्ये स्पष्टम् । ईकारप्रश्लेषफलमाह **ईकारान्तस्येति** । तेन आत्वपक्षे न षुगिति फलितम् । **णाविति** । 'अर्तिह्री–' इत्यतस्तदनुवृत्तेरिति भावः । **नित्यं**

प्रलम्भनं वञ्चनम् । अशिाते किम्, लीयते । लिनाति । **लियः संमानन** । चात्प्रलम्भने । **विभेतेर्हेतुभये** । हेतुः प्रयोजकः । इह 'आदेच उपदेशे–' इत्यत एच आदित्यनुवर्तते 'विभाषा लीयतेः' इत्यतो विभाषा, 'चिस्फुरोः–' इत्यतो णाविति च तदाह **विभेतेरेच इत्यादि** । **भीस्म्योः** । व्यत्ययेन षष्ठीत्याह **आभ्यामिति** । 'णेरणौ–' इत्यतो णेरित्यनुवृत्तेर्ण्यन्ताभ्यामेव विधिरकर्त्रभिप्रायार्थः ।

स्मयतेरेचो नित्यमात्वं स्याण्णौ हेतोः स्मये । जटिलो विस्मापयते । हेतोश्चेद्भय-स्मयाविस्युक्तेर्नेह–कुञ्चिकयैनं भाययति, विस्माययति । कथं तर्हि 'विस्माप-यन्विस्मितमात्मवृत्तौ' इति । 'मनुष्यवाचा' इति करणादेव हि तत्र स्मयः । अन्यथा शानजपि स्यात् । सत्यम् । विस्माययन् इत्येव पाठ इति सांप्रदायिकाः । यद्वा मनुष्यवाक्प्रयोज्यकर्त्री विस्मापयते, तया सिंहो विस्मापयतीति ण्यन्तायण्णौ

स्मयतेः । 'आदेच उपदेशे–' इत्यत एच इति आदिति चानुवर्तते । 'चिस्फुरोः–' इत्यतो णाविति 'बिभेतेर्हेतुभये' इत्यतो हेतुभये इति च । तत्र भयग्रहणं स्मयस्या-प्युपलक्षणम्, अत्र तु स्मय एव विवक्षितः, स्मयतेर्भीत्यर्थकत्वासंभवात्, तदाह **स्मयतेरेच इत्यादि** । 'विभाषा लीयतेः' इत्यतो विभाषानुवृत्तिनिवृत्तये नित्य-ग्रहणम् । अथ 'बिभेतेर्हेतुभये' इति 'नित्यं स्मयतेः' इति च आत्वविधौ 'भीस्म्यो-र्हेतुभये' इति आत्मनेपदविधौ च हेतुग्रहणस्य प्रयोजनमाह **हेतोश्चेद् भयस्मयावि-त्युक्तेर्नेहेति । कुञ्चिकयैनमिति** । केशबन्धविशेषः कुञ्चिका । तस्याश्च करणतया प्रयोजककर्तृत्वाभावाद् आत्वं पुक् च नेति भावः । आक्षिपति **कथमिति** । रघुवंशकाव्ये

तमार्यगृह्यं निगृहीतधेनुर्मनुष्यवाचा मनुवंशकेतुम् ।
विस्मापयन् विस्मितमात्मवृत्तौ सिंहोरुसत्त्वं निजगाद सिंहः ॥

इति श्लोके विस्मापयन्निति कथमित्याक्षेपः । प्रयोजकाद्भयाभावेन आत्व-पुगनुपपत्तेरिति भावः । ननु मनुष्यवागेव तत्र प्रयोजिकेत्यत आह **मनुष्येति** । मनुष्यवाचेति तृतीयान्तगम्यकरणाद् मनुष्यवागात्मकादेव हि तत्र स्मयः । ननु करण-भूतापि मनुष्यवाक् प्रयोजिका कुतो नेत्यत आह **अन्यथेति** । मनुष्यवाचः स्मय-प्रयोजकत्वमभ्युपगम्य आत्वाश्रयणे 'भीस्म्योर्हेतुभये' इत्यात्मनेपदमपि स्यादित्यर्थः । स्मयोऽत्र प्रयोजकमूलको नेति युक्तमेव । किन्त्वात्वपुगाक्षेपो न युज्यते इत्यर्धाङ्गीकारेण परिहरति **सत्यमिति । विस्माययन्नित्येवेति** । णौ आयादेशे स्मायि इत्यस्मा-ल्लटः शतरि शपि णेर्गुणे अयादेशे विस्माययन्नित्येव कालिदासो महाकविः प्रायुङ्क्त । विस्मापयन्निति पकारपाठस्तु लेखकप्रमादकृत इति भावः । **यद्वेति** । राजा दिलीपो

ईकारान्तस्येति । तेन आत्वपक्षे भाययते इत्येव न त्वत्र पुगित्यर्थः । **करणा-देव हीति** । तथा च करणात् स्मये आत्वाभावेन पुग्दुर्लभ इति भावः । **प्रयोज्य-कर्त्रीति** । यद्यपि प्रथमणिजर्थं प्रति मनुष्यवागेव प्रयोजिका अतएव आत्वं प्रवृत्तम्, तथापि द्वितीयणिजर्थाभिप्रायेणेदमुक्तमिति मनोरमायाम् । केचित्तु प्रयोज्यस्य कर्त्री प्रयोजककर्त्रीति यावदिति प्रथमणिजभिप्रायेणैवेदं सुयोजमित्याहुः । **ण्यन्ताण्णा-विति** । राजा विस्मयते तं मनुष्यवाग्विस्मापयते तया सिंहो विस्मापयन्नित्यर्थः । एवं

शता इति व्याख्येयम्। २५९७ **स्फायो वः** (७-३-४१) णौ। स्फावयति। २५९८ **शदेरगतौ तः**। (७-३-४२) शदेर्णौ तोऽन्तादेशः स्यान्न तु गतौ। शातयति। गतौ तु गाः शादयति गोविन्दः। गमयतीत्यर्थः। २५९९ **रुहः पोऽन्यतरस्याम्**। (७-३-४३) णौ। रोपयति, रोहयति। २६०० **क्रीङ्जीनां णौ** (६-१-४८) एषामेच आत्वं स्याण्णौ। क्रापयति। जापयति। अध्यापयति। २६०१ **णौ च संश्चङोः**। (२-४-५१) सन्परे चङ्परे च णौ इङो गाङ् वा स्यात्। अध्यजीगपत्। अध्यापिपत्। २६०२ **सिध्यतेरपार-**

विस्मयते। तं सिंहं चारिता मनुष्यवाक् प्रयोजयति विस्मापयते मनुष्यवाग् राजानम्। अत्र मनुष्यवाक् प्रयोजककर्त्री। राजा तु प्रयोज्यकर्तेति स्थितिः। अत्र स्मयस्य प्रयोजककर्तृभूतमनुष्यवाङ्मूलकत्वादात्त्वे पुक्। मूले प्रयोज्यकर्त्रीत्येव पाठः। प्रयोजककर्त्रीत्यर्थः, प्रयोज्यः कर्ता यस्याः सा प्रयोज्यकर्त्री इति बहुव्रीह्याश्रयणात्। प्रयोजककर्त्रीत्येव पाठः सुगमः। तां विस्मापयमानां प्रयोजककर्त्रीं मनुष्यवाचं प्रयोजयति सिंहः विस्मापयति। स्मापि इति णयन्ताद् णौ प्रथमणेर्लोपे स्मापि इत्यस्मात् शतृप्रत्यये शपि णेर्गुणे अयादेशे विस्मापयन्निति भवतीत्यभिप्रेत्याह **तया सिंह इति**। प्रयोजककर्तरि तृतीया। आत्मनेपदं भीस्मिप्रकृतिकणयन्तादेव, नतु णयन्तप्रकृतिकणयन्तादिति भावः। **स्फायो वः**। णाविति शेषपूरणम्। 'अर्तिह्री–' इत्यतस्तदनुवृत्तेरिति भावः। **शदेरगतौ तः**। 'अर्तिह्री–' इत्यतो णावित्यनुवृत्तिं मत्वाह **शदेर्णाविति**। **तोऽन्तादेश इति**। तकार इत्यर्थः। अकार उच्चारणार्थः। **रुहः पो**। णाविति शेषपूरणम्। **क्रीङ्जीनां णौ**। 'डु क्रीञ् द्रव्यविनिमये, इङ् अध्ययने, जि जये' एषां द्वन्द्वः। **एच आत्वमिति**। 'आदेच उपदेश–' इत्यतस्तदनुवृत्तेरिति भावः। **क्रापयति। जापयतीति**। आत्वे पुक्। लुङि अचिक्रपत्, अजीजपत्। **अध्यापयतीति** इङ आत्वे पुकि रूपम्। अधि इ इ अ त् इति स्थिते। **णौ च संश्चङोः**। विषयसप्तमीयमित्याकरे स्पष्टम्। णौ विवक्षिते इति लभ्यते। 'इङश्च' इत्यत इङ इति 'गाङ् लिटि' इत्यतो गाङिति 'विभाषा लुङ्लृङोः' इत्यतो विभाषेति चानुवर्तते, तदाह **सन्परे चङ्परे चेत्यादि**। सन्परे चङ्परे च णौ विवक्षित इत्यर्थः। **अध्यजीगपदिति**। णौ इङो गाङादेशे पुकि उपधाह्रस्वे अधि

च प्रथमणिचि हेतुर्मनुष्यवागिति आत्वपुकावुपपन्नौ। **क्रीङ्जीनाम्**। डुक्रीञ् द्रव्यविनिमये। इङ् अध्ययने। जि जये। अचिक्रपत्। अजीजपत्। **अध्यजीगपदिति**। नात्र णिजिमित्तस्य गाङो द्वित्वे कर्तव्ये स्थानिवद्भावो निषेधो वा शङ्क्यः, यत्राभ्यासान्तरखण्डे आद्योऽजवर्णोऽस्ति तत्रैव स्थानिवद्भावो निषेधो

लौकिके । (६-१-४९) ऐहलौकिकेऽर्थे विद्यमानस्य सिध्यतेरेच आत्वं स्याण्णौ । अन्नं साधयति । निष्पादयतीत्यर्थः । अपारलौकिके किम्-तापसः सिध्यति, तत्त्वं निश्चिनोति । तं प्रेरयति सेधयति तापसं तपः । **२६०३ प्रजने वीयतेः** । (६-१-५५) अस्यैच आत्वं वा स्याण्णौ प्रजनेऽर्थे । वापयति,

---

गप् इ अ त् स्थिते गप् इत्यस्य द्वित्वे हलादिशेषे अभ्यासह्रस्वे सन्वत्त्वादित्वे दीर्घे अभ्यासचुत्वे रूपम् । न च द्वित्वे कार्ये 'णावजादेशो न' इति द्वित्वात् प्राग् गाङादेशनिषेधः शङ्कयः, अभ्यसोत्तरखण्डे अवर्णसत्त्व एव तन्निषेधप्रवृत्तेरुक्तत्वात् । द्वित्वे कार्ये गाङादेशस्य निषेधे सति गाङः पूर्वम् 'अजादेर्द्वितीयस्य' इति णिच एव द्वित्वे सति प्रक्रियायां परिनिष्ठिते वा धातोरुत्तरखण्डे अवर्णाभावादिति भावः । **अध्यापिपदिति** । गाङभावे 'क्रीङ्जीनां णौ' इत्यात्वे पुकि अधि आ प् इ अ त् इति स्थिते, पि इत्यस्य द्वित्वे रूपमिति भावः । **सिध्यतेरपारलौकिके** । 'आदेच उपदेशे–' इत्यस्मादादेच इति 'क्रीङ्जीनाम्–' इत्यस्माण्णाविति चानुवर्तते, तदाह **ऐहलौकिके इत्यादि** । **अन्नमिति** । तन्निष्पादनं तृप्त्यर्थत्वादैहलौकिकमिति भावः । **तत्त्वमिति** । आत्मस्वरूपमित्यर्थः । **सेधयति तापसं तप इति** । तत्त्वं निश्चाययतीत्यर्थः । आत्मतत्त्वनिश्चय आमुष्मिकफलक इति भावः । **प्रजने वीयतेः** । 'आदेच उपदेशे–' इत्यस्मादादेच इति 'चिस्फुरोः–' इत्यतो णाविति 'विभाषा लीयतेः' इत्यतो विभाषेति चानुवर्तते, तदाह **अस्यैच इत्यादि** । वीयतेरिति न श्यना निर्देशः, 'वी गतिप्रजनस्थानार्जनोपार्जनेषु' इत्यस्य लुग्विकरणत्वात् । किंतु यका निर्देशोऽयम् ॥ तेन व्येञोऽपि ग्रहणम्, तस्यापि संप्रसारणे वीधातुना तुल्य-

---

त्वेत्युक्तत्वात् । इह तु गाङः पूर्वं सति हि द्वित्वे 'अजादेर्द्वितीयस्य' इति णिच एव द्वित्वं भवेत्ततश्चङ्परणिज्निमितो गाङ् ततश्च प्रक्रियायां परिनिष्ठितत्वे वा अवर्णवदुत्तरखण्डं दुर्लभं कीर्तयतिसाम्यादिति नोक्तशङ्कावकाशः । **अध्यापिपदिति** । पिशब्दस्यात्र द्वित्वम् । **सिध्यतेरपार** । श्यना निर्देशाद्दौवादिकस्याग्रहणम् । **तत्त्वं निश्चिनोतीति** । तत्त्वनिश्चयश्चात्मविषयकः स च परलोके उपयुज्यते । **प्रजने** । वीयतेरिति वी गतिप्रजनादावादादिकस्य यका निर्देशः । अत्र केचिदुत्प्रेक्षयन्ति—वीतेरिति वक्तव्ये यका निर्देशाद्व्येञोऽपि ग्रहणम् । तस्यापि यथि संप्रसारणे वीधातुना समानरूपत्वात् । अतो द्वयोरपि प्रजनेऽर्थे आत्वं वा स्यात् । तत्र आत्वे तदभावे च यद्यपि व्येञो व्याययतीति रूपं तुल्यं 'शाच्छासा–' इति पुकोऽपवादतया युग्विधानात् तथापि णिजन्तात्क्विपि व्याः व्यौ व्याः । आत्वाभावपक्षे व्येः व्यायौ व्याय इत्यस्ति विशेषः । विभाषाविधानसामर्थ्यात्पक्षेऽपि 'आदेच उपदेशेऽशिति'

वाययति वा गाः पुरोवातः । गर्भं ग्राहयतीत्यर्थः । 'ऊदुपधाया गोहः' (सू २३६४)। गूहयति। **२६०४ दोषो णौ** (६-४-९०) दुष इति सुवचम्। दुष्यतेरुपधाया ऊत्स्यात्। दूषयति। **२६०५ वा चित्तविरागे।** (६-४-९१) विरागोऽप्रीतता । चित्तं दूषयति, दोषयति वा कामः। 'मितां ह्रस्वः' (सू २५६८)। भ्वादौ चुरादौ च मित उक्ताः । घटयति। 'जनीजॄष्-' । जनयति। जरयति। जॄणातेस्तु जारयति। 'रञ्जेर्णौ मृगरमणे नलोपो वक्तव्यः' (वा ४०६७)। मृगरमणमाखेटकम्। रजयति मृगान्।

त्वादिति केचित्। वस्तुतस्तु व्येञो न ग्रहणम्। तस्य प्रजनार्थकत्वाभावात्। तस्य णौ 'शाच्छासा-' इति पुगपवादयुग्विधानेन व्याययतीति रूपे विशेषाभावाच्चेति शब्देन्दुशेखरे प्रपञ्चितम्। **गर्भं ग्राहयतीति** । पुरोवातकाले गावो गर्भं गृह्णन्तीति प्रसिद्धिः। अथ 'गुहू संवरणे' इत्यस्य गुणनिमित्ते अजादौ प्रत्यये परे उपधाया ऊत्त्वविधिं स्मारयति **ऊदुपधाया गोह इति**। **गूहयतीति** लघूपधगुणापवाद ऊत्त्वमिति भावः। **दोषो णौ** । ऊदुपधाया इत्यनुवर्तते। 'दुष वैकृत्ये' इति श्यन्विकरणः । तस्य कृतलघूपधगुणस्य निर्देशः । ततश्च गुणविषयकमेवेदम्। **दुष्यतेरुपधाया ऊत्स्यादिति**। णाविति शेषः। **दूषयतीति**। लघूपधगुणापवाद ऊत्। दुषो णावित्येव सुवचम्। **वा चित्तविरागे**। ऊदुपधाया इति, दोषो णाविति चानुवर्तते। चित्तविरागे दुष उपधाया ऊद्वा स्याद् णाविति फलितम्। विरागपदस्य विवरणं अप्रीततेति। इच्छाविरह इत्यर्थः। **चित्तमिति**। चित्तं दुष्यति स्नानसंध्यावन्दनादिनित्यकर्मसु विरक्तं भवति। तत्प्रयोजयति काम इत्यर्थः। **मितां ह्रस्व इति** । णौ मितामुपधाया ह्रस्व इति प्राग्व्याख्यातमपि स्मारयति। **जनीजॄषिति**। इदमपि व्याख्यातं स्मार्यते। **जॄणातेस्त्विति**। श्नाविकरणस्य अषित्वाद् न मित्त्वमिति भावः। **रञ्जेर्णाविति**। णेः कित्त्वाभावाद् अनिदितामित्यप्राप्तौ वचनम्। मृगरमणपदस्य विवरणम् **आखेटकमिति** । मृगयेत्यर्थः। **रजयति मृगानिति** । 'रञ्ज रागे' शब्विकरणः । 'रञ्जेश्च' इति शपि नलोपः। रजन्ति मृगाः-आप्ता भवन्ति। तान् मृगान् तादृग्व्यापारविष-

---

इति न प्रवर्तते। अनेकार्थत्वाच्च धातूनां व्ययतेरपि प्रजनोऽर्थ इति। **दोषो णौ**। दुष वैकृत्ये दिवादिः। णौ किम्, दोषः। **चित्तमिति**। चिती संज्ञाने इत्यस्मात् क्तः। **दूषयति, दोषयति वेति**। चित्तं दुष्यति स्नानसंध्यादौ विरक्तं भवति, तत्प्रयुङ्क्ते इत्यर्थः। **जॄणातेस्त्विति**। अषित्वादस्य मित्त्वं नेति भावः। **आखेटकमिति**। मृगयेत्यर्थः। **रजयतीति**। रजन्ति मृगाः, प्रहणमरणा-

'मृग-' इति किम्-रञ्जयति पक्षिणः। रमणादन्यत्र तु रञ्जयति मृगान् तृणदानेन। चुरादिषु ज्ञपादिश्चिञ्। 'चिस्फुरोर्णौ' (सू २५६९)। चपयति, चययतीत्युक्तम्। चिनोतेस्तु चापयति, चाययति। स्फारयति, स्फोरयति। अपुस्फरत्, अपुस्फुरत्। **२६०६ उभौ साभ्यासस्य।** (८-४-२१) साभ्यासस्यानितेरुभौ नकारौ णत्वं प्राप्नुतो निमित्ते सति। प्राणिणत्। २६०७ णौ

यान् करोति-मृगवधासक्तो राजादिरित्यर्थः। अत्र नकारलोपः। **रञ्जयति पक्षिण इति**। पक्षिणो रजन्ति-प्राह्या भवन्ति। तान् तादृग्व्यापारविषयान् करोतीत्यर्थः। पक्षिग्रहणमिदं न मृगयेति मन्यते। **रञ्जयति मृगान् तृणदानेनेति**। धावतो मृगान् रक्षणाय तृणसमर्पणेन बन्धनस्थानगान् करोतीत्यर्थः। **चुरादिष्विति**। चुरादिषु ज्ञपादिपञ्चकान्तर्गतश्चिञ्धातुरस्ति। तस्मात् स्वार्थणिचि कृते 'चिस्फुरोः-' इति आत्वपक्षे पुकि मित्त्वादुपधाह्रस्वे चपयतीति रूपम्। आत्वाभावे तु वृद्धौ आयादेशे मित्त्वाद् ह्रस्वे चययतीति रूपमुक्तं चुरादावित्यर्थः। **चिनोतेस्त्विति**। श्नुविकरणस्य तु चिञ्धातोर्हेतुमण्णौ 'चिस्फुरोः-' इति आत्वे पुकि मित्त्वाभावाद्-ह्रस्वाभावे चापयतीति रूपम्। आत्वाभावे वृद्धौ आयादेशे मित्त्वाभावाद्ध्रस्वाभावे चाययतीति रूपमित्यर्थः। **स्फारयति, स्फोरयतीति**। 'चिस्फुरोः-' इत्यात्वविकल्पः। **अपुस्फरत्, अपुस्फुरदिति**। स्फुर् इ अ त् इति स्थिते द्वित्वे कर्तव्ये णावच आदेशस्य निषिद्धतया स्फुरित्युकारवतो द्वित्वे ततश्चिस्फुरोर्णाविति उत्तरखण्डे आत्वविकल्पः। आत्वपक्षे उपधाह्रस्व इति भावः **उभौ साभ्यासस्य**। अनितेरित्यनुवर्तते। 'अन प्राणने' इति धातोरित्यर्थः। 'रषाभ्यां नो णः-' इत्यधिकृतम्। 'उपसर्गादसमासेऽपि-' इत्यत उपसर्गादित्यनुवर्तते, तदाह **साभ्यासस्येत्यादिना**। **निमित्ते सतीति**। उपसर्गस्थे रेफे सतीत्यर्थः। **प्राणिणदिति**। प्र अन् इ अ त् इति स्थिते 'अनितेः' इति णत्वस्यासिद्धत्वाद् नि इत्यस्य

वनुकूलव्यापारविषया भवन्ति, तान्मृगांस्तादृग्व्यापारविषयान्करोतीत्यर्थः। **ज्ञपादिश्चिञ् इति**। तेन मित्त्वाद्ध्रस्व इति भावः। स्वादिगणस्थस्य तु मित्त्वं नेत्युदाहरति **चापयतीत्यादि**। **अपुस्फुरदिति**। द्वित्वे कर्तव्ये अजादेशस्य स्थानिवत्त्वान्निषेधाद्वा स्फुरित्युकारवतो द्वित्वम्, ततः 'चिस्फुरोर्णौ' इति वा आत्वम्। **उभौ सा**। 'रषाभ्याम्-' इति सूत्रे न इति षष्ठ्यन्तं प्रथमाद्विवचनान्ततया विपरिणम्यत इत्याह **उभौ नकाराविति**। ननु साभ्यासस्येत्युक्त्या उभयोरपि भविष्यतीत्युभौग्रहणं व्यर्थमिति चेत्। अत्राहुः—साहित्यमात्रं विवक्षितं न तुल्ययोग इत्यभ्युपगमे द्वयोर्युगपन्न सिध्येदित्युभौग्रहणम्। न च तुल्ययोगविवक्षायां 'तेन सहेति

---

१ क्वचिद् 'घातकः' इति पाठः।

गामिरबोधने। (२-४-४६) इणो गमिः स्याण्णौ। गमयति। बोधने तु प्रत्याययति। 'इण्वदिकः' (वा १२७७)। अधिगमयति। 'हनस्तोऽचिण्णलोः'

द्वित्वे उत्तरखण्डे नकारस्याभ्यासनकारेण व्यवधानाण्णत्वे अप्राप्ते उभयोर्नकारयोरनेन णत्वमित्यर्थः। न च 'पूर्वत्रासिद्धीयमद्विर्वचने' इति निषेधाद् द्वित्वे कर्तव्ये णत्वस्यासिद्धत्वविरहेण परत्वात् कृते णत्वे ततः पश्चाद् द्वित्वे प्राणिणदिति सिद्धमिति वाच्यम्, अत एव 'पूर्वत्रासिद्धीयमद्विर्वचने' इत्यस्यानित्यत्वविज्ञानात्। तेन ऊर्णुनावेत्यत्र णत्वात् पूर्वमेव नुशब्दस्य द्वित्वे कृते अभ्यासोत्तरखण्डे णत्वाभावसिद्धिरित्यन्यत्र विस्तरः। णौ **गमिरबोधने**। 'इणो गा लुङि' इत्यत इण इत्यनुवर्तते, तदाह **इणो गमिरिति**। मकारादिकार उच्चारणार्थः। **गमयतीति**। प्रापयतीत्यर्थः। **प्रत्याययतीति**। बोधयतीत्यर्थः। लुङि प्रत्याययित्। इणो णिचि 'इणो यण्' इति यणं बाधित्वा परत्वाद् वृद्धौ आयादेशे आय् इ अ त् इति स्थिते यि इत्यस्य द्वित्वम्। न च द्वित्वे कार्ये णावजादेशस्य निषिद्धत्वाद् वृद्धेर्निषेधः शङ्क्यः, 'अजादेर्द्वितीयस्य' इति णिचो द्वित्वे उत्तरखण्डे अवर्णाभावात्। 'इक् स्मरणे' इत्यस्य इण्वत्त्वमुक्तं स्मारयति **इण्वदिक इति**। **अधिगमयतीति**। स्मारयतीत्यर्थः। हन्तेर्ञिति णिति च तकारादेशमुक्तं णौ स्मारयति **हनस्तोऽचि-**

तुल्ययोगे' इति समासोऽत्र न स्यादिति शङ्क्यम्, तुल्ययोगग्रहणं प्रायिकं सकर्मकः सलोमक इत्युक्तत्वादिति। कैयटे तु उभाविल्यस्मिन्नसति साभ्यासस्यानितेर्णो भवतीत्युच्यमाने वचनसामर्थ्याच्च 'पूर्वत्रासिद्धीयमद्विर्वचने' इत्यनाश्रीयमाणे अकृतणत्वस्य द्विर्वचने कृते अनन्तरस्यानितेरिति पूर्वेणैव णत्वस्य सिद्धत्वाद् व्यवहितनकारार्थमिदं णत्वं स्यात्। अनन्तरस्य तु तक्रकौण्डिन्यन्यायेन न स्यादिति उभावित्युच्यत इति स्थितम्। साभ्यासस्येति किम्, प्राण् नमति। असत्यस्मिन् 'अनितेः' इति षष्ठी संबन्धसामान्ये स्यात्तत्श्चानन्तर्यादिसंबन्धोऽपि गृह्येत। सति त्वस्मिन्नवयवावयविभावसंम्बन्धो लभ्यते अतोऽर्थवत्साभ्यासग्रहणम्। यदि त्विष्टानुरोधेनानितेरिति षष्ठी अवयवसंबन्धे व्याख्यायते अनितेश्च नकारद्वयाभावात्सामर्थ्याद् द्विर्वचनं प्राप्त एवानितिर्गृह्येत तदा साभ्यासस्येति मन्दप्रयोजनम्। इह पूर्वं णत्वं कृत्वा द्वित्वे कृते प्राणिणदित्यादिसिद्धावप्यारम्भः 'पूर्वत्रासिद्धीयमद्विर्वचने' इत्यस्यानित्यत्वज्ञापनार्थः। तेन ऊर्णुनावेत्यत्र णत्वात्पूर्वमेव नुशब्दस्य द्वित्वादभ्यासोत्तरखण्डे णत्वाभावः सिद्धः। **प्रत्याययतीति**। प्रतिपूर्वस्येणो ज्ञानार्थता। लुङि प्रत्याययित्। इह इणो णिचि कृते 'इणो यण्' इति यणं बाधित्वा परत्वाद् वृद्धिः। न च 'ओः पुयण्जि-' इति ज्ञापकात्पूर्वं द्वित्वं पश्चाद् वृद्धिरिति शङ्क्यम्, 'अजादेर्द्वितीयस्य' इति णिचो

(सू २२७४)। 'हो हन्तेः' (सू ३५८) इति कुत्वम्। घातयति। ईर्ष्यंयति। 'ईर्ष्यतेस्तृतीयस्येति वक्तव्यम्' (वा ३४०६)। तृतीयव्यञ्जनस्य तृतीयैकाच इति वार्थः। आद्ये षकारस्य द्वित्वं वारयितुमिदम्। द्वितीये तु 'अजादेर्द्वितीयस्य' (सू २१७६) इत्यस्यापवादतया सन्नन्ते प्रवर्तते। ऐर्ष्यियत्, ऐर्षिष्यत्। द्वितीयव्याख्यायां णिजन्ताच्चङि षकार एवाभ्यासे श्रूयते। हलादिशेषात्। द्वित्वं तु द्वितीयस्यैव। तृतीयाभावेन प्रकृतवार्तिकाप्रवृत्तेः। निवृत्तप्रेषणाद्धातोर्हेतुमण्णौ

णणलोरिति। कुत्वमिति। हस्येति शेषः। उपधावृद्धिं मत्वाह घातयतीति। लुङि अजीघतत्। ईर्ष्यंयतीति। ईर्ष्यतेर्णौ रूपम्। वक्तव्यमिति। द्वित्वमिति शेषः। इति वार्थ इति। 'न न्द्राः–' इति सूत्रभाष्ये स्पष्टमिदम्। आद्य इति। तृतीयस्य व्यञ्जनस्येति पक्ष इत्यर्थः। षकारस्येति। अन्यथा ईर्ष्य् इ अ त् इति स्थिते 'न न्द्राः–' इति रेफं वर्जयित्वा षकारसहितस्य ष्यि इत्यस्य द्वित्वं स्यात्। ततश्च उत्तरखण्डे णिलोपे ऐर्षिष्यदिति स्यात्। ऐर्ष्यंयदितीष्टं न स्यात्। अतस्तृतीयव्यञ्जनस्येत्युक्तम्। एवं च यकारमात्रस्य द्वित्वे णिलोपे संयुक्तद्वियकारमिष्टं सिध्यतीत्यर्थः। द्वितीय इति। तृतीयैकाच इति व्याख्याने इत्यर्थः। सन्नन्ते प्रवर्तत इति। उक्तवार्तिकमिति शेषः। सनि इटि ईर्ष्य् इस इति स्थिते ईर्ष्य् इति प्रथमैकाच् ष्यिस् इति द्वितीयैकाच् स इति तृतीयैकाजिति स्थितिः। तत्र तृतीयैकाचः संभवात्तस्य द्वित्वविधिः। अन्यथा 'अजादेर्द्वितीयस्य' इति स्यादिति भावः। ऐर्ष्यंयदिति। यकारमात्रस्य द्वित्वे णिलोपे संयुक्तद्वियकारं रूपम्। अथ द्वितीयव्याख्यायां रूपमाह ऐर्षिष्यदिति। तदुपपादयति द्वितीयव्याख्यायामिति। णयन्ताच्चङि ईर्ष्य् इ अ त् इति स्थिते 'न न्द्राः–' इति निषेधाद्रेफं वर्जयित्वा 'अजादेर्द्वितीयस्य' इति ष्यि इत्यस्य द्वित्वम्, न तु यकारमात्रस्य, प्रथमव्याख्याने एव तृतीयव्यञ्जनस्येत्युक्तेः। तत्र ष्यि इत्यस्य द्वित्वे कृतेऽपि अभ्यासे षकार एव हल् इकारशिरस्कः श्रूयते, न तु यकारोऽपीत्यर्थः। कुत इत्यत आह हलादिशेषादिति। ननु तृतीयस्यैकाच इति द्वितीयव्याख्यायाम् इह द्वितीयस्यैकाचः कथं द्वित्वमित्यत आह द्वित्वं तु द्वितीयस्यैवेति। एकाच इति शेषः। कुत इत्यत

द्वित्वेऽभ्यासोत्तरखण्डस्यावर्णपरत्वाभावात्। इति वार्थ इति। व्याख्यानद्वयमप्याकरारूढमिति भावः। षकारस्येति। रेफस्य तु 'न न्द्राः–' इत्यनेन निषेधादिति भावः। द्वितीये त्विति। तृतीयस्यैकाच इति पक्षे। सन्नन्ते प्रवर्तत इति। वचनसामर्थ्यादिति भावः। ऐर्ष्यियदिति। तृतीयव्यञ्जनस्येति पक्षे इदमुदाहरणम्। ऐर्षिष्यदिति रूपस्यासाधुत्वमाशङ्क्योपपादयति द्वितीयव्याख्याया-

---

१ तृतीयव्यञ्जनमात्रस्याज्रहितस्यैव द्वित्वमिति मतेनेदम्।

शुद्धेन तुल्योऽर्थः। तेन 'प्रार्थयन्ति शयनोत्थितं प्रियाः' इत्यादि सिद्धम्। एवं सकर्मकेषु सर्वेषूह्यम्।

इति तिङन्ते णिच्प्रकरणम्।

अथ तिङन्ते सन्प्रकरणम् ॥ ५४ ॥

२६०८ धातोः कर्मणः समानकर्तृकादिच्छायां वा। (३-१-७)

आह **तृतीयाभावेनेति**। ईर्ष्य् इ अ त् इत्यत्र ईर्ष्य् इति प्रथमैकाच्, र्ष्यि इति द्वितीयैकाच्, न तु चङि परे तृतीयैकाजस्ति। अतोऽत्र तृतीयैकाच इति वार्तिकं न प्रवर्तते। तस्माद् द्वितीयस्यैव एकाचो द्वित्वमित्यर्थः। एवं च तृतीयस्यैकाच इति वार्तिकं सन्नन्त एव प्रवर्तते। ईर्ष्यतेरामः सत्त्वेन ततः परस्य लिटोऽभावादिति बोध्यम्। ननु 'प्रार्थयन्ति शयनोत्थितं प्रियाः' इति माघकाव्ये प्रार्थयन्तीति न चौरादिक-स्वार्थिकणिजन्तम्, तस्यागर्वीयतया आत्मनेपदप्रसङ्गात्। नापि हेतुमण्ण्यन्तम्। स्वामीष्टं याचते इत्यर्थे तदसंभवात्। नहि प्रयोजकव्यापाराभावे तत्प्रवृत्तिरस्तीत्यत आह **निवृत्तेति**। निवृत्तं प्रेषणं यस्मात् स निवृत्तप्रेषणः-संप्रति अविवक्षितप्रेषण इत्यर्थः। तस्माद्धातोः भूतपूर्वगत्या प्रेषणमादाय हेतुमण्णौ कृते शुद्धेन णिज्विहीनेन धातुना तुल्योऽर्थः प्रतीयते इत्यर्थः। तदुक्तम् 'निवृत्तप्रेषणाद्धातोः प्राकृतेऽर्थे णिजिष्यते' इति। इदं च 'णेरणौ–' इति सूत्रे भाष्ये स्पष्टम्।

इति श्रीवासुदेवदीक्षितविदुषा विरचितायां सिद्धान्तकौमुदीव्याख्यायां
बालमनोरमाख्यायां हेतुमण्णिचो निरूपणं समाप्तम्।

अथ सन्प्रक्रियाः निरूप्यन्ते। **धातोः कर्मणः**। 'गुप्तिज्किद्भ्यः–' इत्यतः सन्नित्यनुवर्तते। इच्छायाः श्रुतत्वात्तां प्रत्येव कर्मत्वं विवक्षितम्। तथा समानकर्तृ-

---

मित्यादिना। द्वितीयस्यैवेति। एकाच इति शेषः। **अप्रवृत्तेरिति**। किंतु सन्नन्त एव प्रवर्तते। तत्र ह्यनुपदम् ईर्ष्यियिषति इत्युदाहरिष्यति। अर्थ उपयाञ्चायामित्यस्य आगर्वीयत्वादात्मनेपदेन भाव्यमिति प्रार्थयन्तीति माघकाव्यादिप्रयोगोऽसाधुरित्याशङ्क्य तत्समर्थनायाह **निवृत्तप्रेषणादिति**। उक्तं च—'निवृत्तप्रेषणाद्धातोः प्राकृतेऽर्थे णिजुच्यते' इति। **तेनेत्यादि**। प्रार्थनां कुर्वन्तीति विवक्षितार्थे प्रयोगः सिद्ध इति भावः। केचित्तु परस्मैपदसिद्ध्यर्थं प्रार्थनं प्रार्थः, तं कुर्वन्ति प्रार्थयन्तीति व्याचक्षते, तदसत्, धातुसंज्ञाप्रयोजकप्रत्यये चिकीर्षिते उपसर्गाणां पृथक्करणस्य वक्ष्यमाणतया 'अर्थवेद–' इत्यापुगागमस्य दुर्वारत्वात्।

इति तत्त्वबोधिन्यां ण्यन्तप्रक्रियाप्रकरणम्।

इषिकर्मण इषिणैककर्तृकाद्धातोः सन्प्रत्ययो वा स्यादिच्छायाम्। धातोर्विहितत्वादिह सन आर्धधातुकत्वम्। इट्। द्वित्वम्। 'सन्यतः' (सू २३१७)। पठितुमिच्छति पिपठिषति। कर्मणः किम्—गमनेनेच्छतीति करणान्माभूत्। समानकर्तृकात् किम्—शिष्याः पठन्त्वितीच्छति गुरुः। वाग्रहणात्पक्षे वाक्यमपि। 'लुङ्सनोर्घस्लृ' (सू २४२७)। 'एकाच उपदेशे–' (सू २२४६) इति नेट्। सस्य तत्वम्। अत्तुमिच्छति जिघत्सति। 'ईर्ष्यतेस्तृतीयस्य–' (वा ३४०३) इति यिसनोर्द्वित्वम्। ईर्ष्यियिषति ईर्ष्यिषिषति। २६०९ रुद्-

कत्वमपि इच्छानिरूपितमेव विवक्षितम्। कर्मेति स्ववाचकशब्दद्वारा धातौ सामानाधिकरण्येनान्वेति। एवं च इच्छासमानकर्तृकत्वे सति इच्छाकर्मीभूतो यो व्यापारः तद्वाचकाद्धातोरिच्छायां सन् वा स्यादिति फलति, तदाह **इषिकर्मण इत्यादि।** इषिरिच्छा। इषिणा एककर्तृकत्वाद् इषिकर्मीभूतव्यापारवाचकाद्धातोरित्यर्थः। ननु समानकर्तृकादित्युक्त्यैव धातोरिति लब्धम्। धात्वर्थव्यापाराश्रयस्यैव कर्तृत्वादित्यत आह **धातोरिति।** धातोरिति विहितस्यैव प्रत्ययस्यार्धधातुकत्वम्, नतु धातोः परस्य। अन्यथा जुगुप्सते इत्यत्र धातोरित्यविहितस्यापि 'गुप्तिज्किद्भ्यः–' इति सन आर्धधातुकत्वापत्तौ लघूपधगुणापत्तेरिति भावः। अस्य सन आर्धधातुकत्वे फलमाह **इडिति। द्वित्वमिति।** 'सन्यङोः' इत्यनेनेति भावः। अभ्यासस्य इत्वविधिं स्मारयति **सन्यत इति। पठितुमिच्छतीति।** भाववत्तुमुनर्थः। 'अव्ययकृतो भावे' इत्युक्तेः। धात्वर्थ एव भाव इत्युच्यते। तथा च पठितुमित्यस्य पठनक्रियैवार्थः। तस्मिन् पठने इच्छाकर्मत्वम् इच्छासमानकर्तृकत्वं च सना गम्यते। तथा च स्वकर्तृकं पठनमिच्छतीत्यर्थे पिपठिषतीति शब्दो वर्तते इत्युक्तं भवति। अथ 'अद भक्षणे' इति धातोः सनि घस्लृभावं स्मारयति **लुङ्सनोर्घस्लृ इति।** घस् स इति स्थिते इटमाशङ्क्याह **एकाच इति। नेडिति।** घस् स स्थिते आह **सस्य तत्वमिति।** 'सः स्यार्धधातुके' इत्यनेनेति भावः। **जिघत्सतीति।** द्वित्वे अभ्यासजश्त्वचुत्वे इति भावः। **यसनोर्द्वित्वमिति।** तृतीयस्य व्यञ्जनस्येति पक्षे ईर्ष्य इस इत्यत्र यकारमात्रस्य द्वित्वे, सनः षत्वे, संयुक्तद्वियकारं रूपमिति भावः, तदाह **ईर्ष्य्यिषतीति।** तथा च सन्नन्ते ईकाररेफषकारयकारद्वित्वेकारषकाराः। तृतीयस्यैकाच इति पक्षे ईर्ष्य् इ स इत्यत्र स इत्यस्य द्वित्वे अभ्यासेत्त्वे सकारद्वयस्यापि षत्वे रूपं मत्वाह **ईर्ष्यि-**

धातोः कर्मणः। इषिकर्मण इत्यादि। इच्छायामिति श्रुतत्वात्कर्मत्वं कर्तृत्वं च तदपेक्षमेव गृह्यत इति भावः। **पठितुमिच्छतीति।** एकनिष्ठा पाठगोचरा वर्तमानेच्छेत्यर्थः। **यिसनोरिति।** तृतीयव्यञ्जनस्येति पक्षे यकारस्य द्वित्वम्,

१ तृतीयव्यञ्जनमात्रस्य द्वित्वमिति बालमनोरमामतेनेदम्।

विदमुषग्रहि[1]स्वपिप्रच्छः संश्च । (१-२-८) एभ्यः सन् क्त्वा च कितौ स्तः । रुरुदिषति । विविदिषति । मुमुषिषति । २६१० सनि ग्रहगुहोश्च । (७-२-१२) ग्रहेर्गुहेरुगन्ताच्च सन इण्न स्यात् । 'ग्रहिज्या-' (सू २४१२) इति संप्रसारणम् । सनः षत्वस्यासिद्धत्वाद्भष्भावः । जिघृक्षति । सुपुप्सति ।

चिषतीति । अत्र तु सन्नन्ते ईकाररेफषकारयकारेकारषकारेकारषकाराकाराः । रुद्विद । इका निर्देशात् संप्रसारणे गृहीति निर्देशः । स्वपीति इकारस्तु उच्चारणार्थः, न त्विका निर्देशः, सुपीति संप्रसारणप्रसङ्गात् । चकाराद् 'मृडमृदगुध-' इति पूर्वसूत्रस्थं क्त्वेति समुच्चीयते, तदाह सन् क्त्वा चेति । किताविति । 'असंयोगाल्लिट्-' इत्यतस्तदनुवृत्तेरिति भावः । रुदसाहचर्याद्वेत्तेरेव ग्रहणमिति केचित् । अविशेषात्सर्वस्येत्यन्ये । 'हलन्ताच्च' इति सिद्धे रुदविदमुषां ग्रहणं 'रलो व्युपधात्-' इति विकल्पबाधनार्थम् । ग्रहेस्तु क्त्वायां 'न क्त्वा सेट्' इति निषेधबाधनार्थम् । स्वपिप्रच्छयोस्तु क्त्वायां कित्वेऽपि सनः अप्राप्तकित्वविधानार्थम् । रुरुदिषतीत्यादौ सनः कित्वाल्लघूपधगुणाभावः । सनि ग्रहगुहोश्च । चकारात् 'श्र्युकः किति' इत्यत उक इत्यनुकृष्यते, न तु श्र्यादिः, तस्य 'सनीवन्तर्ध-' इति विकल्पस्य वक्ष्यमाणत्वात् । 'नेड्वशिकृति' इत्यतो नेडिति चानुवर्तते, तदाह ग्रहेरित्यादि । ग्रहधातोर्नित्यमिटि प्राप्ते गुहेः ऊदित्त्वात्तद्विकल्पे प्राप्ते वचनम् । ग्रहिज्येति । ग्रह् स इति स्थिते सनः कित्वाद् 'ग्रहिज्या-' इति रेफस्य संप्रसारणम् ऋकार इत्यर्थः । ननु गृह् स इति स्थिते हस्य ढत्वे भष्भावापेक्षया परत्वात् कत्वे सस्य षत्वे च कृते झषन्तत्वाभावे

तृतीयस्यैकाच इति पक्षे तु सन इत्यर्थः । रुदविद । रुदसाहचर्याद् वेत्तेरेव ग्रहणम् । इह रुदविदमुषाणां ग्रहणं 'रलो व्युपधात्-' इति विकल्पे प्राप्ते ग्रहेः 'न क्त्वा सेट्' इति निषेधात्क्त्वायाम् अप्राप्ते स्वपिप्रच्छयोस्तु क्त्वः कित्वेऽपि सनः कित्वस्याप्राप्तौ वचनम् । रुदित्वा । विदित्वा । मुषित्वा । एतेषु गुणाभावः कित्त्वस्य फलम् । गृहीत्वा । सुप्त्वा । पृष्ट्वा । एतेषु संप्रसारणमपि फलम् । सनि ग्रहगुहोश्च । ग्रहेर्नित्यं गुहेर्विकल्पेन प्राप्ते निषेधोऽयम् । सनः षत्वस्यासिद्धत्वाद्भष्भाव इति । कुत्वस्यासिद्धत्वाद्भष्भाव इत्येव सुवचम् । केचित्तु ढत्वे सति भष्भाव इत्यध्याहारेण योजयन्ति । तथा च जगृह् स इति स्थिते इणः परत्वेन सस्य षत्वं प्राप्तं तस्यासिद्धत्वाद् ढत्वे भष्भावः । ततश्च कत्वे कवर्गात्परस्य षत्वमिति विधिक्रमः । अन्ये तु षत्वे ढत्वे च कृते पश्चाद्भष्भावे कर्तव्ये सकारपरत्वाभावाद्भष्भावो न स्यादित्याशङ्कायां सनः षत्वस्यासिद्धत्वादिति ग्रन्थः प्रवृत्त इति कार्यासिद्धिपक्षावलम्बनेन व्याचक्षते । जिघृक्षतीति । गुहेर्जुघुक्षति । सूत्रे चकारात् 'श्र्युकः किति' इत्यत

१ 'गृहि' इति बालमनोरमासम्मतः पाठः ।

२६११ किरश्च पञ्चभ्यः । (७-२-७५) कॄ, गॄ, दृङ्, धृङ्, प्रच्छ् एभ्यः सन इट् स्यात् । पिपृच्छिषति । चिकरिषति । जिगरिषति । जिगलिषति । अत्रेटो दीर्घो नेष्टः । दिदरिषते । दिधरिषते । कथम् 'उद्दिधीर्षुः' इति । भौवादिकयोर्दृङ्धृञोरिति गृहाण । **२६१२ इको झल् । (१-२-९)** इगन्ता-

---

कथं भष्भाव इत्यत आह **सनः षत्वस्येति** । कत्वस्यासिद्धत्वादित्येव सुवचम् । **जिघृक्षतीति** । गृह् स इति स्थिते हकारादिणः परस्य सस्य षत्वं परत्वात् प्राप्तं तस्यासिद्धत्वाद् हस्य ढत्वे भष्भावः, ततः कत्वे कात्परस्य षत्वमिति क्रम इति भावः । गुहेः जुघुक्षतीत्युदाहार्यम् । उगन्ताद् बुभूषति । अत्र श्र्युकः किलीत्यनेन तु न सिध्यति, तत्र कित एव निषेधात् । परत्वादिडागमे 'इको झल्' इत्यस्याप्राप्तेः । स्पष्टं चेदं शब्देन्दुशेखरे । **सुषुप्सतीति** । सनः कित्वाद् 'वचिस्वपि-' इति संप्रसारणं लघूपधगुणाभावश्च । **किरश्च पञ्चभ्यः** । किर इति पञ्चमी । किरादिभ्य इति विवक्षितम् । तुदादौ 'कॄ विक्षेपे, गॄ निगरणे, दृङ् आदरणे, धृङ् अवस्थाने, प्रच्छ ज्ञीप्सायाम्' इति स्थिताः, तदाह **कॄ गॄ इत्यादिना । सन इडिति** । 'स्मिपूङ्रञ्ज्वशां सनि' इत्यतः 'इडत्यर्ति-' इत्यतश्च तदनुवृत्तेरिति भावः । किरतिगिरत्योः 'इट् सनि वा' इति विकल्पे अन्येषां च 'एकाच-' इति निषेधे प्राप्ते अयमिड्विधिः । शब्देन्दुशेखरे तु 'सनि ग्रह-' इति 'एकाच-' इति च निषेधे प्राप्ते वचनमित्युक्तम् । **पिपृच्छिषतीति** । सनः कित्वाद् 'ग्रहिज्या-' इति संप्रसारणम् । **चिकरिषतीति** । कॄधातोः सनि इटि रूपम् । **जिगरिषतीति** । 'गॄ निगरणे' इत्यस्मात्सनि इटि रूपम् । **जिगलिषतीति** । 'अचि विभाषा' इति लत्वविकल्प इति भावः । इट् सनि वेत्यस्यायमपवादः । चिकरिषति, जिगरिषति इत्यत्र 'वॄतो वा' इति दीर्घमाशङ्क्याह **अत्रेटो दीर्घो नेष्ट इति** । वार्तिकमिदं वृत्तौ स्थितम् । भाष्ये तु न दृश्यते । **दिदरिषते, दिधरिषते इति** । दृङो धृङश्च सनि इटि रूपम् । 'पूर्ववत्सनः' इत्यात्मनेपदम् । **कथमिति** । उद्दिधीर्षुरिति कथमित्यन्वयः । किरादित्वेन इट्प्रसङ्गादिति भावः । **भौवादिकयोरेति** । 'धृङ् अवस्थाने, धृञ् धारणे' इत्यनयो-

---

उक इत्यनुकृष्यते । उगन्ताद् बुभूषति, लुलूषति । श्रयतिस्तु नानुकृष्यते । तस्य 'सनीवन्तर्ध-' इति विकल्पविधानात् । **किरश्च पञ्चभ्यः** । पञ्चग्रहणमुत्तरार्थं स्पष्टप्रतिपत्तय इहैव कृतम् । एवं च प्रच्छधातोरनन्तरं गणपाठस्थं वृत्करणं त्यक्तुं शक्यम् । अत्रत्यपञ्चभ्य इत्यनेनैव वृत्करणं यत्तदपाणिनीयमिति व्याख्येयमित्याहुः । केचित्तु—'भूषाकर्मकिरादिसनाम्-' इति वार्तिके किरादिज्ञानार्थं वृत्करणमावश्यकमित्याहुः । **अत्रेट इति** । 'वॄतो वा' इति प्राप्ते भाष्यकारेष्टिरियम् । **भौवादि-**

ज्झलादिः सन्कित्स्यात्। बुभूषति। दीङ्-दातुमिच्छति दिदीषते। एज्विषयत्वाभावात् 'मीनातिमिनोति-' (सू २५०८) इत्यात्वं न। अत एव 'सनि मीमा-' (सू २६२३) इति सूत्रे माधातोः पृथङ्मीग्रहणं कृतम्। २६१२ हलन्ताच्च। (१-२-१०) इक्समीपाद्धलः परो झलादिः सन्कित्स्यात्। गुहू, जुघुक्षति। बिभित्सति। इकः किम्-यियक्षते। झल् किम्-विवर्धिषते।

भौवादिकयोः सनि किरादित्वाभावादिडभावे 'अज्झनगमां सनि' इति दीर्घे 'ॠत इद्धातोः' इति इत्त्वे, रपरत्वे, 'हलि च' इति दीर्घे, षत्वे, उद्दिधीर्ष इत्यस्मात् 'सनाशंसभिक्ष उः' इत्युप्रत्यये उद्दिधीर्षुरिति रूपमिति गृहाण जानीहीति शङ्कां प्रति उत्तरम्। **इको झल्। इगन्तादिति।** सना आक्षिप्तधातुविशेषणत्वात्तदन्तविधिरिति भावः। **सन् किदिति।** 'रुदविदमुषग्रहि-' इत्यतः 'असंयोगाल्लिट् कित्' इत्यतश्च तदनुवृत्तेरिति भावः। **बुभूषतीति।** कित्त्वान्न गुणः। उकः परत्वान्नेट्। **दिदीषते इति।** सनः कित्त्वान्न गुणः। दीङो ङित्वात् 'पूर्ववत्सनः' इत्यात्मनेपदम्। **एज्विषयत्वाभावादिति।** कित्त्वे गुणनिषेधादिति भावः। **अत एवेति।** यद्येज्विषयादन्यत्राप्यात्वं स्यात् तदा मीमेति पृथक् ग्रहणमनर्थकं स्यात्। 'गामादाग्रहणेष्वविशेषः' इत्युक्तेरिति भावः। **हलन्ताच्च।** 'इको झल्' इति पूर्वसूत्रमनुवर्तते। 'रुदविदमुष-' इत्यतः सनिति 'असंयोगाल्लिट्-' इत्यतः किदिति च। हलिति लुप्तपञ्चमीकं पदम्। अन्तशब्दः समीपवाची, तदाह **इक्समीपादित्यादि। जुघुक्षतीति।** सनः कित्वान्न गुणः। 'सनि ग्रहगुहोश्च' इत्यूदित्त्वेऽपि नित्यं नेट्। हस्य ढत्वे भष्भावे कत्वषत्वे इति भावः। **बिभित्सतीति।** भेदेः सनः कित्वान्न गुणः। **यियक्षते इति।** अत्र हलः इक्समीपत्वाभावान्न कित्त्वम्। सति तु कित्वे यजेः संप्रसारणं स्यादिति भावः। **विवर्धिषते इति।** वृधेः सनि रूपम्। अत्र सन इटि झलादित्वं नेति भावः।

कयोरिति। तथा च 'अज्झनगमाम्-' इति वक्ष्यमाणेन दीर्घ इति भावः। **इको झल्।** 'रुदविद-' इत्यतः सन्ननुवर्तते, सनाक्षिप्तो धातुरिका विशेष्यते, विशेषणेन च तदन्तविधिरित्याह **इगन्तादिति।** इगन्तात् किम्, पिपासति, तिष्ठासति। झलीति किम्, शिशयिषते। **कित्स्यादिति।** 'असंयोगाल्लिट् कित्' इत्यतः किदनुवर्तत इति भावः। **एज्विषयत्वाभावादिति।** कित्त्वेन गुणाप्राप्तेरित्यर्थः। **अत एवेति।** यद्येज्विषयादन्यत्राप्यात्वं भवेत्तदा मीग्रहणं तत्र न कुर्याद्गामादाग्रहणेष्वविशेषादिति भावः। **हलन्ताच्च।** इगित्यनुवर्तते तदवयवत्वं हलो न संभवतीति समीपवाच्यत्रान्तशब्द इत्याशयेन व्याचष्टे **इक्समीपादिति।** सौत्रत्वा-

हल्ग्रहणं जातिपरम्। तृंहू-तितृक्षति, तितृंहिषति। २६१४ अज्झनगमां सनि। (६-४-१६) अजन्तानां हन्तेरजादेशगमेश्च दीर्घः स्याज्झलादौ सनि। 'सन्लिटोर्जेः' (सू २३३१)। जिगीषति। 'विभाषा चेः' (सू २२२५)। चिकीषति, चिचीषति। जिघांसति। २६१५ सनि च। (२-४-४७)

ननु 'तृंहू हिंसायम्' तुदादिः नोपधोऽयम्। कृतानुस्वारस्य निर्देशः। अस्मात्सनः 'अनिदिताम्-' इति नलोपार्थं कित्त्वमिष्यते। तन्नोपपद्यते। न ह्यत्र इक्समीपादनुस्वारात् सन् परो भवति, हकारेण व्यवधानात्। हकारात्तु परः सन् इक्समीपाद्धलः परो न भवति, अनुस्वारेण व्यवधानादित्यत आह हल्ग्रहणं **जातिपरमिति**। हल्त्वजात्याक्रान्तैकानेकव्यक्तिपरमित्यर्थः। **तृंहिति**। तृंहूधातोः प्रदर्शनमिदम्। **तितृक्षतीति**। ऊदित्त्वादिडभावपक्षे रूपम्। सनः कित्त्वान्नलोपो लघूपधगुणाभावश्च। ढत्वकत्वषत्वानि। इट्पक्षे आह **तितृंहिषतीति**। झलादित्वाभावेन कित्त्वाभावान्नलोपो नेति भावः। **अज्झनगमां सनि**। अच्, हन् गम् एषां द्वन्द्वः। 'नोपधायाः' इत्यत उपधाया इत्यनुवृत्तं हनगमोरन्वेति, न त्वजन्ते, असंभवात्। अङ्गस्येत्यधिकृतम्। अचस्तद्विशेषणत्वात्तदन्तविधिः, गमधातुरिह अजादेश एव विवक्षित इति प्रकृतसूत्रभाष्ये स्पष्टम्। 'ढ्रलोपे पूर्वस्य-' इत्यतो दीर्घ इत्यनुवर्तते, तदाह **अजन्तानामित्यादिना**। **झलादौ सनीति**। 'च्छ्वोः शूठ्-' इति सूत्रभाष्ये 'अज्झनगमाम्-' इत्यत्र सनं झला विशेषयिष्याम इत्युक्तेरिति भावः। अथ जिधातोरभ्यासात् परस्य कुत्वविधिं स्मारयति **सन्लिटोर्जेरिति**। **जिगीषतीति**। जेर्दीर्घे अभ्यासात्परस्य कुत्वम्। अथ चिञ्धातोरभ्यासात्परस्य कुत्वविकल्पं स्मारयति **विभाषा चेरिति**। **चिकीषति, चिचीषतीति**। अजन्तत्वाद्दीर्घः। **जिघांसतीति**। हनेः सनि 'अज्झन-' इत्यकारस्य दीर्घः, न त्वन्त्यस्य नकारस्य। दीर्घश्रुत्या अच इत्युपस्थितेः। द्वित्वम्, 'अभ्यासाच्च' इति कुत्वम्। 'नश्च' इत्यनुस्वारः। **सनि च**। 'इणो गा लुङि' इत्यत इण इति 'णौ गमिरबोधने' इत्यतो गमिरबोधने इति चानुवर्तते, तदाह

द्विशेषणस्यान्तशब्दस्य परनिपातः। **तितृक्षतीति**। कित्त्वे सति 'अनिदिताम्-' इति नलोपः। **अज्झनगमाम्**। गमः सामान्येन ग्रहणे गम्लृ गतावित्यस्मात् संजिगंसते इत्यत्रातिप्रसङ्गः स्यादतः 'सनि च' 'इङश्च' इति सूत्राभ्यां विहितस्येणिङोरादेशस्य 'इणवदिकः' इति इक आदेशस्य च ग्रहणमित्याशयेनाह **अजादेशगमेरिति**। एतच्च सूत्रेऽज्ग्रहणाल्लभ्यते। तथाहि-इह सनीत्येव सूत्रं कर्तव्यम्, दीर्घश्रुत्योपस्थितेनाच इत्यनेनाङ्गस्य विशेषणादजन्ताङ्गस्य दीर्घः, चिचीषति। ततो

इणो गमिः स्यात् सनि, न तु बोधने । जिगमिषति । बोधने प्रतीषिषति । 'इणवदिकः' (वा १२७७) । अधिजिगमिषति । कर्मणि तङ् । 'परस्मैपदेषु' इत्युक्तेर्नेट् । 'झलादौ सनि' इति दीर्घः । जिगांस्यते । अधिजिगांस्यते । अजादेशस्येत्युक्तेर्गच्छतेर्न दीर्घः । जिगंस्यते । संजिगंसते । २६१६ **इङश्च** । (२-४-४८) इङो गमिः स्यात्सनि । अधिजिगांसते। २६१७ **रलो व्युपधाद्धलादेः संश्च** । (१-२-२६) उश्च इश्च वी । ते उपधे यस्य तस्माद्धलादेः रलन्तात्परौ क्त्वासनौ सेटौ वा कितौ स्तः । 'द्युतिस्वाप्योः संप्रसारणम्'

इणो गमिरित्यादि । जिगमिषतीति । गमेरिति इट् । अत्र 'अज्झनगमाम्–' इति दीर्घो न, झलादौ सनीत्युक्तेः । **प्रतीषिषतीति ।** बोधयितुमिच्छतीत्यर्थः । अत्र बोधनार्थत्वादिणो न गमिः । इ स इति स्थिते 'अजादेर्द्वितीयस्य' इति सनो द्वित्वे अभ्यासेत्वम् । प्रतिना सवर्णदीर्घे सकारद्वयस्यापि षत्वमिति भावः । 'इक् स्मरणे' इत्यस्याह **इणवदिक इति ।** अनेन वार्तिकेन इक्धातुरिणवद्भवतीत्यर्थः । ततश्च 'सनि च' इति गमिरादेश इति भावः । **कर्मणि तङिति ।** इणधातोरिधातोश्च सन्नन्तात्कर्मणि लटस्तङित्यर्थः । 'भावकर्मणोः' इत्यनेनेति भावः । **परस्मैपदेष्विति ।** 'गमेरिट् परस्मैपदेषु' इत्युक्तेस्तङि नेडित्यर्थः । **झलादाविति ।** 'अज्झन–' इति झलादौ सनि विहितो दीर्घ इत्यर्थः । **जिगांस्यते इति ।** गन्तुमिष्यते इत्यर्थः । इणो रूपम् । **अधिजिगांस्यते इति ।** स्मर्तुमिष्यत इत्यर्थः । इको रूपम् । **जिगंस्यते इति ।** गम्लृधातोः सन्नन्तात्कर्मणि तङि रूपम् । गमेरजादेशत्वाभावान्न दीर्घः । **इङश्च । गमिः स्यात् सनीति ।** 'णौ गमिः–' इत्यतः 'सनि च' इत्यतश्च तदनुवृत्तेरिति भावः । इङो ङित्वात् 'पूर्ववत्सनः' इति । तङ् । परस्मैपदेष्वित्युक्तेर्नेट् । 'अज्झन–' इति दीर्घ इति भावः । **रलो । क्त्वासनाविति ।** चकारेण 'पूङः क्त्वा च' इत्यतः क्त्वाया अनुकर्षादिति भावः । **सेटाविति ।** 'न क्त्वा सेट्' इत्यतस्तदनुवृत्तेरिति भावः । **वा**

हनिगम्योरित्यपरं कर्तव्यम् । एवं चाज्ग्रहणमतिरिच्यमानं प्रवृत्तिभेदेन गमेर्विशेषणार्थम् । अजन्तस्य दीर्घो भवति अजादेशगमेश्चेति । झलादाविति किम्, जिगमिषति । 'गमेरिट् परस्मैपदेषु' इति इट् । **सनि च ।** 'णौ गमिरबोधने' इत्यतोऽबोधन इत्यनुवर्तते । **प्रतीषिषतीति ।** तक्कौण्डिन्यन्यायस्यानित्यत्वात्सन्रूपस्याभ्यासस्येत्वम् । अनित्यत्वे लिङ्गं तु 'नित्यं कौटिल्ये गतौ' इत्यत्र नित्यग्रहणमिति वक्ष्यते । **संजिगंसते इति ।** 'समो गम्यृच्छिभ्याम्' इति तङ् 'पूर्ववत्सनः' इति सन्नन्तादपि भवति । **रलो व्युपधा ।** 'न क्त्वा सेट्' इत्यतः

(सू २३४४)। दिद्युतिषते, दिद्योतिषते। रुरुचिषते, रुरोचिषते। लिलिखिषति, लिलेखिषति। रलः किम्–दिदेविषति। व्युपधात् किम्–विवर्तिषते। हलादेः किम्–एषिषिषति। इह नित्यमपि द्वित्वं गुणेन बाध्यते। उपधाकार्यं हि द्वित्वात्प्रबलम्, ओणेर्ऋदित्करणस्य सामान्यापेक्षज्ञापकत्वात्। २६१८ सनीवन्तर्धभ्रस्जदम्भुश्रिस्वृयूर्णुभरज्ञपिसनाम्। (७-२-४९) इव-

---

कितावितिं। 'नोपधात्थफान्ताद्वा' इत्यतः 'असंयोगाल्लिट् कित्' इत्यतश्च तदनुवृत्तेरिति भावः। **दिद्युतिषते इति**। 'द्युत दीप्तौ' अनुदात्तेत्। सनि द्वित्वे कित्वाद् 'द्युतिस्वाप्योः–' इत्यभ्यासस्य संप्रसारणे पूर्वरूपे सनः कित्वान्न लघूपधगुण इति भावः। सनः कित्वाभावे आह **दिद्योतिषते इति**। 'पूर्ववत्सनः' इत्यात्मनेपदम्। **एषिषिषतीति**। इष्धातोः सन् इट्, हलादित्वाभावेन कित्वाभावाद्गुणे एष् इस ति इति स्थिते 'अजादेर्द्वितीयस्य' इति षिस् इत्यस्य द्वित्वे हलादिशेषे सनः षत्वे रूपम्। नन्विह सत्यपि कित्त्वे नित्यत्वात् परमपि गुणं बाधित्वा षिस् इत्यस्य द्वित्वे धात्ववयवस्य इकारस्य उपधात्वाभावादेव गुणाप्रसक्तेर्हलादेरिति व्यर्थमित्यत आह **इह नित्यमपि द्वित्वं गुणेन बाध्यत इति** कुत इत्यत आह **उपधाकार्यं हि द्वित्वात्प्रबलमिति**। तच्च कुत इत्यत आह **ओणेरिति**। ओणेः ऋदित्करणस्य ज्ञापकत्वादित्यन्वयः। तथाहि ओणृधातोः ण्यन्ताल्लुङि चङि 'णौ चङ्युपधायाः–' इति ह्रस्वस्य 'नाग्लोपिशास्वृदिताम्' इति निषेधे सति ओणि अ त् इति स्थिते णि इत्यस्य द्वित्वे मा भवानोणिणदिति रूपम्। अत्र उपधाह्रस्वनिषेधार्थमोणेः ऋदित्करणम्। उपधाह्रस्वे कृते तु उण् इ अ त् इति स्थिते णि इत्यस्य द्वित्वे मा भवानुणिणदिति स्यात्। ओकारो न श्रूयत इति स्थितिः। यदि तु नित्यत्वाद् उपधाह्रस्वात् प्रागेव ओण् इ अ त् इत्यस्यां दशायां द्वित्वं स्यात्। तदा ओकारस्य उपधात्वाभावादेव ह्रस्वाप्रसक्तेस्तन्निषेधार्थमृदित्करणमनर्थकं स्यात्। तस्मादुपधाह्रस्वात्मकम् उपधाकार्यं द्वित्वात् प्रबलमिति विज्ञायते इत्यर्थः। ननु भवतु उपधाह्रस्वो द्वित्वात् प्रबलः। प्रकृते तु उपधागुणः कथं द्वित्वात् प्रबलः स्यादित्यत आह **सामान्यापेक्षेति**। उपधाह्रस्वस्य उपधाकार्यत्वेन रूपेण द्वित्वात् प्राबल्यविज्ञानादित्यर्थः। वस्तुतस्तु 'णौ चङ्युपधायाः–' इति सूत्रे यदयमोणिमृदितं करोति तज्ज्ञापयति द्विर्वचनाद्ध्रस्वत्वं बलीय इति भाष्ये विशिष्य उपधाह्रस्वग्रहणात् सामान्यापेक्षत्वं ज्ञापकस्य चिन्त्यमिति शब्देन्दुशेखरे प्रपञ्चितम्।

सेडिति वर्तते। चकारेण क्त्वायाः संग्रहः। 'असंयोगात्–' इत्यतः किदिति, 'नोपधात्–' इत्यतो वेति चानुवर्तते, तदाह **क्त्वासनावित्यादि**। सेट् किम्,

न्तेभ्य ऋधादिभ्यश्च सन इड् वा स्यात्। इडभावे 'हलन्ताच्च' (सू २६१३) इति कित्वम्। 'च्छ्वोः–' (सू २५६१) इति वस्य ऊठ्। यण्। द्वित्वम्। दुद्यूषति, दिदेविषति। 'स्तौतिण्योरेव–' (सू २६२७) इति वक्ष्यमाण-नियमान्न षः। सुस्यूषति, सिसेविषति। २६१९ आप्ज्ञप्यृधामीत्। (७-४-५५) एषामच ईस्स्यात्सादौ सनि। २६२० अत्र लोपोऽभ्यासस्य। (७-४-५८) 'सनि मीमा–' (सू २६२३) इत्यारभ्य यदुक्तं तत्राभ्यासस्य लोपः स्यात्। आप्तुमिच्छति ईप्सति। अर्धितुमिच्छति। रपरत्वम्। चर्त्वम्। ईर्त्सति,

---

सनीवन्तर्ध। सनि इवन्तेति च्छेदः। इवन्त, ऋध, भ्रस्ज, दम्भु, श्रि, स्वृ, यु, ऊर्णु, भर, ज्ञपि, सन्, एषां द्वन्द्वः। इव् अन्ते येषां ते इवन्ताः। 'स्वरति–' इत्यतो वेति 'इणिनष्ठायाम्' इत्यत इडिति चानुवर्तते, तदाह **इवन्तेभ्य इत्यादि**। इवन्तस्य दिव्धातोरुदाहरिष्यन्नाह **इडभावे इति**। **वस्येति**। वकारस्येत्यर्थः। **यणिति**। दकारादिकारस्य इति शेषः। **द्वित्वमिति**। द्यु इत्यस्येति शेषः। **दुद्यूषतीति**। 'अज्झन–' इति दीर्घः। इट्पक्षे आह **दिदेविषतीति**। अझलादित्वान्न सनः कित्वम्, अतो नोठ्, किन्तु लघूपधगुण इति भावः। इवन्तस्योदाहरणान्तरं सिवुधातोः सुस्यूषतीति वक्ष्यते। तत्र द्वितीयस्य षत्वमाशङ्क्याह **स्तौतिण्योरिति**। **सुस्यूषतीति**। सिवुधातोः सनि इडभावे दुद्यूषतीतिवद्रूपम्। इट्पक्षे आह **सिसेविषतीति**। ऋध्धातोः सनि ईर्त्सतीति रूपं वक्ष्यन्नाह **आप्ज्ञप्यृधामीत्**। **सादौ सनीति**। 'सनि मीमाघुरभ–' इत्यतः सनीति अच इति चानुवर्तते। 'सः स्यार्धधातुके' इत्यतः सीत्यनुवृत्तं सनो विशेषणम्। तदादिविधिरिति भावः। **अत्र लोपोऽभ्यासस्य**। 'सनि मीमा–' इति 'आप्ज्ञप्यृधामीत्' इति 'दम्भ इच्च' इति 'मुचोऽकर्मकस्य गुणो वा' इति पूर्वसूत्रचतुष्टयविहितकार्यमत्रेत्यनेन परामृश्यते, तदाह **सनि मीमेत्यारभ्येति**। सूत्रचतुष्टयकार्ये कृते सतीत्यर्थः। **ईप्सतीति**। आप्धातोः सनि आकारस्य इत्वे 'अजादेर्द्वितीयस्य' इति प्स इत्यस्य द्वित्वे अभ्यासलोप इति भावः। **रपरत्वमिति**। ऋधेः सनि इडभावे ऋकारस्य ईत्वे रपरत्वमित्यर्थः। **चर्त्वमिति**। ईर्ध् स इति स्थिते धस्य चर्त्वे 'न न्द्राः–' इति रेफं वर्जयित्वा 'अजादेर्द्वितीयस्य' इति त्स इत्यस्य द्वित्वे अभ्यासस्य लोप इति भावः। 'पूर्वत्रासिद्धीयमद्वित्वे' इति वचनात् चर्त्वे कृते

भित्त्वा, छित्त्वा, बुभुक्षते। **आप्ज्ञप्यृ**। 'सनि मीमा–' इत्यतः अच इत्यनुवर्तते, 'सः स्यार्धधातुके' इत्यतः सीति च, तदाह **अच ईस्स्यात्सादाविति**। सीत्यस्य सनो विशेषणात्सादाविति लाभः। **ईप्सतीति**। 'अजादेर्द्वितीयस्य' इति प्स-

अर्दिधिषति। बिभ्रज्जिषति, बिभर्जिषति, बिभ्रक्षति, बिभर्क्षति। २६२१ दम्भ इच्च। (७-४-५६) दम्भेरच इस्वादीच सादौ सनि। अभ्यासलोपः। 'हलन्ताच्च' (सू २६१३) इत्यत्र हल्ग्रहणं जातिपरमित्युक्तम्। तेन सनः किस्वान्नलोपः। धिप्सति, धीप्सति, दिदम्भिषति। शिश्रीषति, शिश्रयिषति। 'उदोष्ठ्यपूर्वस्य' (सू २४९४)। सुस्वूर्षति, सिस्वरिषति। युयूषति, यियु-

द्वित्वमिति बोध्यम्। इट्पक्षे आह अर्दिधिषतीति। सनः सादित्वाभावादीत्वाभावे गुणे रपरत्वे अर् ध् इ स इति स्थिते धिस् इत्यस्य द्वित्वमिति भावः। भ्रस्जधातोः सन इटि 'भ्रस्जो रोपधयोः–' इति रमागमाभावे आह बिभ्रज्जिषतीति। सस्य श्चुत्वेन शः, शस्य जश्त्वेन जः। किद्भावाद् 'ग्रहिज्या–' इति संप्रसारणं न। बिभर्जिषतीति। इटि रमागमपक्षे भ्रस्ज् इस इति स्थिते अकारादुपरि सकारात्प्राग् रेफागमे भकाराद्रेफस्य सकारस्य च निवृत्तौ भर्ज् इस इति स्थिते भर्ज् इत्यस्य द्वित्वे हलादिशेषे अभ्यासस्य इत्वे जश्त्वे सनः षत्वे च रूपम्। तदेवमिट्पक्षे रमागमतदभावाभ्यां रूपद्वयम्। बिभ्रक्षतीति। इडभावे रमागमाभावे च रूपम्। जस्य कुत्वं सस्य षः। बिभर्क्षतीति। इडभावे रमागमे च रूपम्। तदेवमिडभावपक्षे रमागमतदभावाभ्यां द्वे रूपे। दम्भ इच्च। 'सनि मीमा–' इत्यतः सनीति अच इति चानुवर्तते। चकाराद् 'आप्ज्ञप्यृधाम्–' इति सूत्रादीदिति समुच्चीयते। 'सः सि–' इत्यतः सीत्यनुवृत्तं सनो विशेषणं तदादिविधिः, तदाह दम्भेरच इत्यादि। अभ्यासलोप इति। 'अत्र लोपः–' इत्यनेनेति शेषः। दिम्भ् स इति स्थिते इक्समीपादनुस्वारादव्यवहितपरत्वाभावेऽपि हलन्तादित्यस्य प्रवृत्तिमुपपादयति हलन्ताच्चेत्यत्रेति। हल्ग्रहणं हल्त्वजात्याक्रान्तैकानेकव्यक्तिपरमिति प्रागुक्तमित्यर्थः। ततः किमित्यत आह तेनेति। धिप्सतीति। 'सनीवन्त–' इति इडभावे इत्वे रूपम्। धीप्सतीति। इडभावे ईत्वे च रूपम्। दिदम्भिषतीति। इट्पक्षे सनो झलादित्वाभावादकित्वान्नलोपो नेति भावः। शिश्रीषतीति। 'सनीवन्त–' इति इडभावे अज्झनेति दीर्घः। सनः कित्वान्न गुणः। इट्पक्षे आह शिश्रयिषतीति। अझलादित्वान्न कित्वम्, नाप्यज्झनेति दीर्घः। स्वृधातोः सनि ऋकारस्य उत्वविधिं स्मारयति उदोष्ठ्येति। सुस्वूर्षतीति। 'सनीवन्त–' इति इडभावे ऋकारस्य 'अज्झन–' इति दीर्घे कृते उत्वे रपरत्वे 'उपधायां च' इति दीर्घ इति भावः। सिस्वरिषतीति। स्वृ इत्यस्य द्वित्वे उदरत्वे इत्वमिति भावः। युयूषतीति।

शब्दस्य द्वित्वम्। बिभ्रज्जिषतीति। इटि तदभावे च रमागमविकल्पाच्चत्वारि रूपाणि। सुस्वूर्षतीति। 'अज्झनगमाम्–' इति दीर्घे सत्युत्वम्। यियु

विषति। ऊर्णुनूषति, ऊर्णुनुविषति। न च परत्वाद् गुणावादेशयोः सतोरभ्यासे उकारो न श्रूयेतेति वाच्यम्, 'द्विर्वचनेऽचि' (सू २२४३) इति सूत्रेण द्वित्वे कर्तव्ये स्थानिरूपातिदेशादादेशनिषेधाद्वा। न च सन्नन्तस्य द्वित्वं प्रति कार्यित्वा-न्निमित्तता कथमिति वाच्यम्, 'कार्यमनुभवन्हि कार्यी निमित्ततया नाश्रीयते, न त्वननुभवन्नपि' (प ११)। न चेह सन् द्वित्वमनुभवति। बुभूर्षति, बिभरिषति। ज्ञपिः पुगन्तो मित्संज्ञकः पकारान्तश्चौरादिकश्च। इडभावे 'इको

'सनीवन्त–' इति इडभावे 'अज्झन–' इति दीर्घः। **यियविषतीति।** इट्पक्षे 'द्विर्वचनेऽचि' इति गुणनिषेधाद् यु इत्यस्य द्वित्वे 'ओः पुयण्जि–' इतीत्त्वमिति भावः। **ऊर्णुनूषतीति।** 'सनीवन्त–' इति इडभावपक्षे 'न न्द्राः–' इति रेफं वर्जयित्वा नुस इत्यस्य द्वित्वे 'अज्झन–' इति दीर्घः। 'इको झल्' इति सनः कित्त्वान्न गुणः। इट्पक्षे तु 'विभाषोर्णोः' इति सनः ङित्वविकल्पं मत्वाह **ऊर्णुनुविषतीति, ऊर्णुनविषतीति।** ङित्वपक्षे गुणाभावान्नुशब्दस्य द्वित्वे उत्तरखण्डे उवङ्। ङित्वाभावपक्षे नु इत्यस्य द्वित्वे उत्तरखण्डस्य गुणावादेशाविति भावः। उभयत्राप्य-भ्यासे उवर्णः श्रूयते। ननु ङित्वाभावपक्षे ऊर्णु इस इति स्थिते द्वित्वात् प्रागेव पर-त्वाद् गुणे अवादेशे च कृते नव्शब्दस्य द्वित्वे अभ्यासस्यात इत्वे ऊर्णिनविषतीति अभ्यासे इकार एव श्रूयेत, न तु उकार इत्याशङ्क्य निराकरोति **द्विर्वचनेऽचीति।** अस्मिन् सूत्रे स्थानिवदित्यनुवर्त्य रूपातिदेशं चाश्रित्य द्वित्वनिमित्ते अचि परे यः अजादेशः स द्वित्वे कर्तव्ये स्थानिरूपं प्रतिपद्यते इत्येकोऽर्थः। 'न पदान्त–' इत्यतो नेत्यनुवर्त्य द्वित्वनिमित्ते अचि यः अजादेशः स न स्याद् द्वित्वे कर्तव्ये इत्यन्योऽर्थः। तत्र प्रथमव्याख्याने तु कृतस्यापि गुणस्य स्थानिभूतोकाररूपप्रतिपत्त्या नु इत्यस्य द्वित्वे अभ्यासे उकार एव श्रूयते। द्वितीयव्याख्यानेऽपि द्वित्वात् प्राग् गुणस्य निषिद्धतया नुशब्दस्यैव द्वित्वे अभ्यासे उकार एव श्रूयते इति भावः। ननु ऊर्णु इस इति सन्नन्तस्य द्वित्वरूपकार्यभाक्त्वेन तदन्तर्गतस्य इस इत्यस्यापि कार्यित्वान्न द्वित्वनिमित्त-त्वम्, 'न हि कार्यी निमित्ततया आश्रीयते' इत्युक्तेः, तथा च द्वित्वे कर्तव्ये द्वित्वनिमि-त्ताच्परकादेशस्य क्रियमाणो निषेधः कथमिह गुणस्य प्रसज्यत इत्याशङ्क्य निराकरोति **न च सन्नन्तस्येति। कार्यमनुभवन्निति।** अत्र व्याख्यानमेव शरणम्। **न चेह सन्निति।** किंतु नुशब्द इत्यर्थः। **बुभूर्षतीति।** सनीवन्तेति इडभावपक्षे भृ स इति स्थिते 'अज्झन–' इति दीर्घे 'उदोष्ठ्यपूर्वस्य' इत्युत्त्वे रपरत्वे उत्तरखण्डस्य

विषतीति। 'द्विर्वचनेऽचि' इत्यादेशनिषेधाद् द्वित्वे कृते अभ्यासस्योवर्णस्येत्वम्। **ऊर्णु-नूषतीति।** इडभावे 'अज्झनगमाम्–' इति दीर्घः। इट्पक्षे तु 'विभाषोर्णोः' इति

झल्' (सू २६१२) इति किरवान्न गुणः। 'अज्झन-' (सू २६१४) इति दीर्घः परत्वाण्णिलोपेन बाध्यते। 'आप्ज्ञप्-' (सू २६१६) इति ईत्। ज्ञीप्सति, जिज्ञपयिषति। आमितस्तु जिज्ञापयिषति। 'जनसन-' (सू २५०४) इत्यात्वम्। सिषासति, सिसनिषति। 'तनिपतिदरिद्रातिभ्यः सनो वा इड् वाच्यः' (वा २०५६)। २६१२ तनोतेर्विभाषा। (६-४-१७) अस्योपधाया दीर्घो वा स्याज्झलादौ सनि। तितांसति, तितंसति, तितनिषति। 'आशङ्कायां सन्वक्तव्यः' (वा १७०७) श्वा मुमूर्षति। कूलं पिपतिषति। २६२३ सनि

'हलि च' इति दीर्घः। सनः किरवान्न गुण इति भावः। इट्पक्षे आह **बिभरिषतीति**। भृ इस इति स्थिते द्वित्वे उरदत्वे रपरत्वे हलादिशेषे अभ्यासस्य अत इत्वे उत्तरखण्डस्य गुणे रपरत्वमिति भावः। **ज्ञपिः पुगन्तो मित्संज्ञक इति**। 'सनीवन्त-' इति सूत्रे गृह्यते इति शेषः। 'मारणतोषणनिशामनेषु ज्ञा' इति घटादौ, ततो हेतुमण्णौ पुकि घटादित्वेन मित्त्वाद् उपधाह्रस्वे ज्ञपीति ण्यन्तो गृह्यत इत्यर्थः। **पकारान्तश्चौरादिकश्चेति**। 'ज्ञप मिच्च' इति यः स्वतः पकारान्तः पठितः चुरादौ, न तु पुगन्तः सोऽपि 'सनीवन्त-' इति सूत्रे गृह्यत इत्यर्थः। **इडभावे इति**। उभयविधादपि ण्यन्ताद् ज्ञपि इत्यस्मात् सनि इडभावपक्षे णेः परस्य सनः 'इको झल्' इति किरवाण्णेर्गुणो नेत्यर्थः। **परत्वादिति**। णेर्लोपे सति अचोऽभावान्न दीर्घ इति भावः। तथा च ज्ञीप् इत्यस्य द्वित्वे हलादिशेषे 'अत्र लोपः-' इत्यभ्यासलोपे परिनिष्ठितमाह **ज्ञीप्सतीति**। इट्पक्षे आह **जिज्ञपयिषतीति**। **अमितस्त्विति**। मारणादिव्यतिरिक्तार्थकस्य घटादिकस्य हेतुमण्ण्यन्तस्य 'ज्ञा नियोगे' इति चौरादिकण्यन्तस्य च मित्त्वाभावेन उपधाह्रस्वाभावात् 'सनीवन्त-' इत्यत्र ज्ञपिग्रहणेनाग्रहणान्नित्यमेव इडिति भावः, तदाह **जिज्ञापयिषतीति**। सनधातोः सनि आह **जनसनेत्यात्वमिति**। नकारस्येति शेषः। **सिषासतीति**। आत्वे कृते सा इत्यस्य द्वित्वे अभ्यासस्य ह्रस्वे अत इत्वे षत्वे रूपम्। न च 'स्तौतिण्योरेव-' इति नियमान्न ष इति शङ्क्यम्, सनः षत्वे सत्येव तत्प्रवृत्तेः। इट्पक्षे त्वाह **सिसनिषतीति**। अत्र 'जनसन-' इत्यात्वं तु न, सनो झलादित्वाभावात्। 'स्तौतिण्योरेव-' इति नियमान्न ष इति भावः। **तन्निपतीति**। प्राप्तविभाषेयम्। **तनोतेर्विभाषा। उपधाया दीर्घ इति**। 'नोपधायाः-' इत्यतो 'ढ्लोपे-' इत्यतश्च तदनुवृत्तेरिति भावः। **झलादौ सनीति**। 'अज्झन-' इत्यतस्तदनुवर्तते। तत्र

वा ङित्वम्। **न चेह सञ्जिति**। किं तु नुशब्द इत्यर्थः। **किरवान्न गुण इति**। णिचः स्थाने इत्यर्थः। **श्वा मुमूर्षतीति**। एकश्वविषया मरणशङ्केति बोधः।

मीमाघुरभलभशकपतपदामच इस्। (७-४-५४) एषामच इस्स्यात्सादौ सनि। अभ्यासलोपः। 'स्कोः-' (सू ३८०) इति सलोपः। पित्सति। दिदरिद्रिषति दिदरिद्रासति। डु मिञ्, मीञ् आभ्यां सन्। कृतदीर्घस्य मिनोतेरपि मीरूपाविशेषादिस्। 'सः सि-' (सू २३४२) इति तः, मित्सति, मित्सते। मा माने-मित्सति। माङ्मेङोः-मित्सते। दोवाप्योः-दित्सति।

झलादाविति भाष्ये स्थितमिति भावः। **आशङ्कायामिति**। आशङ्काविषयक्रियावृत्तेर्धातोः स्वार्थे सनित्यर्थः। **श्वा मुमूर्षतीति**। शङ्कितमरणो भवतीत्यर्थः। **कूलं पिपतिषतीति**। शङ्कितपतनं भवतीत्यर्थः। 'तनिपति-' इति इट्पक्षे रूपम्। पतेः सनि इडभावपक्षे त्वाह **सनि मीमा। सादौ सनीति**। 'सः सि-' इत्यतः सीत्यनुवृत्तेरिति भावः। **अभ्यासलोप इति**। 'अत्र लोपः-' इत्यनेनेति भावः। पिस्त् स ति इति स्थिते आह **स्कोरिति**। दरिद्रातेः सनि 'तनिपति-' इति इड्विकल्पमुदाहरति **दिदरिद्रिषति दिदरिद्रासतीति। डु मिञिति**। 'डु मिञ् प्रक्षेपणे' स्वादिः, 'मीञ् हिंसायाम्' क्र्यादिः, आभ्यां सन्नित्यर्थः। 'सनि मीमा-' इत्यत्र मीग्रहणेन एनयोरुभयोर्ग्रहणमिति भावः। ननु मी इति दीर्घश्रवणाद् डु मिञ् इत्यस्य ह्रस्वान्तस्य कथं ग्रहणमित्यत आह **कृतदीर्घस्येति**। डु मिञ्धातोः सनि 'अज्झन-' इति कृतदीर्घस्य तथा 'मीञ् हिंसायाम्' इति स्वतः सिद्धदीर्घस्य च मीरूपाविशेषादुभयोरपि ग्रहणमित्यर्थः। **सः सीति**। उभयोरपि धात्वोः मी स इति स्थिते 'सनि मीमा-' इति इसादेशे द्वित्वे 'अत्र लोपः-' इत्यभ्यासलोपे 'सः सि-' इति सस्य तकार इत्यर्थः। **मित्सति, मित्सते इति**। प्रकृतेर्ञित्त्वात् 'पूर्ववत्सनः' इति उभयपदित्वम्। **माङ्मेङोरिति**। मेङः सनि 'आदेचः-'

मरणशङ्काविषयो भवतीत्यन्ये। 'पूर्ववत्सनः' इत्यात्मनेपदमिह न शङ्क्यम्, 'शदेः-' इत्यादिसूत्रद्वये सनो नेत्यनुवर्त्य वाक्यभेदेन व्याख्येयमिति वक्ष्यमाणत्वात्। **सनि मीमा**। 'सः सि-' इत्यतः सीत्यनुवर्तते तस्य सनो विशेषणत्वात्सादौ सनीति लाभः। **मीरूपाविशेषादिति**। ननु मिनोतेर्मीरूपस्य लाक्षणिकत्वाद् मीग्रहणेन ग्रहणं न प्राप्नोति। नैष दोषः, यत्र लक्षणाभिनिर्वृत्तत्वेन शब्दरूपमपेक्ष्यते तत्र लक्षणप्रतिपदोक्तयोरिति परिभाषोपस्थानं न तु यत्र प्रयोगाश्रयणं तत्रेति 'इको झल्' इति सूत्रे कैयटेनोक्तत्वात्। तस्यायमाशयः—मीरूपमात्रस्य प्रयोगोऽत्राश्रितः। 'विभाषा दिक्समासे-' इत्यत्र तु लक्षणाभिनिर्वृत्तस्य समासशब्दस्याश्रयणाद् 'दिङ्नामान्यन्तराले' इति प्रतिपदोक्त एव समास आश्रीयत इति। लक्षणप्रतिपदोक्तपरिभाषाया अनित्यत्वात्क्वचिदुपतिष्ठते क्वचिन्नोपतिष्ठत इति तु निष्कृष्टोऽर्थः। **मित्सतीति**। 'हल-

देङ्-दित्सते। दाण्-दित्सति, दित्सते। धेट्-धित्सति। धाञ्-धित्सति, धित्सते। रिप्सते। लिप्सते। शक्लृ-शिक्षति। शक मर्षणे इति दिवादिः स्वरितेत्-शिक्षति, शिक्षते। पित्सति। 'राधो हिंसायां सनीस् वाच्यः' (वा ४६३५)। रित्सति। हिंसायाम् किम्-आरिरात्सति। २६२४ मुचोऽकर्मकस्य गुणो वा। (७-४-५७) सादौ सनि। अभ्यासलोपः। मोक्षते, मुमुक्षते वा वत्सः स्वयमेव। अकर्मकस्य किम्-मुमुक्षति वत्सं कृष्णः। 'न वृद्भ्यश्चतुर्भ्यः' (सू २३४८)। विवृत्सति। तङि तु विवर्तिषते। 'सेऽसिचि-' (सू २५०६) इति वेट्। निनर्तिषति, निनृत्सति। २६२५ इट् सनि वा। (७-२-४१) वृङ्वृञ्भ्यामृदन्ताच्च सन इड् वा स्यात्। तितरिषति, तितरीषति,

---

इत्यात्वे कृते मारूपत्वाविशेषात् 'सनि मीमा-' इत्यत्र उभयोरपि ग्रहणमिति भावः। **दोदणोरिति**। 'दो अवखण्डने' इति धातोः सनि आत्त्वे कृते दारूपाविशेषाद् घुत्वादुभयोर्ग्रहणमिति भावः। **दित्सतीति**।'हलन्ताच्च' इति कित्त्वान्नोपधागुणः। **देङिति**। तस्यापि कृतात्वस्य दारूपत्वेन घुत्वादिति भावः। **दाणिति**। 'डु दाञ् दाने' इति धातुरपि घुत्वाद् गृह्यत इति भावः। **धेडिति**। अस्यापि कृतात्वस्य घुत्वात् 'सनि मीमा-' इत्यत्र ग्रहणमिति भावः। **रिप्सते इति**। रभधातो रूपम्। **लिप्सते इति**। लभधातो रूपम्। **पित्सतीति**। पत्लृधातो रूपम्। पदधातोः पित्सते इति रूपम्। **सनि इस् वाच्य इति**। आकारस्येति शेषः। **रित्सतीति**। सनि इसादेशः। 'अत्र लोपः-' इत्यभ्यासलोपः। **मुचोऽकर्मकस्य। सादौ सनीति**। शेषपूरणमिदम्। 'सः सि-' इत्यतः सीति 'सनि मीमा-' इत्यतः सनीति चानुवृत्तेरिति भावः। 'हलन्ताच्च' इति कित्त्वाद् गुणनिषेधे प्राप्ते वचनम्। **अभ्यास लोप इति**। 'अत्र लोपः-' इत्यनेनेति शेषः। **मोक्षते इति**। 'अत्र लोपः-' इत्यभ्यासलोपः। **तङि त्विति**। 'न वृद्भ्यः-' इत्यत्र परस्मैपदग्रहणानुवृत्तेरुक्तत्वादिति भावः। **निनृत्सतीति**। इडभावपक्षे 'हलन्ताच्च' इति कित्वान्न गुणः।

न्ताच्च' इति कित्त्वान्नोपधागुणः। **शिक्षतीति**। ननु निरनुबन्धपरिभाषया 'शक मर्षणे' इत्यस्यैव ग्रहणमुचितमिति चेत्। अत्राहुः—इयं हि परिभाषा प्रत्ययग्रहणविषया। अत एव 'जृव्रश्च्योः-' इत्यत्र जॄजृषोरुभयोर्ग्रहणमिति न्यासकारेणोक्तमतोऽत्रापि स्वादिदैवादिकयोर्ग्रहणं युक्तमेवेति। **मुचोऽकर्मकस्य**। 'हलन्ताच्च' इति कित्वेन गुणाभावे प्राप्ते विधिरयम्। **विवृत्सतीति**। 'वृद्भ्यः स्यसनोः' इति विकल्पेन परस्मैपदम्। **इट् सनि वा**। चिकीर्षतीत्यादौ 'अज्झनगमाम्-' इति दीर्घे कृते नेदं प्रवर्तते। 'एकाच उपदेशे-' इत्यत उपदेश इत्यनुवर्त्य उपदेशे

तितीर्षति। विवरिषति, विवरीषति, वुवूर्षति। वृङ्–वुवूर्षते, विवरिषते। दुध्वूर्षति। २६२६ स्मिपूङ्रञ्ज्वशां सनि। (७-२-७४) स्मिङ्, पूङ्, ऋ, अन्जू, अश्, एभ्यः सन इट् स्यात्। सिस्मयिषते। पिपविषते। अरिरिषति। इह रिस्शब्दस्य द्वित्वम्। इस् इति सनोऽवयवः कार्यभागिति कार्यिणो निमित्तत्वायोगाद् 'द्विर्वचनेऽचि' (सू २२४३) इति न प्रवर्तते।

इट् सनि वा। 'वृतो वा' इत्यतो वृत इत्यनुवर्तत इति मत्वाह वृङ्वृञ्भ्यामित्यादि। 'सनि ग्रहगुहोश्च' इत्यस्यापवादः। चिकीर्षतीत्यादौ 'अज्झन–' इति दीर्घे कृते सनि नेदं प्रवर्तते, 'एकाच उपदेशे–' इत्यत उपदेशे इत्यनुवर्त्य उपदेशे ऋकारन्तादिति व्याख्यानात्। तितरिषति, तितरीषतीति। तॄधातोः सनि लटि 'वृतो वा' इति दीर्घः। इडभावे त्वाह तितीर्षतीति। 'इको झल्' इति कित्वाद् गुणाभावे तॄ इत्यस्य ऋकारस्य इत्त्वे रपरत्वे 'हलि च' इति दीर्घ इति भावः। विवरिषतीति। वृञ्धातोः सनि इटि 'वृतो वा' इति दीर्घविकल्पः। इडभावे त्वाह वुवूर्षतीति। 'उदोष्ठ्य–' इत्युत्वे रपरत्वे 'हलि च' इति दीर्घः। वुवूर्षते इति। ङित्वादात्मनेपदम्। दुध्वूर्षतीति। 'ध्वृ कौटिल्ये'। 'अज्झन–' इति दीर्घः। 'उदोष्ठ्य–' इत्युत्वे 'हलि च' इति दीर्घ इति भावः। स्मिपूङ्। स्मि, पूङ्, ऋ, अञ्जू, अश एषां द्वन्द्वः। ऋकारस्य यणि रेफे रञ्जिवति निर्देशः। इट् स्यादिति। 'इडत्यर्ति–' इत्यतस्तदनुवृत्तेरिति भावः। पूञस्तु पुपूषतीत्येव। 'सनि ग्रह–' इति इण्निषेधात्। सिस्मयिषते इति। 'स्तौतिण्योरेव–' इति नियमान्न षः। पिपविषते इति। पूङ्धातोः पू इत्यस्य द्वित्वे 'ओः पुयण्ज–' इति इत्त्वम्। अरिरिषतीति। ऋधातोः सनि इटि रूपम्। रिस्शब्दस्येति। गुणे रपरत्वे 'अजादेर्द्वितीयस्य' इति रिस् इत्यस्य द्वित्वमित्यर्थः। ननु 'द्विर्वचनेऽचि' इति निषेधाद् गुणासंभवाद् रिस् इत्यस्य कथं द्वित्वमित्यत आह द्विर्वचनेऽचि इति न प्रवर्तते इति। कुत इत्यत आह कार्यिणो निमित्तत्वायोगादिति। 'नहि कार्यी निमित्ततया आश्रीयते' इति निषेधादिडादेः सनो

ऋकारान्तादिति व्याख्यानात्। अत एवेटं विनैवोदाहरति दुध्वूर्षतीति। ध्वृ कौटिल्ये। 'अज्झन–' इति दीर्घः। 'उदोष्ठ्यपूर्वस्य' इत्युत्वं रपरत्वं 'हलि च' इति दीर्घः। स्मिपूङ्। पूङिति ङकारानुबन्धग्रहणात् पूञः पुपूषतीत्येव। 'सनिग्रह–' इतीण्निषेधात्। सिस्मयिषत इति। स्मिङ् ईषद्धसने अस्यानिट्त्वादिडागमस्याप्राप्तिः। 'स्तौतिण्योरेव–' इति नियमान्न षः। अरिरिषतीति। अस्याप्यनिट्त्वादिडागमस्याप्राप्तिः। रिस्शब्दस्येति। सन इटि गुणे च कृते अरिस् इति स्थिते

अजिजिषति। अशिशिषते। 'उभौ साभ्यासस्य' (सू २६०१) प्राणिणिषति। उच्छेस्तुक्, श्चुत्वम्, 'पूर्वत्रासिद्धीयमद्वित्वे' इति चछाभ्यां सहितस्येटो द्वित्वम्, 'हलादिः शेषः' (सू २१७६) उचिच्छिषति। 'निमित्तापाये नैमित्तिकापायः' इति त्वनित्यम्, 'च्छ्वोः–' (सू २२६१) इति सतुकग्रहणाज्ज्ञापकात्, प्रकृतिप्रत्यापत्तिवचनाद्वा। 'णौ च संश्चङोः' (सू २५७६)

द्वित्वरूपकार्यिणो न द्वित्वनिमित्तत्वमिति भावः। ननु इडागमः सन्भक्तः। ततश्च इस् इत्यस्य द्वित्वेऽपि समुदायस्य इस इत्यस्य द्वित्वकार्यित्वाभावाद् द्वित्वनिमित्तत्वमित्यत आह **इस् इतीति**। इस् इति सनोऽवयवो द्वित्वभागिति कृत्वा अवयवद्वारा इस इति समुदायस्य कार्यित्वमिति भावः। **अजिजिषतीति**। अजेः सनि इटि 'न न्द्राः–' इति नकारस्य निषेधाद् जिस् इत्यस्य द्वित्वम्। ऊदित्त्वादिड्विकल्पे प्राप्ते नित्यमिट्। **अशिशिषते इति**। 'अशू व्याप्तौ' ऊदित्त्वादिड्विकल्पे प्राप्ते नित्यमिट्। 'अश भोजने' इति क्यादिस्तु नित्यं सेडेव। **उच्छेरिति**। 'उच्छी विवासे'। अत्र 'छे च' इति तुगित्यर्थः। **श्चुत्वमिति**। तुक इति शेषः। ननु उच्छ् इस इति स्थिते श्चुत्वस्यासिद्धत्वात्तकारसहितस्य द्वित्वे अभ्यासे तकारः श्रूयेत इत्यत आह **पूर्वत्रेत्यादि**। **हलादिः शेष इति**। च्छिस् इत्यस्य द्वित्वे हलादिशेषादभ्यासे छकारसकारयोर्निवृत्तौ तुकश्चकार इकारश्च शिष्यते इत्यर्थः, तदाह **उच्चिच्छिषतीति**। उत्तरखण्डे छकारे परे इकारस्य तुकश्चुत्वेन चकारः। ननु च्छिस् इत्यस्य द्वित्वे हलादिशेषात्पूर्वखण्डे छकारसकारयोर्निवृत्तौ 'निमित्तापाये नैमित्तिकस्याप्यपायः' इति न्यायेन तुकोऽपि निवृत्तेस्तदादेशचकारस्य कथमभ्यासे श्रवणमित्यत आह **निमित्तापाये इति**। कथमनित्यत्वमित्यत आह **च्छ्वोरिति**। पृष्टः पृष्टवानित्यादौ प्रच्छेः छकारस्य 'च्छ्वोः–' इति शकारे व्रश्चादिना शस्य षत्वे तुक्चकारस्य श्रवणप्राप्तौ तन्निवृत्त्यर्थं सतुकग्रहणम्। तत्र चकारस्य शकारे सति निमित्ताभावादेव तुकोऽपि निवृत्तिसिद्धेः सतुकग्रहणं व्यर्थमापद्यमानं 'निमित्तापाये–'इत्यस्यानित्यतां ज्ञापयतीत्यर्थः। **प्रकृतिप्रत्यापत्तिवचनाद्वेति**। 'हनश्च वधः' इति हनधातोरप्प्रत्यये प्रकृतेर्वधादेशे वधशब्दः। कंसवधमाचष्टे कंसं घातयतीत्यादौ 'आख्यानात्कृतस्तदाचष्टे कृल्लुक्प्रकृतिप्रत्यापत्तिः' इति अप्प्रत्ययस्य लुकि प्रकृतेर्वधादेशनिवृत्तिर्विहिता। तत्र कृतो लुकि निमित्तापायादेव वधाद्यादेशनिवृत्तिसिद्धेः प्रकृतिप्रत्यापत्तिवचनं व्यर्थमापद्यमानं

'अजादेर्द्वितीयस्य' इति रिस्शब्दस्य द्वित्वमित्यर्थः। **अजिजिषतीत्यादि**। अञ्जू व्यक्तिम्रक्षणादौ। अशू व्याप्तौ। अनयोरूदित्वाद्विकल्पे प्राप्ते। नित्यमिट्। अश

(सू २६०१) इति सूत्राभ्यामिङो गाङ्, श्वयतेः संप्रसारणं च वा । अधिजिगापयिषति, अध्यापिपयिषति । शिश्वाययिषति, शुशावयिषति । 'ह्वः संप्रसारणम्' (सू २५८६) जुहावयिषति । 'णौ द्वित्वात्प्रागच आदेशो न' इत्युक्तत्वादुकारस्य द्वित्वम् । पुस्फारयिषति । चुक्षावयिषति । 'ओः पुयण्ज्यपरे'

'निमित्तापाये–' इत्यस्य अनित्यतां ज्ञापयतीत्यर्थः । यद्यप्यत्र वधशब्दे अप्प्रत्ययो वधादेशश्च युगपद्विहितः, न तु प्रत्यये परे । तथापि संनियोगशिष्टत्वात् प्रत्ययस्य निमित्तत्वं पर्यवसानगत्येति बोध्यम् । वस्तुतस्तु पुष्ययोगं जानाति पुष्येण योजयतीत्येतत्साधके 'पुष्ययोगे ज्ञि' इति वचने भाष्योक्तप्रकृतिप्रत्यापत्तिरित्यनुवृत्तिरिह ज्ञापिका । तत्र हि 'चजोः–' इति घिति परतः कुत्वम् । अन्यथा कुल्लुकि निमित्तापायपरिभाषयैव कुत्वनिवृत्तौ किं प्रकृतिप्रत्यापत्त्यनुवृत्त्येति शब्देन्दुशेखरे विस्तरः । अथ 'इङ् अध्ययने' 'टु ओ श्वि गतिवृद्ध्योः' इत्याभ्यां णयन्ताभ्यां सनि विशेषमाह **णौ चेति** । 'णौ च संश्चङोः' इति सूत्रं द्वितीयस्य चतुर्थे पादे षष्ठस्य प्रथमे पादे च स्थितम् । सन्परे चङ्परे च णौ इङो गाङ् वेति प्रथमस्यार्थः । सन्परे चङ्परे च णौ श्वयतेः संप्रसारणं वेति द्वितीयस्यार्थः । प्रथमसूत्रेण इङो गाङ्, द्वितीयसूत्रेण श्वयतेः संप्रसारणमित्युभयमपि पाक्षिकं भवतीत्यर्थः । **अधिजिगापयिषतीति** । इङो णौ विवक्षिते गाङि पुकि गापि इत्यस्मात्सनि रूपम् । 'णौ च संश्चङोः' इति गाङ्विधौ विषयसप्तमीति प्रागेवोक्तम् । गाङभावे आह **अध्यापिपयिषतीति** । 'क्रीङ्जीनां णौ' इत्यात्वे पुक् । **शिश्वाययिषतीति** । श्विधातोर्णौ वृद्धावायादेशे श्वायि इत्यस्मात्सनि संप्रसारणाभावे रूपम् । संप्रसारणपक्षे आह **शुशावयिषतीति** । णयन्तात्सनि इटि श्वि इ इस इति स्थिते 'संप्रसारणं तदाश्रयं च कार्यं बलवत्' इति वचनात्प्रथमं संप्रसारणं पूर्वरूपम् । शु इत्यस्य द्वित्वे उत्तरखण्डे उकारस्य वृद्धावावादेशे णिचो गुणायादेशाविति भावः । **ह्वः संप्रसारणमिति** । हेतुमण्णयन्तप्रक्रियायां व्याख्यातम् । **जुहावयिषतीति** । ह्वेञो णयन्तात्सनि इटि प्रथमं संप्रसारणं पूर्वरूपम् । हु इत्यस्य द्वित्वम् । उकारस्य वृद्ध्यावादेशौ, णिचो गुणायादेशाविति भावः । ननु परत्वाद् द्वित्वात् प्रागेव उकारस्य वृद्ध्यावादेशयोः कृतयोः हाव् इत्यस्य द्वित्वे अभ्यासस्यात इत्वे इकार एव श्रूयेतेत्यत आह **णौ द्वित्वादिति** । **पुस्फारयिषतीति** । स्फुरतेर्णयन्तात्सनि इटि 'चिस्फुरोर्णौ' इत्यस्मात् प्रागेव स्फुर् इत्यस्य द्वित्वम्, द्वित्वे कार्ये णावच आदेशस्य निषेधात् । 'ओः पुयण्जि–' इति इत्वं तु न, फकारस्य

भोजन इति क्र्यादिस्तु नित्यं सेडेव । **सूत्राभ्यामिति** । एकं द्वितीयेऽपरं तु षष्ठे । तत्राद्येन गाङादेशोऽपरेण संप्रसारणम् । **ह्वः संप्रसारणम्** । इदं च णिजन्तेषु

(सू २४७७) पिपावयिषति, बिभावयिषति, यियावयिषति, रिरावयिषति, लिलावयिषति, जिजावयिषति। पुयण्जि इति किम्-नुनावयिषति। अपरे किम्-बुभूषति। 'स्रवति-' (सू २४७८) इतीत्वं वा, सिस्त्रावयिषति। सुस्रावयिषतीत्यादि। अपरे इत्येव, शुश्रूषते। २६२७ स्तौतिण्योरेव षण्यभ्यासात्। (८-३-६१) अभ्यासेणः परस्य स्तौतिण्यन्तयोरेव सस्य षः स्यात् षभूते सनि नान्यस्य। तुष्टूषति। 'द्युतिस्वाप्योः-' (सू २४४४) इत्युत्वम्। सुष्वापयिषति। सिषाधयिषति। स्तौतिण्योः किम्-सिसिक्षति।

सकारेण व्यवहिततया पवर्गपरत्वाभावात्। **चुलावयिषतीति**। चुधातोः ण्यन्तात् सनि इटि चु इत्यस्य द्वित्वम्। परिनिष्ठिते रूपे अवर्णपरत्वेन णावत्र आदेशस्य निषेधादिति भावः। **ओः पुयण्जीति**। हेतुमण्णिच्प्रक्रियायामेदं व्याख्यातमपि स्मार्यते। **पिपावयिषतीत्यादि**। पू, भू, यु, रु, लू, जु एभ्यो णयन्तेभ्यः सनि इटि द्वित्वे कार्ये णावत्र आदेशनिषेधाद् उवर्णान्तानामेव द्वित्वे अभ्यासोवर्णस्य इत्वमिति भावः। जुः सौत्रो धातुः 'जुचङ्क्रम्य-' इत्यत्रोक्तः। अथ 'स्रवतिशृणोति-' इति सूत्रं हेतुमण्णिच्प्रक्रियायां व्याख्यातं स्मारयति **स्रवतीतीत्वं वेति**। **शुश्रूषते इति**। 'ज्ञाश्रुस्मृदृशां सनः' इत्यात्मनेपदम्। **स्तौतिण्योरेव**। षणीति कृतषत्वस्य सनो ग्रहणम्। 'अपदान्तस्य मूर्धन्यः' इत्यधिकृतम्, 'इण्कोः-' इति च। तत्र कुग्रहणं निवर्तते असंभवात्। णिग्रहणेन तदन्तग्रहणम्। 'सहेः साडः सः' इत्यतः स इति षष्ठ्यन्तमनुवर्तते, तदाह **अभ्यासेण इत्यादि**। **षभूते इति**। षकारं प्राप्ते सनीत्यर्थः। **नान्यत्रेति**। अभ्यासेणः परस्य चेत्सस्य षत्वं तर्हि स्तौतिण्यन्तयोरेवेत्यर्थः। न च 'आदेशप्रत्ययोः' इत्येव सिद्धे आरम्भसामर्थ्यादेव नियमलाभाद् एवकारो व्यर्थ इति शङ्क्यम्, षण्येवेति नियमनिरसनार्थत्वात्। षण्येवेति नियमे सति तुष्टावेत्यत्र षत्वानापत्तेः। स्तौतेरुदाहरति **तुष्टूषतीति**। 'अज्झन-' इति दीर्घः। ण्यन्तस्योदाहरिष्यन्नाह **द्युतीति**। **उत्वमिति**। वकारस्य संप्रसारणमुकार इत्यर्थः। **सुष्वापयिषतीति**। स्वपेर्णौ उपधावृद्धौ स्वापि इत्यस्मात् सनि इटि वकारस्य संप्रसारणे पूर्वरूपे सुप इत्यस्य द्वित्वे णेर्गुणेऽयादेशे सनः षत्वे अभ्यासेणः परस्य षत्वमिति भावः। **सिषाधयिषतीति**। अत्रापि ण्यन्तत्वादभ्यासेणः परस्य सस्य षत्वमिति भावः।

व्याख्यातमिह तु स्मारितम्। **जिजावयिषतीति**। जुः सौत्रो धातुः 'जुचङ्क्रम्य-' इत्यत्रोक्तः। **शुश्रूषते इति**। 'ज्ञाश्रुस्मृदृशां सनः' इत्यात्मनेपदम्। **स्तौतिण्योरेव**। एवं च सिषाधयिषेति प्रयोगस्य साधुत्वं न तु सिसाधयिषेत्यस्येति ज्ञेयम्।

उपसर्गात्तु 'स्थादिष्वभ्यासेन च-' (सू २२७७) इति षत्वम् । परिषिषिक्षति । षणि किम्-तिष्ठासति । सुषुप्सति, अभ्यासादित्युक्तेर्नेह निषेधः । इण्-प्रतीषिषति । इक्-अधीषिषति । २६२८ सः स्विदिस्वदिसहीनां च । (८-३-६२) अभ्यासेणः परस्य ण्यन्तानामेषां सस्य स एव, न षः, षणि परे । सिस्वेदयिषति, सिस्वादयिषति । सिसाहयिषति । 'स्थादिष्वेवाभ्यासस्य' इति नियमान्नेह अभिसुसूषति ।

सिसिक्षतीति । सेक्तुमिच्छतीत्यर्थः । सिच्धातोः सन् 'हलन्ताच्च' इति कित्त्वान्न लघूपधगुणः । अभ्यासेणः परस्य सस्य चेत् षत्वं तर्हि स्तौतिण्योरेव इति नियमान्न ष इति भावः । ननु परिषिषिक्षतीत्यत्र अभ्यासेणः परस्य सस्य कथं षत्वम् ? 'स्तौतिण्योरेव-' इति नियमात्, 'स्थादिष्वभ्यासेन च-' इति षत्वस्याप्यनेन नियमेन निवृत्तेरित्यत आह उपसर्गात्त्विति । 'स्तौतिण्योरेव-' इति नियमेन मध्येऽपवाद-न्यायबलाद् 'आदेशप्रत्यययोः' इति षत्वमेव बाध्यत इति भावः । षणि किमिति । कृतषत्वनिर्देशः किमर्थं इति प्रश्नः । तिष्ठासतीति । 'धात्वादेः-' इति षस्य सत्वे स्था इत्यस्य द्वित्वे अभ्यासह्रस्वे इत्त्वे 'आदेशप्रत्यययोः' इति षत्वम् । कृतषत्वे सन्ये-वायं नियमः, अत्र तु सनः षत्वाभावेन नियमाप्रवृत्तेः षत्वं निर्बाधमिति भावः । सुषुप्सतीति । स्वप्धातोः सनि 'रुदविदमुषग्रहिस्वपि-' इति कित्त्वाद् 'वचिस्वपि-' इति संप्रसारणे कृते द्वित्वम् । कित्त्वान्न लघूपधगुणः । इहापि 'स्तौतिण्योरेव-' इति नियमो न भवति, सनः षत्वाभावादिति भावः । ननु षणि इणः परस्य सस्य चेत् षत्वं तर्हि स्तौतिण्योरेवेत्येतावदेवास्तु, अभ्यासादिति किमर्थमित्यत आह अभ्या-सादित्युक्तेर्नेहेति । प्रतीषिषतीति । इणधातोः सनि 'अजादेर्द्वितीयस्य' इति स इत्यस्य द्वित्वे अभ्यासेत्त्वम् । इह षभूते सनि 'इण् गतौ' इति धातोः परस्य सस्य षत्वं भवत्येव, अभ्यासेणः परत्वे सत्येव नियमप्रवृत्तेरिति भावः । अधीषिष-तीत्यप्येवम् । सः स्विदि । सः स्विदीति छेदः । 'स्तौतिण्योरेव षण्यभ्यासात्' इति सूत्रं स्तौतिवर्जमनुवर्तते । 'सहेः साडः सः' इत्यतः स इति षष्ठ्यन्तं च, तदाह अभ्यासेण इति । सकारविधिर्नियमार्थ इत्याह सस्य स एवेति । सुनोतेः सनि 'स्तौतिण्योरेव-' इति नियमादुत्तरखण्डस्य षत्वाभावे अभिसुसूषतीत्यत्र

उपसर्गात्त्विति । मध्येऽपवादन्यायात् 'स्तौतिण्योः-' इति नियमेन 'आदेशप्रत्य-ययोः' इति षत्वमेव बाध्यते, न तु 'स्थादिष्वभ्यासेन च-' इत्युत्तरेण विहितमिति भावः । सुषुप्सतीति । 'रुदविद-' इति सनः कित्त्वान्न गुणः । प्रतीषिषतीति । इह षभूते सनीण् गताविति धातोः परस्य सस्य षत्वं भवत्येवेत्यर्थः । नियमान्ने-

'शैषिकान्मतुबर्थीयाच्छैषिको मतुबर्थिकः।
सरूपप्रत्ययो नेष्टः सन्नन्तान्न सनिष्यते॥'

शैषिकाच्छैषिकः सरूपो न। तेन शालीये भव इति वाक्यमेव, न तु छान्ताच्छः। सरूपः किम्—अहिच्छत्त्रे भव आहिच्छत्त्रः, आहिच्छत्त्रे भव आहिच्छत्त्रीयः, अणन्ताच्छः। तथा मत्वर्थात्सरूपः स न। धनवानस्यास्ति, इह मतुबन्तान्मतुब्न। विरूपस्तु स्यादेव, दण्डिमती शाला। सरूप इत्यनुषज्यते। अर्थद्वारा सादृश्यं तस्यार्थः। तेन इच्छासन्नन्तादिच्छासन्न। स्वार्थसन्नन्तात्तु स्यादेव, जुगुप्सिषते, मीमांसिषते।

इति तिङन्ते सन्प्रकरणम्।

'उपसर्गात्सुनोति—' इत्यभ्यासस्य षत्वमाशङ्क्याह **स्यादिष्वेवेति**। **शैषिकादिति**। सन्विधायकसूत्रस्थमिदं वार्तिकम्। शैषिकात्सरूपः शैषिकः प्रत्ययो न। मतुबर्थीयात् सरूपो मतुबर्थिकः प्रत्ययो नेत्यन्वयः। शेषाधिकारे विहितः शैषिकः। भवार्थे अध्यात्मादित्वाट्ठञ्। मतुबर्थे भवो मतुबर्थीयः, गहादित्वाच्छः। मतुबर्थोऽस्यास्तीति मतुबर्थिकः। 'अत इनिठनौ' इति ठन्। **शालीये इति**। शालायां भवः शालीयः। 'वृद्धाच्छः'। शालीये भव इत्यर्थे शालीयशब्दात् पुनश्छो नेत्यर्थः। **आहिच्छत्त्रे भव इति**। आहिच्छत्त्रशब्दो भवार्थे अणन्तः। ततो भवार्थे 'वृद्धाच्छः' इति छ एव भवति, न तु पुनरणिति भावः। ननु जुगुप्सिषते इत्यादौ कथं सन्नन्तात् सन्नित्यत आह **सरूप इत्यनुषज्यते इति**। सन्नन्तान्न सनिष्यते इत्यत्रापि सरूप इत्यनुषज्यते इत्यर्थः। नन्वेवमपि जुगुप्सिषते इत्यत्र सरूपस्य सनः कथं प्रवृत्तिरित्यत आह **अर्थद्वारेति**। शब्दतो वैरूप्यस्यासंभवादर्थद्वारकमेव सारूप्यं विवक्षितमिति भावः। **तेनेति**। इच्छासन्नन्तादिच्छासन्नेति लभ्यते इत्यर्थः। **स्वार्थेति**। स्वार्थसन्नन्तात्तु इच्छासन् भवत्येवेत्यर्थः।

इति श्रीवासुदेवदीक्षितविदुषा विरचितायां सिद्धान्तकौमुदीव्याख्यायां बालमनोरमाख्यायां सन्नन्तनिरूपणं समाप्तम्।

हेति। न चात्र नियमादेव निषेधे 'सुनोतेः स्यसनोः' इति सूत्रं सन्विषये निर्विषयं स्यादिति वाच्यम्, अभिसुसूषतेरप्रत्ययः, अभिसुसूरित्यत्र षत्वनिषेधाय तस्यावश्यकत्वात्। एतच्च काशिकायां स्पष्टम्। **शैषिकेति**। एतच्च श्लोकवार्तिकमिति केचित्। भाष्यमिति बहवः। शेषे भवः शैषिकः, अध्यात्मादित्वाट्ठञ्। मतुबर्थे भवो मतुबर्थीयः, गहादित्वाच्छः। मतुबर्थोऽस्यास्तीति मतुबर्थिकः, 'अत इनिठनौ' इति ठन्। इति तत्त्वबोधिन्यां सन्नन्तप्रक्रियाप्रकरणम्।

---

१ क्विप् प्रत्यय इत्यर्थः।

अथ तिङन्ते यङ्प्रकरणम् ॥ ५५ ॥

२६२९ धातोरेकाचो हलादेः क्रियासमभिहारे यङ् । (३-१-२२) पौनःपुन्यं भृशार्थश्च क्रियासमभिहारः, तस्मिन् द्योत्ये यङ् स्यात् । **२६३० गुणो यङ्लुकोः । (७-४-८२)** अभ्यासस्य गुणः स्याद्यङि यङ्लुकि च । 'सनाद्यन्ता-' (सू २३०४) इति धातुत्वाल्लडादयः । ङिदन्तत्वादात्मनेपदम् । पुनःपुनरतिशयेन वा भवति बोभूयते । बोभूयांचक्रे । अबोभूयिष्ट । धातोः किम्-आर्धधातुकत्वं यथा स्यात् । तेन 'ब्रुवो वचिः' (सू २४४३) इत्यादि । एकाचः किम्-पुनःपुनर्जागर्ति । हलादेः किम्-भृशमीक्षते । भृशं शोभते रोचते

अथ यङ्प्रक्रिया निरूप्यन्ते । **धातोरेकाचो** । **तस्मिन्द्योत्ये इति** । वाच्यत्वे तु प्रत्ययवाच्यस्य प्रधानतया सन्नन्ते इच्छाया इव तस्य विशेष्यत्वं स्यादिति भावः । **गुणो यङ्लुकोः** । यङ् च लुक्च इति द्वन्द्वात् सप्तमी । लुगिह यङ एव विवक्षित उपस्थितत्वात् । 'अत्र लोपः-' इत्यतः अभ्यासस्येत्यनुवर्तते, तदाह **अभ्यासस्येति** । इक्परिभाषया इगन्तस्येति लभ्यते । **बोभूयते इति** । 'सन्यङोः' इति द्वित्वम् । यङो ङित्त्वादूकारस्य न गुणः । बोभूय इत्यस्माल्लटि तिपि शपि पररूपम् । 'क्रियासमभिहारे द्वे वाच्ये' इति पुनर्द्वित्वं तु न, तस्य 'क्रियासमभिहारे' इति विहितलोडन्तमात्रविषयत्वात् । अत एव 'क्रियासमभिहारे लोट्' इति सूत्रभाष्ये 'क्रियासमभिहारे लोण्मध्यमपुरुषैकवचनस्य द्वे वाच्ये' इत्येव पठितम् । पौनःपुन्ये यङि तु 'नित्यवीप्सयोः' इति न द्वित्वम्, 'क्रियासमभिहारे द्वे' इत्यनेन पौनःपुन्येऽपि लोडन्तद्वित्वविधानेन पौनःपुन्यस्य अन्यतो लाभे सौत्रद्वित्वाप्रवृत्तेर्ज्ञापनादित्यलम् । **धातोः किमिति** । 'क्रियासमभिहारे' इत्यनेनैव धातोर्लाभात्किमर्थं धातुग्रहणमिति प्रश्नः । **आर्धधातुकत्वमिति** । धातोरित्यभावे आर्धधातुकत्वं न स्यात् । धातोरिति विहितप्रत्ययस्यैव आर्धधातुकत्वादिति भावः । **ब्रुव इति** । यङ आर्धधातुकत्वे सत्येव तस्मिन् परे 'ब्रुवो वचिः' 'वेञो वयिः' इत्यादि कार्यं सिध्यति । अन्यथा 'आर्धधातुके' इत्यधिकृत्य तद्विधानान्न स्यादिति भावः । **भृशमीक्षते इति** । न च भृशशब्देनैवात्र भृशार्थभानाद् यङ् न भविष्यतीति वाच्यम्,

---

धातोरेकाचो । क्रियासमभिहार इत्युक्तत्वाद्धातोरेव स्यान्न तु प्रातिपदिकादिति पृच्छति **धातोः किमिति । ब्रुवो वचिरित्यादीति** । वावच्यते, वाव्यायते इत्यादिरूपसिद्धिः प्रयोजनमित्यर्थः । धातुग्रहणाभावे धिगित्यव्ययादपि स्यात्तस्य क्रियावाचित्वादेकाच्त्वाच्चेति तद्वारणार्थमपि धातुग्रहणमावश्यकमित्याहुः ।

इत्यत्र यङ् नेति भाष्यम्। पौनःपुन्ये तु स्यादेव। रोरुच्यते। शोशुभ्यते। 'सूचिसूत्रिमूत्र्यट्यर्त्यशूर्णोतिभ्यो यङ् वाच्यः' (वा १७५१)। आद्यास्त्रयश्चुरादावदन्ताः। सोसूच्यते। सोसूत्र्यते। अनेकाच्कत्वेनाषोपदेशत्वात्षत्वं न। मोमूत्र्यते। **२६३१ यस्य हलः।** (६-४-४९) यस्य इति सङ्घातग्रहणम्। हलः परस्य यशब्दस्य लोपः स्यादार्धधातुके। 'आदेः परस्य' (सू ४४)। 'अतो लोपः' (सू २३०८)। सोसूचांचक्रे। सोसूचिता। सोसूत्रिता। मोमूत्रिता। **२६३२ दीर्घोऽकितः।** (७-४-८३) अकितोऽभ्यासस्य दीर्घः

भृशत्वं हि यङ्द्योत्यम्, न तु वाच्यम्। द्योतनं च उक्तस्यापि संभवतीति भावः। **यङ् नेति**। अनभिधानादिति भाष्ये स्पष्टम्। **पौनःपुन्ये** त्विति। पुनःपुनश्शब्दसमभिहारेऽपि यङ्स्त्येव, भृशार्थ एवानभिधानोक्तेरिति भावः। **सूचिसूत्रीति**। सूचि, सूत्रि, मूत्रि, अटि, अर्ति, अशू, ऊर्णोति एषां द्वन्द्वः। 'सूच पैशुन्ये, सूत्र वेष्टने, मूत्र प्रस्रवणे' एते त्रयश्चुराद्यन्तर्गणे कथादावदन्ताः। तेषामनेकाच्त्वादप्राप्तौ यङ्वचनमित्याह **आद्यास्त्रय इति**। 'अट गतौ, ऋ गतौ, अश भोजने, अशू व्याप्तौ' एषां हलादित्वाभावाद्वचनम्। ऊर्णुञ्स्तु हलादित्वाभावादेकाच्त्वाभावाच्च वचनम्। **सोसूच्यते इति**। णयन्ताद्यङि णिलोपे द्वित्वे 'गुणो यङ्लुकोः' इति अभ्यासगुणः। सूचेः षोपदेशत्वभ्रमं वारयति **अनेकाच्कत्वेनेति**। षोपदेशत्वे तु 'धात्वादेः–' इति षस्य सत्वे कृते आदेशसकारत्वादुत्तरखण्डस्य षत्वं स्यादिति भावः। लिटि सोसूच् य आमिति स्थिते **यस्य हलः**। यकारादकारस्य उच्चारणार्थत्वभ्रमं वारयति **संघातग्रहणमिति**। यकाराकारसमुदायस्येत्यर्थः। हल इति पञ्चमी। 'आर्धधातुके' इत्यधिकृतम्। 'अतो लोपः' इत्यस्मात् लोप इत्यनुवर्तते, तदाह **हलः परस्येत्यादिना**। ननु 'अलोऽन्त्यस्य' इति यकारादकारस्य लोपः स्यादित्यत आह **आदेः परस्येति**। 'अलोऽन्त्यस्य' इत्यस्यायमपवाद इति भावः। **अतो लोप इति**। यकाराकारसंघाते यकारस्य लोपे सति परिशिष्टस्याकारस्य 'अतो लोपः' इत्यर्थः। ननु मास्तु संघातग्रहणम्। यकारस्यैवात्र लोपो विधीयताम्। अतो लोपे सति इष्टसिद्धिरिति चेत्, न–ईर्ष्य्धातोस्तृचि इति ईर्ष्यितेत्यत्र यकारलोपनिवृत्त्यर्थत्वादित्यलम्। अटधातोः यङि 'अजादेर्द्वितीयस्य' इति ट्य इत्यस्य द्वित्वे हलादिशेषेण अभ्यासे यकारनिवृत्तौ अटट्यते इति स्थिते

यस्य हलः। संघातग्रहणमिति। तेन ईर्ष्यिता अहर्यीदित्यादौ यलोपो न। संघातग्रहणेन चार्थवद्ग्रहणपरिभाषोपस्थित्या पुत्रकाम्येत्यादौ नातिप्रसङ्गः। वर्णग्रहणे तूक्तपरिभाषाया अनुपस्थित्या स्यादेवात्र यलोप इति भावः। हलः किम्, लोलू-

स्याद्यङि यङ्लुकि च अटाट्यते। २६३३ यङि च। (७-४-३०) अर्तेः संयोगादेश्च ऋतो गुणः स्याद्यङि यङ्लुकि च। यकारपररेफस्य न द्वित्वनिषेधः, अरार्यते इति भाष्योदाहरणात्। अरारिता। अशाशिता। ऊर्णोनूयते। बेभिद्यते।

दीर्घोऽकितः। **अभ्यासस्येति।** 'अत्र लोपोऽभ्यासस्य' इत्यतस्तदनुवृत्तेरिति भावः। **यङि यङ्लुकि चेति।** 'गुणो यङ्लुकोः' इत्यतस्तदनुवृत्तेरिति भावः। अकित इत्यस्य तु यंयम्यते इत्यादौ प्रयोजनं वक्ष्यते। ऋधातोर्यङि कृते ङित्त्वाद्गुणनिषेधे प्राप्ते **यङि च।** 'गुणोऽर्तिसंयोगाद्योः' इति सूत्रमनुवर्तते। 'रीङ् ऋतः' इत्यस्माद् ऋत इति च, तदाह **अर्तेरित्यादि।** तथा च ऋ य इति स्थिते ऋकारस्य गुणे अकारे रपरत्वे अर् य इति स्थिते 'न न्द्राः–' इति रेफस्य द्वित्वनिषेधे य इत्यस्य द्वित्वे 'दीर्घोऽकितः' इत्यभ्यासदीर्घे अर्यायते इति प्राप्ते आह **यकारपररेफस्येति।** **भाष्योदाहरणादिति।** 'धातोरेकाचः–' इति सूत्रे इति शेषः। **अरारितेति।** 'यस्य हलः' इति यकारलोपः। **अशाशितेति।** अशधातोर्यङि श्य इत्यस्य द्वित्वे हलादिशेषेण अभ्यासे यकारनिवृत्तौ 'दीर्घोऽकितः' इति दीर्घे 'यस्य हलः' इति यकारलोपः। **ऊर्णोनूयते इति।** ऊर्णु य इति स्थिते 'न न्द्रा–' इति नु इत्यस्य द्वित्वे हलादिशेषे अभ्यासगुणे 'अकृत्–' इति

यिता, पोपूयिता। **दीर्घोऽकितः।** अकितः किम्, यंयम्यते, रंरम्यते। ननु दीर्घश्रुत्योपस्थितेनाचा 'अत्र लोपोऽभ्यासस्य' इत्यतोऽनुवृत्तमभ्यासस्येत्येतद्विशिष्येत। ततश्चाजन्ताभ्यासस्य दीर्घो भवतीत्यर्थात् पापच्यत इत्यादावेव दीर्घो भवेन्न तु यंयम्यते जङ्गनीतीत्यादौ। तत्र हि परत्वान्नुकि कृतेऽभ्यासस्याजन्तत्वाभावाद्दीर्घस्य प्रसक्तिरेव नास्तीति किमनेनाकित इत्यनेन। न चाभ्यासावयवस्याचो दीर्घ इति वैयधिकरण्यान्वये स्वीकृतेऽकिद्ग्रहणं प्रयोजनवदिति वाच्यम्, संभवति सामानाधिकरण्ये वैयधिकरण्यस्यान्याय्यत्वात्, येन नाप्राप्तिन्यायेन नुको दीर्घापवादत्वस्वीकाराच्च। तस्मादकित इति व्यर्थमिति चेत्। अत्राहुः—डोढौक्यते इत्यत्राभ्यासह्रस्वं बाधित्वा परत्वाद् 'दीर्घोऽकितः' इति दीर्घे कृते डौढौक्यत इति स्यात्। तस्माद् अभ्यासविकारेषु उत्सर्गविधीन् बाधका न बाधन्त इति ज्ञापनायाकित इति ग्रहणं कर्तव्यमिति। तथा चोक्तज्ञापकनिर्वाहाय 'दीर्घोऽकितः' इत्यत्राभ्यासस्याच इति वैयधिकरण्यपक्षस्याश्रयणाद् यंयम्यत इत्यादौ दीर्घप्राप्तेव नुकि कृतेऽपि दीर्घः स्यात्, तद्वारणार्थमकित इत्यावश्यकमिति दिक्। **अटाट्यत इति।** इह ट्यशब्दस्य द्वित्वम्। **यङि च।** इह 'गुणोऽर्तिसंयोगाद्योः' इत्येतत्सर्वमप्यनुवर्तते। **यकारपररेफस्येति।** यदि भाष्योदाहरणं सामान्यापेक्षं ज्ञापकं स्यात्तदाऽर्यमाख्यद् आर्यदि-

अल्लोपस्य स्थानिवत्त्वान्नोपधागुणः, बेभिदिता । २६३४ **नित्यं कौटिल्ये गतौ ।** (३-१-२३) गत्यर्थात्कौटिल्य एव यङ् स्यान्न तु क्रियासमभिहारे । कुटिलं व्रजति वाव्रज्यते । २६३५ **लुपसदचरजपजभदहदशगृभ्यो भावगर्हायाम् ।** (३-१-२४) एभ्यो धात्वर्थगर्हायामेव यङ् स्यात् । गर्हितं लुम्पति लोलुप्यते । सासद्यते । २६३६ **चरफलोश्च ।** (७-४-८७) अनयोरभ्यासस्यातो नुक् स्याद्यङ्यङ्लुकोः । नुक् इत्यनेनानुस्वारो लक्ष्यते । 'स च पदान्तवद्वाच्यः' (वा ४६६१) 'वा पदान्तस्य' (सू १२२) इति यथा स्यात् । २६३७ **उत्परस्यातः ।** (७-४-८८) चरफलोरभ्यासात्परस्यात उत्स्याद्यङ्-

---

दीर्घः । **बेभिद्यते इति ।** भिद् य इति स्थिते भिद् इत्यस्य द्वित्वे हलादिशेषे अभ्यासगुणः । ननु बेभिद्य इति यङन्ताल्लुटि तासि इटि यलोपे अतो लोपे बेभिदितेत्यत्र तासि परे लघूपधगुणः स्यादित्यत आह **अल्लोपस्य स्थानिवत्त्वादिति ।** **नित्यं कौटल्ये गतौ ।** नित्यशब्द एवार्थे । कौटिल्ये इत्यस्योपरि द्रष्टव्यः । 'धातोरेकाचः–' इत्यतो यङित्यनुवर्तते, तदाह **गत्यर्थात्कौटिल्य एवेति ।** गत्यर्थवृत्तेर्धातोः कौटिल्ये द्योत्य एव यङित्यर्थः । एवशब्दव्यवच्छेद्यमाह **न तु क्रियासमभिहारे इति ।** शब्देन्दुशेखरे तु गत्यर्थेभ्यः क्रियासमभिहारे यङस्त्येवेति प्रपञ्चितम् । **लुपसद ।** लुप, सद, चर जप, जभ, दह, दश, गृ एषां द्वन्द्वः । यङित्यनुवर्तते । भावो धात्वर्थः, तद्गता गर्हा भावगर्हा । नित्यमित्यनुवृत्तम् एवकारार्थकम्, तदाह **एभ्य इत्यादि ।** **चरफलोश्च ।** 'अत्र लोपः–' इत्यस्मादभ्यासस्येत्यनुवर्तते । 'नुगतोऽनुनासिकान्तस्य' इत्यस्माद् अतो नुगिति 'गुणो यङ्लुकोः' इत्यस्माद् यङ्लुकोरिति च, तदाह **अनयोरित्यादि ।** नुकि ककार इत्, उकार उच्चारणार्थः । **लक्ष्यते इति ।** 'नुगतोऽनुनासिकान्तस्य' इति पूर्वसूत्रे यंयम्यते रंरम्यते, इत्यादौ अनुस्वारश्रवणार्थं नुगित्यनुस्वारोपलक्षणमाश्रयणीयम् । अन्यथा झल्परत्वाभावाद् 'नश्च–' इत्यनुस्वारासंभवान्नकार एव श्रूयेतेत्युक्तं भाष्ये । तस्यैवेहानुवृत्तेरत्राप्यनुस्वारोपलक्षणार्थत्वमिति भावः । **पदान्तवदिति ।** 'नुगतोऽनुनासिकान्तस्य' इति पूर्वसूत्रस्थमिदं वार्तिकमत्राप्यनुवर्तते इति भावः । **उत्परस्यातः ।** 'अत्र लोपः–' इत्यस्मादभ्यासस्येत्यनुवृत्तं परशब्दयोगात् पञ्चम्या विपरिणम्यते । 'गुणो

त्यादि सिध्यति । **नित्यं कौटिल्ये ।** नित्यंशब्दोऽवधारणार्थक इत्याह **कौटिल्य एवेति ।** तत्कौण्डिन्यन्यायेनैवेष्टे सिद्धे नित्यग्रहणं तस्य न्यायस्यानित्यत्वज्ञापनार्थम् । तेन 'मतिबुद्धिपूजार्थेभ्यश्च' इति वर्तमाने क्तेनाबाधनात्पूजार्थेभ्यो भूते क्तः सिध्यति । ततश्च 'क्तस्य च वर्तमाने' इति षष्ठी न प्रवर्तत इति 'पूजितो यः सुरासुरैः' इति

यङ्लुकोः। 'हलि च' (सू ३५४) इति दीर्घः। चञ्चूर्यते, चंचूर्यते। पम्फुल्यते, पंफुल्यते। २६३८ जपजभदहदशभञ्जपशां च। (७-४-८६) एषामभ्यासस्य नुक् स्याद्यङ्यङ्लुकोः। गर्हितं जपति जञ्जप्यते इत्यादि। २६३९ ग्रो यङि। (८-२-२०) गिरते रेफस्य लत्वं स्याद्यङि। गर्हितं गिलति जेगिल्यते। 'घुमास्था-' (सू २४६२) इतीत्वम्, गुणः, देदीयते। पेपीयते। सेषीयते। 'विभाषा श्वेः' (सू २४१०), शोशूयते। शेश्वीयते। 'यङि च' (सू २६३३), सास्मर्यते। 'रीङृतः' (सू १२३४), चेक्रीयते। सुट्, सञ्चेस्क्रीयते। २६४० सिचो यङि। (८-३-११२) सिचः सस्य षो

यङ्लुकोः' इत्यतो यङ्लुकोरिति 'चरफलोः-' इति चानुवर्तते, तदाह **चरफलोरित्यादि**। **दीर्घ इति**। उकारस्येति शेषः। **चञ्चूर्यते इति**। गर्हितं चरतीत्यर्थः। यङि द्वित्वे हलादिशेषे अभ्यासाकारादुपरि अनुस्वारागमे 'वा पदान्तस्य' इति तस्य परसवर्णे ञकारे उत्तरखण्डे अकारस्य उत्वे तस्य दीर्घः। परसवर्णाभावपक्षे त्वाह **चंचूर्यते इति**। **पम्फुल्यते इति**। अत्र अनुस्वारस्य मकारः परसवर्णः। **जपजभ**। 'चरफलोश्च' इत्यत्र यदनुवृत्तं तत्सर्वमिहाप्यनुवर्तते, तदाह **एषामिति**। **इत्यादीति**। जञ्जभ्यते। दन्दह्यते। दन्दश्यते। बम्भज्यते। पम्पश्यते। पसधातुर्दन्त्यान्तः सौत्रो गत्यर्थ इति माधवः। तालव्यान्त इति काशिका। **ग्रो यङि**। गॄ इत्यस्य ग्र इति षष्ठ्येकवचनम्। 'कृपो रो लः' इत्यतो रो ल इत्यनुवर्तते, तदाह **गिरतेरित्यादि**। दा, पा, सा, एभ्यो यङि विशेषमाह **घुमास्थेत्यादि**। **शोशूयते इति**। श्विधातोर्यङि 'संप्रसारणं तदाश्रयं च कार्यं बलवत्' इति वचनात् संप्रसारणे पूर्वरूपे शु इत्यस्य द्वित्वम्। 'अकृत्सार्वधातुकयोः-' इति दीर्घः। **सास्मर्यते इति**। स्मृ य इति स्थिते संयोगादित्वाद् 'यङि च' इति परत्वाद्गुणे रपरत्वे द्वित्वे 'दीर्घोऽकितः' इत्यभ्यासदीर्घः। **चेक्रीयते इति**। कृ य इति स्थिते परत्वाद् ऋकारस्य रीङादेशे क्री इत्यस्य द्वित्वे अभ्यासगुणः। **सुडिति**। 'संपरिभ्यां करोतौ भूषणे' 'समवाये च' इत्यनेनेति शेषः। **सिचो यङि**।

तृतीया साधुरेव। **इत्यादीति**। जंजभ्यते। दंदश्यते। दंदह्यते। बंभज्यते। पसधातुर्दन्त्यान्तः सौत्रो गत्यर्थ इति स्पश बाधनस्पर्शनयोरित्यत्र माधवः। पंपस्यते। काशिकायां तु तालव्यान्तः क्वचिद् दृश्यते। एवं जञ्जपीति। जञ्जभीति। दन्दहीतीत्यादि यङ्लुकि उदाहर्तव्यम्। **ग्रो यङि**। 'कृपो रो लः' इत्यतो रो ल इति वर्तते, तदाह **रेफस्य लत्वमिति**। **चेक्रीयते इति**। परत्वाद्रीङि कृते द्विर्वचनम्। **संचेस्क्रीयते इति**। रीङि द्वित्वे च सुट्। न च संकृ इत्यस्यामवस्थायां द्वित्वाद्

न स्याद्यङि । निसेसिच्यते । २६४१ न कवतेर्यङि । (७-४-६३) कवते-रभ्यासस्य चुत्वं न स्याद्यङि । कोकूयते । कौतिकुवत्योस्तु चोकूयते । २६४२

'सहेः साडः सः' इत्यतः स इति षष्ठ्यन्तमनुवर्तते । 'मूर्धन्यः' इत्यधिकृतम् 'न रपरसृपि–' इत्यतो नेत्यनुवर्तते, तदाह **सिच इति । निसेसिच्यते । इति** । 'उपसर्गात्सुनोति–' इति 'स्थादिष्वभ्यासेन–' इति च षत्वमनेन निषिध्यते । **न कवतेर्यङि** । 'अत्र लोपः–' इत्यतः अभ्यासस्येति 'कुहोश्चुः' इत्यतः चुरिति चानुवर्तते इति मत्वाह **कवतेरभ्यासस्येति** । ननु कोर्यङि इत्येव सिद्धे श्तिपा निर्देशो व्यर्थ इत्यत आह **कौतिकुवत्योस्त्विति** । शपा निर्देशार्थं कवतिग्रहणम् । तेन 'कु शब्दे' इति लुग्विकरणस्य 'कुङ् शब्दे' इति शविकरणस्य च ग्रहणं न लभ्यत इति भावः । न च कोरित्युक्तेऽपि दीर्घान्तस्य

परत्वात्सुटि कृते संयोगादित्वेन रीङ्प्रवृत्तेः प्राग् गुणः स्यादिति वाच्यम्, अडभ्यासव्यवायेऽपीत्यस्यारम्भे अडभ्यासयोः कृतयोरेव सुड् न तु ततः प्रागिति सिद्धान्तात् । एतेन सुटो बहिरङ्गत्वात्र संयोगादित्वेन गुण इति केषांचित्समाधानं परास्तम् । अभ्यासात्परस्य सुटि कृते साभ्यासस्याङ्गस्य संयोगादित्वमृदन्तत्वं च नास्तीति गुणप्राप्तेरभावात् । ननु 'अडभ्यासव्यवायेऽपि सुट् कात्पूर्वः' इति वार्तिकप्रत्याख्यानाय 'पूर्वं धातुरुपसर्गेण युज्यते' इति पक्षं स्वीकृत्य भाष्यकृता संचस्करतुरित्यादावन्तरङ्गत्वात्सुटि ससुट्कस्यैव द्वित्वाभ्युपगमात् संचेस्क्रियते इति न सिध्येत् । तत्र हि सुटि कृते रीङं बाधित्वा परत्वाद् 'यङि च' इति गुणे संचस्कर्यत इत्यनिष्टरूपप्रसङ्गात् । यदि तु इष्टानुरोधेन पूर्वं धातुः साधनेन युज्यते पश्चादुपसर्गेणेति मताश्रयणेन रीङादेशं द्वित्वं च कृत्वा पश्चात्सुटि इष्टं रूपं सिध्यतीत्युच्यते, तर्हि 'अडभ्यासव्यवायेऽपि' इति वचनं स्वीकर्तव्यमेव स्यादिति चेत् । अत्राहुः—अडभ्यासेत्यादिवार्तिकं विनापि संचस्करतुरित्यादिरूपसिद्ध्यर्थं भाष्यकृता 'पूर्वं धातुरुपसर्गेण युज्यते' इति पक्ष आश्रितः । संचेस्कीयते समचेस्क्रियत इत्यादिसिद्धिस्तु वार्तिकायत्तैवेति । **सिचो यङि** । अभ्यासस्कारस्य 'उपसर्गात्सुनोति–' इति, ततः परस्य तु 'स्थादिष्वभ्यासेन च–' इति षत्वे प्राप्ते निषेधोऽयम् । यङि किम्, अभिषिषिक्षति । **न कवतेर्यङि** । इह कोरित्येव वाच्ये कवतेरिति शपा निर्देशात्कुङ् शब्द इति भ्वादिरेव गृह्यते न तु कु शब्द इति अदादिः, कुङ् शब्द इति तुदादिश्चेत्याशयेनाह **कौतिकुवत्योस्त्विति** । ननु कोरित्युक्तेऽपि कूङः प्रसङ्गो नास्ति दीर्घान्तत्वाल्लुग्विकरणपरिभाषया च कौतेरपि प्रसङ्गो नास्तीति चेत् । अत्राहुः—कोरित्युक्ते तु निरनुबन्धपरिभाषाया अपि जागरूकत्वादुभयोर्ग्रहणं स्यादिति कौतिव्यावृत्त्यर्थं शपा

नीग्वञ्चुस्रंसुध्वंसुभ्रंसुकसपतपदस्कन्दाम्। (७-४-८४) एषामभ्यासस्य नीगागमः स्याद्यङ्लुकोः। अकित इत्युक्तेर्न दीर्घः। नलोपः। वनीवच्यते। सनीस्रस्यते इत्यादि। २६४३ **नुगतोऽनुनासिकान्तस्य।** (७-४-८५) अनुनासिकान्तस्याङ्गस्य योऽभ्यासोऽदन्तस्तस्य नुक् स्यात्। नुका अनुस्वारो लक्ष्यते इत्युक्तम्। यँय्यम्यते, यंयम्यते। तपरत्वसामर्थ्याद् भूतपूर्वदीर्घस्यापि न। भाम क्रोधे, बाभाम्यते। 'ये विभाषा' (सू २३१९) जाजायते, जञ्जन्यते। 'हन्तेर्हिंसायां यङि घ्नीभावो वाच्यः, (वा ४६२१)। जेघ्नीयते। हिंसायां किम्—

शविकरणस्य न ग्रहणप्रसक्तिरिति शङ्क्यम्, तुदादौ 'कुङ् शब्दे' इति ह्रस्वान्तपाठस्य न्यायसंमतत्वात्। वस्तुतस्तु न्यायसंमते तौदादिकेऽस्याप्रवृत्तिरेव फलम्। 'लुग्विकरणालुग्विकरणयोरलुग्विकरणस्यैव ग्रहणम्' इति लुग्विकरणस्य ग्रहणनिवृत्तिरिति बोध्यम्। **नीग्वञ्चु।** **अभ्यासस्येति।** 'अत्र लोपः—' इत्यतस्तदनुवृत्तेरिति भावः। **यङ्लुकोरिति।** यङि यङ्लुकि चेत्यर्थः। **न दीर्घ इति।** नीगागमात् प्राक् प्राप्तोऽभ्यासदीर्घो नेत्यर्थः। भविष्यदपि कित्त्वं दीर्घप्रतिबन्धकमिति भावः। **नलोप इति।** 'अनिदिताम्—' इत्यनेन नकारस्य लोप इत्यर्थः। **इत्यादीति।** सनीस्रस्यते, दनीध्वस्यते, बनीभ्रस्यते, चनीकस्यते, पनीपत्यते, पनीपद्यते, चनीस्कद्यते। **नुगतोऽनु।** अङ्गस्येत्यधिकृतम्। 'अत्र लोपः—' इत्यतः अभ्यासस्येत्यनुवर्तते। 'गुणो यङ्लुकोः' इत्यतो यङ्लुकोरिति च, तदाह **अनुनासिकान्तस्येत्यादि।** ननु यंयम्यते इत्यत्र नुको नकारस्य अपदान्तत्वादझल्परकत्वाच्च कथं 'नश्च' इत्यनुस्वार इत्यत आह **नुकेति।** नन्वभ्यासे ह्रस्वविधानाद्दीर्घस्याभावाद् नुग्विधावत इति तपरकरणं व्यर्थमित्यत आह **तपरत्वसामर्थ्यादिति।** स्वाभाविक एव यो ह्रस्वोऽकारः, तस्यैव ग्रहणम्, नतु दीर्घादेशभूतस्य ह्रस्वाकारस्येत्येतदर्थं तपरकरणमिति भावः। **बाभाम्यते इति।** अत्र आकारस्थानिकस्य ह्रस्वविधिसंपन्नस्य अकारस्य न नुगिति भावः। जनधातोर्यङि नकारस्य आत्त्वविकल्पं स्मारयति **ये विभाषेति।** **घ्नीभाव इति।** यद्यपीह ह्नीभावविधावपि 'अभ्यासाच्च' इति कुत्वे हकारस्य घकारः सिध्यति, तथापि प्रयत्नलाघवाभावात् प्रक्रियालाघवाच्च घ्नीति घकारोच्चारणमिति भावः। **जेघ्नीयते इति।** पुनः पुनरतिशयेन

निर्देशः कर्तव्यः। कृते च तस्मिन्कुवतिमपि व्यावर्तयतीत्यत्र तात्पर्यमिति कुङ इत्येवात्र सुवचम्। **इत्यादीति।** दनीध्वस्यते। बनीभ्रस्यते। चनीकस्यते। पनीपत्यते। पनीपद्यते। चनीस्कद्यते। एवं वनीवञ्चीति। सनीस्रंसीति। दनीध्वंसीतीत्यादि यङ्लुक्युदाहर्तव्यम्। **घ्नीभाव इति।** ह्नीभावे कृतेऽपि 'अभ्यासाच्च' इति कुत्वेन जेघ्नी-

जङ्गम्यते । २६४४ **रीगृदुपधस्य च** । (७-४-९०) ऋदुपधस्य धातोरभ्यासस्य रीगागमः स्याद्यङ्यङ्लुकोः । वरीवृत्यते । क्षुभ्नादित्वान्न णः । नरीनृत्यते । जरीगृह्यते । उभयत्र लत्वम्, चलीक्लृप्यते । 'रीगृत्वत इति वक्तव्यम्' (वा ४४६२) । परीपृच्छ्यते । वरीवृश्च्यते । २६४५ **स्वापिस्यमिव्येञां याङि** । (६-१-१९) संप्रसारणं स्याद्यङि । सोषुप्यते । सेसिम्यते । वेवीयते ।

वा हिनस्तीत्यर्थः । अत्र यङीति विषयसप्तमी । यङि विवक्षिते सतीति लभ्यते । तेन द्वित्वस्य परत्वेऽपि प्रागेव घ्नीभाव इति बोध्यम् । **जङ्गम्यते इति** । गर्हितं गच्छतीत्यर्थः । **रीगृदुपधस्य च** । **अभ्यासस्येति** । 'अत्र लोपः-' इत्यतः तदनुवृत्तेरिति भावः । **यङ्लुकोरिति** । 'गुणो यङ्लुकोः' इत्यतस्तदनुवृत्तेरिति भावः । **वरीवृत्यते इति** । 'वृतु वर्तने' अस्माद्यङि द्वित्वे उरदत्वे हलादिशेषे अभ्यासस्य रीक् । नृतेर्यङि नरीनृत्यते इत्यत्र णत्वमाशङ्क्याह **क्षुभ्नादित्वान्न ण इति** । **जरीगृह्यते इति** । 'ग्रह उपदाने' अस्माद्यङि 'ग्रहिज्य –' इति संप्रसारणे द्वित्वे उरदत्वे हलादिशेषे अभ्यासस्य रीक् । **उभयत्रेति** । कृप्धातोः यङि द्वित्वे उरदत्वे रपरत्वे हलादिशेषे रीक् चरीकृप्यते इत्यत्र 'कृपो रो लः' इत्यभ्यासे रेफस्य लकारः, उत्तरखण्डे ऋकारस्यावयवो यो रेफः तस्य लकारसदृश इत्यर्थः । ननु व्रश्चधातोर्यङि वरीवृश्च्यते इत्यत्र कथमभ्यासस्य रीक् । धातोः शकारोपधत्वेन ऋदुपधत्वाभावादित्यत आह **रीगृत्वत इति** । 'रीगृदुपधस्य–' इत्यत्र ऋदुपधस्येत्यपनीय ऋत्वत इति वक्तव्यमित्यर्थः । ऋत् अस्यास्तीति ऋत्वत् । 'तसौ मत्वर्थे' इति भत्वात् पदत्वाभावान्न जश्त्वम् । **परीपृच्छ्यते इति** । प्रच्छधातोर्यङि 'ग्रहिज्या-' इति रेफस्य संप्रसारणमृकारः । पूर्वरूपं द्वित्वं रपरत्वं हलादिशेषः रीक् । **वरीवृश्च्यते इति** । व्रश्चधातोर्यङि संप्रसारणे द्वित्वादि पूर्ववत् । **स्वापिस्यमि** । संप्रसारणं स्यादिति शेषपूरणम् । 'ष्यङः संप्रसारणम्' इत्यतस्तदनुवृत्तेरिति भावः । **सोषुप्यते इति** । स्वप्धातोर्यङि वकारस्य संप्रसारणे उकारे पूर्वरूपे द्वित्वे अभ्यासगुणः । उत्तरखण्डे सस्य षत्वम् । **सेसिम्यते इति** । स्यमुधातोर्यङि यकारस्य

यत इति सिध्यति, तथापि प्रक्रियालाघवाय घ्नी इत्युक्तमिति मनोरमा । अन्ये तु 'सेहिः' 'मेनिः' इति इकारोच्चारणसामर्थ्याद्यथा 'एरुः' इत्युत्वं न भवति तथा ह्नीभावे हि कृते 'अभ्यासाच्च' इति कुत्वं न स्यादित्याशयेन घ्नीभावः कृत इत्याहुः । अत्र च दिग्यादेशेनेव घ्नीभावेन द्वित्वं न बाध्यते पुनःप्रसङ्गविज्ञानादिति केचित् । वस्तुतस्तु यङन्तावयवस्य द्वितीयाजवधिकस्य द्वित्वं घ्नीभावस्तु प्रकृतिमात्रस्येति विषयभेदाद् द्वित्वं निर्बाधमेव । **रीगृदुपधस्य च** । ऋदिति किम्, नेकीर्त्यते । णिज-

२६४६ न वशः । (६-१-२०) वावश्यते । **२६४७ चायः की ।** (६-१-२१) चेकीयते । **२६४८ ई घ्राध्मोः ।** (७-४-३१) जेघ्रीयते । देध्मीयते । **२६४९ अयङ् यि क्ङिति ।** (७-४-२२) शीङोऽयङादेशः स्यादादौ क्ङिति परे । शाशय्यते । अभ्यासस्य ह्रस्वः । ततो गुणः । डोढौक्यते । तोत्रौक्यते ।

॥ इति तिङन्ते यङ्प्रकरणम् ॥

संप्रसारणे पूर्वरूपे द्वित्वादि । अषोपदेशत्वान्न षः । **वेवीयते इति ।** व्येञो यङि यकारस्य संप्रसारणे पूर्वरूपे द्वित्वादि । 'हलः' इति वा 'अकृत्सार्वधातुकयोः–' इति वा दीर्घः । अथ वशधातोर्यङि वावश्यते इत्यत्र 'ग्रहिज्या–' इति संप्रसारणे प्राप्ते तन्निषेधं स्मारयति **न वशः ।** वशधातोः छान्दसत्वं प्रायिकमिति प्रागेवोक्तम् । **चायः की ।** यङीति शेषः । 'स्वपिस्यमिव्येञां यङि' इत्यतस्तदनुवृत्तेरिति भावः । **चेकीयते इति ।** 'चायृ पूजानिशामनयोः' । अस्माद्यङि प्रकृतेः कीभावे द्वित्वादि । **ई घ्राध्मोः ।** घ्रा ध्मा अनयोः द्वन्द्वात् षष्ठीद्विवचनम् । यङीति शेषः, 'यङि च' इत्यतस्तदनुवृत्तेः । **जेघ्रीयते । देध्मीयते इति ।** ईत्वे कृते द्वित्वादि । ह्रस्वस्य इकारस्य विधावपि 'अकृत्सार्वधातुकयोः–' इति दीर्घसिद्धेः दीर्घोच्चारणम् 'अस्य च्वौ' इत्युत्तरार्थम् । **अयङ् यि क्ङिति ।** यि इति सप्तमी । क् ङ् एतौ इतौ यस्येति विग्रहः । **शीङ इति ।** 'शीङः सार्वधातुके गुणः' इत्यतस्तदनुवृत्तेरिति भावः । अयङि ङकार इत्, यकारादकार उच्चारणार्थः, ङित्वादन्तादेशः । **शाशय्यते इति ।** शी य इति स्थिते ईकारस्य अय्, ततो द्वित्वे अभ्यासदीर्घः । ढौकृधातोर्यङि विशेषमाह **अभ्यासस्य ह्रस्व इति ।** द्वित्वे अभ्यासह्रस्वे उकारे तस्य 'गुणो यङ्लुकोः' इति गुण इत्यर्थः । **तोत्रौक्यते इति ।** त्रौके रूपम् ।

इति श्रीवासुदेवदीक्षितविदुषा विरचितायां सिद्धान्तकौमुदीव्याख्यायां
बालमनोरमाख्यायां यङन्तनिरूपणं समाप्तम् ।

भावपक्षे एकाच्त्वाद्यङ् । **स्वपिस्यमि ।** यङि किम्, स्वप्नक् । **सेसिम्यते इति ।** स्यमु शब्दे दन्त्याजन्तसादित्वाभावेनाषोपदेशत्वान्न षः । **वेवीयते इति ।** 'हलः' इति 'अकृत्सार्व–' इति वा दीर्घः । **चायः की ।** यङि परे चायः की स्यात् । दीर्घोच्चारणं यङ्लुगर्थम् । अत एव 'न लुमता–' इति निषेधोऽपि न प्रवर्तत इति यङ्लुक्यपि चायः की स्यादेव । चेकीतः । **ई घ्राध्मोः ।** दीर्घोच्चारणं प्राग्वत् । जेघ्रीतः । 'अस्य च्वौ' इत्याद्यर्थं दीर्घग्रहणमिति तु सुवचम् । **शाशय्यते इति ।** परत्वादन्तरङ्गत्वाच्चायङादेशे कृते द्वित्वम् ।

इति तत्त्वबोधिन्यां यङन्तप्रक्रियाप्रकरणम् ।

अथ तिङन्ते यङ्लुक्प्रकरणम् ॥ ५६ ॥

२६५० **यङोऽचि च** । (२-४-७४) यङोऽच्प्रत्यये लुक् स्यात्, चकारात्तं विनापि बहुलं लुक्स्यात् । अनैमित्तिकोऽयमन्तरङ्गत्वादादौ भवति । ततः प्रत्ययलक्षणेन यङन्तत्वाद् द्वित्वम् । अभ्यासकार्यम् । धातुत्वाल्लडादयः ।

अथ यङ्लुक्प्रक्रिया निरूप्यन्ते । **यङोऽचि च** । अचि इति प्रत्ययग्रहणम्, न तु प्रत्याहारः, यङा साहचर्यात् । 'एयच्क्षत्रियार्ष–' इत्यतो लुगित्यनुवर्तते, तदाह **यङोऽच्प्रत्यये लुगिति** । **चकारात्तं विनापीति** । अच्प्रत्ययाभावेऽपीत्यर्थः । **बहुलमिति** । चकाराद् 'बहुलं छन्दसि' इति पूर्वसूत्राद्बहुलग्रहणमप्यनुकृष्यते इति भावः । एवं च अच्प्रत्यये तदभावेऽपि यङो बहुलं लुगिति फलितम् । तेन लूञो यङन्तादचि यङो लुगभावपक्षे अतो लोपे लोलूय इति रूपम् । लुकि तु लोलुव इति रूपं सिध्यति । तथा अच्प्रत्ययाभावेऽपि बोभूयते बोभवीति इत्यादौ यङो लुग्विकल्पः सिध्यतीति बोध्यम् । **अनैमित्तिकोऽयमिति** । अच्प्रत्ययादन्यत्र बोभवीतीत्यादौ यङ्लुग् अनैमित्तिकः । ततश्च परस्मादपि द्वित्वादिकार्यात्प्रागेव अन्तरङ्गत्वाद्यङो लुग् भवति, ततो द्वित्वादीति वस्तुतः स्थितिकथनमिदम् । अच्प्रत्यये विधीयमानस्तु यङ्लुग् नैमित्तिकत्वाद्बहिरङ्ग एव । ततश्च परत्वान्नित्यत्वाच्च आदौ द्वित्वे कृते यङो लुकि अच्प्रत्ययमाश्रित्य प्राप्तो गुणः 'न धातुलोप आर्धधातुके' इति निषेधान्न भवति, अच्प्रत्ययस्य यङ्लोपनिमित्तत्वादिति बोध्यम् । नन्वेवं सति यङ्लुकि 'सन्यङोः' इति द्वित्वं न स्यात् । यङो लुका लुप्तत्वेन प्रत्ययलक्षणाभावादित्यत आह **तत इति** । यङो लुगनन्तरमित्यर्थः । 'न लुमता–' इत्यनेन हि लुमता शब्देन लुप्ते तन्निमित्तमङ्गकार्यं निषिध्यते । द्वित्वादिकं तु यङन्तस्य कार्यम्, न तु यङ्निमित्तकम्, यङि परतस्तद्विध्यभावादिति भावः । **द्वित्वमिति** । न च 'एकाचः–' विधीयमानं द्वित्वं कथमिह यङ्लुकि स्यात्, 'श्तिपा शपा–'

यङोऽचि च । यङा साहचर्यादचीति प्रत्ययो गृह्यते नतु प्रत्याहारः । 'एयच्क्षत्रियार्ष–' इत्यतोऽत्र लुगनुवर्तते, तदाह **अच्प्रत्यये लुक् स्यादिति** । चकारेण 'बहुलं छन्दसि' इत्यतो बहुलमित्यनुकृष्यत इत्याह **बहुलं लुक् स्यादिति** । केचित्तु छन्दसीत्यनुकर्षन्ति, तेषामपि मते क्वचिद्भाषायां यङ्लुग्भवत्येव । 'भूसुवोः–' इति गुणनिषेधे सिद्धे बोभूत्विति छन्दसि निपातनाज्ज्ञापकात् । एतच्च मूले एव स्फुटीभविष्यति । **अनैमित्तिकोऽयमिति** । अच्प्रत्यये विधीयमानो यङ्लुक् तु तन्निमित्त एव । तेन लोलुवः पोपुव इत्यादौ 'न धातुलोप–' इति निषेधः सिध्यति । **यङन्तत्वादिति** । 'सन्यङोः' इति षष्ठी, न तु सप्तमी । अन्यथा यङो लुका लुप्त-

'शेषात्कर्तरि–' (सू २१५९) इति परस्मैपदम् । 'अनुदात्तङितः–' (सू २१५७) इति तु न । ङित्त्वस्य प्रत्ययाप्रत्ययसाधारणत्वेन प्रत्ययलक्षणाप्रवृत्तेः । यत्र हि 'प्रत्ययस्यासाधारणं रूपमाश्रीयते तत्रैव तत्' । अत एव सुदृषत्प्रासाद इत्यत्र

इति निषेधादिति वाच्यम्, 'गुणो यङ्लुकोः' इत्याद्यभ्यासकार्यविधिबलेन द्वित्वनिषेधाभावज्ञापनादिति भावः । **अभ्यासकार्यमिति** । गुणादीति भावः । **धातुत्वादिति** । यङो लुकि सत्यपि प्रत्ययलक्षणमाश्रित्य यङन्तत्वात् 'सनाद्यन्ताः–' इति धातुत्वम् । न च 'न लुमता–' इति निषेधः शङ्क्यः, धातुसंज्ञाया यङन्तधर्मत्वेन यङि परतोऽङ्गकार्यत्वाभावादिति भावः । यङो ङित्त्वात्तदन्तादात्मनेपदमाशङ्क्याह **शेषादिति** । ननु 'शेषात्कर्तरि–' इत्यत्र आत्मनेपदनिमित्तहीनो धातुः शेषः । यङन्तधातुस्तु न तथा, आत्मनेपदनिमित्तङकारानुबन्धसत्त्वादित्यत आह **अनुदात्तङित इति तु नेति** । कुत इत्यत आह **ङित्त्वस्येति** । तदेवोपपादयति **यत्र हीति** । यत्र प्रत्यये लुप्तेऽपि प्रत्ययमात्रवृत्तिधर्मपुरस्कारेण तमाश्रित्य कार्यप्रवृत्तिरिष्यते तत्रैव प्रत्ययलक्षणम् । यथा राजेत्यत्र । तत्र हि लुप्तं सुप्प्रत्ययं सुप्त्वात्मकप्रत्ययमात्रवृत्तिधर्मपुरस्कारेणाश्रित्य सुबन्ततया पदत्वाद् 'नलोपः–' इति नकारलोपप्रवृत्तिः । ङित्त्वं तु न प्रत्ययमात्रधर्मः, 'ऋतेरीयङ्' इत्यादिप्रत्ययेष्वप्रत्ययेष्वपि चित्रङादिषु सत्त्वात् । ततश्च यङि लुप्ते सति प्रत्ययलक्षणेन तमाश्रित्य तद्वृत्तिङित्त्वप्रयुक्तं कार्यमात्मनेपदं न शङ्कितुं शक्यमिति भावः । ननु यत्किञ्चिद्धर्मपुरस्कारेण प्रत्ययाश्रयकार्ये प्रत्ययलक्षणं कुतो नेत्यत आह **अत एवेति** । प्रत्ययमात्रवृत्तिधर्मपुर-

---

त्वेन प्रत्ययलक्षणाप्रवृत्तेर्द्वित्वं न स्यादिति भावः । न चाङ्गाधिकारविहितकार्यस्यैव 'न लुमता–' इति निषेधाद् द्वित्वमत्र स्यादेवेति सप्तमीपक्षोऽपि निर्दुष्ट इति वाच्यम्, 'न लुमता–' इत्यत्राङ्गाधिकारो न गृह्यते किं तु आङ्गमनाङ्गं वा प्रत्यये परतः पूर्वस्य विधीयमानं सर्वमिति सिद्धान्तात् । अन्यथा राजपुरुष इत्यादौ नलोपो न स्यात्, त्वदुक्तरीत्या प्रत्ययलक्षणप्रवृत्तौ भत्वेन पदत्वबाधात् । यद्यपि 'एकाचः–' इति विधीयमानं द्वित्वं 'श्तिपाशपा–' इत्यादिना निषिध्यते तथापि तत्स्थादेव । गुणो यङ्लुकोः', 'दमिकौ च लुकि' इत्याद्यभ्यासकार्यविधिभिर्द्वित्वानिषेधस्य ज्ञापनात् । **प्रत्ययाप्रत्ययेति** । प्रत्यये ङित्त्वं दृश्यते 'ऋतेरीयङ्' इत्यादिषु, अप्रत्ययेऽपि दृश्यते चित्रङादिषु । एवं च यङो लुकि प्रत्ययलक्षणेन यङाश्रितङित्त्वप्रयुक्तकार्यमात्मनेपदमत्र न शङ्क्यमिति भावः । ङित इत्यनुबन्धनिर्देशादिति परिहारस्त्वत्र नोक्तः, शीङादीनामिव भू इत्यादिधातूनामनुबन्धेनानिर्दिष्टत्वाद् । यङो ङकारस्य प्रत्ययानुबन्धत्वेन समुदायाननुबन्धत्वाद् यङन्तोऽपि धातुरनुबन्धेनानिर्दिष्ट इति बोध्यम् । **सुदृषदिति** ।

'अत्वसन्तस्य–' (सू ४२५) इति दीर्घो न । येऽपि स्पर्धशीङादयोऽनुदात्तङितस्तेभ्योऽपि न, 'अनुदात्तङितः–' (सू २१५७) इत्यनुबन्धनिर्देशात्, तत्र च 'श्तिपा शपा–' (प १३२) इति निषेधात्। अत एव श्यन्नादयो न, गणेन निर्देशात्। किं तु शबेव। 'चर्करीतं च' इत्यदादौ पाठाच्छपो लुक्। २६५१ यङो वा। (७-३-९४) यङन्तात्परस्य हलादेः पितः

स्कारेण प्रत्ययाश्रयकार्ये प्रत्ययलक्षणाश्रयणादेवेत्यर्थः। **दीर्घो नेति**। सु शोभनाः दृषदो यस्य स सुदृषत्प्रासाद इत्यत्र समासावयवत्वाल्लुप्तं जसं प्रत्ययलक्षणेनाश्रित्य प्राप्तः असन्तत्वलक्षणो दीर्घो न भवति। उणादीनामव्युत्पत्तिपक्षे व्युत्पत्तिपक्षे च अस्त्वस्य वेधा इत्यादावप्रत्यये प्रत्यये च सत्त्वेन प्रत्ययमात्रवृत्तित्वाभावेन तत्पुरस्कारेण दीर्घे क्रियमाणे प्रत्ययलक्षणासंभवादिति भावः। एतत्सर्वं प्रत्ययलक्षणसूत्रभाष्यकैयटादिषु स्पष्टम्। न च सुदृषत्प्रासाद इत्यत्र जसो लुका लुप्तत्वाद् 'न लुमता–' इति निषेधादेव दीर्घो न भविष्यतीति वाच्यम्, दीर्घस्यासन्तकार्यत्वेन जसि परे अङ्गकार्यत्वाभावादित्यलम्। ननु उक्तरीत्या प्रत्ययलक्षणाभावाद् लुप्तयङन्ताद् ङित्त्वप्रयुक्तमात्मनेपदं मास्तु। ये तावत् स्पर्धादयः अनुदात्तेतः, ये च शीङादयो ङितः पठिताः, तेभ्य आत्मनेपदं दुर्वारमित्यत आह **येऽपीति**। **तेभ्योऽपि नेति**। तेभ्यो यङ्लुकि नात्मनेपदमित्यर्थः। कुत इत्यत आह **अनुदात्तङित इत्यनुबन्धनिर्देशादिति**। नन्वनुबन्धनिर्देशेऽपि यङ्लुकि आत्मनेपदं कुतो न स्यादित्यत आह **तत्र च श्तिपेति**। न चानुबन्धनिर्देशादेव ङित्त्वप्रयुक्तमपि कार्यमात्मनेपदं यङ्लुकि न भविष्यति। अतः प्रत्ययासाधारणधर्माश्रयत्वे सत्येव प्रत्ययलक्षणमिति क्लेशानुभवो वृथेति वाच्यम्, यङो ङकारस्य प्रत्ययानुबन्धत्वेन यङन्तस्य धातोरनुबन्धेनानिर्देशादित्यलम्। **अत एवेति**। 'श्तिपा शपा–' इति निषेधादेव यङ्लुकि श्यन्नादयो विकरणा नेत्यर्थः। 'श्तिपा शपा–' इति निषेधमुपपादयति **गणेन निर्देशादिति**। 'दिवादिभ्यः श्यन्' 'रुधादिभ्यः श्नम्' इत्यादिगणनिर्देशादित्यर्थः। **किंतु शबेवेति**। 'कर्तरि शप्'

शोभना दृषदोऽस्मिन्निति बहुव्रीहौ वृषच्छन्दो जसन्तः। **दीर्घो नेति**। अस्तिति प्रत्ययोऽप्रत्ययश्चास्तीति प्रत्ययस्यासाधारणरूपानाश्रयणात्प्रत्ययलक्षणेनासन्तत्वाभावादिति भावः। **तेभ्योऽपीति**। ये त्वनुदात्तेतः प्रत्ययलक्षणं विनैव ङितश्च तेभ्योऽपीत्यर्थः। **अदादौ पाठादिति**। तथा च 'अदिप्रभृतिभ्यः शपः' इत्यनेन यङ्लुगन्तात्परस्य शपो लुगित्यर्थः। **यङो वा**। 'नाभ्यस्तस्याचि–' इति सूत्रात्पिति सार्वधातुक इति 'उतो वृद्धिः–' इत्यतो हलीति चानुवर्तते 'ब्रुव ईट्' इत्यत ईडिति च, तदेतदाह **यङन्तादित्यादि**। यङो लुक्यपि प्रत्ययलक्षणेनात्र यङन्तत्वम्।

सार्वधातुकस्येड् वा स्यात् । 'भूसुवोः–' (सू २२२४) इति गुणनिषेधो यङ्लुकि भाषायां न, 'बोभूतु तेतिक्ते–' (सू ३५१६) इति छन्दसि निपातनात् । अत एव यङ्लुग्भाषायामपि सिद्धः । न च यङ्लुक्यप्राप्त एव गुणाभावो निपा-

---

इत्यस्य 'शितपा शपा–' इति निषेधाविषयत्वादिति भावः । **चर्करीतमिति** । यङ्-लुगन्तमदादौ बोध्यमिति व्याख्यातं प्राक् । अतो यङ्लुगन्ताच्छपो लुगित्यर्थः । एवं च भूधातोर्यङो लुकि द्वित्वादौ बोभू इत्यस्माल्लटि तिपि शपो लुकि बोभू ति इति स्थिते **यङो वा** । 'उतो वृद्धिः–' इत्यतो हलीति 'नाभ्यस्तस्याचि–' इत्यतः पिति सार्वधातुके इति 'ब्रुव ईट्' इत्यत ईडिति चानुवर्तते, तदाह **यङन्तादित्यादिना** । टित्वात्तिप आद्यवयव ईट् । तथा च बोभू ई ति इति स्थिते ऊकारस्य गुणे अवादेशे बोभवीतीति रूपं वक्ष्यति । 'भूसुवोस्तिङि' इति गुणनिषेधमाशङ्क्याह **भूसुवोरिति । निपातनादिति ।** 'कृषेः छन्दसि' इत्यतः छन्दसीत्यनुवृत्तौ 'दाधर्ति दर्धर्ति दर्धर्षि बोभूतु तेतिक्ते–' इत्यादिसूत्रे भूधातोर्यङ्लुगन्तस्य गुणाभावो निपात्यते । 'भूसुवोः–' इत्येव तत्र गुणनिषेध सिद्धे गुणाभावनिपातनं नियमार्थम्, यङ्लुकि छन्दस्येवायम् 'भूसुवोः–' इति गुणनिषेधो, नान्यत्र इति । अतो लोकेऽपि यङ्लुगस्तीति विज्ञायते । एतेन 'यङोचि च' इति यङ्लुग्विधौ 'बहुलं छन्दसि' इति पूर्वसूत्राच्छन्दसीत्यनुवर्तयन्तः परास्ताः, तदाह **अत एव यङ्लुग् भाषायामपि सिद्ध इति** । 'भूसुवोस्तिङि' इति सूत्रभाष्ये तु बोभूत्वित्येतन्नियमार्थम् । अत्रैव यङ्लुगन्तस्य गुणो न भवति, नान्यत्र । क्व मा भूद् बोभवीतीत्युक्तम् । अत्रैवेत्यस्य बोभूत्विति लोट्येवेत्यर्थः । यङ्लुगन्तस्येत्यस्य भूधातोरिति शेषः । बोभवीतीत्येवोदाहृतत्वादिति शब्देन्दुशेखरे प्रपञ्चितम् । वस्तुतस्तु भाष्ये यङ्लुगन्तस्येति सामान्याभिप्रायमेव, भूधातुमात्रसंकोचे मानाभावात् । बोभवीति इत्युदाहरणं तु धात्वन्तराणामपि प्रदर्शनपरमिति मूलकृदाशयः । ननु भूधातोर्यङ्लुकि बोभू इत्यस्य 'भूसुवोस्तिङि' इति गुणनिषेधप्रसक्तिर्नास्ति, द्वित्वे सति यङ्लुगन्तस्य प्रकृत्यन्तरत्वेन

एतेन यङन्ताद्धलादिपित्सार्वधातुकं न संभवतीति यङ्शब्देन यङ्लुगन्तं लक्ष्यत इति व्याख्यानं परास्तम् । उक्तरीत्या यङन्तत्वानपायात् । किं च यङन्ताद् हलादिपिन्न संभवतीति यङ्शब्देन यङ्लुगन्ते लक्षितेऽपि 'सन्यङोः' इति द्वित्वस्य यङन्ते चरितार्थतया यङ्लुगन्तलक्षणायां बीजाभावाद्यङ्लुकि द्वित्वाभावप्रसङ्गादिति दिक् । **छन्दसि निपातनादिति** । गुणनिषेधे सिद्धे निपातनमिदं छन्दस्येव गुणनिषेधो नान्यत्रेति नियमार्थमित्यर्थः । **बोभूत्विति** । समुदायस्यातिरिक्तत्वाद् 'भूसुवोः–' इति गुणनिषेधो न प्राप्नोतीति निपातनमिदं न नियमार्थमित्याशङ्कायामाह **न चेति**

स्यतामिति वाच्यम्, 'प्रकृतिग्रहणे यङ्लुगन्तस्यापि ग्रहणात्' (प १०१) 'द्विःप्रयोगो द्विर्वचनं षाष्ठम्' इति सिद्धान्तात् । बोभवीति, बोभोति बोभूतः बोभुवति । बोभवांचकार । बोभविता । अबोभवीत्, अबोभोत् बोअभूताम् अबोभवुः । बोभूयात् बोभूयाताम् । बोभूयास्ताम् । 'गातिस्था–' (सू २२२३)

भूरूपत्वाभावात् । ततश्च यङ्लुगन्तस्याप्राप्ते गुणाभावे तत्प्राप्त्यर्थमेव बोभूत्विति निपातनमिति युक्तम् । तथा च छन्दस्येव यङ्लुगन्तस्य गुणनिषेधः, न तु भाषायामिति नियमः कथं सिध्येदित्याशङ्क्य निराकरोति **न च यङ्लुकीति । प्रकृतीति ।** 'प्रकृतिग्रहणेन यङ्लुगन्तस्यापि ग्रहणम्' इति परिभाषया 'भूसुवोः–' इत्यत्र भूग्रहणेन बोभू इति यङ्लुगन्तस्यापि ग्रहणादित्यर्थः । ननु 'प्रकृतिग्रहणे यङ्लुगन्तस्यापि ग्रहणम्' इत्यत्र किं प्रमाणमित्याशङ्क्य न्यायसिद्धमिदमित्याह **द्विःप्रयोग इति ।** षष्ठाध्यायादौ 'एकाचो द्वे प्रथमस्य' इत्यत्र किमिदं द्विर्वचनम्—एकाचः प्रथमस्य एकस्य स्थाने द्वितयात्मक आदेशः स्थान्यपेक्षया अन्यो विधीयते, उत स्थानिन एकस्य सतो द्विरुच्चारणं विधीयते, न तु तत्स्थानिनः अनिरिच्यते इति संशय्य 'द्विःप्रयोगो द्विर्वचनम्' इति सिद्धान्तितम् । तदधिकारस्थत्वात् 'सन्यङोः' इति द्विर्वचनमपि तथाविधमेव । ततश्च भू इत्यस्यैव बोभू इति द्विः प्रयुज्यमानतया 'भूसुवो–' इति भूग्रहणेन ग्रहणाद्यङ्लुक्यपि निषेधसिद्धेः बोभूत्विति निपातनं छन्दस्येव यङ्लुकि गुणनिषेधः, न तु भाषायामिति नियमलाभाल्लोकेऽपि यङ्लुक सिद्ध इति भावः । **बोभूत इति ।** अपित्त्वादीटन । ङित्त्वाच न गुणः । **बोभुवतीति ।** 'अदभ्यस्तात्' इत्यत् । ङित्त्वाद् गुणाभावे उवङिति भावः । बोभवीषि, बोभोषि बोभूथः बोभूथ । बोभवीमि, बोभोमि बोभूवः बोभूमः । **बोभवांचकारेति ।** 'कास्यनेकाच्–' इत्याम् । बोभविता । बोभविष्यति । बोभवीतु, बोभोतु, बोभूतात् बोभूताम् बोभुवतु । हेरपित्वादीटन, ङित्त्वान्न गुणः । बोभूहि, बोभूतात् बोभूतम् बोभूत । आटः पित्त्वेन अङित्त्वाद् गुणः । बोभवानि बोभवाव बोभवाम । लङ्याह **अबोभवीदित्यादि । अबोभवुरिति ।** 'सिजभ्यस्त–' इति जुसि गुणे अवादेशः । अबोभवीः, अबोभोः अबोभूतम् अबोभूत । अबोभवम् अबोभूव अबोभूम । **बोभूयादिति ।** विधिलिङि आशीर्लिङि च रूपम् । बोभूयातामिति विधिलिङस्तामि रूपम् । बोभूयुः । बोभूयाः बोभूयातम् बोभूयात । बोभूयाम् बोभूयाव बोभूयाम । **बोभूयास्तामिति ।** आशीर्लिङि तामि रूपम् । बोभूयास्त । बोभूयासम् बोभूयास्व बोभूयास्म । लुङस्तिपि सिचि कृते आह **गाति-**

द्विःप्रयोग इति । तथा च प्रकृतिग्रहणे यङ्लुगन्तस्यापि ग्रहणमित्येतन्न्यायसिद्धं

इति सिचो लुक्, 'यङो वा' इतीट्पक्षे गुणं बाधित्वा नित्यत्वाद् वुक्, अबोभूवीत्, अबोभोत् अबोभूताम्। अभ्यस्ताश्रयो जुस्, नित्यत्वाद् वुक्, अबोभूवुः। अबोभविष्यदित्यादि। पास्पर्धीति, पास्पर्द्धि पास्पर्द्धः पास्पर्धेति। पास्पर्सि।

स्थेति ईट्पक्ष इति। 'इतश्च' इति इकारलोपे कृते ईडागमे 'सार्वधातुकार्धधातुकयोः' इति गुणं परमपि बाधित्वा नित्यत्वाद् 'भुवो वुग्लुङ्लिटोः' इति वुगित्यर्थः। गुणे कृते अकृते च प्राप्तेः वुको नित्यत्वं बोध्यम्। अबोभूवीदिति। वुकि कृते सति तेन व्यवधानादूकारस्य न गुणः। ननु लुको भेर्जुसि वुकि अबोभूवुरिति रूपं वक्ष्यति। तदयुक्तम्, 'आतः' इति सूत्रे सिज्लुकि आदन्तादेव भेर्जुसिति नियमनादित्यत आह अभ्यस्ताश्रयो जुसिति। 'सिजभ्यस्त-' इत्यनेन अभ्यास्तात्परत्वाद् जुसित्यर्थः। 'सिजभ्यस्त-' इति सूत्रे सिचः परत्वमाश्रित्य यो जुस् प्राप्तस्तस्यैवायं नियमः, न त्वभ्यस्ताश्रयजुस इति भावः। अबोभू उस् इति स्थिते 'जुसि च' इति गुणमाशङ्क्याह नित्यत्वाद् वुगिति। 'जुसि च' इति गुणापेक्षयेत्यर्थः। अबोभूवुरिति। न चात्राभ्यस्ताश्रयजुसं बाधित्वा परत्वाद् 'अदभ्यस्तात्' इत्यदादेशः स्यादिति शङ्क्यम्, अभ्यस्ताश्रयजुसः अदादेशापवादत्वादिति भावः। अबोभूवीः, अबोभोः अबोभूतम् अबोभूत। अबोभूवम् अबोभूव अबोभूम। इत्यादीति। अबोभविष्यताम् अबोभविष्यन् इत्यादि व्यक्तम्। पास्पर्धीतीति। स्पर्धधातोः यङ्लुकि द्वित्वे 'शर्पूर्वाः खयः' इति पकारशेषे 'दीर्घोऽकितः' इति दीर्घे पास्पर्ध् इत्यस्माल्लटस्तिपि शपि शपो लुकि 'यङो वा' इति ईडागमे रूपम्। ईडभावे त्वाह पास्पर्द्धीति। पास्पर्ध् ति इति स्थिते 'झषस्तथोर्धोऽधः' इति

नापूर्वं वचनमिति भावः बोभुवतीति। 'अदभ्यस्तात्' इत्यत्। अबोभूवीदिति। केचिदिह 'भुवो वुक्-' इति सूत्रे 'ओः सुपि' इत्यत ओरित्यनुवर्तते। तथा च—उवर्णान्तस्य भुवो वुगित्यर्थाद् गुणे कृते वुकः प्राप्तिर्नास्तीत्यनित्यो वुक्। स च पराभ्यां गुणवृद्धिभ्यां बाध्यते। तेन अबोभवीदिति रूपमाहुः। तच्चिन्त्यम्, भुवो वुको नित्यत्वादिति भाष्यग्रन्थविरोधात्। तस्माद् वुको नित्यत्वमाश्रित्य 'इन्धिभवतिभ्यां च' इति सूत्रं प्रत्याख्यातवतो भाष्यकृत ओरित्यनुवर्तनमसंमतमेव। आत इति नियमाज्जुसभावमाशङ्क्याह अभ्यस्ताश्रय इति। अयं भावः—'सिजभ्यस्त-' इति सूत्रेण सिचः परत्वमाश्रित्य यो जुस् प्राप्तस्तस्यैवायं नियमो न त्वभ्यस्ताश्रयस्य जुस इति। 'जुसि च' इति गुणमाशङ्क्याह नित्यत्वाद् वुगिति। अबोभूवुरिति। न चात्र परत्वाद् 'अदभ्यस्तात्' इति अदादेशः स्यादिति वाच्यम्, अभ्यस्ताश्रयजुसोऽदादेशापवादत्वात्। पास्पर्धीतीति। स्पर्ध संघर्षे। 'दीर्घोऽकितः'

'हुझल्भ्यो हेर्धिः' (सू २४२५) । पास्पर्धि । लङ्, अपास्पर्त्, अपास्पर्द् । सिपि 'दश्च' (२४६८) इति रुत्वपक्षे 'रो रि' (सू १७३) अपास्पाः । जागाद्धि । जाघात्सि । अजाघात् । सिपि रुत्वपक्षे अजाघाः । नाथृ, नानात्ति

तकारस्य धकारः । 'झलां जश् झशि' इति पूर्वधकारस्य द इति भावः । मिब्वस्मस्सु पास्पर्धीमि, पास्पर्ध्मि पास्पर्ध्वः पास्पर्ध्मः । पास्पर्धांचकार । पास्पर्धिता । पास्पर्धिष्यति । पास्पर्धीतु, पास्पर्द्धु, पास्पर्द्धात् पास्पर्धतु । हेरपित्त्वादीडभावं सिद्धवत्कृत्याह **हुझल्भ्य इति । पास्पर्धीति** । हेर्धिभावे 'झरो झरि–' इति वा धलोपः । पास्पर्धात् । पास्पर्धम् । पास्पर्धानि पास्पर्धाव पास्पर्धाम । **लङिति** । उदाहरणसूचनम् । ईटि अपास्पर्धीत् इति सिद्धवत्कृत्य ईडभावे आह **अपास्पर्त् इति** । अपास्पर्ध् त् इति स्थिते हल्ङ्यादिना तकारलोपे 'वाऽवसाने' इति चर्त्वविकल्प इति भावः । अपास्पर्धाम् अपास्पर्धुः । सिपि तु अपास्पर्ध् स् इति स्थिते जश्त्वे 'दश्च' इति दकारस्य रुत्वपक्षे अपास्पर् र् स् इति स्थिते हल्ङ्यादिना सकारलोपे 'रो रि' इति रेफलोपे 'ढ्रलोपे–' इति दीर्घे विसर्गे अपास्पाः इति रूपम् । न च दीर्घे 'दश्च' इति रुत्वमसिद्धमिति शङ्क्यम्, 'ढ्रलोपे–' इति सूत्रे ढ्रग्रहणेन लण्सूत्रे जर्गृधेः अजर्घाः इति भाष्यप्रयोगेण च पूर्वत्रासिद्धमित्यस्याप्रवृत्तिबोधनात् । अपास्पर्धम् अपास्पर्ध्व अपास्पर्ध्म । लिङि पास्पर्ध्यात् पास्पर्ध्याताम् । पास्पर्ध्यास्ताम् इत्यादि । लुङि अपास्पर्ध् स् इति स्थिते 'अस्तिसिचः–' इति नित्यमीट् । 'इट ईटि' इति, सलोपः, अपास्पर्धीत् अपास्पर्धिष्टाम् अपास्पर्धिषुः । अपास्पर्धिष्यत् । गाधृधातोर्यङ्लुगन्ताद् लटस्तिपि ईट्पक्षे जागाधीतीति सिद्धवत्कृत्य ईडभावे आह **जागाद्धीति** । जागाध् ति इति स्थिते 'झषस्तथोः–' इति तकारस्य धः । जागाद्धः

इत्यभ्यासस्य दीर्घः । 'यङो वा' इति ईड्विकल्पः । ईडभावपक्षे 'झषस्तथोः–' इति धत्वम्, 'झरो झरि सवर्णे' इति वा धलोपः । लिटि पास्पर्धांचकार । पास्पर्धिता । लृटि पास्पर्धिष्यति । लोटि पास्पर्धीतु । पास्पर्धु । पास्पर्धात् । पास्पर्धाम् । पास्पर्धतु । पास्पर्धीति । हेर्धित्वे वा धिलोपः । लङि इडागमपक्षे अपास्पर्धीत् । **रुत्वपक्षे इति** । पक्षान्तरे तु अपास्पर्त्, अपास्पर्द् । लिङि पास्पर्ध्यात् । पास्पर्ध्याताम् । पास्पर्ध्यास्ताम् । लुङि । 'अस्तिसिचोऽपृक्ते' इति नित्यमीट्, 'इट ईटि' इति सलोपः, अपास्पर्धीत् । अपास्पर्धिष्टाम् । अपास्पार्धिषुः । लृङि अपास्पर्धिष्यत् । **जागाद्धीति** । गाधृ प्रतिष्ठादौ । ईट्पक्षे तु जागाधीति । **जाघात्सीति** । 'एकाच–' इति भष्भावः । धस्य चर्त्वम् । लोटि जागाधीतु । जागाद्धु । जागाद्धाम् । जागाधतु । लङि अजागाधीत् । अजाघात् । अजागाद्धाम् । अजागाधुः । लुङि अजागाधीत् । अजागा-

नानात्तः । दध, दादद्धि दादद्धः । दाधत्सि । अदाधत् अदादधुः । अदाधः,

---

जागाधति । सिपि ईट्पक्षे जागाधीषीति सिद्धवत्कृत्य ईडभावपक्षे आह **जाघात्सीति** । जागाध् सि इति स्थिते 'एकाचो बशः–' इति गस्य भष् धस्य चर्त्वमिति भावः । जागाद्धः जागाद्ध । जागाध्मि जागाध्वः जागाध्मः । जागाधांचकार । जागाधिता । जागाधिष्यति । जागाधीतु, जागाद्धु, जागाद्धात् जागाद्धाम् जागाधतु । जागाद्धि, जागाद्धात् जागाद्धम् जागाद्ध । जागाधानि जागाधाव जागाधाम । लङि अजागाधीत्, अजाघात् अजागाद्धाम् अजागाधुः । सिपि ईट्पक्षे अजागाधीरिति सिद्धवत्कृत्य ईडभावपक्षे आह **सिपीति** । अजागाध् स् इति स्थिते भष्भावे जश्त्वे 'दश्च' इति दस्य रुत्वपक्षे हल्ङ्यादिलोपे रेफस्य विसर्गे अजाघाः इति रूपमित्यर्थः । पक्षे अजाघाद् इति बोध्यम् । अजागाद्धाम् इत्यादि । जागाध्यात् । लुङि 'अस्तिसिचः–' इति नित्यमीट्, अजागाधीत् अजागाधिष्टाम् इत्यादि । **नाथृ इति** । उदाहरणसूचनम् । वर्गद्वितीयान्तोऽयं धातुः, न झषन्तः । तस्य ईट्पक्षे नानाथीति इति सिद्धवत्कृत्य ईडभावपक्षे आह **नानात्तीति** । नानाथ् ति इति स्थिते 'खरि च' इति थस्य चर्त्वम् । 'झषस्तथोः–' इति 'एकाचो बशो भष्–' इति च न, अझषन्तत्वात् । नानात्तः नानाथति । नानाथीषि, नानात्सि नानात्थः नानात्थ । नानाथीमि, नानाथ्मि नानाथ्वः नानाथ्मः । लोटि नानाथीतु, नानात्तु । हेर्धिः, थस्य जश्त्वेन दः, नानाद्धि । नानाथानि नानाथाव नानाथाम । लङि अनानाथीत्, अनानात् अनानात्ताम् अनानाथुः इत्यादि । लुङि 'अस्तिसिचः–' इति नित्यमीट्, अनानाथीत् अनानाथिष्टाम् इत्यादि । **दधेति** । उदाहरणसूचनमिदम् । दधधातोर्लटस्तिपि ईट्पक्षे दादधीतीति सिद्धवत्कृत्य ईडभावपक्षे आह **दादद्धीति** । दादध् ति इति स्थिते 'झषस्तथोः–' इति तकारस्य धः । दादधीषीति सिद्धवत्कृत्याह **दाधत्सीति** । 'एकाचो बशः–' इति दस्य भष् । धस्य 'खरि च' इति चर्त्वमिति भावः । दादत्थः दादत्थ । दादध्मि इत्यादि । लोटि दादधीतु, दादद्धु । दादद्धि । दादधानि । लङस्तिपि ईटि अदादधीत् इति सिद्धवत्कृत्य ईडभावे आह **अदाधत् इति** । अदादध् त् इति स्थिते हल्ङ्यादिलोपे भष्भावे धस्य 'वावसाने' इति चर्त्वविकल्प इति भावः । सिपि ईटि अदादधीरिति सिद्धवत्कृत्य ईडभावे आह **अदाधः इति** । अदादध् स् इति स्थिते जश्त्वे 'दश्च' इति दस्य रुत्वे हल्ङ्यादिना सलोपे रुत्वजश्त्वयोरसिद्धत्वेन झषन्तत्वाद् दस्य भषिति भावः । अदाधदिति पक्षे रूपम् । 'अस्तिसिचः–' इति नित्यमीडिति मत्वाह

धिष्टाम् । **नाथृ नाधृ** याच्ञादौ । **नानात्तीति** । ईट्पक्षे नानाथीति । **दध**

अदाधत् । लुङि अदादाधीत्, अदादधीत् । चोस्कुन्दीति, चोस्कुन्ति । अचोस्कुन् अचोस्कुन्ताम् अचोस्कुन्दुः । मोमुदीति, मोमोत्ति । मोमोदांचकार । मोमोदिता । अमोमुदीत्, अमोमोत् अमोमुत्ताम् अमोमुदुः । अमोमुदीः, अमोमोः, अमोमोत् । लुङि गुणः, अमोमोदीत् । चोकूर्ति, चोकूर्दीति । लङ्, तिप्, अचोकूर्त्, अचोकूर्दीत् । सिप्पक्षे अचोकूः । अचोखूः । अजोगूः । वनीवञ्चीति,

---

अदादधीदिति । 'अतो हलादेः–' इति वृद्धिविकल्पः । अदादधिष्टाम् इत्यादि । स्कुदि आप्रवणे, इदित्त्वान्नुम् । अस्माद्यङ्लुकि उदाहरति **चोस्कुन्दीतीति** । ईटि रूपम् । तदभावे त्वाह **चोस्कुन्तीति** । 'झरो झरि सवर्णे' इति दकारस्य लोपविकल्पः । इह यङो लुप्तत्वादिदित्त्वाच्च यङं तिङं चाश्रित्य नलोपो न । लङि ईट्पक्षे अचोस्कुन्दीदिति सिद्धवत्कृत्य इडभावे आह **अचोस्कुन्निति** । अचोस्कुन् द् त् इति स्थिते हल्ङ्यादिना तकारलोपे दकारस्य संयोगान्तलोपः । लुङि तु 'अस्तिसिचः–' इति नित्यमीट् । अचोस्कुन्दीत् अचोस्कुन्दिष्टाम् इत्यादि । **मोमुदीतीति** । मुद हर्षे इटि 'नाभ्यस्तस्याचि पिति सार्वधातुके' इति लघूपधगुणो न । **मोमोत्तीति** । ईडभावे अच्परकत्वाभावाद् 'नाभ्यस्तस्याचि–' इति लघूपधगुणनिषेधो न । **मोमोदितेति** । 'न धातुलोप आर्धधातुके' इति गुणनिषेधस्तु न, धात्वंशलोपनिमित्ते आर्धधातुके परे एव तन्निषेधस्य प्रवृत्तेः, इह च यङ्लुक अनैमित्तिकत्वस्य उक्तत्वात् । **लुङि गुण इति** । सिज्निमित्तक इति शेषः । अतो 'नाभ्यस्तस्य–' इति गुणनिषेधो न शङ्क्यः । **चोकूर्तीति** । कुर्द क्रीडायाम्, यङ्लुग् द्वित्वादि । ईडभावे 'उपधायां च' इति दीर्घः । **अचोकूर्त् इति** । लङस्तिपि अचोकूर्द् त् इति स्थिते हल्ङ्यादिलोपे 'रात्सस्य' इति नियमाच्च संयोगान्तलोप इति भावः । **सिप्पक्षे**

धारणे । ईट्पक्षे दादधीति । लुङि 'अतो हलादेः–' इति वा वृद्धिः । **चोस्कुन्दीति** । स्कुदि आप्रवणे । 'इदितः–' इति नुम् । ईडभावे 'झरो झरि सवर्णे' इति वा लोपः । लङि ईट्पक्षे अचोस्कुन्दीत् । लुङि तु 'अस्तिसिचः–' इति नित्यमीट् । अचोस्कुन्दीत् । अचोस्कुन्दिष्टाम् । **मोमुदीतीति** । मुद हर्षे । 'नाभ्यस्तस्याचि–' इति लघूपधगुणनिषेधः । **मोमोदितेति** । न चात्र 'न धातुलोप–' इति गुणनिषेधः शङ्क्यः, बहुलग्रहणेन प्राप्तस्य यङ्लुकोऽनैमित्तिकत्वात् । **लुङि गुण इति**। सिज्निमित्तकोऽयं गुणस्तेन 'नाभ्यस्तस्याचि–' इति निषेधो न शङ्कनीय इति भावः । **चोकूर्तीति** । कुर्द खुर्द गुर्द गुद क्रीडायाम् । लङि तिपि । ईट्पक्षे अचोकूर्दीत् । अचोखूर्दीत् । अजोगूर्दीत् । **पक्षे अचोकूरिति** । 'दश्च' इति रुत्वपक्षे इत्यर्थः । **वनीवञ्चीतीति** । वञ्चु गतौ । 'नित्यं कौटिल्ये गतौ' इति यङ् । 'नीग्वञ्चु–'

वनीवङ्क्ति वनीवक्तः वनीवचति । अवनीवञ्चीत्, अवनीवन्। जङ्गमीति, जङ्गन्ति । 'अनुदात्तोपदेश-' (सू २४२८) इत्यनुनासिकलोपः । जङ्गतः । जङ्गमति । 'म्वोश्च' (सू २३०१) । जङ्गन्मि । जङ्गन्वः । एकाज्ग्रहणेनोक्तत्वादिण्निषेधः । जङ्गमिता । अनुनासिकलोपस्याभीयत्वेनासिद्धत्वान्न हेर्लुक् । जङ्गहि । 'मो नो धातोः' (सू ३४१), अजङ्गन् । अनुबन्धनिर्देशाच्च क्वेरङ्,

---

इति । लङः सिपि ईडभावे अचोकुर्द् स् इति स्थिते 'दश्च' इति रुत्वपक्षे हल्ङ्यादिना सलोपे 'रो रि' इति प्रथमरेफलोपे दीर्घे दकारस्थानिकरेफस्य विसर्गे अचोकूरिति रूपमित्यर्थः । अचोखूरिति । खुर्दधातोर्यङ्लुगन्ताद् लङः सिपि कुर्दवद्रूपम् । अजोगूरिति । गुर्दधातोर्यङ्लुगन्तात् सिपि रूपम् । वनीवञ्चीतीति । वञ्चु गतौ, अस्माद् 'नित्यं कौटिल्ये गतौ' इति यङन्तस्य लुक् । द्वित्वादि । 'नीग्वञ्चु-' इत्यादिना अभ्यासस्य नीगागमः । यङो लुका लुप्तत्वान्न तदाश्रितो नलोपः । तिपः पित्त्वेन अङित्त्वान्न तदाश्रितोऽपि नलोपः । इकारोच्चारणसामर्थ्यान्नीको न गुणः । अन्यथा निकमेव विदध्यात् । न च 'नीग्वञ्चु-' इत्यनुबन्धनिर्देशाद्यङ्लुकि नीग् दुर्लभ इति शङ्क्यम्, तत्र यङ्लुकोः इत्यनुवृत्तिसामर्थ्येन अदोषादिति भावः । वनीवङ्क्तीति । ईडभावे चस्य कुत्वेन कः । नकारस्थानिकानुस्वारस्य परसवर्णो ङकार इति भावः । वनीवक्त इति । तसो ङित्त्वादिह स्यादेव 'अनिदिताम्-' इति नलोपः । लोटि वनीवञ्चीतु, वनीवङ्क्तु, वनीवक्तात् वनीवक्ताम् वनीवचतु । हेर्धिः, अपित्त्वेन ङित्त्वान्नलोपः, अत एव ईडपि न, वनीवग्धि । वनीवञ्चानि, आटः पित्त्वादङित्त्वान्नलोपो न । लङि तिपि ईट्पक्षे आह अवनीवञ्चीदिति । ईडभावे त्वाह अवनीवन् इति । हल्ङ्यादिना तलोपे चकारस्य संयोगान्तलोपः । जङ्गमीतीति । गमेर्यङ्लुगन्ताल्लटस्तिपि ईट् । 'नुगतोऽनुनासिकान्तस्य' इति नुक् । 'नश्च' इत्यनुस्वारः परसवर्णश्चेति भावः । तसि आह अनुदात्तेति । जङ्गमतीति । 'गमहन-' इत्युपधालोप इति भावः । ननु गमेरनिट्त्वात् प्रकृतिग्रहणे यङ्लुगन्तस्यापि ग्रहणाज्जङ्गमितेत्यत्र कथमिडित्यत आह एकाज्ग्रहणेनेति । ननु जङ्गहीत्यत्र अनुनासिकलोपे कृते 'अतो हेः' इति लुक् स्यादित्यत आह अनुनासिकलोपस्येति । लङस्सिपि अजङ्गमीदिति सिद्धवत्कृत्य ईडभावे आह मो न इति । अजङ्गम् त् इति स्थिते हल्ङ्यादिना तलोपे 'मो नो धातोः' इति मस्य न इत्यर्थः, तदाह अजङ्गन्निति ।

इत्यभ्यासस्य नीगागमः । यङो लुका लुप्तत्वाद् न तदाश्रितो नलोपः । वनीवक्त इति । तसोऽङित्त्वादिह स्यादेव 'अनिदिताम्-' इति नलोपः । लोटि वनीवञ्चीतु । वनीवङ्क्तु । वनीवक्तात् । वनीवक्ताम् । वनीवचतु । वनीवग्धि । वनीवञ्चानि ।

'अयन्त–' (सू २२६६) इति न वृद्धिः, अजङ्गमीत् अजङ्गमिष्टाम् । हन्तेर्यङ्लुक्, 'अभ्यासाच्च' (सू २४३०) इति कुत्वं यद्यपि 'हो हन्तेः–' (सू ३५८) इत्यतो हन्तेरित्यनुवर्त्य विहितम्, तथापि यङ्लुकि भवत्येवेति न्यासकारः, 'श्तिपा शपा–' (प १३२) इति निषेधस्त्वनित्यः, 'गुणो यङ्लुकोः' (सू २६३०) इति समान्यापेक्षज्ञापकादिति भावः । जङ्घनीति, जङ्घन्ति जङ्घतः जङ्घ्नति । जङ्घनिता । श्तिपा निर्देशाज्जादेशो न, जङ्घहि । अजङ्घनीत , अजङ्घन् । जङ्घन्यात् । आशिषि तु वध्यात् । अवधीत् अवधिष्टामित्यादि । वधादेशस्य द्वित्वं

अजङ्गताम् अजङ्ग्मुः । अजङ्गन् अजङ्गतम् अजङ्गत । अजङ्गमम् अजङ्गन्व अजङ्गन्म । लुङि अजङ्गमीदित्यत्र 'पुषादिद्युताद्य्लृदितः–' इत्यङमाशङ्क्याह **अनुबन्धेति** । **हन्तेर्यङ्लुगिति** । हिंसार्थे क्रियासमभिहारे, गत्यर्थत्वे तु कौटिल्य इति बोध्यम् । **हन्तेरित्यनुवर्त्यैति** । तथा च 'श्तिपा शपा–' इति निषेधात्कथमिह हन्तेः कुत्वमित्याक्षेपः । **गुण इति** । 'गुणो यङ्लुकोः' इति ज्ञापकादित्यन्वयः । 'एकाचो द्वे प्रथमस्य' इत्यत्र एकाज्ग्रहणाद्यङ्लुकि द्विर्वचनस्याप्रवृत्त्या अभ्यासाभावाद् 'गुणो यङ्लुकोः' इत्यभ्यासस्य गुणविधानं व्यर्थं सत् 'श्तिपा शपा–' इत्यादिनिषेधस्य क्वचिद्यङ्लुकि अप्रवृत्तिं ज्ञापयतीत्यर्थः । नन्वेकाज्ग्रहणविधेरेव यङ्लुकि क्वचिदप्रवृत्तिज्ञापनलाभेऽपि हन्तेः इति श्तिपा निर्देशनिमित्तकनिषेधस्य कथं यङ्लुकि अप्रवृत्तिः स्यादित्यत आह **सामान्यापेक्षेति** । 'गुणो यङ्लुकोः' इत्यभ्यासस्य गुणविधानमेकाज्ग्रहणस्यानित्यत्वं ज्ञापयत् तद्वचनोपात्तत्वसामान्यात् 'श्तिपा शपा–' इत्यादिसर्वनिषेधानां यङ्लुकि क्वचिदप्रवृत्तिं ज्ञापयतीत्यर्थः । **इति भाव इति** । न्यासकृत इति शेषः । **जङ्घनीतीति** । 'नुगतः–' इति नुक् । **जङ्घत इति** । 'अनुदात्तोपदेश–' इत्यनुनासिकलोपः । **जङ्घ्नतीति** । 'गमहन–' इत्युपधालोपः । **जङ्घनितेति** । एकाज्ग्रहणादिरिनषेधो न । जङ्घहीत्यत्र 'हन्तेर्जः' इत्याशङ्क्याह **श्तिपेति** । **अजङ्घन्निति** । लङ्श्तिपि ईडभावे अजङ्घन् तु

जङ्गमीतीति । 'नुगतोऽनुनासिकान्तस्य' इति नुक् । **जङ्ग्मतीति** । 'गमहन–' इत्युपधालोपः । **अजङ्गन्निति** । ईट्पक्षे त्वजङ्गमीत् । अजङ्गताम् । अजङ्ग्मुः । अजङ्गमीः । अजङ्गतम् । अजङ्गत । अजङ्गमम् । अजङ्गन्व । अजङ्गन्म । **सामन्यापेक्षेति** । अयं भावः—एकाच इत्यत्रैकाज्ग्रहणाद्यङ्लुकि द्विर्वचनं न कुत्रापि प्राप्नोति । तथा च 'गुणो यङ्लुकोः' इत्यभ्यासस्य विधीयमानो गुणो द्विर्वचनं विना निवेशमलभमानः सन् 'श्तिपाशपा–' इति सर्वेषामपि निषेधानां क्वचिद्यङ्लुक्यप्रवृत्तिं ज्ञापयतीति । तथा च प्रयुज्यते—'राजा वृत्रमजङ्घनत्' इत्यादि ।

तु न भवति, स्थानिवत्त्वेन 'अनभ्यासस्य' इति निषेधात्। तद्धि समानाधिकरणं धातोर्विशेषणम्, बहुव्रीहिबलात्। आङ्पूर्वात्तु 'आङो यमहनः' (सू २६९५) इत्यात्मनेपदम्, आजङ्घते इत्यादि। 'उत्परस्य–' (सू २६३७) इति तपरत्वान्न गुणः, 'हलि च' (सू ३५४) इति दीर्घस्तु स्यादेव, तस्या-

---

इति स्थिते हल्ङ्यादिलोप इति भावः। **आशिषि तु वध्यादिति**। जङ्घन् इत्यस्मादाशीर्लिङि 'हनो वध लिङि' इति वधादेशः, प्रकृतिग्रहणेन यङ्लुगन्तस्यापि ग्रहणादिति भावः। **अवधीदिति**। जङ्घन् इत्यस्माल्लुङस्तिपि 'लुङि च' इति वधादेशे 'अस्तिसिचः–' इति नित्यमीडिति भावः। ननु हनो यङ्लुगन्ताद् आशीर्लिङि लुङश्च तिपि द्वित्वात्प्रागेव वधादेशो कृते तस्य द्वित्वं कुतो न स्यादित्यत आह **वधादेशस्य द्वित्वं तु न भवतीति**। कुत इत्यत आह **स्थानिवत्त्वेनेति**। वधादेशात्परत्वादादौ द्वित्वे कृते सति कृतद्विर्वचनस्य स्थाने वधादेशः। तस्य च स्थानिवत्त्वेन साभ्यासतया अनभ्यासस्येति निषेधान्न द्वित्वमित्यर्थः। ननु साभ्यासस्य स्थाने भवन् वधादेशः स्थानिवत्त्वेन साभ्यासोऽस्तु। द्वित्वं तु दुर्वारम्। साभ्यासत्वेऽप्यभ्यासानात्मकत्वाद् अनभ्यासस्येत्यनेन धातोरवयवस्याभ्यासस्य द्वित्वनिषेधादित्यत आह **तद्धीति**। धात्ववयवस्य अभ्यासस्येति नार्थः। किंतु अनभ्यासो यो धातुः तदवयवस्यैकाच इत्येवम् अनभ्यासग्रहणं सामानाधिकरण्येन धातोर्विशेषणमित्यर्थः। नन्वेवमपि न अभ्यासः अनभ्यास इति विग्रहे द्वित्वं दुर्निवारमेव, वधादेशस्य स्थानिवत्त्वेन साभ्यासत्वेऽप्यभ्यासानात्मकत्वादित्यत आह **बहुव्रीहिबलादिति**। न विद्यते अभ्यासो यस्य धातोरिति बहुव्रीहिमाश्रित्य अनभ्यासस्येत्येतद्धातोः सामानाधिकरण्येन विशेषणमित्यर्थः। प्रकृते च वधादेशस्य स्थानिवत्त्वेन साभ्यासत्वादभ्यासहीनत्वाभावान्न द्वित्वमिति भावः। **आङ्पूर्वात्त्विति**। यङ्लुगन्ताद्धनधातोरिति शेषः। 'आङो यमहनः' इत्यत्र हन्ग्रहणेन यङ्लुगन्तस्यापि ग्रहणम्, प्रकृतिग्रहणे यङ्लुगन्तस्यापि ग्रहणादिति भावः। **उत्परस्येति**। चर गतौ भक्षणे च, अस्माद्यङ्लुकि लटस्तिपि ईडभावे द्वित्वे 'चरफलोश्च' इत्यभ्यासस्य नुक्। 'उत्परस्यातः' इत्युत्तरखण्डे अकारस्य उत्त्वम्, 'हलि च' इति दीर्घः। चञ्चूर्तीति रूपम्। तिपमाश्रित्य उकारस्य लघूपधगुणस्तु न, उदिति तपरकरणसामर्थ्यात्। अन्यथा उरित्युक्तेऽपि 'भाव्यमानोऽण् सवर्णान् न

द्वित्वं तु न भवतीति। वध्यात् अवधीदित्यत्र कृतद्विर्वचनस्य 'हनो वध लिङि', 'लुङि च' इति वधादेशात्पुनर्द्वित्वं न भवतीत्यर्थः। तत्र हेतुमाह **स्थानिवत्त्वेनेति**। **आङ्पूर्वादिति**। प्रकृतिग्रहणे यङ्लुगन्तस्यापि ग्रहणादिति भावः।

सिद्धत्वेन तपरत्वनिवर्त्यत्वायोगात्, चञ्चुरीति, चञ्चूर्ति चञ्चूर्तः चञ्चुरति। अचञ्चुरीत्, अचञ्चूः। चङ्गनीति, चङ्गन्ति। 'जनसन-' (सू २५०४) इत्यात्वम्, चङ्गातः। 'गमहन-' (सू २३६३) इत्युपधालोपः, चङ्घ्नति। चङ्गाहि। चङ्गानानि। अचङ्गनीत्, अचङ्गन्। अचङ्घ्नुः। 'ये विभाषा' (सू २३११), चङ्गायात्, चङ्गन्यात्। अचङ्गनीत्, अचङ्गानीत्। 'उतो वृद्धिः-' (सू २४४३) इत्यत्र 'नाभ्यस्तस्य-' इत्यनुवृत्तेरुतो वृद्धिर्न, योयोति, योयवीति। अयोयवीत्, अयोयोत्। योयुयात्। आशिषि दीर्घः योयूयात्। अयोयावीत्।

गृह्णाति' इत्येव दीर्घादिव्यावृत्तेरित्यर्थः। ननु उदिति तपरकरणाद्यथा गुणो निवर्तते तथा 'हलि च' इति दीर्घोऽपि निवर्तेत इत्यत आह हलि चेति दीर्घस्तु स्यादेवेति। कुत इत्यत आह तस्येति। 'हलि च' इति दीर्घशास्त्रस्य त्रैपादिकत्वेन 'उत्परस्यातः' इति शास्त्रं प्रत्यसिद्धतया तपरकरणेन तन्निवृत्तेरसंभवादित्यर्थः। वस्तुतस्तु गुणस्यापि बहिरङ्गतया असिद्धत्वात्तपरत्वनिवर्त्यत्वं न भवति। अत एव विप्रतिषेधसूत्रे भाष्ये 'उदोष्ठ्य-' इत्युत्त्वे पोपूर्यते इत्यत्राभ्यासगुणो दृश्यमान उपपद्यत इति शब्देन्दुशेखरे प्रपञ्चितम्। अचञ्चूरिति। लङस्तिपि ईडभावे हल्ङ्यादिना तलोपे प्रत्ययलक्षणेन पदान्तत्वाद् 'र्वोरुपधायाः-' इति दीर्घः। खनु अवदारणे, अस्माद्यङ्लुकि उदाहरति चङ्खनीतीति। चङ्खाहीति। हेरपित्त्वेन ङित्त्वाद् 'जनसन-' इत्यात्वम्। अचङ्खनीदिति। 'अस्तिसिचः-' इति नित्यमीट्। 'अतो हलादेः-' इति वृद्धिविकल्पः। युधातोः योयोतीत्यत्र 'उतो वृद्धिः-' इति वृद्धिवाशङ्क्याह उतो वृद्धिरित्यत्रेति। आशिषि

चञ्चूर्तीति। चरतिर्गतौ भक्षणे च। 'चरफलोश्च' इत्यभ्यासस्य नुक्। 'उत्परस्यातः' इत्युत्वम्। 'हलि च' इति दीर्घः। अचञ्चूरित्यत्र तु पदान्तविषयत्वाद् 'र्वोरुपधायाः-' इति दीर्घः। चङ्खनीतीति। खनु अवदारणे। चङ्खात इति। यत्तु केचिद्धातुग्रहणेन कृतं कार्यं यङ्लुकि वेति 'जनसन-' इत्यात्वाभावे 'अनुनासिकस्य क्विझलोः-' इति दीर्घोऽपि न भवति। क्विप्साहचर्याद्धि झलादिः कृदेव तत्र गृह्यते न तु तिङित्यभ्युपेत्य चङ्खन्त इति रूपमाहुस्तदयुक्तम्। धातुग्रहणेन कृतस्य यङ्लुक्यप्रवृत्तौ मानाभावात्। सत्यपि प्रमाणे आत्वं वेति विकल्पोक्त्या चङ्खात इति रूपं केन वार्यताम्। यच्चोक्तम् 'अनुनासिकस्य-' इति सूत्रे क्विप्साहचर्याज्झलादिरपि कृदेव गृह्यत इति तदप्ययुक्तमेव। यदि हि कृदेव क्विप् स्यात्तदा साहचर्योक्तिः सङ्गच्छेत किं तु कृद्भिन्नोऽप्यस्त्येवाचारक्विप्। अत एव राजानति चर्माणति इत्यादौ माधवादिभिः क्विनिमित्तो दीर्घ उक्तः। चङ्खाहीति। हेरपित्त्वेन ङित्त्वाद् 'जन-

नोनवीति, नोनोति । जाहेति, जाहाति । 'ई हल्यघोः' (सू २४९७) जाहीतः । इह 'जहातेश्च' (सू २४९८) 'आ च हौ' (सू २४९९) 'लोपो यि' (सू २५००) 'घुमास्था-' (सू २४६२) 'एर्लिङि' (सू २३७४) इत्येते पञ्चापि न भवन्ति, श्तिपा निर्देशात् । जाहति । जाहासि, जाहेषि जाहीथः जाहीथ ।

दीर्घ इति । 'अकृत्सार्वधातुकयोः–' इत्यनेनेति भावः । **अयोयावीदिति** । ईटि सिचि वृद्धिः । नुधातोरपि युधातुवद्रूपाणीति मत्वाह **नोनवीतीति** । हाङ्हाकोर्यङ्लुकि तुल्यानि रूपाणि । ङित्त्वप्रयुक्तात्मनेपदस्य यङ्लुकि अप्रवृत्तेरुक्तत्वादिति मत्वाह **जाहेतीति** । हाङ्हाकोर्यङ्लुगन्ताल्लटस्तिपि ईटि आद्गुणे रूपम् । न च हाङोऽभ्यासस्य 'भृञामित्' इति इत्त्वम्, हाकस्तु तन्नास्ति, भृञ् माङ् ओहाङ् एषां त्रयाणामेव तत्र ग्रहणात् । तत् कथं हाङ्हाकोस्तुल्यत्वमिति शङ्क्यम्, 'भृञामित्' इत्यस्य श्लावेव प्रवृत्तेः । न चाकित इति निषेधाद् हाकोऽभ्यासस्य दीर्घाभावात् कथमुभयोस्तुल्यरूपत्वमिति वाच्यम्, क् इत् यस्य स कित्, न विद्यते किद् यस्य स अकित्, तस्य अकित इति बहुव्रीहिगर्भबहुव्रीह्याश्रयणात् । इह च हाको धातोः कित्त्वेऽपि न किद्वत्त्वम् । तदभ्यासस्य तु दूरेतरां न किद्वत्त्वम् । 'द्विः प्रयोगो द्विर्वचनं षाष्ठम्' इति सिद्धान्तात् । बहुव्रीह्याश्रयणसामर्थ्यादेव व्यपदेशिवत्त्वेन हाको न किद्वत्त्वम् । अतो हाकोऽप्यभ्यासदीर्घो निर्बाध इति भावः । **जाहीत इति** । हाङ्हाकोस्तसि ईत्वमेव । ननु हाको 'जहातेश्च' इति इत्त्वविकल्पः कुतो नेत्यत आह **इहेति** । हलादौ क्ङिति सार्वधातुके 'जहातेश्च' इति इत्त्वविकल्पः, तथा 'आ च हौ' इति जहातेर्हौ परे आत्वमित्त्वमीत्वं च, तथा 'लोपो यि' इति यादौ सार्वधातुके जहातेराल्लोपश्च, तथा 'घुमास्था-' इति जहातेर्हलादौ क्ङित्यार्धधातुके ईत्वं च, तथा 'एर्लिङि' इति जहातेरार्धधातुके किति लिङ्येत्त्वं च इत्येते पञ्चापि विधयो यङ्लुकि न भवन्तीत्यर्थः । कुत इत्यत आह **श्तिपेति** । एवं च जाहीत इत्यत्र 'ई हल्यघोः' इति ईत्वमेव, न त्वित्त्वविकल्प इति स्थितम् । **जाहतीति** । 'अदभ्यस्तात्' इत्यदादेशः, 'श्नाभ्यस्तयोः–' इत्याल्लोपः । जाहांचकार । जाहिता । जाहिष्यति । जाहेतु,

---

सन–' इत्यात्वम् । **अचङ्क्रानीदिति** । 'अतो हलादेः–' इति वा वृद्धिः । **जाहेतीत्यादि** । हाङ्हाकोस्तुल्यानि रूपाणि । ङित्त्वप्रयुक्तस्यात्मनेपदस्य यङ्लुक्यप्रवृत्तेः । 'भृञामित्' इति हाङ इत्त्वस्य श्लुनिमित्ताभ्यासस्यैव विहितत्वाच्च । न च अकित इति निषेधेन हाकोऽभ्यासस्य दीर्घो दुर्लभ इति कथमुभयोस्तुल्यरूपतेति शङ्क्यम्, अकित इत्यत्र हि न विद्यते किद्यस्याभ्यासस्येति बहुव्रीहिराश्रीयते, तेन 'द्विःप्रयोगो द्विर्वचनं षाष्ठम्' इत्यभ्युपगमाद्धातोः कित्त्वे अभ्यासस्य कित्त्वेऽपि वनी-

जाहीहि। अजाहेत्, अजाहात् अजाहीताम् अजाहुः। जाहीयात्। आशिषि जाहायात्। अजाहासीत् अजाहासिष्टाम्। अजाहिष्यत्। लुका लुप्ते प्रत्ययलक्षणाभावात् 'स्वपिस्यमि–' (सू २६४२) इत्युत्वं न, 'रुदादिभ्यः–' (सू २४७४) इति गणनिर्दिष्टत्वादिण्न, सास्वपीति, सास्वप्ति सास्वपतः सास्वपति। असास्वपीत्, असास्वप्। सास्वप्यात्। आशिषि तु 'वचिस्वपि–' (सू २४०९) इत्युत्वम्, सासुप्यात्। असास्वापीत्, असास्वपीत्। **२६५२ रुग्रिकौ च लुकि। (७-४-९१)** ऋदुपधस्य धातोरभ्यासस्य रुक्, रिक्, रीक् एते आगमाः स्युर्यङ्लुकि। **२६५३ ऋतश्च। (७-४-९२)** ऋदन्तधातोरपि

जाहातु, जाहीतात् जाहीताम् जाहतु। **जाहीहीति**। हेरपित्त्वेन ङित्त्वादीत्वम्। इह 'आ च हौ' इति न। विधिलिङमाह **जाहीयादिति**। 'ई हल्यघोः' इति ईत्वमेव। 'लोपो यि' इत्याल्लोपस्तु न। **आशिषि जाहायादिति**। इह 'घुमास्था–' इति ईत्वं न। 'एर्लिङि' इत्यपि न। **अजाहासीदिति**। 'यमरम–' इति सगिटौ। ञि ष्वप् शये। अस्य यङ्लुकि 'स्वपिस्यमिव्येञां यङि इति संप्रसारणमाशङ्क्याह **लुका लुप्त इति**। **उत्वं नेति**। वस्य संप्रसारणं नेत्यर्थः। ईडभावपक्षे 'रुदादिभ्यः–' इति इटमाशङ्क्याह **रुदादिभ्य इति**। **असास्वप् इति**। लङस्तिपि ईडभावे हल्ङ्यादिलोपः। **असास्वापीत् इति**। 'अतो हलादेः–' इति वृद्धिविकल्पः। 'अस्तिसिचः–' इति नित्यमीट्। **रुग्रिकौ च लुकि**। 'रीगृदुपधस्य च' इत्यत ऋदुपधस्येत्यनुवर्तते। रिगपि इह चकारात् समुचीयते। 'अत्र लोपः–' इत्यतः अभ्यासस्येत्यनुवर्तते। 'गुणो यङ्लुकोः' इत्यतो यङ्ग्रहणं च, तदाह **ऋदुपधस्येत्यादिना**। रुकि उकार उच्चारणार्थः। रिकि तु इकारः श्रूयत एव। एवं रीकि ईकारश्च, व्याख्यानात्। **ऋतश्च**। **तथेति**। अभ्यासस्य रुक् रिक् रीक् एते आगमाः स्युर्यङ्लुकीत्यर्थः। वृतु वर्तने, अस्माद्यङ्लुगन्ताद् वृत् इत्यस्माल्लटस्तिपि ईट्पक्षे

बभ्रीतीत्यादाविव कित्त्वाभावाच्च दोषः। किं च द्वित्वाभावे केवलस्यार्थवत्त्वेऽपि द्वित्वे सति समुदाय एवार्थवानिति हि सर्वसंमतम्। तथा कित्त्वमपि समुदायस्यैवास्तु, न तु प्रत्ययवयवमिति नास्त्येव दीर्घे प्रतिबन्धः। **जाहीयादिति**। 'ई हल्यघोः' इतीत्वम्। **लुका लुप्त इति**। सर्वविधिभ्यो लुग्विधेर्बलीयस्त्वादकृतव्यूहपरिभाषया च लुकः पूर्वं न शङ्क्यमेवेति भावः। **उत्वं नेति**। फलितार्थकथनमिदम्। 'स्वपिस्यमि–' इत्यादिना विधीयमानं यत्संप्रसारणं तन्नेत्यर्थः। **असास्वापीदिति**। 'अतो हलादेः–' इति विकल्पेन वृद्धिः। **रुग्रिकौ च**। चकारेण 'रीगृदुपधस्य–' इत्यतो रीगनुकृष्यते। रुक उकार उच्चारणार्थः। **ऋतश्च**। ऋताऽनुवर्तमानमङ्गं विशेष्यते। ऋदन्तस्या-

तथा। वर्वृतीति, वरिवृतीति, वरीवृतीति। वर्वर्ति, वरिवर्ति, वरीवर्ति। वर्वृत्तः, वरिवृत्तः, वरीवृत्तः। वर्वृतति, वरिवृतति, वरीवृतति। वर्वर्तामास, वरिवर्तामास, वरीवर्तामास। वर्वर्तिता, वरिवर्तिता वरीवर्तिता। गणनिर्दिष्टत्वाद् 'न वृद्भ्यश्चतुर्भ्यः' (सू २३४८) इति न। वर्वर्तिष्यति, वरिवर्तिष्यति, वरीवर्तिष्यति। अवर्वृतीत्, अवरिवृतीत्, अवरीवृतीत्। अवर्वर्त्, अवरिवर्त्, अवरीवर्त्। सिपि 'दश्च' (सू २४६८) इति रुत्वपक्षे 'रो रि' (सू १७३) अवर्वाः, अवरिवाः, अवरीवाः। गणनिर्दिष्टत्वादङ् न, अवर्वर्तीत्, अवरिवर्तीत्, अवरीवर्तीत्। चर्करीति, चर्कर्ति, चरिकर्ति, चरीकर्ति चर्कृतः चर्क्रति। चर्करांचकार। चर्करिता। अचर्करीत्, अचर्कः। चर्क्रियात्। आशिषि रिङ्, चक्रियात्। लुङि अचर्कारीत्। 'ऋतश्च' (सू २४४३) इति तपरत्वान्नेट्। कॄ विक्षेपे चाकर्ति। नातर्ति तातीर्तः तातिरति। तातीर्हि। तातराणि। अतात-

---

अभ्यासस्य क्रमेण रुकं रिकं रीकं चोदाहरति **वर्वृतीति, वरिवृतीति, वरीवृतीति इति**। इट्पक्षे 'नाभ्यस्तस्याचि पिति सार्वधातुके' इति निषेधान्न लघूपधगुणः। ईडभावेऽपि रुगाद्यागमत्रयमुदाहरति **वर्वर्तीत्यादि**। **इति नेति** इण्निषेधो नेत्यर्थः। लोटि वर्वृतीतु, वर्वर्तु, वर्वृत्तात् वर्वृत्ताम् वर्वृततु। वृर्वृद्धि। वर्वर्तानि। लङस्तिपि ईटि आह **अवर्वृतीदिति**। ईडभावे त्वाह **अवर्वर्त् इति**। हल्ङ्यादिना तिपो लोपः। 'रात्सस्य' इति नियमान्न संयोगान्तलोपः। **अवर्वा इति**। लङः सिपि अवर्वर्त् स् इति स्थिते जश्त्वे 'दश्च' इति दकारस्य रुत्वे 'रो रि' इति पूर्वरेफस्य लोपे 'ढ्रलोपे–' इति दीर्घे हल्ङ्यादिना सिपो लोपे रेफस्य विसर्गे इति भावः। **अङ् नेति**। 'पुषादिद्युतादि–' इत्यनेनेति शेषः। 'अस्तिसिचः–' इति नित्यमीट्। अथ 'डु कृञ् करणे' इति धातोरुदाहरति **चर्करीतीत्यादि**। **चर्क्रियादिति**। विधिलिङस्तिङः सार्वधातुकत्वाद् 'अकृत्सार्वधातुकयोः–' इति दीर्घो न। **आशिषीति**। आशीर्लिङ आर्धधातुकत्वाद् 'रिङ् शयग्लिङ्क्षु' इति रिङिति भावः। **लुङि अचर्कारीदिति**। सिचि वृद्धिः। **ऋतश्च इति तपरत्वा-**

ऋस्य योऽभ्यासस्तस्येत्यर्थः। ऋदन्ताद्धातोरिति पाठस्तु फलितार्थकथनपरतया नेयः। लोटि वर्वृतीतु २। वर्वर्तु ३। वर्वृत्तात्। वर्वृत्ताम् ३। वर्वृततु ३। वर्वृद्धि ३। **अङ्नेति**। 'पुषादिद्युतादि–' इत्यनेन। **चर्करीतीति**। डुकृञ् करणे। **चर्क्रियादिति**। सार्वधातुकत्वाद् 'अकृत्सार्व–' इति न दीर्घः। लुङि 'सिचि वृद्धिः–' इति वृद्धिः। अचर्कारीत् ३। अचर्कारिष्टाम् ३। अचर्कारिषुः ३। अचर्कारीः ३। **चाकर्तीति**। ईट्पक्षे चाकरीति। लोटि चाकरीतु, चाकर्तु, चाकीर्तात्।

रीत्, अतातः अतातीताम् अतातरुः। अतातारीत् अतातारिष्टामित्यादि। अर्तेर्यङ्लुकि द्वित्वेऽभ्यासस्योरदत्त्वं रपरत्वम्, 'हलादिः शेषः' (सू २१७४), रुक्, रिग्रीकोस्तु 'अभ्यासस्यासवर्णे' (सू २२१०) इति इयङ्, अरर्ति, अरियर्ति। अररीति, अरियरीति। अरृतः, अरियृतः। कि अत्, यण्,

---

न्नेहेति। रुग्रिग्रीक इति शेषः। चाकर्तीति। ईडभावे रूपम्। न चाभ्यासहस्वत्वे 'रीगृत्वतः—' इति रीक् शङ्क्यः, नित्यत्वादुरदत्त्वस्य प्राप्तेः। चाकीर्तः चाकिरति इत्यादि। ङित्त्वाद् गुणाभावे ऋत इत्वं रपरत्वम्। ईटि चाकरीति चाकीर्तः चाकिरति। चाकरांचकार। चाकरिता। चाकर्तु, चाकीर्तात् चाकिरतु। चाकीर्हि। चाकिराणि। लङि अचाकरीत्, अचाकः अचाकीर्ताम् अचाकरुः। विधावाशिषि च चाकीर्यात्। यासुटो ङित्त्वान्न गुणः। इत्वं 'हलि च' इति दीर्घः। चाकीर्याताम्। चाकीर्यास्ताम् इत्यादि। लुङि अचाकारीत् अचाकारिष्टाम् इत्यादि। एवं 'तॄ प्लवनतरणयोः' इत्यस्यापि रूपाणि। अद्वैतदीपिकायां तु चोद्यं नावतरीतर्तीति लेखकप्रमादः। चोद्यं तु नावतातर्तीति पाठः प्रामाणिकः। अर्तेरिति। 'सूचिसूत्रि—' इत्यादिना ऋधातोर्यङ्। तस्य लुक्। व्यपदेशिवत्त्वेन ऋ इत्यस्य आदिभूतादचः परत्वाद् द्वितीयैकाच्त्वाच्च द्वित्वम्। अभ्यासऋवर्णस्य अत्वे रपरत्वे अर् ऋ इति स्थिते हलादिशेषेण रेफस्य निवृत्तिः। अ ऋ इति स्थिते अभ्यासस्य रुक्। लटस्तिपि ईडभावे अर् ऋ ति इति स्थिते, तिपि ऋकारस्य गुणे अकारे रपरे सति, अरर्तीति रूपमित्यर्थः। रिग्रीकोस्त्विति। यङ्लुकि द्वित्वे उरदत्त्वे हलादिशेषे अ ऋ इति स्थिते रिकि रीकि च कृते तिपि उत्तरखण्डस्य ऋकारस्य गुणे अकारे रपरे कृते अरि अर्ति अरी अर्तीति स्थिते अभ्यासे रेफादिवर्णस्य यणं बाधित्वा 'अभ्यासस्यासवर्णे' इति इयङि अरियर्तीति रिग्रीकोस्तुल्यं रूपमित्यर्थः। अथ लटस्तिपि ईट्पक्षे आह अररीति, अरियरीति। अरृत इति। रुकि तसि रूपम्। ङित्त्वान्न गुणः। अरियृत इति। द्वित्वे उरदत्त्वे हलादिशेषे अ ऋ तस् इति स्थिते रिकि रीकि च कृते इयङादेशे रूपम्। क्ङि अदिति। क्ङि इत्यविभक्ति-

---

चाकीर्ताम्। चाकिरतु। चाकीर्हि। लङि अचाकरीत्। अचाकः। अचाकीर्ताम्। अचाकरुः। लिङि चाकीर्यात्। आशिषि तु चाकीर्यास्ताम्। लुङि अचाकारीत्। अचाकारिष्टाम्। एवं तातरीतीत्यादि। अर्तेरिति। भौवादिकजौहोत्यादिकयोर्ग्रहणम्। उरदत्वमिति। केचित्तु 'गुणो यङ्लुकोः' इत्यभ्यासस्य गुणमाहुः। फले तु न विशेषः। रिग्रीकोस्त्विति। एवं च अरियर्तीति रूपमुभयोस्तुल्यमिति

रुको 'रो रि' (सू १७३) इति लोपः, न च तस्मिन्कर्तव्ये यणः स्थानिवत्त्वम्, पूर्वत्रासिद्धे तन्निषेधात्, आरति, अरियूति। लिङि श्तिपा निर्देशाद् 'गुणोऽर्ति–' (सू २३८०) इति गुणो न। रिङ्, रलोपः दीर्घः, आरियात्, अरि-

कानिर्देश उदाहरणसूचनार्थः। 'अदभ्यस्तात्' इति झेः अदादेश इति यावत्। यणीति। रुकि कृते अर् ऋ अति इति स्थिते ऋकारस्य यण् रेफ इत्यर्थः। तथा च अर् र् अतीति स्थिते आह रुको रो रीति लोप इति। ननु रेफस्य लोपे कर्तव्ये यणादेशसंपन्नस्य रेफस्य 'अचः परस्मिन्–' इति स्थानिवत्त्वाद् ऋकारपरकत्वाद्रेफपरकत्वाभावात् कथं पूर्वरेफस्य लोप इत्यत आह पूर्वत्रासिद्धे तन्निषेधादिति। पूर्वत्रासिद्धीयकार्ये कर्तव्ये स्थानिवत्त्वनिषेधादित्यर्थः। आरतीति। अर् र् अति इति स्थिते पूर्वरेफस्य लोपे सति 'ढ्रलोपे–' इति दीर्घः। न च यणः स्थानिवत्त्वं शङ्क्यम्, दीर्घविधौ तन्निषेधादिति भावः। अरियूतीति। द्वित्वे उरदत्त्वे हलादिशेषे रिकि रीकि च कृते, परत्वादभ्यासस्य इयङि, ततो यणि रिग्रीकोस्तुल्यमेव रूपमित्यर्थः। अरर्षि, अरियर्षि अररीषि, अरियरीषि। अर्ऋथः अरियृथः। अरर्मि, अरियर्मि अररीमि, अरियरीमि। अर्ऋवः, अरियृवः। अररांचकार, अरियरांचकार। अररिता, अरियरिता। अररिष्यति, अरियरिष्यति। अरर्तु, अरियर्तु, अररीतु, अरियरीतु अर्ऋतात् अरियृतात्। अर्ऋताम्, अरियृताम्। आरतु, अरियूतु। अर्ऋहि, अरियृहि। अरराणि, अरियराणि। अरराव, अरियराव। लङि आरः, आरियः आररीत्, आरियरीत्। आर्ऋताम्, आरियृताम्। आररुः, आरियरुः। आरः, आरियः आररीः, आरियरीः। आर्ऋतम्, आरियृतम्। आर्ऋत, आरियृत। आररम्, आरियरम्। आर्ऋव, आरियृव। विधिलिङि अर्ऋयात्, अरियृयात्। अर्ऋयाताम् अरियृयाताम्। अर्ऋयुः, अरियृयुः इत्यादि। आशीर्लिङि विशेषमाह लिङि श्तिपेति। रुकि अर् ऋ यात् इति स्थिते 'अर्ति' इति श्तिपा निर्देशाद् 'गुणोऽर्ति–' इति गुणो नेत्यर्थः। रिङिति। ऋकारस्येति शेषः। तथा च अर् रि यात् इति स्थिते आह दीर्घ इति। 'रो रि' इति लोपे 'ढ्रलोपे–' इति दीर्घ इत्यर्थः। तथा च परिनिष्ठितमाह आरियादिति।

भावः। आरतीति। 'रो रि' इति लोपे 'ढ्रलोपे–' इति दीर्घः। 'दीर्घोऽकितः' इति दीर्घस्तु न भवति कित्त्वात्। अरियूतीति। परत्वात्पूर्वमियङ्। ततो यण्। रिग्रीकोस्तुल्यमिदम्। मध्यमोत्तमयोस्तु। अरर्षि। अरियर्षि। अररीषि। अरियरीषि। अर्ऋथः। अरियृथः। अरर्मि। अरयर्मि। अररीमि। अरियरीमि। अर्ऋवः। अरियृवः। लिटि अररांचकार। रिग्रीकोस्तु। अरियरांचकार। लुटि अररिता।

यियात्। गृहू ग्रहणे, जर्गृहीति, जर्गर्ढि जर्गृढः जर्गृहति। अजर्घर्ट्। गृह्णाते-

---

रिग्रीकोस्त्वाह **अरिरियियादिति**। अरि ऋ यात्, अरी ऋ यात् इति स्थिते इवर्णस्य इयङ् ऋकारस्य रिङ्। 'लोपो व्योः–' इति यलोपस्तु न, बहिरङ्गत्वेन रिङोऽसिद्धत्वाद् 'अचः परस्मिन्–' इति स्थानिवत्त्वाच्च। 'न पदान्त–' इति निषेधस्तु न शङ्क्यः, 'स्वरदीर्घयलोपेषु लोपरूपाजादेश एव न स्थानिवत्' इत्युक्तेरित्यलम्। लुङि आरारीत्, आरियारीत्। लृङि आररिष्यत्, आरियरिष्यत्। **गृहू ग्रहणे इति**। ऋदुपधोऽयम्। यङ्लुकि द्वित्वे उरदत्त्वे हलादिशेषे अभ्यासस्य रुग्रिग्रीकः, तदाह **जर्गृहीतीत्यादि**। ईट्पक्षे 'नाभ्यस्तस्याचि पिति सार्वधातुके' इति लघूपधगुणनिषेधः। ईडभावे त्वाह **जर्गर्ढि इत्यादि**। जर्गृह् ति इति स्थिते लघूपधगुणे रपरत्वे ढत्वधत्वष्टुत्वढलोपाः। 'यणो मयः–' इति शिष्टस्य ढस्य द्वित्वविकल्पः। एवं जरिगर्ढि, जरीगर्ढि। **जर्गृढ इति**। रुक्, ढत्वधत्वष्टुत्वढलोपाः। ङित्वान्न गुणः। एवं जरिगृढः जरीगृढः। **जर्गृहतीति**। 'अदभ्यस्तात्' इत्यत्। जर्गृहीषि, जरिगृहीषि, जरीगृहीषि। 'नाभ्यस्तस्याचि

रिग्रीकोस्तु अरियरिता। अररिष्यति। अरियरिष्यति। अरर्तु। आरियर्तु। अर्ॠतात्। अरियृतात्। अर्ॠताम्। अरियृताम्। आरतु। अरियतु। अर्ॠहि। आरियृहि। अरराणि। अरियराणि। अरराव। अरियराव। लङि आरः आरियः। आररीत्। आरियरीत्। आर्ॠताम्। आरियृताम्। आररुः। आरियरुः। आरः। आरियः। आररीः। आरियरीः। आर्ॠतम्। आरियृतम। आर्ॠत। आरियृत। आररम्। आरियरम्। आर्ॠव। आरियृव। विधिलिङि अर्ॠयात्। आरियृयात्। अर्ॠयाताम्। अरियृयाताम्। अर्ॠयुः। **लिङीति**। आशीर्लिङीत्यर्थः। **अरियियादिति**। रिग्रीकोः–अरियृ इति स्थिते लिङि रिङ्। बहिरङ्गत्वेन रिङोऽसिद्धत्वाद्यलोपो न भवति, 'अचः परस्मिन्–' इति स्थानिवत्त्वाच्च। न च 'न पदान्त–' इति निषेधः शङ्क्यः, स्वरदीर्घयलोपेषु लोपरूपाजादेश एव न स्थानिवदित्युक्तत्वात्। न च अकृतव्यूहपरिभाषया इयङ् नेति शङ्क्यम्, रिङः स्थानिवत्त्वेन निमित्तविनाशाभावाद् उक्तपरिभाषाया अप्रवृत्तेः। अतएव अरियृतात्यपि सिद्धम्। तत्रापि यणः स्थानिवत्त्वेन निमित्तविनाशाभावात् तत्परिभाषाया अप्रवृत्तेरियङो निर्बाधत्वात्। क्वचित्तु मूलपुस्तकेषु परत्वान्नित्यत्वाच्च पूर्वं रिङि कृते इयङोऽप्रवृत्तिरित्याशयेन अरिरियात् अरीरियादिति पठ्यते, तदापाततः। अरियृतातीति रूपासिद्ध्या पूर्वोत्तरग्रन्थयोर्विरोधापत्तेः। लुङि आरारीत्। आरियारीत्। लृङि आररिष्यत्। आरियरिष्यत्। **जर्गृहतीति**। 'नाभ्यस्तस्याचि–' इति गुणनिषेधः। मध्यमोत्तमयोस्तु

स्तु जाग्रहीति, जाग्राढि। तसादौ ङिन्निमित्तं संप्रसारणम्, तस्य बहिरङ्गत्वेना-सिद्धत्वाच्च रुगादयः, जागृढः जागृहति। जाग्रहीषि, जाग्रढि। लुटि जाग्र-

---

पिति–' इति न लघूपधगुणः। जर्घर्ढि, जरिघर्ढि, जरीघर्ढि। जर्गृढः, जरिगृढः, जरीगृढः। जर्गृढ, जरिगृढ, जरीगृढ। जर्गृहीमि, जरिगृहीमि, जरीगृहीमि, जर्गर्ह्मि, जरिगर्ह्मि, जरीगर्ह्मि। जर्गृह्वः, जरिगृह्वः, जरीगृह्वः। जर्गृह्मः, जरिगृह्मः, जरीगृह्मः। जर्गर्हांचकार, जरिगर्हांचकार, जरीगर्हांचकार। जर्गर्हिता, जरिगर्हिता, जरीगर्हिता। जर्गर्हिष्यति, जरिगर्हिष्यति, जरीगर्हिष्यति। जर्गृहीतु, जरिगृहीतु, जरीगृहीतु, जर्गर्ढु, जरिगर्ढु, जरीगर्ढु। जर्गृढात्, जरिगृढात्, जरीगृढात्। जर्गृढाम्, जरिगृढाम्, जरीगृढाम्। जर्गृहतु, जरिगृहतु, जरीगृहतु। जर्गृढि, जरिगृढि, जरीगृढि। जर्गृहाणि, जरिगृहाणि, जरीगृहाणि। लङि अजर्गृहीत्, अजरिगृहीत्, अजरीगृहीत्। ईडभावे तु अजर्गर्ह् त् इति स्थिते हल्ङ्यादिना तलोपे हस्य ढत्वे गस्य भष् घकारः। अजर्घर्ट् अजरिघर्ट् अजरीघर्ट्। एकाज्ग्रहणे सत्यपीह यङ्लुकि भष्, 'गुणो यङ्लुकोः' इत्यनेन 'श्तिपा शपा–' इति निषेधस्यानित्यत्वज्ञापनादित्याहुः। अजर्गृढाम् ३ अजर्गृहुः ३। अजर्गृहीः ३ अजर्घर्ट् ३ अजर्गृढम् ३ अजर्गृढ ३ अजर्गृहम् ३ अजर्गृह्व ३ अजर्गृह्म ३। जर्गृह्यात् ३। लुङि 'अस्तिसिचः–' इति नित्यमीट्। अजर्गर्हीत् ३। अजर्गर्हिष्यत्। **गृह्णातेस्त्विति**। 'ग्रह उपदाने' इत्यस्मादित्यर्थः। अदुपधोऽयम्। ईटि आह **जाग्रहीतीति**। यङो लुका लुप्तत्वात् तिपः पित्त्वाच्च 'ग्रहिज्या–' इति संप्रसारणं नेति भावः। ईडभावे त्वाह **जाग्राढीति**। जाग्रह् ति इति स्थिते ढत्वधत्वष्टुत्वढलोपदीर्घाः। जाग्रह् तस् इति स्थिते आह **तसादाविति**। कृते संप्रसारणे ऋदुपधत्वाद् रुगादीनाशङ्क्याह **तस्येति**। संप्रसारणस्येत्यर्थः। **जागृढ इति**। ढत्वधत्वष्टुत्वढलोपाः। 'ढ्रलोपे–' इति दीर्घस्तु

जर्गृहीषि ३। जर्घर्ढि ३। जर्गृढः ३। जर्गृहीमि ३। जर्गर्ह्मि ३ जर्गृह्वः ३। जर्गृह्मः ३। जर्गृहांचकार। जर्गर्हिता। जरीगर्हिता। इहानुबन्धनिर्देशादूदित्त्वलक्षण इड्विकल्पो न। जर्गृहीतु। जर्गर्ढु। जर्गृढाम्। जर्गृहतु ३। जर्गृढि ३। मिपि जर्गृहाणि ३। लङि अजर्गृहीत् ३। ईडभावे 'एकाच–' इति भष्भावः। अजर्घर्ट् ३। यद्यपि इह यत्रैकाज्ग्रहणं चेति निषेधाद्भष्भावो दुर्लभस्तथापि 'गुणो यङ्लुकोः' इत्यनेन 'श्तिपा शपा–' इत्यादिनिषेधस्यानित्यत्वज्ञापनाद् भष्भावोऽत्र प्रवर्तते इत्याहुः। अजर्गृढाम्। अजर्गृहुः ३। अजर्गृहीः। अजर्घर्ट् ३ अजर्घर्ड ३ अजर्गृहम् ३। अजर्गृह्व ३। जर्गृह्यात् ३। अजर्गर्हीत। अजर्गर्हिष्टाम् ३। अजर्गर्हिष्यत्। **जाग्रहीतीति**। ग्रह उपादाने। यङो लुका लुप्तत्वात्तन्निमित्तं 'ग्रहिज्या–'

हिता । 'ग्रहोऽलिटि–' (सू २९६२) इति दीर्घस्तु न, तत्र एकाच इत्यनुवृत्तेः। माधवस्तु दीर्घमाह । तद्भाष्यविरुद्धम् । जर्गृभीति, जर्गृब्धि जर्गृद्धः जर्गृभति ।

न, ऋकारस्यानण्त्वात् । जागृहति । सिपः पित्त्वान्न संप्रसारणमिति भावः । **जाग्रहीषि जाघ्रक्षीति** । ईडभावे हस्य ढः, तस्य कः, सस्य षः, भष्भावः । जागृढः जागृढ । जाग्रहीमि, जाग्रह्मि जागृह्वः जागृह्मः । **इत्यनुवृत्तेरिति** । 'एकाचो द्वे–' इति सूत्रे हरदत्तेन तथोक्तत्वादिति भावः । **माधवस्त्विति** । एकाज्ग्रहणं नानुवर्तत इति तदाशयः । **भाष्यविरुद्धमिति** । 'एकाचो द्वे प्रथमस्य' इति सूत्रभाष्ये 'ग्रह उपादाने' इत्यस्माद्यङि संप्रसारणे अभ्यासस्य रीकि यङन्तात् जरीगृहिता, जरीगृहितम्, जरीगृहितव्यमित्यत्र इटो दीर्घाभावं सिद्धवत्कृत्य तत्र दीर्घमाशङ्क्य ग्रहोऽङ्गात्परस्य इटो दीर्घो विधीयते । जरीगृह् इत्यङ्गम्, तच्च न ग्रहधातुरिति निरूप्याङ्गविशेषणसामर्थ्यादेव 'प्रकृतिग्रहणे यङ्लुगन्तस्याऽपि ग्रहणम्' इति नात्र प्रवर्तत इति समाहितम् । यङन्ते उक्तो न्यायो यङ्लुगन्तेऽपि जाग्रहितेत्यादौ समान इत्यादि प्रौढमनोरमायां ज्ञेयम् । न च हरदत्तमत एकाज्ग्रहणानुवृत्त्यैवात्र दीर्घनिवारणे सति भाष्योक्तमिदं समाधानं नादरणीयमिति वाच्यम्, उपायस्य उपायान्तरादूषकत्वादित्यलम् । जाग्रहिष्यति । जाग्रहीतु, जाग्राढु, जागृढात् जागृढाम् जागृहतु । हौ जागृढि । जाग्रहाणि लङि अजाग्रहीत्, अजाघ्रट् अजागृढाम् । अजागृढम् अजागृढ । अजाग्रहम् अजागृह्व अजागृह्म ।

इति संप्रसारणमिह नेति भावः । **जागृढ इति** । 'दीर्घोऽकितः'। **तत्रैकाच्च इति** । 'ग्रहो लिटि–' इत्यत्रैकाच इत्यनुवर्तत इति 'एकाचो द्वे–' इत्यस्मिन् सूत्रे हरदत्तेनोक्तत्वादिति भावः । **माधवस्त्विति** । अयं भावः—'ग्रहोऽलिटि–' इति सूत्रे यङ्लोपे चोक्तमिति वार्तिकतदीयभाष्यकैयटादिपर्यालोचनया जरीगृहीतेत्यादिषु ग्रहेर्यङन्तान्नृचस्तासेर्वा य इट् तस्य दीर्घाभावे युक्तिद्वयं लभ्यते । पूर्वस्मादपि विधौ स्थानिवद्भाव इत्येके । ग्रहेर्विहितो य इट् तस्य दीर्घ इत्यपरे । तत्राद्यः पक्षो भाष्यवार्तिककाररीत्या । ताभ्यां हि 'पूर्वत्रासिद्धे न स्थानिवत्' इत्यवष्टभ्य दीर्घादिग्रहणस्य प्रत्याख्यानात् । त्रैपादिकदीर्घातिरिक्तदीर्घेऽस्मिन् कर्तव्ये स्थानिवद्भावस्य तन्मते सुवचत्वात् । द्वितीयस्तु सूत्ररीत्या, तेन तु सामान्यतो दीर्घविधौ स्थानिवद्भावस्य निषिद्धत्वात्तन्मते स्थानिवद्भावस्य वक्तुमशक्यत्वात् । एवं च यङ्लुकि दीर्घप्रवृत्तौ न किंचिद् बाधकम् । यङ्लुकोऽनैमित्तिकत्वाद् अज्भक्तादेशत्वाच्च । स्थानिवद्भावायोगात् । 'द्विःप्रयोगो द्विर्वचनं षाष्ठम्' इति सिद्धान्ताद्यङ्लुगन्ताद् गृह्णातेर्विहितस्य ग्रहेर्विहितत्वानपायाच्च । **तद्भाष्यादिविरुद्धमिति** । आदिशब्देन कैयटहरदत्तौ

जर्गृधीषि, जर्घर्त्सि। अजर्गृधीत्। ईडभावे गुणः, हल्ङ्यादिलोपः, भष्भावः, जश्त्वचर्त्वे, अजर्घर्त्। अजर्गृद्धाम्। सिपि 'दश्च' (सू २४६८) इति पक्षे रुत्वम्।

जागृह्यात्। लुङि अज ग्रहीत्। 'ह्मयन्त–' इति न वृद्धिः। 'अस्तिसिचः–' इति नित्यमीट्। अजाग्रहिष्यत्। 'गृधु अभिकाङ्क्षायाम्' अस्माद्यङ्लुगन्ताल्लटस्तिपि ईटि आह **जर्गृधीतीति**। 'नाभ्यस्तस्य–' इति न लघूपधगुणः। ईडभावे आह **जर्गर्द्धीति**। जर्गृध् ति इति स्थिते 'झषस्तथोः–' इति तकारस्य धः। लघूपधगुणो रपरत्वम्। **जर्गृद्ध इति**। तसादौ ङित्त्वान्न गुणः। 'झषस्तथोः–' इति तस्य धः। **जर्घर्त्सीति**। जर्गृध् सि इति स्थिते, गस्य भष् घः, गुणः, रपरत्वम्, धस्य चर्त्वम्। जर्गर्ध्मि ३, जर्गृधीमि ३। जर्गृध्वः ३। जर्गर्धांचकार ३। जर्गर्धिता ३। जर्गर्धिष्यति ३। जर्गृधीतु २ जर्गर्द्धु २ जर्गृद्धात् ३। हौ जर्गृद्धि ३। जर्गृधानि ३। लङि तिपि ईट् अजर्गृधीत् ३ **ईडभावे इति**। अजर्गृध् त् इति स्थिते पित्त्वादङित्त्वाद् गुणे रपरत्वे हल्ङ्यादिना तकारलोपे पदान्तत्वाद् गस्य भष् घकारः। धस्य जश्त्वेन दकारः, तस्य 'वावसाने' इति चर्त्वविकल्प इत्यर्थः। **अजर्घर्त् इति**। 'रात्सस्य' इति नियमान्न संयोगान्तलोपः। अजर्गृद्धाम् अजर्गृधुः। सिपि ईडभावपक्षे अजर्गृध् स् इति स्थिते, गुणे, रपरत्वे, हल्ङ्यादिलोपे भष्भावे, धस्य जश्त्वे, तस्य चर्त्वविकल्पे, पूर्ववदेव रूपं सिद्धवत्कृत्याह **सिपि दश्चेति पक्षे रुत्वमिति**। तथा च अजर्घर् र् इति

गृह्येते। विरोधश्चात्र मनोरमायामुपपादितः। तथा हि 'एकाचो द्वे प्रथमस्य' इति सूत्रे ग्रहेरज्ञादिति भाष्यमुपादाय कैयट आह 'तृचो हि जरीगृहीत्यत्र न तु ग्रहिः, विशेषणसामर्थ्याद्धि यथाश्रुतरूपाश्रयणम्' इति। यद्यपि तत्र यङन्तं प्रकम्येदमुक्तम्, तथापि युक्तिसाम्याद्यङ्लुगन्तेऽपि न दीर्घ इति लक्ष्यते। एकाज्ग्रहणमनुवर्तयन् हरदत्तोऽप्यत्रानुकूलः। न ह्यस्मिन्पक्षे यङ्लुकि दीर्घस्य प्रसक्तिरस्ति। एवं च पूर्वस्मादपि विधौ स्थानिवद्भाव इति ग्रहेर्विहितस्य य इट् तस्य दीर्घ इति च प्रागुक्तसमाधानमुपायस्योपायान्तरादूषकत्वादिति न्यायेन यङन्तांशे उपायान्तरपरतया नेयम्। न च ग्रहीति यथाश्रुतरूपाश्रयणे गृहीत इत्यादाविटो दीर्घो न स्यादिति वाच्यम्, अङ्गसंज्ञाप्रवृत्तिवेलायां यथाश्रुतरूपस्यैव सत्त्वात्। ग्राहितमित्यादौ तु नैवम्। एकाच इति समाधानं तु णिज्भिन्नविषयकमेव, 'निष्ठायां सेटि' इति णिलोपे ग्राहितमित्यादावेकाच्त्वानपायात्। तदित्थम्—'यङ्लुगन्ताण्णिजन्ताच्च यङन्ताच्च ग्रहेरिटः। द्विधा त्रिधा चतुर्धा च दीर्घप्राप्तिः समाहिता'। अस्यार्थः—यङ्लुगन्ताद्दीर्घे प्राप्ते समाधानद्वयम्। ग्रहेरज्ञादिति व्याख्यानमेकाच इत्यनुवृत्तिश्चेति। णिजन्तात्तु ग्रहिस्वरूपाभावः, विहितविशेषणं स्थानिवद्भावश्चेति समाधानत्रयम्। यङन्तात्समाधानचतु-

अजर्घाः । अजर्गर्धीत् अजर्गर्धिष्टाम् । पाप्रच्छीति, पाप्रष्टि । तसादौ 'ग्रहिज्या-' (सू २४१२) इति संप्रसारणं न भवति, श्तिपा निर्देशात् । 'च्छ्वोः शूड्-' (सू २५६१) इति शः । 'व्रश्च-' (सू २९४) इति षः । पाप्रष्टः पाप्रच्छति । पाप्रश्मि पाप्रच्छ्वः पाप्रश्मः । 'यकारवकारान्तानां ऊठ्भाविनां यङ्लुङ्

स्थिते 'रो रि' इति लोपे, 'ढ्लोपे-' इति दीर्घे, शिष्टरेफस्य विसर्गे, अजर्घाः इति रूपमित्यर्थः । अजर्गृद्धम् अजर्गृद्ध । अजर्गृधम् अजर्गृध्व अजगृध्म । लुङ्याह अजर्गर्धीदिति । 'अस्तिसिचः-' इति नित्यमीट् । पाप्रच्छीतीति । 'प्रच्छ ज्ञीप्सायाम्' अस्माद्यङ्लुगन्ताल्लटस्तिपि ईटि रूपम् । ईडभावे आह पाप्रष्टीति । 'व्रश्च-' इति छस्य षः । तकारस्य ष्टुत्वेन टः । 'च्छ्वोः-' इति छस्य शकारस्तु नात्र भवति, तस्य अनुनासिकादौ प्रत्यये क्वौ झलादौ किति ङिति च विहितत्वात् । ननु तिपः पित्त्वेन ङित्त्वाभावाद् 'ग्रहिज्या-' इति संप्रसारणाभावेऽपि तसो ङित्त्वात् संप्रसारणं दुर्वारमित्यत आह तसादाविति । श्तिपेति । 'ग्रहिज्या-' इति सूत्रे पृच्छतीति श्तिपा निर्देशादित्यर्थः । पाप्रच्छतीति । 'अदभ्यस्तात्' इत्यत् । पाप्रच्छीषि । सिपि ईडभावे तु 'च्छ्वोः-' इति छस्य न शः, सिपो झलादित्वेऽपि ङित्त्वाभावात् । किंतु 'व्रश्च-' इति ष एव । 'षढोः-' इति षस्य कः, सस्य षत्वम् । पाप्रक्षि पाप्रष्ठः पाप्रष्ठ । पाप्रश्मीति । अनुनासिकप्रत्ययपरकत्वात् छस्य 'च्छ्वोः-' इति श इति भावः । पाप्रच्छ्व इति । अत्र 'च्छ्वोः-' इति न शः, वसो झलादित्वाभावात् । पाप्रश्म इति । अनुनासिकादिप्रत्ययपरकत्वात् छस्य शः । पाप्रच्छांचकार । पाप्रच्छिता । पाप्रच्छिष्यति । पाप्रच्छीतु, पाप्रष्टु, पाप्रष्टात् पाप्रष्टाम् पाप्रच्छतु । हेर्धिः, अपित्त्वेन ङित्त्वाद् झलादित्वाच्च छस्य शः, तस्य 'व्रश्च-' इति षः, ष्टुत्वेन धस्य ढः, षस्य जश्त्वेन डः, पाप्रड्ढि । पाप्रच्छानि । लङि तिपि ईटि अपाप्रच्छीत् । ईडभावे तु अपाप्रच्छ् त् इति स्थिते हल्ङ्यादिना तलोपे छस्य षः, तस्य जश्त्वचर्त्वे । अपाप्रट् अपाप्रष्टाम् अपाप्रच्छुः । अपाप्रच्छीः, अपाप्रट् अपाप्रष्टम् अपाप्रष्ट । अपाप्रच्छम् अपाप्रच्छ्व अपाप्रश्म । लिङि पाप्रच्छ्यात् । लुङि अपाप्रच्छीत् । 'अस्तिसिचः-' इति नित्यमीट् अपाप्रच्छिष्यत् । ऊठ्भाविनामिति । 'भू प्राप्तौ' चुरादिराधृषीयः । तस्माद् 'आवश्यकाधमर्ण्ययोर्णिनिः' इति भविष्यदर्थे णिनिः । ऊठं प्राप्स्यतामित्यर्थः ।

ष्टयम्, 'एकाचः-' इत्यनुवृत्तिः, पूर्वोक्तसमाधानत्रयं चेति । अजर्घा इति । गृधु अभिकाङ्क्षायाम् । इह अपदान्तस्यापि रेफस्य 'रो रि' इति लोपो भवत्येव, तत्र मण्डूकप्लुत्या पदस्येत्यननुवर्तनात् । पाप्रष्टीति । प्रच्छ ज्ञीप्सायाम् । 'व्रश्च-' इति षः । पाप्रच्छिता । पाप्रच्छिष्यति । पाप्रष्टु । पाप्रष्टात् । पाप्रष्टाम् । पाप्रच्छतु ।

नास्ति' इति 'च्छ्वोः--' (सू २५६१) इति सूत्रे भाष्ये ध्वनितम्। कैयटेन स्पष्टीकृतम्। इदं च 'च्छ्वोः-- (सू २५६१) इति यत्रोठ् तद्विषयकम्। 'ज्वरत्वर--' (सू २६५४) इत्यूठ्भाविनोः स्रिविमव्योस्तु यङ्लुगस्त्येवेति न्याय्यम्।

ऊठ्विषयाणामिति यावत्। ध्वनितमिति। सूचितमित्यर्थः। स्पष्टीकृतमिति। तथा हि 'च्छ्वोः--' इति सूत्रे क्ङिद्ग्रहणानुवृत्तौ कांश्चिद् दोषानुद्भाव्य परिहृत्य क्ङिद्ग्रहणानुवृत्तिं स्वीकृत्योक्तं भाष्ये एतावानेव विशेषः। अनुवर्तमाने क्ङिद्ग्रहणे छ्ः षत्वं वक्तव्यमिति। अत्र कैयटः--प्रष्टा प्रष्टुमित्यादौ 'च्छ्वोः--' इति छस्य शत्वे कृते तस्य 'व्रश्च--' इति षत्वे ष्टुत्वमिति स्थितिः। तत्र क्ङितीत्यनुवृत्तौ छस्य षत्वं न स्यात्। अतः छस्य षत्वं वक्तव्यमित्यर्थः। न च क्ङिद्ग्रहणानुवृत्तावत्र शत्वाभावेऽपि न दोषः, व्रश्चादिना छस्य षत्वे इष्टसिद्धेरिति वाच्यम्, 'च्छ्वोः--' इत्यत्र 'छस्य षत्वं वक्तव्यम्' इत्यनेनैव प्रष्टेत्यादिसिद्धेः व्रश्चादिसूत्रे छग्रहणं न कर्तव्यमित्याशयात्। न च प्राडिति क्विबन्तात् सोर्लोपे षत्वार्थं व्रश्चादिसूत्रे छग्रहणमिति वाच्यम्, तत्रापि क्विब्निमित्तशादेशस्य दुर्निवारत्वात्। विच् तु प्रच्छधातोरनभिधानान्नास्ति। एवं चात्र भाष्ये 'ऊठ्भाविभ्यो यङ्लुङ् नास्ति' इत्युक्तप्रायम्। अन्यथा 'च्छ्वोः--' इत्यत्र क्ङिद्ग्रहणानुवृत्तौ दिवेर्यङ्लुकि तिबादौ ईडभावे लघूपधगुणे 'लोपो व्योः--' इति वलोपे देदेति देदेषीत्यादावूठः अभावे रूपम्। तदननुवृत्तौ तु वस्य ऊठि देद्योति देद्योषि इत्यादि रूपमिति विशेषस्य सत्त्वादेतावानेवेत्येवकारो विरुध्येत। अत ऊठ्भाविनां यकारवकारान्तानां यङ्लुङ् नास्तीति विज्ञायते इत्यलम्। इदं चेति। 'च्छ्वोः--' इति सूत्रेण यत्र ऊठ् प्रवर्तते तद्विषयकमेव इदम् उक्तं ज्ञापनमित्यर्थः। स्रिविमव्योस्त्विति। स्रिवु गतिशोषणयोः, मव्य बन्धने इत्यनयोरित्यर्थः। न्याय्यमिति। उक्तज्ञापनस्य 'च्छ्वोः--'

पाप्रड्ढि। पाप्रच्छानि। अपाप्रच्छीत्, अपाप्रट्। अपाप्रष्टाम्। अपाप्रच्छुः। अपाप्रच्छीः, अपाप्रट्। अपाप्रष्टम्। अपाप्रष्ट। अपाप्रच्छम्। अपाप्रच्छ्व। अपाप्रश्म। भाष्ये ध्वनितमिति। 'च्छ्वोः शूड्--' इति सूत्रे भाष्ये किद्ग्रहणमनुवर्तते न वेति विकल्प्य कांश्चिद्दोषानुद्भाव्य परिहृत्य चोक्तम्--एतावानेव विशेषः--अनुवर्तमाने किद्ग्रहणे 'छ्ः षत्वं वक्तव्यम्' इति, अननुवर्तमाने त्वनेन छः शत्वे कृते शान्तत्वादेव षो भविष्यतीति प्रष्टा प्रष्टुमित्यादिसिद्धये व्रश्चादिसूत्रे छग्रहणं न कर्तव्यमिति भावः। एवं हि वदता भाष्यकृता ऊठ्भाविभ्यो यङ्लुग् नास्तीत्युक्तप्रायम्। अन्यथा दिवेर्यङ्लुकि ईडभावपक्षे देदेति देदेषि इत्यादौ ऊठो भावाभावाभ्यां महान् विशेषः स्यात्। तत्र किद्ग्रहणानुवृत्तावूठः प्रवृत्त्या देद्योति देद्योषीत्यादिरूपविशेषलाभात्। ततश्चैतावानेवेत्येवकारो विरुध्येत। स्रिविमव्योस्त्विति। स्रिवु गतिशोषणयोः।

माधवादिसंमतं च । मव्य बन्धने, अयं यान्त ऊठ्भावी । 'तेवृ देवृ देवने' इत्यादयो वान्ताः । इय गतौ जाहयीति, जाहति जाहतः जाहयति । जाहयीषि, जाहसि । वलि लोपे यणादौ दीर्घः, जाहामि जाहावः जाहामः । हर्य गतिकान्त्योः, जाहर्यीति, जाहर्ति जाहर्तः जाहर्यति । लोटि जाहर्हि । अजाहः अजाहर्ताम् अजाहर्युः । मव बन्धने । २६५४ ज्वरत्वरस्रिव्यविमवामुपधायाश्च । (६-४-२०) ज्वरादीनामुपधावकारयोरूठ् स्यात्क्वौ

इति सूत्रस्थभाष्यमूलकत्वादिति भावः । ननु ज्ञापनस्य सामान्यापेक्षत्वं कुतो नाश्रीयते इत्यत आह **माधवादिसंमतं चेति** । उक्तविशेषवत्त्वमिति शेषः । **ऊठ्भावीति** । अतो नास्य यङ्लुगिति भावः । **वान्ता इति** । ऊठ्भाविन इति शेषः । नैतेषामपि यङ्लुगिति भावः । ऊठ्भाविनामिति विशेषणस्य व्यावर्त्यमाह **हय गताविति** । अस्य यान्तत्वेऽपि ऊठ्विषयत्वाभावादस्त्येव यङ्लुगिति भावः । **जाहतीति** । तिप ईडभावे 'लोपो व्योः–' इति यलोपः । मिपि ईडभावे जाहय् मि इति स्थिते आह **वलि लोपे इति** । ईटि जाहयीमि जाहयांचकार । जाहयिता । जाहयिष्यति । लोटि जाहयीतु जाहतात् जाहताम् जाहयतु । जाहहि । जाहयानि जाहयाव । लङि अजाहयीत् अजाहत् अजाहताम् अजाहयुः । अजाहयीः अजाहः अजाहतम् अजाहत । अजाहयम् अजाहाव अजाहाम । जाहय्यात् । लुङि 'ह्मयन्त–' इति न वृद्धिः । 'अस्तिसिचः–' इति नित्यमीट् । अजाहयीत् अजाहयिष्टाम् । अजाहयिष्यत् । **जाहर्यीति** । तिपि जाहर्य् ति इति स्थिते ईडभावे यलोपः । **जाहर्हीति** । हौ यलोपः । लङ्स्तिपि अजाहर्य् त् इति स्थिते यलोपः । हल्ङ्यादिना तकारलोपः । रेफस्य विसर्ग इति मत्वाह **अजाह इति** । सिप्यप्येवं रूपम् । **ज्वरत्वरस्रिव्यविमवामुपधायाश्च** । ज्वर, त्वर, स्रिवि, अवि, मव् एषां द्वन्द्वः । 'च्छ्वोः शूठ्–' इत्यतो वकारग्रहणम् ऊठ्ग्रहणम् अनुनासिके इति चानुवर्तते । छस्य श इति नानुवर्तते, ज्वरादिषु छस्य अभावेन असंभवात् । 'अनुनासिकस्य क्विझलोः क्ङिति' इत्यतः क्विझलोरिति चानुवर्तते । चकारो वकारसमुच्चयार्थः, तदाह

मव बन्धने । **जाहामीति** । ईट्पक्षे जाहयीमि । लोटि जाहयीतु । जाहतु । जाहतात् । जाहताम् । जाहयतु । जाहहि, जाहतात् । जाहयानि । जाहयाव । जाहयाम । लङि अजाहयीत्, अजाहत् । अजाहताम् । अजाहयुः । अजाहयीः, अजाहः । अजाहतम् । अजाहत । अजाहयम् । अजाहाव । अजाहाम । जाहय्यात् । 'ह्मयन्तक्षण–' इति वृद्धिनिषेधः । अजाहयीत् । अजाहयिष्टाम् । अजाहयिष्यत् । **ज्वरत्वर** । ज्वर रोगे । ञित्वरा संभ्रमे । अत्र वृत्तौ झलादौ क्ङितीत्युक्तम्,

झलादावनुनासिकादौ च प्रत्यये । अत्र क्ङिति इति नानुवर्तते । अवतेस्तुनि ओतुरिति दर्शनात् । अनुनासिकग्रहणं चानुवर्तते, अवतेर्मन्प्रत्यये तस्य टिलोपे ओम् इति दर्शनात् । ईडभावे ऊठि पिति गुणः । मामोति, मामवीति मामूतः मामवति । मामोषि । मामोमि मामावः मामूमः । मामोतु, मामूतात् ।

ज्वरादीनामिति । अवतेस्तुनीति । अवधातोरौणादिके तुन्प्रत्यये कृते, अकारवकारयोरूठि, तस्य गुणे, ओतुरिति दृश्यते । क्ङितीत्यनुवृत्तौ तु तन्न स्यादिति भावः । ओमिति । 'अवतेष्टिलोपश्च' इत्यौणादिकसूत्रम् । 'अव रक्षणे' इति धातोर्मन्प्रत्ययः स्यात् प्रत्ययस्य टेर्लोपश्चेति तदर्थः । तथा च अव् म् इति स्थिते उपधाभूतस्य अकारस्य वकारस्य च ऊठि तस्य गुणे ओमिति दृश्यते । 'ज्वरत्वर–' इत्यत्र अनुनासिकग्रहणाननुवृत्तौ तु मनि परे अवतेरूठ् न स्यात्, किझलोरेव तद्विधिलाभादिति भावः । ऊठि पितीति । मवधातोर्यङ्लुक् । मामव् ति इति स्थिते ईडभावपक्षे अकारवकारयोरेकस्मिन् ऊठि तिपः पित्त्वेन ङित्त्वाभावादूकारस्य गुणे मामोतीति रूपमित्यर्थः । उपधाया वकारस्य च प्रत्येकमूठ् इति पक्षे सवर्णदीर्घः । पक्षद्वयमपि 'एकः पूर्वपरयोः' इत्यत्र भाष्ये स्पष्टम् । ईट्पक्षे आह मामवीतीति । अत्र ऊठ् न, क्वौ झलादौ अनुनासिकादौ च प्रत्यये परे तद्विधानात् । मामूत इति । अकारवकारयोरूठि तसो ङित्त्वान्न गुण इति भावः । मामवतीति । 'अदभ्यस्तात्' इत्यत् । मामवीषीति सिद्धवत्कृत्याह मामोषीति । झल्परकत्वाद् ऊठ्, गुणः । मामूथः मामूथ । मामवीमि इति सिद्धवत्कृत्याह मामोमीति । अनुनासिकपरकत्वादूठ्, गुणः । मामाव इति । मामव् वस् इति स्थिते परनिमित्ताभावादूठ् न । 'लोपो व्योः–' इति वलोपे 'अतो दीर्घो यञि' इति दीर्घः । मामूम इति । मामव् मस् इति स्थिते अनुनासिकपरकत्वादूठ् । ङित्त्वान्न गुणः । मामवाञ्चकार । मामविता । मामविष्यति । लोटि आह मामोत्विति । मामूतादिति । ङित्त्वान्न गुणः । मामूताम् मामवतु ।

तत्र क्ङितीत्येतद्रभसकृतमेवेत्याह क्ङितीति नानुवर्तत इति । अवतेस्तुनीति । 'ज्वरत्वर–' इत्युपधावकारयोरूठि गुणे च कृते ओतुरिति सिध्यति, नान्यथा । तेनात्र क्ङितीति नानुवर्तनीयमिति भावः । अवतेरिति । उपधावकारयोरूठि गुणे च कृते मन्प्रत्ययस्य टिलोपे चोमिति सिध्यतीत्यर्थः । ज्वरादेरुदाहरणं क्विपि–जूः । जूरौ । जूरः । झलादौ तु जूर्तिः । जूर्णः । जूर्णवान् । त्वर । तूः । तूरौ । तूरः । तूर्तिः । तूर्णः । तूर्णवान् । स्रिवि । स्रूः । स्रुवौ । स्रुवः । स्रूतिः । अवि, ऊः । उवौ । उवः । ऊतिः । मव, मूः । मुवौ । मुवः । मूतः । मूतिः । मामोषीत्यादि । ईट्पक्षे । मामवीषि । मामवीमि । मामवीतु । अमामवीत् । अमामवीरिति

मामूहि। मामवानि। अमामोत्। अमामोः अमामवम् अमामाव अमामूम। तुर्वी हिंसायाम्, तोतूर्वीति। **२६५५ राल्लोपः।** (६-४-२१) रेफात्परयोश्छ्वोर्लोपः स्यात्क्वौ झलादावनुनासिकादौ च प्रत्यये। इति वलोपः। लघूपधगुणः। **२६५६ न धातुलोप आर्धधातुके।** (१-१-४) धात्वंशलोपनिमित्ते आर्धधातुके परे इको गुणवृद्धी न स्तः। इति नेह निषेधः,

---

मामूहीति। ऊठि हेरपित्त्वेन ङित्वान्न गुणः। मामूतात मामूतम् मामूत। **मामवानीति।** आटः पित्त्वादङित्वाद् गुणः। मामवाव। मामवाम। लङस्तिपाह **अमामोदिति।** अमामूताम्। अमामवुः। सिपाह **अमामोरिति।** अमामूतम् अमामूत। लिङि मामव्यात्। लुङि 'अस्तिसिचः-' इति नित्यमीट्। अमामवीत् अमामावीत्। अमामविष्यत्। ज्वरतेस्तु जाज्वरीति जाजूर्ति इत्यादि। त्वरतेस्तु तात्वरीति तातूर्ति इत्यादि। स्रिवेस्तु सेस्रवीति। ईडभावे तु ऊठि सेस्रोति इत्यादि। अवतेस्तु यङभावात् क्विप्युदाहरणम्। ऊः उवौ उवः इत्याद्यूह्यम्। **तोतूर्वीतीति।** 'उपधायां च' इति दीर्घः। ईडभावे तोतुर्व् ति इति स्थिते **राल्लोपः।** 'च्छ्वोः शूडनुनासिके च' इति सूत्रं शूड्वर्जमनुवर्तते। 'अनुनासिकस्य क्विझलोः-' इत्यतः क्विझलोरिति च। तदाह **रेफात्परयोरित्यादि।** अत्रापि ङितीति नानुवर्तते, पूर्वसूत्रे तदननुवृत्तेः। **वलोप इति।** तथा च तोतुर् ति इति स्थिते उकारस्य लघूपधगुणः, तिपः पित्त्वेन अङित्त्वादित्यर्थः। **न धातुलोपे।** 'इको गुणवृद्धी' इत्यनुवर्तते। तत्र धातुलोपे सति इको गुणवृद्धी न स्त आर्धधातुके परत इत्यर्थे, लुन्धातोः यङन्तात् पचाद्यचि, यङो लुकि, लोलुव इत्यत्र गुणनिषेधाभावप्रसङ्गात्, अत्र धात्ववयवस्य यङो लोपेऽपि धातोर्लोपाभावात्। धात्ववयवलोपे सतीत्यर्थे तु शीङ्धातोस्तृचि शयिता इत्यत्र गुणो न स्यात्, तत्र धात्ववयवङकारलोपसत्त्वात्। आर्धधातुके परे यो धात्ववयवलोपः तस्मिन् सतीत्यर्थे

बोध्यम्। **राल्लोपः।** 'च्छ्वोः शूड्-' इत्यतः च्छ्वोरित्यनुवर्तते। क्वावुदाहरणम्। तूः। तुरौ। तुरः। **धुर्वी,** धूः। धुरौ। धुरः। **मुर्छा,** मूः। मुरौ। मुरः। **न धातुलोप।** आर्धधातुके धातुलोपो नास्तीति लक्षणया व्याचष्टे **धात्वंशेति।** यद्यपि 'दुरिणो लोपश्च' इत्यौणादिके रक्प्रत्यये धातुलोपः प्रसिद्धस्तथापि प्रयोजनवानप्रसिद्धः। इणो लुप्तत्वादेव गुणाप्रसङ्गात्। प्रत्ययसन्नियोगेन धातुलोपविधानाद् आर्धधातुकस्य निमित्तत्वमपि नास्ति। अत एव दूरमित्यत्र 'ढ्रलोपे-' इति दीर्घे कर्तव्ये धातुलोपस्य स्थानिवत्त्वं नास्ति, इह धातोर्लोपो यस्मिन्निति बहुव्रीहिर्विशेष्यं चार्धधातुकमित्याशयेनाह **लोपनिमित्त इति।** **गुणवृद्धी न स्त इति।** यद्यपि

तिवादीनामनार्धधातुकत्वात्। तोतोर्ति। 'हलि च' (सू ३२४) इति दीर्घः।

लोपयतीत्यत्रापि गुणनिषेधः स्यात् । तत्र यकारलोपस्य आर्धधातुकपरकत्व-सत्त्वादित्यतो व्याचष्टे **धात्वंशलोपनिमित्त इति**। धातुं लोपयतीति धातुलोपः, कर्मण्यण्। धातुलोपनिमित्ते आर्धधातुके परे इति यावत्। लोलुव इत्याद्युदाहरणम्। लूञ्धातोर्यङन्तात् पचाद्यचि 'यङोऽचि च' इत्यच्प्रत्ययमाश्रित्य यङो लुकि, अच्प्र-त्ययमाश्रित्य प्राप्तो गुणोऽनेन निषिध्यते । मरीमृज इति तु वृद्धिनिषेधोदाह-रणम्। धात्विति किम्? शीङ्, शयिता। इह उत्सृष्टानुबन्धस्य धातुत्वम्, नतु सानुबन्धस्येति कैयटादिमते तु धातुग्रहणं स्पष्टार्थम्। इदं सूत्रं भाष्ये प्रत्याख्या-तम्। हरदत्तेन पुनरुद्धृतम्। कौस्तुभे तु तदपि दूषयित्वा प्रत्याख्यातमेव। **इति नेहेति**। तोतोर्तीत्यत्र अयं गुणनिषेधो नेत्यर्थः। **हलि चेति**। तोतुर्व् तस् इति स्थिते 'लोपो व्योः-' इति वकारस्य लोपं बाधित्वा 'च्छ्वोः शूठ्-' इत्यूठि प्राप्ते,

---

'क्ङिति च' इति सूत्रे लैगवायन इत्यत्र गुणनिषेधो मा भूदिति 'इग्लक्षणे गुणवृद्धी न स्तः' इति व्याख्यानम्, तथापि इह प्रयोजनाभावादिग्लक्षणे इति नोक्तम्। धात्विति किम्, लूञ् लविता। पूञ् पविता । नन्वत्रानुबन्धलोपनिमित्तमार्धधातुकं न भव-तीति ध्वङ्क्षविकलमिदमिति चेत्। अत्राहुः—धातुग्रहणे सति धातोर्लोपो यस्मिन् इति बहुव्रीहिलाभाद् लोपनिमित्त इत्यर्थो लभ्यते, तदभावे तु लोपे सत्यार्धधातुक इत्यर्थाल्लवितेत्यादौ दोषः स्यादेवेति। यदा तु लोपयतीति लोपः, तस्मिँल्लोपनिमित्ते आर्धधातुके इको गुणवृद्धी न स्त इति व्याख्यायते, तदा धातुग्रहणं स्पष्टप्रतिपत्त्य-र्थम्। उत्सृष्टानुबन्धस्य धातुत्वमिति कैयटादिमते तु धातुलोप इत्यत्र बहुव्रीह्याश्रयणं विनापि धात्ववयवलोपे सत्यार्धधातुके इति व्याख्यायां लवितेत्यादौ नातिप्रसङ्ग इति बोध्यम्। आर्धधातुके किम्, 'त्रिधा बद्धो वृषभो रोरवीति'। रु शब्द इत्यस्माद् 'धातोरेकाच-' इति यङि तस्य लुक्। यङन्तस्य धातुत्वे यङो धात्ववयवत्वाल्लुप्त-त्वाच्चात्रापि निषेधः स्यात्तन्माभूदिति। नन्वत्र यङ्लुकोऽनैमित्तिकत्वादिको लोपनिमि-त्तपरत्वं नास्तीति ध्वङ्क्षविकलमिति चेत्। अत्राहुः—आर्धधातुकग्रहणे सति अन्य-पदार्थलाभाद् बहुव्रीहिर्लभ्यते, तदभावे त्ववयवलोपे सति गुणवृद्धी न स्त इत्यर्था-द्रोरवीतीत्यत्र दोषः स्यादेवेति। केचित्तु धातुं लोपयतीति धातुलोपः, 'ढूलोपे-' इत्यत्रेव 'कर्मण्यण्' इत्यभ्युपेत्य व्यधिकरणबहुव्रीह्याश्रयणं विनैव धात्ववयवलोप-निमित्ते गुणवृद्धी न स्त इति व्याचक्षते। इक इति किम्, रागः, अभाजि। 'घञि च भावकरणयोः' इति रञ्जेर्नलोपे कृते वृद्धिः। अभाजीत्यत्र तु 'भञ्जेश्च चिणि' इति नलोपे वृद्धिः। **इति नेह निषेध इति**। सूत्रस्योदाहरणं तु लोलुवः, पोपुवः, मरी-

तोतूर्तः तोतूर्वति। तोथोर्ति। दोदोर्ति। दोधोर्ति। मुर्च्छा, मोमोर्ति मोमूर्तः

वकारस्यानेन लोपे, 'हलि च' इति दीर्घ इत्यर्थः। यद्यपि तोतोर्तीत्यत्र 'च्छ्वोः–' इत्यूठः अप्रवृत्तेर्वकारस्य 'लोपो व्योः–' इति लोपः सिध्यति, तथापि तोतूर्त इत्यादौ ऊठो बाधनाय आवश्यकोऽयं लोपो न्याय्यत्वात्तोतोर्तीत्यत्रोपन्यस्त इति बोध्यम्। **तोतूर्वतीति**। 'अदभ्यस्तात्' इत्यत्। 'उपधायां च' इति दीर्घः। तोतूर्वीषि, तोतोर्षि तोतूर्थः तोतूर्थ। तोतूर्वीमि, तोतोर्मि तोतूर्वः तोतूर्मः। तोतूर्वांचकार। तोतूर्विता। तोतूर्विष्यति। तोतूर्वीतु, तोतोर्तु तोतूर्तात् तोतूर्ताम् तोतूर्वतु। तोतूर्हि। तोतूर्वाणि लङि अतोतूर्वीत्, अतोतोः अतोतूर्ताम् अतोतूर्वुः। अतोतूर्वीः, अतोतोः अतोतूर्तम् अतोतूर्त। अतोतूर्वम् अतोतूर्व अतोतूर्म। तोतूर्व्यात्। लुङि 'अस्तिसिचः–' इति नित्यमीट्। अतोतूर्वीत्। अतोतूर्विष्यत्। धुर्वीधातोरुदाहरति **तोथोर्तीति**। तुर्वीवद्रूपाणि। **दोदोर्तीति**। दुर्वीधातो रूपम्। **दोधोर्तीति**। धुर्वीधातो रूपम्। मुर्च्छाधातोः मोमूर्च्छीति इति सिद्धवत्कृत्य ईडभावे आह **मोमोर्तीति**। 'राल्लोपः'

मृज इत्यादि बोध्यम्। तत्र लोलूयपोपूयशब्दाभ्यां पचाद्यचि 'यङोऽचि च' इति यङ्लुकि कृते अच्प्रत्ययमाश्रित्य प्राप्तो गुणो निषिध्यते, मरीमृज इत्यत्र तु वृद्धिः। ननु लोलूयादिभ्योऽच्प्रत्यये 'अतो लोपः' इत्यल्लोपे यकारस्य 'यङोऽचि च' इति लुक्यल्लोपस्य स्थानिवत्त्वादच्प्रत्ययनिमित्तः 'सार्वधातुकार्धधातुकयोः' इति गुणो 'मृजेर्वृद्धिः' इति वृद्धिश्च न भवेदिति किमनेन निषेधसूत्रेण। न चैवमपि लोलुव इत्यादावुवङि कृते लघूपधगुणः स्यात् तद्वारणाय निषेधोऽयमावश्यकः। उवङ आदिष्टादचः पूर्वत्वेन लघूपधगुणे कर्तव्ये स्थानिवत्त्वाभावादिति वाच्यम्, स्थानिद्वारानादिष्टादचः पूर्वत्वेन उवङो दृष्टत्वात्। स्थानिद्वारा दृष्टत्वेऽपि स्थानिवद्भवतीत्येतद् 'न पदान्त–' इति सूत्रे सवर्णग्रहणेन ज्ञापितम्। न हि शिण्ढि इत्यत्र स्थानिभूतादचः पूर्वत्वेनानुस्वारो दृष्टः, किं तु स्थानिद्वारा। तथा च अनुस्वारस्य परसवर्णे कर्तव्ये श्नमः अल्लोपस्य स्थानिवत्त्वनिषेधाय तत्र सवर्णग्रहणं कृतमितीह स्थानिवद्भावः सिद्धः। नोनावेत्यत्र तु लिडुत्पत्तेः प्रागेव बहुलग्रहणादकारविशिष्टस्य यङो लुकि स्थानिवद्भावाप्रसक्त्या न वृद्ध्यभावशङ्केति 'न धातुलोप–' इति सूत्रस्य न किंचित्प्रयोजनमिति चेत्। सत्यम्, अतएव भाष्ये प्रत्याख्यातमिदमिति संक्षेपः। **तोतोर्तीति**। यद्यप्यत्र 'लोपो व्योः–' इत्यनेन वलोपः सिध्यति, तथापि तोतूर्त इत्यादौ वलोपार्थं 'राल्लोपः' इत्युपन्यस्तम्। अन्यथा तत्र 'लोपो व्योः–' इति लोपं बाधित्वा वस्य 'च्छ्वोः शूड्–' इति ऊठ् स्यात्। **तोथोर्तीत्यादि**। थुर्वी दुर्वी धुर्वी हिंसायाम्। मुर्च्छा मोहसमुच्छ्राययोः। मोमूर्च्छीषि। मोमोर्षि। मोमूर्थः।

मोमूर्च्छीतीत्यादि । आर्धधातुके इति विषयसप्तमी । तेन यङि विवक्षिते अजेर्वी, वेवीयते । अस्य यङ्लुङ् नास्ति, लुकापहारे विषयत्वासंभवेन वीभावस्याप्रवृत्तेः ।

॥ इति तिङन्ते यङ्लुक्प्रकरणम् ॥

अथ तिङन्ते नामधातुप्रकरणम् ॥ ५७ ॥

२६५७ सुप आत्मनः क्यच् । (३-१-८) इषिकर्मण एषितुः

इति छस्य लोपः । इतरादीति । मोमूर्च्छीषि, मोमोर्षि । मोमूर्च्छीमि, मोमोर्मि । मोमूर्च्छर्तः । मोमूर्द्धि । अमोमूर्च्छीत् अमोमूः । सिप्यप्येवम् । लुङि 'अस्तिसिचः–' इति नित्यमीट् । अमोमूर्च्छीत् । अमोमूर्च्छिष्यत् । विषयसप्तमीति । 'अजेर्व्यघञपोः' इति वीभावविधौ आर्धधातुके इत्यनुवृत्तं विषयसप्तम्यन्तमाश्रीयते । ननु परसप्तम्यन्तमित्यर्थः । ततः किमित्यत आह तेनेति । विषयसप्तम्याश्रयणेनेत्यर्थः । विवक्षिते इति । यङि विवक्षिते ततः प्रागेव अजेर्वीभाव इत्यर्थः । एवं च कृते वीभावे हलादित्वाद्यङ् लभ्यते इति मत्वाह वेवीयते इति । ननु अजेर्वीभावानन्तरं यङि सति तस्य 'यङोऽचि च' इति पाक्षिको लुक् कुतो नोदाह्रियते इत्यत आह अस्य यङ्लुङ् नास्तीति । विषयत्वेति । लुका लुप्तयङो भाविज्ञानविषयत्वाभावेनेत्यर्थः ।

इति श्रीवासुदेवदीक्षितविदुषा विरचितायां सिद्धान्तकौमुदीव्याख्यायां बालमनोरमाख्यायां यङ्लुगन्तप्रक्रिया समाप्ता ।

अथ नामधातुप्रक्रिया निरूप्यन्ते । सुप आत्मनः क्यच् । प्रत्ययग्रहणपरिभाषया सुबन्तादिति लभ्यते । 'धातोः कर्मणः–' इति सूत्रात्कर्मण इच्छायां वेत्यनुवर्तते । कर्मण इति पञ्चमी । कर्मकारकादिति लभ्यते । सन्निधानादिच्छां प्रत्येव कर्मत्वं विवक्षितम् । आत्मन्शब्दः स्वपर्यायः । तादर्थ्यस्य शेषत्वविवक्षायां षष्ठी । स्वार्थात्कर्मण इति लभ्यते । स्वश्च इच्छायां सन्निधापितत्वादेषितैव विवक्षितः । तथा च स्वस्मै यदिष्यते कर्मकारकं तद्वृत्तेस्सुबन्तादिच्छायां क्यज्वा स्यादिति फलति ।

मोमूर्थ । मोमूर्च्छीमि, मोमोर्मि । मोमूर्च्छ्वः । मोमूर्मः । मोमूर्च्छाञ्चकार । मोमूर्च्छिता । मोमूर्च्छीतु, मोमोर्तु, मोमूर्तात् । मोमूर्हि । अमोमूर्च्छीत् । अमोमोः । अमोमूर्च्छुः । मोमूर्च्छ्यात् । अमोमूर्च्छीत् । अमोमूर्च्छिष्टाम् । अमोमूर्च्छिष्यत् ।

इति तत्त्वबोधिन्यां यङ्लुगन्तप्रकरणम् ।

सुप आत्मनः क्यच् । 'धातोः कर्मणः–' इति पूर्वसूत्रात् कर्मण इच्छायां वेत्यनुवर्तते । ततश्च सन्निधानादिच्छाकर्मण एव भवतीत्याह इषिकर्मण इति । परस्य पुत्रमिच्छतीत्यत्रातिप्रसङ्गवारणाय सूत्रे आत्मशब्द उपात्तः । स तु

सम्बन्धिनः सुबन्तादिच्छायामर्थे क्यच्प्रत्ययो वा स्यात्। धातुवयवत्वात्सुब्लुक्।
२६५८ क्यचि च। (७-४-३३) अस्य ईत् स्यात्। आत्मनः पुत्रमिच्छति पुत्रीयति। 'वान्तो यि प्रत्यये' (सू ६३) गव्यति। नाव्यति। 'लोपः शाकल्यस्य' (सू ६७) इति तु न। अपदान्तत्वात्। तथाहि **२६५९ नः क्ये।** (१-४-१५) क्यचि क्यङि च नान्तमेव पदं स्यान्नान्यत्। सन्निपातपरिभाषया क्यचो यस्य लोपो न, गव्यांचकार। गव्यिता। नाव्यांचकार। नाव्यिता।

तदिदमभिप्रेत्याह **इषिकर्मण एषितृसम्बन्धिन इत्यादिना।** एषित्रर्थादिषिकर्मण इत्यर्थः। एषित्रा स्वार्थं यदिष्यते कर्मकारकं तद्वाचकात्सुबन्तादिति यावत्। **धात्ववयवत्वादिति।** सुबन्तात् क्यचि कृते तदन्तस्य 'सनाद्यन्ताः–' इति धातुत्वादिति भावः। **क्यचि च।** 'अस्य च्वौ' इत्यतोऽस्येत्यनुवर्तते 'ई घ्राध्मोः' इत्यत ईग्रहणं चेति मत्वा शेषं पूरयति **अस्येति।** अकारस्येत्यर्थः। **पुत्रीयतीति।** क्यचि पुत्र य इति स्थिते ईत्वे पुत्रीय इति धातोर्लडादिरित्यर्थः। आत्मनः किम्? राज्ञः पुत्रमिच्छति। पदविधित्वेन समर्थपरिभाषायाः प्रवृत्तेः सह्यान्तं पुत्रमिच्छतीत्यत्र पुत्रशब्दान्न क्यच्। **गव्यतीति।** गामात्मन इच्छतीत्यर्थः। **नाव्यतीति।** नावमात्मन इच्छतीत्यर्थः। **अपदान्तत्वादिति।** 'लोपः शाकल्यस्य' इत्यस्य पदान्त एव प्रवृत्तेरिति भावः। नन्वन्तर्वर्तिविभक्त्या पदत्वमस्त्येवेत्यत आह **तथा हीति।** यथा पदत्वं न भवति तथोच्यत इत्यर्थः। **नः क्ये।** नकारादकार उच्चारणार्थः। 'सुप्तिङन्तम्–' इत्यतः सुबन्तं पदमित्यनुवर्तते। सुबन्तं नकारेण विशेष्यते, तदन्तविधिः। नकारान्तं सुबन्तं पदसंज्ञं स्यादिति लभ्यते। सुबन्तत्वादेव पदत्वे सिद्धे नियमार्थमिदम्। क्यग्रहणेन क्यच्क्यङोर्ग्रहणम्। न तु क्यषः, 'लोहितडाज्भ्यः क्यष्वचनम्–' इति वक्ष्यमाणतया हलन्तात् क्यषोऽभावात्, तदाह **क्यचि क्यङि चेत्यादिना।** ननु गव्यांचकारेत्यत्र आम आर्धधातुकत्वात्तस्मिन् परे वकाराद्धल उत्तरस्य यकारस्य 'यस्य हलः' इति लोपः स्यादित्यत आह **संनिपातेति।** यकारनिमित्तकावादेशसंपन्नवकारस्य यकारलोपं प्रति निमित्तत्वसंभवादिति भावः।

स्वशब्दपर्यायः। स्वश्च क इत्याकाङ्क्षायामिच्छायाः सन्निधापितत्वादेषितैव गृह्यते, तदाह **एषितृसंबन्धिन इति।** सुबन्तस्योक्तविशेषणद्वयमर्थद्वारकं बोध्यम्। **नः क्ये।** 'लोहितडाज्भ्यः क्यष्वचनं भृशादिष्वितराणि' इति वक्ष्यमाणतया हलन्तात् क्यष् दुर्लभ इत्यभिप्रेत्याह **क्यचि क्यङीति।** एवं चेह क्यषीत्यपि केश्चिदुक्तम्, तदुपेक्ष्यम्। 'यस्य हलः' इति लोपमाशङ्क्याह **सन्निपातपरिभाषयेति।** यकारे परे वान्तादेशविधानाद्वकारो यलोपस्य निमित्तं न भवतीति भावः। **गव्यतीति।**

नलोपः, राजीयति । 'प्रत्ययोत्तरपदयोश्च' (सू १३९२) त्वद्यति मद्यति । एकार्थयोरित्येव, युष्मद्यति अस्मद्यति । 'हलि च' (सू ३५४) गीर्यति ।

गठियतेति । इति अतो लोपः । राजीयतीत्यत्राह **नलोप इति** । राजानमिच्छतीत्यर्थे क्यचि राजन् य ति इति स्थिते 'नः क्ये' इति पदत्वान्नकारस्य लोप इत्यर्थः । कृते नलोपे 'क्यचि च' इत्यकारस्य ईत्वमिति मत्वाह **राजीयतीति** । न च ईत्वे कर्तव्ये नलोपस्यासिद्धत्वं शङ्क्यम्, 'नलोपः सुप्स्वर–' इति नियमादित्यलम् । ननु त्वामात्मन इच्छति, मामात्मन इच्छतीत्यत्र युष्मदस्मद्भ्यां क्यचि धात्ववयवत्वात् सुपो लुकि प्रत्ययलक्षणाभावात् 'त्वमावेकवचने' इति कथं त्वमौ स्याताम्, विभक्तौ परत एव तद्विधानादित्यत आह **प्रत्ययोत्तरपदयोश्चेति** । सुपो लुका लुप्तत्वेऽपि क्यचमादाय मपर्यन्तस्य त्वमाविति भावः । ननु युष्मानात्मन इच्छति, अस्मानात्मन इच्छति, युष्मद्यति अस्मद्यति इत्यत्रापि क्यचमादाय त्वमौ स्यातामित्यत आह **एकार्थयोरित्येवेति** । 'प्रत्ययोत्तरपदयोश्च' इत्यत्र 'त्वमावेकवचने' इति सूत्रमनुवृत्तम् । एकवचनशब्दश्च न रूढः, किंतु एकत्वविशिष्टार्थवृत्तित्वमेकवचनशब्देन विवक्षितमिति युष्मदस्मत्प्रक्रियायां प्रपञ्चितं प्राक् । तथा च युष्मदस्मदोरेकत्वविशिष्टार्थवृत्तित्वाभावान्न त्वमाविति भावः । गिरमात्मन इच्छति, पुरमात्मन इच्छतीत्यत्र गिर्शब्दात्पुर्शब्दाच्च क्यचि विशेषमाह **हलि चेति** । उपधादीर्घ इति शेषः । ननु दिवमिच्छति दिव्यतीत्यत्रापि 'हलि च' इति दीर्घः

अत्रान्तर्वर्तिविभक्त्या पदत्वाल्लोपो दुर्वारः स्यादित्याशङ्क्याह **अपदान्तत्वादिति** । इदं च समाधानस्य समाधानान्तरादूषकत्वादिति न्यायेन समाधिसौकर्यादुक्तम् । वस्तुतस्तु उक्तरीत्या शङ्कैव नेति बोध्यम् । अन्ये तु वार्तिक एव प्रश्लेष इति द्वितीयपक्षमाश्रित्येदम्, सूत्रे वकारप्रश्लेषे लोपासंभवात्, न हि कार्यीति न्यायात । न च वलीति निमित्तत्वेनाश्रयणात् तत्रापि लोपो भवत्येव । अन्यथा वलीत्येव कुर्यादिति वाच्यम्, वकारे परतो यकारलोपे तस्य निमित्तत्वेनाश्रयणावश्यकत्वादिति द्वितीयकल्प एव युक्त इत्याहुः । **राजीयतीति** । 'क्यचि च' इत्यवर्णस्य ईत्वे कर्तव्ये 'पूर्वत्रासिद्धम्' इति नलोपोऽसिद्धो न भवति, 'नलोपः सुप्स्वर–' इति नियमात् । यद्यपि नियमसूत्राणां निषेधमुखेन प्रवृत्तिरिति 'नलोपः सुप्स्वर–' इति सूत्रं राजीयतीत्यादिषु पठनीयम्, राजभ्यामित्यादौ तु 'पूर्वत्रासिद्धम्' इति, नलोपस्यासिद्धत्वेन दीर्घाद्यभावसिद्धेः, तथापि विधिमुखेन प्रवृत्तिरिति पक्षाभ्युपगमेन हलन्तेषु राजभ्यां राजभिरित्यत्रैव पठितमिति ज्ञेयम् । न च विधिमुखप्रवृत्तिपक्षो निरालम्ब एवेति वाच्यम्, 'अनुपराभ्यां कृञः' इति सूत्रस्थभाष्यग्रन्थपर्यालोचनया तत्पक्षावगमात् । यत्तु

पूर्यति। धातोरित्येव। नेह–दिवमिच्छति दिव्यति। इह पुरमिच्छति पुर्यतीति माधवोक्तं प्रत्युदाहरणं चिन्त्यम्। पूर्गिरोः साम्यात्। दीव्यतीति दीर्घस्तु माचः प्रामादिक एव। अदस्यति 'रीङृतः' (सू १२३४)। कर्त्रीयति। 'क्यच्व्योश्च' (सू २१११)। गार्गीयति। वात्सीयति। 'अकृत्सार्व–' (सू २२१८)

स्यादित्यत आह धातोरित्येवेति। 'हलि च' इति सूत्रे 'सिपि धातोः–' इत्यतस्तदनुवृत्तेरिति भावः। दिव्यतीति। दिव्शब्दः अव्युत्पन्नं प्रातिपदिकमिति भावः। इहेति। 'हलि च' इति सूत्रे धातोरित्यनुवृत्तेः पुर्यतीत्यत्र न दीर्घ इति माधवग्रन्थश्चिन्त्य इत्यर्थः। कुत इत्यत आह पूर्गिरोः साम्यादिति। 'गॄ शब्दे, पॄ पालनपूरणयोः' इत्याभ्यां क्विपि 'ॠत इद्धातोः' इति 'उदोष्ठ्यपूर्वस्य' इति च इत्त्वे उत्वे च कृते रपरत्वे गिर्शब्दस्य पुर्शब्दस्य च निष्पत्तेरिति भावः। प्रामादिक एवेति। दिव्शब्दस्य अव्युत्पन्नप्रातिपदिकत्वान्न धातुत्वम्। दिव्धातोः क्विबन्ताद् ऊठि द्यूशब्दाच्च क्यचि द्यूयतीत्येव उचितम्। विचि तु लघूपधगुणे 'लोपो व्योः–' इति लोपे देशब्दात् क्यचि देयतीत्येवोचितमिति भावः। अदस्यतीति। अमुमात्मन इच्छतीत्यर्थे अदस्शब्दात् क्यचि सुपो लुका लुप्तत्वाद्विभक्तिपरकत्वाभावाच्च त्यदाद्यत्वम्। सान्तत्वाच्चोत्त्वमत्त्वे 'नः क्ये' इति नियमेन पदान्तत्वाभावाच्च सस्य रुत्वमिति भावः। कर्तृशब्दात् क्यचि विशेषमाह रीङृत

'नलोपः सुप्स्वर–' इति सूत्रे मनोरमायामुक्तं 'नियमसूत्राणां विधिमुखेन प्रवृत्तिः सामान्यशास्त्रतात्पर्यसङ्कोचकता च' इति पक्षस्य 'द्युद्भ्यो लुङि' इति सूत्रे भाष्यकृता ध्वनितत्वादिति। तच्चिन्त्यम्, तत्सूत्रस्य भाष्यकारैरस्पृष्टत्वात्। केचित्तु 'द्युद्भ्यो लुङि' इत्यत्र ध्वनितत्वादिति वक्तव्ये सूत्रग्रहणं बहुव्रीहिलाभार्थम्। 'द्युद्भ्यो लुङि' इति सूत्रं यस्मिन्प्रकरणे तद् 'द्युद्भ्यो लुङि इति सूत्रम्' परस्मैपदप्रकरणमित्यर्थः। तत्र हि 'अनुपराभ्याम्–' इति सूत्रं वर्तत इति तत्सूत्रे यद् ध्वनितं तत्तु परस्मैपदप्रकरणे ध्वनितं भवति। यद्वा 'अनुपराभ्यां कृञः' इत्यत्र हि भाष्यकृता 'द्युद्भ्यो लुङि' इति परामृष्टम्। तथा च 'द्युद्भ्यो लुङि' इति सूत्रं यस्मिंस्तत् 'द्युद्भ्यो लुङीति सूत्रम्'। 'अनुपराभ्यां कृञः' इति सूत्रमित्यर्थ इत्येवं कुकविकृतिवत् कथंचित्स्थितस्य गतिः समर्थनीयेत्याहुः। पूर्गिरोः साम्यादिति। गॄ शब्दे, पॄ पालनपूरणयोरित्येताभ्यां क्विपि 'ॠत इद्धातोः' 'उदोष्ठ्यपूर्वस्य' इति प्रवृत्तेरिति भावः। प्रामादिक एवेति। दिवुधातोः क्विपि तु द्यूरिति स्यात्। ततः क्यचि तु द्यूयतीति भवति। क्विपं विहाय विचि कृते लघूपधगुणे वलोपश्च स्यात्। ततः क्यचि तु देवयतीति भवति। तथा च 'हलि च' इति सूत्रे वृत्तावपि 'धातोरित्येव नेह दिवमिच्छति दिव्यति' इत्येवोक्त-

इति दीर्घः। कवीयति। वाच्यति। समिध्यति। २६६० **क्यस्य विभाषा।** (६-४-५०) हलः परयोः क्यच्क्यङोर्लोपो वा स्यादार्धधातुके। 'आदेः परस्य' (सू ४४)। 'अतो लोपः' (सू २३०८)। तस्य स्थानिवत्त्वाल्लघूपधगुणो न। समिधिता, समिध्यिता। 'मान्तप्रकृतिकसुबन्तादव्ययाच्च क्यज् न' (वा १७१४)। किमिच्छति। इदमिच्छति। स्वरिच्छति। २६६१ **अशनायोदन्यधनाया बुभुक्षापिपासागर्धेषु।** (७-४-३४) क्यजन्ता निपा-

---

इति। गार्ग्यशब्दात् क्यचि विशेषमाह **क्यच्व्योश्चेति।** आपत्यस्य यञो यकारस्य लोप इति भावः। कृते यलोपे 'क्यचि च' इत्यकारस्य ईत्वं मत्वाह **गार्गीयतीति। वात्सीयतीति।** वात्स्यशब्दात् क्यचि पूर्ववत्। कविशब्दात् क्यचि विशेषमाह **अकृत्सार्वेति। वाच्यतीति।** वाच्शब्दात् क्यचि 'नः क्ये' इति नियमेन पदत्वाभावान्न कुत्वम्। 'वचिस्वपि—' इति संप्रसारणं तु न, धातोः कार्यमुच्यमानं धातुविहितप्रत्यये एवेति नियमात्। **समिध्यतीति।** समिध्शब्दात् क्यचि 'नः क्ये' इति नियमेन पदत्वाभावान्न जश्त्वम्। लुटस्तासि इटि 'समिध्य इ ता' स्थिते 'यस्य हलः' इति नित्ये यलोपे प्राप्ते **क्यस्य विभाषा।** 'यस्य हलः' इत्यतो हल इति पञ्चम्यन्तमनुवर्तते। 'आर्धधातुके' इत्यधिकृतम्' तदाह **हलः परयोः क्यच्क्यङोरिति।** क्यष् तु नात्र गृह्यते, 'लोहितडाज्भ्यः क्यष्वचनम्-' इति वक्ष्यमाणतया हलन्तात्तदभावात्। अन्तलोपमाशङ्क्याह **आदेः परस्येति।** तथा च समिध् अ इता इति स्थिते आह **अतो लोप इति।** तथा च समिध् इता इति स्थिते लघूपधगुणमाशङ्क्याह **तस्य स्थानिवत्त्वादिति।** क्यच्सूत्रे 'मान्ताव्ययेभ्य प्रतिषेधः' इति वार्तिकम्। मान्तेभ्यः अव्ययेभ्यश्च क्यचः प्रतिषेध इत्यर्थे पुमात्मन इच्छति पुत्रीयतीत्यत्र न स्यात्। पुत्राविच्छतीत्यादावेव स्यात्। मान्तानि अव्ययानि मान्ताव्ययानि तेभ्य इत्यर्थे स्वरिच्छतीत्यत्र क्यचः प्रतिषेधो न स्यात्। अतस्तद्वार्तिकं विवृण्वन्नाह **मान्तप्रकृतिकसुबन्तादव्ययाच्च क्यज् नेति। अशनायोदन्य।** अशनाय, उदन्य, धनाय इत्येषां द्वन्द्वः। **क्यजन्ता इति।** एते त्रयः शब्दाः क्रमेण बुभुक्षादिष्वर्थेषु निपात्यन्ते

मिति भावः। आपत्ययकारस्य लोपं स्मारयति **क्यच्व्योश्चेति।** 'नः क्ये' इति नियमेन पदत्वाभावात्कुत्वं नेत्याह **वाच्यतीति।** एवं समिध्यतीत्यत्र जश्त्वं नेति बोध्यम्। 'मान्ताव्ययेभ्यः प्रतिषेधः' इति वार्तिकस्य यथाश्रुतव्याख्याने पुत्रमिच्छतीत्यत्रापि न स्यात्। पुमौ पुत्रान् वा इच्छतीत्यादावेव स्यात्, अतो व्याचष्टे **मान्तप्रकृतिकादिति। अशनायोदन्य। क्यजन्ता इति।** उदकशब्दस्योदन्-

स्यन्ते। अशनायति। उदन्यति। धनायति। बुभुक्षादौ किम्—अशनीयति। उदकीयति। धनीयति। २६६२ **अश्वक्षीरवृषलवणानामात्मप्रीतौ क्यचि।** (७-१-५१) एषां क्यचि असुगागमः स्यात्। 'अश्ववृषयोर्मैथुनेच्छायाम्' (वा ४३०१)। अश्वस्यति वडवा। वृषस्यति गौः। 'क्षीरलवणयोर्लालसायाम्' (वा ४३१२)। क्षीरस्यति बालः। लवणस्यत्युष्ट्रः। 'सर्वप्रातिपदिकानां क्यचि लालसायां सुगसुकौ' (वा ४६१६-१७) दधिस्यति,

---

इत्यर्थः। भोक्तुमिच्छा बुभुक्षा। पातुमिच्छा पिपासा। गर्द्धः प्रभिकाङ्क्षा। **अशनायतीति**। अश्यते यत् तदशनम् अन्नम्, तद्भोक्तुमिच्छतीत्यर्थः। 'क्यचि च' इति ईत्त्वाभावो निपात्यते। 'अकृत्सार्व-' इति दीर्घः। **उदन्यतीति**। उदकं पातुमिच्छतीत्यर्थः। उदकशब्दस्य उदन्नादेशो निपात्यते नलोपाभावश्च। **धनायतीति**। जीवनार्थं सत्यपि धने अधिकं धनं वाञ्छतीत्यर्थः। ईत्वाभावो नेपात्यते। **अशनीयतीति**। अशनम् अन्नं तत्संग्रहीतुमिच्छति वैश्वदेवाद्यर्थमित्यर्थः। **उदकीयतीति**। सस्यादिसेचनार्थमुदकमिच्छतीत्यर्थः। **धनीयतीति**। दरिद्रः सन् जीवनाय धनमिच्छतीत्यर्थः। **अश्वक्षीर। क्यचि**। परे असुगिति शेषपूरणम्, 'आज्जसेरसुक्' इत्यतस्तदनुवृत्तेरिति भावः। असुकि ककार इत्, उकार उच्चारणार्थः। कित्त्वादन्त्यावयवः। **अश्ववृषयोरिति**। वार्तिकम्। **अश्वस्यति वडवेति**। मैथुनार्थमश्वमिच्छतीत्यर्थः। **वृषस्यति। गौरिति**। मैथुनार्थं वृषमिच्छतीत्यर्थः। 'वृषस्यन्ती तु कामुकी' इति कोशस्तु अश्ववृषरूपप्रकृत्यर्थपरित्यागेन मैथुनेच्छामात्रे लाक्षणिकः। **क्षीरलवणयोरिति**। वार्तिकम्। असुगिति शेषः। लालसा उत्कटेच्छा। **सर्वप्रातिपदिकानामिति**। इदमपि वार्तिकम्। लालसायां सर्वेषां प्रातिपदिकानां क्यज्

भावोऽन्ययोर्दीर्घ इत्यपि ज्ञेयम्। इह यः सद्य एव भोक्तुमशनमिच्छति, यश्च पातुमुदकम्, यश्च धने सत्यपि पुनर्धनं तत्रोदाहरणानि। यस्तु कालान्तरोपयोगार्थमशनमिच्छति, यश्च स्नातुमुदकम्, यश्च दरिद्रः सन् धनमिच्छति तत्र प्रत्युदाहरणानि। ननु 'उदन्या तु पिपासा तृट्' इति निघण्टौ परस्परसामानाधिकरण्यं न स्याद् उदन्याशब्दस्य उदकेच्छावाचित्वादिति चेत्। अत्राहुः—अशनायतीत्यादिषु अविवक्षितप्रकृत्यर्थं बुभुक्षापिपासादिकमेवार्थः, तथा च नोक्तदोष इति। **अश्वक्षीर।** 'आज्जसेः-' इत्यतोऽसुगिति वर्तते। **अश्वस्यतीति**। मैथुनार्थमश्वमिच्छतीत्यर्थः। एवं मैथुनार्थं वृषमिच्छति वृषस्यति गौः। ननु 'इति रामो वृषस्यन्तीम्' इति प्रयोगो मनुष्यविषये कथं संगच्छत इति चेत्। अत्राहुः—अश्ववृषरूपप्रकृत्यर्थपरित्यागेन मैथुनेच्छैवार्थः, अत एव 'वृषस्यन्ती तु कामुकी' इति कोशोऽपि स्वरसतः संगच्छते

दध्यस्यति । मधुस्यति, मध्वस्यति । २६६३ काम्यच्च । (३-१-९) उक्तविषये काम्यच् स्यात् पुत्रमात्मन इच्छति पुत्रकाम्यति । इह 'यस्य हलः' (सू २६३१) इति लोपो न, अनर्थकत्वात्। यस्य इति सङ्घातग्रहणमित्युक्तम्। यशस्काम्यति । सर्पिष्काम्यति । मान्ताव्ययेभ्योऽप्ययं स्यादेव । किंकाम्यति । स्वःकाम्यति । २६६४ उपमानादाचारे । (३-१-१०) उपमानात्कर्मणः सुबन्तादाचारार्थे क्यच् स्यात् । पुत्रमिवाचरति पुत्रीयति छात्रम् । विष्णूयति द्विजम् । 'अधिकरणाच्चेति वक्तव्यम्' (वा १७१७) प्रासादीयति कुट्यां भिक्षुः । कुटीयति प्रासादे । २६६५ कर्तुः क्यङ् सलोपश्च । (३-१-११) उप-

वक्तव्यः । तस्मिन् परे प्रकृतीनां सुगसुकौ च वक्तव्यौ इत्यर्थः । न चानेनैव वार्तिकेन सिद्धे 'क्षीरलवणयोर्लालसायाम्' इति वार्तिकं व्यर्थमिति शङ्क्यम्, 'क्षीरलवणयोः—' इति वार्तिकं कात्यायनीयम्, 'सर्वप्रातिपदिकानाम्—' इति तु मतान्तरमित्यदोषात् । एतच्च भाष्ये अपर आहेत्यनेन ध्वनितम् । **काम्यच्च** । 'सुप आत्मनः क्यच्' इत्युत्तरमिदं सूत्रम्, तदाह **उक्तविषय इति** । **पुत्रकाम्यतीति** । कस्येत्संज्ञा तु न, फलाभावात् । **अनर्थकत्वादिति** । काम्यच एकदेशस्य यकारस्य अर्थाभावादित्यर्थः । ननु बेभिदिता इत्यत्रापि यकारस्य अनर्थकत्वाल्लोपो न स्यादित्यत आह **यस्य इतीति** । 'यस्य हलः' इत्यत्र यस्येत्यनेन यकाराकारसंघातग्रहणमित्यनुपदमेवोक्तमित्यर्थः । तथा च बेभिय इता इति स्थिते यशो यस्य संघातस्यार्थवत्त्वाद्यकारलोपो निर्बाधः । प्रकृते तु काम्यजेकदेशस्य यस्यानर्थकत्वाल्लोपो नेति भावः । **यशस्काम्यतीति** । 'सोऽपदादौ' इति सत्वम् । ननु किमात्मन इच्छति किंकाम्यति स्वःकाम्यतीति कथम् ? मान्ताव्ययानां नेत्यनुवृत्तेरित्यत आह **मान्ताव्ययेभ्योऽप्ययमिति** । **उपमानादाचारे** । 'सुप आत्मनः क्यच्' इत्यतः सुप इत्यनुवर्तते । 'धातोः कर्मणः समानकर्तृकात्—' इत्यतः कर्मण इति, तदाह **उपमानात्कर्मण इत्यादिना** । उपमानं यत्कर्मकारकं तद्वृत्तेः सुबन्तादित्यर्थः । **पुत्रमिवेति** । 'धातोः कर्मणः—' इत्यतो वेत्यनुवृत्तिरनेन सूचिता । छात्रं पुत्रत्वेन उपचरतीत्यर्थः । **विष्णूयतीति** । द्विजं विष्णुत्वेन उपचरतीत्यर्थः । **अधिकरणाच्चेति** । उपमानभूताधिकरणवृत्तेरपि सुबन्तादाचारे क्यजिति वक्तव्यमित्यर्थः । **प्रासादीयति**

इति । **लालसायामिति** । उत्कटेच्छायामित्यर्थः । **काम्यच्च** । उच्चारणसामर्थ्यान्न कस्येत्संज्ञा । 'मान्ताव्ययेभ्यः प्रतिषेधः' इत्यस्यानुवृत्त्यभावं सूचयति **अयं स्यादेवेति** । **आचरतीति** । व्यवहरतीत्यर्थः । **अधिकरणाच्चेति** । सप्तम्यन्तरूपात् सुबन्तादित्यर्थः । **कर्तुः क्यङ् सलोपश्च** । 'धातोः कर्मणः—' इति सूत्राद्वेत्यनु-

मानात्कर्तुः सुबन्तादाचारे क्यङ् वा स्यात्, सान्तस्य तु कर्तृवाचकस्य लोपो वा स्यात् । क्यङ् वेत्युक्तेः पक्षे वाक्यम् । सान्तस्य लोपस्तु क्यङ्संनियोगशिष्टः । स च व्यवस्थितः । 'ओजसोऽप्सरसो नित्यमितरेषां विभाषया' (वा १७१९-२०)। कृष्ण इवाचरति कृष्णायते । ओजश्शब्दो वृत्तिविषये तद्वति, ओजायते । अप्सरायते । यशायते, यशस्यते । विद्वायते, विद्वस्यते । स्वयते । मय्यते । अने-कार्थत्वे तु युष्मद्यते । अस्मद्यते । 'क्यङ्मानिनोश्च' (९८३७)। कुमारी-वाचरति कुमारायते । हरिणीवाचरति हरितायते । गुर्वीव गुरूयते । सपत्नीव सपत्नायते । सपतीयते । सपत्नीयते । युवतिरिव युवायते । पट्वीमृद्व्याविव

कुड्यामिति । प्रासादे इव कुड्यां हृष्टो वर्तते इत्यर्थः । कुटीयति प्रासादे इति । कुड्यामिव प्रासादे क्लिष्टो वर्तते इत्यर्थः । कर्तुः क्यङ् सलोपश्च । कर्तु-रित्यावर्तते । कर्तुः क्यङित्येकं वाक्यम् । अत्र कर्तुरिति पञ्चम्यन्तम् । उपमानादाचारे इत्यनुवर्तते । 'धातोः कर्मणः-' इत्यतो वेति च, तदाह उपमानादिति । उप-मानं यत्कर्तृकारकं तद्वृत्तेः सुबन्तादित्यर्थः । कर्तुः सलोपश्चेति द्वितीयं वाक्यम् । चकारः तुपर्यायो भिन्नक्रमः । स इति लुप्तषष्ठीकं पृथक्पदम् । कर्तुरिति षष्ठ्यन्तस्य विशेषणम् । तदन्तविधिः, तदाह सान्तस्य लोपस्त्विति । एतच्च महाभाष्ये स्पष्टम् । क्यङि सलोपविकल्पः सर्वत्र स्यादित्यत आह स च व्यवस्थित इति । सान्तस्य सलोप इत्यर्थः । व्यवस्थामेव दर्शयति ओजसोऽप्सरस इति । इदं वार्तिकम् । ओजश्शब्द इति । क्यङन्तोऽयम् । सनाद्यन्ता इति धातुत्वाद् वृत्तिः । तत्र ओजश्शब्द ओजस्विनि वर्तत इत्यर्थः । ओजायते इति । ओजस्वीवाचरती-त्यर्थः । ओजश्शब्दात् क्यङि सलोपे 'अकृत्सार्व-' इति दीर्घ इति भावः । अप्स-रायते इति । अप्सरश्शब्दात् क्यङि सलोपदीर्घौ । क्यङो ङित्वादात्मनेपदम् । इतरेषां विभाषयेत्यस्योदाहरति यशायते, यशस्यते इति । यशस्वीवाचरती-

वर्तत इत्याह क्यङ् वा स्यादिति । सेति लुप्तषष्ठीकं कर्तृविशेषणमित्याह सान्त-स्येति । चकारस्तु अन्वाचये बोध्यः । तद्वतीति । तथा च ओजायत इत्यत्र ओजस्वीवाचरतीति विग्रहो बोध्यः । विद्वस्यत इति । नान्तस्यैव पदत्वात्सस्य रुत्वं न । पुंवद्भावं स्मारयति क्यङ्मानिनोश्चेति । सपत्नीवेति । त्रितयसाधा-रणं विग्रहवाक्यम् । सपत्नायत इति । शत्रुपर्यायात्सपत्नशब्दाच्छार्ङ्गरवादिङी-नन्तात्क्यङि पुंवद्भावे 'अकृत्सार्व-' इति दीर्घे च रूपमिदम् । सपतीयत इति । समानस्वामिकाभिधायिनो भाषितपुंस्कस्य 'नित्यं सपत्न्यादिषु' इति नादेशे नान्तत्वान् ङीप्, ततः क्यङि पुंवद्भावे च दीर्घः । सपत्नीयत इति । विवाहजन्यसंस्कार-

पट्वीमृदूयते। 'न कोपधायाः' (सू ८३८)। पाचिकायते। 'आचारेऽव-

त्यर्थः। **त्विद्वायते, विद्वस्यते इति**। विद्वानिवाचरतीत्यर्थः। विद्वच्छब्दात् क्यङि सलोपविकल्पः। **त्वद्यते। मद्यते इति**। त्वमिव अहमिव आचरतीत्यर्थः। युष्मदस्मच्छब्दात् क्यङि 'प्रत्ययोत्तरपदयोश्च' इति मपर्यन्तस्य त्वमौ। **युष्मद्यते। अस्मद्यते इति**। यूयमिव वयमिव आचरतीत्यर्थः। 'त्वमावेकवचने' इत्यस्मात् 'प्रत्ययोत्तरपदयोश्च' इति सूत्रे एकवचने इत्यनुवृत्तेरेकत्वविशिष्टार्थवृत्तित्वे सत्येव युष्मदस्मदोस्त्वमाविति भावः। कुमार्यादिशब्दात् क्यङि पुंवत्त्वं स्मारयति **क्यङ्मानिनोश्चेति। कुमारायते इति**। पुंवत्त्वेन ङीषो निवृत्तौ दीर्घः। **हरितायते इति**। हारिणीशब्दात् क्यङि पुंवत्त्वेन 'वर्णादनुदात्तात्'—, इति नत्वस्य ङीषश्च निवृत्तौ दीर्घः। **गुरूयते इति**। गुर्वीशब्दात् क्यङि ङीषो निवृत्तौ दीर्घः। **सपत्नायते इति**। शत्रुपर्यायात् सपत्नशब्दात् शार्ङ्गरवादित्वेन ङीनन्तात् पुंवत्त्वेन ङीनो निवृत्तौ दीर्घ इति भावः। **सपतीयते इति**। समानः पतिः स्वामी यस्या इति बहुव्रीहौ सपतिशब्दस्य नत्वे ङीपि च निष्पन्नात् सपत्नीशब्दात् क्यङि पुंवत्त्वेन ङीब्नत्वयोर्निवृत्तौ दीर्घ इति भावः। **सपत्नीयते इति**। विवाहनिबन्धनं पतिशब्दमाश्रित्य समानः पतिः यस्या इति बहुव्रीहौ सपत्नीशब्दस्य नित्यस्त्रीलिङ्गत्वान्न पुंवत्त्वमिति भावः। **युवायते इति**। युवतिशब्दात् क्यङि पुंवत्त्वे तिप्रत्ययस्य निवृत्तौ नलोपे दीर्घ इति भावः। वयोवाचिनां जातिकार्यं वैकल्पिकमिति 'जातेरस्त्रीविषयात्—' इत्यत्र भाष्ये स्पष्टम्। एतेन 'जातेश्च' इति निषेधादिह पुंवत्त्वं दुर्लभमित्यपास्तमिति शब्देन्दुशेखरे स्थितम्। **पट्वीमृदूयते इति**। इह पूर्वपदस्य क्यङ्परत्वाभावान्न पुंवत्त्वम्। ननु पाचिकेवाचरति पाचिकायते इत्यत्रापि 'क्यङ्मानिनोश्च' इति पुंवत्त्वेन टापः 'प्रत्ययस्थात्—' इति इत्वस्य च निवृत्तौ पाचकायते इति स्यादित्यत आह **न कोपधाया इति**। 'आचारेऽवगल्भक्लीबहोडेभ्यः

विशेषनिमित्तकेन पतिशब्देन समासे सति नित्यस्त्रीत्वान्न पुंवत्। **युवायत इति**। न च क्यप्सूत्रे भाष्ये युवतितरेत्युदाहरणाद् यौवनं जातिरिति 'जातेश्च' इति निषेधे युवतीयत इत्युदाहरणमिहोचितमिति वाच्यम्, वयसोऽनित्यत्वेनाजातित्वात्। अन्यथा युवजानिरिति 'अचः परस्मिन्—' इति सूत्रस्थभाष्यग्रन्थो विरुध्येत। युवतितरेति भाष्यस्य तु का गतिरिति चेत्। अत्राहुः—'तसिलादिषु—' इति पुंवद्भावे प्राप्ते भाष्यनिर्देशादेव न पुंवदिति। युवतीशब्दस्य तु तरपि 'घरूप—' इति ह्रस्वे युवतितरेति भवत्येव। **पट्वीमृदूयत इति**। पूर्वपदस्य क्यङ्परत्वाभावान्न पुंवत्। **पाचिकायत इति**। पुंवद्भावे सति कात्पूर्वस्येत्वं न श्रूयेतेति भावः।

गल्भक्लीबहोडेभ्यः क्विब्वा' (वा १७२१)। वाग्रहणात् क्यङपि। अवगल्भादयः पचाद्यजन्ताः। क्विप्संनियोगेनानुदात्तत्वमनुनासिकत्वं चाप्रत्ययस्य प्रतिज्ञायते, तेन तङ्। अवगल्भते। क्लीबते। होडते। भूतपूर्वादप्यनेकाच आम्, एतद्वार्तिकारम्भसामर्थ्यात्। न च अवगल्भते इत्यादिसिद्धिस्तत्फलम्।

क्विब्वा' इति वार्तिकम्। उपमानादित्यनुवर्तते। 'धातोः कर्मणः–' इत्यतो वाग्रहणस्यास्मिन्प्रकरणे अनुवृत्त्यैव सिद्धे वाग्रहणं व्यर्थमित्यत आह वाग्रहणात् क्यङपीति। अन्यथा विशेषविहितत्वात् क्विपा क्यङो बाधः स्यादिति भावः। तथा चात्र वाशब्दो विकल्पार्थक इति फलितम्। अत्र सुप इति नानुवर्तते। प्रातिपदिकात् क्यङोऽप्राप्तौ वाग्रहणात् समुच्चीयते इति केचित्। अवगल्भादय इति। 'गल्भ धार्ष्ट्ये' अवपूर्वः, 'क्लीब अधार्ष्ट्ये' 'होडृ अनादरे' एभ्यः पचाद्यचि अवगल्भादिशब्दास्त्रयो निष्पन्ना इत्यर्थः। तथा च अवगल्भ इवाचरति, क्लीब इवाचरति, होड इवाचरतीत्यर्थे अवगल्भादिशब्देभ्यः क्विप्क्यङाविति स्थितम्। अवगल्भते इत्यात्मनेपदलाभायाह क्विप्संनियोगेनेति। अन्त्यस्य अकारस्य अनुदात्तत्वमनुनासिकत्वं चात्र प्रतिज्ञायते। ततश्च तस्य इत्संज्ञायां लोपे अनुदात्तेत्त्वादात्मने पदं लभ्यते, तदाह तेन तङिति। अवगल्भते इति। क्विपि भकारादकारस्य लोपे हलन्ताल्लडादौ तङि शबिति भावः। ननु अवगल्भांचक्रे, क्लीबांचक्रे, होडांचक्रे इत्यत्र कथमाम्? अन्त्यस्य च इत्संज्ञालोपाभ्यामपहारेण धातूनामेकाच्त्वेन 'कास्प्रत्ययादाम्–' इत्यस्याप्रवृत्तेः। न च अवगल्भ इत्यस्य क्विबन्तस्य धातोरनेकाच्कत्वमस्तीति वाच्यम्, 'उपसर्गसमानाकारं पूर्वपदं धातुसंज्ञाप्रयोजके प्रत्यये चिकीर्षिते पृथक् क्रियते' इत्यनुपदमेव वक्ष्यमाणत्वादित्यत आह भूतपूर्वादपीति। क्विबुत्पत्तेः प्राक्तनमनेकाच्त्वं भूतपूर्वगत्या आश्रित्येत्यर्थः। भूतपूर्वगत्याश्रयणे प्रमाणमाह एतद्वार्तिकेति। 'सर्वप्रातिपदिकेभ्यः क्विब्वा–' इति वक्ष्यमाणवार्तिकादेव अवगल्भते, अवजगल्भे इत्यादिसिद्धौ पुनरेभ्यः क्विब्विधानं तत्संनियोगेन अन्त्यवर्णस्य अनुदात्तत्वानुनासिकत्वप्रतिज्ञानार्थं सद् भूत-

---

एवं पञ्चमीयते। स्त्रीयते। सुकेशीयते। ब्राह्मणीयत इत्यादि। आचारेऽवगल्भ। गल्भ धार्ष्ट्ये। क्लीबृ अधार्ष्ट्ये। होडृ अनादरे। क्यङपीति। अपिशब्दाद्वाक्यम्। तत्तु 'सर्वप्रातिपदिकेभ्यः–' इत्यत्र वाग्रहणाल्लभ्यते इत्याहुः। क्विप्सन्नियोगेनेत्यादि। तेन क्यङ्सन्नियोगेनानुदात्तत्वानुनासिकत्वयोरभावादित्संज्ञालोपौ न स्त इति 'अकृत्सार्व–' इति दीर्घे सति अवगल्भायते क्लीबायत इत्यादि भवति। तेन तङिति। आत्मनेपदमित्यर्थः। तथा च अवगल्भमानः क्लीबमानः

केवलानामेवाचारेऽपि वृत्तिसंभवाद्, धातूनामनेकार्थत्वात् । अवगल्भाचक्रे । क्लीबाचक्रे । होडाचक्रे । वार्तिकेऽवेत्युपसर्गविशिष्टपाठात्केवलादुपसर्गान्तरविशिष्टाच्च क्यङेवेति माधवादयः । तङ् नेति सूचितम् । 'सर्वप्रातिपदिकेभ्यः

पूर्वगत्या अनेकाच्त्वाश्रयणं ज्ञापयतीत्यर्थः । नन्वनुदात्तत्वानुनासिकत्वप्रतिज्ञानस्यात्मनेपदसिद्ध्युपक्षीणत्वात् कथमुक्तज्ञापकतेत्याशङ्क्य निराकरोति **न चावगल्भते इत्यादिसिद्धिस्तत्फलमिति** । कुत इत्यत आह **केवलानामिति** । अच्प्रत्ययरहितानां धातुपाठसिद्धानामनुदात्तेतामेव गल्भादिधातूनामवगल्भ इवाचरतीत्याद्यर्थेषु वृत्तिसंभवात् । तच्च कुत इत्यत आह **धातूनामनेकार्थत्वादिति** । एवं च 'आचारेऽवगल्भ–' इति क्विब्विधानमनुबन्धासञ्जनार्थं सद् भूतपूर्वगत्या अनेकाच्त्वाश्रयणं ज्ञापयतीति सिद्धम् । न च 'सर्वप्रातिपदिकेभ्यः–' इति क्विपि अवगल्भतीत्यादिवारणाय अनुबन्धासञ्जनमुपक्षीणमिति कथं तस्य उक्तज्ञापकतेति वाच्यम्, 'सर्वप्रातिपदिकेभ्यः–' इति वार्तिकेन क्विपि तथा प्रयोगे इष्टापत्तेः भूतपूर्वाश्रयणपरभाष्यप्रामाण्येन 'सर्वप्रातिपदिकेभ्यः–' इति वार्तिकस्य अवगल्भादिभ्यः अप्रवृत्तिविज्ञानाद्वेत्यास्तां तावत् । 'आचारेऽवगल्भ–' इत्यत्र अवेत्यस्य प्रयोजनमाह **अवेत्युपसर्गेति** । **केवलादिति** । उपसर्गविहीनाद्गल्भशब्दादित्यर्थः । **उपसर्गान्तरेति** । प्रगल्भानुगल्भादिशब्दादित्यर्थः । **क्यङेवेति** । न तु क्विबित्यर्थः । माधवादय इत्यस्वरसोद्भावनम् । तद्बीजमाह **तङ् नेति सूचितमिति** । केवलादुपसर्गान्तरविशिष्टाच्च गल्भशब्दात् प्रगल्भादिशब्दाच्च अनेन क्विबभावेऽपि 'सर्वप्रातिपदिकेभ्यः–' इति वार्तिकेन क्विब् निर्बाधः । परन्तु अवपूर्वत्व एवानुबन्धासञ्जनादात्मनेपदमेव तत्र नेति वक्तुमुचितमित्यर्थः । **सर्वप्रातिपदिकेभ्य**

इत्यादि सिध्यति । **माधवादय इति** । केचित्तेषामाशयमाहुः—'आचारेऽवगल्भ–' इत्यत्र सुप इत्यनुवर्तते । तथा च केवलादुपसर्गान्तरविशिष्टाद् गल्भप्रगल्भादिसुबन्तात्क्यङेव, न तु क्विप् । **तङ् नेति सूचितमिति** । उत्तरवार्तिकेन प्रातिपदिकमात्रात्क्विप् विधीयत इति एतेभ्योऽपि त्रिभ्यः क्विपि सिद्धे तत्सन्नियोगेनानुदात्तत्वानुनासिकत्वमात्रमच्प्रत्ययस्य 'आचारेऽवगल्भ–' इत्यवगल्भादिषु प्रतिज्ञायते लाघवात् । अन्यत्र तु गल्भप्रगल्भादिप्रातिपदिकेषु क्विपि परस्मैपदमेव भवति, न तु तङिति भावः । नन्वेवम् 'आचारेऽवगल्भ–' इत्यत्र वाग्रहणात् क्यङमनुवर्त्य अवगल्भादिप्रातिपदिकेभ्यः क्यङ्विधानेऽप्यन्यत्र सुबन्तादेव क्यङिति क्यङो विषय एव नास्ति । तथा च केवलादुपसर्गान्तरविशिष्टाच्च क्यङप्ययुक्त इति चेत् । अत्र वदन्ति—प्रातिपदिकेभ्यः क्विप् सुबन्तेभ्यः क्यङिति विषयभेदेनापि गल्भति गल्भायते प्रगल्भति प्रगल्भायते इत्यादि सिध्यत्येवेति । स्यादेतत्—गल्भ धार्ष्ट्ये इत्यादीनामनुदात्तत्वादवगल्भते

क्विब्वा वक्तव्यः' (वा १७२२)। पूर्ववार्तिकं तु अनुबन्धासञ्जनार्थम्। तत्र क्विबनूद्यते। प्रातिपदिकग्रहणादिह सुप इति न संबध्यते। तेन पदकार्यं न। कृष्ण इवाचरति कृष्णति। 'अतो गुणे' (सू १९१) इति शपा सह पररूपम्। अ इवाचरति अति अतः अन्ति। प्रत्ययग्रहणमपनीय अनेकाच इत्युक्तेर्नाम्। औ अतुः उः, द्वित्वम्, 'अतो गुणे' (सू १९१) 'अत

इति। आचारे इति शेषः। नन्वनेनैव वार्तिकेन सिद्धे 'आचारेऽवगल्भ-' इति वार्तिकं व्यर्थमित्यत आह **पूर्ववार्तिकं त्विति**। अन्त्यवर्णस्य इ संज्ञासिद्ध्यर्थमित्यर्थः। तर्हि तत्र क्विब्ग्रहणं व्यर्थमित्यत आह **तत्र क्विबनूद्यत इति**। तत्संनियोगेनानुबन्धासञ्जनार्थमित्यर्थः। **पदकार्यं नेति**। राजानतीत्यादौ नलोपादिकं नेत्यर्थः। अन्यथा अन्तर्वर्तिविभक्त्या पदत्वान्नलोपादिकं स्यादिति भावः। **पररूपमिति**। कृष्णशब्दात् क्विबन्ताल्लडादौ शपि 'अतो गुणे' इति पररूपमित्यर्थः। कृष्णांचकार। कृष्णिता। कृष्णिष्यति। कृष्णतु। अकृष्णत्। कृष्णेत्। कृष्ण्यात्। अतो लोपात्परत्वाद् 'अकृत्सार्व-' इति दीर्घः। पूर्वविप्रतिषेधस्य विहितत्वादतो लोप इत्यन्ये। **अ इवेति**। अः विष्णुः। स इवेत्यर्थः। **अतीति**। शपा पररूपम्। असि अथः अथ। आमि आवः आमः। क्विप्प्रत्ययान्तत्वाल्लिटि 'कास्प्रत्ययात्-' इत्याम्प्रत्ययमाशङ्क्याह **प्रत्ययग्रहणमपनीयेति**। औ अतुः उः इति सिद्धरूपप्रदर्शनम्। तत्र प्रक्रियां दर्शयति **द्वित्वमिति**। णलि 'द्विर्वचनेऽचि' इति लोपस्य निषेध इति भावः। **अतो गुणे इति**। द्वित्वे कृते अ अ अ इति स्थिते अन्तरङ्गत्वादतो लोपे

इत्यादिप्रयोगसिद्धावपि अवगल्भादिषूत्तरवार्तिकेन क्विपि सत्यवगल्भतीत्याद्यनिष्टप्रयोगः स्यात्तद्वारणार्थम् 'आचारेऽवगल्भ' इति वार्तिकारम्भस्यावश्यकत्या सामर्थ्यस्योपक्षीणत्वाद् 'भूतपूर्वादप्यनेकाच आम्' इत्येतदप्ययुक्तमिति चेत्। सत्यम्। अत्र वयमाशयः—'सर्वप्रातिपदिकेभ्यः-' इति वार्तिके वाग्रहणेन व्यवस्थितविभाषाश्रीयते। तथा च अवगल्भक्लीबहोडेभ्यः क्विपोऽभावादनिष्टप्रयोगो न भविष्यतीति स्वीकृते सामर्थ्यं नोपक्षीणमिति दिक्। **पदकार्यं नेति**। सवर्णदीर्घो यद्यपि पदमात्रकार्यं न भवति, तथापि पदस्य जायमानं कार्यं नेत्यत्र तात्पर्यं बोध्यम्। तनोतीति तत्, स इव आचरति ततति, अत्र जश्त्वं न। त्वगिव आचरति त्वचति, अत्र कुत्वं नेत्यादपि बोध्यम्। **द्वित्वमिति**। अ णल् इति स्थिते 'द्विर्वचनेऽचि' इति निषेधादतो लोपो न भवतीति भावः। 'अतो गुणे' इति द्वित्वे कृतेऽप्यतो लोपो न भवति, अन्तरङ्गत्वेन बाधितत्वादिति भावः। यद्यप्यत्र फले विशेषो नास्ति तथापि शास्त्रप्रक्रममनुरुध्योक्तम्। यद्यप्येवं 'वार्णादाङ्गं बलीयः' इति परिभाषयाऽतो लोप एवोचित

आदेः' (सू २२४८) इति दीर्घः, णल औ, वृद्धिः। अतुसादिषु तु 'आतो लोप इटि च' (सू २३७२) इत्याल्लोपः। मालेवाचरति मालाति। लिङ्-

---

बाधित्वा पररूपमिति भावः। **अत आदेरिति।** न च परत्वान्नित्यत्वादपवादत्वाच्च 'अतो गुणे' इत्यस्मात्प्राग् 'अत आदेः' इत्यस्य प्रवृत्तिरिति वाच्यम्, तस्य बहिरङ्गत्वाद् 'अत आदेः' इत्यस्यापवादत्वेऽपि आनर्देत्यत्र हलादिशेषात्प्रागेव परत्वाद् 'अत आदेः' इत्यस्य चरितार्थत्वेन बाधकत्वासंभवाद् 'अपवादोऽपि यद्यन्यत्र चरितार्थस्तर्ह्यन्तरङ्गेण बाध्यते' इत्युक्तेरित्यन्यत्र विस्तरः। यद्यप्यत्र प्रक्रियाव्युत्क्रमे फलविशेषो नास्ति, तथापि न्याय्यत्वादेवमुक्तम्। **णल औ इति।** पररूपे दीर्घे च आ अ इति स्थिते 'आत औ णलः' इत्यौत्वमिति भावः। **वृद्धिरिति।** आ औ इति स्थिते 'वृद्धिरेचि' इति वृद्धिरित्यर्थः। तथा च औ इति रूपं परिनिष्ठितम्। **अतुसादिष्विति।** अ अतुस्, अ उस्, इति स्थिते द्वित्वे पररूपे 'अत आदेः' इति दीर्घे आतो लोप इत्यर्थः। अतुः उः इति प्रत्ययमात्रं शिष्यते। थलि इटि द्वित्वे दीर्घे आल्लोपे, इथ अथुः अ। औ इव इम। वस्तुतस्तु 'कास्यनेकाज्ग्रहणम्–' इति वार्तिकव्याख्यावसरे प्रत्ययग्रहणमपनीयेति भाष्ये नोक्तम्। कासेश्च प्रत्ययान्ताच्च आमिति लभ्यते। अत एव 'आचारेऽवगल्भक्लीबहोडेभ्यः–' इति वार्तिके अवगल्भांचक्रे इत्यादौ अन्त्यवर्णस्यानुबन्धत्वेन एकाच्त्वेऽपि 'कास्प्रत्ययात्–' इत्यामित्युक्तं भाष्ये इति शब्देन्दुशेखरे

इति चेत्। मैवम्, तस्याः समानाश्रये कारश्चकारेत्यादौ प्रवृत्तिस्वीकारान्न तु व्याश्रयेऽपि। न च परत्वान्नित्यत्वाच्च 'अत आदेः' इत्यनेनैव प्रथमं भाव्यमिति वाच्यम्, तस्य बहिरङ्गत्वेनासिद्धत्वात्। न चापवादत्वाद् 'अत आदेः' इत्यनेन भाव्यमिति वाच्यम्, अपवादो यद्यन्यत्र चरितार्थस्तर्हि अन्तरङ्गेण बाध्यत इत्युक्तत्वात्। आनर्देत्यादौ तस्य चरितार्थत्वात्। तत्र हलादिःशेषात्प्रागेव परत्वाद् 'अत आदेः–' इत्यस्य प्रवृत्तेः। न च नित्यत्वाद्धलादिः शेष एव प्रथमं स्यादिति वाच्यम्, नित्यत्वस्य 'अत आदेः' इत्यत्रापि तुल्यत्वात्। एतच्च मनोरमानुसारेणोक्तम्। केचिदत्र वदन्ति। 'अतो गुणे' इति पररूपापवादस्य 'अत आदेः' इत्यस्य आनर्देत्यादौ चरितार्थत्वादन्तरङ्गमेव भवतीति मनोरमोक्तं चिन्त्यम्। स्वविषयमध्ये एकत्रोदाहरणे चरितार्थस्योदाहरणान्तरेऽपि प्रवृत्त्यभ्युपगमात्। न हि गोद इत्यत्र 'आतोऽनुपसर्गे कः' इति चरितार्थमिति गोप इत्यादौ न प्रवर्तते। तस्मादणं बाधित्वा कप्रत्ययो यथा स्वविषये सर्वत्र प्रवर्तते तथेहापि प्रवर्तत इति। तदपरे न क्षमन्ते। गोदगोपादौ सर्वत्राणः कस्य च प्राप्तिसंभवे विनिगमनाविरहादणं बाधित्वा कप्रत्यय एव भवति। प्रकृते त्वानर्देत्यादौ हलादिःशेषात्प्राग् 'अतो गुणे' इत्यस्य प्राप्त्यभावाद्वैषम्यमस्तीति।

विशिष्टपरिभाषयैकादेशस्य पूर्वान्तत्वाद्वा क्विप् । मालाचकार । तर्हि अमालात्; अत्र हल्ङ्यादिलोपो न, ङीप्साहचर्यादापोऽपि सोरेव लोपाभिधानात् । हट्-सकौ, अमालासीत् । कविरिव कवयति । आशीर्लिङि कवीयात् । 'सिचि वृद्धि-' (सू २२६७) इत्यत्र धातोरित्यनुवर्त्य धातुरेव यो धातुरिति व्याख्या-

प्रपञ्चितम् । इता । इष्यति । अतु, अताम् अताम् अन्तु । अ, अतात् अतम् अत । आनि आव आम । आत् आताम् आन् । आः आतम् आत । आम् आव आम । विधिलिङि एत् एताम् एयुः । एः एतम् एत । एयम् एव एम । यात् यास्ताम् यासुः । लुङि 'इट ईटि' इति सिज्लोपे 'आटश्च' इति वृद्धिं बाधित्वा परत्वादलो लोपे इटा सह आटो वृद्धौ ऐत् ऐष्टाम् ऐषुः इत्यादीति केचित् । आर्धधातुकोपदेशकाले एव परत्वादलो लोपे अङ्गस्याभावादाट् नेत्यन्ये । ईत् इष्टाम् इत्यादि । ऐष्यत् ननु मालाशब्दस्य टाप्प्रत्ययान्तत्वेन प्रातिपदिकत्वाभावात्ततः कथं क्विबित्यत आह **लिङ्गविशिष्टेति** । वस्तुतस्तु आबन्तेभ्य आचारे क्विब् नास्त्येवेति विश्वपा-शब्दनिरूपणे प्रपञ्चितम् । **ङीप्साहचर्यादिति** । अथ तादाचारक्विबन्ताद् गौरीशब्दाद् लुङि अगौरयत् इत्यादौ तिस्योर्ङ्यन्तात्परत्वासंभवात् तत्साहचर्यादा-बन्तादपि न तयोर्लोप इत्यर्थः । **कवयतीति** । शपि गुणावादेशौ । **कवीया-दिति** । 'अकृत्सार्व-' इति दीर्घः । लुङि अकवि ईत् इति स्थिते सिचि वृद्धिमा-

ननु 'अत आदेः' इत्यस्य पररूपापवादत्वमेधामासेत्यत्र यदुक्तं तत्कथं संगच्छते । आनृधतुरित्यादौ 'आद् गुणः' इति गुणस्यापि प्राप्तेः । न च यथा सवर्णदीर्घो यण्-गुणयोरपवादस्तथायमप्युभयोरपवाद इति वाच्यम्, एवमप्यानर्दैत्यत्रेव हलादिः-शेषात्प्रागेवासेत्यत्रापि 'अत आदेः' इत्यस्य प्रवृत्तौ किं तेन पररूपापवादत्वकथनेनेति चेत् । अत्र केचिदाहुः—द्वन्द्वापवाद एकशेष इति केषांचित्प्रवादे यथाऽपवादशब्दो बाधकपरः, 'सरूपाणाम्-' इत्येकशेषानारम्भे हि स्वाद्युत्पत्तौ द्वन्द्वस्य प्रवृत्तेः, एकशेष-सूत्रारम्भे तु पदान्तराभावेन तदप्रवृत्तेः, तथाऽत्राप्यपवादशब्दोऽपि बाधकपरः । 'अत आदेः' इत्यनारम्भे हि हलादिःशेषे पररूपप्रवृत्तावेधामासेति स्यात् । आरम्भे तु तत्सूत्रे परत्वाद्धलादिःशेषात्प्रागेव दीर्घप्रवृत्त्या पररूपस्याप्रसक्तेरिति । तथाप्यासेत्यादौ प्रथमतः 'अत आदेः' इति दीर्घाकरणेऽपि हलादिः शेषे पररूपे च कृते तस्य पूर्वान्तवद्भावे सति अभ्यासग्रहणेन ग्रहणाद् 'अत आदेः' इति दीर्घप्रवृत्त्या समीहित-रूपसिद्धिः, तथाप्यानर्देत्यादि न सिध्यत्येव । तत्र हि 'तस्मान्नुड् द्विहलः' इति दीर्घी-भूतादकारान्नुटि नकारोपर्यकारश्रवणाभावप्रसङ्गादिति दिक् । प्रत्ययान्तत्वेनाप्रातिपदि-कत्वात्क्विपोऽनुत्पत्तिमाशङ्क्याह **लिङ्गविशिष्टेत्यादि** । **सिचि वृद्धिरित्यत्रेति** ।

नाम्नामधातोर्न वृद्धिरिति कैयटादयः, अकवयीत् । माधवस्तु नामधातोरपि वृद्धिमिच्छति, अकवायीत् । विरिव वयति । विवाय विव्यतुः । अवयीत्, अवायीत् । श्रीरिव श्रयति । शिश्राय शिश्रियतुः । पितेव पितरति । आशिषि रिङ् । पित्रियात् । भूरिव भवति । अत्र 'गातिस्था–' (सू २२२३) इति, 'भुवो वुक्–' (सू २१७४) इति, 'भवतेः–' (सू २१८१) इति च न भवति । अभिव्यक्तत्वेन धातुपाठस्थस्यैव तत्र ग्रहणात्, अभावीत् । बुभाव । द्रुरिव द्रवति । 'णिश्रि–' (सू २३१२) इति चङ् न, अद्रावीत् । २६६६ **अनुनासिकस्य क्विझलोः क्ङिति । (६–४–१५)** अनुनासिकान्तस्योपधाया दीर्घः स्यात्क्वौ झलादौ च क्ङिति । इदमिवाचरति इदामति । राजेव राजानति । पन्था इव पथीनति । मथीनति । ऋभुक्षीयति । द्यौरिव देवतीति

शङ्कयाह **सिचि वृद्धिरित्यत्रेति** । सिचा धातोराक्षेपतो लाभेऽपि 'ऋत इद्धातोः' इत्यतस्तदनुवृत्तेर्धातुरेव यो धातुरिति लभ्यते इति भावः । **कैयटादय इति** । 'इको गुणवृद्धी' इति सूत्रे गोशब्दादाचारक्विपि अगवीदित्युपक्रम्य तथोक्तत्वादिति भावः । **माधवस्त्विति** । 'सिचि वृद्धिः–' इत्यत्र 'ऋत इद्धातोः' इत्यतो धातुग्रहणानुवृत्तौ मानाभावेन धातुरेव यो धातुरित्युक्तार्थालाभादिति तदाशयः । वस्तुतस्तु 'इको गुणवृद्धी' 'वदव्रजहलन्तस्याचः' इत्यादिसूत्रस्थभाष्ये सिचि परत एजन्तं नास्तीत्युक्तत्वादेजन्तेभ्य आचारक्विप् नास्त्येवेति शब्देन्दुशेखरे प्रपञ्चितम् । **विरिवेति** । विः पक्षी स इवेत्यर्थः । **अभिव्यक्तत्वेनेति** । 'अभिव्यक्तपदार्था ये–' इति न्यायेनेति भावः । **अभावीदिति** । इह 'गातिस्था–' इति सिचो न लुक् । **बुभावेति** । इह न वुक् । अभ्यासस्य अत्वं च न । **चङ् नेति** । 'णिश्रि–' इति सूत्रे द्रुग्रहणेन धातुपाठस्थस्यैव ग्रहणादिति भावः । **अनुनासिकस्य** । अङ्गस्येत्यधिकृतमनुनासिकेन विशेष्यते, तदन्तविधिः । 'नोपधायाः' इत्यत उपधाया इति 'ढ्लोपे–' इत्यतो दीर्घ इति चानुवर्तते, तदाह **अनुनासिकान्तस्ये-**

सिचा धातोराक्षेपाद् 'ऋत इद्धातोः' इत्यतो धातोरित्यनुवर्तनाच्च धातुरेव यो धातुरिति व्याख्या लभ्यत इति ज्ञेयम् । **विरिवेति** । विः पक्षी । **अनुनासिकस्य** । अङ्गस्येति विशेष्यसन्निधानात्तदन्तलाभः । 'ढ्लोपे–' इत्यतो दीर्घग्रहणम्, 'नोपधायाः' इत्यत उपधाग्रहणं चानुवर्तते, तदाह **अनुनासिकान्तस्येत्यादि** । **झलादाविति** । एतच्च 'यस्मिन्विधिस्तदादावल्ग्रहणे' इति परिभाषया लभ्यते । झलादौ किति शान्तो दान्त इत्युदाहरणम्, ङिति तु यङ्लुकि तसि शंशान्तः, दंदान्तः । **पथीनतीति** । अन्तरङ्गत्वाद्दीर्घस्ततो न गुण इत्याहुः । 'इन्हन्–' इत्यनेन णावेवेति

माधवः। अत्र ऊठि ध्यवतीत्युचितम्। क इव कति। चकौ इति हरदत्तः। माधवस्तु 'णयल्लोपौ–' इति वचनाण्णलि वृद्धिं बाधित्वा अतो लोपात् चक इति

त्यादिना। **इदामतीति**। 'हलन्तेभ्य आचारक्विब् नास्ति' इति 'हन्नपधायाः–' इति सूत्रभाष्ये स्पष्टमिति शब्देन्दुशेखरे स्थितम्। **पथीनतीति**। पथिन्शब्दात् क्विपि 'अनुनासिकस्य–' इति इकारस्य दीर्घः। इदं तु माधवानुरोधेन क्विबभ्युपगमेऽपि तिपि पथेनतीत्येव युक्तम्, 'इन्हन्–' इति नियमेन दीर्घाप्राप्तेः। न च नियमस्य सजातीयापेक्षत्वात् सुबानन्तर्ये एवायं नियमो नान्यत्रेति वाच्यम्, तथा सति वृत्रघ्नः घ्नौ वृत्रघ्नीत्यत्रापि अल्लोपं बाधित्वा अन्तरङ्गत्वाद् 'अनुनासिकस्य–' इत्युपधादीर्घापत्तेरित्याहुः। **देवतीतीति**। दिव्शब्दाचारक्विबन्तात् शपि लघूपधगुणः। 'नः क्ये' इति नियमेन अपदान्तत्वाद् 'दिव उत्' इत्युत्त्वं नेति भावः। **अत्र ऊठीति**। दिव्शब्दात् क्विपि 'च्छ्वोः–' इति वकारस्य ऊठि कृते लघूपधगुणं बाधित्वा परत्वादिकारस्य यणि द्यूशब्दात् शपि ऊकारस्य गुणे अवादेशे च द्यवतीति रूपमुचितमित्यर्थः। **चकाविति**। कशब्दात् क्विबन्ताल्लिटि णलि द्वित्वे चुत्वे चक अ इति स्थिते ककारादकारस्य अतो लोपात्परत्वाद् वृद्धौ आकारे 'आत औ णलः' इत्यौत्वे वृद्धिरेकादेश इति भावः। **माधवस्त्विति**। चक अ इति स्थिते पूर्वविप्रतिषेधाद् वृद्धिं बाधित्वा ककारादकारस्य अतो लोपे कृते णलोऽकारेण सह चक इति रूपमित्यर्थः। नचैवं सति अ इवाचरति अति औ अतुः

नियमाद्दीर्घाभावे गुणे सति पथेनतीत्येव रूपमित्यन्ये। येषामिन्नादीनां शावुपधादीर्घः क्रियते परमदण्डीनीत्यादौ तेषामेव दण्डिन्वृत्रहन्नादीनाम् 'इन्हन्–' इति नियमो न तु पथ्यादीनाम्। तेषां तु शौ परतः सुपन्थानीत्यादावुपधादीर्घप्रवृत्तावपि 'इतोऽत्सर्वनामस्थाने' इत्यत्त्वे कृते 'इन्हन्–' इति नियमाप्रवृत्तेः। अन्यथा पन्थानौ पन्थान इति न सिध्येत्, तथा च पथीनतीत्यादयेव साध्वित्यपरे। **देवतीति माधव इति**। अपदान्तत्वाद्दिव उत्त्वं न। **अत्रेति**। लघूपधगुणं बाधित्वान्तरङ्गत्वादूठि यण्, तस्मिन्कर्तव्ये बहिरङ्गस्याप्यूठो नासिद्धत्वम्, 'नाजानन्तर्ये–' इति निषेधात्। न च वार्णादाङ्गस्य बलीयस्त्वाद्यणं बाधित्वा लघूपधगुणः स्यादिति वाच्यम्, व्याश्रयत्वात्। अत एव सिवेरौणादिके नप्रत्यये स्योनशब्दः सिध्यतीति भावः। **क इवेति**। को ब्रह्मा। **चक इतीति**। नन्वेवम् औ अतुरित्यत्रापि 'अत आदेः' इति दीर्घं बाधित्वा 'अतो लोपः' एव स्यादिति चेत्। अत्राहुः—'णयल्लोपौ–' इति वचनेन जायमानो योऽतो लोपः स तु सन्निहितमेव 'अकृत्सार्व–' इति दीर्घं बाधते, 'अनन्तरस्य–' इति न्यायात्, न तु व्यवहितमपि 'अत आदेः' इति दीर्घमिति माधवाशयानेन तद्ग्रन्थस्य

रूपमाह। स्व इव सस्वौ, सस्व। यत्तु स्वामास स्वांचकार इति तदनाकरमेव।

२६६७ **भृशादिभ्यो भुव्यच्वेर्लोपश्च हलः। (३-१-१२)** अभूततद्भावविषयेभ्यो भृशादिभ्यो भवत्यर्थे क्यङ् स्याद्धलन्तानामेषां लोपश्च। अभृशो भृशो भवति भृशायते। अच्वेः इति पर्युदासबलाद् अभूततद्भावे इति लब्धम्। तेनेह न—क्व दिवा भृशा भवन्ति। ये रात्रौ भृशा नक्षत्रादयस्ते दिवा क्व भवन्तीत्यर्थः। सुमनस्, अस्य सलोपः, सुमनायते। चुरादौ 'संग्राम युद्धे' इति पठ्यते। तत्र संग्राम इति प्रातिपदिकम्। तस्मात् 'तत्करोति—' इति णिच्

इत्यत्रापि लिटि 'अत आदेः' इति दीर्घं बाधित्वा अतो लोपः स्यादिति वाच्यम्, णयल्लोपाविति पूर्वविप्रतिषेधलभ्यः अतो लोपः संनिहितमेव 'अकृत्सार्व—' इति दीर्घं बाधते, न तु 'अत आदेः' इति दीर्घमपि, 'अनन्तरस्य—' इति न्यायादिति माधवाशय इत्याहुः। **तदनाकरमेवेति**। अनेकाच्त्वाभावादिति भावः। वस्तुतस्तु प्रत्ययग्रहणमपनीयेत्यस्य भाष्ये अदर्शनात् प्रत्ययान्तत्वादाम्भवत्येवेति युक्तमेवेत्यनुपदमेवोक्तम्। **भृशादिभ्यो**। भवनं भूः, भावे क्विप्, तदाह **भवत्यर्थे इति**। भवने इत्यर्थः। **क्यङ् स्यादिति**। 'कर्तुः क्यङ् सलोपश्च' इत्यतस्तदनुवृत्तेरिति भावः। **हलन्तानामेषामिति**। भृशादिषु ये हलन्तास्तेषां लोपः क्यङ् चेत्यर्थः। ननु 'अभूततद्भावे' इति कुतो लब्धमित्यत आह **अच्वेरिति पर्युदासबलादिति**। अभूततद्भावग्रहणमिति वार्तिकमेतल्लब्धार्थकथनपरमिति भावः। **ये रात्रौ भृशा इति**। प्रकाशातिशयवन्त इत्यर्थः। भृशादिषु हलन्तमुदाहरति **सुमनस् इति**। **सुमनायते इति**। असुमनाः सुमना भवतीत्यर्थः। यद्यपि स्त्रियामित्यधिकारे 'अप्सुमनस्समासिकतावर्षाणां बहुत्वं च' इति लिङ्गानुशासनसूत्रे सुमनश्शब्दस्य नित्यं बहुवचनं विहितम्, तथापि तद्देवादिपर्यायरूढविषयम्। सु शोभनं मनो यस्येति सुमनाः इति बहुव्रीहिर्यौगिक इति भावः। सुमनायते इति क्यङि सलोपे 'अकृत्सार्व—' इति दीर्घः। ननु लङि मनश्शब्दात्प्रागडि 'स्वमनायत' इति वक्ष्यमाणमनुपपन्नम्, अङ्गस्य अड्विधानात् सुमनश्शब्दस्य समस्तस्यैव लङं प्रत्यङ्गत्वात् 'प्रत्ययग्रहणे यस्मात् स विहितस्तदादेस्तदन्तस्य ग्रहणम्' इति न्यायादित्याशङ्क्याह **चुरादौ 'संग्राम युद्धे'**

विरोध इति। **अनाकरमेवेति**। अनेकाच्त्वाभावादित्यर्थः। अन्ये तु भाष्ये प्रत्ययग्रहणमपनीयेत्यनुक्तत्वात्प्रत्ययान्ततया स्वामासेत्यादि रूपं शुद्धमेवेत्याहुः। **भृशादिभ्यो**। भुवीत्येतद्व्याचष्टे **भवत्यर्थ इति**। भृश, शीघ्र, मन्द, पण्डित, दुर्मनस्, सुमनस्, उन्मनस्, इत्यादयो भृशादयः। क्व दिवेत्यादि भाष्यकारीयं प्रत्युदाहरणं व्याचष्टे **ये रात्रावित्यादिना**। **प्रातिपदिकमिति**। न त्वयं धातुः, 'प्रसेरा

सिद्धः । तत्संनियोगेनानुबन्ध आसज्यते । युद्धे सोऽयं धातुः । इत्युक्तेऽपि सामर्थ्यात्संग्रामशब्दे लब्धे विशिष्टपाठो ज्ञापयति–'उपसर्गसमानाकारं पूर्व-

---

इति पठ्यते इति । ततश्च क्वचित् सोपसर्गपाठबलादन्यस्मात् सोपसर्गादाचार-क्विपि उपसर्गस्य न धातुसंज्ञाप्रवेश इति विज्ञायते इत्यर्थः । ननु चुरादौ संग्रामेति समस्तो धातुः, न तु सोपसर्गो ग्रामशब्दः । एवं चास्य प्रातिपदिकत्वाभावात् सोप-सर्गात् क्विपि उपसर्गस्य न धातुसंज्ञाप्रवेश इत्यत्र कथमिदं गमकमित्यत आह तत्र **संग्राम इति प्रातिपदिकमिति** । 'ग्रसेरा च' इत्यौणादिके मन्प्रत्यये निष्पन्नस्य ग्रामशब्दस्य 'कृत्तद्धित–' इति प्रातिपदिकत्वम् । अव्युत्पत्तिपक्षे 'अर्थवदधातुः–' इति प्रातिपदिकत्वमित्यर्थः । ननु चुरादावस्य पाठो धात्वधिकारविहितचौरादिकणिजर्थः । एवं च प्रातिपदिकत्वेन चुरादौ तस्य पाठो व्यर्थ इत्यत आह **तस्मादिति** । तस्मात् संग्राम इति प्रातिपदिकात् चौरादिकणिजसंभवेऽपि 'तत्करोति–' इत्यर्थे णिच् सिद्ध इत्यर्थः । ननु 'तत्करोति–' इत्यनेनैव संग्रामशब्दात् प्रातिपदिकाण्णिच्सिद्धेः किमर्थमिह चुरादौ तस्य पाठ इत्यत आह **तत्संनियोगेनेति** । णिच्संनियोगेन अकारस्य इत्संज्ञकस्य अनुदात्तेत्त्वार्थकस्य आसञ्जनार्थ इत्यर्थः । न च मकारादकारस्य इत्संज्ञकत्वे अल्लोपस्य णिनिमित्तकत्वाभावादससंग्रामत इत्यत्र 'णौ चङ्युपधायाः–' इत्युपधाह्रस्वः स्यादिति वाच्यम्, संग्रामेत्ययं हि कथादित्वाददन्तः । तस्मादकारो भिन्न एव अनुबन्धत्वेनासज्यते इत्यर्थः । एवं च णौ अतो लोपे सति णावल्लोपि-त्वान्नोपधाह्रस्वः । कथादित्वलक्षणादन्तत्वलाभायैवास्य चुरादौ पाठ इति भावः । ननु चुरादौ संग्रामशब्दस्य 'तत्करोति–' इति णिचि परे अस्त्वनुबन्धासङ्गः । तथापि आचारक्विपि उपसर्गस्य न धातुसंज्ञाप्रवेश इत्यत्र कथमस्य ज्ञापकत्वेत्यत आह युद्धे **इति । सामर्थ्यादिति** । ग्राम युद्धे इत्येतावतैव संग्रामशब्दो लभ्यते, केवलस्य ग्रामशब्दस्य युद्धे प्रयोगाभावादित्यर्थः । **विशिष्टपाठ इति** । संग्रामशब्दपाठ इत्यर्थः । ज्ञाप्यमर्थमाह **समानाकारमिति** । संग्रामशब्दे युद्धवाचिनि समिन्यस्य

च' इत्यौणादिकेन मन्प्रत्ययान्ततया निष्पादितत्वात् । एवं च वक्ष्यमाणज्ञापकं संग-च्छत इति भावः । **अनुबन्ध इति** । संग्रामेति मशब्दाकाराद् भिन्नोऽकारोऽनु-बन्ध इत्यर्थः । तथा च अत्र 'अतो गुणे' इति पररूपं ज्ञेयम् । यदि तु मकाराद-कारोऽनुबन्धः स्यात्तर्हि अससंग्रामतेत्यत्र 'णौ चङि–' इत्युपधाह्रस्वः स्यात् । णिच्-सन्नियोगेनानुबन्धकरणे तु अनुदात्तेत्त्वलक्षणस्यात्मनेपदस्याप्रवृत्त्या 'णिचश्च' इति कर्तृगामिनि क्रियाफल एवात्मनेपदं स्यान्न तु परगामिनीति विवेकः । **सामर्थ्या-दिति** । केवलस्य ग्रामशब्दस्य युद्धे प्रयोगाभावादिति भावः क्रियायोगाभावादुप-

पदं धातुसंज्ञाप्रयोजके प्रत्यये चिकीर्षिते पृथक् क्रियते' इति। तेन मनःशब्दात्प्रागट्। स्वमनायत। उन्मनायते। उदमनायत। एवं च अवागल्भत अवागल्भिष्टेत्यादावप्यवेत्यस्य पृथक्करणं बोध्यम्। ज्ञापकं च सजातीयविषयम्। तेन यत्रोपसर्गस्वरूपं सकलं श्रूयते न त्वादेशेनापहृतं तत्रैव पृथक्कृतिः। एवं च आ ऊढ ओढः, स इवाचर्य ओढायित्वा, अत्र उन्मनाय्य अवगल्भ्य इतिवन्न

क्रियायोगाभावात् समानाकारमित्युक्तम्। **धातुसंज्ञाप्रयोजके इति**। क्विबादाविति शेषः। **पृथक् क्रियते इति**। तथा च न तस्य धातुसंज्ञाप्रवेश इत्यर्थः। ततः किमित्यत आह **तेनेति**। सम् इत्यस्य धातुसंज्ञाप्रवेशाभावेनेत्यर्थः। तथा च सुमनश्शब्दाद् आचारक्विपि विवक्षिते मनश्शब्दमात्रस्य धातुत्वात्ततो लङि मनश्शब्दस्यैवाङ्गत्वात्ततः प्रागेव अट्। न तु सुमनस् इति समुदायात्प्रागित्यर्थः। एतेन संग्रामयतेरेव सोपसर्गाद् नान्यस्मादित्यादि भाष्यं भृशादिभ्य इति सूत्रस्थं व्याख्यातमिति बोध्यम्। **उन्मनायते इति**। भृशादित्वात् क्यङि सलोपः। **एवं चेति**। एवमुक्तरीत्या 'आचारेऽवगल्भ–' इति क्विब्विधावपि अवेत्यस्य पृथक्करणाद् गल्भशब्दात्प्रागेव अड् इत्यर्थः। ननु आ ऊढ ओढः, 'कुगति–' इति समासः। अस्माद् भृशादित्वात् क्यङि ओढायते इत्यादि रूपम्। अत्रापि आङो धातुसंज्ञाप्रवेशो न स्यात्। तत्र यद्यपि लङि ऊढशब्दाद्वा आङो वा प्राग् आटि न रूपे विशेषः। उभयथापि औढायतेत्येव रूपं सिद्धमेव। तथापि ओढायेति क्यङन्तात् क्त्वाप्रत्यये अतो लोपे ओढायित्वेत्येवेष्यते, अत्र क्यङि चिकीर्षिते उक्तरीत्या पृथक्करणे पृथक्कृतस्य आङः 'कुगतिप्रादयः' इति क्त्वाप्रत्ययान्तेन समासे सति 'समासेऽनञ्पूर्वे क्त्वो ल्यप्' इति ल्यप् स्यादित्यत आह **ज्ञापकं च सजातीयविषयमिति**। तदेवोपपादयति **तेनेति**। चुरादौ 'संग्राम युद्धे' इति सम्ग्रहणस्य उक्तार्थे पृथक्करणे ज्ञापकस्य सजातीयविषयकत्वाश्रयणेन यत्र उपसर्गस्वरूपम् अविकृतं श्रूयते नत्वेकादेशेनापहृतं तत्रैव उपसर्गस्य पृथक्कृतिरिति विज्ञायते इत्यर्थः, संग्रामे सम्ग्रहणस्य ज्ञापकस्य एवंविधत्वादिति भावः। ततः किमित्यत आह **एवं चेति**। **ओढायित्वेति**। ओढ-

---

सर्गो नेत्यभिप्रेत्याह **समानाकारमिति**। **पूर्वपदमिति**। तच्च समास एव संभवति। तेन आन्दोलयित्वा प्रेङ्खोलयित्वेत्यादौ आ-प्रेत्यादीनां न पृथक्करणम्। अन्यथा तेषां क्त्वाप्रत्ययान्तेन समासे सति ल्यप् स्यादिति भावः। पृथक्करणस्य फलमाह **तेनेति**। सुमिमनायिषति। उन्मिमनायिषतीत्यादौ मनश्शब्दस्य द्विर्वचनं पृथक्करणस्य फलमिति बोध्यम्। **अवागल्भतेति**। 'आचारेऽवगल्भ–' इति क्विब्विधौ अवेत्यस्य पृथक्करणाद् गल्भशब्दात्प्रागट्। किं तत्साजात्यमित्यत आह

ल्यप्। ज्ञापकस्य विशेषविषयत्वे षाष्ठवार्तिकं तद्भाष्यं च प्रमाणम्। तथाहि–'उस्योमाङ्क्ष्वाटः प्रतिषेधः' (वा ३६३६)। उस्योमाङोश्च परयोराटः पररूपं नेत्यर्थः। उस्रामैच्छत् औस्रीयत्। औङ्कारीयत्। औढीयत्। 'आटश्च' (सू २६९)

शब्दाद् भृशादित्वात् क्यङि ओढायेत्यस्मात् क्यङन्तात् क्त्वाप्रत्यये अतो लोपे रूपम्। **अत्रेति**। अत्र न ल्यबित्यन्वयः। क्यङि विवक्षिते आङ एकदेशेनापहृतत्वेन पृथक्करणाभावे सति तस्य आङः क्त्वाप्रत्ययान्तेन समासाभावान्न ल्यबिति भावः। उन्मनाय्य, अवगल्भ्य इतिवदिति व्यतिरेकदृष्टान्तः। उन्मनस्शब्दाद् भृशादित्वादाचारे क्यङि सकारलोपे 'अकृत्सार्व–' इति दीर्घे उन्मनायेत्यस्मात्, क्त्वो ल्यपि, अतो लोपे, उन्मनाय्येति रूपम्। अवगल्भशब्दाद् आचारेऽवगल्भेति क्विबन्तात् क्त्वो ल्यपि रूपम्। अत्र उदित्यस्य अवेत्यस्य च उपसर्गस्वरूपस्य अनपहृतत्वेन क्यङि क्विपि च विवक्षिते पृथक्कृततया तयोः क्त्वान्तेन समासे सति ल्यबुचितः। इह तु ओढायित्वेत्यत्र न तथेति व्यतिरेकदृष्टान्तोऽयम्। ज्ञापकस्य सजातीयत्वे प्रमाणं दर्शयति **ज्ञापकस्येति**। षाष्ठं वार्तिकं दर्शयति **उस्योमाङ्क्ष्विति**। उसि, ओम्, आङ् एषां द्वन्द्वः। षष्ठस्य प्रथमे पादे 'ओमाङोश्च' इति सूत्रे इदं वार्तिकं पठितम्, तद्व्याचष्टे **उस्योमाङोश्च परयोरिति**। 'एङि पररूपम्' इत्यतः पररूपग्रहणानुवृत्तिं मत्वाह **पररूपं नेति**। उसि तावदुदाहरति **औस्रीयदिति**। उस्रामात्मन ऐच्छदित्यर्थे 'सुप आत्मनः–' इति क्यजन्ताल्लङि उस्रीयशब्दादङ्गात्प्रागाटि कृते 'उस्यपदान्तात्' इति पररूपं प्राप्तमनेन निषिध्यते। अर्थवद्ग्रहणपरिभाषा त्वनित्या, अस्मादेव भाष्योदाहरणात्। अन्यथा भिन्द्युरित्यादौ पररूपं न स्यात्, आगमसहितस्य युस एवार्थवत्त्वादिति भावः।

तेनेति। **उस्रामिति**। 'माहेयी सौरभेयी गौरुस्रा माता च शृङ्गिणी' इत्यमरः। **औस्रीयदिति**। क्यजन्तादुस्राशब्दाल्लङि अङ्गस्याटि च कृते 'उस्यपदान्तात्' इति पररूपं प्राप्तम्। न चानर्थकोऽयमुस् न ग्रहीष्यत इति वाच्यम्, छिन्द्युर्भिन्द्युरित्यादावप्युसोऽनर्थकत्वादागमसहितस्यैवार्थवत्त्वात्। तथा चाश्वुरपुरेत्यादावेव स्यात्। एवं चायमेवाडागमस्य उसि परे प्रतिषेधोऽर्थवद्ग्रहणपरिभाषाया अत्राप्रवृत्तौ ज्ञापक इति स्थितम्। अतएव 'उस्यपदान्तात्' इत्यत्रापदान्तात् किं कोस्रेति भाष्ये प्रत्युदाहृतम्। **औङ्कारीयदिति**। 'ओमाङोश्च' इति पररूपं प्राप्तम्। आडागमस्याङि परे उदाहरणमाह **औढीयदिति**। यत्रादेशेनापहृतं तत्रापि यदि पृथक्कृतिस्तदा आङः परत्राटा भाव्यमित्याडागमस्याङि परे पररूपनिषेधो व्यर्थः स्यात्। तथा च ज्ञापकस्य विशेषविषयत्वे प्रमाणमयमेव निषेध इति भावः। चशब्दं प्रयुञ्जानः सूत्र-

इति चशब्देन पुनर्वृद्धिविधानादिदं सिद्धमिति षाष्ठे स्थितम् । २६६८ लोहितादिडाज्भ्यः क्यष् । (३-१-१३) लोहितादिभ्यो डाजन्ताच्च भवत्यर्थे क्यष् स्यात् । २६६९ वा क्यषः । (१-३-९०) क्यषन्तात्परस्मैपदं वा स्यात् । लोहितायति, लोहितायते । अत्र अच्वेः इत्यनुवृत्त्या अभूततद्भावविषयत्वं

ओमि परत उदाहरति **औङ्कारीयदिति** । ओङ्कारशब्दात् क्यजन्ताल्लङि अङ्गस्य आटि कृते 'ओमाङोश्च' इति पररूपं प्राप्तमनेन निषिध्यते । आङि उदाहरति **औढीयदिति** । आ ऊढ ओढः, तस्मात् क्यजन्ताल्लङि अङ्गस्य ओढशब्दस्य आटि कृते 'ओमाङोश्च' इति पररूपं प्राप्तमनेन निषिध्यते । उदाहरणत्रयमिदं भाष्ये स्थितम् । तत्र यदि उपसर्गस्वरूपस्य एकादेशेनापहारेऽपि पृथक्करणं स्यात् तर्हि क्यचि विवक्षिते आङः पृथक्कृतौ सत्यां धातुबहिर्भावादूढशब्दात् प्रागाङः परत्र आटि सति पररूपस्याप्रसक्तेराङि पररूपप्रतिषेधो व्यर्थः स्यात् । उक्तज्ञापकस्य सजातीयविषयत्वे तु अत्र आङ एकादेशेनापहारात् पृथक्करणाभावादोढशब्दात् प्रागाडागमे सति आङि पररूपप्राप्तेस्तन्निषेधोऽर्थवान् भवति । अतो ज्ञापकस्य सजातीयविषयत्वे 'उस्योमाङ्क्षु–' इत्याङ्ग्रहणम् औढीयदिति तदुदाहरणपरभाष्यं च अत्र प्रमाणमिति भावः । ज्ञापकस्य सजातीयविषयत्वे प्रमाणान्तरमाह **आटश्चेति चशब्देनेति** । 'आटश्च' इति चकारः पुनर्वृद्धिविधानार्थः । तथा च आटोऽचि वृद्धिरेव यथा स्याद् नान्यत्पररूपमिति लभ्यते इत्यपि षष्ठाध्याये 'ओमाङोश्च' इति सूत्रे 'आटश्च' इति सूत्रे च भाष्ये स्थितमित्यर्थः । एवं च एतद्वार्तिकप्रत्याख्यानपरः सौत्रश्चकारस्तद्भाष्यं चात्र ज्ञापकमित्युक्तं भवति । **लोहितादि । भवत्यर्थे इति ।** 'भृशादिभ्यो भुवि–' इत्यतो भुवि इति अनुवृत्तेरिति भावः । **वा क्यषः । परस्मैपदमिति ।** 'शेषात्कर्तरि–' इत्यतस्तदनुवृत्तेरिति भावः । **लोहितायतीति ।** अलोहितो लोहितो भवतीत्यर्थः । **अत्रेति ।** 'लोहितादि–' इति सूत्रे इत्यर्थः ।

कारोऽपि ज्ञापकस्य विशेषविषयत्वेऽनुकूल इत्याह **चशब्देनेति । षाष्ठे स्थितमिति ।** भाष्यकारोऽप्युक्तार्थे प्रमाणभूत इति भावः । स्यादेतत्—अवधीरयतीत्यादाववशब्दस्य पृथक्करणमस्ति वा न वा । आद्ये बोपदेवेनावशब्दात् प्रागाडागमं वकारद्वित्वं च कृत्वा चङि आववधीरदित्युदाहृतं तन्न संगच्छेत । द्वितीये तु 'इतीव धारामवधीर्य मण्डलीक्रियाश्रियामण्डि तुरङ्गमैर्मही' इति श्रीहर्षप्रयोगो न संगच्छेतेति चेत् । अत्राहुः—नायं धातुश्चुरादौ पठितः किं तु 'बहुलमेतन्निदर्शनम्' इति बाहुलकादूहितः । ऊहश्च धीरेत्यस्यापि संभवति अवधीरेत्यस्यापि । प्रयोगद्वयप्रामाण्यान्मुनित्रयविरोधाभावाच्च । यदा त्ववधीरेति विशिष्टस्यैव धातुत्वं तदाऽवधीरयित्वेति

लक्षणम्। तच्च लोहितशब्दस्यैव विशेषणम्। न तु डाचोऽसंभवात्। नाप्यादिशब्दग्राह्याणाम्, तस्य प्रत्याख्यानात्। तथा च वार्तिकम्—'लोहितडाज्भ्यः क्यष्वचनम्, भृशादिष्वितराणि' (वा १७२६, ३०) इति। न चैवं काम्यच इव क्यषोऽपि ककारः श्रूयेत, उच्चारणसामर्थ्यादिति वाच्यम्, तस्यापि भाष्ये प्रत्याख्यानात्। पटपटायति, पटपटायते। कृभ्वस्तियोगं विनापीह डाच्। डाजन्तात्क्यषो विधानसामर्थ्यात्। यत्तु—

लोहितश्यामदुःखानि हर्षगर्वसुखानि च।
मूर्च्छानिद्राकृपाधूमाः करुणा नित्यचर्मणी॥

इति पठित्वा श्यामादिभ्योऽपि क्यषि पदद्वयमुदाहरन्ति, तद्भाष्यवार्तिकविरुद्धम्। तस्मात्तेभ्यः क्यङेव। श्यामायते। सुखादयो वृत्तिविषये तद्वति

तच्चेति। अभूततद्भावविषयत्वमित्यर्थः। **असंभवादिति**। अव्यक्तानुकरणाद् डाचो विहितत्वेन तस्य अभूततद्भावविषयत्वे अनुकरणत्वं न भज्येतेति भावः। **नाप्यादिशब्दग्राह्याणामिति**। श्यामादिशब्दानामिति शेषः। **तस्येति**। आदिग्रहणस्येत्यर्थः। आदिग्रहणप्रत्याख्याने प्रमाणं दर्शयति **तथा चेति**। आदिग्रहणमपनीय लोहितशब्दाद् डाजन्तेभ्यश्च क्यष्प्रवचनं कर्तव्यम्। इतराणि लोहितादिगणपठितानि श्यामादीनि प्रातिपदिकानि भृशादिष्वेव पठनीयानीत्यर्थः। एवं च श्यामादिशब्देभ्यः क्यङि आत्मनेपदमेवेति फलितम्। **तस्यापीति**। आदिग्रहणस्येव क्यषः ककारस्यापि भाष्ये प्रत्याख्यातत्वादित्यर्थः। **पटपटायतीति**। 'अव्यक्तानुकरणाद् द्व्यजवरार्धादनितौ डाच्' इति पटच्छब्दाद् डाचि विवक्षिते सति 'डाचि विवक्षिते द्वे बहुलम्' इति द्वित्वे 'नित्यमाम्रेडिते डाचि' इति पूर्वखण्डान्तस्य तकारस्य उत्तरखण्डादेः पकारस्य च पररूपे एकादेशे पकारे, डित्वाट्टिलोपे पटपटाशब्दाद् डाजन्तात् क्यषि तदन्ताल्लडादीति भावः। 'अभूततद्भावे' इति तु नात्र संबध्यते इत्युक्तम्। न ह्यपटच्छब्दः पटच्छब्दो भवतीति युज्यते। ननु कृभ्वस्तियोगाभावादिह कथं डाजित्यत आह **कृभ्वस्तियोगं विनापीति**। भवत्यर्थसत्तामात्रेणेत्यर्थः। कुत इत्यत आह **डाजन्तादिति**। **तद्भाष्येति**। 'भृशादिष्वितराणि' इत्युक्तवार्तिकतद्भाष्यविरुद्धमित्यर्थः। **तस्मादिति**। उक्तवार्तिकभाष्यविरोधात् तेभ्यः श्यामादिभ्यो भृशादित्वलक्षणः क्यङेव न तु क्यषित्यर्थः। ततश्च 'वा क्यषः' इत्यस्याप्रवृत्तेः ङित्वादात्मनेपदमेवेति

साधु। धीरेत्यस्यैव धातुत्वे तु अवधीर्येत्यस्य साधुत्वमिति। **तस्येति**। आदिशब्दस्येत्यर्थः। **तस्यापीति**। क्यषः ककारस्येत्यर्थः। एतेन 'नः क्ये' 'क्यस्य विभाषा'

वर्तन्ते। लिङ्गविशिष्टपरिभाषया लोहिनीशब्दादपि क्यष्। लोहिनीयति, लोहिनीयते। २६७० **कष्टाय क्रमणे।** (३-१-१४)। चतुर्थ्यन्तात्कष्टशब्दादुत्साहेऽर्थे क्यङ् स्यात्। कष्टाय क्रमते कष्टायते। पापं कर्तुमुत्सहत इत्यर्थः। 'सत्रकक्षकष्टकृच्छ्रगहनेभ्यः कण्वचिकीर्षायामिति वक्तव्यम्' (वा १७६१)। कण्वं पापम्। सत्रादयो वृत्तिविषये पापार्थाः। तेभ्यो द्वितीयान्तेभ्यश्चिकीर्षायां क्यङ्। पापं चिकीर्षतीत्यस्वपदविग्रहः। सत्रायते, कक्षायते इत्यादि। २६७१ **कर्मणो रोमन्थतपोभ्यां वर्तिचरोः।** (३-१-१५) रोमन्थतपोभ्यां कर्म-

---

मत्वाह **श्यामायते इति**। श्यामो भवतीत्यर्थः। ननु देवदत्तः सुखायते इति कथम्? देवदत्तस्य सुखत्वाभावादित्यत आह **सुखादय इति**। श्यामादिषु ये सुखदुःखादिशब्दा गुणवचनाः ते सुखादिगुणवति वर्तन्ते इत्यर्थः। एवं च सुखायते इत्यस्य सुखवान् भवतीत्यर्थः। एवं दुःखायते इत्यादावपि। ननु लोहितशब्दाद्विहितः क्यष् कथं लोहिनीशब्दात् स्यादित्यत आह **लिङ्गविशिष्टेति। कष्टाय क्रमणे।** क्रमणशब्दं विवृणोति **उत्साहे इति**। अस्वरितत्वात् क्यषिति नानुवर्तते इति भावः। क्रियार्थोपपदस्येति चतुर्थीति मत्वाह **पापं कर्तुमिति**। क्रमते इत्यत्र 'वृत्तिसर्गतायनेषु क्रमः' इति तङ्। 'कण्वचिकीर्षायाम्' इत्यत्र कण्वपदं व्याचष्टे **कण्वं पापमिति**। सत्रादिशब्दान् विवृणोति **सत्रादय इति। द्वितीयान्तेभ्य इति।** चिकीर्षायां द्वितीयान्तस्यैवान्वययोग्यत्वादिति भावः। कण्वशब्दस्तु सत्रादिशब्दानां कण्वपरत्वे तात्पर्यग्राहकः। केचित्तु कण्वेत्यविभक्तिकम्। कण्ववर्तिभ्य इति व्याचक्षते। **अस्वपदविग्रह इति**। वृत्तावेव सत्रादिशब्दानां पापवाचित्वादिति भावः। इदं कष्टशब्दादन्यत्रैव। कष्टाय क्रमते इति तु स्वपदविग्रहोऽस्त्येव। भाष्ये एवं विग्रहं प्रदर्श्य सत्रादिषु विग्रहाप्रदर्शनादित्याहुः। **कर्मणो रोमन्थ**। वृतुधातोरर्यन्ताद् 'धात्वर्थनिर्देशे इक्वक्तव्यः' इति इकि वर्तिशब्दः। आवर्तनमर्थः। चरेः संपदादित्वा-

---

इति सूत्रद्वये क्यषोऽपि ग्रहणं वदन्तः परास्ताः। **लोहिनीयतीति**। क्यङि सति तङेव स्यात्। 'क्यङ्मानिनोश्च' इति पुंवद्भावश्चेति भावः। **कष्टाय क्रमणे**। क्यङेवानुवर्तते, स्वरितत्वान् न तु क्यष्। कष्टायेति निर्देशादेव चतुर्थ्यन्तं लभ्यते। क्रमणमुत्साहः। 'वृत्तिसर्गतायनेषु–' इति क्रमेरात्मनेपदविधायकसूत्रे सर्ग उत्साह इति सर्वैर्व्याख्यातत्वात्। कष्टं कृच्छ्रम्। 'कृच्छ्रगहनयोः कषः' इति इडभावः। न च दुःखं कर्तुमुत्साहः संभवतीति तत्साधनं पापमिह गृह्यत इत्याह **पापं कर्तुमिति**। **द्वितीयान्तेभ्य इति**। चिकीर्षायां द्वितीयान्तस्यैवान्वययोग्यत्वादेवमुक्तम्। **कर्मणो**। रोमन्थतपोभ्यामित्यनेन सामानाधिकरण्यात्कर्मण इति पञ्चमी। प्रत्येकं

भ्यां क्रमेण वर्तनायां चरणे चार्थे क्यङ् स्यात्। रोमन्थं वर्तयति रोमन्थायते। 'हनुचलने इति वक्तव्यम्' (वा १७६२)। चर्वितस्याकृष्य पुनश्चर्वणम् इत्यर्थः। नेह—कीटो रोमन्थं वर्तयति। अपानप्रदेशान्निस्सृतं द्रव्यमेह रोमन्थः, तद्वर्तयति श्नातीत्यर्थ इति कैयटः। वर्तुलं करोतीत्यर्थ इति न्यासकारहरदत्तौ। 'तपसः परस्मैपदं च' (वा १७६६)। तपश्चरति तपस्यति। २६७४ बाष्पोष्मभ्यामुद्वमने। (३-१-१६) आभ्यां कर्मभ्यां क्यङ् स्यात्। बाष्पमुद्वमति बाष्पायते। ऊष्मायते। 'फेनाच्चेति वाच्यम्' (वा १७६४)। फेनायते। २६७३ शब्दवैरकलहाभ्रकण्वमेघेभ्यः करणे। (३-१-१७) एभ्यः कर्मभ्यः करोत्यर्थे क्यङ् स्यात्। शब्दं करोति शब्दायते। पक्षे 'तत्करोति-'

द्भावे क्विप्, वर्ति चर अनयोर्द्वन्द्वात्सप्तमी। आवर्तने चरणे चेति लभ्यते। कर्मशब्देन कर्मकारकं विवक्षितम्। द्वित्वे एकवचनम्। तथा च कर्मकारकवृत्तिभ्यां रोमन्थतपश्शब्दाभ्यामिति लभ्यते। यथासंख्यमन्वयः, तदाह **रोमन्थतपोभ्यामिति। रोमन्थमिति।** उद्गीर्णस्य निगीर्णस्य वा मन्थो रोमन्थ इति भाष्यम्। उद्गीर्णस्य उदरादुपरि कण्ठद्वारा निर्गतस्य, निगीर्णस्य अपानद्वारा निर्गतस्य च मन्थः चर्वणं रोमन्थ इत्यर्थः। **वर्तयतीति।** आवर्तयतीत्यर्थः। **हनुचलन इति।** हनु तालु, तच्चलने सत्येव अयं विधिरित्यर्थः। तथा च उदरगतं भक्षितं द्रव्यं तृणादिकं पुनःपुनराकृष्य तालुचलनेन चूर्णितस्य पुनःपुनः प्राशने रोमन्थशब्दात् क्यङिति फलितम्, तदाह **चर्वितस्येति।** हनुचलनेन भक्षितस्य उदरं प्रविष्टस्य पुनःपुनराकृष्य हनुचलनेन भक्षणे गम्ये इति फलितमित्यर्थः। **कीट इति।** इह हनुचलनाभावान्न क्यङिति भावः। तदेवोपपादयति **अपानेति। तपसः परस्मैपदं च।** इति वार्तिकम्। तपश्शब्दः कर्मकारकवृत्तिः पूर्वसूत्रे चरणे क्यङं लभते। ङित्वप्रयुक्तमात्मनेपदं बाधित्वा परस्मैपदमेव लभते इत्यर्थः। **तपस्यतीति।** प्रातिपदिकादेशस्य क्यङुत्पत्तेरन्तर्वर्तिविभक्त्यभावाद् 'नः क्ये' इति नियमाच्च पदत्वाभावाच्च रुत्वमिति भावः। **बाष्पोष्मभ्यामुद्वमने। आभ्यां कर्मभ्यामिति।** 'कर्मणो रोमन्थ-' इत्यतः कर्मग्रहणमनुवर्तते इति भावः, कर्मकारकवृत्तिभ्यामित्यर्थः। **फेनायते इति।** फेनमुद्वमतीत्यर्थः। **शब्दवैर।** करणं क्रिया, तदाह **करोत्यर्थे**

संबन्धादेकवचनमित्याह **कर्मभ्यामिति। वर्तनायां चर** इति। सूत्रे वर्तनेति ण्यन्ताद् वृतेः 'ण्यासश्रन्थ-' इति युचं बाधित्वा अस्मादेव निपातनात् क्तिन्। चर्तेस्तु संपदादित्वाद् भावे क्विबिति भावः। केचित्तु वर्तिशब्दो वर्तयतेः 'इक्कृष्यादिभ्यः-' इति इकि रूपम्। लक्षणया चार्थलाभ इत्याहुः। **शब्दवैर।** कर्मण इत्यनुवर्तते

इति णिजपीष्यते इति न्यासः । शब्दयति । 'सुदिनदुर्दिननीहारेभ्यश्च' (वा १७२६-२७) । सुदिनायते । **२६७४ सुखादिभ्यः कर्तृवेदनायाम् ।** (३-१-१८) एभ्यः कर्मभ्यो वेदनायामर्थे क्यङ् स्याद्वेदनाकर्तुरेव चेत्सुखादीनि स्युः । सुखं वेदयते सुखायते । कर्तृग्रहणं किम्-परस्य सुखं वेदयते । **२६७५ नमोवरिवश्चित्रङः क्यच् ।** (३-१-१९) करणे इत्यनुवृत्तेः क्रियाविशेषे पूजायां परिचर्यायामाश्चर्ये च । नमस्यति देवान्, पूजयतीत्यर्थः । वरिवस्यति गुरून्, शुश्रूषत इत्यर्थः । चित्रीयते, विस्मयत इत्यर्थः । विस्मापयत इत्यन्ये । **२६७६ पुच्छभाण्डचीवराण्णिङ्** (३-१-२०) 'पुच्छादुद-

---

इति । तत् करोतीति णिचोऽपवादः । **पद इति** । कदाचिदित्यर्थः । **न्यास इति**। भाष्यानारूढत्वमत्र अरुचिबीजम् । **सुदिनदुर्दिन इति** । वार्तिकम् । करोत्यर्थे क्यङिति शेषः । **सुखादिभ्यः** । कर्तृ इति पृथक्पदं लुप्तषष्ठीकम् । 'कर्मणो रोमन्थ–' इत्यतः कर्मग्रहणानुवृत्तिं मत्वाह **एभ्यः कर्मभ्य इति** । **वेदनायामिति** । ज्ञाने इत्यर्थः । कर्तृत्वं च वेदनां प्रत्येव विवक्षितम्, उपस्थितत्वात् । वेदनाकर्तृवृत्तिभ्यः[1] सुखादिशब्देभ्य इति लभ्यते, फलितमाह **वेदनाकर्तुरेव चेदिति सुखं वेदयत इति** । जानातीत्यर्थः । 'विद चेतनायाम्' इति चुरादौ । **नमोवरिवस्** । नमस्, वरिवस्, चित्रङ् एषां समाहारद्वन्द्वात्पञ्चमी । आत्मनेपदार्थं चित्रशब्दो ङिन्निर्दिष्टः । 'शब्दवैर–' इत्यतः करणे इत्यनुवर्तते । करणं क्रिया, सा च पूजापरिचर्याश्चर्यात्मिका विवक्षिता, 'नमसः पूजायाम्' 'वरिवसः परिचर्यायाम्', 'चित्रङ आश्चर्ये' इति वार्तिकैः, तदाह **करणे इत्यनुवृत्तेरित्यादिना** । **नमस्यति देवानिति** । कारकविभक्तेर्बलीयस्त्वाद् द्वितीया । परिचर्या शुश्रूषेति मत्वाह **शुश्रूषते इत्यर्थ इति** । आश्चर्यशब्दो विस्मयवाचीति मत्वाह **विस्मयत इत्यर्थ इति** । **विस्मापयत इत्यन्ये इति** । आश्चर्यशब्दो विस्मापनपर इति भावः । ततश्चित्रीयमाणोऽसाविति भट्टिः । असौ मायामृगो विस्मयमु-

---

इत्याह **एभ्यः कर्मभ्य इति** । **सुखादिभ्यः** । कर्तृ इति पृथक्पदं लुप्तषष्ठीकम् । विद चेतनाख्याननिवासेष्विति चौरादिकाद्युचि वेदनाशब्दो ज्ञानवाची, तदपेक्षमेव कर्तृत्वम् । कर्ता च सुखादिभिरन्वेति । तदेतदाह **वेदनाकर्तुरेवेति** । **परस्य सुखमिति** । इह यन्निष्ठं सुखं तद्भिन्नो वेदनाकर्तेति वाक्यमेव । सुखादयः सुखदुःखतृप्रकृच्छ्रादयः । **नमोवरिवः** । चित्रङः क्यज्विधानमीत्वार्थं ङित्करणं तु तङर्थम् । **विस्मापयत इत्यन्य इति** । तथा च भट्टिः—'ततश्चित्रीयमाणोऽसौ' इति । असौ मायामृगश्चित्रीयमाणो विस्मयमुत्पादयन्नित्यर्थः । **पुच्छभाण्ड** । करणे

---

१ 'वेदनाकर्तृवृत्तिवाचिभ्यः' इति क्वचित् पाठः ।

सने व्यसने पर्यसने च' (वा १७४६)। विविधं विरुद्धं वोत्क्षेपणं व्यसनम्। उत्पुच्छयते। विपुच्छयते। परिपुच्छयते। 'भाण्डात्समाचयने' (वा १७४४)। संभाण्डयते, भाण्डानि समाचिनोति, राशीकरोतीत्यर्थः। समबभाण्डत। 'चीवरादर्जने परिधाने च' (वा १७४५)। संचीवरयते भिक्षुः, चीवराण्यर्जयति, परिधत्ते वेत्यर्थः। २६७७ मुण्डमिश्रश्लक्ष्णलवणव्रतवस्त्रहलकलकृततूस्तेभ्यो णिच्। (३-१-२१) कृञर्थे। मुण्डं करोति मुण्डयति। 'व्रताद्भोजनतन्निवृत्त्योः' (वा २०६०)। पयः शूद्रान्नं वा व्रतयति। 'वस्त्रात्समाच्छादने' (वा २०६१)। संवस्त्रयति। 'हस्त्यादिभ्यो ग्रहणे' (वा २०६२)। 'हलिकल्योरदन्तत्वं च निपात्यते' (वा १७४७)। हलिं कलिं वा गृह्णाति हलयति कलयति। महद्धलं हलिः। परत्वाद् वृद्धौ सत्यामपीष्ठवद्भावेनाऽगेव

त्पादयन्नित्यर्थः। **पुच्छभाण्ड। पुच्छादुदसने।** इति वार्तिकम्। **उत्पुच्छयते इति।** विविधं विरुद्धं वा पुच्छमुत्क्षिपतीत्यर्थः। **भाण्डात् समाचयने।** इत्यपि वार्तिकम्। **समबभाण्डतेति।** उपसर्गसमानाकारं पूर्वपदं धातुसंज्ञाप्रयोजके प्रत्यये चिकीर्षिते पृथक्क्रियते इत्युक्तत्वात् संभाण्डशब्दात् क्यङ्यपि भाण्डशब्दात् प्रागेवाडिति भावः। एवम् उदपुपुच्छत इत्यादावपि। **चीवरादर्जने।** इत्यपि वार्तिकम्। **मुण्डमिश्र। कृञर्थे इति।** शेषपूरणमिदम् 'शब्दवैर–' इत्यतः करणे इत्यनुवृत्तेरिति भावः। **व्रताद्भोजन।** इति वार्तिकम्। **पयः शूद्रान्नं वा व्रतयतीति।** पयो भुङ्क्ते, शूद्रान्नं वर्जयतीत्यर्थः। **वस्त्रात्समाच्छादने।** इत्यपि वार्तिकम्। भाष्ये तु न दृश्यते। **संवस्त्रयतीति।** वस्त्रेण सम्यगाच्छादयतीत्यर्थः। वस्त्रं परिधत्ते इति वा। **हस्त्यादिभ्यो ग्रहणे।** इति वार्तिकम्। भाष्ये तु न दृश्यते। **हलिकल्योरिति।** हलिकली इदन्तौ। हलकलशब्दावदन्तौ इदन्तौ च। याविदन्तौ तयोरत्त्वं निपात्यत इति भाष्ये स्पष्टम्। **हलयति कलयतीति।**

इत्यनुवृत्तेरत्रापि क्रियाविशेष एव णिङ्। तमेव विशेषं दर्शयति **पुच्छादित्यादिना।** ङकारोऽत्र 'णेरनिटि' इति णिङ्णिचोः सामान्यग्रहणार्थो नित्यात्मनेपदार्थश्च। उदपुपुच्छत। **मुण्डमिश्र। कृञर्थ इति।** कश्चित्क्रियासामान्ये, प्राचुर्येण तु क्रियाविशेषे। **व्रतादिति।** पयो व्रतयति, अश्नातीत्यर्थः। शूद्रान्नं व्रतयति, वर्जयतीत्यर्थः। **वस्त्रादिति।** समाच्छादने यो वस्त्रशब्दस्तस्मात्करोत्यर्थे णिजित्यर्थः। **संवस्त्रयतीति।** वस्त्राच्छादनं करोतीत्यर्थः। **अदन्तत्वमिति।** अयमेव निपातो वृद्धौ सत्यां टिलोप इत्यत्र ज्ञापकः। यदि पूर्वं लोपो भवेत्तदाऽल्लोपकार्यसिद्धौ किमनेन निपातनेन। तथा च, अपीपटदिति सिध्यतीत्यादि चुरादिष्वेवो-

लुप्यते। अतः सन्वद्भावदीर्घौ न। अजहलत्। अचकलत्। कृतं गृह्णाति कृतयति। तूस्तानि विहन्ति वितूस्तयति। तूस्तं केशा इत्येके। जटीभूताः केशा इत्यन्ये। पापमित्यपरे। मुण्डादयः 'सत्यापपाश–' (सू २५६३) इत्यत्रैव पठितुं युक्ताः। 'प्रातिपदिकाद्धात्वर्थे–' इत्येव सिद्धे केषांचिद् ग्रहणं सापेक्षेभ्योऽपि णिजर्थम्। मुण्डयति माणवकम्। मिश्रयत्यन्नम्। श्लक्ष्णयति वस्त्रम्। लवणयति

हलिकलिभ्यां णौ इकारस्य अकारे इष्ठवत्त्वेन टेर्लोपे हलि कलि इति ण्यन्ताभ्यां लङादीति भावः। **महद्धलं हलिरिति**। अत्र वृद्धप्रयोगः अन्वेषणीयः। नन्वनयोरिकारान्तयोरदन्तत्वनिपातनं व्यर्थम्। इकारस्य णाविष्ठवत्त्वाल्लोपे हलयति कलयतीति सिद्धेः। न च अजहलत् अचकलत् इत्यत्र सन्वत्त्वाप्रवृत्तये अग्लोपित्वाय तयोरदन्तत्वमिति वाच्यम्, इकारलोपेऽप्यग्लोपित्वसिद्धेरित्यत आह **परत्वादिति**। इकारस्य णौ इष्ठवत्त्वे टिलोपात् प्रागेव परत्वाद् 'अचो ञ्णिति' इति वृद्धौ कृतायां ऐकारस्य इष्ठवत्त्वात् टिलोपे अग्लोपित्वं न स्यात्। इकारयोरत्त्वे तु अकारस्य टिलोपात् प्राक् परत्वाद् वृद्धौ सत्यामप्याकार एव इष्ठवत्त्वाल्लुप्यत इत्यर्थः। **अत इति**। अग्लोपित्वात् सन्वत्त्वम्, 'दीर्घो लघोः' इति दीर्घश्च नेत्यर्थः। **कृतं गृह्णातीति** उपकारं स्वीकरोतीत्यर्थः। **पठितुं युक्ता इति**। लाघवादेकसूत्रत्वं युक्तमित्यर्थः। **केषांचिदिति**। मुण्डादीनामित्यर्थः। **सापेक्षेभ्योऽपीति**। अन्यथा णिजन्तस्यास्य सनाद्यन्तवृत्तित्वाद्विशेषणसापेक्षत्वे मुण्डादिभ्यो णिच् न भवेत्, सविशेषणानां वृत्तिनिषेधात्। इह मुण्डादीनां पुनर्ग्रहणे तु तत्सामर्थ्यात् सापेक्षेभ्योऽपि मुण्डादिभ्यो णिच् सिध्यतीत्यर्थः। स्पष्टं चेदं 'सुप आत्मनः–' इत्यत्र भाष्यकैयटयोः। **मुण्डयति माणवकमिति**। अत्र माणवकं मुण्डं करोतीत्यर्थे मुण्डशब्दस्य माणवकसापेक्षत्वेऽपि णिच् सिध्यति। अन्यथा यदा प्रकरणादिना माणवकादिविशेषो ज्ञायते तदैव मुण्डयतीति णिच् स्यादिति भावः। 'सुप आत्मनः–' इति सूत्रभाष्ये तु मुण्डयति माणवकमित्यत्र गमकत्वाण्णिच्, महान्तं पुत्रमिच्छतीत्यादौ तु अगमकत्वाद् न क्यजित्युक्तम्। प्रपञ्चार्थमेव मुण्डादिग्रहणमिति शब्देन्दुशेखरे स्थितम्। **श्लक्ष्णयति वस्त्रमिति**। निर्मलं करोतीत्यर्थः।

पपादितम्। **कृतयतीति**। उपकारं स्वीकरोतीत्यर्थः। **पठितुं युक्ता इति**। एकसूत्रकरणे लाघवमिति भावः। **सापेक्षेभ्योऽपीति**। विधानसामर्थ्यादिति भावः। अन्यत्र तु रमणीयं पटुमाचष्टे इत्येव न तु पटयतीति वृत्तिः। सापेक्षत्वमेव दर्शयति **माणवकमित्यादिना**। अयं भावः—द्वितीयान्ताद्विधीयमानो णिच् पदविधित्वात्सापेक्षेभ्यो न भवेत्, किं तु यदा प्रकरणादिना माणवकस्येति ज्ञायते

व्यञ्जनम् । हलिकल्योरदन्तत्वार्थम् । सत्यस्यापुगर्थम् । केषांचित्तु प्रपञ्चार्थम् । सत्यं करोत्याचष्टे वा सत्यापयति । 'अर्थवेदयोरप्यापुग्वक्तव्यः' (वा १७२८) । अर्थापयति, वेदापयति । पाशं विमुञ्चति विपाशयति । रूपं पश्यति रूपयति । वीणयोपगायत्युपवीणयति । तूलेनानुकुष्णात्यनुतूलयति । तृणाग्रं तूलेनानुघट्टयतीत्यर्थः । श्लोकैरुपस्तौति उपश्लोकयति । सेनयाभियाति अभिषेणयति । 'उपसर्गात्सुनोति–' (सू २२७०) इति षः । अभ्यषेणयत् । 'प्राक्सितात्–' (सू २२७६) इति षः । अभिषिषेणयिषति । 'स्थादिष्वभ्यासेन च–' (सू २२७७) इति षः । लोमान्यनुमार्ष्टि अनुलोमयति । 'त्वच संवरणे' घः, त्वचं गृह्णाति त्वचयति । वर्मणा संनह्यति संवर्मयति । वर्णं गृह्णाति वर्णयति । चूर्णैरवध्वंसते अवचूर्णयति । इष्ठवदित्यतिदेशात्पुंवद्भावादयः । एनीमाचष्टे एतयति । दरदमाचष्टे

लवणयति व्यञ्जनमिति । लवणयुक्तं करोतीत्यर्थः । **हलिकल्योरिति** । एवं च ताभ्यां सापेक्षाभ्यां न णिच्, तद्ग्रहणस्य अदन्तत्वनिपातनेन चरितार्थत्वादिति भावः । ननु सत्यशब्दात् तत्करोति इत्यादिनैव णिच्सिद्धेः 'सत्याप–' इति सूत्रे सत्यग्रहणं व्यर्थमित्यत आह **सत्यस्यापुगर्थमिति** । **केषांचिदिति** । पाशादीनामित्यर्थः । **सत्यापयतीति** । आपुग्विधिसामर्थ्यान्न टिलोपः । पाशं विमुञ्चतीत्यादौ 'प्रातिपदिकाद्धात्वर्थे–' इति णिच् । **अभिषिषेणयिषतीति** । अभि षेणि इति ण्यन्तात्सनि रूपम् । ननु त्वचं गृह्णाति त्वचयतीति कथम् ? त्वच्छब्दाच्चकारान्ताण्णिचि टिलोपे त्वयतीत्यापत्तेरित्यत आह **त्वचेति** । 'त्वच संवरणे' इत्यस्मात् 'पुंसि संज्ञायां घः प्रायेण' इति घप्रत्यय इत्यर्थः । **पुंवद्भावादय इति** । आदिना रभावटिलोपादिग्रहणम् । **एतयतीति** । 'भस्याढे–' इति पुंवत्त्वस्य इष्ठनि प्रवृत्तेः णावपि तस्यातिदेशाद् 'वर्णादनुदात्तात्–' इति ङीप्रत्ययस्य तत्संनियोगशिष्टनत्वस्य च निवृत्तौ एतशब्दे तकारादकारस्य टिलोप इति भावः । नन्वेनीशब्दाण्णौ टिलोपेन ङीप्रत्ययनिवृत्तौ तत्संनियोगशिष्टनत्वस्यापि निवृत्तौ एतयतीति सिध्यतीत्यस्वरसात् पुंवद्भावे उदाहरणान्तरमाह **दरदमिति** । दरदिति कश्चिद्राजा, तस्यापत्यं दारदः, 'द्व्यञ्मगध–' इत्यण् । स्त्र्यपत्ये तु दरदोऽपत्यं स्त्री दरत्, 'अतश्च'

तदैव मुण्डयतीति वृत्तिः स्याद् न तु माणवकादिप्रयोगे । णिजन्तस्य सनाद्यन्तधातुत्वात्सविशेषणानां वृत्त्यभावाच्चेति । **घ इति** । 'पुंसि संज्ञायाम्–' इत्यनेन । **पुंवद्भावादय इति** । आदिशब्देन रभावटिलोपादयः । टिलोपेनैवैतयतीत्यादिरूपसिद्धौ पुंवद्भावग्रहणं दारदयतीति सिध्यर्थमिति चुरादिष्वेवास्माभिरुक्तम् । दरदोऽपत्यं दारदः । 'द्व्यञ्मगध–' इत्यण् । तस्य स्त्रियाम् 'अतश्च' इति लुकि दरद्, तामा-

दारदयति । पृथुं प्रथयति । वृद्धौ सत्यां पूर्वं वा टिलोपः । अपिप्रथत्, अपप्रथत् । मृदुं म्रदयति । अमम्रदत् । भृशं कृशं दृढं-भ्रशयति क्रशयति द्रढयति । अबभ्रशत् अचक्रशत् अदद्रढत् । परिव्रढयति । पर्यवव्रढत् । ऊढिमाख्यत् औजिढत् । ढत्वादीनामसिद्धत्वाद् हृतिशब्दस्य द्वित्वम् । 'पूर्वत्रासिद्धीयमद्वित्वे' इति त्वनित्यमित्युक्तम् । ढिशब्दस्य द्वित्वमित्यन्ये, औडिढत् । ऊढमाख्यत्,

---

इत्यणो लुक् । तामाचष्टे इत्यर्थे दरच्छब्दादणौ इष्ठवत्त्वात् पुंवत्त्वेन स्त्रियामित्यनुवृत्तौ 'अतश्च' इति स्त्रियां विहितस्य अण्प्रत्ययलुको निवृत्तौ दारदशब्दे टेर्लोपे दारदयतीति रूपं सिध्यति । पुंवद्भावाभावे तु दरद्शब्दस्य टिलोपे सति दरयतीति स्यादिति भावः । टिलोपस्य अजादेशत्वेन स्थानिवत्त्वान्नोपधावृद्धिः ।

'पृथुं मृदुं भृशं चैव कृशं च दृढमेव च ।
परिपूर्वं वृढं चैव षडेतान् रविधौ स्मरेत् ॥' इति । श्लो० ग० कारः ।

क्रमेणोदाहरति **पृथुमिति** । आचष्टे इति शेषः । प्रथयति । तत्र प्रक्रियां दर्शयति **वृद्धौ सत्यामिति** । पृथु इ इति स्थिते परत्वाद् वृद्धौ कृतायां टिलोपः । अथवा कृतायामकृतायां च वृद्धौ प्रवृत्त्या नित्यत्वाद् वृद्धेः प्राक् टिलोपः । उभयथापि 'र ऋतः-' इति रभावे प्रथयतीति रूपमिति भावः । वस्तुतस्तु अकृतायां वृद्धौ उकारस्य लोपः । कृतायां तु औकारस्य लोपः । तथा च 'शब्दान्तरस्य प्राप्नुवन् विधिरनित्यः' इति टिलोपोऽनित्यः । ततश्च परत्वात् टिलोपात् प्राग्वृद्धिरेवेति 'गुणकर्मभिश्र-' इति सूत्रे भाष्ये स्थितम् । वृद्धौ सत्यां पूर्वं वा टिलोप इति मूलं तु कृताकृतप्रसङ्गित्वाट्टिलोपस्य नित्यत्वमभिप्रेत्येति बोध्यम् । **अपिप्रथदिति** । वृद्धौ सत्यां टिलोपे अग्लोपित्वाभावात् सन्वत्त्वे 'सन्यतः' इति इत्वमिति भावः । **अपप्रथदिति** । वृद्धेः पूर्वं टिलोपेन उकारस्य निवृत्तावग्लोपित्वात् सन्वत्त्वाभावे रूपम् । अबभ्रशदित्यादौ वृद्धेः पूर्वं पश्चाद्वा टिलोपेऽपि अग्लोपित्वान्न सन्वत्त्वमिति भावः । **औजिढदिति** । वहधातोः क्तिनि ढत्वधत्वष्टुत्वढलोपेषु ऊढिः । तस्माद् णौ टिलोपे ऊढि इति णयन्ताल्लुङि चङि आटि वृद्धौ औढि अ त् इति स्थिते प्रक्रियां दर्शयति **ढत्वादीनामिति** । ढत्वधत्वष्टुत्वढलोपानामसिद्धत्वाद् 'अजादेर्द्वितीयस्य' इति हृतिशब्दस्य द्वित्वमित्यर्थः । **इत्युक्तमिति** । चुम्बिकरण-

---

चष्टे दारदयति । इह पुंवद्भावाभावे टिलोपे सति दरयतीति स्यात् । **प्रथयतीति** । 'र ऋतो हलादेः-' इति रभावः । **अपिप्रथदिति** । वृद्धौ सत्यां टिलोपेऽनग्लोपित्वात्सन्वद्भावे सति 'सन्यतः' इतीत्वम् । वृद्धेः पूर्वं टिलोपे तु अपप्रथत् । **औजढदिति** । इह टिलोपे सति णिच्सहितस्य द्वित्वे पश्चादभ्यासेकारो दुर्लभ इत्यत

औजढत्, औडढत्। 'ओः पुयण्–' (सू २५७७) इति वर्णप्रत्याहारजग्रहो लिङ्गं 'द्वित्वे कार्ये णावच आदेशो न' इति ऊनयतावुक्तम्। 'प्रकृत्यैकाच्' (सू २०१०) वृद्धिपुकौ, स्वापयति। त्वां मां वा आचष्टे त्वापयति मापयति, मपर्यन्तस्य त्वमौ, पररूपात्पूर्वं नित्यत्वाट्टिलोपः वृद्धि पुक्। त्वादयति मादयति इति तु न्याय्यम्, अन्तरङ्गत्वात्पररूपे कृते 'प्रकृत्यैकाच्' (सू २०१०) इति

प्रक्रियायां ऊर्णुधाताविति शेषः। एवं च हृतिशब्दस्य द्वित्वे हलादिशेषे 'कुहो-श्चुः' इति हस्य चुत्वमिति भावः। **ढिशब्दस्येति**। 'पूर्वत्रासिद्धीयमद्वित्वे' इत्यस्य क्वचिदनित्यत्वेऽप्यत्र तदप्रवृत्तौ मानाभावादिति भावः **ऊढमाख्यदिति**। वहधातोः क्तप्रत्यये ढत्वधत्वष्टुत्वढलोपेषु ऊढशब्दाद् णयन्ताल्लुङि चङि ढत्वादीनामसिद्धत्वाद् हृतेत्यस्य द्वित्वे हलादिशेषे अभ्यासस्य हत्वे रूपम्। **ओडढ-दिति**। 'पूर्वत्रासिद्धीयमद्वित्वे' इति ढत्वादीनामसिद्धत्वाभावात्ते ढशब्दस्य द्वित्वे रूपम्। नन्विह परत्वात् टिलोपे सति णिचसहितस्य हृतीति ढीत्यस्य वा द्वित्वे कृते अभ्यासे इकार एव श्रूयेत नत्वकार इत्यत आह **ओः पुयणित्यादि**। त्वशब्दाण्णिचि टिलोपमाशङ्क्याह **प्रकृत्यैकाजिति**। प्रकृतिभावाट्टिलोपाभावे अकारस्य वृद्धौ आकारे पुगागमः, तदाह **वृद्धिपुकाविति**। त्वापयति, मापयति इत्यत्र प्रक्रियां दर्शयति **मपर्यन्तस्येति**। युष्मदस्मद्भ्यां णौ 'प्रत्ययोत्तरपदयोश्च' इति मपर्यन्तस्य त्वमौ। त्व अद् इ, म अद् इ, इति स्थिते आह **पररूपादिति**। कृते अकृते च पररूपे टिलोपस्य प्रवृत्तेर्नित्यत्वं बोध्यम्। त्व इ, म इ इति स्थिते आह **वृद्धिरिति**। अकारस्य आकारः। टिलोपस्य स्थानिवत्त्वं तु न शङ्क्यम्, अजादेशत्वाभावात् **पुगिति**। 'अर्ति–' इत्यनेनेति भावः। तदेवं प्राचीनमतमुपन्यस्य स्वमतमाह **त्वादयतीत्यादिना**। तदेवोपपादयति **अन्तरङ्गत्वादिति**। त्व अद् इ, म अद् इ, इति स्थिते नित्यमपि टिलोपं बाधित्वा अन्तरङ्गत्वात्पररूपे कृते 'प्रकृत्यैकाच्' इति प्रकृतिभावे टिलोपस्याप्रवृत्तौ उपधावृद्धिरिति भावः। ननु इष्ठेमेयस्सु किमुदाहरणमिति प्रश्ने प्रेयान् प्रेमा प्रेष्ठ इत्युदाहरणानि प्रदर्श्य नैतदस्ति प्रयोजनं 'प्रस्थस्फ–' इति विहितप्रादीनामाभीयत्वेनासिद्धतया तत्र टिलोपाप्रसक्तेरित्युक्त्वा श्रेयान् श्रेष्ठ इत्यत्र 'प्रशस्यस्य श्रः' इति आदेशस्य षाष्ठमिकतया आभीयत्वाभावेनासिद्धत्वाभावात् टिलोपे प्राप्ते प्रकृतिभावविधिरित्युदाहरणान्तरं प्रदर्श्य आदेशे अकारोच्चारणसामर्थ्याट्टि-

आह **ओः पुयण्जीत्यादि**। **त्वमाविति**। 'प्रत्ययोत्तरपदयोश्च' इत्यनेन। **अन्तरङ्गत्वादिति**। न च 'वार्णादाङ्गम्–' इति टिलोपस्यैव प्रवृत्तिरुचितेति

प्रकृतिभावात् । न च प्रकृतिभावो भाष्ये प्रत्याख्यात इति भ्रमितव्यम्, भाष्यस्य प्रेष्ठाद्युदाहरणविशेषेऽन्यथासिद्धिपरत्वात् । युवामावां वा युष्मयति अस्मयति । श्वानमाचष्टे शावयति । 'नस्तद्धिते' (सू ६७८) इति टिलोपः । प्रकृतिभावस्तु न, येन नाप्राप्तिन्यायेन 'टेः' (सू १७८६) इत्यस्यैव बाधको हि सः । भस्वात्

लोपो न भविष्यतीत्युक्त्वा स्रग्वितमः स्रजिष्ठ इत्यत्र 'विन्मतोर्लुक्' इति लुकि टिलोपनिवृत्त्यर्थं प्रकृतिभावविधानमित्युक्त्वा प्राप्त एव टिलोपे आरभ्यमाणस्य लुकस्तदपवादतया लुका टिलोपस्य बाधो भविष्यतीति 'प्रकृत्यैकाच्' इत्यस्य भाष्ये प्रत्याख्यातत्वात् स्वादयति, मादयति इत्यत्र प्रकृतिभावोपन्यासो न युज्यते इत्याशङ्क्य निराकरोति **न च प्रकृतिभावो भाष्ये प्रत्याख्यात इति भ्रमितव्यमिति** । कुत इत्यत आह **भाष्यस्येति** । उदाहृतभाष्यस्य हि प्रेयान् प्रेष्ठ इत्यादीनां प्रकृतिभावं विनाऽपि साधने तात्पर्यम्, न तु प्रकृतिभावप्रत्याख्यानमभिमतम्, स्वमाचष्टे स्वापयतीत्यादौ तदावश्यकत्वात् । अत एव 'प्रकृत्यैकाजिष्ठेमेयस्सु चेन्नैकाच उच्चारणसामर्थ्यादवचनात् प्रकृतिभावः' इति वार्तिकव्याख्यावसरे 'अन्तरेणापि वचनं प्रकृतिभावो भविष्यति' इति भाष्ये उक्तम् । अन्यथा अन्तरेणैव वचनमित्युच्येत इत्यास्तां तावत् । 'प्रत्ययोत्तरपदयोश्च' इत्यत्र एकवचने इत्यनुवृत्तम् । तच्च यौगिकमाश्रीयते । एकत्वविशिष्टवाचिनोर्युष्मदस्मदोरिति लभ्यते इति मत्वाह **युवामावां वेति** । न च द्वयोरुक्तौ युवावादेशौ शङ्क्यौ, विभक्तेर्लुका लुप्तत्वात् । न च लुकः प्रागेव युवावौ किं न स्यातामिति वाच्यम्, 'अन्तरङ्गानपि विधीन् बहिरङ्गो लुग्बाधते' इत्युक्तेरिति भावः । **शावयतीति** । श्वानमाचष्टे इत्यर्थः । श्वन्शब्दाण्णौ श्वन् इ इति स्थिते आह **नस्तद्धित इति** ।

वाच्यम्, व्याश्रयत्वात् । **भाष्यस्येति** । वृत्तिकारैर्हि 'प्रकृत्यैकाच्' इति सूत्रे प्रेयान् प्रेष्ठ इत्यादय उदाहृताः । ते च प्रस्थाद्यादेशविधायकस्य 'प्रियस्थिर–' इत्यादिशास्त्रस्य 'असिद्धवदत्राभात्' इत्यसिद्धवद्भावेन प्रस्थादावकारोच्चारणसामर्थ्याद्वा भाष्ये प्रकृतिभावं विनैव साधिताः । स्रग्विन् स्रजिष्ठ इत्यादावपि टिलोपो न भविष्यति, लोपापवादस्य विन्मतोर्लुकस्तत्र प्रवर्तनात् । एषैवानेकाच्सु पयस्वान् पयसिष्ठः चम्पकस्रजिष्ठ इत्यादिषु गतिः । न चैतावता 'प्रकृत्यैकाच्' इति सूत्रं प्रत्याख्यातमिति मन्तव्यम्, स्थापयतीत्यादौ तस्यावश्यकत्वादिति भावः । **युवामावामिति** । युष्मानस्मानिति विग्रहेऽपि युष्मयति अस्मयतीत्येव रूपम् । न च द्वयोरुक्तौ युवावौ भवत इति रूपे विशेषः शङ्क्यः, विभक्तिपरत्वाभावात् । न च प्रत्ययलक्षणम्, लुका लुप्तत्वात् । न च प्रागेवादेशोऽस्त्विति वाच्यम्, 'अन्तरङ्गानपि विधीन्बहिरङ्गो लुग्

संप्रसारणम्। अन्ये तु 'नस्तद्धिते' (सू ६७१) इति नेहातिदिश्यते, इष्ठनि तस्यादृष्टत्वात्। म्रदिष्ठ इत्यादौ परत्वात् 'टेः' (सू १७८६) इत्यस्यैव प्रवृत्तेः, तेन शुनयतीति रूपमाहुः। विद्वांसमाचष्टे विद्वयति, अकृतव्यूहपरिभाषया

'प्रकृत्यैकाच्' इति प्रकृतिभावमाशङ्कयाह प्रकृतिभावस्तु नेति। कुत इत्यत आह येनेति। 'टेः' इति टिलोपे प्राप्ते सत्येव प्रकृत्यैकाजित्यारभ्यते 'नस्तद्धिते' इत्यस्य स्रजिष्ठ इत्यादौ अप्राप्तावपि प्रकृतिभाव आरभ्यते इति भावः। भत्वादिति। इष्ठवत्त्वेन भत्वात् 'श्वयुव–' इति संप्रसारणमित्यर्थः। तथा च श्वन् इ इति स्थिते टिलोपे सति तस्याभीयत्वेनासिद्धत्वादन्नन्तत्वाद् वस्य संप्रसारणे पूर्वरूपे उकारस्य वृद्धौ आवादेशः। अन्ये त्विति। इष्ठनि दृष्टस्यैव इष्ठवदित्यतिदेशः। टेरित्येव टिलोप इष्ठनि दृष्टः, न तु 'नस्तद्धिते' इति। अतो नास्यातिदेश इत्यर्थः। नन्वतिशयेन ब्रह्मा ब्रह्मिष्ठ इत्यत्र 'नस्तद्धिते' इति टिलोपो दृष्ट इत्यत आह ब्रह्मिष्ठ इत्यादाविति। तेनेति। 'नस्तद्धिते' इत्यस्याप्रवर्तनेनेत्यर्थः। ततश्च प्रकृतिभावात् 'टेः' इति लोपस्याभावे संप्रसारणे शुनयतीति रूपमित्यर्थः। आहुरित्यस्वरसोद्भावनम्। तद्बीजं तु ब्रह्मवच्छब्दादिष्ठनि टेरिति टिलोपापवादे 'विन्मतोर्लुक्' इति मतुपो लुकि 'नस्तद्धिते' इति टिलोपो दृष्ट एव। ततश्च इष्ठनि तस्यादृष्टत्वादित्ययुक्तम्। किंच ब्रह्मिष्ठ इत्यादौ परत्वाट्टेरित्यस्य प्रवृत्तिरित्ययुक्तम्, केवलस्य ब्रह्मन्शब्दस्य वेदादिवचनस्य गुणवचनत्वाभावेन इष्ठनो दुर्लभत्वाद्, 'अजादी गुणवचनादेव' इत्युक्तेः। मत्वन्तादिष्ठनि तु मतोर्लुकि तेन 'टेः' इत्यस्य प्रवृत्तिबाधेन लुगुत्तरं तदप्रवृत्त्या परत्वादित्यप्ययुक्तिरिति शब्देन्दुशेखरे स्थितम्।

बाधते' इति न्यायात्, अकृतव्यूहपरिभाषाया जागरूकत्वाच्च। येन नाप्राप्तीति। यत्र यत्र 'प्रकृत्यैकाच्' इत्यस्य प्रवृत्तिस्तत्र टेरित्यस्य प्रवृत्तिर्न तु 'नस्तद्धिते' इत्यस्य। स्रजिष्ठ इत्यादौ तस्याप्रवृत्तेरिति भावः। 'अनन्तरस्य विधिर्वा भवति प्रतिषेधो वा' इति न्यायेनेत्यन्ये। संप्रसारणमिति। न च टिलोपे सत्यन्नन्तत्वाभावात् 'श्वयुवमघोनाम्–' इति कथमिह संप्रसारणप्रवृत्तिरिति शङ्क्यम्, स्थानिवत्त्वादसिद्धवदत्रेत्यसिद्धत्वाद्वा टिलोपेऽप्यन्नन्तत्वलाभात्। अतद्धित इति हि तत्र पर्युदासो न तु प्रतिषेधः। तेन तद्धिते न विधिर्न निषेधः, किं तु तद्धितभिन्ने परे विधिः। तद्धितभिन्नत्वं तु णिचोऽस्त्येवेति न संप्रसारणप्रतिबन्धः, नापि दविष्ठ इत्यादावेष्ठनि ओर्गुणो दृष्ट इतीहापि वृद्धिं बाधित्वा गुणः स्यादिति वाच्यम्, जातेऽपि गुणे पुनर्वृद्धौ रूपसिद्धेः। अथवा टिलोपसंप्रसारणयोर्गुणं प्रति 'असिद्धवदत्र–' इत्यसिद्धत्वादिष्ठवद्भावेन नास्ति गुणप्रसङ्गः। शुनयतीति। इष्ठवद्भावेन भत्वात्संप्रसारणम् 'प्रकृत्यैकाच्' इति

संप्रसारणं नेत्येके । संप्रसारणे वृद्धावावादेशे च विदावयतीत्यन्ये । नित्यत्वाट्टिलोपात्प्राक्संप्रसारणम् । अन्तरङ्गत्वात्पूर्वरूपम्, टिलोपः । विदयतीत्यपरे । उदञ्चमाचष्टे उदीचयति । उदैचिचत् । प्रत्यञ्चं प्रतीचयति । प्रत्यचिचत् ।

विद्वयतीति । विद्वस्शब्दाण्णौ टिलोपः । ननु इष्ठवत्त्वाद् भत्वे वसोः संप्रसारणमित्याशङ्क्याह अङ्गवृत्तेति । 'अङ्गवृत्ते पुनर्वृत्तावविधिः' इति परिभाषयेत्यर्थः । अङ्गकार्ये कृते पुनर्नाङ्गकार्यम् इति तदर्थः । वस्तुतस्तु विद्वयतीत्यत्र 'टेः' इत्यसो लोपे वस्वन्तत्वाभावात् संप्रसारणाप्रसक्तेरङ्गवृत्तपरिभाषोपन्यासो वृथेत्यस्वरसं सूचयति इत्येके इति । संप्रसारणे इति । विद्वच्छब्दाण्णौ इष्ठवत्त्वेन टिलोपे कृते वकारस्य संप्रसारणे पूर्वरूपे उकारस्य वृद्धौ आवादेशे विदावयतीत्यन्ये मन्यन्ते इत्यर्थः । अत्रापि पूर्ववदेवास्वरसः, टिलोपे सति वस्वन्तत्वाभावात् । नित्यत्वादिति । टिलोपे कृते अकृते च प्रवृत्तेः संप्रसारणं नित्यम् । टिलोपस्तु कृते संप्रसारणे पूर्वरूपे च कृते उसो भवति, अकृते तु अस इत्यनित्यः, 'शब्दान्तरस्य प्राप्नुवन्विधिरनित्यः' इति न्यायादिति भावः । ननु कृतेऽपि संप्रसारणे पररूपात्प्राग् अस एव टिलोप इति तस्य नित्यत्वमित्यत आह अन्तरङ्गत्वात्पूर्वरूपं टिलोप इति । संप्रसारणे पूर्वरूपे च कृते उसो लोपेऽपि वस्वन्तत्वस्य विनङ्क्ष्यत्त्वान्न संप्रसारणमित्यस्वरसं सूचयति इत्यपरे इति । एवं च विद्वयतीति प्रथमपक्ष एव स्थितः । तत्राङ्गवृत्तपरिभाषोपन्यास एव वृथेति स्थितम् । उदीचयतीति । उत्पूर्वकादञ्चेः ऋत्विगित्यादिना क्विनि 'अनिदिताम्–' इति नलोपे उदच्शब्दः । तस्माण्णौ इष्ठवत्त्वेन भत्वादच इत्यकारलोपं बाधित्वा 'उद ईत्' इति ईत्त्वे उदीचि इति ण्यन्ताल्लुङादय इति भावः । उदैचिचदिति । लुङि 'द्विर्वचनेऽचि' इति णिलोपनिषेधात् चिशब्दस्य द्वित्वम् 'उपसर्गसमानाकारं पूर्वपदं धातुसंज्ञाप्रयोजके प्रत्यये चिकीर्षिते पृथक् क्रियते' इत्युक्तेरुद उपर्याडिति भावः । एवं च उदः पृथक्करणेन 'प्रकृत्यैकाच्' इति प्रकृतिभावान्न टिलोपः । प्रतीचयतीति । अच इत्यल्लोपे 'चौ' इति पूर्वस्य दीर्घः । प्रत्यचिचदिति । इह अच इत्यल्लोपे चिशब्दात्प्रागटि तकारादिकारस्य यण् । अच इत्यकारलोपस्याभीयत्वेऽपि असमानाश्रयत्वान्नासिद्धत्वम्, लोपस्य

प्रकृतिभावः । नित्यत्वादिति । शब्दान्तरप्राप्त्या तु टिलोपस्यानित्यत्वमिति भावः । उदीचयतीति । उपसर्गं पृथक्कृत्याञ्चुशब्दादेव णिजिति 'प्रकृत्यैकाच्' इति प्रवृत्तेः टिलोपो न । 'उद ईत्' इतीत्वम् । 'अनिदिताम्–' इति क्विनिमित्तो नलोपः । उदैचिचदिति । लुङि 'द्विर्वचनेऽचि' इति णिलोपस्य निषेधाच्चिशब्दस्य द्वित्वम् । प्रतीचयतीति । 'अचः' इत्यल्लोपे 'चौ' इति पूर्वस्य दीर्घः । प्रत्यचिचदिति ।

'इकोऽसवर्णे–' (सू ९१) इति प्रकृतिभावपक्षे प्रतिअचिचत्। सम्यञ्चमाचष्टे समीचयति। सम्यचिचत्, समिअचिचत्। तिर्यञ्चमाचष्टे तिरापयति। अञ्चेष्टिलोपेनापहारेऽपि बहिरङ्गत्वेनासिद्धत्वात्तिरसस्तिरिः। 'असिद्धवदत्र–' (सू २१८३) इति चिणो लुङ्न्यायेन प्रथमटिलोपोऽसिद्धः। अतः पुनष्टिलोपो न, अङ्गवृत्तपरि-

णिनिमित्तत्वाद्, आटस्तु लुङ्निमित्तत्वात्। **इकोऽसवर्णे इत्यादि**। 'न समासे' इति तु न, पृथक्करणेन समासनिवृत्तेः। **समीचयतीति**। 'समः समिः' इति सम्यादेशः। अच इति लोपे 'चौ' इति दीर्घः। **सम्यचिचदिति**। सम्यादेशस्य स्थानिवत्त्वेनोपसर्गत्वात् पृथक्करणम्, पृथक्करणेन उत्तरपदपरत्वाभावेऽप्यन्तरङ्गत्वाज्जातः सम्यादेशो न निवर्तते। **तिरापयतीति**। तिरस् इत्यव्ययम्। तत्पूर्वाद् अञ्चेः क्विनि नलोपे तिरस् अच् इत्यस्माण्णौ टिलोपेन धातोर्निवृत्तौ 'तिरसस्तिर्यलोपे' इति तिरिभावे इकारस्य वृद्धावायादेशे तिरायि इत्यस्माद् णयन्ताल्लडादौति भावः। न च तिरसः पृथक्करणे सति धातोः 'प्रकृत्यैकाच्' इति प्रकृतिभावात कथं टिलोप इति वाच्यम्, तिरसित्यस्य कदाप्यनुपसर्गतया उपसर्गसमानाकारत्वाभावेन पृथक्करणाभावात्। नन्वेवं सति अञ्चतेष्टिलोपेनापहारे सति अञ्चतिपरकत्वविरहात्कथमिह तिरसस्तिरिभाव इत्यत आह **अञ्चेष्टिलोपेनेति**। **बहिरङ्गत्वेनेति**। बहिर्भूतणिनिमित्तकत्वादिति भावः। नन्वस्तु तिरसस्तिरिः, तत्र रेफादिकारस्य 'टेः' इति लोपः स्यादित्यत आह **असिद्धवदत्रेति**। प्रथमटिलोपोऽसिद्ध इत्यन्वयः। तिरस् अच् इ इति स्थिते प्रथमप्रवृत्तः अच् इत्येवंरूपटेर्लोपः तिरेः टिलोपे कर्तव्ये आभीयत्वादसिद्ध इत्यर्थः। ननु प्रथमटिलोपस्य कथं तिरेष्टिलोपे कर्तव्ये असिद्धत्वम्, टिलोपशास्त्रस्य एकत्वादित्यत आह **चिणो लुङ् न्यायेनेति**। पचधातोर्भावकर्मणोर्लुङ्स्तङि प्रथमपुरुषैकवचने तशब्दे परे 'चिण् भावकर्मणोः' इति च्लेश्चिणि उपधावृद्धौ अटि अपाचि त इत्यस्माद् 'तिङश्च' इति तरपि तदन्तात् 'किमेत्तिङव्ययघादाम्' इत्याम्प्रत्यये अपाचितरामिति स्थिते 'चिणो लुक्' इति प्रथमस्य तशब्दस्य लुकि कृते पुनस्तरप्प्रत्ययतशब्दस्य लुङ्

इह धात्वकारस्याच इति लोपे चिशब्दात्प्रागटि पूर्वस्य यण्। न चास्तामासन् इत्यादिवदल्लोपस्यासिद्धत्वादाट् स्यादिति वाच्यम्, व्याश्रयत्वात्। णिनिमित्तो हि लोपो लुङ्निमित्तश्चाट्। आसन्नित्यादौ तु न तथेति वैषम्यम्। **तिरापयतीति**। उपसर्गसमानाकारत्वाभावादिह तिरसः पृथक्करणं नास्ति, तेन 'प्रकृत्यैकाच्' इत्यप्रवृत्तेष्टिलोपस्तदाह **अञ्चेरिति**। **चिणो लुङ्न्यायेनेति**। यथाऽपाचितरामित्यत्र चिणः परस्य तशब्दस्य लुकि पुनस्तरप्रत्ययस्य लुङ् न भवति, प्रथमलुकोऽसिद्धत्वेन व्यवधानात् तथेत्यर्थः। **पुनष्टिलोपो नेति**। तिर्यादेशस्येकारस्य लोपो नेत्यर्थः।

भाषया वा । चङ्यग्लोपित्वादुपधाह्रस्वो न । अतितिरायत् । सध्र्यञ्चमाचष्टे सध्राययति । अससध्रायत् । विष्वग्यञ्चम् अविविष्वद्रायत् । देवद्र्यञ्चम् अदिदेवद्रायत् । अदद्र्यञ्चम् आददद्रायत् । अमुमुयञ्चम् अमुमुआययति । चङ्, आमुमु-

---

न भवति, स्थानिभेदेन लुको भेदमाश्रित्य प्रथमलुकः असिद्धत्वेन व्यवधानादिति स्थितिः । एवमिहापीत्यर्थः । **अत इति** । प्रथमटिलोपस्यासिद्धत्वादित्यर्थः । **अङ्गवृत्तपरिभाषया वेति** । पुनष्टिलोपो नेत्यनुषज्यते । न च तिरेरिकारस्याङ्गवृत्तपरिभाषया टेरिति लोपाभावे तिराययतीति वृद्धिरपि तस्य न स्यादिति वाच्यम्, अङ्गवृत्तपरिभाषाया अनित्यत्वेन वृद्धिविषये तदप्रवृत्तेः । **अग्लोपित्वादिति** । तिरस् अच् इ इति स्थिते, 'टेः' इत्यचो धातोर्लोपे सति तिरि इत्यस्य अग्लोपित्वम्, अचो धातोर्लोपे अकारस्यापि लोपसत्त्वादित्यभिमानः । **सध्राययतीति** । सहस्य सध्रिः । तिराययतीतिवद्रूपम् । सहेत्यस्य उपसर्गत्वाभावान्न पृथक्करणम्, तदाह **असस-ध्रायदिति । विष्वग्यञ्चमिति** । विष्वक् अच इ इति स्थिते 'विष्वग्देवयोश्च–' इति विष्वक्शब्दटेरद्र्यादेशे 'टेः' इत्यचो धातोर्लोपे विष्वद्रि इ इति स्थिते वृद्धौ आयादेशे विष्वद्रायि इति णयन्ताल्लटि विष्वद्राययतीति रूपम् । **देवद्र्यञ्चमिति** । देवशब्दस्य टेरद्र्यादेशे देवद्राययतीति सिद्धवत्कृत्य लुङ्याह **अदिदेवद्रायदिति** । अतितिरायदितिवद्रूपम् । **आददद्रायदिति** । सर्वनामत्वाददस्शब्दस्य टेरद्र्यादेशः । त्यदाद्यत्वे सत्येव उत्वमत्वे इति पक्षे इदम्, अदस्शब्दाद्विभक्तेः लुका लुप्तत्वेन विभक्तिपरकत्वाभावेन त्यदाद्यत्वाप्रवृत्तेः । त्यदाद्यत्वाविषयत्वेऽपि उत्वमत्वे स्त इति मतमाश्रित्याह **अमुमुयञ्चमिति** । अदस् अच् इ इति स्थिते टेरद्र्यादेशे अच् इत्यस्य टलोपे अदद्रि इ इति स्थिते 'अदसोऽद्रेः पृथङ्मुत्वम्' इति मते दकाराकारयोर्दकाररेफयोश्च मत्वोत्वयोः कृतयोः अमुमु इ इ इति स्थिते प्रथमस्य इकारस्य णिचि वृद्धौ आयादेशे

अग्लोपित्वादिति । अनग्लोपिनोऽप्यग्लोपित्वस्वीकारादिति भावः । **देवद्र्यञ्चमिति** । ननु 'आख्यानात्कृतस्तदाचष्टे–' इति कारकस्य पृथक्करणाद्देवानञ्चयतीति प्रसज्येत, बलिबन्धनमाचष्टे बलिं बन्धयतीतिवत् । इष्यते तु देवद्राययतीत्येव रूपम् । किं च कारकस्य पृथक्करणेऽदिदेवद्रायदित्याद्यपि न सिध्येत् । न च पुराणप्रसिद्धाख्यान एव कारकस्य पृथक्करणादिकमिति वाच्यम्, राजानमागमयतीत्यत्राव्याप्तेरिति चेत । अत्राहुः—यत्राख्याने कृच्छ्रूयते तत्रैवेदं प्रवर्तते, कृल्लुगिति संनियोगशिष्टविधानात् । किं च । आख्यानग्रहणसामर्थ्यान्महाजनप्रवादविषयीभूतार्थविषयकमेव तत् । भाष्यादौ तादृशानामेवोदाहृतत्वात् । यदि तु देवाञ्चनमाचष्टे इत्यादौ महाजनप्रसिद्धिरस्ति तदा देवानञ्चयतीति भवत्येवेति **अमुमुआयदिति** । 'पूर्व-

आयत् । अदमुयञ्चम् अदमुआययति । आददमुआयत् । भुवं भावयति । अबीभवत् । श्रुवम् अशुश्रवत् । श्रियम् अशिश्रयत् । गाम् अजूगवत् । रायम् अरीरयत् । नावम् अनूनवत् । स्वश्वं स्वाशश्वत् । स्वः अव्ययानां भमात्रे टिलोपः, स्वयति । असस्वत्, असिस्वत् । बहून् भावयति, बहयतीत्यन्ये ।

असुमु आयि इति णयन्ताल्लुङादिरिति भावः । मुत्वस्यासिद्धत्वाच्च यण् । **अदमुआययतीति** । 'केचिदन्त्यसदेशस्य' इति मते इदम् । **भुवमिति** । भुवमाचष्टे इत्यर्थे भूशब्दाद् णिच् वृद्ध्यावादेशौ भावि इत्यस्माल्लुङादीति भावः । **अबीभवदिति** । 'ओः पुयण्जि–' इति इत्वम् । **अशुश्रवदिति** । अवर्णपरत्वपवर्गादिपरत्वाभावाद् 'ओः पुयण्जि–' इति न । **स्वश्वमिति** । सु शोभनः अश्व इति विग्रहः । **स्वाशश्वदिति** । उपसर्गसमानाकारस्य पृथक्करणादश्वशब्दस्य अजादेर्द्वितीयस्य इति द्वित्वमाडागमश्च । **स्वरिति** । स्वर् इत्यस्माण्णिचि 'अव्ययानां भमात्रे–' इति टिलोपः, इष्ठवत्त्वेन भत्वात् । 'प्रकृत्यैकाच्' इति प्रकृतिभावस्तु येन नाप्राप्तिन्यायेन टेरित्यस्यैव

त्रासिद्धीयमद्विर्वचने' इत्यसिद्धत्वनिषेधान्मुशब्दस्य द्वित्वम् । **अबीभवदिति** । 'ओः पुयण्जि–' इत्यभ्यासोवर्णस्येत्वम् । 'दीर्घो लघोः' इति दीर्घः । ननु परत्वात्प्रथमं दीर्घे कृते पश्चादित्वं स्यात् । न चैवं 'दीर्घो लघोः' इत्यस्य वैयर्थ्यमिति वाच्यम्, अजूहवदित्यादौ तस्य सावकाशत्वादिति चेत् । अत्राहुः—'विप्रतिषेधे परम्–' इत्यत्र परशब्दस्येष्टवाचित्वाल्लक्ष्यानुरोधेन दीर्घात्प्रागित्वमेव भवति । लक्ष्यभेदात्पुनरिकारस्य दीर्घो वा भवतीति **अशुश्रवदिति** । 'इहाभ्यासात्परो यः पवर्गः स त्ववर्णपरो न, यस्त्ववर्णपरो यण् नासावभ्यासात्पर इत्यभ्यासोकारस्येत्वं न । गां गावयति । **स्वश्वमिति** । शोभनोऽश्वः स्वश्वः । शोभनोऽश्वो यस्येति बहुव्रीहिर्वा । **स्वाशश्वदिति** । उपसर्गसमानाकारस्य पृथक्करणाद् 'अजादेः–' इति द्वितीयस्य द्वित्वमाडागमश्च । **स्वयतीति** । 'प्रकृत्यैकाच्' इति प्रकृतिभावस्तु येन नाप्राप्तिन्यायाट्टेरित्यस्यैव बाधको न तु 'अव्ययानां भमात्रे टिलोपः' इत्यस्येति भावः । **असस्वदिति** । 'ओः पुयण्जि–' इति ज्ञापकेन द्वित्वे कार्येऽजादेशस्य स्थानिवत्त्वनिषेधाद्वा स्वरशब्दस्य द्वित्वमिति मतेनेदम् । अनग्लोपिन्यग्लोपित्वाभ्युपगमेऽप्यज्झलादेशेऽजादेशत्वव्यवहारो नास्तीति मते तु णिच्सहितस्यैव द्वित्वं तदाह **असिस्वदिति** । **भावयतीति** । 'बहोर्लोपो भू च बहोः' 'इष्ठस्य यिट् च' इति भूभावः । न चैवं यिडागमोऽपि णेरस्त्विति वाच्यम्, णाविष्ठवदित्युपमेये सप्तमीनिर्देशादिष्ठवदित्यत्र सप्तम्यन्ताद्वतिरित्यभ्युपगमात् । एवं चेष्ठनि परे पूर्वस्य यत्कार्यं तदेवातिदिश्यते, न त्विष्ठनोऽपि कार्यमिति स्थितम् । **बहयतीत्यन्य इति** । यिडभावे तत्सन्नियोगशिष्टस्य

स्रग्विणं स्रजयति, संज्ञापूर्वकत्वान्न वृद्धिः । श्रीमतीं श्रीमन्तं वा श्राययति । अशिश्रयत् । पयस्विनीं पयसयति, इह टिलोपो न, तदपवादस्य लुकः

बाधकः । **असस्वदिति** । द्वित्वे कार्ये णावजादेशस्य निषेधाद् टिलोपं बाधित्वा स्वर्शब्दस्य द्वित्वम्, अरित्यस्य लोपे अकारस्यापि लोपसत्त्वेन अजादेशत्वादिति भावः । **असिस्वदिति** । अर्लोपस्य अजादेशत्वं नेति मते द्वित्वे कार्ये णौ टिलोपस्य निषेधाभावात् टिलोपे कृते णिचा सह स्विशब्दस्य द्वित्वमिति भावः । **बहूनिति** । बहुशब्दाण्णिचि णाविष्ठवदित्यतिदेशाद् 'बहोर्लोपो भू च बहोः' इति बहोर्भूभावः । 'इष्ठस्य यिट् च' इति यिडागमस्तु न, णाविष्ठवदिति सप्तम्या इष्ठनि परे दृष्टस्यैव कार्यस्यातिदेशादिति भावः । **बहयतीति** । यिडभावे तत्संनियोगशिष्टस्य भूभावस्याप्यभावादिति भावः । **स्रजयतीति** । इष्ठवत्त्वाद् 'विन्मतोः–' इति लुक् । न चाजादी गुणवचनादेवेति इष्ठन्प्रत्ययः स्रग्विन्शब्दाद् दुर्लभ इति इष्ठवत्त्वमत्र कथमिति शङ्क्यम्, 'विन्मतोः–' इति लुग्विधानेन स्रग्विन्शब्दादिष्ठवत्त्वसिद्धेरिति भावः । उपधावृद्धिमाशङ्क्याह **संज्ञापूर्वकत्वान्न वृद्धिरिति** । णाविष्ठवदित्यनेनातिदेशेन विनो लुकः सत्त्वादन्नवृत्तपरिभाषया न वृद्धिरिति कैयटः । **श्रीमतीमिति** । श्रीमतीशब्दाण्णिचि णाविष्ठवदित्यतिदेशेन 'भस्याढे–' इति पुंवत्त्वे 'विन्मतोः–' इति मतोर्लुकि रेफादिकारस्य वृद्ध्यायादेशयोः श्रायि इत्यस्माद् लङादीति भावः । **अशिश्रयदिति** । णावच आदेशो नेति वृद्ध्यायादेशयोः प्रागेव श्रीशब्दस्य द्वित्वे

भूभावस्याप्यभाव इति भावः । नन्वेवमन्यमतत्वेन किमर्थमिदमुपन्यस्तमिति चेत् । अत्राहुः—प्राधान्यादिष्ठवदिति कार्यातिदेशो न त्वयं शास्त्रातिदेशः । तथा चेष्ठनि दृष्टं भूभावं स एवातिदेशो विधत्त इति नात्र सन्नियोगशिष्टपरिभाषायाः प्रवृत्तिः । इत्थं च भावयतीत्येव रूपं सम्यगिति **स्रजयतीति** । इष्ठवद्भावेन 'विन्मतोः–' इति लुक् । ननु 'अजादी गुणवचनादेव' इत्युक्तत्वाद् इष्ठन्प्रत्ययः स्रग्विन्शब्दाद् दुर्लभ इति इष्ठवद्भावोऽत्रायुक्त इति वाच्यम् । अस्मादेव लुग्वचनाज्ज्ञापकाद्विन्नन्तान्मतुबन्ताच्च अजादी भवत इत्यभ्युपगमात् । **श्रीमतीमिति** । मतुपो लुक् । **श्राययति** । **अशिश्रयदिति** । द्वित्वे णिनिमित्तगुणे सत्यादेशः । एतेन 'स संचरिष्णुर्भुवनान्तरेषु यदृच्छयाशिश्रयदाश्रयः श्रियाम्' इति माघश्लोके अशिश्रयदिति प्रचुरः पाठो व्याख्यातः, यां दिशं श्रीमतीमकरोदित्यर्थादिति मनोरमायां स्थितम् । अत्र केचित्— सापेक्षाणां वृत्त्यभावान्मनोरमोक्तं यत्तदयुक्तम् । न हि कश्चिद् यं घटं करोति तमानयेत्यर्थे यं घटयति तमानयेति प्रयुङ्क्ते । अत एव 'तत्करोति–' इत्यनेनैव सिद्धे मुण्डादिग्रहणं सापेक्षेभ्योऽपि णिजर्थमिति पूर्वोक्तं संगच्छते । यद्यन्यत्रापि सापेक्षेभ्यो णिच्

प्रवृत्तत्वात् । स्थूलं स्थवयति । दूरं दवयति । कथं तर्हि 'दूरयत्यवनते विवस्वति' इति, दूरमतति अयते वा दूरात्, दूरातं कुर्वतीत्यर्थः । युवानं यवयति कनयति ।

उत्तरखण्डे वृद्ध्यायादेशयोः कृतयोरुपधाह्रस्व इति माधवः । मतुपो लुकि अकारस्यापि लोपसत्त्वेन अग्लोपित्वान्नोपधाह्रस्व इत्यन्ये । **पयस्विनीमिति ।** णिचि इष्ठवत्त्वाद्विन्मतोरिति मतुपो लुगिति भावः । पयसयतीत्यत्र इष्ठवत्त्वात् टिलोपमाशङ्क्याह **इह टिलोपो नेति ।** कुत इत्यत आह **तदपवादस्येति ।** न च टिलोपं बाधित्वा मतुपो लुकि कृते पयसष्टेर्लोपः कुतो न स्यादिति वाच्यम्, सत्यपि संभवे बाधनमिति न्यायेन पयसष्टिलोपस्यापि मतुपो लुका बाधात् । **स्थवयतीति ।** स्थूलशब्दाद् णिचि इष्ठवत्त्वात् स्थूलदूरेति स्थूलशब्दस्य यणादेर्लोपे ऊकारस्य गुणे अवादेशे स्थवि इत्यस्माल्लडादीति भावः । गुणे ओकारस्य 'अचो ञ्णिति' इति वृद्धिस्तु न शङ्क्या, अङ्गकार्ये कृते पुनरङ्गकार्यस्याप्रवृत्तेः । **दवयतीति ।** पूर्ववद्यणादिलोपो गुणश्च । **कथं तर्हीति ।** 'स्थूलदूर-' इति यणादिलोपस्य टिलोपापवादत्वादिति भावः । **दूरमततीति ।** 'अत सातत्यगमने' इति धातोः 'अन्येभ्योऽपि दृश्यते' इति विचपि दूरादिति रूपम् । अथ गतावित्यस्मात् क्विपि 'लोपो व्योः-' इति यलोपे 'ह्रस्वस्य पिति-' इति तुकि

स्यात्तर्हि तत्र संगच्छेत । न चात्र सापेक्षत्वं नेति विवदितव्यम्, यां दिशं श्रीमतीमकरोदिति स्वयमेव व्याख्यातत्वात् । नापि सविशेषणानां वृत्त्यभावेऽपि विशेष्ययोगे स्यादेव वृत्तिरिति नात्रानुपपत्तिरिति श्रीमतीमित्यर्थं प्रति दिशो विशेष्यत्वादिति वाच्यम्, विशेष्ये हि बहिर्भूते विशेषणानां वृत्तिर्नाङ्गीक्रियते । न हि कश्चित् श्रीमतो राज्ञ इदमित्यर्थे राज्ञः श्रैमतमिति वृत्तिमभ्युपैति । किं च माघश्लोके अशिश्रियदित्येव पाठो बहुषु पुस्तकेषु दृश्यते, न त्वशिश्रयदित्यलं गुह्ये ग्रन्थसमर्थनाभिनिवेशेनेत्याहुः । **पयसयतीति ।** इह विन्मतोर्लुकि अग्लोपात्सन्वदित्वादिकं च न । अनग्लोपेऽपि सन्वद्भावाभावात् । 'णौ चङ्-' इति सूत्रे अतस्वरराजदिति भाष्यमिह प्रमाणम् । लुङि अपपयसत् । एवं स्रग्विणमाख्यत् असस्रजदित्यत्रापि सन्वदित्वं न । गोमन्तं गवयति । लुङि अजुगवत् । इहाग्लोपाद् 'दीर्घो लघोः' इति दीर्घो न । गां स्रजं पय इति विग्रहे तु अजूगवत् । असिस्रजत् । पययति । अपपयत् । टेर्लोपस्य बहिरङ्गत्वेन असिद्धत्वादिह वृद्धिर्न । अग्लोपित्वात् सन्वद्भावदीर्घौ न । **तदपवादस्येति ।** येन नाप्राप्तिन्यायेन टिलोपापवादो लुक् । **स्थवयतीति ।** 'स्थूलदूर-' इति यणादिलोपो गुणश्च । न च गुणस्य 'अचोऽञ्णिति' इति वृद्धिः स्यादिति वाच्यम्, अङ्गकार्ये कृते पुनरङ्गकार्यस्याप्रवृत्तेः । 'प्रातिपदिकाद्धात्वर्थे-' इति बहुलग्रहणाद्वा । लुङि अतुस्थवत् । **दवयति । यवयतीत्यादि ।**

'युवाल्पयो–' (सू २०१६) इति वा कन्। अन्तिकं नेदयति। बाढं साधयति। प्रशस्यं प्रशस्ययति, इह श्रज्यौ न, उपसर्गस्य पृथक्कृतेः। वृद्धं ज्यापयति। प्रियं प्रापयति। स्थिरं स्थापयति। स्फिरं स्फापयति। उरुं वरयति, वारयति। बहुलं बंहयति। गुरुं गरयति। वृद्धं वर्षयति। तृप्रं त्रपयति। दीर्घं द्राघयति।

दूरादित्येव रूपम्। तस्माण्णौ टिलोपे दूरि इति ण्यन्तात् शतृप्रत्यये शपि इकारस्य गुणे अयादेशे दूरयच्छब्दस्य दूरयतीति सप्तम्यन्तमिति भावः, तदाह **दूरात् कुर्वतीत्यर्थ इति**। कुर्वतीति सप्तम्यन्तम्। **यवयतीति**। युवन्शब्दाद् णौ स्थूलदूरेति वनो यणादेर्लोपः। पूर्वस्य उकारस्य गुणे अवादेशः। यवि इत्यस्माल्लडादि। **कनयतीति**। युवन्शब्दस्य कनादेशपक्षे रूपम्, तदाह **युवाल्पयोरिति**। **नेदयतीति**। अन्तिकशब्दस्य णौ नदादेशः। 'अन्तिकबाढयोर्नेदसाधौ' इत्युक्तेः। **साधयतीति**। बाढशब्दस्य णौ साधादेशः। **इहेति**। प्रशस्ययतीत्यत्र 'प्रशस्यस्य श्रः' 'ज्य च' इति श्रज्यौ नेत्यर्थः। कुत इत्यत आह **उपसर्गस्येति**। तत्पृथक्करणे सति विशिष्टस्य स्थानिनोऽभावान्नादेशाविति भावः। **वृद्धं ज्यापयतीति**। वृद्धस्य चेति वृद्धशब्दस्य ज्यादेशे वृद्धौ पुगिति भावः 'प्रियस्थिर–' इति सूत्रक्रमेणोदाहरति **प्रियं प्रापयतीति**। प्रियशब्दस्य प्रादेशे वृद्धिः पुक्। **स्थापयतीति**। स्थिरशब्दस्य स्थादेशे वृद्धिपुकौ। **वरयति, वारयतीति**। उरुशब्दस्य वर्। संज्ञापूर्वकविधेरनित्यत्वादुपधावृद्धिविकल्प इति माधवः। **बंहयतीति**। बहुलस्य बंहादेशः। **गरयतीति**। गुरोः गर्। **वृद्धं वर्षयतीति**। वृद्धस्य वर्षादेशो 'वृद्धस्य च' इति ज्यादेशेन विकल्प्यते। **त्रपयतीति**। तृप्रस्य त्रप् आदेशः। अदुपधः, संज्ञापूर्वकत्वान्न वृद्धिः। गरयतीत्यादिवत्। त्रापयतीति क्वचित्पाठः। **द्राघयतीति**। दीर्घस्य द्राघादेशः।

इहापि पूर्ववद्वृद्ध्यभावः। लुङि अदूदवत्। अयूयवत्। अचीकनत्। **नेदयतीति**। 'अन्तिकबाढयोर्नेदसाधौ' टिलोपः। लुङि अनिनेदत्। अससाधत्। प्रशस्यम् प्राशशस्यत्। **पृथक्कृतेरिति**। तेन विशिष्टस्य स्थानिनोऽभावाद् नादेशाविमौ भवत इत्यर्थः। **ज्यापयतीति**। 'वृद्धस्य च' इति ज्यादेशः। स च 'प्रियस्थिर–' इति वर्षादेशेन सह विकल्प्यत इत्याह **वर्षयतीति**। लुङि अजिज्यपत्। अववर्षत्। प्रियम् अपिप्रपत्। स्थिरम् अतिस्थपत्। सस्यादेशावयवत्वात्षत्वं न। स्फिरम् अपिस्फपत्। **उरुमिति**। वरादेशे कृते संज्ञापूर्वकविधेरनित्यत्वाद्बाहुलकाद्वा माधवेन विकल्पेन उपधावृद्धिरुदाहृतेति स्वयमपि तथैवाह **वरयति। वारयतीति**। अवीवरत्। **बंहयतीति**। अग्लोपित्वाद् अबबंहत्। **गरयतीति**। अजीगरत्। **त्रापयतीति**। अतित्रपत्। **द्राघयतीति**। अद-

वृन्दारकं वृन्दयति।

इति तिङन्ते नामधातुप्रकरणम्।

अथ तिङन्ते कण्ड्वादिप्रकरणम् ॥ ५८ ॥

२६७८ कण्ड्वादिभ्यो यक्। (३-१-२७) एभ्यो धातुभ्यो नित्यं यक्स्यात्स्वार्थे । धातुभ्यः किम्-प्रातिपदिकेभ्यो मा भूत् । द्विधा हि

वृन्दयतीति । वृन्दारकस्य वृन्दादेशः ।

इति श्रीवासुदेवदीक्षितविदुषा विरचितायां सिद्धान्तकौमुदीव्याख्यायां बालमनोरमाख्यायां नामधातुप्रक्रिया समाप्ता ।

अथ कण्ड्वादिप्रक्रिया निरूप्यन्ते । **कण्ड्वादिभ्यो यक्** । **धातुभ्य इति** । 'धातोरेकाचः–' इत्यतस्तदनुवृत्तेरिति भावः । **नित्यमिति** । वाग्रहणं तु निवृत्तमिति भावः । अन्यथा कण्डवतीत्याद्यपि स्यादिति भावः । **द्विधा हीति** ।

द्याघत् । **वृन्दयतीति** । अववृन्दत् । इति तत्त्वबोधिन्यां नामधातुप्रक्रियाप्रकरणम् ।

कण्ड्वादिभ्यो यक् । 'धातोरेकाच–' इत्यस्माद्धातोरिति वर्तते । वेति निवृत्तम् । अन्यथा कण्डूयतीति स्यात्तदाह **धातोर्नित्यमिति** । केचित्तु 'नित्यं कौटिल्ये गतौ' इत्यतो नित्यमित्यनुवर्तत इत्याहुः । तच्चिन्त्यम् । तत्र हि नित्यग्रहणमेवकारार्थे वर्तते, तत्कौण्डिन्यन्यायस्यानित्यतां ज्ञापयितुमिति प्राचव्याख्यातत्वात् । किं च 'नित्यं कौटिल्ये गतौ' इत्यत्रापि वेत्यनुवर्तते । अन्यथा गत्यर्थेभ्यो नित्यं यङ् स्यादिति । **स्वार्थे इति** । कण्ड्वादिभ्यो यक् स्यात् कृत्यर्थे इति प्राचोक्तमयुक्तमिति भावः । **द्विधा हीति** । यकः कित्त्वेन धातव इति ज्ञायते । कण्डूञ् इति दीर्घपाठेन प्रातिपदिकान्यपीति । यदि तु धातव एव स्युस्तर्हि ह्रस्वान्ते पठितेऽपि यकि परे 'अकृत्सार्व–' इति दीर्घेण कण्डूयतीत्यादिसिद्धेः किं तेन दीर्घपाठेन । द्वैविध्ये तु धातुभ्यो यकि गुणनिषेधेन कित्त्वं सार्थकम् । कण्डूरित्यादियग्रहितरूपसिद्ध्या दीर्घपाठोऽपि सार्थकः । अतएवोक्तं भाष्ये—'धातुप्रकरणाद्धातुः कस्य चासञ्जनादपि । आह चायमिमं दीर्घं मन्ये धातुर्विभाषितः' इति । एतेन कण्डूं करोति कण्डूयति इति प्राचोक्तविग्रहोऽपि परास्तः । कण्ड्वादयः प्रातिपदिकान्येवेत्यनभ्युपगमात् । न च द्वैविध्याभ्युपगमेऽपि प्रातिपदिकादेव यक् स्यादिति वाच्यम्, तथा हि सति धातोर्लङादौ कण्डवतीत्याद्यनिष्टप्रसङ्गात् । सुखदुःखादिप्रातिपदिकेभ्यो यकि अल्लोपासंभवेन सुख्यतीत्याद्यसिद्धिप्रसङ्गाच्च । यत्तु कैश्चित् 'शब्दवैरकलह–' इति सूत्रात्करणे इत्यनुवर्तनात् कृञर्थे यगिति प्राचोक्तव्याख्यायां न किंचिद्बाधकमित्युक्तम्, तच्चिन्त्यम् । अनु-

कण्ड्वादयो धातवः प्रातिपदिकानि च । कण्डूञ् गात्रविघर्षणे, कण्डूयति, कण्डूयते। मन्तु अपराधे । रोष इत्येके । मन्तूयति । चन्द्रस्तु जितमाह, मन्तूयते। वल्गु पूजामाधुर्ययोः, वल्गूयति। असु उपतापे, असु असूञ् इत्येके, अस्यति। असूयति, असूयते । लेट् लोट् धौर्त्ये पूर्वभावे स्वप्ने च, दीप्ताविस्येके, लेट्यति। लेटिता। लोट्यति। लोटिता। लेला दीप्तौ । इरस्, इरज्, इरञ् ईर्ष्यायाम्, इरस्यति। इरज्यति। 'हलि च' (सू ३२४) इति दीर्घः। ईर्यति, ईर्यते। उषस् प्रभातीभावे। वेद धौर्त्ये, स्वप्ने च । मेधा आशुग्रहणे, मेधायति। कुषुभ क्षेपे, कुषुभ्यति । मगध परिवेष्टने, नीचदास्ये इत्यन्ये। तन्तस् पम्पस् दुःखे। सुख दुःख तत्क्रियायाम्, सुख्यति । दुःख्यति। सुखं दुःखं चानुभवतीत्यर्थः। सपर पूजायाम्। अरर आराकर्मणि । भिषज् चिकित्सायाम्। भिष्णज् उपसेवायाम्। इषुध शरधारणे। चरण वरण गतौ। चुरण चौर्ये। तुरण त्वरायाम्। भुरण धारणपोषणयोः। गद्गद वाक्स्खलने। एला केला खेला विलासे। इलेत्यन्ये । लेखा स्खलने च । अदन्तोऽयमित्यन्ये। लेख्यति। लिट अल्पकुत्सनयोः, लिट्यति । लाट जीवने । हृणीङ् रोषणे लज्जायां च । महीङ् पूजायाम्, महीयते, पूजां लभत इत्यर्थः । रेखा श्लाघासादनयोः। द्रवस् परितापपरिचरणयोः। तिरस् अन्तर्धौ। अगद नीरोगत्वे। *उरस् बलार्थः, उरस्यति, बलवान्भवतीत्यर्थः । तरण गतौ । पयस् प्रसृतौ।* सम्भूयस् प्रभूतभावे। अम्बर संवर संभरणे। आकृतिगणोऽयम्।

इति तिङन्ते कण्ड्वादिप्रकरणम्।

एतच्च भाष्ये स्पष्टम्। तेन कण्डूरित्याद्यविगृहीतरूपसिद्धिः। **लेटितेति**। 'यस्य हलः' इति यलोपः। **मेधा आशुग्रहण इति**। आशुग्रहणं त्वरया बोधः। सुग्रहणे इति पाठान्तरम्। **सुख्यतीति**। यकि अतो लोपः। प्रातिपदिकेभ्यो यकि तु आर्धधातुकत्वाभावादल्लोपो न स्यादिति बोध्यम्। चौरादिकयोस्तु सुखयति दुःखयतीत्युक्तम्।

वृत्तौ मानाभावात्। अन्यथा णिजन्तेष्विव प्रकृतिप्रत्ययाभ्यां व्यापारद्वयापत्तेरिति दिक्। **पूर्वभावे इति**। पूर्वत्वमित्यर्थः। **लेटितेति**। 'यस्य हलः' इति यलोपः। **सुख्यतीति**। चुरादौ तु सुख दुःख तत्क्रियायां सुखयतीत्याद्युदाहृतम्। **सपर**। यगन्ताद् 'अप्रत्ययात्' 'गुरोश्च हलः' इत्यनेन वा अप्रत्यये टाप्, सपर्या। **अरर**। आरा प्रतोदः, तत्करणकं कर्म आराकर्म। **अदन्तोऽयमिति**। लेख्यति। आदन्तपक्षे तु लेखायति। **महीङ्**। 'प्रेत्य स्वर्गे महीयते' इति रामायणम्। **प्रसृताविति**। प्रसृतिः परिमाणविशेषः। **प्रभूतभावे इति**। बाहुल्य

अथ तिङन्ते प्रत्ययमालाप्रकरणम् ॥ ५६ ॥

कण्डूयतेः सन् । 'सन्यङोः' (सू २३९५) इति प्रथमस्यैकाचो द्वित्वे प्राप्ते 'कण्ड्वादेस्तृतीयस्येति वाच्यम्' (वा ३४०४) । कण्डूयियिषति । क्यजन्तात्सन् । 'यथेष्टं नामधातुषु' (वा ३४०६) । आद्यानां त्रयाणामन्यतमस्य द्वित्वमित्यर्थः । अजादेस्त्वाद्येतरस्य । पुपुत्रीयिषति, पुतित्रीयिषति, पुत्रीयियिषति अशिश्वीयिषति, अश्वीयियिषति । नदराणां संयुक्तानामचः परस्यैव द्वित्वनिषेधः ।

अरर आराकर्मणीति । आरा प्रतोदः, तत्करणकं कर्म आराकर्म । भिषज् चिकित्सायाम् । जान्तोऽयम् । भिषज्यति । लेखा स्खलने चेति । लेखायति । लेख्यतीति । अदन्तात्वकि अतो लोपः । आकृतिगणोऽयमिति । कण्ड्वादिरित्यर्थः । तेन दुवस् संदीपने इत्यादिसंग्रहः । 'समिधाग्नि दुवस्यते' ।

इति श्रीवासुदेवदीक्षितविदुषा विरचितायां सिद्धान्तकौमुदीव्याख्यायां बालमनोरमाख्यायां कण्ड्वादयः समाप्ताः ।

अथ प्रत्ययमालां वक्ष्यन्नाह कण्डूयतेः सन्निति । 'धातोः कर्मणः–' इत्यनेनेति भावः । प्रथमस्यैकाच इति । 'अजादेर्द्वितीयस्य' इति द्वितीयैकाचो द्वित्वे प्राप्ते इत्यपि ज्ञेयम् । कण्ड्वादेस्तृतीयस्येति । एकाचो द्वित्वमिति शेषः । कण्ड्वादेरित्यनन्तरं यगन्तस्येति शेषः, केवलकण्ड्वादिषु तृतीयैकाचोऽभावात् । कण्डूयियिषतीति । कण्डूयेति यगन्तात् सनि इटि अतो लोपः । इस् इति तृतीयस्यैकाचो द्वित्वम् । असु उपतापे, कण्ड्वादिः । असूयियिषति । अजादेस्तृतीयस्य एकाचो द्वित्वम् । क्यजन्तात्सन्निति । उदाह्रियत इति शेषः । यथेष्टं नामधातुषु । इत्यपि वार्तिकम् । नाम प्रातिपदिकं तद्धटितधातुष्वित्यर्थः । अजादेस्त्वाद्येतरस्येति । अजादेरित्यनुवृत्त्या आदिभूतादचः परेषामेकाचां यथेष्टमित्यर्थलाभादिति भावः । नदराणामिति । तेषां मध्ये आदिभूतादचः परस्यै-

---

इत्यर्थः । 'प्रभूतं प्रचुरं प्राज्यमदभ्रं बहुलं बहु' इत्यमरः । संभूयस्यति । असंभूयसीत् । नेह संशब्दस्य पृथक्कृतियः, यत्र प्रातिपदिकाद्धातुसंज्ञाप्रयोजकप्रत्ययस्य विधानं तत्रैव पृथक्कृतिरित्याहुः । आकृतिगण इति । तेन दुवस् सन्दीपन इत्यादि सिद्धम् । प्रयुज्यते च 'समिधाग्नि दुवस्यते' इत्यादि ।

इति तत्त्वबोधिन्यां कण्ड्वादिप्रक्रिया प्रकरणम् ।

प्रथमस्येति । अजादेस्तु द्वितीयस्य द्वित्वे प्राप्ते इत्यपि ज्ञेयम् । प्राचा तु 'यथेष्टं नामधातुषु' इति प्राप्ते 'कण्ड्वादेस्तृतीयस्य' इत्युक्तमित्यवतारितम्, तदयुक्तम्, नामधातुत्वस्य निराकृतत्वात् । अत एव मूले नामधातून् समाप्य कण्ड्वादयः पृथगे-

इन्द्रीयतेः सन्, द्रीशब्दयिशब्दयोरन्यतरस्य द्वित्वम्, इन्दिद्रीयिषति, इन्द्रीयियिषति । चिचन्द्रीयिषति, चन्दिद्रीयिषति, चन्द्रीयियिषति । प्रियमाख्यातुमाचक्षाणं प्रेरयितुं वेच्छति पिप्रापयिषति, प्रापिपयिषति , प्रापयियिषति । उरुं विवारयिषति, वारिरयिषति, वारयियिषति । बाढं सिसाधयिषतीत्यादिरूपत्रयम् । षत्वं तु नास्ति । 'यङ्सन्ण्यन्तात्सन्' । बोभूयिषयिषति । यङ्णिच्सन्नन्ता-

---

वेत्यर्थः । **इन्द्रीयतेः सन्निति** । इन्द्रशब्दात् क्यजन्तात्सनित्यर्थः । **द्रीशब्दयिशब्दयोरिति** । नकारस्य आदिभूतादचः परत्वाच्च द्वित्वम् । दकारस्य तु आदिभूतादचः परत्वाभावान्न द्वित्वनिषेध इति भावः । **चिचन्द्रीयिषतीति** । चन्द्रीयतेः सनि प्रथमस्यैकाचो द्वित्वम् । **चन्दिद्रीयिषतीति** । द्वितीयस्यैकाचो द्वित्वम् । 'न न्द्राः–' इति नकारस्य न द्वित्वमिति माधवः । आदिभूतादचः परेषां नदराणां न द्वित्वमित्येव भाष्यसंमतम् । अत्र नकारस्यापि द्वित्वमित्येव युक्तम् । **चन्द्रीयियिषतीति** । तृतीयस्यैकाचो द्वित्वम् । **प्रियमिति** । प्रियमाख्यातुमिच्छतीत्यर्थे 'तत्करोति तदाचष्टे' इति ण्यन्तात्सनि इटि णाविष्ठवत्त्वात्प्रियशब्दस्य 'प्रियस्थिर–' इति प्रादेशे वृद्धौ पुकि णिचो गुणायादेशयोः षत्वे प्रापयिषेत्येव सन्नन्तम् । प्रियमाचक्षाणं प्रेरयितुमिच्छतीत्यर्थे तु प्रापि इति ण्यन्तादुक्ताद्धेतुमण्णौ तदन्तात् सनि इटि द्वितीयं णिचमाश्रित्य प्रथमणिचो लोपे द्वितीयणिचो गुणायादेशयोः प्रापयिषेत्येव सन्नन्तम् । तत्र यथेष्टं नामधातुष्वित्याद्यानां त्रयाणामेकाचामेकैकस्य द्वित्वे पिप्रापयिषतीत्यादिरूपत्रयमित्यर्थः । **उरुमिति** । उरुमाख्यातुमाचक्षाणं प्रेरयितुं वेच्छतीत्यर्थे उरुशब्दादाचष्टे इत्यर्थे णिचि 'प्रियस्थिर–' इति वरादेशे उपधावृद्धौ वारि इति ण्यन्तात्सनि इटि णिचो गुणायादेशयोः षत्वे वारयिषेति सन्नन्तम् । माधवमते वृद्ध्यङ्गीकाराद् वारि इत्यस्माद् हेतुमण्ण्यन्तात् सनि इटि प्रथमणेर्लोपे षत्वे वारयिषेत्येव रूपम् । तत्र यथेष्टं नामधातुष्वित्येकैकस्य एकाचो द्वित्वे विवारयिषतीत्यादिरूपत्रयमित्यर्थः । **बाढं सिसाधयिषतीति** । बाढमाख्यातुमाचक्षाणं प्रेरयितुं वेच्छतीत्यर्थे णिजादि पूर्ववत् । अन्तिकबाढयोरिति साधादेशः । तत्र सकारस्यादेशत्वाभावान्न षत्वम्, तदाह **षत्वं तु नास्तीति** । बोभूयिष-

---

वोक्ताः । **द्रीशब्दयिशब्दयोरिति** । नकारस्य त्वचः परत्वाद् द्वित्वं नेति भावः । **पिप्रापयिषतीति** । णाविष्ठवद्भावेन प्रियशब्दस्य 'प्रियस्थिर–' इत्यादिना प्रादेशस्ततो द्वित्वादि । **सिसाधयिषतीति** । इष्ठवद्भावादिह 'अन्तिकबाढयोः–' इति साधादेशः । **षत्वं तु नास्तीति** । आदेशावयवत्वादिति भावः । **बोभूयिषयिषतीति** । इह यङ्निमित्तद्वित्वे कृतेऽपि सन्निमित्तद्वित्ववारणाय

यिषाच् । बोभूययिषयतीत्यादि ।

इति तिङन्ते प्रत्ययमालाप्रकरणम् ।

अथ तिङन्ते आत्मनेपदप्रकरणम् ॥ ६० ॥

'अनुदात्तङित आत्मनेपदम्' (सू २१५७) । आस्ते । शेते । २६७९ **भावकर्मणोः** । (१-३-१३) बभूवे । अनुबभूवे । २६८० **कर्तरि कर्मव्यतिहारे** । (१-३-१४) क्रियाविनिमये द्योत्ये कर्तर्यात्मनेपदं स्यात् ।

यिषतीत्यत्र प्रक्रियां दर्शयति **यङिति** । भूधातोरिति शेषः । द्वित्वे बोभूयेति स्थितम् । **सन्निति** । इटि अतो लोपे षत्वे बोभूयिषेति स्थितम् । **ण्यन्तात् सन्निति** । बोभूयिषेत्यस्माद् हेतुमण्णिचि अतो लोपे बोभूयिषि इति स्थितम् । तस्मात् सनि इटि णिचो गुणायादेशयोः षत्वे बोभूयिषयिषेति स्थितम् । ततो लटस्तिपि शपि पररूपे बोभूयिषयिषतीति रूपम् । अनभ्यासस्येत्युक्तेर्न पुनर्द्वित्वम् । अथ बोभूययिषयतीत्यत्र प्रक्रियां दर्शयति **यङिति** । भूधातोरिति शेषः । द्वित्वे बोभूयेति स्थितम् । **णिजिति** । बोभूयेत्यस्माद्धेतुमण्णौ अतो लोपे बोभूयि इति स्थितम् । **सन्नन्ताण्णिजिति** । बोभूयि इत्यस्मात्सनि इटि णिचो गुणायादेशयोः षत्वे बोभूययिषेति स्थितम् । तस्माद्धेतुमण्णिचि अतो लोपे बोभूययिषि इत्यस्माल्लटस्तिपि शपि गुणायादेशयोः बोभूययिषयतीति रूपं सिद्धम् ।

इति श्रीवासुदेवदीक्षितविदुषा विरचितायां सिद्धान्तकौमुदीव्याख्यायां बालमनोरमाख्यायां प्रत्ययमाला समाप्ता ।

अथ आत्मनेपदप्रक्रिया निरूप्यते । आत्मनेपदपरस्मैपदव्यवस्थापकानि सूत्राणि प्रथमस्य तृतीयपादे पठितानि । तानि क्रमेण व्याख्यास्यन् व्याख्यातमपि सूत्रं पुनः स्मारयति **अनुदात्तङित इति** । आत्मनेपदमित्येतत् 'शेषात्कर्तरि परस्मैपदम्' इत्यतः प्रागनुवर्तते । **भावकर्मणोः** । भावो भावना क्रियेति पर्यायाः । कर्मशब्दः कर्मकारके वर्तते । भावे कर्मणि च यो लकारस्तस्यात्मनेपदमित्यर्थः । भावे उदाहरति **बभूवे इति** । वृत्ता भवनक्रियेत्यर्थः । कर्मण्युदाहरति **अनुबभूवे इति** । आनन्द इति शेषः । आनन्दकर्मिका वृत्ता अनुभवक्रियेत्यर्थः । **कर्तरि कर्म** । कर्मव्यतिहारशब्दं विवृण्वन्नाह **क्रियाविनिमये द्योत्ये इति** । एवं च कर्मशब्दः

'लिटि धातोः–' इति सूत्रे अनभ्यासस्येत्येतदवश्यं कर्तव्यम् । एवं च 'लक्ष्ये लक्षणं सकृदेव प्रवर्तते' इति अनभ्यासग्रहणं तत्र मास्त्विति भाष्यस्थं प्रत्याख्यानं प्रौढिवादमात्रमिति भावः । इति तत्त्वबोधिन्यां प्रत्ययमालाप्रकरणम् ।

भावकर्मणोः । भावे कर्मणि च यो लकारस्तस्यात्मनेपदमित्यर्थः ।

व्यतिलुनीते, अन्यस्य योग्यं लवनमन्यः करोतीत्यर्थः। 'श्नसोरल्लोपः' (सू २४६६)। व्यतिस्ते व्यतिषाते व्यतिषते। 'तासस्त्योः–' (सू २१९१) इति सलोपः। व्यतिसे। 'धि च' (सू २२४६) व्यतिध्वे। 'ह एति' (सू २२५०) व्यतिहे। व्यत्यसै। व्यत्यास्त। व्यतिषीत। व्यतिराते व्यतिराते व्यतिराते। व्यतिभाते व्यतिभाते व्यतिभाते। व्यतिबभे। २६८१ **न गतिहिंसार्थेभ्यः**। (१-३-१५) व्यतिगच्छन्ति। व्यतिघ्नन्ति। 'प्रतिषेधे हसादीनामुपसंख्यानम्' (वा ८१८)। हसादयो हसप्रकाराः शब्दक्रियाः। व्यतिहसन्ति। व्यति-

---

क्रियापरः, व्यतिहारशब्दो विनिमयपर इत्युक्तं भवति। **अन्यस्येति**। शूद्रादियोग्यं सस्यादिलवनं ब्राह्मणः करोतीत्यर्थः। परस्परकरणमपि कर्मव्यतिहार इति कैयटः। संप्रहरन्ते राजानः। कर्तृग्रहणं भावकर्मणोरित्यस्यानुवृत्तिनिवृत्त्यर्थम्। अन्यथा व्यतिलुनीत इत्यत्र न स्यात्। वस्तुतस्तु पृथक् सूत्रारम्भादेव सिद्धे कर्तृग्रहणमुत्तरार्थमिति भाष्ये स्पष्टम्। व्यति अस् ते इति स्थिते आह **श्नसोरिति**। **व्यतिस्ते इति**। तपसे अयोग्यः शूद्रस्तपस्वी भवतीत्यर्थः। इह 'उपसर्गप्रादुर्भ्याम्–' इति न षः, यच्परकत्वाभावादिति भावः। **व्यतिषाते इति**। इह अच्परकत्वाद् 'उपसर्गप्रादुर्भ्याम्–' इति षः। व्यति स् से इति स्थिते आह **तासस्त्योरिति**। 'उपसर्गप्रादुर्भ्याम्–' इति नेह षत्वम्, अस्त्यवयवस्य सकारस्य लुप्तत्वात्। व्यतिषाथे। व्यति स् ध्वे इति स्थिते आह **धि चेति**। सलोप इति शेषः। व्यतिस् ए इति स्थिते आह **ह एतीति**। सकारस्य हकार इति भावः। **व्यत्यसै इति**। लोडुत्तमपुरुषैकवचनम्। **व्यत्यास्तेति**। लङि रूपम्। **व्यतिषीतेति**। लिङि रूपम्। **व्यतिराते इति**। लटि प्रथमपुरुषैकद्विबहुवचनेषु समानमेव रूपम्। **व्यतिभाते इति**। भाधातो रूपम्। **व्यतिबभे इति**। लिटि रूपम्। **न गतिहिंसार्थेभ्यः**। कर्मव्यतिहारे आत्मनेपदं नेत्यर्थः। हसादिगणस्य अदर्शनादाह **हसप्रकारा**

कर्तरि कर्म। **अन्यस्येति**। शूद्रस्य योग्यं सस्यादिलवनं ब्राह्मणः करोतीत्यर्थः। परस्परकरणमपि कर्मव्यतिहारः। संप्रहरन्ते राजानः। पृथक्सूत्रारम्भादेव सिद्धे कर्तृग्रहणमुत्तरार्थम्। **व्यतिस्ते इति**। यच्परत्वाभावान्न षः। **व्यतिस इति**। 'उपसर्गप्रादुर्भ्याम्–' इति नेह षत्वम्। सकारस्यास्त्यवयवत्वाभावात्। 'आदेशप्रत्यययोः' इति षत्वं तु 'सात्पदाद्योः' इति निषिद्धम्। एकदेशविकृतन्यायेन प्रत्ययमात्रस्य पदत्वात्। **न गतिहिंसार्थेभ्यः**। अर्थशब्दः प्रत्येकमभिसंबध्यते। कर्मव्यतिहारे यदात्मनेपदं तस्य निषेधः। अर्थग्रहणसामर्थ्याद् ये शब्दान्तरमनपेक्ष्य गतिहिंसयोर्वर्तन्ते त एवेह गृह्यन्ते। हरतिस्तूपसर्गवशाद् हिंसायां प्रवर्तते इति

जल्पन्ति। 'हरतेरप्रतिषेधः' (वा ८९९), संप्रहरन्ते राजानः। २६८२ **इतरेतरान्योऽन्योपपदाच्च**। (१-३-१६) 'परस्परोपपदाच्चेति वक्तव्यम्' (वा ९००)। इतरेतरस्यान्योऽन्यस्य परस्परस्य वा व्यतिलुनन्ति। २६८३ **नेर्विशः**। (१-३-१७) निविशते। २६८४ **परिव्यवेभ्यः क्रियः**। (१-३-१८) अकर्त्रभिप्रायार्थमिदम्। परिक्रीणीते। विक्रीणीते। अवक्रीणीते। २६८५ **विपराभ्यां जेः**। (१-३-१९) विजयते। पराजयते। २६८६ **आङो दोऽनास्यविहरणे**। (१-३-२०) आङ्पूर्वाद्ददातेर्मुखविकसनाद-

---

इति। उपसर्गमनपेक्ष्य ये गतिहिंसयोर्वर्तन्ते तेषामेव ग्रहणलाभाय अर्थग्रहणम्। हन्धातुस्तु उपसर्गबलाद्धिंसायां वर्तते इति न तस्य प्रतिषेध इत्याह **हरतेरप्रतिषेध इति**। अर्थग्रहणलभ्यमिदं वार्तिकम्। **इतरेतर**। नात्मनेपदमिति शेषः। **नेर्विशः**। निपूर्वाद्विश आत्मनेपदं स्यादित्यर्थः। नेति निवृत्तम्। यद्यपि न्यविशतेत्यत्र न विशिर्नेः परः, अटा व्यवधानाद् अटो विकरणान्ताङ्गभक्तत्वेन निराधात्ववयवत्वभावात्। तथापि 'अड्व्यवाये उपसंख्यानम्' इति वार्तिकाद्भवतीति 'शदेः शितः' इत्यत्र भाष्ये स्पष्टम्। **परिव्यवेभ्यः**। परि वि अव एभ्यः *परस्मात् क्रीञ्धातोरात्मनेपदमित्यर्थः। ञित्वादात्मनेपदसिद्धेः किमर्थमिदमित्यत* आह **अकर्त्रभिप्रायार्थमिति**। **विपराभ्यां जेः**। वे परा आभ्यां परस्माद् जिधातोरात्मनेपदमित्यर्थः। **विजयते इति**। उत्कृष्टो भवतीत्यर्थः। परा-

---

'हरतेरप्रतिषेधः' इति वार्तिकमर्थग्रहणलभ्यमेवेत्याहुः। **इतरेतरा**। नन्वितरेतरादिशब्दैरेव कर्मव्यतिहारस्य द्योतितत्वात्तद्द्योतकमात्मनेपदं न प्राप्नोतीति किमर्थो निषेधः। अत्राहुः—लौकिके व्यवहारे लाघवानादरादात्मनेपदं प्रसज्येतेति निषेधोऽयमारभ्यते। अतएव व्यतिलुनीत इत्यादौ कर्मव्यतिहारद्योतनाय व्यतीत्युपसर्गावात्मनेपदं च समुच्चित्य प्रयुज्यत इति। **नेर्विशः**। नेः किम्, प्रविशति। अर्थवद्ग्रहणलक्षणप्रतिपदोक्तपरिभाषाभ्यां नेरुपसर्गस्य ग्रहणम्। तेनेह न—'मधूनि विशन्ति भ्रमराः'। 'इत्युक्त्वा मैथिली भर्तुरङ्के निविशती भयात्' इत्यत्र तु अङ्कानि विशतीति पाठ्यम्। न च पदसंस्कारपक्षे त्वङ्के निविशतीति पाठेऽप्यदोष इति वाच्यम्, त्वं करोति भवान् करोषीत्यादिप्रयोगस्यापि त्वदुक्तरीत्या साधुत्वापत्तेः, 'वा लिप्सायाम्' इत्यादेर्वैयर्थ्यापत्तेश्च। स्यादेतत्—'नवाम्बुदश्यामतनुर्न्यविक्षत' इत्यत्रात्मनेपदं न स्यात्, अटा व्यवधानात्। न च स्वाङ्गमव्यवधायकमिति वाच्यम्, अङ्गभक्तस्याटो विकरणविशिष्टस्यावयवत्वेऽपि धातोरनवयवत्वादिति चेत्। अत्राहुः—लावस्थायामडागम इति भाष्यमते न कश्चिद्दोषः। मतान्तरे तु उपसर्गनियमे 'अड्-

न्यत्रार्थे वर्तमानाद्दारमनेपदं स्यात् । विद्यामादत्ते । अनास्य इति किम्-मुखं व्याददाति । आस्यग्रहणमविवक्षितम्, विपादिकां व्याददाति । पादस्फोटो विपादिका । नदी कूलं व्याददाति । 'पराङ्गकर्मकान्न निषेधः' (वा १०३) व्याददते पिपीलिकाः पतङ्गस्य मुखम् । २६८७ क्रीडोऽनुसंपरिभ्यश्च । (१-३-२१) चादाङः । अनुक्रीडते । संक्रीडते । परिक्रीडते । आक्रीडते । अनोः कर्मप्रवचनीयान्न, उपसर्गेण समा साहचर्यात् । माणवकमनुक्रीडति । तेन सहेत्यर्थः । 'तृतीयार्थे' (सू ५४६) इत्यनोः कर्मप्रवचनीयत्वम् । 'समोऽकूजने' (वा १०४) । संक्रीडते । कूजने तु संक्रीडति चक्रम् । 'आगमेः क्षमायाम्' (वा १०५) । णयन्तस्येदं ग्रहणम् । आगमयस्व तावत्, मा त्वरिष्ठा इत्यर्थः । 'शिक्षेर्जिज्ञासायाम्' (वा १०६) । धनुषि शिक्षते । धनुर्विषये ज्ञाने

जयते इति । निकृष्टं भवतीत्यर्थः । आङो दो । आस्यविहरणं मुखविकसनम् । दा इत्यस्य द इति पञ्चमी, तदाह ददातेर्मुखविकसनादन्यत्रेति । विद्यामादत्ते इति । गृह्णातीत्यर्थः । दाञो ञित्त्वेऽप्यकर्त्रभिप्रायार्थमिदम् । अविवक्षितमिति । अविहरणे इत्येतावदेव विवक्षितमित्यर्थः । विपादिकां व्याददातीति । क्षारौषधादिना विदारयतीत्यर्थः । अत्र आस्यविहरणाभावेऽपि विकसनसत्त्वान्नात्मनेपदमिति भावः । नदी कूलं व्याददातीति । भिनत्तीत्यर्थः । अत्रापि विकसनसत्त्वादास्यविहरणाभावेऽपि नात्मनेपदम् । पराङ्गकर्मकान्न निषेध इति । वार्तिकम् । पतङ्गस्येति । पक्षिणो मुखं भक्षणाय विकासयन्तीत्यर्थः । क्रीडोऽनु । चादाङ इति । तथा च अनु सम् परि आङ् एभ्यः परस्मात् क्रीडधातोरात्मनेपदमित्यर्थः । 'अनोः कर्मप्रवचनीयान्न' इति वार्तिकम् । तदिदं न्यायसिद्धमित्याह उपसर्गेण समेति । 'समोऽकूजने' इति वार्तिकम् । समः परस्माद् अकूजने विद्यमानात् क्रीडेरात्मनपदमित्यर्थः । कूजने तु संक्रीडति चक्रमिति । कूजतीत्यर्थः । आगमेः क्षमायामिति । आत्मनेपदमिति शेषः । वार्तिकमिदम् । णयन्तस्येदं ग्रहणमिति । भाष्ये णयन्तस्यैवोदाहरणादिति भावः । आगमयस्व तावदिति । कंचित्कालं सहस्वेत्यर्थः । आङुपसर्गवशाद् गमधातुः क्षमायां वर्तते । 'हन्त्यर्थाश्च' इति चुरादिगणसूत्रेण स्वार्थे णिच् । चुरादेराकृतिगणत्वाद्वा । मा त्वरिष्ठा इति । फलितार्थकथनम् । 'शिक्षे

व्यवाये उपसंख्यानम्' इति वार्तिकमस्तीति दिक् । आङो दो । अकर्त्रभिप्रायार्थमिदम् । तेन 'व्यादत्ते विहगपतिर्मुखं स्वकीयम्' इति प्रयोग आस्यविहरणेऽपि सिद्धः । क्रियाफलस्य कर्तृगामित्वविवक्षणात् । शिक्षेर्जिज्ञासायामिति । शिक्ष विद्यो-

शक्तो भवितुमिच्छतीत्यर्थः। 'आशिषि नाथः' (वा ११०) आशिष्येवेति नियमार्थं वार्तिकमित्युक्तम्, सर्पिषो नाथते। सर्पिर्मे स्यादित्याशास्त इत्यर्थः। कथं 'नाथसे किमु पतिं न भूभृताम्' इति। 'नाधसे' इति पाठ्यम्। 'हरतेर्गतताच्छील्ये' (वा १०८)। गतं प्रकारः। पैतृकमश्वा अनुहरन्ते। मातृकं गावः। पितुर्मातुश्च गतं प्रकारं सततं परिशीलयन्तीत्यर्थः। ताच्छील्ये किम्–मातुरनुहरति। 'किरतेर्हर्षजीविकाकुलायकरणेष्विति वाच्यम्' (वा १०७)। हर्षादयो विषयाः। तत्र हर्षो विक्षेपस्य कारणम्, इतरे फले। २६८८ अपाच्चतुष्पाच्छकुनिष्वालेखने। (६-१-१४२) अपात्किरतेः सुट् स्यात्। 'सुडपि

जिज्ञासायाम्' इत्यपि वार्तिकम्। धनुषि शिक्षते इति। वैषयिके आधारे सप्तमी। शक्तिः सन्नन्तः। 'सनि मीमा–' इति इस। अभ्यासलोपश्च, तदाह धनुर्विषये इत्यादि। 'शिक्ष विद्योपादाने' इत्यस्य तु नेह ग्रहणम्, अनुदात्तेत्त्वादेव सिद्धेरिति भावः। कथमिति। भूभृतां पतिं किमु न नाथसे–न याचसे इत्यर्थः। आशिषः अप्रतीतेः कथमात्मनेपदमित्यर्थः। नाधसे इति पाठ्यमिति। तवर्गचतुर्थान्तोऽयम्। 'आशिषि नाथः' इति नियमस्तु तवर्गद्वितीयान्तस्यैवेति भावः। 'हरतेर्गतताच्छील्ये' इति वार्तिकम्। आत्मनेपदमिति शेषः। गतं प्रकार इति। वृत्तमित्यर्थः। ताच्छील्यं स्वभावानुसरणम्। गतिताच्छील्यमिति यावत्। गतेति पाठे भावे क्तः। पैतृकमश्वा इति। पैतृकं वृत्तम् अश्वाः स्वभावादनुसरन्तीत्यर्थः। मातृकं गाव इति। अनुहरन्ते इत्यनुषज्यते। मातुरनुहरतीति। अनुकरोतीत्यर्थः। अत्र सादृश्यमात्रं विवक्षितम्, न तु गतिताच्छील्यमिति भावः। किरतेरिति। वार्तिकम्। हर्षः प्रमोदः, जीविका जीवनोपायभक्षणम्, कुलायकरणम् आश्रयसंपत्तिः, एषु कृधातोरात्मनेपदमित्यर्थः। ननु कृधातोर्विक्षेपार्थकस्य कथमेषु वृत्तिरित्यत आह हर्षादयो विषया इति। धात्वर्थत्वाभावेऽपि पदान्तरसमभिव्याहारगम्या इत्यर्थः। तत्रेति। तेषु हर्षादिष्वित्यर्थः। कारणमिति। तथा च हर्षमूलकत्वं विक्षेपस्य लभ्यते इति भावः। इतरे इति। जीविकाकुलायकरणे विक्षेपस्य साध्ये इति लभ्यते। हर्षादीनामेवंविधविषयत्वे सत्येवात्मनेपदमिति फलितम्, भाष्ये तथैवोदाहृतत्वादिति भावः। अपाच्चतुष्पात्। 'सुट्कात्पूर्वः' इत्यधिकृतम्। 'किरतौ लवने' इत्यतः किरताविल्यनुवर्तते तदाह, अपात् किरतेः

पादाने इत्यस्य नेह ग्रहणमनुदात्तेत्त्वादेवात्मनेपदसिद्धेः। किं तु शकेः सन्नन्तस्येति ध्वनयति धनुर्विषय इत्यादिना। नियमार्थमिति। नाथतेरनुदात्तेत्त्वं तु 'अनुदात्तेतश्च हलादेः' इति युचि नाथन इति रूपसिद्ध्यर्थमिति भावः। मातुर-

हर्षादिष्वेव वक्तव्यः' (वा २७०६)। अपस्किरते वृषो हृष्टः, कुक्कुटो भक्षार्थी, श्वा आश्रयार्थी च। हर्षादिषु इति किम्-अपकिरति कुसुमम्। इह तङ्सुटौ न। हर्षादिमात्रविवक्षायां यद्यपि तङ् प्राप्तस्तथापि सुडभावे नेष्यते इत्याहुः। गजोऽपकिरति। 'आङि नुप्रच्छ्योः' (वा १०१)। आनुते। आपृच्छते। 'शप उपालम्भे' (वा १११)। आक्रोशार्थात्स्वरितेतोऽकर्तृगेऽपि फले शपथरूपेऽर्थे आत्मनेपदं वक्तव्यमित्यर्थः। कृष्णाय शपते। २६८६ **समवप्रविभ्यः स्थः**। (१-३-२२) संतिष्ठते। 'स्थाघ्वोरिच्च' (सू २३८१)। समस्थित समस्थिषाताम् समस्थिषत। अवतिष्ठते। प्रतिष्ठते। वितिष्ठते। 'आङः प्रति॰

सुट् स्यादिति। चतुष्पात्सु शकुनिषु च गम्येष्वित्यपि ज्ञेयम्। आलेखनं खननम्। सुडपि हर्षादिष्वेवेति वार्तिकम्। **अपस्किरते। वृषो हृष्ट इति**। हर्षाद् भूमिं लिखन् धूल्यादि विक्षिपतीत्यर्थः। **कुक्कुटो भक्षार्थीति**। अपस्किरते इत्यनुषज्यते। **श्वा आश्रयार्थीति**। अपस्किरते इत्यनुषज्यते। **अपकिरति कुसुममिति**। वृषादिरिति शेषः। ह्रियमाणो वृषादिः पादैः कुसुममवकिरतीत्यर्थः। अत्र हर्षाद्यभावान्नात्मनेपदम्। नापि सुट्, तदाह **इह तङ्सुटौ नेति**। ननु अपस्किरते वृषो हृष्ट इत्याद्युदाहरणत्रये यदि हर्षजीविकाकुलायकरणान्येव विवक्षितानि, न त्वालेखनमपि, तदा तङेव स्यान्न तु सुड् इत्यत आह **हर्षादिमात्रेत्यादि**। आलेखनाभावेऽपीत्यर्थः। **नेष्यते इति**। किरतेर्हर्षजीविकेत्यात्मनेपदविधौ ससुट्कानामेव भाष्ये उदाहरणादिति भावः। भाष्यस्थान्युदाहरणान्यालेखनविषयाण्येव भविष्यन्तीत्यस्वरसं सूचयति **आहुरिति। गजोऽपकिरतीति**। स्वभावाख्यानमत्रेति भावः। **'आङि नुप्रच्छ्योः'**। इति वार्तिकम्। **आनुते इति**। सृगाल इति भाष्यम्। सृगाल उत्कण्ठापूर्वकं शब्दं करोतीत्यर्थ इति कैयटः। ननु 'शप आक्रोशे' इत्यस्य स्वरितेत्त्वादेव सिद्धे 'शप उपालम्भे' इत्यात्मनेपदविधिर्व्यर्थ इत्यत आह **आक्रोशार्थादिति**। 'शप आक्रोशे' इति स्वरितेतः कर्तृगामिन्येव फले आत्मनेपदं प्राप्तम्। अकर्तृगेऽपि फले शपथात्मकनिन्दाविशेषे विद्यमानात् तस्मात् शपधातोरात्मनेपदार्थमिदमित्यर्थः। **कृष्णाय शपते इति**। 'श्लाघह्नुङ्स्थाशपाम्–' इति संप्रदानत्वाच्चतुर्थी। **समवप्रविभ्यः स्थः**। स्थ इति पञ्चमी। सम् अव प्र वि एभ्यः परस्मात् स्थाधातोरात्मनेपदमित्यर्थः। **संतिष्ठते इति**। समाप्तं भव-

---

नुहरतीति। सादृश्यमात्रमत्र विवक्षितं न तु प्रकारताच्छील्ये। **गजोऽपकिरतीति**। अत्र हर्षे सत्यपि आलेखनाभावात् सुटोऽप्राप्तिः। **कृष्णाय शपत इति**। 'श्लाघह्नुङ्–' इति संप्रदानसंज्ञा। 'नीवीं प्रति प्रणिहिते तु करे प्रियेण सख्यः

ज्ञायामुपसंख्यानम्' (वा ११२)। शब्दं नित्यमातिष्ठते । नित्यत्वेन प्रतिजानीते इत्यर्थः । २६९० **प्रकाशनस्थेयाख्ययोश्च**। (१-३-२३) गोपी कृष्णाय तिष्ठते, आशयं प्रकाशयतीत्यर्थः । 'संशय्य कर्णादिषु तिष्ठते यः' कर्णादीन्निर्णेतृत्वेनाश्रयतीत्यर्थः । २६९१ **उदोऽनूर्ध्वकर्मणि**। (१-३-२४) मुक्तावुत्तिष्ठते । अनूर्ध्व इति किम्-पीठादुत्तिष्ठति । 'ईहायामेव' (वा ११३) नेह--ग्रामाच्छतमुत्तिष्ठति । २६९२ **उपान्मन्त्रकरणे**। (१-३-२५) आग्नेय्या आग्नीध्रमुपतिष्ठते । मन्त्रकरणे किम्-भर्तारमुपतिष्ठति यौवनेन ।

तीत्यर्थः । **प्रकाशन** । प्रकाशनं स्वाभिप्रायाविष्करणम् । स्थेयो विवादपदनिर्णेता । तिष्ठति विश्राम्यति । विवादपदनिर्णयोऽस्मिन्नित्यर्थे बाहुलकाद् अधिकरणे 'अचो यत्' इति यति ईत्वे स्थेयशब्दव्युत्पत्तेः ।

'स्थेयो विवादस्थानस्य निर्णेतरि पुरोहिते' इति मेदिनी ।

इह तु विवादपदनिर्णेतृत्वेनाध्यवसायो विवक्षितः । आख्या अभिधानम् । प्रकाशनाख्यायां स्थेयाख्यायां च वर्तमानात् स्थाधातोरात्मनेपदमित्यर्थः । प्रकाशने उदाहरति **गोपी कृष्णाय तिष्ठते इति** । 'श्लाघह्नुङ्स्थाशपाम्' इति संप्रदानत्वाच्चतुर्थी । स्थेये उदाहरति **संशय्येति** । कर्णादिष्विति विषयसप्तमी । फलितमाह **कर्णादीनिति** । **उदोऽनूर्ध्वकर्मणि** । ऊर्ध्वदेशसंयोगानुकूला क्रिया ऊर्ध्वकर्म । तद्भिन्नमनूर्ध्वकर्म । तद्वृत्तेः स्थाधातोरुत्पूर्वादात्मनेपदमित्यर्थः । **मुक्तावुत्तिष्ठते इति** । गुरूपगमनादिना यतते इत्यर्थः । **पीठादुत्तिष्ठतीति** । उत्पततीत्यर्थः । ईहायामेव इति वार्तिकम् । ईहा कायपरिस्पन्दः । **ग्रामाच्छतमुत्तिष्ठतीति** । उत्पद्यत इत्यर्थः । **उपान्मन्त्रकरणे** । मन्त्रकरणकेऽर्थे विद्य-

---

शयामि यदि किंचिदपि स्मरामि' इत्यत्र तु स्वाशयं प्रकाशयामीत्यर्थो विवक्षितो न तु शपथ इति न तस्मिन्नाहुः । **प्रकाशन** । प्रकाशनं ज्ञापनम् । स्थेयो विवादपदनिर्णेता । तिष्ठन्त्यस्मिन् विवादपदनिर्णयार्थमिति व्युत्पत्तेः । बाहुलकादधिकरणे 'अचो यत्' । 'स्थेयो विवादस्थानस्य निर्णेतरि पुरोहिते' इति मेदिनी । कर्णादिष्विति अधिकरणे सप्तमी । तेषां स्थेयत्वं तिष्ठते इत्यात्मनेपदेन द्योत्यते तमेवार्थमाह **कर्णादीनिति** । प्रकाशनेत्यादि किम्, चैत्रे तिष्ठति । **उदोऽनूर्ध्वकर्मणि** । स्थ इत्यनुवर्तते । ऊर्ध्वदेशसंयोगानुकूलं यत्कर्म तदूर्ध्वकर्म । 'उदोऽनूर्ध्व-' इत्युक्तेऽप्यनूर्ध्वक्रियायां वर्तमानादुत्पूर्वात्तिष्ठतेर्लस्यात्मनेपदमित्यर्थो लभ्यत एव । तथापि परिस्पन्दार्थलाभाय कर्मपदमित्यभिप्रेत्याह **ईहायामेवेति** । इच्छापूर्विका चेष्टा ईहा । सा च ग्रामाच्छतमित्यत्र नास्ति । **उपान्मन्त्रकरणे** । मन्त्रः करणं यत्र

'उपाद्देवपूजासंगतिकरणमित्रकरणपथिष्विति वाच्यम्' (वा ११४) । आदित्यमुपतिष्ठते । कथं तर्हि 'स्तुत्यं स्तुतिभिरर्थ्याभिरुपतस्थे सरस्वती' इति, देवतात्वारोपात्, नृपस्य देवतांशत्वाद्वा । गङ्गा यमुनामुपतिष्ठते, उपश्लिष्यतीत्यर्थः । रथिकानुपतिष्ठते, मित्रीकरोतीत्यर्थः । पन्थाः स्रुघ्नमुपतिष्ठते, प्राप्नोतीत्यर्थः । 'वा लिप्सायामिति वक्तव्यम्' (वा ११५) । भिक्षुकः प्रभुमुपतिष्ठते, उपतिष्ठति वा, लिप्सया उपगच्छतीत्यर्थः । २६६३ **अकर्मकाच्च** । (१-३-२६) उपात्तिष्ठतेरकर्मकादात्मनेपदं स्यात् । भोजनकाल उपतिष्ठते, संनिहितो भवतीत्यर्थः । २६६४ **उद्विभ्यां तपः** । (१-३-२७) अकर्मकाद् इत्येव ।

मानात्स्थाधातोरात्मनेपदमित्यर्थः । **आग्नेय्या आग्नीध्रमुपतिष्ठते इति** । आग्नेय्या ऋचा आग्नीध्राख्यमण्डपविशेषमुपेत्य तिष्ठतीत्यर्थः । स्थितेरकर्मकत्वेऽपि उपेत्येतदपेक्ष्य सकर्मकत्वम् । केचित्तु मन्त्रकरणके समीपावस्थितिपूर्वकस्तवे विद्यमानात् स्थाधातोरात्मनेपदमिति व्याचक्षते । तत्र स्तवो गुणवत्त्वेन संकीर्तनमिति स्तुतशब्दाधिकरणे प्रपञ्चितमस्माभिः । श्लोकै राजानं स्तौतीत्यर्थे श्लोकैरुपतिष्ठते इत्यात्मनेपदं न, मन्त्रकरणकत्वाभावात् । 'उपाद्देवपूजा–' इति वार्तिकम् अमन्त्रकरणकत्वार्थम् । **आदित्यमुपतिष्ठते इति** । अभिमुखीभूयावस्थितिपूर्वकस्तुत्यादिभिः पूजयतीत्यर्थः । **कथं तर्हीति** । रघोर्देवतात्वाभावादिति भावः । समाधत्ते **देवतात्वारोपादिति** । **नृपस्येति** । 'नाविष्णुः पृथिवीपतिः' इत्यादिस्मरणादिति भावः । **वा लिप्सायामिति** । लिप्साहेतुकार्थवृत्तेः स्थाधातोरात्मनेपदं वेत्यर्थः । **अकर्मकाच्च** । **उपात्तिष्ठतेरिति** । 'उपान्मन्त्रकरणे' इत्यतः 'समवप्रविभ्यः स्थः' इत्यतश्च तदनु-

---

मन्त्रकरणं स्तुतिः, तत्र वर्तमानादुपपूर्वात्तिष्ठतेरात्मनेपदं स्यात् । **आग्नेय्येति** । अग्निदेवताकया ऋचा आग्नीध्रमग्निविशेषं स्तौतीत्यर्थः । अत्र केचित् श्लोकै राजानं स्तौतीत्यर्थे श्लोकैरुपतिष्ठत इति प्रयोगो नेष्यते । ऐन्द्र्या गार्हपत्यमुपतिष्ठते । आग्नेय्या आग्नीध्रमिति वैदिकविषय एव सर्वैरुदाहृतत्वात् । तथा च तिष्ठतेरर्थे यदा मन्त्रः करणं तदा तङिति व्याख्येयम् । उपतिष्ठत इत्यस्य तु समीपावस्थानमेवार्थः । न च तत्र यष्ट्यादिवन्मन्त्रस्य करणत्वं न संभवतीति वाच्यम्, उपस्थानस्वरूपे तस्योपयोगाभावेऽपि तत्कार्ये स्तुतावुपयोगादुपस्थानकरणत्वं मन्त्रस्य न विहन्यते । आग्नीध्रमिति द्वितीया तु करणत्वान्यथानुपपत्तिलभ्येन स्तोतुमित्यनेनान्वेति । एवं चाग्नेय्या आग्नीध्रं स्तोतुं तत्समीपे तिष्ठतीत्येव वाक्यार्थः । आदित्यमुपतिष्ठते इत्यत्र तु तत्समीपावस्थानस्यासंभवादादित्यं स्तोतुं तदभिमुखतया तिष्ठतीत्यर्थ इत्याहुः । **गङ्गा यमुनामिति** । एतेन यमुनैव प्राचीना गङ्गा तु पश्चाद्यमुनया सह मिलितेति प्रती-

उत्तपते। वितपते। दीप्यते इत्यर्थः। 'स्वाङ्गकर्मकाच्चेति वक्तव्यम्' (वा ११६)। स्वमङ्गं स्वाङ्गम्, न तु 'अद्रवम्–' इति परिभाषितम्। उत्तपते वितपते पाणिम्। नेह—सुवर्णमुत्तपति, सन्तापयति विलापयति वेत्यर्थः। चैत्रो मैत्रस्य पाणिमुत्तपति, सन्तापयतीत्यर्थः। २६९५ **आङो यमहनः।** (१-३-२८) आयच्छते। आहते। अकर्मकात्स्वाङ्गकर्मकाच्चेत्येव। नेह—परस्य शिर आहन्ति। कथं तर्हि 'आजघ्ने विषमविलोचनस्य वक्षः' इति भारविः। 'आहध्वं मा रघूत्तमम्' इति भट्टिश्च। प्रमाद एवायमिति भागवृत्तिः। प्राप्येत्यध्याहारो वा। ल्यब्लोपे पञ्चमीति तु ल्यबन्तं विनैव तदर्थावगतिर्यत्र तद्विषयम्। भेत्तुमित्यादितुमुन्ताध्याहारो वास्तु, समीपमेत्येति वा। २६९६ **आत्मनेपदेष्व-**

वृत्तेरिति भावः। **उद्विभ्यां तपः।** अकर्मकादित्येवेति भाष्यम्। **दीप्यते इति।** दीप्तिमान् भवतीत्यर्थः। **स्वाङ्गकर्मकाच्चेति।** उद्विभ्यां तप इत्यनुवर्तते। चकारादकर्मकसमुच्चयः। स्वाङ्गशब्दोऽत्र यौगिक इत्याह **स्वमङ्गमिति।** **सुवर्णमुत्तपतीति।** अस्वाङ्गकर्मकत्वादकर्मकत्वाभावाच्च नात्मनेपदमिति भावः। स्वाङ्गशब्दोऽत्र न पारिभाषिकः। किन्तु यौगिक इत्यस्य प्रयोजनमाह **चैत्रो मैत्रस्य पाणिमुत्तपतीति।** अत्र अद्रवं मूर्तिमदित्यादिपरिभाषितस्वाङ्गकर्मकत्वेऽपि स्वकीयाङ्गकर्मकत्वाभावान्नात्मनेपदमिति भावः। **आङो यमहनः।** आङः परस्माद् यमो हनश्चात्मनेपदमित्यर्थः। **आयच्छते इति।** रज्जुर्दीर्घीभवतीत्यर्थः। दीर्घीकरोति पादमिति वा। **आहते इति।** स्वोदरमिति शेषः। **परस्य शिर आहन्तीति।** स्वीयाङ्गकर्मकत्वाभावादकर्मकत्वाभावाच्च नात्मनेपदम्। **कथं तर्हीति।** स्वीयाङ्गकर्मकत्वाभावादकर्मकत्वाभावाच्चात्मनेपदासंभवादिति भावः। **प्राप्येति।** विषमविलोचनस्य वक्षः प्राप्य आजघ्ने इति, रघूत्तमं प्राप्य माऽऽहध्वमिति च प्राप्तिक्रियां प्रत्येव विषमविलोचनस्य रघूत्तमस्य च कर्मतया हन्तेरकर्मकत्वादात्मनेपदं निर्बाधमिति भावः। यद्यपि हननक्रियां प्रत्यपि तयोरेव वस्तुतः कर्मत्वं तथापि तस्याविवक्षितत्वादकर्मकत्वमेव, 'धातोरर्थान्तरे वृत्तेर्धात्वर्थेनोपसंग्रहात्। प्रसिद्धेरविवक्षातः कर्मणोऽकर्मिका क्रिया॥' इत्यनुपदमेव वक्ष्यमाणत्वादिति बोध्यम्। ननु प्राप्येत्यध्याहारे प्रासादात्प्रेक्षते इत्यादिवत्पञ्चमी स्यादित्यत आह **ल्यब्लोपे इति।** ल्यब्लोपे पञ्चमीत्येतत्तु यत्रार्थाध्याहारमाश्रित्य ल्यबन्तार्थावगतिः तद्विषयकम्। अत्र तु ल्यबन्त-

---

यते। **स्वाङ्गकर्मकाच्चेति।** चकारेणाकर्मकस्य संग्रहः। **नत्वद्रवमिति।** अन्यथा चैत्रो मैत्रस्येत्यादि वक्ष्यमाणं न सङ्गच्छेतेति भावः। **आङो यमहनः।** **प्राप्येति।** तथा च। हन्तेरकर्मकतया आजघ्ने आहध्वमित्यात्मनेपदं युक्तमित्यर्थः। **भेत्तुमित्या-**

न्यतरस्याम् । (२-४-४४) हनो वधादेशो वा लुङि आत्मनेपदेषु परेषु । आवधिष्ट आवधिषाताम् । २६९७ हनः सिच् । (१-२-१४) कित्स्यात् । अनुनासिकलोपः । आहत आहसाताम् आहसत । २६९८ यमो गन्धने । (१-२-१५) सिच्कित्स्यात् । गन्धनं सूचनं परदोषाविष्करणम् । उदायत । गन्धने किम्—उदायंस्त पादम् । आकृष्टवानित्यर्थः । २६९९ समो गम्यृच्छिभ्याम् । (१-३-२९) अकर्मकाभ्याम् इत्येव । सङ्गच्छते । २७०० वा गमः । (१-२-१३) गमः परौ झलादी लिङ्सिचौ वा कितौ स्तः । सङ्गसीष्ट, सङ्गंसीष्ट । समगत, समगंस्त । समृच्छते । समृच्छिष्यते । अकर्मका-

---

शब्दाध्याहाराच्च पञ्चमीत्यर्थः । भेत्तुमित्यादीति । एवं च ल्यब्लोपपञ्चम्या न प्रसक्तिरिति भावः । 'आजघ्ने विषम—' इत्यत्र परिहारान्तरमाह समीपमेत्येति वेति । अध्याहार इति शेषः । विषमविलोचनस्य समीपमेत्य स्वीयमेव वक्षो मल्ल इव वीरावेशादास्फालयाचक्रे इत्यर्थः । तथा च स्वाङ्गकर्मकत्वादात्मनेपदं निर्बाधमिति भावः । लुङि आहन् स् त इति स्थिते हनः सिच् । कित्स्यादिति शेषपूरणम् । 'असंयोगाल्लिट् कित्' इत्यतः तदनुवृत्तेरिति भावः । हन्धातोः परः सिच् कित्स्यादिति फलितम् । अनुनासिकलोप इति । 'अनुदात्तोपदेश—' इति नकारलोप इत्यर्थः । उद् आ यम् स् त इति स्थिते । यमो गन्धने । सिच्कित्स्यादिति । शेषपूरणम् । सिचः कित्त्वे मकारस्य अनुदात्तोपदेश इति लोपः । समो गम्यृच्छिभ्याम् । आत्मनेपदमिति शेषः । अकर्मकाभ्यामित्येवेति । स्वाङ्गकर्मकाच्चेति तु निवृत्तमिति भावः । संगच्छते इति । संगतं भवतीत्यर्थः । वा गमः । 'इको झल्' इत्यतो झलिति 'लिङ्सिचावात्मनेपदेषु' इत्यतो लिङ्सिचाविति 'असंयोगाल्लिट्—' इत्यतः किदिति चानुवर्तते, तदाह गमः परावित्यादि । समगतेति । लुङि रूपम् । सिचः कित्त्वपक्षे 'अनुदात्तोपदेश—' इति मकारलोपे 'ह्रस्वादङ्गात्' इति सिचो लुक् । समृ-

---

दीति । एवं च ल्यब्लोपपञ्चम्याः प्रसक्तिरेव नास्तीति भावः । समीपमेत्येति । विषमविलोचनस्य समीपमेत्य वक्ष आजघ्ने । स्वकीयमेव वक्षो मल्ल इव सन्तोषातिशयादास्फालयाचक्रे इत्यर्थात्स्वाङ्गकर्मकत्वमस्त्येवेति भावः । आत्मनेपदेष्विति । तङीत्येव सुवचम् । 'समो गम्यृच्छिप्रच्छिस्वरत्यर्तिविदिभ्यः' इति वृत्तिस्थं पाठमुपेक्ष्य भाष्यस्थं पाठमनुसरति समो गम्यृच्छिभ्यामिति । संगच्छत इति । सङ्गतं भवतीत्यर्थः । वा गमः । 'असंयोगाल्लिट् कित्' इत्यतः किदनुवर्तते, 'इको झल्' इत्यतो झल्ग्रहणम्, 'लिङ्सिचौ—' इत्यतो लिङ्सिचाविति चानुवर्तते । कित्त्वपक्षे 'अनुदात्तोपदेश—' इति मलोपः । समृच्छिष्यत इति लृटः प्रयोगस्तु तौदादिकस्य-

भ्यां किम्-ग्रामं संगच्छति । 'विदिप्रच्छिस्वरतीनामुपसंख्यानम्' (वा ११८)। वेत्तेरेव ग्रहणम्। संवित्ते संविदाते। २७०१ **वेत्तेर्विभाषा** । (७-१-७) वेत्तेः परस्य झादेशस्यातो रुडागमो वा स्यात्। संविद्रते संविदते। संपृच्छते। संस्वरते। 'अर्तिश्रुदृशिभ्यश्चेति वक्तव्यम्' (वा १२६)। अर्तीति द्वयोर्ग्रहणम्। अङ्विधौ त्वियर्तेरेवेत्युक्तम्। मा समृत मा समृषाताम् मा समृषत इति, समार्त

च्छते इति। 'ऋच्छ गतीन्द्रियप्रलयमूर्तिभावेषु' इति तौदादिकस्य रूपम्। अत्र तौदादिकस्य ऋच्छतेरेव ग्रहणम्, नतु ऋच्छादेशस्येति सूचयितुं लृडन्तमप्युदाहरति **सम्मृच्छिष्यते इति । विदिप्रच्छिस्वरतीनामिति**। सम इत्यनुवर्तते। संपूर्वेभ्यो विदिप्रच्छिस्वरतिभ्य आत्मनेपदमित्यर्थः। **वेत्तेरिति** । लुग्विकरणस्यैव विदेर्ग्रहणमित्यर्थः, व्याख्यानादिति भावः । **वेत्तेर्विभाषा**। 'झोऽन्तः' इत्यतो झ इत्यनुवर्तते। 'अदभ्यस्तात्' इत्यतः अदित्यनुवृत्तं षष्ठया विपरिणम्यते। 'शीङो रुट्' इत्यतो रुडिति च, तदाह **वेत्तेः परस्येत्यादिना। अर्तिश्रुदृशिभ्य इति**। संपूर्वेभ्यस्तङिति शेषः । **द्वयोरिति**। भौवादिकस्य इयर्तेश्चेत्यर्थः । **अङ्विधौ त्विति**। 'सर्तिशास्त्यर्तिभ्यश्च' इत्यत्रेत्यर्थः। **मा समृतेति** । 'उश्च' इति सिचः कित्त्वान्न गुणः। 'ह्रस्वादङ्गात्' इति सिचो लोपः। माङ्योगे मा समृतेत्यादि। माङ्योगाभावे तु समार्तेत्यादि इत्येवं भौवादिकस्य ऋधातो रूपमित्यर्थः। माङ्योगादडभावः। अथ माङ्योगाभावे आडागमे उदाहरति **समार्तेति**। सम् आ ऋ स् त इति स्थिते 'उश्च' इति कित्वाद् गुणनिषेधे 'आटश्च' इति वृद्धिं बाधित्वा परत्वाद् 'ह्रस्वादङ्गात्' इति सिचो लोपे 'आटश्च' इति ऋकारस्य वृद्धौ रपरत्वे रूपम्। न च सिज्लोपस्यासिद्धत्वाद् आटश्चेति वृद्धौ कृतायां ह्रस्वादङ्गादिति सिज्लोपस्याप्रवृत्त्या

च्छेरत्र ग्रहणं न तु ऋच्छादेशस्येति ध्वननार्थम्। **ग्रामं संगच्छतीति**। 'तच्चैक्यं समगच्छत' इत्यत्र तु एकं जातमित्यर्थाद्गमेरकर्मकत्वमेवेति तङ् । एकमेवैक्यम् । स्वार्थे ष्यञ्। **विदिप्रच्छि**। परस्मैपदिसाहचर्यादाह **वेत्तेरेवेति** । विन्दतिर्हि स्वरितेत्। सत्ताविचारणार्थयोस्तु अनुदात्तेत्त्वादेव सिद्धम्। न च निरनुबन्धपरिभाषयैव वेत्तेर्ग्रहणं स्यादिति वाच्यम्, 'लुग्विकरणाऽलुग्विकरणयोः–' इति परिभाषया तु विन्दतेर्ग्रहणप्रसङ्गात्, **वेत्तेर्विभाषा**। 'शीङो रुट्' इत्यतो रुडनुवर्तते, 'अदभ्यस्तात्' इत्यतः अदित्यनुवर्त्य षष्ठ्यन्तत्वेन विपरिणम्यत इत्याह **अतो रुडागम इति। अङ्विधौ त्विति** । 'सर्तिशास्त्यर्ति–' इति लुप्तविकरणेन शासिना साहचर्यादिति भावः । **मा समृतेति**। 'उश्च' इति कित्त्वम् । माङ्योगादडभावः। **समार्तेति**। ननु सिज्लोपस्यासिद्धत्वाद् 'आटश्च' इति वृद्धौ कृतायां 'ह्रस्वादङ्गात्'

समार्षाताम् समार्षत इति च स्यादेः। इयर्तेस्तु मा समरत मा समरेताम् मा समरन्त इति, समरत समारेताम् समारन्त इति च। संश्रृणुते। संपश्यते। अकर्मकादित्येव। अत एव 'रक्षांसीति पुरापि संश्रृणुमहे' इति मुरारिप्रयोगः प्रामादिक इत्याहुः। अध्याहारो वा 'इति कथयद्भयः' इति। अथास्मिन्नकर्मकाधिकारे हनिगम्यादीनां कथमकर्मकतेति चेत् श्रृणु,

धातोरर्थान्तरे वृत्तेर्धात्वर्थेनोपसंग्रहात्।
प्रसिद्धेरविवक्षातः कर्मणोऽकर्मिका क्रिया॥

समार्ष्टेत्येवोचितमिति वाच्यम्, 'सिज्लोप एकादेशे सिद्धो वाच्यः' इति वचनेन पूर्वं सिज्लोपे पश्चादाटश्चेति वृद्धेः प्रवृत्तिसंभवादित्यलम्। **इयर्तेस्त्विति**। श्लुविकरणऋधातोरित्यर्थः। **मा समरतेति**। 'सर्तिशास्त्यर्ति–' इत्यङ्, तत्र इयर्तेर्ग्रहणादिति भावः। 'ऋदृशोऽङि–' इति गुणः। **समारतेति**। 'आटश्च' इति वृद्धिः। **इति चेति**। इयर्ते रूपमित्यन्वयः। तदेवम् 'अर्तिश्रुदृशिभ्य–' इत्यत्र अर्तिप्रपञ्चमुक्त्वा श्रुधातोरुदाहरति। **संश्रृणुते इति**। दृशेरुदाहरति **संपश्यते इति**। **अकर्मकादित्येवेति**। 'समो गम्यृच्छिभ्याम्' इत्यत्र अकर्मकादित्यनुवृत्तेरभ्युपगतत्वेन तत्रोपसंख्यातवार्तिकेऽस्मिन् तदनुवृत्तेर्युक्तत्वादिति भावः। **अत एवेति**। प्रामादिक इत्याहुरित्यत्रान्वयः, सकर्मकत्वेनात्मनेपदासंभवादिति भावः। **अध्याहारो वेति**। इति कथयद्भ्य इत्यध्याहारो वेत्यन्वयः। तथा च रक्षांसीति कथयद्भ्यः पुरा संश्रृणुमहे इत्यत्र कथन एव रक्षसामन्वितत्वात् श्रुवः अकर्मकत्वादात्मनेपदं निर्बाधमिति भावः। **धातोरिति**। धातोरर्थान्तरे वृत्तेरिति, धात्वर्थेनोसंग्रहादिति, प्रसिद्धेरिति,

---

इति सिज्लोपाप्रवृत्त्या समार्ष्टेति रूपं स्यात्। न च ह्रस्वाद्विहितस्येति व्याख्यानादिष्टसिद्धिरिति वाच्यम्, विहितविशेषणे मानाभावात्। उदायत आहतेत्याद्यसिध्यापत्तेश्च। अत्र केचित्—'सिज्लोप एकादेशे सिद्धो वाच्यः' इत्यनेन पूर्वं सिज्लोपे पश्चाद् वृद्धिर्भवति। एकादेशे इति विषयसप्तम्याश्रयणात्। न चैवमध्यैष्टेति न सिध्येत्, तत्राप्युक्तरीत्या पूर्वं सिज्लोपे वृद्धौ सत्यामध्यैतेति रूपप्रसङ्गादिति वाच्यम्, 'वार्णादाङ्गं बलीयः' इति पूर्वमेव गुणे कृते सिज्लोपो न प्रवर्तते इति 'आटश्च' इति वृद्धौ कृतायामध्यैष्टेति रूपस्य निर्बाधत्वात्। समार्तेत्यत्र तु 'उश्च' इति कित्त्वेन गुणाप्रवृत्त्या पूर्वमेव सिज्लोपे पश्चाद् 'आटश्च' इति वृद्धिरिति वैषम्यमित्याहुः। अन्ये तु सिज्लोपानन्तरं यत्रैकादेशः प्रसज्यते तत्रैव सिज्लोपः सिद्धो यथा अग्रहीदिति। न चात्र तादृशो विषयोऽस्ति। किं च 'वार्णादाङ्गं बलीयः' इति पूर्वमेव गुणे कृते इत्यादि यदुक्तं तदसत्, समानाश्रये हि वार्णादाङ्गं बलीयः। अन्यथा द्यौरिवा-

वहति भारम्। नदी वहति, स्यन्दते इत्यर्थः। जीवति। नृत्यति। प्रसिद्धेर्यथा–मेघो वर्षति। कर्मणोऽविवक्षातो यथा–'हितान्न यः संशृणुते स किंप्रभुः'। 'उपसर्गादस्यत्यूह्योर्वेति वाच्यम्' (वा १२०)। अकर्मकाद् इति निवृत्तम्। बन्धं निरस्यति, निरस्यते। समूहति, समूहते। २७०२ उपसर्गाद्ध्रस्व ऊहतेः। (७-४-२३) यादौ क्ङिति। ब्रह्म समुह्यात्। अग्निं समुह्य। २७०३ निसमुपविभ्यो ह्वः। (१-३-३०) निह्वयते। २७०४ स्पर्धायामाङः। (१-३-३१) कृष्णश्चाणूरमाह्वयते। स्पर्धायां किम्–पुत्रमाह्वयति। २७०५ गन्धनावक्षेपणसेवनसाहसिक्यप्रतियत्नप्रकथनोपयोगेषु कृञः। (१-३-३२) गन्धनं हिंसा। उत्कुरुते। सूचयतीत्यर्थः। सूचनं हि प्राणवियोगा-

---

अविवक्षात इति चत्वारि वाक्यानि। अकर्मिका क्रियेति सर्वत्रान्वेति। कर्मण इति तु द्वितीयादिषु वाक्येष्वन्वेति। **वहति भारमिति**। प्रापयतीत्यर्थः। अत्र सकर्मकत्वमिति भावः। अस्यार्थान्तरे क्वचिदकर्मकत्वमुदाहरति **नदी वहतीति**। **स्यन्दते इति**। प्रस्रवतीत्यर्थः। धात्वर्थोपसंग्रहे उदाहरति **जीवतीति**। **नृत्यतीति**। जीवेः प्राणधारणमर्थः। नृतेस्त्वङ्गविक्षेपः। उभयत्रापि कर्मणो धात्वर्थान्तर्भावान्न सकर्मकत्वमिति 'सुप आत्मनः–' इति सूत्रे भाष्ये स्पष्टम्। **मेघो वर्षतीति**। वर्षणकर्मणो जलस्य प्रसिद्धत्वादकर्मकत्वम्। **हितान्न य इति**। हितात्पुरुषाद् यो न संशृणुते–स्वहितं न मन्यते स किंप्रभुः, कुत्सित इत्यर्थः। अत्र स्वहितस्य वस्तुतः कर्मत्वेऽपि तदविवक्षया अकर्मकत्वमिति भावः। एवं चास्मिन्नकर्मकाधिकारे हनिगम्यादीनां सतोऽपि कर्मणः अविवक्षया अकर्मकत्वं सिद्धमिति बोध्यम्। अकर्मकत्वनिर्णयोऽयं 'लः कर्मणि–' इत्यादौ उपयुज्यते। **उपसर्गादस्यत्यूह्योर्वेति**। आत्मनेपदमिति शेषः। **निवृत्तमिति**। सोपसर्गयोरस्यत्यूह्योः सकर्मकत्वनियमादिति भावः। **उपसर्गाद् ह्रस्व ऊहतेः**। यादौ क्ङिति इति शेषपूरणम्, 'अयङ् यि क्ङिति' इत्यतः तदनुवृत्तेरिति भावः। **ब्रह्म समुह्यादिति**। ऊह वितर्के, सम्यग्विचारयेदित्यर्थः। अत्र आशीर्लिङि यासुटः क्त्त्वेन ऊकारस्य ह्रस्वः। **अग्निं समुह्येति**। परितस्संमृज्येत्यर्थः। क्त्वादेशस्य ल्यपः कित्त्वमिति भावः। **निसमुपवि**। ह्वेञः कृतात्त्वस्य ह्व इति पञ्चम्यन्तम्। **निह्वयते इति**। संह्वयते। उपह्वयते। विह्वयते। अकर्त्रभिप्रायार्थमिदम्। **स्पर्धायामाङः**। आङ्पूर्वकात् स्पर्धाविषयकाद् ह्वेञ आत्मनेपदमित्यर्थः। **कृष्णश्चा-**

चरति यवतीत्यत्र यण् न स्यात् किं तु 'पुगन्त–' इति गुण एव स्यात्। तथा च समार्ष्टेत्येव वक्तव्ये समार्तेति लेखकप्रमाद इत्याहुः। **गन्धनं हिंसेति**। गन्ध

नुकूलत्वाद्धिंसैव । अत्र चेष्टया भर्त्सनम् । श्येनो वर्तिकामुदाकुरुते, भर्त्सयतीत्यर्थः । हरिमुपकुरुते, सेवते । परदारान्प्रकुरुते, तेषु सहसा प्रवर्तते । एधोदकस्योपस्कुरुते, गुणमाधत्ते । गाथाः प्रकुरुते, प्रकथयति । शतं प्रकुरुते, धर्मार्थं विनियुङ्क्ते । एषु किम् कटं करोति । २७०६ अधेः प्रसहने । (१-३-३३) प्रसहनं क्षमाभिभवश्च, षह मर्षणेऽभिभवे च इति पाठात् । शत्रुमधिकुरुते, क्षमते इत्यर्थः । अभिभवतीति वा । २७०७ वेः शब्दकर्मणः । (१-३-३४) स्वरान्विकुरुते, उच्चारयतीत्यर्थः । शब्दकर्मणः किम्-चित्तं विकरोति कामः ।

गुरुमाह्वयते इति । स्पर्धार्थमाकारयतीत्यर्थः । गन्धनावक्षेपण ! आत्मनेपदम् अकर्त्रभिप्रायेऽपीति शेषः । गन्धनं हिंसेति । गन्ध अर्दने । अर्द हिंसायामित्युक्तेरिति भावः । सूचनमिति । परदोषमाविष्करोतीत्यर्थः । नन्वेवं सति कथमस्य गन्धने वृत्तिः ? हिंसाया असत्वादित्यत आह सूचनं हीति । श्येनो वर्तिकामिति । वर्तिका शकुनिविशेषः । साहसिक्ये उदाहरति परदारान् प्रकुरुते इति । साहसप्रवृत्तिविषयीकरोतीत्यर्थः । सहसा वर्तते साहसिकः, 'ओजस्सहोऽम्भसा वर्तते' इति ठक् । तस्य कर्म असमीक्ष्यकरणं साहसिक्यम् । तदाह तेषु सहसा प्रवर्तत इति । फलितार्थकथनमिदम्, साहसप्रवृत्तिमात्रार्थकत्वे द्वितीयानुपपत्तेः । अतः साहसप्रवृत्तिविषयीकरणपर्यन्तानुधावनमिति बोध्यम् । प्रतियत्ने उदाहरति एधोदकस्योपस्कुरुते इति । एधशब्दः अदन्तः 'अवोदैधौद्मप्रश्रथहिमश्रथाः' इति सूत्रे निपातितः । एधाश्च उदकं चेति समाहारद्वन्द्वः । यद्वा एधश्शब्दः सकारान्तो नपुंसकलिङ्गः । एधश्च दकं चेति विग्रहः । दकशब्द उदकवाची । 'प्रोक्तं प्राज्ञैर्भुवनममृतं जीवनीयं दकं च' इति हलायुधः । 'काष्ठं दार्विन्धनं त्वेध इध्ममेधः समित् स्त्रियाम्' इत्यमरः । प्रतियत्नो गुणाधानमित्यभिप्रेत्याह गुणमाधत्ते इति । काष्ठस्य शोषणादिगुणाधानम् । दकस्य तु गन्धद्रव्यसंपर्कजनितगन्धाधानम् । अधेः प्रसहने । अधेः परस्मात् कृञः प्रसहनेऽर्थे आत्मनेपदमित्यर्थः । वेः शब्दकर्मणः । शब्दः कर्मकारकं यस्य तस्मात् कृञो

अर्दने । अर्द हिंसायामित्यनयोश्चुरादौ पाठादिति भावः । सहसा वर्तते साहसिकः । 'ओजःसहोम्भसा–' इति ठक् । तस्य कर्म साहसिक्यम् । ब्राह्मणादित्वात्ष्यञ् । परदारानित्यादि । तान्वशीकरोतीत्यर्थः । साहसिक्यं न धात्वर्थः । तथा हि सति परदारानिति कर्मणोऽनन्वयः स्यात्, किं तु प्रयोगोपाधिरित्यभिप्रेत्याह तेषु सहसेति । एधोदकस्येति । एधशब्दोऽकारान्तः 'अवोदधौद्म–' इति निपातितः । एधाश्च उदकं च एषां समाहारः । यद्वा एधःशब्दः सकारान्तः । तथा च एधांसि च दकं चेति विग्रहः । दकशब्दोऽप्युदकपर्याय एवेत्यर्थोऽत्र न भिद्यते । उक्तं च हला-

२७०८ अकर्मकाच्च। (१-३-३५) वेः कृञ इत्येव। छात्रा विकुर्वते। विकारं लभन्ते। **२७०९ संमानननोत्सञ्जनाचार्यकरणज्ञानभृतिविगणनव्ययेषु नियः। (१-३-३६)** अत्रोत्सञ्जनज्ञानविगणनव्यया नयतेर्वाच्याः। इतरे प्रयोगोपाधयः। तथा हि शास्त्रे नयते, शास्त्रस्थं सिद्धान्तं शिष्येभ्यः प्रापयतीत्यर्थः। तेन च शिष्यसंमाननं फलितम्। उत्सञ्जने, दण्डमुन्नयते, उत्क्षिपतीत्यर्थः। माणवकमुपनयते, विधिना आत्मसमीपं प्रापयतीत्यर्थः। उपनयनपूर्वकेणाध्यापनेन हि उपनेतरि आचार्यत्वं क्रियते। ज्ञाने तत्त्वं नयते,

---

विपूर्वादात्मनेपदमित्यर्थः। **अकर्मकाच्च। वे कृञ इत्येवेति।** तथा च अकर्मकाद् विपूर्वात् कृञ आत्मनेपदमित्यर्थः विकुर्वते इत्येतद्व्याचष्टे **विकारं लभन्ते इति।** लाभे विकारस्य कर्मत्वेऽपि धात्वर्थोपसंग्रहादकर्मकत्वम्। **संमानननोत्सञ्जन।** एषु गम्येषु णीञ्धातोरात्मनेपदमित्यर्थः। परगामिन्यपि फले आत्मनेपदार्थमिदम्। **इतरे इति।** संमाननाचार्यकरणप्रभृतय इत्यर्थः। **प्रयोगोपाधय इति।** वाच्यत्वाभावेऽपि आर्थिकाः सत्तामात्रेण शब्दप्रयोगे निमित्तभूता इत्यर्थः। आत्मनेपदद्योत्या इति यावत्। तदेवोपपादयितुं प्रतिजानीते **तथा हीति।** संमानने उदाहरति **शास्त्रे नयत इति।** अत्र णीञ् प्रापणार्थकः। सिद्धान्तमित्यध्याहार्यम्। सिद्धान्तं प्रत्यधिकरणत्वात् शास्त्रे इति सप्तमी, तदाह **शास्त्रस्थमिति। तेनेति।** सिद्धान्तप्रापणेनेत्यर्थः। **फलितमिति।** अर्थादिति भावः। **उत्सञ्जने इति।** उदाह्रियते इति शेषः। उत्सञ्जनमुत्क्षेपः। **उत्क्षिपतीत्यर्थ इति।** धातूनामनेकार्थत्वादिति भावः। आचार्यकरणे उदाहरति **माणवकमुपनयते इति।** उपपूर्वो णीञ् समीपप्रापणार्थकः। सामीप्यं च प्रत्यासत्त्या प्रापयित्रपेक्षमेव। तच्च माणवकीयमात्मसमीपप्रापणं वैधमेव विवक्षितम्, पूर्वोत्तराङ्गकलापाम्नानसामर्थ्यात्, तदाह **विधिना आत्मसमीपं प्रापयतीति।** तत्राचार्यकरणस्यार्थिकत्वमुपपादयति **उपनयनपूर्वकेणेति।** 'माणवकमुपनयीत तमध्यापयीत इत्यध्यापनार्थत्वमुपनयनस्यावगतम्, अध्यापनादाचार्यत्वं संपद्यते,

'उपनीय तु यः शिष्यं वेदमध्यापयेद् द्विजः।
सकल्पं सरहस्यं च तमाचार्यं प्रचक्षते॥'

युधे—'प्रोक्तं प्राशुभुवनममृतं जीवनीयं दकं च' इति। **संमानन। उपनयनपूर्वकेणेति।** उपनयनं बटुसंस्कारः। तस्य परगामित्वात्परस्मैपदे प्राप्ते अनेनात्मनेपदं विधीयते। नह्युपनयनमात्रेण आचार्यत्वं भवति, किं तु तत्पूर्वकाध्यापनेनेत्याचार्यकरणस्य प्रयोगोपाधित्वं परंपरया ज्ञेयम्। 'उपनीय ददद्वेदमाचार्यः स उदाहृतः'

निश्चिनोतीत्यर्थः। कर्मकरानुपनयते, भृतिदानेन स्वसमीपं प्रापयतीत्यर्थः। विगणनमृणादेर्निर्यातनम्। करं विनयते, राज्ञे देयं भागं परिशोधयतीत्यर्थः। शतं विनयते, धर्मार्थं विनियुङ्क्ते इत्यर्थः। २७१० कर्तृस्थे चाशरीरे कर्मणि। (१-३-३७) नियः कर्तृस्थे कर्मणि यदात्मनेपदं प्राप्तं तच्छरीरावयवभिन्न एव स्यात्। सूत्रे शरीरशब्देन तदवयवो लक्ष्यते। क्रोधं विनयते, अपगमयति। तत्फलस्य चित्तप्रसादस्य कर्तृगत्वात् 'स्वरितञितः–' (सू २१५८) इत्येव सिद्धे नियमार्थमिदम्। तेनेह न–गडुं विनयति। कथं तर्हि 'विगणय्य नयन्ति पौरुषम्' इति। कर्तृगामित्वाविवक्षायां भविष्यति। २७११ वृत्तिसर्ग-

---

इति स्मरणात्। तथा च आचार्यकरणमुपनयनसाध्यत्वादार्थिकमिति भावः। ज्ञान इति। उदाह्रियते इति शेषः। निश्चिनोतीत्यर्थ इति। नयतिर्निश्चयार्थक इति भावः। भृतौ उदाहरति कर्मकरानुपनयते इति। भृतिः वेतनम्, तदर्थं कर्म करोतीति कर्मकरः। 'कर्मणि भृतौ' इति टप्रत्ययः। कर्मण्युपपदे कृञ्चः स्यात्कर्तरीति तदर्थः। उपपूर्वको णीञ् समीपप्रापणार्थकः। समीपप्रापणं च भृत्यर्थमिति कर्मकरशब्दसमभिव्याहाराद्गम्यते, फलितमाह भृतिदानेनेति। ऋणादेरिति। आदिना करादिसंग्रहः। निर्यातनं प्रत्यर्पणादि। करं विनयत इति। राज्ञे देयो भागः करः, विपूर्वो णीञ् परिशोधनार्थकः, तदाह राज्ञे देयं भागं परिशोधयतीति। परिगणयति दातुमित्यर्थः। व्यये उदाहरति शतं विनयते धर्मार्थमिति। अत्र विपूर्वो णीञ् व्ययार्थकः, तदाह विनियुङ्क्ते इत्यर्थ इति। कर्तृस्थे। निय इति। कर्मकारके कर्तृस्थे सति णीञ्धातोर्यदात्मनेपदं कर्तृगे फले ञित्वात् प्राप्तम्, तत् शरीरावयवभिन्न एव सति कर्मकारके स्यात्। कर्मणः शरीरावयवत्वे तु कर्तृगेऽपि फले परस्मैपदमेवेत्यर्थः। ननु सूत्रे शरीरग्रहणात् कथं शरीरावयवेत्युक्तमित्यत आह सूत्रे इति। शरीरतादात्म्यापन्नस्यैव कर्तृतया शरीरस्य कर्तृस्थत्वं न संभवति। शरीरावयवानां तु समवायेन आधारतया तत्संभवतीति भावः। ननु क्रोधापगमस्य क्रोधविषयशत्रुगतानिष्टपरिहारफलकत्वाद् ञित्त्वेऽप्यात्मनेपदाप्राप्तेस्तद्विध्यर्थत्वात्कथमुक्तनियमार्थत्वमस्य सूत्रस्येत्यत आह तत्फलस्येत्यादि। गडुं विनयतीति। कर्मणो गडोः शरीरावयवत्वान्नात्मनेपदमित्यर्थः। कथं तर्हीति। पौरुषस्य कर्मणः शरीरावयवभिन्नतया आत्मनेपदप्रसङ्गादिति भावः। कर्तृगामित्वेति। कर्तृस्थे कर्मणि नियः कर्तृगे फले ञित्त्वाद् प्राप्तमात्मनेपदं शरीरावयवभिन्न एवेति नियम्यते, न तु विधीयते। अत्र तु फलस्य कर्तृगामित्वं सदपि

इति स्मृतिः। कर्तृस्थे। कर्मणीति। आत्मगामिनि क्रियाफले इत्यर्थः। वृत्ति-

तायनेषु क्रमः। (१-३-३८) वृत्तिरप्रतिबन्धः। ऋचि क्रमते बुद्धिः, न प्रतिहन्यत इत्यर्थः। सर्गे उत्साहः। अध्ययनाय क्रमते, उत्सहते। क्रमन्तेऽस्मिन् शास्त्राणि, स्फीतानि भवन्तीत्यर्थः। २७१२ उपपराभ्याम्। (१-३-३९) वृत्यादिष्वाभ्यामेव क्रमेर्न तूपसर्गान्तरपूर्वात्। उपक्रमते। पराक्रमते। नेह-संक्रामति। २७१३ आङ उद्गमने। (१-३-४०) आक्रमते सूर्यः। उदयते इत्यर्थः। 'ज्योतिरुद्गमने इति वाच्यम्' (वा ९२१)। नेह-आक्रामति धूमो हर्म्यतलात्। २७१४ वेः पादविहरणे। (१-३-४१) साधु विक्रमते वाजी। पादविहरणे किम्-विक्रामति सन्धिः, द्विधा भवति, स्फुटतीत्यर्थः। २७१५ प्रोपाभ्यां समर्थाभ्याम्। (१-३-४२) समर्थौ तुल्यार्थौ, शकन्ध्वादित्वात् पररूपम्। प्रारम्भेऽनयोस्तुल्यार्थता। प्रक्रमते। उपक्रमते। समर्थाभ्यां किम्-प्रक्रामति, गच्छतीत्यर्थः। उपक्रामति, आगच्छतीत्यर्थः। २७१६ अनुपसर्गाद्वा। (१-३-४३) क्रामति, क्रमते। अप्राप्तविभाषेयम्। वृत्त्यादौ तु नित्यमेव। २७१७ अपह्नवे ज्ञः। (१-३-४४)

न विवक्षितम् अतो नात्मनेपदमिति भावः। **वृत्तिसर्ग**। आत्मनेपदमिति शेषः। तायने उदाहरति **क्रमन्तेऽस्मिन्निति**। तायनं वृद्धिः, तदाह **स्फीतानीति**। **उपपराभ्याम्**। वृत्तिसर्गतायनेषु क्रम इत्यनुवर्तते। तेनैव सिद्धे नियमार्थमिदम्, तदाह **आभ्यामेव क्रमेरिति**। आत्मनेपदमिति शेषः। **आङ उद्गमने**। आङः परस्मादुद्गमनवृत्तेः क्रम आत्मनेपदमित्यर्थः। **आक्रमते सूर्य इति**। आङ्पूर्वः क्रमिरुद्गमनार्थकः, तदाह **उदयते इत्यर्थ इति**। उपसर्गवशादिति भावः। **वेः पादविहरणे**। पादविहरणं पादविक्षेपः। तद्वृत्तेर्विपूर्वात् क्रमेरात्मनेपदमित्यर्थः। **साधु विक्रमते वाजीति**। सम्यक्पदानि विक्षिपतीत्यर्थः। **प्रोपाभ्याम्**। क्रम आत्मनेपदमिति शेषः। समौ अर्थौ ययोरिति विग्रह इत्याह **समर्थौ तुल्यार्थाविति**। सवर्णदीर्घमाशङ्क्याह **शकन्ध्वादित्वादिति**। ननु प्रक्रमत इत्यत्र अतिशयितपदविक्षेपार्थप्रतीतेः, उपक्रमते इत्यत्र समीपे पदानि विक्षिपतीति प्रतीतेः कथमनयोस्तुल्यार्थकत्वमित्यत आह **प्रारम्भेऽनयोस्तुल्यार्थतेति**। तथा च आरम्भार्थकाभ्यामिति फलितमिति भावः। **अनुपसर्गाद्वा**। क्रम आत्मनेपदमिति शेषः। **अप्राप्तविभाषेयमिति**। अनुपसर्गात् क्रमेः आत्मनेपदस्य कदाप्यप्राप्ते-

---

सर्ग। तायृ सन्तानपालनयोः। तायनं स्फीतता तदाह **स्फीतानीति**। प्रवृद्धानीत्यर्थः। **वेः पाद**। यद्यपि क्रमेः पादविक्षेप एवार्थस्तथापि धातूनामनेकार्थत्वादेवमुक्तम्। **प्रोपाभ्याम्**। प्रोपाभ्यां प्रारम्भे इत्येव सुवचम्। **उपक्रामतीति**।

शतमपजानीते, अपलपतीत्यर्थः । २७१८ **अकर्मकाच्च** । (१-३-४५) सर्पिषो जानीते, सर्पिषोपायेन प्रवर्तेत इत्यर्थः । २७१९ **संप्रतिभ्यामनाध्याने** । (१-३-४६) शतं संजानीते, अवेक्षते इत्यर्थः । शतं प्रतिजानीते, अङ्गीकरोतीत्यर्थः । अनाध्याने इति योगो विभज्यते । तस्सामर्थ्याद् 'अकर्मकाच्च' (सू २७१८) इति प्राप्तिरपि बाध्यते । मातरं मातुर्वा संजानाति । कर्मणः शेषत्वविवक्षायां षष्ठी । २७२० **भासनोपसंभाषाज्ञानयत्नविमत्युपमन्त्रणेषु**

रिति भावः । **वृत्त्यादाविति** । वृत्तिसर्गतायनेषु तु पूर्वविप्रतिषेधान्नित्यमेवेत्यर्थः । **अपह्नवे ज्ञः** । अपह्नवः अपलापः । तद्वृत्तेर्ज्ञाधातोरात्मनेपदमित्यर्थः । **अकर्मकाच्च** । ज्ञ आत्मनेपदमिति शेषः । **सर्पिषो जानीत इति** । अत्र ज्ञाधातुः प्रवृत्तौ वर्तते 'ज्ञोऽविदर्थस्य करणे' इति तृतीयार्थे षष्ठी, तदाह **सर्पिषोपायेन प्रवर्तेत इति** । 'अनुपसर्गात् ज्ञः' इति वक्ष्यमाणेनैव सिद्धे सोपसर्गार्थमिदम् । सर्पिषोऽनुजानीते । **सम्प्रतिभ्यामनाध्याने** । ज्ञ आत्मनेपदमिति शेषः । **अवेक्षत इत्यर्थ इति** । अकर्मकत्वाभावात् पूर्वेणाप्राप्तिरिति भावः । अनाध्याने किम् ? मातरं संजानाति । आध्यायतीत्यर्थः । उत्कण्ठापूर्वकं स्मरणमाध्यानम् । ननु यदा आध्याने कर्मणः शेषत्वविवक्षया षष्ठीमाश्रित्य मातुः संजानीति इति प्रयुज्यते तदा सम्पूर्वो जानातिरयमकर्मक इति स्थितिः । तत्र 'संप्रतिभ्यामनाध्याने' इत्यात्मनेपदस्याप्रवृत्तावपि 'अकर्मकाच' इति सूत्रेणात्मनेपदं दुर्वारम्, तत्र अनाध्याने इत्यभावात् । संप्रतिभ्यामित्यत्र अनाध्यानग्रहणस्य मातरं संजानातीति सकर्मके चरितार्थत्वादित्यत आह **अनाध्याने इति योगो विभज्यत इति** । ततश्च 'संप्रतिभ्याम्' इत्येको योगः । संप्रतिपूर्वाद् ज्ञ आत्मनेपदमित्यर्थः । 'अनाध्याने' इति योगान्तरम् । अनाध्याने संप्रतिभ्यामात्मनेपदमित्यर्थः । ततः किमित्यत आह **अकर्मकाच्चेति प्राप्तिरपि बाध्यत इति** । ननु अनन्तरस्येति न्यायेन सम्प्रतिभ्यामित्यस्यैव बाधो युक्त इत्यत आह **तस्सामर्थ्यादिति** । एकसूत्रत्वेनैव सिद्धे अनाध्याने इति योगविभागाद्व्यवहितस्यापि बाध इत्यर्थः । ननु मातरं मातुर्वा संजानाति इत्यत्र मातुः कर्मत्वाद् द्वितीयैव युक्तेत्यत आह **कर्मणः शेषत्वविवक्षायां षष्ठीति** । न चैवमपि 'अधीगर्थदयेशां

वृत्त्याद्यर्थेष्वेवोपपराभ्यामिति प्रवृत्तेर्नात्रात्मनेपदं शक्यमिति भावः । **वृत्त्यादौ त्विति** । न च वृत्त्यादिसूत्रं सोपसर्गे चरितार्थमित्यनुपसर्गात्क्रमेर्वृत्त्याद्यर्थेऽपि विभाषैवास्त्विति वाच्यम्, उपपराभ्यामिति नियमस्योक्तत्वात् । **अकर्मकाच्च** । 'अनुपसर्गाज्ज्ञः' इत्यनेनैव सिद्धे सर्पिषोऽनुजानीते इत्यादिसोपसर्गार्थमिदं सूत्रम् । **भास-**

वदः। (१-३-४७) उपसंभाषोपमन्त्रणे धातोर्वाच्ये, इतरे प्रयोगोपाधयः। शास्त्रे वदते। भासमानो ब्रवीतीत्यर्थः। उपसंभाषा उपसान्त्वनम्। भृत्यानुपवदते। सान्त्वयतीत्यर्थः। ज्ञाने—शास्त्रे वदते। यत्ने—क्षेत्रे वदते। विमतौ—क्षेत्रे विवदन्ते। उपमन्त्रणमुपच्छन्दनम्। उपवदते, प्रार्थयते इत्यर्थः। २७२१ **व्यक्तवाचां समुच्चारणे।** (१-३-४८) मनुष्यादीनां संभूयोच्चारणे वदेरात्मनेपदं स्यात्। संप्रवदन्ते ब्राह्मणाः। नेह—संप्रवदन्ति खगाः। २७२२ **अनोरकर्मकात्।** (१-३-४९) व्यक्तवाग्विषयादनुपूर्वादकर्मकाद्वदेरात्मनेपदं स्यात्। अनुवदते कठः कलापस्य। अकर्मकात् किम्—उक्तमनुवदति। व्यक्तवाचां किम्—अनुवदति वीणा। २७२३ **विभाषा विप्रलापे।** (१-३-५०)

कर्मणि' इति षष्ठ्येव स्यान्न तु द्वितीयेति वाच्यम्, तत्र शेष इत्यनुवर्त्य कर्मणः शेषत्वविवक्षायां षष्ठी, कर्मत्वविवक्षायां तु द्वितीयेत्यभ्युपगमात्। न चैवं सति 'षष्ठी शेषे' इत्यनेनैव सिद्धत्वाद् 'अधीगर्थ—' इति व्यर्थमिति वाच्यम्, मातुः स्मरणमित्यादौ शेषषष्ठ्याः समासाभावार्थत्वादिति कारकाधिकारे प्रपञ्चितम्। **भासनोपसंभाषा।** आत्मनेपदमिति शेषः। **इतरे इति।** भासनज्ञानादय इत्यर्थः। **प्रयोगोपाधय इति।** इदं 'सम्माननोत्सञ्जन—' इत्यत्र व्याख्यातं प्राक्। भासनं तु तत्तदाक्षेपेषु समाधानाय नवनवयुक्त्युल्लेखः। **शास्त्रे वदते इति।** विषयसप्तम्येषा। **भासमान इति।** नवनवयुक्तीरुल्लिखतीत्यर्थः। शास्त्रे वदते इति विषयसप्तमी, व्यवहरतीत्यर्थः। व्यवहारश्च ज्ञानं विना न संभवतीति ज्ञानमार्थिकम्। ज्ञात्वा व्यवहरतीति फलितम्। **क्षेत्रे विवदन्त इति।** विरुद्धं व्यवहरन्तीत्यर्थः। विरुद्धव्यवहारश्च वैमत्यमूलक इति विमतिरार्थिकी। **उपवदते इति।** उपपूर्वस्य वदेः प्रार्थनमर्थः, तदाह **प्रार्थयते इत्यर्थ इति। व्यक्तवाचाम्।** व्यक्ताः अउकारभेदेन स्पष्टोच्चारिता वाचः शब्दाः येषामिति विग्रहः। समित्येकीभावे, तदाह **मनुष्यादीनामिति। संप्रवदन्ते ब्राह्मणा इति।** संभूयोच्चारयन्तीत्यर्थः। **अनोरकर्मकात्।** व्यक्तवाचामित्यनुवृत्तं विषयषष्ठ्यन्तमाश्रीयते। समुच्चारणे इति निवृत्तम्, तदाह **व्यक्तवाग्विषयादिति।** मनुष्यकर्तृकादित्यर्थः। **अनुवदते इति।** अनुः सादृश्ये। 'तुल्यार्थैरतुलोपमाभ्याम्—' इति षष्ठी। कठः कलापेन तुल्यं वदतीत्यर्थः। वस्तुतस्तु शेषषष्ठीत्येवोचितम्। 'तुल्यार्थैः—' इत्यत्र अतुलोपमाभ्यामिति पर्युदासेन अनव्ययानामेव तुल्यार्थानां

नोपसंभाषा। एषु किम्, यत्किंचिद्वदति। **अनुवदते कठ इति।** अनुः सादृश्ये। तेन कलापस्येति तुल्यार्थयोगे शेषलक्षणा षष्ठी। **विभाषा विप्रलापे।**

विरुद्धोक्तिरूपे व्यक्तवाचां समुच्चारणे उक्तं वा स्यात्। विप्रवदन्ते, विप्रवदन्ति वा वैद्याः। **२७२४ अवाद् ग्रः। (१-३-५१)** अवगिरते। 'गृणातिस्त्ववपूर्वो न प्रयुज्यत एव' इति भाष्यम्। **२७२५ समः प्रतिज्ञाने। (१-३-५२)** शब्दं नित्यं सङ्गिरते, प्रतिजानीते इत्यर्थः। प्रतिज्ञाने किम्-सङ्गिरति ग्रासम्। **२७२६ उदश्चरः सकर्मकात्। (१-३-५३)** धर्ममुच्चरते। उल्लङ्घ्य गच्छतीत्यर्थः। सकर्मकात् किम्-बाष्पमुच्चरति। उपरिष्टाद्गच्छतीत्यर्थः। **२७२७ समस्तृतीयायुक्तात्। (१-३-५४)** रथेन सञ्चरते। **२७२८ दाणश्च सा चेच्चतुर्थ्यर्थे। (१-३-५५)** सम्पूर्वाद्दाणस्तृतीयान्तेन युक्तादुक्तं स्यात्, सा च तृतीया चेच्चतुर्थ्यर्थे। दास्या संयच्छते। पूर्वसूत्रे समः

ग्रहणात्। अन्यथा चन्द्र इव मुखमित्यादावपि तृतीयाषष्ठ्योरापत्तेरित्यलम्। **विभाषा विप्रलापे इति**। 'व्यक्तवाचां समुच्चारणे' इत्यनुवर्तते। विरुद्धोक्तिर्विप्रलापः, तदाह **विरुद्धोक्तिरूपे इति। अवाद् ग्रः**। आत्मनेपदमिति शेषः। गॄ इत्यस्य ग्र इति पञ्चमी। प्रकृतिवदनुकरणमित्यस्यानित्यत्वाद् 'ऋत इद्धातोः' इति न भवति। तदनित्यत्वे इदमेव मानम्। **अवगिरत इति**। शविकरणोऽयम्। अवगृणातीत्यत्राप्यात्मनेपदमाशङ्क्याह **गृणातिस्त्विति**। एवं च तुदादेरेव ग्रहणमिति भावः। **समः प्रतिज्ञाने**। गिरतेरात्मनेपदमित्यर्थः। प्रतिज्ञानम् अभ्युपगमः। **संगिरति ग्रासमिति**। भक्षयतीत्यर्थः। **उदश्चरः**। उत्पूर्वाचरधातोः सकर्मकादात्मनेपदमित्यर्थः। **समस्तृतीया**। सकर्मकादिति निवृत्तम्। संपूर्वात् तृतीयान्तसमभिव्याहृताच्चरेरात्मनेपदमित्यर्थः। तृतीयायुक्तादिति किम्? रथिकाः संचरन्ति। अत्र यद्यपि रथेनेत्यर्थाद् गम्यते, तथापि तृतीयान्तश्रवणाभावान्नात्मनेपदम्। एतदर्थमेव योगग्रहणम्, अन्यथा तृतीययेत्येवावक्ष्यत्। सकर्मकादप्येतदात्मनेपदं भवति, अविशेषात्, अत एव 'तृतीयायुक्तादिति किम्? उभौ लोकौ संचरसीमं चामुं च लोकम्' इति भाष्यं संगच्छते। **दाणश्च सा**। 'समस्तृतीयायुक्तात्' इत्यनुवर्तते तदाह **संपूर्वादिति। उक्तं स्यादिति**। आत्मनेपदमित्यर्थः। **सा चेदिति**। तच्छब्देन तृतीया परामृश्यते, तदाह **तृतीया चेदिति। दास्या संयच्छते इति**। 'अशिष्टव्यवहारे दाणः प्रयोगे चतुर्थ्यर्थे तृतीया वाच्या' इति तृतीया। ननु रथेन समुदाचरते इत्यत्र 'समस्तृतीयायुक्तात्' इति पूर्वसूत्रस्य न प्रवृत्तिः, आङ व्यवहितत्वेन सम्पूर्वकत्वाभावात्, 'तस्मादित्युत्तरस्य' इति परिभाषया सम इति पञ्चम्या चरेः अव्यवहितपरत्वलाभात्। तथा दास्या संप्रयच्छते इत्यत्रापि 'दाणश्च सा चेत्-' इति कथं प्रवर्तते। प्रशब्देन

इति षष्ठी । तेन सूत्रद्वयमिदं व्यवहितेऽपि प्रवर्तते । रथेन समुदाचरते । दास्या संप्रयच्छते । **२७२९ उपाद्यमः स्वकरणे ।** (१-३-५६) स्वकरणं स्वीकारः । भार्यामुपयच्छते । **२७३० विभाषोपयमने ।** (१-२-१६) यमः सिच्किद्वा स्याद्विवाहे । रामः सीतामुपायत—उपायंस्त वा । उदवोढेत्यर्थः । गन्धनाङ्ग उपयमे तु पूर्वविप्रतिषेधान्नित्यं कित्त्वम् । **२७३१ ज्ञाश्रुस्मृदृशां**

व्यवधानादित्यत आह **पूर्वसूत्रे सम इति षष्ठीति** । तथा च षष्ठ्या पौर्वापर्यमेव गम्यते । न त्वव्यवहितत्वमिति भावः । **तेनेति** । षष्ठ्याश्रयणेनेत्यर्थः । **सूत्रद्वयमिति** । 'समस्तृतीयायुक्तात्' इति पूर्वसूत्रस्थस्य षष्ठ्यन्तस्यैव 'दाणश्च—' इति सूत्रेऽप्यनुवृत्तेरिति भावः । **उपाद्यमः** । आत्मनेपदमिति शेषः । ननु स्वं वस्त्रमुत्पादयतीत्यर्थे वस्त्रमुपयच्छतीत्यत्राप्यात्मनेपदं स्यादित्यत आह **स्वकरणं स्वीकार इति** । अस्वस्य सतः स्वत्वेन परिग्रहः स्वकरणशब्देन विवक्षित इत्यर्थः । च्विप्रत्ययस्तु वैकल्पिकः, 'समर्थानां प्रथमाद्वा' इत्युक्तेरिति भाष्ये स्पष्टम् । **भार्यामुपयच्छते इति** । अन्यदीयां कन्यां भार्यात्वेन परिगृह्णातीत्यर्थः । **विभाषोपयमने** । 'यमो गन्धने' इत्यतो यम इति 'हनः सिच्' इत्यतः सिजिति 'असंयोगात्—' इत्यतः किदिति चानुवर्तते, तदाह **यमः सिच्किद्वा स्याद्विवाहे इति** । उपयमशब्दो विवाहे वर्तते इति भावः । **रामः सीतामुपायतेति** । भार्यात्वेन स्वीकृतवानित्यर्थः । सिचः कित्त्वपक्षे 'अनुदात्तोपदेश—' इति मकारलोपे 'ह्रस्वादङ्गात्' इति सिचो लोपः । **उदवोढेति** । भार्यात्वेन परिग्रह उद्वाहः । **गन्धनाङ्गे उपयमे त्विति** । हिंसापूर्वके विवाहे त्वित्यर्थः, राक्षसविवाहे त्विति यावत् । 'हत्वा भित्त्वा च शीर्षाणि रुदतीं रुदतो हरेत् । स राक्षसो विवाहः' इति स्मृतेः । **नित्यं कित्त्वमिति** 'यमो गन्धने' इति पूर्वसूत्रेणेति शेषः । यदि गन्धनाङ्गकेऽप्युपयमने परत्वादियं विभाषा स्यात् तर्हि एषा प्राप्तविभाषा स्यात् । ततश्च 'न वेति विभाषा' इत्यत्र भाष्ये अप्राप्तविभाषासु अस्याः परिगणनं विरुध्येत । अतः पूर्वविप्रतिषेध आश्रयणीय इति भावः ।

अप्राप्तविभाषा । **स्वकरणं स्वीकार इति** । स्वकरणमित्यत्र च्विर्न भवति, 'समर्थानां प्रथमाद्वा' इति विकल्पात् । स्वकरणशब्देन भार्यास्वीकारो गृह्यते इति वृत्तिकृत् । भट्टिस्तु स्वीकारमात्रेऽपि प्रायुङ्क्त 'उपायंस्त महास्त्राणि' इति । **गन्धनाङ्गे इति** । पूर्वविप्रतिषेधश्च 'नवेति विभाषा' सूत्रे भाष्ये उक्तः । **नित्यं कित्त्वमिति** । 'यमो गन्धने' इति पूर्वसूत्रेणेत्यर्थः । **ज्ञाश्रुस्मृ** । 'अपह्नवे ज्ञः' इत्यादिना ज्ञाधातोः 'अर्तिश्रुदृशिभ्यश्च—' इति श्रुदृशिभ्यां चात्मनेपदे कृते तस्मिन्विषये 'पूर्ववत्सनः' इत्य-

सनः। (१-३-५७) सन्नन्तानामेषां प्राग्वत्। धर्मं जिज्ञासते। शुश्रूषते। सुस्मूर्षते। दिदृक्षते। २७३२ नानोर्ज्ञः। (१-३-५८) पुत्रमनुजिज्ञासति। पूर्वसूत्रस्यैवायं निषेधः। 'अनन्तरस्य–' (प ६२) इति न्यायात्। तेनेह न–सर्पिषोऽनुजिज्ञासते। सर्पिषा प्रवर्तितुमिच्छतीत्यर्थः। 'पूर्ववत्सनः' (सू २७३४) इति तङ्। 'अकर्मकाच्च' (सू २७१८) इति केवलाद्विधानात्। २७३३ प्रत्याङ्भ्यां श्रुवः। (१-३-५९) आभ्यां सन्नन्ताच्छ्रुव उक्तं न स्यात्। प्रतिशुश्रूषति। आशुश्रूषति। कर्मप्रवचनीयात्स्यादेव, देवदत्तं प्रति शुश्रूषते। 'शदेः शितः' (सू २३६२), 'म्रियतेर्लुङ्लिङोश्च' (सू २५३८) व्याख्यातम्। २७३४ पूर्ववत्सनः। (१-३-६२) सनः पूर्वो यो धातुस्तेन तुल्यं सन्नन्तादप्यात्मनेपदं स्यात्। एदिधिषते। शिशयिषते। निविविक्षते। पूर्ववत्

ज्ञाश्रु। प्राग्वदिति। आत्मनेपदमित्यर्थः। यद्यपि 'अपह्नवे ज्ञः, अकर्मकाच्च, सम्प्रतिभ्यामनाध्याने' इति सूत्रैः 'अर्तिश्रुदृशिभ्यश्च' इति वार्तिकेन च ज्ञादिभ्यः आत्मनेपदे कृते 'पूर्ववत्सनः' इत्यात्मनेपदं सिद्धम्, तथाप्यपह्नवाद्यभावेऽप्यात्मनेपदार्थं ज्ञाश्रुदृशीनामिह ग्रहणमिति मत्वोदाहरति धर्मं जिज्ञासते इति। ज्ञातुमिच्छतीत्यर्थः। शुश्रूषते इति। 'अज्झनगमां सनि' इति दीर्घः। 'इको झल्' इति सनः कित्वम्। 'श्र्युकः किति' इति इण्निषेधः। सुस्मूर्षते इति। स्मृधातोः सनि 'अज्झन–' इति दीर्घे 'उदोष्ठ्यपूर्वस्य' इत्युत्वे रपरत्वे 'हलि च' इति दीर्घः। नानोर्ज्ञः। अनुपूर्वाद् ज्ञाधातोः सन्नन्ताद् नात्मनेपदमित्यर्थः। पुत्रमनुजिज्ञासतीति। अनुज्ञातुमिच्छतीत्यर्थः। ननु सर्पिषा प्रवर्तितुमिच्छतीत्यर्थे सर्पिषोऽनुजिज्ञासते इत्यत्रापि 'अपह्नवे ज्ञः, अकर्मकाच्च' इत्यात्मनेपदस्याप्यनेन निषेधे सति सन्नन्तात्परस्मैपदमेव स्यादित्यत आह पूर्वसूत्रस्यैवेति। एवं च सर्पिषोऽनुजिज्ञासते इत्यत्र 'अकर्मकाच्च' इत्यात्मनेपदं निर्बाधमिति भावः। ननु 'अकर्मकाच्च' इति ज्ञाधातोरात्मनेपदे सन्नन्तात्कथमात्मनेपदलाभ इत्यत आह पूर्ववदिति। केवलात् सन्विहीनाद् ज्ञाधातोरात्मनेपदविधानात् सन्नन्तादपि तस्मात् 'पूर्ववत्सनः' इत्यात्मनेपदमित्यर्थः। प्रत्याङ्भ्यां श्रुवः। उक्तं नेति। आत्मनेपदं नेत्यर्थः। प्रत्याङाविहोपसर्गावेव गृह्येते, व्याख्यानात्, तदाह कर्मप्रवचनीयात्स्यादेवेति। आत्मनेपदमिति शेषः। देवदत्तं प्रतीति। 'लक्षणेत्थम्भूत–' इति प्रतिः कर्मप्रवचनीयः। पूर्ववत्सनः। पूर्वेणेव पूर्ववत्। 'तेन तुल्यम्–' इति तृतीयान्ताद्वतिः। पूर्वशब्देन सन्प्रकृतिर्विवक्षिता, तदाह सनः पूर्व इत्यादि। एदिधिषते इति।

नेन सिद्धेऽपि विषयान्तरे सन्नन्तादनेन विधीयत इति ज्ञेयम्। निविविक्षत इति।

किम्-बुभूषति । 'शदेः-' (सू २३६२) इत्यादिसूत्रद्वये 'सनो' 'न' इत्यनु- वर्त्य वाक्यभेदेन व्याख्येयम् । तेनेह न-शिशत्सति । मुमूर्षति । 'प्रास्प्रत्यय- वत्कृञोऽनुप्रयोगस्य' (सू २२४०) एधांचक्रे । २७३५ प्रोपाभ्यां युजेर- यज्ञपात्रेषु । (१-३-६४) प्रयुङ्क्ते । उपयुङ्क्ते । 'स्वराद्यन्तोपसर्गादिति वक्तव्यम्' (वा ९३१) । उद्युङ्क्ते । नियुङ्क्ते । अयज्ञपात्रेषु किम्-द्वन्द्वं न्यञ्चि पात्राणि प्रयुनक्ति । २७३६ समः क्ष्णुवः । (१-३-६५) संक्ष्णुते शस्त्रम् । २७३७ भुजोऽनवने । (१-३-६६) ओदनं भुङ्क्ते । अभ्य-

---

सन्प्रकृतेरेधधातोरात्मनेपदित्वात्तत्प्रकृतिकसन्नन्तादात्मनेपदम् । 'नेर्विशः' इत्यात्मने- पदविधानात्तत्प्रकृतिकसन्नन्तादपि आत्मनेपदम् । ननु 'शदेः शितः' 'म्रियतेर्लुङ्- लिङोश्च' इत्यात्मनेपदविधानात् शिशत्सति मुमूर्षति इत्यत्रापि सन्नन्तादात्मनेपदं स्यादि- त्यत आह **शदेरित्यादीति** । आदिना 'म्रियतेर्लुङ्लिङोश्च' इत्यस्य ग्रहणम् । शदेरित्यादिसूत्रद्वये 'पूर्ववत्सनः' इति 'नानोर्ज्ञः' इत्यतो नेति चानुवर्त्य शदेर्म्रियतेश्च सन्नन्तान्नात्मनेपदमिति व्याख्येयमित्यर्थः । नन्वेवं सति शीयते म्रियते इत्यादावात्मने- पदं न लभ्येतेत्यत आह **वाक्यभेदेनेति** । 'शदेः शितः' 'म्रियतेर्लुङ्लिङोश्च' इति एकं वाक्यम् । शिद्भाविनः शदेरात्मनेपदं स्यात्, मृङो लुङ्लिङ्प्रकृतिभूतात् शित्प्रकृतिभूताच्चात्मनेपदं स्याद् नान्यत्रेत्यर्थः । तेन शीयते म्रियते ममारेत्यादि सिध्यति । सनो नेत्यपरं वाक्यम् । शदेः म्रियतेश्च सन्नन्तान्नात्मनेपदमित्यपरम् । तेन शिशत्सति, मुमूर्षति इत्यादौ नात्मनेपदमित्यर्थः । **प्रोपाभ्याम्** । आत्मनेपदमिति शेषः । **स्वरेति** । स्वरौ अचौ आद्यन्तौ यस्य स स्वराद्यन्तः । तथाभूतोपसर्गात्परस्य एव युजेरात्मनेपदमित्यर्थः । **द्वन्द्वमिति** । द्वन्द्वं द्विशो न्यञ्चि अधोबिलानीत्यर्थः । **समः क्ष्णुवः** । आत्मनेपदम् इति शेषः । 'समो गम्यृच्छिभ्याम्' इत्यत्रैव 'समो गम्यृच्छि- क्ष्णुवः' इति न सूत्रितम्, तथा सति अकर्मकादित्यनुवृत्त्या सकर्मकान्न स्यात् । तत्सू- चयन्नुदाहरति **संक्ष्णुते शस्त्रमिति** । तीक्ष्णीकरोतीत्यर्थः । **भुजोऽनवने** । अवनं रक्षणम् । ततोऽन्यत्र भुजेरात्मनेपदमित्यर्थः । ननु 'भुज पालनाभ्यवहारयोः' इति धातु-

---

'नेर्विशः' इत्यात्मनेपदविधानात्सन्नन्तादपि आत्मनेपदम् । **सनो नेत्यनुवर्त्येति** । 'नानोर्ज्ञः' 'पूर्ववत्सनः' इति सूत्राभ्यामिति शेषः । **समः क्ष्णुवः** । 'समो गम्यृ- च्छिक्ष्णुभ्यः' इति पठनीये पृथगस्य पाठः सकर्मकादपि विधानार्थ इति ध्वनयन्नुदा- हरति **संक्ष्णुते शस्त्रमिति** । **भुजोऽनवने** । अवनं पालनम्, अदने इति वक्तव्ये अनवन इति पर्युदासस्य प्रयोजनद्वयम् । संयोगवद्विप्रयोगस्यापि विशेषावधार- णहेतुत्वाद्रौधादिकस्यैव भुजेर्ग्रहणमित्येकम्, अदनादर्थादर्थान्तरेऽप्युपभोगादौ आत्म-

वहरतीत्यर्थः। 'बुभुजे पृथिवीपालः पृथिवीमेव केवलाम्।' 'वृद्धो जनो दुःख-शतानि भुङ्क्ते'। इह उपभोगो भुजेरर्थः। अनवने किम्-महीं भुनक्ति। २७३८ **णेरणौ यत्कर्म णौ चेत्स कर्ताऽनाध्याने।** (१-३-६७) ण्यन्तादात्मनेपदं स्यादणौ या क्रिया सैव चेण्ण्यन्तेनोच्येत, अणौ यत्कर्मकारकं स चेदणौ

पाठे स्थितम्। तत्र 'बुभुजे पृथिवीपालः पृथिवीम्' इत्यत्र न पालनमर्थः। तथा सति अनवने इति पर्युदासादात्मनेपदायोगात्। नाप्यभ्यवहरणम्, असंभवात्। नहि पृथिव्या अभ्यवहरणं संभवति। तथा 'वृद्धो जनो दुःखशतानि भुङ्क्ते' इत्यपि न युज्यते, दुःखशतानां पालनस्य अभ्यवहरणस्य चासंभवात्, तत्राह **इह उपभोगो भुजेरर्थ इति**। धातूनामनेकार्थकत्वादिति भावः। **महीं भुनक्तीति**। रक्षतीत्यर्थः। अत्र रौधादिकस्यैव 'भुज पालनाभ्यवहारयोः' इत्यस्य ग्रहणम्। न तु 'भुजो कौटिल्ये' इति तौदादिकस्यापीति भाष्यम्। भुजति वासः। कुटिलीभवतीत्यर्थः। **णेरणौ**। इह चत्वार्यवान्तरवाक्यानि। णेरिति प्रथमं वाक्यम्। प्रत्ययग्रहणपरिभाषया णेरिति तदन्तग्रहणम्। आत्मनेपदमित्यधिकृतम्, तदाह **ण्यन्तादात्मनेपदं स्यादिति**। अणौ यत् कर्म णौ चेदिति द्वितीयं वाक्यम्। 'कर्तरि कर्मव्यतिहारे' इतिवत्कर्मशब्दोऽत्र क्रियापरः। यत्तदोर्नित्यसम्बन्धात् तदिति लभ्यते। तथा च अणौ या क्रिया सा ण्यन्ते चेदिति लभ्यते। एवं सति पचति पाचयतीत्यादौ सर्वत्र अणौ क्रियाया ण्यन्ते अवश्यं सत्त्वाद्वाक्यमिदमनर्थकम्। तस्माद् अणौ या क्रिया सैव ण्यन्ते चेदित्येवकारो लभ्यते। ततश्च द्वितीयवाक्यस्य फलितमाह **अणौ या क्रिया सैव चेण्ण्यन्तेनोच्येत इति**। स कर्तेति तृतीयं वाक्यम्। अत्र अणौ यत् कर्म णौ चेदित्यनुवर्तते। कर्मशब्दोऽत्र कारकविशेषपरः। शब्दाधिकाराश्रयणात्, तदेतदाह **अणौ यत्कर्मकारकं स चेदणौ**

नेपदं भवतीति द्वितीयम्, तदाह **बुभुजे पृथिवीपाल इति**। **इहेति**। उपभोग इत्युपलक्षणमस्मसात्करणस्यापि। पृथिवीं बुभुजे, स्वाधीनां चकारेत्यर्थः। भुज पालनाभ्यवहारयोरित्यस्य रुधादेरेव ग्रहणमिति भुजो कौटिल्य इत्यस्मात्तुदादेः परस्मैपदमेव। पाणिं विभुजति। मूलानि विभुजति। **णेरणौ यत्कर्म**। आत्मनेपदमित्यधिक्रियते। इहावान्तरवाक्यानि चत्वारि प्रतीयन्ते। णेरात्मनेपदमित्येकं वाक्यम्। तच्च स्यादित्यन्तेन व्याख्यातम्। अणौ यत्कर्म णौ चेदिति द्वितीयम्। कर्मशब्दः क्रियापरः, 'कर्तरि कर्मव्यतिहारे' इतिवत्। तथा च अणौ या क्रिया सैव ण्यन्ते चेदित्यर्थः। एवं स्थिते फलितमाह **सैव चेद् ण्यन्तेनोच्येतेति**। स कर्तेति तृतीयं वाक्यम्। अणावित्यादि चेच्छब्दान्तमिहानुवर्तते। कर्मशब्दश्चात्र

कर्ता स्यान्न त्वाध्याने । 'णिचश्च' (सू २५६४) इति सिद्धेऽकर्त्रभिप्रायार्थमिदम् । कर्त्रभिप्राये तु 'विभाषोपपदेन-' (सू २७४५) इति विकल्पे 'अणावकर्म-कात्-' (सू २७५४) इति परस्मैपदे च परत्वात्प्राप्ते पूर्वविप्रतिषेधेनेदमेवे-

---

कर्ता स्यादिति । अत्र तच्छब्दस्य विधेयसमर्पककर्तृशब्दानुसारेण पुँल्लिङ्गता ज्ञेया, 'शैत्यं हि यत्सा प्रकृतिर्जलस्य' इतिवत् । अथ 'अनाध्याने' इति चतुर्थं वाक्यं व्याचष्टे न त्वाध्याने इति । आध्यानमुत्कण्ठापूर्वकं स्मरणम् । तत्र नात्मनेपदमिति प्रसज्यप्रतिषेधोऽयमिति मन्यते । वस्तुतस्तु आध्याने आत्मनेपदं नेत्यर्थाश्रयणे भवतीत्यत्र नञोऽन्वितत्वेन असामर्थ्यादाध्यानशब्देन समासासंभवात् पर्युदास एवायम् । 'न त्वाध्याने' इति मूलं तु फलितार्थकथनपरमेव । तथा च आध्यानभिन्नेऽर्थे विद्यमानाद् ण्यन्तादात्मनेपदं स्यादित्येवं प्रथमवाक्य एव आध्याने इत्यस्यान्वयात् त्रीण्येवात्रावान्तरवाक्यानीति युक्तम् । वाक्यत्रयमित्येव च भाष्ये दृश्यते । ननु 'णिचश्च' इति सिद्धे किमर्थमिदं सूत्रमित्यत आह णिचश्चेतीति । परगामिन्यपि फले आत्मनेपदार्थमित्यर्थः । स्यादेतत्, 'विभाषोपपदेन प्रतीयमाने' इति सूत्रं वक्ष्यते । कर्तृगामिनि क्रियाफले यदात्मनेपदं विहितम्, तद् उपपदेन क्रियाफलस्य कर्तृगामित्वे गम्ये वा स्यादिति तदर्थः । स्वं यज्ञं यजति यजते वेत्याद्युदाहरणम । 'णेरणौ-' इत्यस्य तु दर्शयते भव इत्यनुपदमेव उदाहरणं वक्ष्यत इति स्थितिः । तत्र दर्शयते भवः स्वयमेवेत्यत्र फलस्य कर्तृगामित्वविवक्षायां 'णेरणौ-' इति नित्यमात्मनेपदमिष्यते । तत्र परत्वाद् 'विभाषोपपदेन-' इति विकल्पः स्यात्, 'णेरणौ-' इत्यस्य फले आत्मगामित्वगमकोपपदाभावे सावकाशत्वात् । किंच 'अणावकर्मकाच्चित्तवत्कर्तृकात्' इति वक्ष्यते । अण्यन्ते यो धातुरकर्मकः चित्तवत्कर्तृकश्च तस्माद् ण्यन्तात् परस्मैपदं स्यादिति तदर्थः । शेते कृष्णः । तं गोपी शाययतीत्युदाहरणम् । 'णेरणौ-' इत्यस्य तु दर्शयते भव इत्युदाहरणं विषय इति स्थितिः । तत्र लूधातोः लुनाति केदारं देवदत्त इत्यत्र चित्तवत्कर्तृकत्वाद् लूयते केदार इति कर्मकर्तरि, कर्मणः केदारस्य कर्तृत्वेन विवक्षिततया अकर्मकत्वाच्च लावयते केदार इति ण्यन्ताद् 'णेरणौ-' इत्यात्मनेपदं बाधित्वा परत्वाद् 'अणावकर्मकात्-' इति परस्मैपदमेव स्यात् । 'णेरणौ-' इत्यस्य दर्शयते भव इत्यत्र

कारकविशेषपरः, शब्दाधिकाराश्रयणात्तदेतद्व्याचष्टे अणौ यदित्यादिना स्यादित्यन्तेन । अनाध्यान इति वाक्यान्तरं व्याचष्टे न त्विति । आध्यानमुत्कण्ठापूर्वकं स्मरणम् । वस्तुतस्तु पर्युदास एव लाघवादाश्रयणीयः । अस्मिन्पक्षे आध्यानभिन्ने इत्यर्थे सति फलितो न त्वाध्याने इति नेयः । तथा च अत्र वाक्यत्रयमेवेति

ष्यते । कर्तृस्थभावकाः कर्तृस्थक्रियाश्चोदाहरणम् । तथाहि—पश्यन्ति भवं

सावकाशत्वादित्यत आह कर्त्रभिप्राये त्विति । पूर्वविप्रतिषेधेनेति । पूर्वविप्रतिषेधाश्रयणे राजा दर्शयते इति भाष्यप्रयोगो मानम्, अन्यथा तत्र 'अणावकर्मकात्–' इति परस्मैपदापत्तेः । दर्शनविषयो भवतीत्यर्थे पश्यति भव इत्यत्र दृशेरणावकर्मकत्वात् चित्तवत्कर्तृकत्वाच्च । 'विभाषोपपदेन–' इति विकल्पबाधविषये पूर्वविप्रतिषेधाश्रयणे तु व्याख्यानमेव शरणम् । अन्ये तु दर्शयते राजा इति भाष्यप्रयोगः फलस्य परगामित्वविषयो भविष्यति । एवं च कर्तृगामिनि क्रियाफले परत्वाद् 'अणावकर्मकात्–' इत्यस्य प्रवृत्तौ न किंचिद्बाधकमिति पूर्वविप्रतिषेधाश्रयणं चिन्त्यमित्याहुः । तच्चिन्त्यम्, अणावकर्मकादित्यस्य परगामिन्यपि फले परत्वात् प्रवृत्तेर्दुर्वारत्वात् । नहि 'अणावकर्मकात्–'इत्यत्र कर्त्रभिप्राय इत्यस्ति । 'स्वरितञितः कर्त्रभिप्राये–' इत्यस्य बहुव्यवहितत्वादिति शब्दरत्ने प्रपञ्चितम् । ननु दर्शनविषयो भवतीत्यर्थे दर्शयते भव इत्यत्र वस्तुतो दर्शनकर्मीभूतस्यैव भवस्य कर्तृत्वविवक्षायां तस्य 'कर्मवत्कर्मणा–' इति कर्मवद्भावाद् 'भावकर्मणोः' इत्यात्मनेपदसिद्धेः 'णेरणौ–' इति सूत्रं व्यर्थमित्यत आह कर्तृस्थेति । कर्तृस्थो भावो येषां ते कर्तृस्थभावकाः, कर्तृस्था

बोध्यम् । विकल्प इति । परत्वात्प्राप्ते इत्युत्तरेणान्वयः । पूर्वविप्रतिषेधेनेति । 'विभाषोपपदेन–' इत्यस्यावकाशः स्वं यज्ञं यजति, स्वं यज्ञं यजते इत्यादि । णेरणावित्यस्य तु दर्शयते राजेत्यादि । तथा 'अणावकर्मकात्–' इत्यस्य शेते कृष्णस्तं गोपी शाययतीत्यवकाशः । 'णेरणौ–' इत्यस्य तु लावयते केदारः स्वयमेवेति । तत्र हि लूयते केदारः इति तृतीयकक्षायामणावकर्मकत्वादिति भावः । न च पश्यति भव इतिवद् द्वितीयकक्षायां लुनाति केदार इत्येव प्रयोग इति भ्रमितव्यम् । लवनस्य कर्मणस्थक्रियात्वेन 'कर्मवत्कर्मणा–' इति यगात्मनेपदप्रवृत्तेः । नव्यास्तु 'अणावकर्मकात्–' इत्यस्य बाधे दर्शयते राजेति भाष्यप्रयोगो मानम् । तत्र हि निवृत्तप्रेषणपक्षे दृशेरणावकर्मकत्वात् चित्तवत्कर्तृकत्वाच्च परस्मैपदप्राप्तेः । 'विभाषोपपदेन–' इति विकल्पबाधे तु न किंचिन्मानम । किं च 'अणावकर्मकात्–' इत्यस्य बाधेऽपि नास्त्येव प्रमाणम् । पूर्वोक्तभाष्यस्य परगामिनि क्रियाफले चरितार्थत्वात्, तथा च कर्तृगामिनि क्रियाफले परत्वाद् 'अणावकर्मकात्– इत्यस्य प्रवृत्तौ न किंचिद्बाधकमस्तीति पूर्वविप्रतिषेधेनेदमेवेष्यत इत्येतच्चिन्त्यमित्याहुः । वस्तुतस्तु 'णेरणौ–' इति सूत्रस्याचित्तवत्कर्तृकेऽपि लावयते केदार इत्यादौ चरितार्थत्वाद् 'अणावकर्मकात्–' इत्यनेन परगामिनि क्रियाफलेऽपि परत्वात्परस्मैपदे प्राप्ते दर्शयते राजेति भाष्यप्रयोगबलात्पूर्वविप्रतिषेधाभ्युपगमेन 'णेरणौ–' इत्यात्मनेपदप्रवृत्तावपि आत्मार्थे दर्शयते स्वार्थे दर्शयते इत्यादौ

भक्ताः, चाक्षुषज्ञानविषयं कुर्वन्तीत्यर्थः । प्रेरणांशत्यागे पश्यति भवः, विषयो

क्रिया येषां ते कर्तृस्थक्रियाः, एवंविधा धातव इह सूत्रे उदाहरणम् । 'कर्मवत्कर्मणा–' इत्यस्य तु कर्मस्थभावकाः कर्मस्थक्रियाश्चोदाहरणमिति प्रकृतसूत्रे 'कर्मवत्कर्मणा–' इति सूत्रे च भाष्ये स्पष्टम् । अतो विषयभेदात् । 'कर्मवत् कर्मणा–' इत्यनेन 'णेरणौ–' इत्यस्य न गतार्थतेति भावः । अपरिस्पन्दनसाधनसाध्यो धात्वर्थो भावः, यथा दर्शनश्रवणादिः । सपरिस्पन्दनसाधनसाध्यो धात्वर्थः क्रिया, यथा पाकादिः । यद्यपि दर्शने चक्षुरुन्मीलनादिरूपं स्पन्दनमस्ति तथापि तद्भिन्नहस्तपादादिचेष्टैवात्र स्पन्दनमित्यविरोधः । तत्र कर्तृस्थभावकमुदाहरति **पश्यन्ति भवं भक्ता इति** । सकर्मकेषु धातुषु, फलव्यापारयोर्धातुर्वर्तते । यथा पचेर्विक्लित्त्यनुकूलो व्यापारः । तत्र विक्लित्तिः फलम् । तदनुकूलोऽधिश्रयणादिर्व्यापारः । धातूपात्तव्यापाराश्रयः कर्ता देवदत्तादिः । व्यापारव्यधिकरणधातूपात्तफलाश्रयभूतं कर्म । यथा तण्डुलान् पचतीत्यत्र विक्लित्त्याश्रयास्तण्डुला इति स्थितिः । प्रकृते च दृशेश्चाक्षुषज्ञानानुकूलव्यापारार्थकत्वे सकर्मकत्वानुपपत्तिः, फलस्य चाक्षुषज्ञानस्य तदनुकूलप्रयत्नादेश्च समानाधिकरणत्वात् । अतो दृशेश्चाक्षुषज्ञानविषयत्वापत्त्यनुकूलव्यापारोऽर्थः । तत्र ज्ञानविषयत्वापत्तिः फलम् । तदनुकूलः प्रयत्नादिव्यापारो देवदत्तनिष्ठः । एवं च प्रयत्नादिव्यापारव्यधिकरणचाक्षुषज्ञानविषयत्वरूपफलाश्रयो घटादिः कर्मेति युज्यते, तदेतदाह **चाक्षुषज्ञानविषयं कुर्वन्तीत्यर्थ इति** । **प्रेरणेति** । यदा चाक्षुषज्ञानविषयत्वापत्तिरेव दृशेरर्थो विवक्षितः । न तु तदनुकूलव्यापारः कृञ्धातुगम्यः प्रेषणांशः । तदा पश्यति भव इत्यस्य चाक्षुषज्ञानविषयः संपद्यते इत्यर्थः । सौकर्यातिशयविवक्षया अनुकूलव्यापारांशस्य अविवक्षा बोध्या । तथा च चाक्षुषज्ञानविषयत्वाप-

---

परत्वाद् 'विभाषोपपदेन–' इत्यस्य प्रवृत्तौ न किंचिद्बाधकमस्ति । ततोऽपि परत्वाद् 'अणावकर्मकात्–' इति परस्मैपदमेव स्यादिति तद्बाधेन पूर्वविप्रतिषेधे स्वीकृते 'विभाषोपपदेन–' इत्यस्याप्यर्थात्पूर्वविप्रतिषेधेन बाधो जात एवेति चेत्, एवं तर्हि दर्शयते राजेति भाष्यप्रयोगस्य केवले चरितार्थत्वात्सोपपदप्रयोगे 'अणावकर्मकात्–' इति परस्मैपदमेवास्तु । तत्रापि पूर्वविप्रतिषेधेन 'णेरणौ–' इत्यस्य प्रवृत्तौ मानाभावादिति दिक् । 'कर्मवत्कर्मणा–' इत्यनेन गतार्थत्वशङ्कां निरस्यति **कर्तृस्थभावका इति** । अपरिस्पन्दनसाधनसाध्यो धात्वर्थो भावः । सपरिस्पन्दनसाधनसाध्या तु क्रिया । साधनं कारकं तत्साध्यत्वाद्धात्वर्थस्य । ननु नृत्यन्तं भवं पश्यतीत्यत्र दृशेः कर्तृस्थभावकता न स्यात्, किं तु कर्तृस्थक्रियाकतैव स्यात् । न च साधनशब्देन लकारवाच्यं कारकं विवक्षितमिति वाच्यम्, नृत्यन्भवः पश्यतीत्यत्र तद्दोषतादवस्थ्यादिति चेत् ।

भवतीत्यर्थः । ततो हेतुमण्णिच्, दर्शयन्ति भवं भक्ताः, पश्यन्तीत्यर्थः । पुनरर्यर्थस्याविवक्षायां दर्शयते भवः । इह प्रथमतृतीययोरवस्थयोर्द्वितीयचक्षु-

---

त्तेरेव दृश्यर्थत्वात्तदाश्रयस्य भवस्य कर्तृत्वमेव, तदाह **विषयो भवतीत्यर्थ इति।** लक्षणया चाक्षुषज्ञानविषयो भवतीत्यर्थ इत्यर्थः । न चात्र भवस्य वस्तुतो दर्शनकर्मण इह कर्तृत्वात् 'कर्मवत्कर्मणा तुल्यक्रियः' इति कर्मवत्त्वाद्यगादिकमेव स्यान्न तु शबादीति शङ्क्यम्, 'कर्मवत्कर्मणा-' इत्यस्य कर्मस्थभावकेषु कर्मस्थक्रियेषु च प्रवृत्तेः । अतः कर्मकर्तर्यपि शबादिकमेवेति भावः । **तत इति** । कृञ्धातुगम्यं प्रेषणांशं विहाय चाक्षुषज्ञानविषयत्वापत्तिवृत्तेर्दृशेर्हेतुमण्णिजित्यर्थः । **दर्शयन्ति भवं भक्ता इति** । चाक्षुषज्ञानविषयत्वमापादयन्तीति णिजन्तस्य फलितोऽर्थः, तदाह **पश्यन्तीत्यर्थ इति** । चाक्षुषज्ञानविषयं कुर्वन्तीत्यर्थः । **पुनरिति** । चाक्षुषज्ञानविषयत्वमापादयन्तीत्यर्थके दर्शयन्ति भवं भक्ता इत्युक्तोदाहरणे णिजर्थस्य आपादनांशस्य अविवक्षायां प्रकृतसूत्रेणात्मनेपदे सति दर्शयते भव इत्युदाहरणमित्यर्थः । अत्र ण्यन्तस्य प्रेरणारहितेऽर्थे लक्षणा । गङ्गायां घोष इत्यत्र टाप इव णिचः स्थितिः । चुरादेराकृतिगणत्वात् स्वार्थिको णिजित्यन्ये । **इहेति** । अवस्था पदविशेषात्मकावयवसंनिवेशविशेषः । प्रथमा च तृतीया च प्रथमतृतीये । तयोरवस्थयोरिति विग्रहः । 'सर्वनाम्नो वृत्तिमात्रे-' इति प्रथमाशब्दस्य पुंवत्त्वम् । पश्यन्ति भवं भक्ता इति प्रथमावस्था । पदविशेषसंदर्भ इति यावत् । अवस्थैव कक्ष्येति व्यवहरिष्यते मूले । कक्ष्या हि राजधान्यादौ जनविशेषसंघातनिवासात्मिका अनन्तरस्थालप्रापिका । तद्यथा रामायणे—'आ पञ्चमायाः कक्ष्याया नैनं कश्चिदवारयत्' इत्यादि । इदं च प्रथमवाक्यम्, प्रेरणांशत्यागे पश्यति भव इति द्वितीयवाक्यस्य उपपादकम् । चाक्षुषज्ञानविषयत्वापादने दृश्यर्थे प्रेरणांशत्यागस्य प्रेरणाविशिष्टार्थकदृशिघटितप्रथमवाक्याभावे असंभवात् । प्रेरणांशत्यागे पश्यति भव इति द्वितीया कक्ष्या तु, दर्शनविषयत्वापत्तिमात्रार्थकाद्धेतुमण्णिचि दर्शयन्ति भवं भक्ता इति तृतीयवाक्यस्य, पश्यन्ति भवं भक्ता इति प्रथमवाक्यसमानार्थकस्य उपपादिका, चाक्षुषज्ञानविषयत्वापादनानुकूलव्यापारार्थवृत्तेर्दृशेर्हेतुमण्णिचि चाक्षुषज्ञानविषयत्वापत्त्यनु-

---

अत्राहुः—आरोहणादौ सपरिस्पन्द एव देवदत्तादिर्यथा साधनं तथा दर्शनश्रवणादौ न भवति किंतु स्पन्दनरहितोऽपीति नोक्तदोष इति । कर्तृस्थभावकमुदाहरति **पश्यन्तीति । प्रेरणांशेति** । सौकर्यविवक्षयेति भावः । **तत इति** । त्यक्तप्रेरणांशकाद्धातोरित्यर्थः । **पुनरण्यर्थस्येत्यादि** । न चैवं णिजपि गच्छतीति दर्शयते भव इति न सिध्येदिति वाच्यम्, उपायनिवृत्तावप्युपेयानिवर्तनादिति कैयटोक्तेः । एवं

र्थ्योश्च तुल्योऽर्थः। तत्र तृतीयकक्षायां न तङ्। क्रियासाम्येऽप्यणौ कर्मकारकस्य णौ कर्तृत्वाभावात्। चतुर्थ्यां तु तङ्। द्वितीयामादाय क्रियासाम्यात्। प्रथमायां कर्मणो भवस्येह कर्तृत्वाच्च। एवमारोहयते हस्तीत्यप्युदाहरणम्।

कूलव्यापारान्तरस्यापि प्रवेशापत्तेः। तृतीयं वाक्यं त्विदं दर्शयन्तीति, ण्यर्थस्याविवक्षायां दर्शयते भव इति चतुर्थवाक्यस्य दर्शनविषयो भवतीति द्वितीयवाक्यसमानार्थकस्य ण्यन्तघटितस्योपपादकमिति स्पष्टमेव। तथा च प्रथमतृतीययोः कक्षयोः पश्यन्ति भवं भक्ताः, दर्शयन्ति भवं भक्ता इत्यनयोः, तथा पश्यति भवः, दर्शयते भवः इति द्वितीयचतुर्थ्योः कक्षयोश्च तुल्योऽर्थ इत्यर्थः। तत्र प्रथमद्वितीययोः कक्षयोः दृशेर्ण्यन्तत्वाभावादेव तङो न प्रसक्तिरिति मत्वाह **तत्र तृतीयकक्षायां न तङिति**। कुत इत्यत आह **क्रियासाम्येऽपीति**। दर्शयन्ति भवं भक्ता इति तृतीयकक्षायाः, पश्यन्ति भवं भक्ताः, इति प्रथमकक्षासमानार्थकतया अणौ या क्रिया सैव चेण्ण्यन्तेनोच्यतेत्यंशस्य सत्त्वेऽपि प्रथमकक्षायामणौ कर्मकारकस्य भवस्य दर्शयन्ति भवं भक्ता इति तृतीयकक्षायां णौ कर्तृत्वाभावादित्यर्थः। एवं चतुर्थकक्षोपपादिका तृतीयकक्षैषा प्रत्युदाहरणं चेत्युक्तं भवति। अणौ या क्रिया सैव चेण्ण्यन्तेनोच्यतेत्यंशस्य तु अध्यारोपितप्रेरणपक्षे द्वितीयकक्षायां न तङिति फलं वक्ष्यते। चतुर्थकक्षा तु प्रकृतसूत्रस्योदाहरणमित्याह **चतुर्थ्यां तु तङिति**। 'णेरणौ—' इति प्रकृतसूत्रेणेति शेषः। तदेवोपपादयति **द्वितीयामादायेति**। पश्यति भव इति द्वितीयकक्षायां या चाक्षुषज्ञानविषयत्वापत्तिरूपा क्रिया तस्या एव दर्शयते भव इति चतुर्थकक्षायां ण्यन्तदृश्यर्थत्वादित्यर्थः। अनेन अणौ या क्रिया सैव चेण्ण्यन्तेनोच्यतेत्यंश उपपादितः। अथ अणौ यत्कर्मकारकं णौ स चेत्कर्ता स्यादित्यंशमुपपादयति **प्रथमायामिति**। पश्यन्ति भवं भक्ता इति प्रथमकक्षायाम् अण्यन्तदृशिकर्मणो भवस्य दर्शयते भव इति चतुर्थकक्षायां ण्यन्तदृशिकर्तृत्वाच्चेत्यर्थः। अथ कर्तृस्थक्रियधातुमुदाहरति **एवमारोहयते हस्तीत्यप्युदाहरणमिति**।

च स्वार्थ एव णिजिति पर्यवसानादाह **द्वितीयचतुर्थ्योरिति**। **तुल्योऽर्थ इति**। न्यूनाधिकभावरहितः। **तत्र तृतीयेति**। प्रथमाद्वितीययोस्तु ण्यन्तत्वाभावात् तङः प्रसक्तिरेव नास्तीति भावः। **क्रियासाम्येऽपीति**। प्रथमाकक्षया सहेत्यर्थः। **द्वितीयामादायेति**। अणौ या क्रिया सैव चेद् ण्यन्ते इत्यस्य न्यूनाधिकभावव्यवच्छेदपरत्वमभ्युपेत्येदमुक्तम्। यदा त्वाधिक्यव्यवच्छेदमात्रपरत्वमभ्युपगम्यते तदा प्रथमामादाय तत्संभवति। इदानीं कर्तृस्थक्रियाकमुदाहरति **एवमित्यादिना**।

१—'कक्षायाम्' इति क्वचित् पाठः।

आरोहन्ति हस्तिनं हस्तिपकाः, न्यग्भावयन्तीत्यर्थः। तत आरोहति हस्ती, न्यग्भवतीत्यर्थः। ततो णिच् आरोहयन्ति। आरोहन्तीत्यर्थः। तत आरोहयते, न्यग्भवतीत्यर्थः। यद्वा पश्यन्त्यारोहन्तीति प्रथमकक्ष्या प्राग्वत्। ततः कर्मण एव हेतुत्वारोपाण्णिच्। दर्शयति भवः। आरोहयति हस्ती। पश्यत आरोहतश्च प्रेरयतीत्यर्थः। ततो णिज्भ्यां तत्प्रकृतिभ्यां च उपात्तयोर्द्वयोरपि

तत्र प्रथमकक्ष्यामाह **आरोहन्ति हस्तिनं हस्तिपका इति**। हस्तिनं पान्तीति हस्तिपाः। त एव हस्तिपकाः। स्वार्थे कः। उपरिभागाक्रमणानुकूलव्यापारो रुहेरर्थः। तत्र प्रासादमारोहतीत्यादौ उपरिभागाक्रमणानुकूलव्यापारः सोपानगमनादिः। इह तु उच्चस्य हस्तिनो न्यग्भावनमेव उपरिभागाक्रमणानुकूलो व्यापारो विवक्षितः। न्यच्च नीचीकरणम्, तदाह **न्यग्भावयन्तीति**। अत्र उपरिभागाक्रमणानुकूलन्यग्भवनानुकूलोऽङ्कुशपातादिः व्यापारः। उपरिभागाक्रमणानुकूलन्यग्भवनं फलम्। तदाश्रयत्वाद्धस्ती कर्म। तादृशव्यापाराश्रयत्वाद्धस्तिपकाः कर्तारः। अथ द्वितीयकक्ष्यामाह **तत इति**। प्रेरणांशपरित्यागे सति उपरिभागाक्रमणानुकूलन्यग्भवनार्थकाल्लटि आरोहति हस्तीति भवतीत्यर्थः। प्रेषणांशपरित्यागे फलितमाह **न्यग्भवतीत्यर्थ इति**। अथ तृतीयकक्ष्यामाह **ततो णिजिति**। प्रेषणांशं परित्यज्य न्यग्भवनार्थकत्वमाश्रिताद् धातोः प्रेषणविवक्षायां हेतुमण्णिजिति भावः। **आरोहयन्तीति**। हस्तिनं हस्तिपका इति शेषः। प्रेषणांशनिवृत्तौ णिजन्तस्य फलितमर्थमाह **आरोहन्तीत्यर्थ इति**। आक्रमणाय हस्तिनं न्यग्भावयन्तीति यावत्। चतुर्थकक्ष्यामाह **तत इति**। अविवक्षितप्रेषणाद् णयन्तात् प्रकृतसूत्रेणात्मनेपदे आरोहयते इति रूपमित्यर्थः। प्रेषणांशत्यागे सति णयन्तस्य फलितमर्थमाह **न्यग्भवतीत्यर्थ इति**। तदेवं 'निवृत्तप्रेषणाद्धातोः प्राकृतेऽर्थे णिजिष्यते' इति पक्षमाश्रित्योदाहृतम्। इदानीमध्यारोपितप्रेषणपक्षमाश्रित्याह **यद्वेति**। **पश्यन्तीति**। पश्यन्ति भवं भक्ता इति, आरोहन्ति हस्तिनं हस्तिपका इति च, प्रथमकक्ष्या पूर्वव्याख्येयेत्यर्थः। द्वितीयकक्ष्यामाह **ततः कर्मण इति**। दृशेः रुहेश्च प्रथमकक्ष्यायां कर्मीभूतस्य भवस्य हस्तिनश्च प्रयोजककर्तृत्वरूपहेतुत्वारोपाद्धेतुमण्णिजित्यर्थः।

आरोहति हस्तीति। प्रेषणांशत्यागे उदाहरणमिदम्। **ततो णिजिति**। निवृत्तप्रेषणाद्धातोः प्रेषणांशविवक्षायां णिजित्यर्थः। पुनरर्थस्याविवक्षायामुदाहरणमाह **आरोहयत इति**। एवं निवृत्तप्रेषणपक्षमुपपाद्येदानीमध्यारोपितप्रेषणपक्षमाह **यद्वेति**। **हेतुत्वारोपादिति**। प्रयोजककर्तृत्वारोपादित्यर्थः। अत्रापि सौकर्यविवक्षैव बीजम्। **पश्यत इति**। पश्यतो भक्तान् आरोहतो हस्तिपकानिति कर्मे-

प्रेषणयोस्त्यागे दर्शयते आरोहयते इत्युदाहरणम्। अर्थः प्राग्वत्। अस्मिन्पक्षे द्वितीयकक्षायां न तङ्। समानक्रियात्वाभावाण्णिजर्थस्याधिक्यात्। अनाध्याने

दर्शयति भव इति भक्तानिति शेषः, तदाह पश्यत आरोहतश्च प्रेरयतीत्यर्थ इति। चाक्षुषज्ञानविषयत्वमापादयतो भक्तान् भवः प्रेरयति, न्यग्भावयतो हस्तिपान् हस्ती प्रेरयतीत्यर्थः। उभयत्र हेतुमण्णिच्। तत्र प्रकृतिभ्यां दृशिरुहिभ्यामेकैकं प्रेरणम्। णिचा तु तद्विषयकमेकैकं प्रेरणान्तरं प्रतीयते इति स्थितिः। चतुर्थकक्षामाह ततो णिज्भ्यामिति। हेतुमण्णिज्भ्यां तत्प्रकृतिभूतदृशिरुहिभ्यां च उपात्तयोः प्रेरणयोस्त्यागे सति चाक्षुषज्ञानविषयो भवति भव इति, न्यग्भवति हस्तीति चार्थः पर्यवस्यति तत्र प्रकृतसूत्रेणात्मनेपदे दर्शयते भवः, आरोहयते हस्तीति च सिद्धमित्यर्थः। पश्यन्ति भवं भक्ता इति, आरोहन्ति हस्तिनं हस्तिपका इति च प्रथमकक्षायां कर्मणो भवस्य हस्तिनश्च तृतीयकक्षायां कर्तृत्वात् प्रथमकक्षायां अणौ या क्रिया तस्या एवात्र तृतीयकक्षायां सत्त्वाच्चेति तृतीयकक्षायामुदाहरणे सूत्रप्रवृत्तिरुपपादिता। न च प्रथमकक्षायां चाक्षुषज्ञानविषयं कुर्वन्तीति न्यग्भावयन्तीति प्रकृत्युपात्तस्य प्रेषणांशस्य तृतीयकक्षायां त्यागादणौ या क्रिया सैव णेरणयन्तेनोच्यतेत्यंशस्य कथं प्रवृत्तिरिति वाच्यम्, सैव णेरणयन्तेनेत्यत्र आधिक्यमात्रं व्यवच्छिद्यते, न तु न्यूनत्वमपि इत्यदोषात्। ननु द्वितीयकक्षायामेव कुतो न तङित्यत आह अस्मिन्पक्षे द्वितीयेति। कुत इत्यत आह समानक्रियात्वाभावादिति। द्वितीयकक्षायां अणौ या क्रिया सैव णेरणयन्तेनोच्यतेत्यंशस्याभावादिति यावत्। तदेवोपपादयति णिजर्थस्येति। णेरिति किम्? पश्यत्यारोहतीति निवृत्तप्रेषणान्मा-

---

भूदित्यर्थः। आधिक्यादिति। अस्मिन्पक्षे णौ चेत्सा क्रियेत्यनेन आधिक्यमात्रं व्यवच्छिद्यते न तु न्यूनत्वमपि। अन्यथा तृतीयकक्षायामपि तङ् न स्यात्। प्रकृत्युपात्तप्रेषणांशस्य त्यागेन न्यूनतायाः सत्त्वादिति भावः। णेरिति किम्, पश्यत्यारोहतीत्यादिनिवृत्तप्रेषणान्माभूत्। न च णौ चेदिति श्रुतत्वाद् णयन्तादेव स्यादिति वाच्यम्, अणावित्यस्यापि श्रुतत्वात्। तस्याभिमयोगार्थमवश्यकर्तव्यस्य स्पष्टार्थमिहैव कर्तुमौचित्याच्च। अणौ या क्रिया सैव णेरणयन्ते इति किम्, दर्शयति भवः। आरोहयति हस्तीत्यध्यारोपितप्रेषणपक्षे द्वितीयकक्षायां माभूत्। कथं तर्हि 'करेणुरारोहयते निषादिनम्' इति माघप्रयोगः, 'स सन्ततं दर्शयते गतस्मयः कृताधिपत्यामिव साधुबन्धुताम्' इति भारविप्रयोगश्च संगच्छत इति चेत्। अत्राहुः—'णिचश्च' इत्यनेन क्रियाफले कर्तृगामिनि तङ् न तु प्रकृतसूत्रेणेति। अणौ यत्कर्म कारकं णौ चेत्स कर्तेति किम्, दर्शयन्ति भवमिति निवृत्तप्रेषणपक्षे तृतीयकक्षायां माभूत्।

किम्-स्मरति वनगुल्मं कोकिलः । स्मरयति वनगुल्मः । उत्कण्ठापूर्वकस्मृतौ

भूत्। **स्मरति वनगुल्मं कोकिल इति** । स्मृतिविषयत्वमापादयतीत्यर्थः । पक्षद्वयेऽप्येषा प्रथमकक्ष्या द्वितीयतृतीयकक्ष्ययोरप्युपलक्षणम् । तत्र निवृत्तप्रेषणपक्षे स्मरति वनगुल्म इति द्वितीयकक्ष्या । स्मृतिविषयो भवतीत्यर्थः । स्मरयति वनगुल्मं कोकिल इति तृतीयकक्ष्या । स्मृतिविषयत्वमापादयतीत्यर्थः । अध्यारोपितप्रेषणपक्षे तु स्मरयति वनगुल्मः कोकिलमिति द्वितीयकक्ष्या। स्मरन्तं प्रेरयतीत्यर्थः । **स्मरयति वनगुल्म इति** । प्रत्युदाहरणमिदम् । निवृत्तप्रेषणपक्षे चतुर्थकक्ष्यैषा । अध्या-

---

स्मरति वनगुल्ममिति । पक्षद्वयेऽपीयं प्रथमकक्षा । **स्मरयति वनगुल्म इति** । निवृत्तप्रेषणपक्षे चतुर्थकक्षेयम् । अध्यारोपितपक्षे तु तृतीयकक्षेति ज्ञेयम् । केचित्तु एतत्सूत्रस्थे भाष्ये दर्शयते भृत्यान् राजेत्युदाहरणम्, स्मरयत्येनं वनगुल्म इति प्रत्युदाहरणं च दृश्यते । ततश्च अध्यारोपितप्रेषणपक्षे द्वितीयकक्षायामेवानेनात्मनेपदं भवति न तु तृतीयकक्षायामिति प्रतीयते । तथा च कर्मपदमावर्त्य तस्य क्रियावाचित्वं स्वीकृत्याणौ या क्रिया सैव चेण्ण्यन्तेनोच्येतेति वाक्यान्तराभ्युपगमेऽप्येवकारेणाधिक्यं न व्यवच्छिद्यते किं तु न्यूनतैवेत्यस्मादेव भाष्यादवगम्यते । एवं च दर्शयते भव आरोहयते हस्तीति कर्मप्रयोगरहितं मूलग्रन्थस्योदाहरणम्, स्मरयति वनगुल्म इति प्रत्युदाहरणं च भाष्यविरुद्धमेवेत्याहुः । अन्यैस्त्वविवक्षितमिह कर्मेत्युक्त्वाऽत्र मूलग्रन्थाविरोधेनेव भाष्यग्रन्थः समर्थितः । तेषामयमाशयः—गभीरायां नद्यां घोष इत्यत्र गभीराभिन्ननद्यामिति गभीरनदीपदार्थयोरभेदबोधानन्तरं तीरलक्षणायां तीरस्य गभीरत्वाभावाद्यद्यस्तु गभीरत्वेऽप्येकदेशान्वयासंभवाच्च अनर्थकमपि गभीरायामिति पदं प्राथमिकबोधमादाय सार्थकं तद्वदिहापि अध्यारोपितप्रेषणपक्षे द्वितीयकक्षायां कर्मण्यन्वितम्, ततो णिजर्थस्येव कर्मणोऽपि त्यागे णिचः कर्मपदस्य च प्राथमिकबोधमादाय सार्थक्यम् । स्वबोध्यसंबन्धो लक्षणेत्यभ्युपगमात् । विशिष्टवाक्यार्थस्य चेह बोध्यत्वेन तत्संबन्धस्य बोधकतारूपस्य वाक्ये सत्त्वात् । एवैवार्थवादैः प्राशस्त्यलक्षणया गतिः । अन्यथा 'वायव्यं श्वेतमालभेत भूतिकामः' इत्यादिविधिवाक्यस्य योऽर्थवादः 'वायुर्वै क्षेपिष्ठा देवता, वायुमेव स्वेन भागधेयेनोपधावति' 'स एवैनं भूतिं गमयति' इत्यादिस्तत्र वायुमेव स्वेन भागधेयेन स एवैनमित्यादिरूपस्य विभक्तिभेदेन प्रयोगस्य वैयर्थ्यं स्यादिति । नन्वेतत्सूत्रस्योदाहरणं च यथाश्रुतभाष्यानुसारेण सकर्मकमेवास्तु किमनेन विद्यमानकर्मणोऽविवक्षितत्वोपपादनक्लेशेनेति चेत् । मैवम् । निवृत्तप्रेषणपक्षे दर्शयते भव इत्याद्युदाहरणस्य प्रत्युदाहरणस्य च कर्मरहितस्य स्वीकर्तव्यतया तदेकरूप्यस्यास्मिन्नपि पक्षे अकर्मकोदाहरणप्रत्युदाहरणयोः

विषयो भवतीत्यर्थः । 'भीस्म्योर्हेतुभये' (सू २५६१) । व्याख्यातम् । **२७३६ गृधिवञ्च्योः प्रलम्भने ।** (१-३-६९) प्रतारणेऽर्थे ण्यन्ताभ्यामाभ्यां प्राग्वत् । माणवकं गर्धयते, वञ्चयते वा । प्रलम्भने किम्—श्वानं गर्धयति । अभिकाङ्क्षामस्योत्पादयतीत्यर्थः । अहिं वञ्चयते । वर्जयतीत्यर्थः । 'लियः संमाननशालीनीकरणयोश्च' (सू २५६२) । व्याख्यातम् । **२७४० मिथ्योपपदात्कृञोऽभ्यासे ।** (१-३-७१) णेः इत्येव । पदं मिथ्या कारयते । स्वरादिदुष्टमसकृदुच्चारयतीत्यर्थः । मिथ्योपपदात् किम्—पदं सुष्ठु

रोपितप्रेषणपक्षे तु तृतीयकक्ष्येति बोध्यम् । 'स्मृ आध्याने' इति घटादिकत्वेन मित्त्वाद्ध्रस्वः । विस्तरस्त्वत्र प्रौढमनोरमाशब्दरत्नशब्देन्दुशेखरेष्वनुसंधेयः । **गृधिवञ्च्योः** । प्रलम्भनं प्रतारणमिति मत्वाह **प्रतारणेऽर्थे इति** । **प्राग्वदिति** । आत्मनेपदमित्यर्थः । धातूनामनेकार्थकत्वादनयोः प्रतारणे वृत्तिः । **मिथ्योपपदात्** । अभ्यासवृत्तेर्मिथ्याशब्दोपपदकात् कृञ आत्मनेपदमित्यर्थः ।

सिद्धये कर्मणोऽविवक्षितत्वव्याख्याया उचितत्वात् । किं च 'कर्मवत्कर्मणा—' इत्यनेनैव सिद्धे कर्तृस्थभावक्रियार्थं सूत्रमिति भाष्यग्रन्थस्वारस्यादप्यकर्मकोदाहरणं प्रत्युदाहरणं चायाति । न च 'कर्मवत्कर्मणा—' इति सूत्रे तुल्यशब्देनापि कर्मस्थक्रियातो न्यूनतैव व्यवच्छिद्यते न त्वाधिक्यमिति स्वीकृते नास्ति भाष्यग्रन्थस्वारस्यभङ्ग इति वाच्यम्, तथा हि सति कर्मवत्कर्मस्थक्रिय इत्युक्तेऽपि कर्मस्था क्रिया यस्य कर्तुः स कर्ता कर्मवदित्यर्थलाभात् तत्समीहितसिद्धौ कर्मणा तुल्यक्रिय इत्यस्य वैयर्थ्यापत्तेः । द्वितीयकक्षायां भवे हस्तिनि च विषयत्वापादनविषयकप्रेरणायाः स्वयम्भवनविषयकप्रेरणायाश्च क्रमेण सत्त्वेऽपि विषयत्वापत्तिरूपाया स्वयम्भवनरूपायाश्च कर्मस्थक्रियायाः सत्त्वात् । यदि तु 'कर्मणा तुल्यक्रियः—' इत्येतत्सार्थक्याय तुल्यशब्देनात्र न्यूनाधिकव्यवच्छेदः क्रियत इत्युच्यते, तदा 'कर्मवत्कर्मणा—' इति सूत्रस्य द्वितीयकक्षायामप्रवृत्तेः कर्मवत्कर्मणेत्यनेनैव सिद्धे इत्यादिभाष्यग्रन्थस्वारस्यभङ्गो भवत्येव । ततश्च अध्यारोपितप्रेषणपक्षे तृतीयकक्षायामेवोदाहरणम्, न तु द्वितीयकक्षायामित्यभ्युपगन्तव्यम् । एतेनाध्यारोपितप्रेषणपक्षे गौ नेत्सा क्रियेत्यनेनाधिक्यमात्रं व्यवच्छिद्यते न्यूनत्वं नेत्यत्र विनिगमनाभावान्न्यूनत्वव्यवच्छेद एव स्वीकृते, द्वितीयकक्षायां तद् दुर्वारं इति न्यूनाधिकव्यवच्छेद एव आवश्यत्वेन कक्षाचतुष्टयपक्ष एव साधीयानिति वदन्तः परास्ताः । दर्शयते भृत्यान् राजेति भाष्योदाहरणबलेन अध्यारोपितपक्षस्यैव प्रबलत्वादिति दिक् । **गृधिवञ्च्योः प्रलम्भने ।** अकर्त्रभिप्रायार्थ आरम्भः । **मिथ्योपपदात्कृञोऽभ्यासे ।** इह करोतिरुच्चारणार्थत्वादकर्मकः । उच्चारणं निरस-

कारयति। अन्यार्थे किम् सक्तूरदं मिथ्या कारयति। 'स्वरितञितः कर्त्रभिप्राये क्रियाफले (सू २१५८)। यजते। सुनुते। कर्त्रभिप्राये किम्—ऋत्विजो यजन्ति। सुन्वन्ति। २७४१ अपाद्वदः। (१-३-७३) न्याय-मपवदते। कर्त्रभिप्राये इत्येव, अपवदति। 'णिचश्च' (सू २५६४)। कारयते। २७४२ समुदाङ्भ्यो यमोऽग्रन्थे। (१-३-७५) अग्रन्थे इति च्छेदः। व्रीहीन् संयच्छते। भारमुद्यच्छते। वस्त्रमायच्छते। अग्रन्थे किम्—उद्यच्छति वेदम्, अधिगन्तुमुद्यमं करोतीत्यर्थः। कर्त्रभिप्राये इत्येव। व्रीहीन् संयच्छति। २७४३ अनुपसर्गाज्ज्ञः। (१-३-७६) गां जानीते। अनुपसर्गात् किम्—'स्वर्गं लोकं न प्रजानाति'। कथं तर्हि भट्टिः—'इत्थं नृपः पूर्वमवालुलोचे ततोऽनुजज्ञे गमनं सुतस्य' इति कर्मणि लिट्। नृपेणेति विपरिणामः। २७४४ विभाषोपपदेन प्रतीयमाने। (१-३-७७) स्वरि-

---

इत ऊर्ध्वं योरिति निवृत्तम्। अपाद्वदः। अपपूर्वाद्वदधातोरात्मनेपदमित्यर्थः। न्यायमपवदते इति। वदनेन निरस्यतीत्यर्थः। 'किमिह वचनं न कुर्यान्नास्ति वचनस्यातिभारः' इति न्यायात्। समुदाङ्भ्यो। सम्, उत्, आङ् एतत्पूर्वाद् अग्रन्थविषयकाद् यमेरात्मनेपदमित्यर्थः। व्रीहीन् संयच्छते इति। संगृह्णातीत्यर्थः। भारमुद्यच्छते इति। उद्गृह्णातीत्यर्थः। वस्त्रमायच्छते इति। कट्यादौ निबध्नातीत्यर्थः। कर्त्रभिप्राये इत्येवेति। व्रीहीन् संयच्छतीति। परार्थं संगृह्णातीत्यर्थः। 'आङो यमहनः' इत्येव सिद्धे आङ्ग्रहणं सकर्मकार्थम्, तस्य अकर्मकादेव प्रवृत्तेरिति बोध्यम्। अनुपसर्गाज्ज्ञः। अनुपसर्गाद् ज्ञाधातोरात्मनेपदमित्यर्थः। 'अकर्मकाच्च' इत्येव सिद्धे सकर्मकार्थमिदम्, तदाह गां जानीते इति। कथमिति। अनुपूर्वकस्य अनुमत्यर्थकस्य ज्ञाधातोरुपसर्गपूर्वकतया प्रकृतसूत्रस्याप्रवृत्तेः सकर्मकतया 'अकर्मकाच्च' इत्यस्याप्यप्रवृत्तेः अनुजज्ञे इति कथमात्मनेपदमित्यर्थः। समाधत्ते कर्मणि लिडिति। तथा च 'भावकर्मणोः' इत्यात्मनेपदमिति भावः। सुतस्य गमनमनुज्ञातमित्यर्थः फलति। नन्वेवं सति नृप

णम्। यथन्तस्तूच्चारणवृत्तिः सकर्मकः। उच्चारयतीति। निःसारयतीत्यर्थः। असकृदुच्चारणे तु धातोर्लक्षणा, आत्मनेपदं तु द्योतकम्, तेनैव द्योतितत्वाद् 'नित्यवीप्सयोः' इति न द्विर्वचनम्। ऋत्विजो यजन्तीति। दक्षिणादिकं तु न यागफलम्। स्वर्गकामो यजेतेत्यादिना स्वर्गाद्युद्देशेन यागादिविधानात्स्वर्गादिरेव फलमिति भावः। समुदाङ्भ्यो। 'आङो यमहनः' इत्येव सिद्धे आङ्पूर्वकस्य वचनं सकर्मकार्थमिति ध्वनयन्नुदाहरति वस्त्रमायच्छत इति। अनुपसर्गाज्ज्ञः। 'अक-

ञितः–' इत्यादिपञ्चसूत्र्या यदात्मनेपदं विहितं तस्योपपदेन समीपोच्चारितेन पदेन क्रियाफलस्य कर्तृगामित्वे द्योतिते वा स्यात्। स्वं यज्ञं यजति, यजते वा। स्वं कटं करोति, कुरुते वा। स्वं पुत्रमपवदति, अपवदते वा। स्वं यज्ञं कारयति, कारयते वा। स्वं व्रीहिं संयच्छति, संयच्छते वा। स्वां गां जानाति, जानीते वा।

इति तिङन्ते आत्मनेपदप्रकरणम्।

अथ तिङन्ते परस्मैपदप्रकरणम् ॥ ६१ ॥

'शेषात्कर्तरि परस्मैपदम्' (सू २१५९)। भवति। २७४५ अनुपराभ्यां

इति प्रथमान्तस्य कथमिहान्वय इत्यत आह नृपेणेति विपरिणाम इति। अवालुलोचे इत्यत्रान्वितं नृप इति प्रथमान्तं तृतीयया विपरिणमितमत्रानुवर्त्यते इत्यर्थः। विभाषोपपदेन। स्वरितञित इत्यादीति। 'स्वरितञितः कर्त्रभिप्राये क्रियाफले, अपाद्वदः, णिचश्च, समुदाङ्भ्यो यमोऽग्रन्थे, अनुपसर्गाज्ज्ञः' इति पञ्चसूत्रीत्यर्थः। समीपोच्चारितं पदमुपपदम्, न तु 'तत्रोपपदं सप्तमीस्थम्' इति संकेतितम्, असंभवात्, तदाह समीपोच्चारितेन पदेनेति। फलस्य कर्तृगामित्वे नित्यमात्मनेपदे पञ्चसूत्र्या प्राप्ते विभाषेयमिति 'न वेति विभाषा' इति सूत्रे भाष्ये स्पष्टम्। स्वं यज्ञमिति। स्वीयमित्यर्थः। अत्र स्वशब्देनैव फलस्यात्मगामित्वावगमात् 'स्वरितञितः–' इति नित्यात्मनेपदस्यानेन विकल्पः। स्वं यज्ञं कारयतीत्यत्र 'णिचश्च' इत्यस्यानेन विकल्पः। स्वं व्रीहिमिति। अत्र 'समुदाङ्भ्यो यमः' इत्यस्यानेन विकल्पः। स्वां गामिति। अत्र 'अनुपसर्गाज्ज्ञः' इत्यस्यानेन विकल्पः।

इति श्रीवासुदेवदीक्षितविदुषा विरचितायां सिद्धान्तकौमुदीव्याख्यायां बालमनोरमाख्यायां आत्मनेपदव्यवस्था समाप्ता।

अथ परस्मैपदव्यवस्थां निरूपयितुमुपक्रमते शेषात्कर्तरीति। अनुप-

र्मकाच्च' इत्येव सिद्धे सकर्मकार्थ आरम्भः। विभाषोपपदेन। उपपदेन फलस्य कर्तृगामित्वे द्योतिते तल्लोऽप्राप्तावप्राप्तविभाषेयम्। कर्तृगामिनि क्रियाफले नित्ये प्राप्ते प्राप्तविभाषेत्यन्ये। स्वं यज्ञमिति। स्वमित्युपलक्षणम्। स्वार्थं यज्ञं यजति। आत्मार्थं यज्ञं यजति इत्याद्यपि बोध्यम्। इति तत्त्वबोधिन्यामात्मनेपदप्रक्रियाप्रकरणम्।

शेषात्कर्तरि। 'अनुदात्तङित–' इत्यादिष्वात्मनेपदमेवेति नियमान्न तत्र परस्मैपदस्य संभवः। तथा च कर्तरि परस्मैपदमित्यनेन परस्मैपदमेवेति नियमिते तद्भिन्नानामेव तद्भविष्यतीति शेषग्रहणं स्पष्टप्रतिपत्त्यर्थमित्याहुः। 'अनुदात्तङितः–' इत्यादिष्वेवात्मनेपदमिति नियमात् 'शेषात्कर्तरि–' इत्यनेन परस्मैपदमेव तत्र भवि-

कृञः । (१-३-७९) कर्तृगेऽपि फले गन्धनादौ च परस्मैपदार्थमिदम्। अनुकरोति । पराकरोति । कर्तरीत्येव, भावकर्मणोर्मा भूत्। न चैवमपि कर्मकर्तरि प्रसङ्गः, कार्यातिदेशपक्षस्य मुख्यतया तत्र 'कर्मवत्कर्मणा-' (सू २७६६) इत्यात्मनेपदेन परेणास्य बाधात्। शास्त्रातिदेशपक्षे तु 'कर्तरि कर्म-' (सू २६८०) इत्यतः 'शेषात्-' (सू २१५९) इत्यतश्च कर्तृग्रहणद्वयमनुवर्त्य कर्तैव यः कर्ता न तु कर्मकर्ता तत्रेति व्याख्येयम् । २७४६ अभिप्रत्यतिभ्यः क्षिपः ।

राभ्यां कृञः । परस्मैपदमिति शेषः । ननु 'स्वरितञितः-' इत्यात्मनेपदस्य कर्तृगामिन्येव फले विधानादकर्तृगामिनि फले 'शेषात्कर्तरि' इति परस्मैपदस्य सिद्धत्वात् किमर्थमिदमित्यत आह **कर्तृगेऽपीति । गन्धनादाविति ।** गन्धनावक्षेपणसेवनसाहसिक्यप्रतियत्नप्रकथनोपयोगेषु इत्यर्थः । **मा भूदिति ।** भावे कर्मणि लकारस्य कर्तृगे फले परस्मैपदनिवृत्त्यर्थं कर्तरीत्यस्यानुवृत्तिरिति भावः । ननु कर्तरीत्यस्यानुवृत्तावपि अनुक्रियते शब्दः स्वयमेवेत्यत्र कर्मकर्तरि परस्मैपदं दुर्वारमित्याशङ्क्य परिहरति **न चेति ।** एवमपि कर्तरीत्यस्यानुवृत्तावपि कर्मकर्तरि आत्मनेपदस्य प्रसङ्गो न शङ्क्य इत्यर्थः । कुत इत्यत आह **कार्यातिदेशेति ।** तत्र कर्मकर्तरि 'कर्मवत्कर्मणा तुल्यक्रियः' इत्यात्मनेपदेन परेणास्य परस्मैपदस्य बाधादित्यन्वयः । ननु कर्मणि यच्छास्त्रं तत् 'कर्मवत्कर्मणा-' इति कर्मकर्तर्यतिदिश्यते । तथा चात्र कर्मकर्तरि 'भावकर्मणोः' इत्यात्मनेपदशास्त्रमिह प्राप्तम् । तस्य च परत्वाभावाद् 'अनुपराभ्यां कृञः' इत्यनेन कथं बाधः स्यादित्यत आह **कार्यातिदेशपक्षस्य मुख्यतेति ।** शास्त्रातिदेशस्य कार्यातिदेशार्थतया कार्यातिदेशस्य मुख्यत्वम् । ततश्च कर्मवत् कर्मणेत्यनेन कर्मणि विहितमात्मनेपदं कर्मकर्तरि विधीयते । तस्य च परत्वात्तेनात्मनेपदेन 'अनुपराभ्याम्-' इति परस्मैपदं कर्मकर्तरि बाधमर्हतीति भावः । 'कर्मवत्कर्मणा-' इत्यत्र शास्त्रातिदेशमभ्युपगम्याह **शास्त्रातिदेशपक्षे त्विति ।** 'अनुपराभ्यां कृञः' इत्यत्र 'कर्तरि कर्मव्यतिहारे' इत्यस्मादेकं कर्तृग्रहणमनुवर्तते । तथा 'शेषात् कर्तरि परस्मैपदम्' इत्यस्माद् द्वितीयं कर्तृग्रहणमनुवर्तते । तथा च स्वभावत एव यः कर्ता, न तु विवक्षाधीनः कर्मकर्ता तथाविधकर्तर्येव अनुपराभ्यां कृञः परस्मैपदमिति लभ्यते । एवं च कर्मकर्तरि नास्य

व्याप्तीति परस्मैपदग्रहणं स्पष्टप्रतिपत्त्यर्थमिति केचित् । **अस्य बाधादिति ।** अनुपराभ्यामित्यस्येत्यर्थः । अत एव 'कर्मवत्कर्मणा-' इति सूत्रे कार्यातिदेशोऽयमिति वक्ष्यति । शास्त्रातिदेशपक्षे 'कर्मवत्कर्मणा-' इत्यनेनात्मनेपदं न विधीयते किंतु तद्विधायकं 'भावकर्मणोः' इति शास्त्रमतिदिश्यते, तस्य च पूर्वत्वात्परेण 'अनु-

(१-३-८०) क्षिप प्रेरणे । स्वरितेत् । अभिक्षिपति । २७४७ प्राद्वहः । (१-३-८१) प्रवहति । २७४८ परेर्मृषः । (१-३-८२) परिमृष्यति । भौवादिकस्य तु परिमर्षति । इह परेरिति योगं विभज्य वहेरपीति केचित् । २७४९ व्याङ्परिभ्यो रमः । (१-३-८३) विरमति । २७५० उपाच्च । (१-३-८४) यज्ञदत्तमुपरमति । उपरमयतीत्यर्थः । अन्तर्भावितण्यर्थोऽयम् । २७५१ विभाषाऽकर्मकात् । (१-३-८५) उपाद्रमेरकर्मकात्परस्मैपदं वा ।

प्रवृत्तिरित्यर्थः । **अभिप्रति** । परस्मैपदमिति शेषः । स्वरितेदिति । ततश्च कर्तृगामिनि फले आत्मनेपदे प्राप्ते अनेन तत्रापि परस्मैपदमिति भावः । **अभिक्षिपतीति** । प्रतिक्षिपति अतिक्षिपति इत्यप्युदाहार्यम् । प्राद्वहः । प्रपूर्वाद्वहः परस्मैपदमित्यर्थः । वहेः स्वरितत्वात् कर्तृगामिन्यात्मनेपदे प्राप्ते तत्राप्यनेन परस्मैपदम् । **परेर्मृषः** । परस्मैपदमिति शेषः । 'मृष तितिक्षायाम्' इति दैवादिकस्य स्वरितेत्वात् पदद्वये प्राप्ते अयं विधिः, तदाह **परिमृष्यतीति** । चौरादिकस्यापि 'आधृषाद्वा' इति णिजभावे स्वरितेत्त्वेऽपि परस्मैपदमेव परिमर्षतीति **भौवादिकस्य त्विति** । 'मृषु सहने सेचने च' इति भौवादिकस्य तु परस्मैपदित्वात् परिमर्षतीत्येव रूपं सिद्धम् । अतोऽस्मिन् सूत्रे तस्य न ग्रहणमिति भावः । **इहेति** । परेरिति योगो विभज्यते । वह इत्यनुवर्तते । परेर्वहः परस्मैपदमित्यर्थः । परिवहति । मृष इति योगान्तरम् । तत्र परेः इत्यनुवर्तते, परेः मृषः परस्मैपदमित्युक्तोऽर्थ इति केचिदाहुरित्यर्थः । भाष्ये त्वयं योगविभागो न दृश्यते । **व्याङ्परिभ्यो रमः** । परस्मैपदमिति शेषः । रमेरनुदात्तत्वाद्विधिरयम् । **विरमतीति** । आरमति, परिरमति, इत्यप्युदाहार्यम् । **उपाच्च** । उपपूर्वादपि रमेः परस्मैपदमित्यर्थः । उत्तरसूत्रे उपादित्यस्यैवानुवृत्तये व्याङ्पर्युपेभ्यो रमेरिति नोक्तम् । अत्र विरमतीत्यर्थे उपरमतीति नोदाहरणम् । तस्य अकर्मकतया उत्तरसूत्रेण परस्मैपदविकल्पविधानात् । अतः सकर्मकमुदाहरति **यज्ञदत्तमुपरमतीति** । ननु विरामार्थकत्वात् कथं सकर्मकतेत्यत आह **उपरमयतीत्यर्थ इति** । ननु णिजभावात् कथमयमर्थो लभ्यते इत्यत आह **अन्तर्भावितण्यर्थोऽयमिति** । धातूनामनेकार्थत्वादिति भावः । **विभाषाऽकर्मकात्** । उपादिति रम इति परस्मैपदमिति चानुवर्तते, तदाह

पराभ्याम्—' इत्यनेन बाधमाशङ्क्याह **शास्त्रातिदेश इत्यादि** । **स्वरितेदिति** । तथा च कर्तृगामिनि क्रियाफलेऽपि परस्मैपदार्थः सूत्रारम्भ इति भावः । **परेर्मृषः** । स्वरितेत्वात्पदद्वये प्राप्तेऽयमारम्भः । **परिमर्षतीति** । 'आधृषाद्वा' इति वैकल्पिकत्वाण्णिजभावः । **उपाच्च** । व्याङ्पर्युपेभ्य इति नोक्तम् , उत्तरसूत्रे उपस्यैवानुवृत्ति-

उपरमति, उपरमते वा, निवर्तते इत्यर्थः । **२७५२ बुधयुधनशजनेङ्प्रुद्रुस्रुभ्यो णेः ।** (१-३-८६) एभ्यो ण्यन्तेभ्यः परस्मैपदं स्यात् । 'णिचश्च' (सू २५६४) इत्यस्यापवादः । बोधयति पद्मम् । योधयति काष्ठानि । नाशयति दुःखम् । जनयति सुखम् । अध्यापयति । प्रावयति, प्रापयतीत्यर्थः । द्रावयति, विलापयतीत्यर्थः । स्रावयति, स्यन्दयतीत्यर्थः । **२७५३ निगरणचलनार्थेभ्यश्च ।** (१-३-८७) निगारयति । आशयति । भोजयति । चलयति ।

उपाद्यमेरिति । **बुधयुध** । बुध युध नश जन इङ् प्रु द्रु स्रु एषां द्वन्द्वः । **बोधयति पद्ममिति** । सूर्य इति शेषः । बुधिर्विकसनार्थकः । विकसति पद्मं, तद्विकासयति सूर्य इत्यर्थः । 'अणावकर्मकाच्चित्तवत्कर्तृकात्' इति परस्मैपदं तु न सिध्यति, अणौ पद्मस्य कर्तृतया चित्तवत्कर्तृकत्वाभावात् । **योधयति काष्ठानीति** । काष्ठानि युध्यन्ते स्वयमेव । तानि योधयतीत्यर्थः । अणावचित्तवत्कर्तृकत्वाद् 'अणावकर्मकात्–' इत्यस्य न प्राप्तिः । अत एव योधयति देवदत्तमिति नोदाहृतम्, 'अणावकर्मकाच्चित्तवत्कर्तृकात्' इत्येव सिद्धेः । एवमग्रेऽपि ज्ञेयम् । **नाशयति दुःखमिति** । दुःखं नश्यति, तद् नाशयति हरिरित्यर्थः । **जनयति सुखमिति ।** जायते सुखम्, तद् जनयति हरिरित्यर्थः । **अध्यापयतीति** । अधीते वेदं विधिः, तमध्यापयतीत्यर्थः । 'प्रु गतौ' इत्यस्योदाहरति **प्रावयतीति** । गत्यर्थकत्वं मत्वाह **प्रापयतीत्यर्थ इति** । **द्रावयतीति** । द्रवत्याज्यं तद् द्रावयतीत्यर्थः । धातोर्द्रवीभावार्थकत्वं मत्वाह **विलापयतीत्यर्थ इति** । **स्रावयतीति** । स्रवति जलं तत्स्रावयतीत्यर्थः । धातोः स्यन्दनार्थकत्वं मत्वाह **स्यन्दयतीत्यर्थ इति** । 'प्रीतिं भक्तजनस्य यो जनयते' इत्यात्मनेपदं तु प्रामादिकमेव । यद्वा भक्तजनः हरौ प्रीतिं जनयत्यात्मविषये तां हरिः जनयते इति ण्यन्ताण्णौ रूपम् । प्रयोज्यकर्तुः शेषत्वविवक्षया भक्तजनस्येति षष्ठीत्याहुः । **निगरण**–निगरणं भक्षणम्, चलनं कम्पनम्, एतदर्थकेभ्यो ण्यन्तेभ्यः परस्मैपदमित्यर्थः । पूर्वसूत्रे प्रुद्रुस्रूणां ग्रहणं तु अचलनार्थानामेव । अत एव मूले प्रापयतीत्यादि व्याख्यातम् । पानमपि भक्षणमेव 'अपोऽश्नाति' इति श्रुतेः । अत एव'न पादम्याङ्यमाङ्यस–'इति सूत्रे पाग्रहणमर्थवत् ।'न पीयतां नाम चकोरजिह्वया कथं निदेतन्मुखचन्द्रचन्द्रिका । इमां किमाचामयसे न चक्षुषी चिरं चकोरस्य भवन्मुख-

---

येथा स्यादिति । **निगरणचलनार्थेभ्यश्च** । निगरणं भक्षणम् । प्रुद्रुस्रूणां चलनार्थानामनेनात्मनेपदे सिद्धेऽप्यचलनार्थानां तत्सिद्धये पूर्वसूत्रे ग्रहणम् । अत एव तत्र विवृतं प्रापयतीत्यर्थ इत्यादिना । कथं तर्हि 'इमां किमाचामयसे न चक्षुषी' इति श्रीहर्षः । आङ्पूर्वाच्चमेरनेन परस्मैपदौचित्यादिति चेत् । अत्राहुः—आचाम-

कम्पयति । 'अदेः प्रतिषेधः' (वा ६२१) । आदयते देवदत्तेन । 'गतिबुद्धि-' (सू ५४०) इति कर्मत्वम् 'आदिखाद्योर्न' (वा ११०२) इति प्रतिषेधम् । 'निगरणचलन-' इति सूत्रेण प्राप्तस्यैवायं निषेधः । शेषादित्यकर्त्रभिप्राये परस्मैपदं स्यादेव, आदयत्यन्नं बटुना । २७५४ अणावकर्मकाच्चित्तवत्कर्तृकात् । (१-३-८८) ण्यन्तात्परस्मैपदं स्यात् । शेते कृष्णः, तं गोपी शाययति ।

स्पृशी, इति श्रीहर्षश्लोके आचामयेति पृथक्पदम् । अः विष्णुः, तस्य स्त्री ईः लक्ष्मीः। तया सहिता से इत्येकारान्तस्य सेशब्दस्य संबोधनम् । 'एङ्ह्रस्वात्-' इति सम्बुद्धिलोप इति व्याख्येयमिति प्रौढमनोरमायां स्थितम् । वस्तुतस्तु चक्षुषोर्मुखचन्द्रिकाकर्मकपानात्मकाचमनासंभवादाचामिरादरे लाक्षणिकः । अतो निगरणार्थकत्वाभावान्न परस्मैपदम् । न चैवं सति प्रत्यवसानार्थकत्वाभावाच्चक्षुषोः 'गतिबुद्धि-' इति कर्मत्वं न स्यादिति शङ्क्यम् , न ह्याचामिरत्र केवले आदरे वर्तते, किंतु दर्शनपूर्वकादरे वर्तते । सादरज्ञाने लाक्षणिक इति यावत् । ततश्च बुद्ध्यर्थकत्वादाचामेः चक्षुषोः कर्मत्वं निर्बाधमित्यादि शब्देन्दुशेखरे प्रपञ्चितम् । **अदेः प्रतिषेध इति** । अदेर्ण्यन्ताद् निगरणार्थकतया प्राप्तस्य परस्मैपदस्य प्रतिषेधो वक्तव्य इत्यर्थः । आदयते देवदत्तेनेत्यत्र अदेः प्रत्यवसानार्थत्वात् प्रयोज्यकर्तुर्देवदत्तस्य कर्मत्वमाशङ्क्याह **गतिबुद्धीति** । नन्वादयत्यन्नं बटुनेति कथम् । निगरणार्थकतया प्राप्तस्य परस्मैपदस्य अदेः प्रतिषेधादित्यत आह **निगरणचलनेति सूत्रेण प्राप्तस्यैवायं निषेध इति** । न तु 'शेषात्कर्तरि-' इति प्राप्तस्येत्येवकारार्थः, 'अनन्तरस्य-' इति न्यायादिति भावः । **अणावकर्मकात्** । ण्यन्तादिति शेषपूरणम्, णेरित्यनुवर्तेरिति भावः । अणौ यो धातुरकर्मकः चित्तवत्कर्तृकश्च, तस्माद् ण्यन्तात्परस्मैपदमिति यावत् । चित्तवत्कर्तृकादिति किम् ? व्रीहयः शुष्यन्ति, तान् शोषयते । अकर्मका-

---

येति पृथक्पदम् । ईर्लक्ष्मीस्तया सहिता सेस्तस्याः संबोधने हे से इति । केचित्तु सा त्वम् इने चक्षुषी इनचक्षुषी श्रेष्ठचक्षुषी आचामय किमिति व्याचक्षते **अणावकर्मकात्** । क्रियाफलस्य कर्तृगामित्वविवक्षायामात्मनेपदे प्राप्ते परस्मैपदार्थमिदम् । अणाविति किम्, हेतुमण्ण्यन्तादकर्मकात्परस्मैपदनियमो माभूत । आरोहमाणं प्रयुङ्क्ते आरोहयते । न्यग्भवन्तं प्रेरयतीत्यर्थः । 'णेरणौ-' इति सूत्रे उदाहरणत्वेन य आरोहयतिरकर्मको निर्णीतस्तस्माद् द्वितीये णिचि प्रत्युदाहरणमेदम् । केचित्तु अणाविति किम्, चुरादिण्यन्तात्परस्मैपदनियमो माभूत् । तद्यथा पुट्ट चुट्ट अल्पीभावे । पुट्टयति । चुट्टयति । अल्पीभवतीत्यर्थः । अकर्मकाविमौ । ततो हेतुमण्णिचि । पुट्टयते । चुट्टयते । इति प्रत्युदाहरन्ति । तद्भाष्यादिविरुद्धम् । तथा हि—बुधादिसूत्रा-

२७५५ न पादम्याङ्यमाङ्यसपरिमुहरुचिनृतिवदवसः । (१-३-८९)
एभ्यो णयन्तेभ्यः परस्मैपदं न । पिबतिर्निगरणार्थः । इतरे चित्तवत्कर्तृका अकर्मकाः । नृतिश्चलनार्थोऽपि । तेन सूत्रद्वयेन प्राप्तिः । पाययते । दमयते । आयामयते । आयाम्यते । परिमोहयते । रोचयते । नर्तयते । वादयते । वासयते । 'धेट उपसंख्यानम्' (वा ९६२) । 'धापयेते शिशुमेकं समीची' ।

त्किम्? कटं करोति, तं प्रयुङ्क्ते कटं कारयते । **न पादम्याङ्यम्** । पा दमि आङ्यम् आङ्यस् परिमुह् रुचि नृति वद् वस् एषां समाहारद्वन्द्वात्पञ्चमी । प्राप्तस्य निषेध्यत्वात् प्राप्तिमुपपादयति **पिबतिर्निगरणार्थ इति** । ततश्च 'निगरणचलनार्थेभ्यः–' इति प्राप्तिरिति भावः । **इतरे इति** । दम्यादयः अणौ चित्तवत्कर्तृका अकर्मकाश्चेत्यर्थः । ततश्च 'अणावकर्मकाच्चित्तवत्कर्तृकात्' इति प्राप्तिरिति भावः । **नृतिरिति** । नृतिश्चलनार्थकः । अणौ चित्तवत्कर्तृकः अकर्मकश्चेत्यर्थः । **सूत्रद्वयेनेति** । 'अणावकर्मकात्–' इति 'निगरणचलनार्थेभ्यश्च' इति च सूत्रद्वयेनेत्यर्थः । **पाययते इति** । 'शाच्छासाह्वाव्यावेपां युक्' इति पुकोऽपवादो युक् । **दमयते इति** । 'जनीजृष्क्नसुरञ्जोऽमन्ताश्च' इति मित्त्वाद्ध्रस्वः । ननु दिवादौ दमिः सकर्मक इत्युक्तम् । अतः कथमिह 'अणावकर्मकात्–' इति प्राप्तिरिति चेद् दमेः परस्मैपदनिषेधादेव दमिरकर्मकोऽपि । अतो दमिः सकर्मक इत्यस्य न विरोधः । **आयामयते इति** । 'यमोऽपरिवेषणे' इति मित्त्वनिषेधाभ्र ह्रस्वः । **वासयते इति** । 'वस निवासे' इति भौवादिकस्यैवात्र ग्रहणम् । न तु 'वस आच्छादने' इत्यादादिकस्यापि, तस्य

दिह णेरिति वर्तते बुधादिभ्यश्च हेतुमण्णेरेव संभवतीति तदन्तादेवायं विधिः । अणाविति प्रतिषेधोऽपि प्रत्यासत्तेस्तस्यैव न्याय्यः । तेन चुरादिण्यन्ताद्धेतुमण्णौ परस्मैपदं भवत्येवेति भाष्यादौ स्थितम् । तथा च हेतुमण्णेः प्राग् योऽकर्मको हेतुमण्ण्यन्तभिन्नस्तस्माद्धेतुमण्णावात्मनेपदं नेति फलितोऽर्थः । अकर्मकात्किम्, कटं यः करोति तं प्रयुङ्क्ते कटं कारयति । चित्तवत्कर्तृकादिति किम्, शुष्यन्ति व्रीहयस्तान्शोषयते । **न पाद । चित्तवत्कर्तृका अकर्मका इति** । दिवादौ दमिः सकर्मक इत्युक्तम्, इह त्वकर्मक इति पूर्वोत्तरविरोधो यद्यप्यस्ति, तथापि कर्मणः कर्तृत्वविवक्षायां दमिरत्राकर्मक इत्याहुः । **पाययत इति** । 'शाच्छासा–' इति युक् । **आयामयत इति** । 'यमोऽपरिवेषणे' इति मित्त्वनिषेधः । **वासयत इति** । वस निवासे इत्यस्य ग्रहणम्, वस आच्छादने इत्यस्य तु न निषेधः । सकर्मकत्वेन तस्य प्राप्त्यभावात् । कर्मकर्तृत्वविवक्षायामकर्मकत्वेऽपि लुग्विकरणपरिभाषया नात्र ग्रहणमित्याहुः । **समीची इति** । प्रथमाद्विवचनम् । 'वा छन्दसि' इति पूर्वसवर्णदीर्घः ।

अकर्त्रभिप्राये 'शेषात्–' (सू २१५९) इति परस्मैपदं स्यादेव । वत्सान्पाययति पयः । दमयन्ती कमनीयतामदम् । भिक्षा वासयति । 'वा क्यषः' (सू २६६६) लोहितायति, लोहितायते । 'द्युद्भ्यो लुङि' (सू २३४५) । अद्युतत् अद्योतिष्ट । 'वृद्भ्यः स्यसनोः' (सू २३४७) । वर्त्स्यति वर्तिष्यते । विवृत्सति विवर्तिषते । 'लुटि च क्लृपः' (सू २३५१) । कल्प्ता । कल्प्तासि कल्पितासे । कल्प्स्यति कल्पिष्यते, कल्प्स्यते । चिक्लृप्सति, चिकल्पिषते, चिक्लृप्सते ।

इति तिङन्ते परस्मैपदप्रकरणम् ।

अथ भावकर्मतिङ्प्रकरणम् ॥ ६२ ॥

अथ भावकर्मणोर्लडादयः । 'भावकर्मणोः' (सू २६७९) इति तङ् ।

२७५६ सार्वधातुके यक् । (३-१-६७) धातोर्यक्प्रत्ययः स्याद्भावकर्म-

---

सकर्मकत्वादेवाप्राप्तेः, लुग्विकरणालुग्विकरणयोरलुग्विकरणस्यैव ग्रहणमित्युक्तेश्च । **धेट उपसंख्यानमिति** । परस्मैपदनिषेधस्येति शेषः । स्तनं धापयते शिशुमिति मन्त्रः । ननु 'वत्सान् पाययति पयः' 'दमयन्ती कामनीयतामदम्' 'भिक्षा वासयति' इति च कथम् । 'न पादम्याङ्यम–' इति परस्मैपदस्य निषेधादित्यत आह **अकर्त्रभिप्राये इति** । 'अनन्तरस्य–' इति न्यायेन 'निगरणचलनार्थेभ्यश्च, अणावकर्मकात्' इति सूत्रद्वयप्राप्तस्यैव 'न पादम्याङ्यमाङ्यस–' इति निषेध इति भावः । 'वा क्यषः' इत्यादि प्राग्व्याख्यातमपि सूत्रक्रमेण पुनरुपात्तम् ।

इति श्रीवासुदेवदीक्षितविदुषा विरचितायां सिद्धान्तकौमुदीव्याख्यायां बालमनोरमाख्यायां परस्मैपदव्यवस्था समाप्ता ।

अथ भावकर्मतिङ्प्रकरणं निरूप्यते । 'लः कर्मणि–' इत्यत्र सकर्मकेभ्यो धातुभ्यः कर्मणि कर्तरि च, अकर्मकेभ्यस्तु भावे कर्तरि च लकारा विहिताः । तेषु कर्तरि लकारा निरूपिताः । अथेदानीं भावकर्मणोर्लकारा निरूप्यन्ते इति प्रतिजानीते **अथ भावकर्मणोर्लडादय इति** । निरूप्यन्ते इति शेषः । तत्र 'शेषात्कर्तरि परस्मैपदम्, अनुपराभ्यां कृञः' इत्यादिपरस्मैपदविधिषु प्राप्तेष्वाह **भावकर्मणोरिति तङिति** । **सार्वधातुके यक्** । **धातोरिति** । 'धातोरेकाचः–' इत्यत-

---

परस्मैपदं स्यादेवेति । 'अनन्तरस्य–' इति न्यायेन योगद्वयेन प्राप्तस्यैव परस्मैपदस्य प्रतिषेध इति भावः । इति पदव्यवस्था समाप्ता ।

इति तत्त्वबोधिन्यां परस्मैपदप्रक्रियाप्रकरणम् ।

सार्वधातुके यक् । 'धातोरेकाचः–' इत्यतो धातोरिति, 'चिण् भाव-

वाचिनि सार्वधातुके परे । भावो भावना उत्पादना क्रिया । सा च धातुत्वेन

स्तदनुवृत्तेरिति भावः । भावकर्मवाचिनीति । 'चिण्भावकर्मणोः' इत्यतस्तदनुवृत्तेरिति भावः । घटस्य भावो घटत्वमित्यादौ प्रकृतिजन्यबोधे प्रकारो भावः । कवेरयं भाव इत्यादौ अभिप्रायः ।

'भावः पदार्थसत्तायां क्रियाचेष्टात्मयोनिषु ।
विद्वल्लीलास्वभावेषु भूत्यभिप्रायजन्तुषु ॥'

इति नानार्थरत्नमाला । 'भावः सत्तास्वभावाभिप्रायचेष्टात्मजन्तुषु' इत्यमरः । इह तु 'लः कर्मणि–' इत्यत्र भावशब्दो भावनायां यौगिक इत्याह भावो भावनेति। 'लः कर्मणि–' इत्यत्र भावशब्देन भावना विवक्षितेति भावः । भावनाशब्दस्य चिन्तायामपि प्रसिद्धत्वादाह उत्पादनेति । उत्पत्त्यनुकूलो व्यापार इत्यर्थः । एवं च भूधातोरुत्पत्त्यर्थकाद्धेतुमण्णौ वृद्ध्यावादेशयोः भाविशब्दाद् 'एरच्' इति भावे अचि णिलोपे भावशब्दः, भावयतेरुत्पत्त्यर्थकाद्धेतुमण्ण्यन्तात् स्त्रियामित्यधिकारे 'ण्यासश्रन्थो युच्' इति युचि अनादेशे टापि भावनाशब्द इति बोध्यम् । उत्पादना चेयं धात्वर्थान्नातिरिच्यते इति दर्शयितुमाह क्रियेति । धात्वर्थात्मकक्रियैव उत्पादनेत्यर्थः । तथा हि फलव्यापारयोर्धातुरिति सिद्धान्तः । पचधातोः पाकोऽर्थः । पाको विक्लित्त्यनुकूलव्यापारः । तत्र विक्लित्त्यंशः फलम् । अधिश्रयणादिस्तदनुकूलो व्यापारः । तथाविधव्यापाराश्रयो देवदत्तादिः कर्ता, धातूपात्तव्यापाराश्रयः कर्तेति सिद्धान्तात् । अधिश्रयणादिव्यापारजन्या विक्लित्तिः फलम्, तदाश्रयत्वादोदनं कर्म, व्यापारजन्यफलशालि कर्मेति सिद्धान्तात् । एवं सकर्मकेषु सर्वत्र ज्ञेयम् । 'एध वृद्धौ' इत्यस्मिन्नकर्मकेऽपि वृद्ध्यनुकूलव्यापारो धात्वर्थः । न चैवं सति एधते देवदत्त इत्यत्र धातूपात्तव्यापाराश्रयत्वाद्व्यापारजन्यवृद्धिरूपफलाश्रयत्वाच्च कर्तृत्वं कर्मत्वं च स्यादिति वाच्यम्, धातूपात्तव्यापारजन्यतद्व्यापारव्यधिकरणफलाश्रयत्वं कर्मत्वमिति सिद्धान्तात् । एवं च

कर्मणोः' इत्यतो भावकर्मणोरिति चानुवर्तते । भावो भावनेति । उत्पत्त्यर्थाद्भवतेर्णिजन्तादेरजिति भावः । 'एरज्ण्यन्तानाम्' इति त्वनार्षमिति तस्मिन्नेव सूत्रे कैयटः । भवतेरुत्पत्त्यर्थत्वं ण्यन्तस्य भवतेः शुद्धेन करोतिना तुल्यार्थत्वं च दर्शयति उत्पादना क्रियेति । यथा करोति घटमित्यादावुत्पत्त्यनुकूलो व्यापारः कुलालनिष्ठः, तथा भावयति घटमित्यादावपि । भवति घट इत्यत्रापि घटनिष्ठ उत्पत्त्यनुकूलो व्यापारोऽस्त्येव, परंतु फलसमानाधिकरणः सः । कुलालनिष्ठस्तु फलव्यधिकरण इतीयान्भेदः । अत एव फलव्यापारयोः सामानाधिकरण्याद्भवत्यादिरकर्मकस्तयोस्तु वैयधिकरण्यात् करोत्यादिः सकर्मक इत्याहुः । एतेन भावो भावनेत्यादि-

सकलधातुवाच्या भावार्थकलकारेणानूद्यते । युष्मदस्मद्भ्यां सामानाधिकरण्या-

---

फलोत्पत्त्यनुकूलव्यापारात्मिका क्रिया धात्वर्थ इति सिद्धम्। एतेन क्रियावाची धातुः, धातुवाच्या क्रियेत्यन्योन्याश्रयोऽपि निरस्तः । उत्पत्त्यनुकूलव्यापारस्यैव क्रियात्वात्। तदुक्तम्—'व्यापारो भावना सैवोत्पादना सैव च क्रिया' इति। ननु उत्पत्त्यनुकूल-व्यापारस्यैव सर्वत्र धातुवाच्यत्वे सर्वेषां धातूनामेकार्थत्वापत्तिः। विक्लित्त्यादितत्तत्फलो-त्पत्त्यनुकूलव्यापारार्थकत्वं तु न संभवति । एकैकस्य धातोर्विक्लित्त्यादितत्तत्फलांशे तदनुकूलव्यापारात्मकव्यापारसामान्ये च वाचकत्वानुपपत्तेरित्यत आह **सा च धातुत्वेन सकलधातुवाच्येति**। पच्यादयो धातुत्वेन रूपेण उत्पत्त्यनुकूलव्या-पारात्मिकां क्रियामाहुः । पचित्वादिविशेषरूपेण तु विक्लित्त्यादितत्तत्फलांशमाहुः। तथा च वाचकतावच्छेदकभेदाद्विक्लित्त्यादिफलविशेषस्य क्रियासामान्यस्य च वाच्यता संगच्छते इति भावः। तथा च भट्टिराह—

अन्येन 'भूवादयो धातवः' इत्यत्र क्रियावाचिनः किम्, विकल्पार्थकवाशब्दाद्भावे लिण् माभूत्। अन्यथा भ्वादिगणे वाशब्दमात्रपठनादक्रियावाचिनोऽपि वाशब्दस्य धातुत्वे 'धात्वर्थः केवलः शुद्धो भाव इत्यभिधीयते' इति विकल्पस्यापि भावत्वापत्त्या तद्वाचकवाशब्दाल्लिट् स्यादेवेति केषांचिद्व्याख्यानं परास्तम्। भावनावाचकादेव भावे लिटः स्वीकारात्। विकल्पस्य तु भावनाभिन्नत्वात्। अन्यथा क्रियावाचिन इति विशे-षणे दत्तेऽपि तद्दोषतादवस्थ्यात्। विकल्पवाचकाल्लिङभावेऽपि लडादयः स्युरिति तु न शङ्कनीयमेव। वर्तमानक्रियादिवृत्तेर्धातोरेव लडादीना विधानात्। किमर्थं तर्हि क्रियावा-चिनो भ्वादय इति सर्वैरेव तत्र व्याख्यातम्। याः पश्यसीत्यत्रापि लक्षणप्रतिपदो-क्तपरिभाषया याशब्दस्य धातुत्वासंभवाद् 'आतो धातोः' इति तत्राल्लोपाप्रसक्तिरिति चेत्। अत्राहुः—'कार्यकालं संज्ञापरिभाषम्' इति पक्षे 'आतो धातोः' इति कार्यप्रदेशे 'भ्वादयो धातवः' इत्युपतिष्ठते, भ्वादिषु याशब्दमात्रपठनाद् द्रव्यवाचकोऽपि याशब्दस्त-त्रोपतिष्ठते। वर्णग्रहणे लक्षणप्रतिपदोक्तपरिभाषाया अप्रवृत्तेः। 'आतो धातोः' इत्यत्र त्वात इति वर्णग्रहणात्। तस्माद् द्रव्यवाचकस्य याशब्दस्य धातुसंज्ञा माभूदिति क्रियावाचिन इति विशेषणमवश्यं वक्तव्यमेवेति । उत्पादना क्रियेत्यनेन तु क्रिया-वाची धातुर्धात्वर्थः क्रियेत्यन्योन्याश्रयोऽत्र दुष्परिहर इति केषांचिदाक्षेपो निरस्तः। उत्पत्त्यनुकूलव्यापारस्य क्रियात्वात्। तदुक्तम्—'व्यापारो भावना सैवोत्पादना सैव च क्रिया' इति। **धातुत्वेनेति**। सकलधातुषु धातुत्वं जातिरखण्डोपाधिर्वेत्यन्यदे-तत्। तच्च वाचकतावच्छेदकम्। क्रियात्वं तु वाच्यतावच्छेदकमिति भावः । **धातु-वाच्येति**। नन्वेवं पचतीत्यादावेककर्तृका वर्तमाना पचिक्रियेति क्रियाविशेष्यको

भावात्प्रथमपुरुषः । तिङ्वाच्यभावनाया असत्त्वरूपत्वेन द्वित्वाद्यप्रतीतेर्न द्विव-

---

'विभज्य सेनां परमार्थकर्मा सेनापतींश्चापि पुरन्दरोऽथ ।
नियोजयामास स शत्रुसैन्ये करोतिरर्थेष्विव सर्वधातून् ॥' इति ।

अस्तिभवतिविद्यतीनामपि सत्तानुकूलव्यापार एवार्थः । तत्र सत्ता आत्मभरणम् । तदनुकूलव्यापारस्तु जायते, अस्ति, विपरिणमते, वर्धते, अपक्षीयते, विनश्यति, इति वार्ष्यायणिप्रणीतषड्भावविकारेष्वन्यतमो यथायथं ज्ञेयः । भूवादिसूत्रे भाष्ये स्पष्टमेतत् । प्रपञ्चितं च मञ्जूषायामित्यलम् । ननु उत्पादनात्मकक्रियारूपस्य भावस्य धातुवाच्यत्वे 'लः कर्मणि च भावे च–' इति भावे कथं लकारविधिः । अनन्यलभ्यस्यैव शब्दार्थत्वादित्यत आह । **भावार्थकलकारेणानूद्यते इति** । द्वौ त्रय इत्यादौ द्विवचनबहुवचनवदिति भावः । **युष्मदस्मद्भ्यामिति** । युष्मदि अस्मदि च तिङ्समानाधिकरणे उपपदे मध्यमोत्तमपुरुषौ विहितौ । युष्मदस्मदोस्तिङ्सामानाधिकरण्यं च तिङ्वाच्यकारकवाचित्वमेव । भावे लकारे तु आस्यते त्वया आस्यते मया इत्यादौ भाव एव तिङ्वाच्यो न तु युष्मदस्मदर्थौ । अतो न मध्यमोत्तमावित्यर्थः । कर्मलकारे तु त्वं वन्द्यसे, अहं वन्द्ये इत्यादौ लकारस्य युष्मदस्मदोश्च सामानाधिकरण्यसंभवात्पुरुषत्रयमपि यथायथमुदाहरिष्यते । **तिङ्वाच्येति** । सत्त्वं द्रव्यं लिङ्गसंख्यान्वययो-

---

बोधो न स्यात् । प्रत्ययार्थं प्रति प्रकृत्यर्थस्य विशेषणतया औपगवादौ क्लृप्तत्वात् । तथा च भावना तिङ्प्रत्ययवाच्येति मीमांसकमतमेव रमणीयमिति चेत् । अत्राहुः— प्रत्ययार्थः प्रधानमिति उत्सर्गः, स चेह त्यज्यते, 'क्रियाप्रधानमाख्यातम्' इति स्मरणात् । टाबाद्यर्थत्वेन मीमांसकैरभ्युपगतस्य स्त्रीत्वस्य पाचिकादौ विशेषणत्वाभ्युपगमात्प्रत्ययार्थः प्रधानमिति नियमस्य प्रत्युक्तत्वाच्च । किं च भोक्तव्यमित्यादौ तिङं विनापि भावना प्रतीयते कारकापेक्षा च दृश्यते । अस्ति च करोतिसामानाधिकरण्यम् । किं कर्तव्यं भोक्तव्यम्, किं कृतवान् भुक्तवान् इति । न च कृतामपि तव्यदादीनां भावनावाचकत्वमस्त्विति शङ्क्यम् । नामार्थयोरभेदान्वयानुरोधेन 'कर्तरि कृत्' इति तव्यदादयः कर्मादाविति परैरप्यभ्युपगमात् । अन्यथा पाचको देवदत्तः पक्तव्य ओदन इत्यत्राभेदबोधो न स्यात् । तथा च धातुवाच्यत्वं भावनाया इत्येव मतं रमणीयतरमिति । लकारस्य सामानाधिकरण्यं कर्तृकर्माभिधायिन एव संभवति न भावाभिधायिन इत्याशयेन व्याचष्टे **सामानाधिकरण्याभावादिति** । न चैवं युष्मदस्मद्युपपदे समानाधिकरणे देवदत्तः पचतीत्यादाविव प्रथमपुरुषेण भाव्यमिति प्रथमपुरुषोऽप्यत्र न स्यादिति वाच्यम् । 'शेषे प्रथमः' इत्यत्र मध्यमोत्तमयोरविषये प्रथमः स्यादिति व्याख्यानात् । **तिङ्वाच्येति** । घञादिवाच्यायास्तु सत्त्वरूप-

घनादि। किं त्वेकवचनमेव। तस्यौत्सर्गिकत्वेन संख्यानपेक्षत्वाद् अनभिहिते कर्तरि तृतीया। त्वया मया अन्यैश्च भूयते। बभूवे। २७५७ स्यसिच्सी-

---

यम्। तिङ्वाच्या या भावना क्रिया सा असत्त्वरूपा लिङ्गसंख्यान्वयायोग्या, शब्दशक्तिस्वभावात्। ततश्च तस्यां तिङ्वाच्यभावनायां द्वित्वबहुत्वयोरप्रतीतेः युवाभ्यां युष्माभिर्वा आस्यते इत्यादौ न द्विवचनं बहुवचनं चेत्यर्थः। तिङ्वाच्येत्यनेन कृद्वाच्यायाः क्रियायाः लिङ्गसंख्यान्वयित्वात्मकं सत्त्वरूपत्वमस्तीत्युक्तं भवति। तद्यथा, पाकौ पाका इत्यादि। तदुक्तम्, 'सार्वधातुके यक्' इति सूत्रे भाष्ये 'कृदभिहितो भावो द्रव्यवत्प्रकाशते' इति। द्रव्यवद् लिङ्गसंख्यान्वयं लभते इत्यर्थः, शब्दशक्तिस्वभावादिति भावः। ननु तिङ्वाच्यभावनाया असत्त्वरूपतया द्विबहुवचनाभावे आस्यते इत्यादौ एकवचनं च न स्यादित्यत आह **किं त्वेकवचनमेवेति।** तिङ्वाच्यभावलकारस्येति शेषः। **तस्येति।** 'द्व्येकयोर्द्विवचनैकवचने' 'बहुषु बहुवचनम्' इति सूत्रन्यासं भङ्क्त्वा 'एकवचनं द्विबहुषु द्विबहुवचने' इति सूत्रन्यासः कर्तव्यः। तत्र द्वित्वबहुत्वयोर्द्विबहुवचननियमे सति तयोरविषये एकवचनमिति लभ्यते इति भाष्ये स्पष्टम्। एवं च एकवचनस्य एकत्वमुत्सृज्य द्विबहुवचनान्यविषये विहितत्वेन औत्सर्गिकतया एकत्वसंख्यानपेक्षत्वाद् भावलकारस्य असत्त्वरूपभाववाचित्वेऽप्येकवचनमेवेति भावः। **अनभिहिते इति।** भावलकारे कर्तुस्तिङ्वाच्यत्वाभावेन अनभिहितत्वात्तृतीयेत्यर्थः। **त्वया मयेति।** त्वत्कर्तृकं मत्कर्तृकम्

मिष्टमेवेति पाकं पाकैरित्यादौ यथायथं द्वितीयादयः प्रवर्तन्ते। अतएव भाष्यकृतोक्तं 'कृदभिहितो भावो द्रव्यवत्प्रकाशते' इति। द्रव्यधर्मांल्लिङ्गसंख्याकारकादीन् गृह्णातीत्यर्थः। **एकवचनमेवेति।** प्रायोवादोऽयम्। अन्यथा 'उष्ट्रासिका आस्यन्ते हतशायिकाः शय्यन्ते' इति भाष्ये धात्वर्थनिर्देशे ण्वुलि कृदभिहितो भावो द्रव्यवत्प्रकाशत इत्यासिकाः शायिका इत्यत्र बहुवचनसिद्धावपि आस्यन्ते शय्यन्ते इत्यत्र तन्न सिध्येत्। न च कर्मण्येवात्र लकारोऽस्त्विति शङ्क्यम्। धातुद्वयस्याप्यकर्मकत्वेन तदसंभवाद् अर्थासङ्गतेश्च। तत्र ह्युष्ट्राणां यादृशान्यासनानि हतानां यादृशानि शयनानि तादृशानि देवदत्तादिकर्तृकान्यासनादीनीत्यर्थः। सादृश्यावगमादिह आख्यातवाच्यस्यापि भावस्य भेदावभासाद्बहुवचनम्। न चैवं संख्यान्वयित्वे असत्त्वरूपता न स्यादिति वाच्यम्। लिङ्गक्रियानाधारकारकयोगाभावमात्रेणासत्त्वरूपत्वमुपाश्रयत इति कारकेषूक्तत्वात्। केचिदिह उष्ट्रासिकाहतशायिकाशब्दयोस्तत्सदृशे लक्षणां स्वीकृत्य आस्यन्त इत्यादिना अभेदान्वयमाहुः। मनोरमायां तु आसिकाः शायिका इति च द्वितीयाबहुवचनं क्रियाविशेषणत्वेन कर्मत्वात्। न चैवं क्लीबत्वमेकवचनान्तत्वं च स्यादिति

स्यसिच्सीयुट्तासिषु भावकर्मणोरुपदेशेऽज्झनग्रहदृशां वा चिण्वदिट् च । (६-४-६२) उपदेशे योऽच् तदन्तानां हनादीनां च चिणीवाङ्गकार्यं वा स्यात्स्यादिषु परेषु भावकर्मणोर्गम्यमानयोः स्यादीनामिडागमश्च । अयमिट् चिण्वद्भाव-

---

अन्यकर्तृकं भवनमित्यर्थः । **स्यसिच्** । अच् हन् ग्रह् दृश् एषां द्वन्द्वात् षष्ठी । उपदेश इत्यच एव विशेषणम्, नेतरेषाम्, अव्यभिचारात्, तदाह **उपदेशे योऽजिति** । अजित्यस्य उपदेशान्वयित्वेऽपि सौत्रः समासः । अजिति लुप्तषष्ठीकं वा । चिण्वदिति सप्तम्यन्ताद्वतिः स्यसिच्सीयुट्तासिष्वित्युपमेयतः सप्तमीदर्शनात्, तदाह **चिणीवेति** । **अङ्गकार्यमिति** । अङ्गस्येत्यधिकृतत्वादिति भावः । भावकर्मवाचिषु स्यादिष्विति नार्थः, सीयुटो लिङागमतया भावकर्मवाचित्वेऽपि स्यसिच्तासीनां भावकर्मवाचित्वाभावात् । नापि भावकर्मवाचिनि प्रत्यये परे ये स्यादयस्तेष्वित्यर्थः, स्यसिच्तासीनां भावकर्मवाचिप्रत्ययपरत्वसंभवेऽपि सीयुटस्तदसंभवात् । सीयुडागमविशिष्टस्यैव लिङो भावकर्मवाचितया केवलसीयुटो न भावकर्मवाचिप्रत्ययपरकत्वमस्ति । अतो विषयसप्तमीति मत्वाह **भावकर्मणोर्गम्यमानयोरिति** । इड्विधौ स्यसिच्सीयुट्तासिषु इति सप्तमी षष्ठ्या विपरिणम्यते इति मत्वाह **स्यादीनामिडागमश्चेति** । अथ अज्झनग्रहदृशां स्यादीनां च न यथासंख्यम्, व्याख्यानात् । स्यादिषु परेषु अङ्गस्य इडिति नार्थः, 'आर्धधातुकस्येड्वलादेः' इत्यत्र 'आर्धधातुके' इति योगं विभज्य यावानिट् स आर्धधातुकस्यैवेति भाष्ये उक्तत्वात् । चिणि यदङ्गाधिकारविहितं कार्यं तस्यैवात्रातिदेशः, न तु चिणि दृष्टमात्रस्य । तेन घानिष्यते इत्यत्र 'हनो वध लिङि, लुङि च' इति चिणि दृष्टो वधादेशश्चिण्वदिति नातिदिश्यते, तस्य द्वैतीयीकत्वेन अङ्गाधिकारविहितत्वाभावात् । तथा आयिष्यते इत्यत्र इणो गादेशो न । अध्यायिष्यते इत्यत्र इङो गाङादेशो न, द्वैतीयीक-

---

वाच्यम् । 'स्त्रियां क्तिन्' इत्यधिकारात्स्त्रीत्वावधारणेन 'सामान्ये नपुंसकम्' इत्यस्याप्रवृत्तेः, बहुत्वावधारणेनैकवचनाप्रवृत्तेश्चेत्युक्तम् । **स्यसिच्सीयुट्तासिषु** । यद्यप्यजादयो द्वन्द्वेन निर्दिष्टास्तथाप्युपदेश इत्यच एव विशेषणं न हनादीनामव्यभिचारात्तदाह **उपदेशे योऽजिति** । उपदेशे अजन्तानामिति न व्याख्यातम्, तथाहि सति णिजन्तस्य न स्यात्तस्योपदेशाभावात् । उपदेशो हि साक्षादुच्चारणम् । न च णयन्तस्य तदस्ति । चिण्वदिति सप्तम्यन्ताद्वतिः, 'स्यसिच्सीयुट्तासिषु—' इति प्रतियोगिनि सप्तमीनिर्देशादतो व्याचष्टे **चिणीवेति** । ननु चिणि दृष्टमात्रस्य वृद्ध्यादिकार्यस्यातिदेशे घानिष्यते आयिष्यते अध्यायिष्यते इत्यत्र हनो वधादेशः, इणो गादेशः, इङो गाङादेशोऽपि स्यादिति चेत् । नैवम् । अङ्गाधिकारबलेन आङ्गस्यैव कार्यस्यातिदेशात् ।

संनियोगशिष्टत्वात्तदभावे न । इहार्धधातुके इत्याधिकृतं सीयुटो विशेषणम्, नेतरेषामव्यभिचारात् । चिण्वद्भावाद्वृद्धिः । नित्यश्चायं वल्निमित्तो विघाती ।

ट

त्वात् । चिण्वत्त्वाभावे अयमिड् नेत्याह **अयमिडिति** । सेट्कस्य वलादित्वलक्षण इट् तु स्यादेवेति भावः । ननु भूयेतेति विधिलिङि चिण्वत्त्वम् इट् च स्यातामित्यत आह **इहार्धधातुके इति । नेतरेषामिति** । स्यसिच्तासीनां न विशेषणमित्यर्थः । **अव्यभिचारादिति** । स्यसिच्तासीनां सर्वत्रार्धधातुकत्वनियमादिति भावः । अत्र वार्तिकम् ।

'चिण्वद्वृद्धिर्युक् च हन्तेश्च घत्वं दीर्घश्चोक्तो यो मितां वा चिणीति ।
इट् चासिद्धस्तेन मे लुप्यते णिर्नित्यश्चायं, वल्निमित्तो विघाती ॥' इति ।

स्यसिच्सीयुडिति सूत्रस्य वृद्ध्यादि प्रयोजनमित्यर्थः । तत्र वृद्धिं दर्शयति **चिण्वद्भावाद् वृद्धिरिति** । लुटि भू ता इति स्थिते चिण्वत्त्वाद् 'अचोऽञ्णिति' इति वृद्धिरित्यर्थः । इडागमश्चेत्यपि बोध्यम् । तत्फलं तु वक्ष्यते । तथा दाधातोर्लुटि 'आतो युक् चिण्कृतोः' इति युक् । तथा लृटि घानिष्यते इत्यत्र 'हो हन्तेर्ञ्णिन्नेषु' इति घत्वम् । शमेर्हेतुमण्ण्यन्ताल्लुटि शामिता, शमितेत्यत्र 'चिण्णमुलोः–' इति दीर्घः । तथा अनेनैवात्र इटि कृते तस्य आभीयत्वेनासिद्धत्वाद् अनिटीति निषेधाभावाद्

न चैते हन्निण्णादेशा आग्नास्तदेतदाह **अङ्गकार्यं वा स्यादिति । सीयुट इति** । तथा च सीयुट्शब्देन तद्विशिष्टं लक्ष्यत इति भावः । आर्धधातुक इत्यनेन व्यावर्त्यस्तु विधिलिङ् । तेन भूयेतेत्यत्र न भवति । न चात्र 'लिङः सलोपः–' इति सलोपाद्वलादित्वं नास्तीति वाच्यम्, तस्येहानपेक्षणात् । यदाहुः—'चिण्वद् वृद्धिर्युक् च हन्तेश्च घत्वं दीर्घश्चोक्तो यो मितां वा चिणीति । इट् चासिद्धस्तेन मे लुप्यते णिर्नित्यश्चायं वल्निमित्तो विघाती ।' इति । अस्यार्थः—चिण्वदित्यतिदेशस्य वृद्ध्यादिकं प्रयोजनम् । तथा हि–भाविता भाविष्यते इत्यादौ वृद्धिः । दायिता दायिषीष्टेत्यादौ युक् । घानिता घानिष्यते इत्यादौ घत्वम् । हेतुमण्ण्यन्तात्कर्मणि लकारे शामिता शमिता शामिष्यते शमिष्यते इत्यादौ चिण्णमुलोरिति मितामुपधाया वा दीर्घः । अत्रैव शामितेत्यादौ 'स्यसिच्सीयुट्–' इत्यनेन कृत इड् आभीयत्वेनासिद्धस्तेनानिटीति निषेधो न प्रवर्तत इति णिलोपो भवति । भाविष्यते इत्यदौ भू स्य इति स्थिते परमपि वलादिलक्षणमिटं बाधित्वा चिण्वदिडेव भवति । यतोऽयं नित्यः । वल्निमित्तो विघाती त्वनित्यः । साप्तमिके तस्मिन्कृतेऽयं चिण्वदिड् भवति । असिन्कृते तु स न भवति । वलादिनिमित्तस्य विहितत्वात् । एवं च नित्यत्वात् सेड्भ्योप्ययमेवेड् भवति । एतदभावपक्षे तु सेड्भ्यो वलादिलक्षण इड् भवतीति बोध्यम् ।

१–इदं वाक्यं बहुत्र नोपलभ्यते ।

भाविता, भविता। भाविष्यते, भविष्यते। भूयताम्। अभूयत। भूयेत। भाविषीष्ट, भविषीष्ट। २७५८ **चिण्भावकर्मणोः।** (३-१-६६) च्लेश्चिण्स्याद्भावकर्मवाचिनि तशब्दे परे। अभावि। अभाविष्यत, अभविष्यत। तिङोऽकर्मत्वात्कर्मणि न द्वितीया। **अनुभूयते आनन्दश्चैत्रेण त्वया मया च।** अनुभूयेते अनुभूयन्ते। त्वमनुभूयसे। अहमनुभूये। अन्वभावि। अन्वभाविषाताम्, अन्वभविषाताम्। णिलोपः। भाव्यते। भावयांचक्रे। भावयांबभूवे। भावयामासे इह तशब्दस्य एशि, इट एत्वे च कृते 'ह एति' (सू २२५०) इति हत्वं न,

---

णिलोपः। तथा भाविष्यते इत्यत्र भू स्य इति स्थिते परमपि वलादिलक्षणम् इटं बाधित्वा नित्यत्वादनेन इट्, वलिनिमित्ते इटि कृतेऽकृते च चिण्वदिटः प्रवृत्त्या कृताकृतप्रसङ्गित्वात्। वलादिलक्षणस्त्विड् न नित्यः, चिण्वदिटि कृते वलादित्वस्य विहतत्वेन वलादिलक्षणस्य इटः अप्रवृत्तेः। नित्यश्चायमित्यस्य चिण्वदिडिति शेषः। वल्निमित्त इत्यनन्तरम् इडनित्य इति शेषः। अनित्यत्वे हेतुः—विघातीति। चिण्वदिटो वलादिनिमित्तविघातकत्वादित्यर्थः। एवं च सेट्कत्वेऽप्यनेनैव इट्। एतदभावपक्षे तु सेट्कत्वे वलादिलक्षण इडिति बोध्यम्, तदाह **भवितेति।** चिण्वदिडभावपक्षे वलादिलक्षण इडिति भावः। **चिण् भावकर्मणोः। च्लेरिति।** 'च्लेः सिच्' इत्यतस्तदनुवृत्तेरिति भावः। **तशब्दे परे इति।** 'चिण् ते पदः' इत्यतस्तदनुवृत्तेरिति भावः। **अभावीति।** च्लेश्चिणि कृते 'चिणो लुक्' इति तशब्दस्य लोपः। चिण्विधौ तशब्दे किम्? अभाविषाताम्। अथ अनुपूर्वाद् भूधातोरुपभोगार्थकात्सकर्मकात्कर्मणि लकारे विशेषमाह **तिङोक्तत्वादिति।** कर्तुस्त्वनभिहितत्वात् तृतीयैवेति भावः, तदाह **अनुभूयते आनन्दश्चैत्रेण त्वया मया चेति।** इहानन्दस्य तिङाभिहितत्वात् प्रथमेति भावः। युष्मदस्मदुपात्तयोः कर्त्रोस्त्वनभिहितत्वात् तृतीया। **अनुभूयेते इति।** सुखदुःखे इति शेषः। **अनुभूयन्ते इति।** सुखानीति शेषः। **णिलोप इति।** भूधातोर्णौ वृद्धौ आवादेशे भावि इति ण्यन्तात् कर्मणि लटस्तादेशे यकि णिलोप इत्यर्थः। **भावयामासे इति।** प्रथमपुरुषैकवचने उत्तमपुरुषैकवचने च रूपम्। **इहेति।** भावयामासे इत्यत्र प्रथमैकवचनतशब्दस्य 'लिटस्तझयोः—' इति एशादेशे उत्तमपुरुषैकवचनस्य इटश्च 'टित आत्मनेपदानाम्—' इत्येत्वे च कृते भावयामास् ए इति स्थिते 'ह एति' इति सकारस्य हकारः प्राप्तो न भवतीत्यर्थः। कुत इत्यत आह

चिण् भावकर्मणोः। 'च्लेः सिच्' इत्यतः च्लेरिति 'चिण् ते पदः' इत्यतस्ते इति चानुवर्तते। तत्रत्यं तु चिण्ग्रहणं 'न रुधः' इति निषेधेन तिरोहितमिति

तासिसाहचर्यादस्तेरपि व्यतिहे इत्यादौ सार्वधातुके एव 'ह एति' इति हस्वप्रवृत्ते-रित्याहुः। भाविता। चिण्वदिट आभीयत्वेनासिद्धत्वाण्णिलोपः। पक्षे भावयिता। भाविष्यते, भावयिष्यते। भाव्यताम्। अभाव्यत। भाव्येत। भाविषीष्ट, भावयिषीष्ट। अभावि अभाविषाताम्, अभावयिषाताम्। बुभूष्यते। बुभूषां-चक्रे। बुभूषिता। बुभूषिष्यते। बोभूय्यते। यङ्लुगन्तात्तु, बोभूयते। बोभवां-चक्रे। बोभाविता, बोभविता। 'अकृत्सार्व–' (सू २२९८) इति दीर्घः। स्तूयते विष्णुः। तुष्टुवे। स्ताविता, स्तोता। स्ताविष्यते, स्तोष्यते। अस्तावि अस्ताविषाताम्, अस्तोषाताम्। 'गुणोर्ति–' (सू २३८०) इति गुणः। अर्यते। स्मर्यते। सस्मरे। परत्वान्नित्यत्वाच्च गुणे रपरे कृते अजन्तत्वाभावेऽ-

---

तासीति। 'ह एति' इत्यत्र तासस्त्योरित्यनुवर्तते। तत्र एधिताहे इत्यादौ तासेः सस्य सार्वधातुक एव एति परे हकार इति निर्विवादम्। तथाविधतासिसाहचर्या-दस्तेरपि सकारस्य व्यतिहे इत्यादौ सावधातुक एव परे प्रवृत्तिः। अतो भावयामासे इत्यत्र नास्तेः सकारस्य हकारः, एकारस्यार्धधातुकत्वादित्यर्थः। **भावितेति।** ण्यन्ताद् भावि ता इति स्थिते परत्वाद्वलादिलक्षणमिटं बाधित्वा चिण्वदिटि तस्याभीयत्वेनासिद्धत्वादनिटीति निषेधाभावाण्णिलोपे भावितेति रूपम्। अत एव चिण्वदिड्विधौ उपदेशे योऽजित्येव व्याख्यातम्, न तु उपदेशे अजन्तस्येति, तथा सति हि णिजन्तस्य उपदेशाभावान्न स्यादि भावः। वलादिलक्षणे इटि कृते तु तस्य अनाभीयत्वेन असिद्धत्वाभावादनिटीति निषेधाण्णिलोपाभावे णेर्गुणाया-देशयोः कृतयोर्भावयितेति रूपमिति मत्वाह **पक्षे भावयितेति।** अथ सन्नन्ताद् भूधातोः भावलकारे उदाहरति **बुभूष्यते इति।** यकि सनोऽकारस्य 'अतो लोपः' इति लोपः। **बुभूषिता। बुभूषिष्यते इति।** चिण्वदिटि वलादिलक्षणे इटि च रूपं तुल्यम्। चिण्वदिड्भावपक्षेऽपि तदतिदेशेन प्राप्तां वृद्धिं बाधित्वा परत्वादतो लोपः। अथ यङन्ताद् भूधातोः भावलकारे उदाहरति **बोभूय्यते इति।** यकि यङोऽकारस्य पूर्ववदतो लोपः। द्वियकारकं रूपम्। यङ्लुगन्ताद् बोभूयते इति एकयकारं रूपम्। ष्टुञ्धातोः कर्मलकारे यकि तस्यार्धधातुकत्वाद् 'अतो दीर्घो यञि' इत्यप्राप्तावाह **अकृत्सार्वेति। स्ताविता, स्तोतेति।** चिण्वदिड्भावपक्षे अनिट्कत्वान्नेट्। अथ ऋधातोः कर्मणि लकारे कृते कित्वाद् गुणनिषेधे प्राप्ते आह **गुणोऽर्तीति। अर्यते इति।** गुणे कृते रपरत्वम्। स्मृधातोः कर्मणि लकारे

पुनरत्र णिग्रहणं कृतम्। तशब्दे किम्, अभाविषाताम्। **चिण्वदिट इति।** ण्यन्तस्य धातोरुपदेशाभावेऽप्युपदेशे योऽजिति व्याख्यानाच्चिण्वदिडिह प्रवर्तेत

प्युपदेशग्रहणाच्चिण्वदिट्, आरिता, अर्ता। स्मारिता, स्मर्ता। 'गुणोऽर्ति-' (सू २३८०) इत्यत्र नित्यग्रहणानुवृत्तेरुक्तत्वादेह गुणः, संस्क्रियते। 'अनि-

---

आह स्मर्यते इति। 'गुणोऽर्ति-' इति संयोगादित्वाद् गुणे रपरत्वमिति भावः। ननु लुटि ऋ ता, स्मृ ता इति स्थिते चिण्वदिटं बाधित्वा परत्वाद् गुणः प्राप्नोति नित्यत्वाच्च अकृते कृते च चिण्वदिटि गुणस्य प्राप्तेः। कृते तु गुणे रपरत्वे अजन्तत्वाभाच्चिण्वदिडभावे अनिट्त्वाद्वलादिलक्षणेडभावे अर्ता स्मर्तेत्येव स्यात्, आरिता स्मारितेति न स्यादित्यत आह परत्वादित्यादि। कृते गुणे रपरत्वे अजन्तत्वाभावेऽपि उपदेशे योऽच् तदन्तस्येत्युक्तेश्चिण्वदिड् निर्बाध इत्यर्थः। आरितेति। कृतेऽपि गुणे रपरत्वे चिण्वदिटि उपधावृद्धिः। अर्तेति। चिण्वदिडभावे रूपम्। एवं स्मारिता स्मर्तेत्यपि। ननु संपूर्वात् कृञः कर्मणि लकारे यकि 'रिङ् शयग्लिङ्क्षु' इति रिङादेशे 'संपरिभ्यां करोतौ भूषणे, समवाये च' इति सुटि संस्क्रियते इति वक्ष्यते। तत्र 'गुणोऽर्ति-' इति संयोगादित्वाद् गुणः स्यादित्यत आह नित्यग्रहणानुवृत्तेरिति। 'नित्यं छन्दसि' इत्यतो नित्यमित्यनुवृत्तेः 'गुणोऽर्ति-' इत्यत्र नित्यं यः संयोगादिस्तस्यैव संयोगादिलक्षणो गुण इति लभ्यते। कृञ्तु न नित्यं संयोगादिः, संपरिपूर्वकत्वाभावे तदभावादिति भावः। अथ संस्-

---

एवेति भावः। परत्वादिति। चिण्वदिडपेक्षया। नित्यत्वादिति। न च कृते चिण्वदिटि वृद्धिप्रवृत्त्या गुणस्य नित्यत्वं नेति शङ्क्यम्। 'अचो ञ्णिति' इति वृद्धिं बाधित्वा परत्वाद् गुणे रपरत्वे च पश्चाद् 'अत उपधायाः' इति वृद्धिप्रवृत्त्या गुणस्य नित्यत्वानपायात्। उपदेशग्रहणादिति। तत्सामर्थ्यादुपदेशे योऽच् तदन्तत्वम्। ऋधातोर्व्यपदेशिवद्भावेन यत्स्थितं तदादाय णयन्तादप्यारितेत्यादौ चिण्वदिट् प्रवर्तेत इति भावः। नन्वेवं स्मारितेत्यादि न सिध्येत्, स्मृ इत्यस्य उपदेशे योऽच् तदन्तत्वाभावात्। उपदेशेऽजन्तानामिति व्याख्याने तु णयन्तस्य न स्यादित्युक्तत्वादिति चेत्। सत्यम्। अतएवापरितोषान्मनोरमायामुक्तमस्तु वा उपदेशे यदजन्तं तस्येति व्याख्यानम्। अङ्गस्येति व्यधिकरणषष्ठी अङ्गावयवस्याजन्तस्येत्यर्थ इति। एवं च णिजन्तेऽपि शामितेत्यादौ चिण्वदिट् सिध्यति, व्यपदेशिवद्भावेन णिजेव णिजन्तस्तदवयवकं शामीत्यङ्गमित्याश्रयणात्। आरिता स्मारितेत्याद्यपि सिध्यति। ऋधातुः स्मृधातुश्चोपदेशेऽजन्तस्तदवयवकं भवत्यार् स्मारित्यङ्गमिति दिक्। नित्यग्रहणानुवृत्तेरिति। 'नित्यं छन्दसि' इति सूत्रात्। काशिकायां तु सुटो बहिरङ्गलक्षणस्यासिद्धत्वादभक्तत्वाद्वा संयोगादित्वमङ्गस्य नास्तीति गुणोऽत्र न प्रवर्तत इत्युक्तम्। 'सुट् कात्पूर्वः' इति विधीयमानः कभक्तो न त्वङ्गभक्तस्तेनासंयोगाद्येव अङ्गमित्यभक्तत्वादित्य-

दिवाम्-' (सू ४१२) इति नलोपः, नस्यते। इदितस्तु नन्द्यते। संप्रसारणम्, इज्यते। 'अयङ् यि क्ङिति' (सू २३९९)। शय्यते। २७५९ तनोतेर्यके। (६-४-४४) आकारोऽन्तादेशो वा स्यात्। तायते, तन्यते। 'ये विभाषा' (सू २३१९), जायते, जन्यते। २७६० तपोऽनुतापे च। (३-१-६५) तपश्च्लेश्चिण्न स्यात्कर्मकर्तर्यनुतापे च। अन्वतप्त पापेन, पापं कर्तृ, तेनाभ्याहत इत्यर्थः, कर्मणि लुङ्। यद्वा पापेन पुंसा कर्त्रा अशोचीत्यर्थः। 'घुमास्था-' (सू २४६२) इतीत्वम्। दीयते। धीयते। 'आदेचः-'

धातोर्भावलकारे यकि विशेषमाह अनिदितामिति नलोप इति। इदितस्त्विति। 'टु नदि समृद्धौ' इत्यस्माद्भावलकारे यकि इदित्वान्नलोपो नेत्यर्थः। अथ यजधातोः कर्मलकारे यकि विशेषमाह संप्रसारणमिति। 'वचिस्वपियजादीनाम्-' इत्यनेनेति भावः। शीङ्धातोर्भावलकारे यकि विशेषमाह अयङ्यि क्ङितीति। तनोतेर्यकि। 'विड्वनोः-' इत्यतो आदिति 'ये विभाषा' इत्यतो विभाषेति चानुवर्तते, तदाह आकारोऽन्तादेशो वा स्यादिति। शेषपूरणमिदम्। तायते, तन्यते इति। कर्मणि लकारः। तपोऽनुतापे च। 'च्लेः सिच्' इत्यतः च्लेरिति 'चिण् ते-' इत्यतश्चिण् इति 'न रुधः-' इत्यतो नेति चानुवर्तते। चकाराद् 'अचः कर्म-' इत्यतः कर्मकर्तरीति समुच्चीयते, तदाह तपश्च्लेरित्यादि। तत्र कर्मकर्तरि कर्मकर्तृप्रक्रियायामुदाहरिष्यति। अनुतापे कर्मलकारे उदाहरति अन्वतप्त पापेनेति। पापेनेति कर्तरि तृतीयेति मत्वाह पापं कर्त्रिति। अनुपूर्वस्य तपेः पश्चात्तापार्थकत्वे असंगतिः। नहि पापस्य सूर्यादिवत्तपनशक्तिरस्ति। शोकार्थकत्वे अकर्मकत्वापत्तिरित्यत आह अभ्याहत इति। अनुपूर्वस्तपिरिह उपसर्गवशाद् अभिहननार्थक इति भावः। तस्य च सकर्मकत्वात् कर्मलकार उपपद्यते इति मत्वाह कर्मणि लुङिति। शोकार्थकत्वमाश्रित्य भावे वा लुङित्याह यद्वा पापेन पुंसा कर्त्रेति। परिणाममसमीक्ष्य सहसा किञ्चिदकृत्यं कृत्वा पश्चाद् दुःखमन्वभवदित्यर्थः। दुःखानुभवः शोकः। धात्वर्थेनोपसंग्रहादकर्मकः। शुच शोके अकर्मकः। पुत्रमनुशोचतीत्यत्र तु वियुक्तं पुत्रं स्मृत्वा शोचतीत्यर्थः। स्मरणे पुत्रस्य कर्मत्वाद् द्वितीयेत्यविरोधः। अथ दाधातोर्धाधातोश्च कर्मलकारे यकि विशे-

---

स्याशयः। तनोतेर्यकि। 'विड्वनोः-' इति सूत्रादादिति, 'ये विभाषा' इत्यतो विभाषेति चानुवर्तते। यकि किम्, तंतन्यते। तपोऽनु। चकारेण 'अचः कर्मकर्तरि' इत्यतः कर्मकर्तरीत्येतदनुकृष्यते। कर्मण्युदाहरणमिति ध्वनयति अभ्याहत इत्यर्थ इति। भावेऽपीदमुदाहरणमित्याह पापेन पुंसेति। अविचार्य कर्म कृत्वा

(सू २३७०) इत्यत्र अशितीति कर्मधारयादित्संज्ञकशकारादौ निषेधः । एश आदिशित्वाभावात्तस्मिन्नात्त्वम्, जग्ले । **२७६१ आतो युक्चिण्कृतोः ।** (७-३-३३) आदन्तानां युगागमः स्याच्चिणि ञिति णिति कृति च । दायिता, दाता । दायिषीष्ट, दासीष्ट । अदायि । अदायिषाताम्, अदिषाताम् । अधायिषाताम्, अधिषाताम् । अग्लायिषाताम्, अग्लासाताम् । हन्यते । 'अचिण्णलोः' (सू २५७४) इत्युक्तेर्हनस्तो न । 'हो हन्तेः' (सू ३२८)

षमाह **घुमास्थेतीत्त्वमिति** । ग्लैधातोर्भावे लिटस्तादेशस्य एशादेशे 'आदेचः–' इत्यात्त्वस्य अशितीति निषेधमाशङ्क्याह **आदेच इत्यत्रेति** । श् चासाविच्च इति कर्मधारयाश्रयणादित्संज्ञकशकारादौ प्रत्यये परे आत्त्वस्य निषेधो लभ्यते । एशः शित्त्वेऽपि आदिभूतश्कारेत्कत्वाभावान्निषेधाभावात्तस्मिन्न् एशि परे आत्त्वं भवत्येवेत्यर्थः । **जग्ले इति** । आत्वे कृते 'आतो लोप इटि च' इति तस्य लोप इति भावः । **आतो युक्** । अङ्गस्येत्यधिकृतमाता विशेषितम्, तदन्तविधिः । 'अचो ञ्णिति' इत्यतो ञ्णितीत्यनुवृत्तं कृत एव विशेषणम्, न तु चिणः, तस्य णित्त्वाव्यभिचारात्, तदाह **आदन्तानामित्यादि** । **दायितेति** । चिण्वदिट्पक्षे युक् । **अदायिषातामिति** । 'स्थाघ्वोरिच्च' इत्येतद् बाधित्वा परत्वाच्चिण्वदिटि कृते 'घुमास्था–' इतीत्त्वं न, अजादित्वात् । पुनः 'स्थाघ्वोरिच्च' इति तु न भवति, अझलादित्वात् । तत्र हि 'इको झल्' इति सूत्राद् झल इत्यनुवृत्तम् । तथा च झलादिरेव सिच् किदिति लाभादिडादिः सिच् न कित । तत्संनियोगादित्त्वमपि न भवतीत्याहुः । वस्तुतस्तु सत्यपि तस्मिन्नात्र काचित् क्षतिः । सिचः कित्त्वेऽप्यनिग्लक्षणाया वृद्धया रूपसिद्धेरिति दिक् । अथ हन्धातोः कर्मलकारे आह **हन्यते इति** । **अचिण्णलोरिति** । लुटि चिण्वदिटि वृद्धौ 'हनस्तोऽचिण्णलोः' इति हनो नकारस्य तकारो

पश्चादशोचीत्यर्थः । कर्मकर्तरि तु तत्प्रक्रियायामुदाहरिष्यति **आतो युक्** । 'अचो ञ्णिति' इत्यतो ञ्णितीत्यनुवर्तते । तच्च कृतो विशेषणं न तु चिणः । तस्य णित्त्वेनाव्यभिचारात् । चिण्कृतोः किम्, चौडिः । बालाकिः । बाह्वादित्वादिञ् । ददौ । ञ्णितीति किम्, पानीयम् । दानीयम् । **अदायिषातामिति** । 'स्थाघ्वोरिच्च' इत्येतद्बाधित्वा परत्वाच्चिण्वदिटि कृते 'घुमास्था–' इतीत्त्वं न भवति । अजादित्वात् । 'स्थाघ्वोरिच्च' इत्यपि पुनर्न भवति । अज्झलादित्वादित्याहुः । तेषामयमाशयः—'इको झल्' इति सूत्रात् झलनुवर्तते । तथा च झलादिरेव सिच् किच्त्वयमिडादिः सिच् । एवं च तत्संनियोगशिष्टत्वादित्त्वमप्यत्र न भवतीति । वस्तुतस्तु सत्यपि तस्मिन्नेह काचित्क्षतिः । सिचः कित्त्वेऽप्यनिग्लक्षणाया अनिषेधाद् 'अचो

इति कुत्वम् । घानिता, हन्ता । घानिष्यते, हनिष्यते । आशीर्लिङि वधादेशस्यापवादाच्चिण्वद्भावः, आर्धधातुके सीयुटीति विशेषविहितत्वात्, घानिषीष्ट । पक्षे वधिषीष्ट । अघानिषाताम्, अहसाताम् । पक्षे वधादेशः । अवधि ।

न भवति, चिण्वत्त्वादित्यर्थः । **कुत्वमिति** । तस्य णिति विहितस्यात्र चिण्वत्त्वात् प्राप्तिरिति भावः । **घानिष्यते इति** । 'ऋद्धनोः–' इति बाधित्वा नित्यत्वाच्चिण्वदिट् । 'ऋद्धनोः–' इति तु चिण्वदिटि कृते न भवतीत्यनित्यम्, तत्र वलीत्यनुवृत्तेरिति भावः । नन्वाशीर्लिङि घानिषीष्टेत्यत्र हन् सीष्ट इति स्थिते परमपि चिण्वत्त्वं बाधित्वा वधादेशः प्राप्नोति, आर्धधातुके विवक्षिते विहितत्वेन वधादेशस्यान्तरङ्गत्वादित्यत आह **आशीर्लिङि वधादेशस्यापवादश्चिण्वद्भाव इति** । ननु घानितेत्यादौ अप्राप्तेऽपि वधादेशे आरम्भात् कथं वधादेशस्य चिण्वद्भावः अपवादः स्यादित्यत आह **आर्धधातुके सीयुटीति** । स्यसिच्सीयुट्–' इति सूत्रे अजन्तस्य स्ये, अजन्तस्य सिचि, अजन्तस्य आर्धधातुके सीयुटि, अजन्तस्य तासौ, इत्यजन्तस्य चत्वारि वाक्यानि। एवं हनग्रहदृशामप्येकैकस्य चत्वारि वाक्यानीति स्थितिः । तत्र हन आर्धधातुके सीयुटि चिण्वदिड्विधिर्निरवकाशत्वाद्वधादेशापवादः, अप्राप्त एव वधादेशे आरम्भात् । वधादेशस्तु न चिण्वदिटोऽपवादः, तस्य वध्यादित्यत्र कर्तरि लिङि चरितार्थत्वादिति भावः । **पक्षे इति** । चिण्वत्त्वाभावपक्षे 'हनो वध लिङि' इति वधादेशे वलादिलक्षणे इटि अतो लोपे रूपम्, वधादेशस्यादन्तत्वात् । न च हनधातोरनुदात्तत्वादुपदेशे एकाच्त्वात्तदीयवधादेशस्यापि तथाविधत्वादिह कथं वलादिलक्षण इडिति वाच्यम्, 'एकाच उपदेशे–' इत्यत्र अच इत्येकत्वसामर्थ्यादेकत्वे सिद्धे पुनरेकग्रहणबलेन य उपदेशे एकाजेव नतु कदाप्यनेकाजिति लभ्यते । तेन वधेर्हन्त्युपदेशमादाय एकाचोऽपि न निषेधः । आदेशोपदेशे अनेकाच्त्वादित्युक्तं प्राक् । लुङि तु सिचश्चिण्वि उपधावृद्धौ कुत्वेन घः । आत्मनेपदेष्वन्यतरस्यामिति वधादेशाभावः । **अघानिषातामिति** । चिण्वदिटि वधादेशाभावपक्षे रूपम् । **अहसातामिति** । चिण्वदिडभावपक्षे 'हनः सिच्–' इति कित्त्वादनुदात्तोपदेशेत्यनुनासिकलोपः ।

ञ्णिति' इति वृद्ध्या रूपनिष्पत्तेः । **आशीर्लिङीति** । न तु लुङि । तत्र चिण्वद्भावाद् 'आत्मनेपदेष्वन्यतरस्याम्' इति वधादेशस्यापि वैकल्पिकतया येन नाप्राप्तिन्यायाभावादिति भावः । **आर्धधातुके सीयुटीत्यादि** । यद्यपि 'हनो वध लिङि' इत्यत्रापि आर्धधातुकाधिकारादार्धधातुके लिङीत्यपि समानम्, तथापि लिङिति पदद्वयसाधारणम्, सीयुट् तु आत्मनेपद एवेति विशेषविहितत्वमस्तीति भावः । **अहसातामिति** । चिण्वदिटोऽभावे 'हनः सिच्' इति कित्त्वाद् 'अनुदात्तोपदेश–' इत्यनुना-

अवधिषाताम् । अघानिष्यत, अहनिष्यत । नच स्यादिषु चिण्वदित्यतिदेशा- द्वधादेशः स्यादिति वाच्यम्, 'अङ्गस्य' (सू २००) इत्यधिकारादाङ्गस्यैवाति- देशात् । गृह्यते । चिण्वदिटो न दीर्घत्वम्, प्रकृतस्य वलादिलक्षणस्यैवेटो 'ग्रहोऽलिटि–' (सू २४६२) इत्यनेन दीर्घविधानात् । ग्राहिता, ग्रहीता । ग्राहिष्यते, ग्रहीष्यते । ग्राहिषीष्ट, ग्रहीषीष्ट । अग्राहि अग्राहिषाताम्, अग्रही- षाताम् । दृश्यते । अदर्शि अदर्शिषाताम् । सिचः कित्त्वादम्न, अदृक्षाताम् ।

पक्षे अवधीति । 'आत्मनेपदेष्वन्यतरस्याम्' इति वधादेशपक्षे इत्यर्थः । अवधिषतामिति । 'आत्मनेपदेष्वन्यतरस्याम्' इति वधादेशस्यापि पाक्षिकतया अप्राप्तेऽपि वधादेशे चिण्वत्त्वस्यारम्भाज्ञापवादत्वमिति भावः । ननु चिणि वधादेशस्य दृष्टत्वात् स्यादिषु चिण्वत्त्वाद्वधादेशः स्यादित्याशङ्क्य परिहरति न चेत्यादिना । आङ्गस्यैवेति । वधादेशस्तु द्वैतीयीकः, न त्वङ्गाधिकारस्थ इति भावः । अथ 'ग्रह उपादाने' इत्यस्माददुपधात् कर्मलकारे उदाहरति गृह्यते इति । 'ग्रहिज्या–' इति संप्रसारणम् । अथ लुटि तासि चिण्वदिटि 'ग्रहोऽलिटि–' इति दीर्घमाशङ्क्याह चिण्वदिटो न दीर्घत्वमिति । कुत इत्यत आह प्रकृतस्येति । वलादिलक्षणस्य इटः प्रकृतत्वात्तस्यैव 'ग्रहोऽलिटि–' इति दीर्घविधौ ग्रहणम्, नतु चिण्वदिट इति भाष्ये स्पष्टम् । ग्राहितेति । चिण्वदिटि रूपम् । ग्रहीतेति । चिण्वदिडभावपक्षे वलादिलक्षणस्य इटो दीर्घे रूपम् । अथ दृशेः कर्मलकारे उदाहरति दृश्यते इति । लिटि ददृशे । लुटि तासि चिण्वदिट्पक्षे दर्शिता । चिण्वत्त्वाभावे 'सृजिदृशोः–' इत्यम् । द्रष्टा । दर्शिष्यते द्रक्ष्यते । दर्शिषीष्ट । चिण्वदिडभावे तु 'लिङ्सिचावात्मने- पदेषु' इति कित्त्वात् 'सृजिदृशोः–' इत्यम्न । नापि लघूपधगुणः । दृक्षीष्ट । अदर्शीति । चिणि लघूपधगुणः । अदर्शिषतामिति । चिण्वदिटि रूपम् । चिण्वत्त्वाभावे त्वाह सिचः कित्त्वादम्नेति । 'लिङ्सिचावात्मनेपदेषु' इति सिचः कित्त्वात् 'सृजिदृशोः–' इत्यम्न भवति, अकितीति पर्युदासादित्यर्थः । अथ गॄधातोः कर्मलकारे यकि ऋत इत्त्वे 'हलि च' इति दीर्घे गीर्यते । जगरे । लुटि तासि चिण्वत्त्वपक्षे, गारिता । चिण्वत्त्वा- भावे वलादिलक्षणे इटि गुणे रपरत्वे गरिता गरीता, 'वृतो वा' इति वा दीर्घः । गारिष्यते गरिष्यते गरीष्यते । गीर्यताम् । अगीर्यत । गीर्येत । गारिषीष्ट । चिण्वत्त्वा- भावपक्षे तु 'लिङ्सिचोरात्मनेपदेषु' इति इड्विकल्पः । इडभावपक्षे 'उश्च' इति कित्त्वम्, इत्त्वम्, रपरत्वम्, 'हलि च' इति दीर्घः, षत्वम्, गीर्षीष्ट । इट्पक्षे

सिकलोपः । चिणि वधादेशस्य दृष्टत्वाच्चिण्वद्भावेन स्यादिषु प्राप्तिमाशङ्क्य परिहरति न चेत्यादिना । अदर्शिषातामिति । 'न दृशः' इति क्सस्य निषेधादिह सिचि

गिरतेर्लुङि ध्वमि चतुरधिकं शतम्। तथा हि–चिण्वदिटो दीर्घो नेत्युक्तम्, अगारिध्वम्। द्वितीये त्विटि 'वृतो वा' (सू २३४१) इति वा दीर्घः, अगरीध्वम्, अगरिध्वम्। एषां त्रयाणां लत्वं ढत्वं द्वित्वत्रयं चेति पञ्च वैकल्पिकानि, इत्थं षण्णवतिः। 'लिङ्सिचोः–' (सू २४२८) इति विकल्पा-

---

तु, गरिषीष्ट। लुङि अगारि अगारिषाताम्, अगीर्षाताम्, अगरिषाताम्। इति सिद्धवत्कृत्याह **लुङि ध्वमि चतुरधिकं शतमिति**। रूपाणीति शेषः। तदेवोपपादयति **तथाहीति**। **अगारिध्वमिति**। गॄ स् ध्वम् इति स्थिते चिण्वदिटि वृद्धौ रपरत्वे 'धि च' इति सलोपे रूपमिति भावः। **द्वितीये त्विटीति**। चिण्वदिडभावपक्षे वलादिलक्षणे सिच इटि ॠकारस्य गुणे रपरत्वे 'धि च' इति सलोपे 'वृतो वा' इति दीर्घविकल्पे अगरिध्वम्, अगरीध्वम् इति रूपद्वयमित्यर्थः। **एषामिति**। एषां त्रयाणां मध्ये एकैकस्मिन् रेफस्य 'अचि विभाषा' इति लत्वम्। 'विभाषेटः' इति वा धस्य ढत्वम्। तथा धस्य तदादेशढस्य वस्य मस्य च द्वित्वत्रयमित्येवं पञ्च वैकल्पिकानीत्यर्थः। तत्र **धढयोर्मस्य च** 'अनचि च' इति द्वित्वविकल्पः। वकारस्य तु मय इति पञ्चमीमाश्रित्य 'यणो मयः–' इति द्वित्वविकल्प इति विवेकः। यद्यपि धढयोर्वस्य मस्य च द्वित्वचतुष्टयमिति वक्तुमुचितम्, तथापि ढस्य धस्थानिकतया धढयोरेकत्वमभिप्रेत्य द्वित्वत्रयमित्युक्तिः। **इत्थमिति**। एवं च त्रयाणामेषां लत्वविकल्पे रेफवन्ति त्रीणि, लकारवन्ति त्रीणि इति षट्। एषु षट्सु धस्य द्वित्वविकल्पे एकधानि षट्, द्विधानि च षडिति द्वादश। तथा रेफवत्सु त्रिषु लाकारवत्सु च त्रिषु ढस्य द्वित्वविकल्पे एकढानि षट्, द्विढानि च षडिति द्वादश। उभयेषामपि द्वादशानां मेलने चतुर्विंशतिः। एषु वस्य द्वित्वविकल्पे एकवानि चतुर्विंशतिः, द्विवानि चतुर्विंशतिरित्यष्टाचत्वारिंशत्। एषु मस्य द्वित्वविकल्पे एकमान्यष्टाचत्वारिंशत्, द्विमान्यष्टाचत्वारिंशदिति षण्णवतिरित्यर्थः। **लिङ्सिचोरितीति**। चिण्वदिडभावपक्षे वलादिलक्षणस्य इटो 'लिङ्सिचोः–' इति विकल्पितत्वात्तदभावपक्षे 'उश्च' इति सिचः कित्वाद् गुणाभावे ॠत इत्वे रपरत्वे 'हलि च' इति दीर्घे रेफादिणः परत्वाद् 'इणः षीध्वम्–' इति नित्यं ढत्वे अगीर्ढ्वमिति

चिण्वदिट्। **सिचः कित्त्वादिति**। 'लिङ्सिचावात्मनेपदेषु' इत्यनेन। **लत्वमिति**। 'अचि विभाषा' इति। गिरते रेफस्य लत्वे षट्। **ढत्वमिति**। 'विभाषेटः' इत्यनेन षण्णां ढत्वे द्वादश। **द्वित्वत्रयं चेति**। 'अनचि च' इति द्वादशानां मध्ये षण्णां ढस्य षण्णां धस्य च द्वित्वे चतुर्विंशतिः। मय इति पञ्चमी यण इति षष्ठीति पक्षे वकारस्य द्वित्वेऽत्वष्टाचत्वारिंशत्। 'अनचि च' इति मकारस्य

द्विर्भावे 'उश्च' (२३६८) इति कित्त्वम्, इत्वं रपरत्वं 'हलि च' (सू ३५४) इति दीर्घः, 'इणः षीध्वम्-' (सू २२४७) इति नित्यं ढत्वम्, अगीढ्वम्। ढधमानां द्वित्वविकल्पेऽष्टौ । उक्तषण्णावत्या सह सङ्कलने उक्ता संख्येति ।

इड् दीर्घश्चिण्वदिट् लत्वं ढत्वं द्वित्वत्रिकं तथा ।
इत्यष्टानां विकल्पेन चतुर्भिरधिकं शतम् ॥

हेतुमण्ण्यन्तात्कर्मणि लः । यक् णिलोपः । शम्यते मोहो मुकुन्देन ।

२७६२ चिण्णमुलोर्दीर्घोऽन्यतरस्याम् । (६-४-९३) चिण्परे णमुल्परे च णौ मितामुपधाया दीर्घो वा स्यात् । प्रकृतो 'मितां ह्रस्वः' (सू २५६८) एव तु न विकल्पितः, णयन्तात्णौ ह्रस्वविकल्पासिद्धेः । -दीर्घविधौ हि णिचो

रूपमित्यर्थः । **ढधमानामिति** । ढस्य 'अचो रहाभ्याम्-' इति द्वित्वविकल्पे एकढं द्विढमिति द्वे रूपे । तयोः धस्य 'यणो मयः-' इति द्वित्वविकल्पे एकधे द्वे द्विधे द्वे इति चत्वारि । एषु चतुर्षु मस्य 'अनचि च' इति द्वित्वविकल्पे एकमानि चत्वारि द्विमानि चत्वारीत्यष्टौ रूपाणीत्यर्थः । **षण्णवत्येति** । उक्तषण्णवत्या अष्टानां मेलने सति या संख्या सिध्यति सा चतुरुत्तरशतसंख्या उक्तेति ज्ञेयमित्यर्थः । उक्तप्रक्रियां श्लोकेन संगृह्णाति **इड्दीर्घ इत्यादिना** । वलादिलक्षण इट्, 'वृतो वा' इति दीर्घः । अजन्तलक्षणः चिण्वदिट्, 'अचि विभाषा' इति लत्वम्, 'विभाषेटः' इति वा ढत्वम्, धढमानां द्वित्वत्रिकमित्यष्टानां विकल्पात् चतुरधिकं शतं रूपाणीत्यर्थः । शम्यते मोहो मुकुन्देनेत्यत्र प्रक्रियां दर्शयति **हेतुमण्ण्यन्तादिति** । शमधातोर्हेतुमण्णौ उपधावृद्धौ अमन्तत्वेन मित्वाद्ध्रस्वे शमीत्यस्मात्कर्मणि लः, न तु भावे, हेतुमण्ण्यन्तस्य सकर्मकत्वनियमादिति भावः । **यगिति** । तङि कृते 'सार्वधातुके यक्' इत्यनेनेति शेषः । **णिलोप इति** । 'णेरनिटि' इत्यनेनेति शेषः । लुटि तासि शमि इ ता इति स्थिते अमन्तत्वेन मित्वान्नित्यमुपधाह्रस्वे प्राप्ते **चिण्णमुलोः** । 'दोषो णौ-' इत्यतो णाविति 'ऊदुपधाया गोहः' इत्यस्मादुपधाया इति 'मितां ह्रस्वः' इत्यतो मितामिति चानुवर्तते, तदाह **चिण्परे इत्यादिना** । नन्विह दीर्घग्रहणं व्यर्थम्, चिण्णमुलोरन्यतरस्यामित्येतावतैव 'मितां ह्रस्वः' इति पूर्वसूत्रादनुवृत्तस्य ह्रस्वस्य विकल्पे दीर्घविकल्पस्य सिद्धेरित्यत आह **प्रकृतो मितां**

द्वित्वे षण्णवतिः । **ढधमानामिति** । 'अचो रहाभ्याम्-' इति ढस्य द्वित्वे द्वयम् । द्वयोरपि धस्य 'यणो मयः-' इति द्वित्वे चत्वारि । चतुर्णामपि मस्य 'अनचि च' इति द्वित्वे त्वष्टौ । **चिण्णमुलोः** । शामितेत्यादौ 'जनीजॄष्-' इत्यादिना मित्त्वेन मितामुपधाया नित्यं ह्रस्वे प्राप्ते दीर्घोऽनेन विकल्प्यते **णयन्ताण्णा-**

लोपो न स्थानिवदिति दीर्घः सिध्यति । ह्रस्वविधौ तु स्थानिवत्त्वं दुर्वारम् । भाष्ये तु 'पूर्वत्रासिद्धे न स्थानिवत्' इत्यवष्टभ्य द्विर्वचनसवर्णानुस्वारदीर्घजश्चरः प्रत्याख्याताः । णाविति जातिपरो निर्देशः । दीर्घग्रहणं चेदं मास्त्विति तदाशयः ।

ह्रस्व एव तु न विकल्पित इति । कुत इत्यत आह ण्यन्ताण्णाविति । शमधातोर्ण्यन्ताण्णौ पूर्वणेर्लोपे लुटि तासि ण्यन्तस्याजन्तत्वाच्चिण्वदिटि तस्याभीयत्वेनासिद्धतया अनिटीति निषेधाभावाण्णिलोपे दीर्घविकल्पे सति शमिता शामितेति रूपद्वयमिष्यते । ह्रस्वविकल्पस्य विधौ तु ह्रस्वविकल्पो न स्यात् । प्रथमणिलोपस्य 'अचः परस्मिन्–' इति स्थानिवत्त्वेन व्यवहिततया चिण्परकणिपरकत्वाभावादित्यर्थः । दीर्घविकल्पविधौ तु न दोष इत्याह दीर्घविधाविति । दीर्घविकल्पविधौ हि प्रथमस्य णिचो लोपो न स्थानिवत्, दीर्घविधौ स्थानिवत्त्वनिषेधात् । अतोऽत्र दीर्घविकल्पः सिध्यति । ह्रस्वविधौ तु प्रथमणिलोपस्य स्थानिवत्त्वं दुर्वारम्, तत्र स्थानिवत्त्वनिषेधाभावादित्यर्थः । भाष्ये त्विति । न पदान्तसूत्रस्थभाष्ये तु 'पूर्वत्रासिद्धे न स्थानिवद्' इत्येव सिद्धत्वाद् न पदान्तसूत्रे द्विर्वचनसवर्णानुस्वारदीर्घजश्चरः प्रत्याख्याताः । सुद्ध्युपास्य इत्यत्र 'अनचि च' इति द्विर्वचनस्य, शिण्ढीत्यत्र 'नश्च' इत्यनुस्वारस्य 'अनुस्वारस्य ययि–' इति परसवर्णस्य च, प्रतिदीव्न इत्यत्र 'हलि च' इति दीर्घस्य, सग्धिरित्यत्र 'झलां जश् झशि' इति जश्त्वस्य, जक्षतुरित्यत्र 'खरि च' इति चर्त्वस्य च पूर्वत्रासिद्धीयत्वादित्यर्थः । ननु ण्यन्ताण्णौ 'चिण्णमुलोः–' इति दीर्घे कर्तव्ये प्रथमणिलोपस्य स्थानिवत्त्वं दुर्वारम्, 'चिण्णमुलोः–' इति दीर्घस्य पूर्वत्रासिद्धीयत्वाभावात् । ततश्च प्रथमणिचा व्यवहितत्वाद् दीर्घानापत्तिः । एवं च तत्र दीर्घे कर्तव्ये स्थानिवत्त्वनिवारणाय दीर्घग्रहणस्यावश्यकत्वात्कथं दीर्घग्रहणप्रत्याख्यानमित्यत आह णावितीति । 'चिण्णमुलोः–' इति दीर्घविधौ चिण्परे णमुल्परे च णौ इत्यत्र णाविति णित्वजातिप्रधानो निर्देशः । चिण्णमुल्परकणित्वजातौ परत इति लभ्यते । णित्वजातिश्च णिद्वयेऽस्तीति प्रथमणेः स्थानिवत्त्वेऽपि दीर्घो निर्बाध इति न पदान्तसूत्रे दीर्घग्रहणप्रत्याख्यानभाष्यस्या-

---

विति । णिलोपस्य स्थानिवत्त्वेन व्यवधानादिति भावः । दीर्घः सिध्यतीति । 'न पदान्त–' इति निषेधादित्यर्थः । ननु त्रिपादीस्थे दीर्घे कर्तव्ये स्थानिवत्त्वाभावः 'पूर्वत्रासिद्धम्' इत्यनेनैव सिद्ध इति दीर्घग्रहणस्योपयोगाभावेऽपि ण्यन्ताण्णौ 'चिण्णमुलोः–' इति दीर्घे कर्तव्ये स्थानिवद्भावनिवारणाय दीर्घग्रहणमवश्यकमित्यत आह जातिपरो निर्देश इति । इदं मास्त्विति । ह्रस्वविकल्पेनापीष्टं सिध्यतीति भावः । वस्तुतस्तु 'चिण्णमुलोः–' इति सूत्रे दीर्घग्रहणं कर्तव्यमेव । तथा हि ।

शामिता, शमिता, शमयिता । शामिष्यते, शमिष्यते, शमयिष्यते । यङन्तात्णिच्, शंशम्यते । शंशामिता, शंशमिता, शंशमयिता । यङ्लुगन्तात्णिच्यप्येवम् । भाष्यमते तु यङन्तात्चिण्वदिटि दीर्घो नास्तीति विशेषः । णयन्तत्वाभावे शम्यते मुनिना । **२७६३ नोदात्तोपदेशस्य मान्तस्यानाचमेः ।**

शय इत्यर्थः । **शामिता, शमितेति** । शमधातोर्ण्यन्ताल्लुटि तासि चिण्वदिटि दीर्घविकल्पः । **शमयितेति** । चिण्वत्त्वाभावे वलादिलक्षणे इटि रूपम् । **यङन्तादिति** । शमधातोर्यङि शंशम्य इत्यस्माद् हेतुमण्णौ 'यस्य हलः' इति यकारलोपे अतो लोपे शंशमि इत्यस्मात् कर्मलकारे णिलोपे शंशम्यते इति रूपमित्यर्थः । **शंशामिता, शंशमितेति** । 'चिण्णमुलोः—' इति दीर्घविकल्पः । **शंशमयितेति** । चिण्वत्त्वाभावे वलादिलक्षणे इटि रूपम् । **भाष्यमते त्विति** । न पदान्तसूत्रे दीर्घग्रहणप्रत्याख्यानपरभाष्यमते त्वित्यर्थः । **यङन्तादिति** । णयन्तादिति शेषः । यङन्ताण्णिचि यलोपे अल्लोपे च कृते शंशमीत्यस्माल्लुटि तासि चिण्वदिटि कृते नस्यासिद्धत्वाण्णिलोपे शंशामितेत्यत्र अल्लोपस्य स्थानिवत्त्वेन णिच्परकत्वाभावात् 'चिण्णमुलोः—' इति दीर्घो नास्ति, भाष्यमते न पदान्तसूत्रे दीर्घग्रहणाभावेन स्थानिवत्त्वनिषेधाभावादित्यर्थः । **शम्यते मुनिनेति** । अकर्मकत्वाद्भावे ल इति भावः । **नोदात्तोपदेशस्य** । 'मृजेर्वृद्धिः' इत्यतो वृद्धिरिति 'अत उपधायाः' इत्यत उपधाया इति 'अचो ञ्णिति' इत्यतो ञ्णितीति 'आतो युक्' इत्यतश्चिण्कृतोः इति चानुवर्तते । तत्र ञ्णितीति कृत एव विशेषणम्, न

हेड् अनादरे घटादिः । मितां ह्रस्वे कर्तव्य एच इक् । हिडयति । अत्र चिण्णमुलोः कृतयोर्ह्रस्वे विकल्प्यमाने अहिडि अहेडि इति स्यात् । दीर्घे तु अहिडि अहीडीति भवति । एतच्चात्रैव सूत्रे कैयटे स्पष्टम् । **शंशामितेत्यादि** । चिणि, अशंशमि अशंशामि । णमुलि, शंशमं शंशमं शंशामं शंशाममित्यादि द्रष्टव्यम् । **दीर्घो नास्तीति** । यङोऽल्लोपस्य स्थानिवत्त्वेन णिच्परत्वाभावादुपधादीर्घस्योपधावृत्तेश्चाप्रवृत्तेः । तथा च फलभेदाद्दीर्घग्रहणप्रत्याख्यानं न युज्यत इति भावः । **शम्यते मुनिनेति** । अकर्मकत्वाद् भावे लः । **नोदात्तोपदेशस्य** । ञिति कृति । शमः । दमः । घञ् । णिति कृति । शमकः । दमकः । ण्वुल् । उपदेश इति किम्, शामी । दमी । इह घिनुणि कृते वर्ज्यमानस्वरेण उदात्तत्वाभावान्निषेधो न स्यात् । कथं तर्हि 'हरेर्यदक्रामि पदैककेन खम्' इति श्रीहर्षप्रयोग इति चेत् । अत्राहुः—निवृत्तप्रेषणाद्धातोः प्रकृतेऽर्थे णिचि ततश्चिण् बोध्यः । तथा च णिचोऽकृत्त्वाद् वृद्धेरनिषेधः । मितामिति ह्रस्वस्तु न भवति, 'वा चित्तविरागे' इत्यतो वेत्यनुवर्त्य व्यवस्थितविभाषाश्रयणा-

(७-३-३४) उपधाया वृद्धिर्न स्याच्चिणि ञिति णिति कृति च । अशमि । अदमि । उदात्तोपदेशस्य इति किम्-अगामि । मान्तस्य किम्-अवादि । अनाचमेः किम्-आचामि । 'अनाचमिकमिवमीनामिति वक्तव्यम्' (वा ४११८)। चिणि 'आयादयः-' (सू २३०५) इति णिङभावे, 'अकामि । णिङ्णिचो रप्येवम् अवामि । वध हिंसायाम्, हलन्तः । 'जनीवध्योश्च' (सू २५१२) इति न वृद्धिः, अवधि । जाग्रोऽविचिण्णल्ङित्सु' (सू २४८०) इत्युक्तेर्न गुणः । अजागारि । २७६४ भञ्जेश्च चिणि । (६-४-३३) नलोपो वा स्यात् । अभाजि, अभञ्जि । २७६५ विभाषा चिण्णमुलोः । (७-१-६९)

तु चिणः, अव्यभिचारात् । तदाह उपधाया इत्यादिना । अनुदात्तोपदेशाः संगृहीताः । ततोऽन्यः सर्वोऽपि धातुरुदात्तोपदेशः । आङ्पूर्वश्चमिराचमिः तद्वर्जस्येत्यर्थः । अशमि । अदमीति । शमधातोर्दमधातोश्च लुङि चिणि 'अत उपधायाः' इति वृद्धिर्न । अगामीति । गमेरनुदात्तोपदेशत्वादिति भावः । अवादीति । वदधातुर्न मान्त इति भावः । आचामीति । अनाचमेरित्युक्तेरिह नोपधावृद्धिनिषेधः । अनाचमिकमिवमीनामिति । आचमिकमिवमिवर्जानाम् इत्यर्थः । एवं च कमिवम्योरपि न निषेध इति फलितम् । ननु कमेर्णिङन्तत्वात् केवलस्य तस्य चिणादौ प्रयोग एव नास्तीत्यत आह चिण्यायादय इति । णिङ्णिचोरप्येवमिति । णिङन्तात्णिजन्ताद्वा कमेश्चिणि णिलोपे सति पूर्ववद् रूपं शिष्यते इत्यर्थः । ननु 'जनीवध्योश्च' इति वधेरुपधावृद्धिनिषेधो व्यर्थः । वधादेशस्यादन्ततया अल्लोपस्य स्थानिवत्त्वादेव अवधीत्यादौ उपधावृद्ध्यभावसिद्धेरित्याशङ्क्य वधिर्धात्वन्तरं हलन्तमेव 'जनीवध्योश्च' इत्यत्र गृह्यत इत्यभिप्रेत्याह वध हिंसायां हलन्त इति । भञ्जेश्च चिणि । 'श्नान्नलोपः' इत्यतो नेति लुप्तषष्ठीकम्, लोप इति चानुवर्तते । 'जान्तनशां विभाषा' इत्यतो विभाषेति मत्वा शेषं पूरयति नलोपो वा स्यादिति । अभाजीति । नलोपपक्षे उपधावृद्धिः । विभाषा चिण्णमुलोः । 'लभेश्च' इत्यतो लभेरिति 'इदितो नुम्-'

दिति घटादावुक्तत्वात् । किं च ह्रस्वे जातेऽपि न क्षतिः । 'चिण्णमुलोः-' इति दीर्घविकल्पनाद् इति कथमत उद्यमे यम उपरमे इति प्रयोगः । संज्ञापूर्वकविधेरनित्यत्वाद् वृद्ध्यभाव इति ज्ञेयम् । अथवा उद्यमोपरमशब्दौ घञर्थे कविधानाद् बोध्यौ । णिङ्णिचोरप्येवमिति । णिङन्तात्णिजन्ताद्वा कमेश्चिणि 'णेरनिटि' इति णिलोपे सति रूपं तुल्यमिति भावः । विभाषा । 'लभेश्च' इत्यतो लभेरिति वर्तते । णमुलि लभंलभम् । लाभंलाभम् । प्रादेस्तु प्रलम्भंप्रलम्भमित्येव । अथ ये

लभेर्नुमागमो वा स्यात्। अलम्भि, अलाभि। व्यवस्थितविकल्पत्वात्प्रादेर्नित्यं नुम्। प्रालम्भि। द्विकर्मकाणां तु—

गौणे कर्मणि दुह्यादेः प्रधाने नीहृकृष्वहाम्।
बुद्धिभक्षार्थयोः शब्दकर्मकाणां निजेच्छया॥
प्रयोज्यकर्मण्यन्येषां ण्यन्तानां लादयो मताः।

इत्यतो नुमिति चानुवर्तते इति मत्वा शेषं पूरयति **लभेर्नुमागमो वेति**। ननु प्रालम्भि उपालम्भीत्यादौ उपसर्गपूर्वस्यापि लभेः नुम्विकल्पः स्यादित्य आह **व्यवस्थितेति**। प्रादेरुपसर्गात्परस्य लभेर्नित्यं नुम्। अनुपसर्गात्परस्य तु लभेर्विभाषा नुमिति व्यवस्थितविकल्पाश्रयणादुपसर्गपूर्वस्य लभेर्नित्यं नुमित्यर्थः। वस्तुतस्तु 'चिण्णमुलोरनुपसर्गस्य' इति वार्तिकात्, भाष्ये 'उपसर्गात् खलघञोः' इत्यत उपसर्गादिति 'न सुदुर्भ्याम्' इत्यतो नेति चानुवर्त्य उपसर्गात्परस्य लभेः 'विभाषा चिण्णमुलोः' इति नेति व्याख्यातत्वाच्च। एतेन प्रपूर्वस्य लभेर्नित्यं नुमिति व्याख्यानं परास्तम्। 'लः कर्मणि—' इति लकारा विहिताः। तथा 'तयोरेव कृत्यक्तखलर्थाः' इति कर्मणि कृत्यादिप्रत्यया वक्ष्यन्ते। ते तावद् द्विकर्मकधातुषु कतरस्मिन् कर्मणि भवन्तीत्यत्र व्यवस्थामाह **द्विकर्मकाणां त्विति**। कर्मप्रत्ययव्यवस्था वक्ष्यत इति शेषः। तां व्यवस्थां सार्धश्लोकेन दर्शयति **गौणे कर्मणीत्यादिना**। दुह्याच्पच्दण्ड्रुधिप्रच्छिचिब्रूशासुजिमथ्मुषां गौणे कर्मणि लादयो मता इत्यन्वयः। 'अकथितं च' इति सूत्रेण यस्य कर्मसंज्ञा तद् गौणं कर्मेति बोध्यम्। **प्रधाने इति**। नीहृकृष्वहां प्रधाने कर्मणि लादयो मता इत्यन्वयः। 'अकथितं च' इति सूत्रादन्येन यस्य कर्मसंज्ञा तत्प्रधानं कर्मेति बोध्यम्। अथ 'गतिबुद्धि—' इति सूत्रेण ये द्विकर्मकाः तेषु व्यवस्थमाह **बुद्धीति**। बुद्ध्यर्थकस्य भक्षार्थकस्य शब्दकर्मकाणां च प्रधाने वा गौणे वा कर्मणि स्वेच्छया लादयो मता इत्यन्वयः। इह 'गतिबुद्धि—' इत्यनेन यस्य कर्मसंज्ञा तद् गौणं कर्म। तदितरत्तु प्रधानं कर्म। **प्रयोज्येति**। अन्येषां

द्विकर्मकास्तेषु लकृत्यक्तखलर्थाः किं मुख्ये कर्मणि, उत गौणे, किं वोभयोरिति संदेहे व्यवस्थामाह **द्विकर्मकाणां त्विति**। **दुह्यादेरिति**। दुह्याच्पचिति श्लोके पूर्वार्धोपात्ता द्वादश दुह्यादयस्तेभ्यो गौणे कर्मणि लादयो मता इत्यन्वयः। 'अकथितं च' इति सूत्रेण यस्य कर्मसंज्ञा तद्गौणम्। 'गतिबुद्धि—' इति सूत्रेण ये द्विकर्मकास्तत्र व्यवस्थामाह **बुद्धिभक्षार्थयोरिति**। **निजेच्छयेति**। गौणे वा मुख्ये वा कर्मणीत्यर्थः। इह 'गतिबुद्धि—' इति सूत्रेण यस्य कर्मसंज्ञा तद् गौणम्। **प्रयोज्येति**। अणौ कर्तुर्णौ कर्मसंज्ञा यस्य तत्प्रयोज्यकर्म। **अन्येषामिति**। गत्यर्था-

(१०६०—१०६२ वार्तिकार्थः)। गौर्दुह्यते पयः। अजा ग्रामं नीयते ह्रियते कृष्यते उह्यते। बोध्यते माणवकं धर्मः, माणवको धर्ममिति वा। भोज्यते माणवकमोदनः, माणवक ओदनं वा। देवदत्तो ग्रामं गम्यते। 'अकर्मकाणां कालादिकर्मकाणां कर्मणि भावे च लकार इष्यते'। मासो[1] मासे वा आस्यते

गत्यर्थानाम् अकर्मकाणां 'हृक्रो –' इति सूत्रोपात्तहृक्रोश्च प्रयोज्यकर्मणि लादयो मता इत्यन्वयः। अयं सार्धश्लोकः 'अकथितं च' इति सूत्रस्थ वार्तिकभाष्यसंग्रह इति बोध्यम्। **गौर्दुह्यते पय इति**। गोपेनेति शेषः। अत्र गोरप्रधानकर्मत्वात्तस्मिन् कर्मणि लकारः। तिङा अभिहितत्वाद् गोः प्रथमा। प्रधानकर्मत्वात्पय इति द्वितीयान्तम्, तस्य तिङा अनभिहितत्वात्। बलिर्याच्यते वसुधाम्। अविनीतो विनयं याच्यते। तण्डुला ओदनं पच्यन्ते। गर्गाः शतं दण्ड्यन्ते। व्रजो रुध्यते गाम्। माणवकः पन्थानं पृच्छ्यते। वृक्षोऽवचीयते फलानि। माणवको धर्मम् उच्यते, शिष्यते वा। शतं जीयते देवदत्तः। सुधां क्षीरोदधिर्मथ्यते। देवदत्तः शतं मुष्यते। एतेषु गौणकर्मणि लकारः। अथ प्रधाने नीहृकृष्वहामित्यत्रोदाहरति **अजा ग्रामं नीयते, ह्रियते, कृष्यते, उह्यते इति**। प्रतिक्रियमजा ग्राममित्यन्वेति। उह्यत इत्यत्र वहतेर्यजादित्वात्संप्रसारणम्। अत्र अजायां प्रधानकर्मणि लकारः, ग्रामस्यानभिहितत्वाद् द्वितीया। बुद्ध्यर्थस्योदाहरति **बोध्यते माणवकं धर्मः, माणवको धर्ममिति वेति**। गुरुणेति शेषः। अत्र माणवके गौणकर्मणि धर्मे वा प्रधानकर्मणि ण्यन्ताद् लकारः। भक्षार्थस्य तु अश्यन्ते देवा अमृतं हरिणा, अश्यतेऽमृतं देवानिति वा उदाहार्यम्। शब्दकर्मकस्य तु वेदोऽध्याप्यते विधिं हरिणा, वेदमध्याप्यते विधिरिति वेत्युदाहार्यम्। यदुक्तं गत्यर्थाना अकर्मकाणां हृक्रोश्चेत्येतेषां प्रयोज्यकर्मणि लकार इति। तत्र गत्यर्थस्योदाहरति **देवदत्तो ग्रामं गम्यते इति**। यज्ञदत्तेनेति शेषः। अत्र प्रयोज्यकर्मणि देवदत्ते गमेर्ण्यन्ताद् लः। ननु अकर्मकाणां ण्यन्तानां प्रयोज्यकर्मण्येव लादय इति व्यवस्था व्यर्था। तत्र प्रयोज्यं विना अन्यस्य कर्मणोऽभावादित्याशङ्क्य 'अकर्मकधातुभिर्योगे देशः कालो भावो गन्तव्योऽध्वा च कर्मसंज्ञक इति वाच्यम्' इति वार्तिकेन अकर्मकधातूनामपि देशकालादिकर्मत्वेन ण्यन्तानां तेषां द्विकर्मकतया प्रयोज्यकर्मण्येव तत्र लादय इति

कर्मकहृक्रोतीनाम्। **लादय इति**। कृत्यक्तखलर्था आदिशब्देन ग्राह्याः। **गौर्दुह्यत इति**। देवदत्तेनेति शेषः। कृत्यादिषु गौर्दोग्धव्या दोहनीया पयः। गौः सुदोहा दुर्दोहा पयः। अजा ग्रामं नेतव्या, नयनीया। हर्तव्या। हरणीया। अजा ग्रामं नेया इत्याद्युदाहर्तव्यम्। **ग्रामं गम्यत इति**। यज्ञदत्तेनेत्यध्याहारः।

1 'मासम्' इति क्वचित् पाठः।

देवदत्तेन। णिजन्तात्तु प्रयोज्ये प्रत्ययः। मासमास्यते माणवकः।

इति भावकर्मतिङ्प्रकरणम्।

अथ कर्मकर्तृतिङ्प्रकरणम् ॥ ६३ ॥

यदा सौकर्यातिशयं द्योतयितुं कर्तृव्यापारो न विवक्ष्यते तदा कारकान्त-

व्यवस्था प्रयोजनवतीत्यभिप्रेत्य मासमास्यते माणवक इति ण्यन्ते प्रयोज्यकर्मणि माणवके एव लः, न तु मासे कर्मणि इत्युदाहरिष्यते। एवं तर्हि अण्यन्तेष्वकर्मकेषु मासमास्यते देवदत्तेनेति भावे लकारो न स्यात्, सकर्मकेभ्यः कर्मणि कर्तरि च ल इति नियमात्। मास आस्यते देवदत्तेनेत्येव कर्मणि मासे लकारः स्यादित्याशङ्क्याह **अकर्मकाणामित्यादि**। ये अकर्मकाः 'कर्तुरीप्सिततमं कर्म, तथायुक्तं चानीप्सितम्' इति सूत्रसिद्धकर्मरहिताः 'आस उपवेशने, वृतु वर्तने' इत्यादयः, तेषां 'अकर्मकधातुभिर्योगे–' इति वार्तिकसिद्धकर्मकाणां कर्मणि भावे च लकार इष्यते इत्यर्थः। न चेदं वार्तिकमिति भ्रमितव्यम्, भाष्ये अदर्शनात्। किंतु न्यायमूलकमेव, अकर्मकधातुभिर्योगे देशकालादीनां कर्मसंज्ञाविकल्पस्य भाष्याद्यभिमतत्वात्। यथा चैतत्तथा कारकाधिकारे 'अकर्मकधातुभिर्योगे–' इति वचनव्याख्यावसरेऽवोचाम, तदाह **मासो मासे वा आस्यते देवदत्तेनेति**। अत्र मासस्य कर्मत्वपक्षे कर्मलकारः, मासस्याभिहितत्वात् प्रथमा। मासस्य कर्मत्वाभावपक्षे तु भावे लकारः। मास इति सप्तमी। मासमिति त्वपपाठः। अथ प्रकृतमनुसरति **णिजन्तात्त्विति**। आसधातोः प्रकृतिसिद्धकर्मरहितत्वेन अकर्मकाण्णौ मासस्य कर्मत्वपक्षेऽपि प्रयोज्यकर्मण्येव लकार इत्यर्थः। **मासमास्यते माणवक इति**। ण्यन्तात् प्रयोज्यकर्मणि माणवके लः। मासस्यानभिहितत्वाद् द्वितीया। **ह्रक्रोस्तु ह्रार्यते** कार्यते वा भृत्यः कटं देवदत्तेन।

इति श्रीवासुदेवदीक्षितविदुषा विरचितायां सिद्धान्तकौमुदीव्याख्यायां बालमनोरमाख्यायां भावकर्मप्रक्रिया समाप्ता।

अथ कर्मकर्तृप्रक्रियां निरूपयिष्यन् कर्मणः कर्तृत्वं साधयितुमाह **यदेति**। फलव्यापारयोर्धातुरिति सिद्धान्तः। पचिर्हि विक्लित्त्यनुकूलव्यापारे वर्तते। तत्र विक्लित्तिः फलम्। तदाश्रय ओदनं कर्म। तदनुकूलो व्यापारः अधिश्रयणादिः पुरुषप्रयत्नरूपो व्यापारः। तत्राधिश्रयणं चुल्ल्या उपरि तण्डुलयुक्तस्थाल्याः स्थापनम्। स्थापनं स्थित्यनुकूलव्यापारः। तत्र स्थितिः स्थालीतण्डुलनिष्ठा। तदनु-

---

माणवक इति। अयं प्रयोज्यः कर्ता। देवदत्तेनेति प्रयोजकस्त्वध्याहर्तव्यः।

इति तत्त्वबोधिन्यां भावकर्मप्रक्रियाप्रकरणम्।

राण्यपि कर्तृसञ्ज्ञां लभन्ते, स्वव्यापारे स्वतन्त्रत्वात्। तेन पूर्वं करणत्वादिसत्त्वेऽपि सम्प्रति कर्तृत्वात्कर्तरि लकारः। साध्वसिश्छिनत्ति। काष्ठानि पचन्ति। स्थाली पचति। कर्मणस्तु कर्तृत्वविवक्षायां प्राक्सकर्मका अपि प्रायेणाकर्मकाः। तेभ्यो भावे कर्तरि च लकाराः। पच्यते ओदनेन। भिद्यते काष्ठेन। कर्तरि तु–

कूलः पुरुषचेष्टाविशेषः। धातूपात्तव्यापाराश्रयः पुरुषः कर्ता, स्वतन्त्रत्वात्। स्वातन्त्र्यं प्राधान्यमिति भाष्यम्। कर्मकरणादिकं तु पुरुषप्रयत्नपरतन्त्रत्वान्न कर्तृत्वं लभते इति स्थितिः। तत्र यदा सौकर्यातिशयविवक्षया कर्तुः पुरुषस्य व्यापारः प्रयत्नो न विवक्ष्यते, किंतु कर्मादिगत एव व्यापारो विक्लित्यादिफलानुकूलत्वेन विवक्ष्यते तदा कर्मादिकारकाण्यपि कर्तृसंज्ञां लभन्ते इत्यर्थः। ननु कर्मादिगतव्यापारस्य पुरुषप्रयत्नाधीनत्वादस्वतन्त्रत्वात्कथं कर्मणः कर्तृत्वमित्यत आह **स्वव्यापारे स्वतन्त्रत्वादिति**। स्वातन्त्र्येण विवक्षितत्वादित्यर्थः। तदुक्तं कर्मवत्कर्मणा इत्यत्र भाष्ये, 'कर्मकर्तरि कर्तृत्वं स्वातन्त्र्यस्य विवक्षितत्वात्' इति। अत्र कर्मग्रहणं करणादिकारकस्याप्युपलक्षणम्। **तेनेति**। असिना छिनत्तीत्यादिप्रयोगदशायाम् असिकुठारादीनां करणत्वादिसत्त्वेऽपि, असिः छिनत्ति इत्यादिप्रयोगदशायां कर्तृत्वेन विवक्षितत्वात् कर्तरि लकार इत्यर्थः। **साध्वसिः छिनत्तीति**। अत्र करणस्य कर्तृत्वविवक्षा। साधु इति क्रियाविशेषणं सौकर्यातिशयद्योतनाय। अतितैक्ष्ण्यात् पुरुषप्रयत्नविशेषमाघातातिशयं विना स्वयमेव असिः छिनत्तीत्यर्थः। **काष्ठानि पचन्तीति**। अत्रापि करणानां कर्तृत्वविवक्षा। **स्थाली पचतीति**। अत्राधिकरणस्य कर्तृत्वविवक्षा। काष्ठानामतिशुष्कत्वाद् धमनफूत्कारानपेक्षया स्थाल्या अतिलघुत्वादविलम्बयश्रपणतया सौकर्यं बोध्यम्। **कर्मणस्त्विति**। ये छिदिभिदिप्रभृतय एककर्मकाः, तत्र कर्मणः कर्तृत्वविवक्षायां वृक्षः छिनत्तीत्यादौ प्राक्[1] सकर्मकत्वेऽपि संप्रति कर्मणः कर्तृत्वविवक्षायामकर्मका एते इत्यर्थः। ये तु द्विकर्मकाः, तत्र एकस्य कर्मणः कर्तृत्वविवक्षायामपि इतरेण कर्मणा सकर्मकत्वसत्त्वात्प्रायेणेत्युक्तिः। ततश्च तेषु द्विकर्मकेषु कर्मणि कर्तरि च लकारः। तत्र कर्मणि लकारे यथा–सुधां क्षीरसागरो मथ्यते। कर्तरि यथा–सुधां क्षीरसागरो मथ्नाति। अथ यदुक्तं एककर्मकेषु कर्मणः कर्तृत्वविवक्षायामकर्मकत्वमिति, तस्य प्रयोजनमाह **तेभ्यो भावे कर्तरि च लकारा इति**। न तु कर्मणि, असंभवात्। अत एव अकर्मकेभ्यो भावे कर्तरि

कर्मणस्त्विति। सौकर्यातिशयं द्योतयितुमित्यनुषङ्गः। **प्रायेणेति**। ये भिदिच्छिदिप्रभृतय एककर्मकास्ते अकर्मकाः, ये तु द्विकर्मकास्ते सकर्मका इति भावः। अकर्मकत्वस्य फलमाह **भावे कर्तरि चेति**। भावे चाकर्मकेभ्य इत्युक्तत्वादिति

१ 'प्राक्' इति क्वचिन्नास्ति।

२७६६ **कर्मवत्कर्मणा तुल्यक्रियः । (३-१-८७)** **कर्मस्थया क्रियया** तुल्यक्रियः कर्ता कर्मवत्स्यात् । कार्यातिदेशोऽयम् । तेन यगात्मनेपदचिण्चिण्वदिटः स्युः । कर्तुरभिहितत्वात् प्रथमा । पच्यते ओदनः । भिद्यते काष्ठम् ।

ल इत्युक्तमिति भावः । तत्र एककर्मकेभ्यः कर्मणः कर्तृत्वविवक्षायां भावे लकारमुदाहरति **पच्यते ओदनेनेति** । ओदनकर्तृकः पाक इत्यर्थः । एवं भिद्यते काष्ठेनेत्यपि । यद्यपि पचेर्द्विकर्मकत्वम्, तथापि तण्डुलानामविवक्षायाम् एककर्मकत्वं पचेराश्रितम् । **कर्तरि त्विति** । एककर्मकेषु कर्मणः कर्तृत्वविवक्षायां कर्तरि लकारे विशेषो वक्ष्यते इत्यर्थः । **कर्मवत्कर्मणा** । 'कर्तरि शप्' इत्यतः कर्तरीत्यनुवृत्तं प्रथमया विपरिणम्यते । तुल्या क्रिया यस्य स तुल्यक्रियः कर्ता । कर्मणेत्यनेन कर्मकारकस्था क्रिया विवक्षिता, क्रियायाः कर्मकारकेण तुल्यत्वस्य तत्स्थक्रियामादायैव उपपाद्यत्वात्, तदाह **कर्मस्थयेत्यादिना** । कर्मणः कर्तृत्वेन विवक्षायां कर्ता कर्मवदिति यावत् । वत्करणाभावे तु कर्मसंज्ञक इत्यर्थशङ्का स्यात् । तथा सति सकर्मकत्वात् पच्यते ओदनेन, भिद्यते काष्ठेनेति भावे लो न स्यात् । **कार्यातिदेशोऽयमिति** । यद्यपि शास्त्रातिदेशे कार्यातिदेशे वा न फलभेदः । तथापि शास्त्रातिदेशस्यापि कार्यातिदेशार्थत्वान्मुख्यत्वात् कार्यातिदेश एवाश्रयणीय इत्यर्थः । **तेनेति** । स्युरित्यत्रान्वेति । कर्मवत्त्ववचनेन कर्मकार्याणि 'सार्वधातुके यक्' इति यक्, 'भावकर्मणोः' इत्यात्मनेपदम्, 'चिण् भावकर्मणोः' इति चिण्, 'स्यसिच्सीयुट्तासिषु–' इति चिण्वत्त्वम्, तत्संनियोगशिष्ट इट् च स्युरित्यर्थः । कर्मणः कर्तृत्वविवक्षायां कर्तरि विहितानि शास्त्राण्येव न

भावः । द्विकर्मकेषु कर्मणः कर्तृत्वविवक्षायामुदाहरणम्–'मथ्नाति सागरोऽमृतम्' 'स्वयं प्रदुग्धेऽस्य गुणैरुपस्नुता वसूपमानस्य वसूनि मेदिनी' इति । प्रदुग्धे इत्यत्र 'कर्मवत्कर्मणा–' इति प्राप्तस्य सकर्मकाणामिति निषेधे दुहिपच्योरिति प्रतिप्रसूतस्य यको 'न दुहस्नुनमाम्–' इति निषेधः । उक्तप्रयोगानुरोधाद् द्विकर्मकेषु गौणस्यैव कर्मणः कर्तृत्वविवक्षा न मुख्यस्येत्याहुः । तच्चिन्त्यम्, अजा ग्रामं नयतीत्यत्र मुख्यकर्मणः कर्तृत्वविवक्षादर्शनात् । अत्रेदमवधेयम्—अधिकरणत्वाविवक्षायां व्रजो गौणकर्मेति रुणद्धि व्रजो गां स्वयमेवेति भवति । यदा तु व्रजस्य न कर्मत्वं तदा मुख्यकर्मणोऽपि कर्तृत्वविवक्षा भवति । रुध्यते व्रजे गौः स्वयमेवेति । तथा गोरपादानत्वविवक्षायां गौर्दुह्यते पयः स्वयमेवेत्यादि । **कर्मवत्कर्मणा** । वत्करणं किमर्थम्, यथा अब्रह्मदत्ते प्रयुज्यमानो ब्रह्मदत्तशब्दो ब्रह्मदत्तवदित्यर्थं वदति तथा कर्मेत्युच्यमानेऽपि कर्मवदित्यर्थलाभात् । सत्यम्, कर्मणा तुल्यक्रियः कर्ता कर्मेत्युच्यमाने कर्मसंज्ञक इत्यर्थः स्यात् । तथा हि सति अकर्मकव्यपदेशाभावाद्भावे लकारो न स्यात् ।

अपाचि । अभेदि । ननु भावे लकारे कर्तुर्द्वितीया स्यात्कर्मातिदेशादिति चेन्न, लकारवाच्य एव हि कर्ता कर्मवत्, 'लिङ्याशिष्यङ्' (सू ३४२४) इति द्विलकारकात् ल इत्यनुवृत्तेः, भावे प्रत्यये च कर्तुर्लकारेणानुपस्थितेः । अत एव कृत्यक्तखलर्थाः कर्मकर्तरि न भवन्ति, किं तु भाव एव, भेत्तव्यं कुसूलेन ।

स्युरिति भावः । **कर्तुरिति** । कर्मणः कर्तृत्वविवक्षायां कर्तरि लकारे सति तदादेशतिङा कर्तुरभिहितत्वादित्यर्थः । **पच्यते ओदन इति** । फूत्कारादिपुरुषश्रमातिशयविशेषं विना विक्लित्त्याश्रयो भवतीत्यर्थः । **भिद्यते काष्ठमिति** । कुठारादिदृढाघातं पुरुषश्रमं विना द्विधा भवतीत्यर्थः । अत्र कर्मणः कर्तृत्वेऽपि कर्मत्वातिदेशाद्यक् । **अपाचि अभेदीति** । अत्र कर्मवत्त्वाच्चिण् । ननु कर्मणः कर्तृत्वविवक्षायां भावलकारे पच्यते ओदनेन, भिद्यते काष्ठेनेत्यत्र कर्मकर्तुस्तिङाऽनभिहितत्वाद् द्वितीया स्यात्, कर्मवत्त्वातिदेशादित्याशङ्कते **नन्विति** । परिहरति **नेति** । नायमाक्षेप उन्मिषतीत्यर्थः । कुत इत्यत आह **लकारवाच्य एव हि कर्ता कर्मवदिति** । तच्च कुत इत्यत आह **लिङ्याशिषीति** । 'व्यत्ययो बहुलम्, लिङ्याशिष्यङ्' इति संहितया पाठे लाकारात् पूर्वं लकारान्तरं 'हलो यमाम्–' इति लुप्तं प्रश्लिष्यते । ततश्च ल् ल् इति द्विलकारात् सूत्राल् ल इति षष्ठ्यन्तं 'कर्मवत्कर्मणा–' इत्यत्रानुवर्तते । तथा च लः कर्ता कर्मवदिति लभ्यते । वाच्यत्वं षष्ठ्यर्थः, तथा च लकारवाच्यः कर्ता कर्मवदिति पर्यवस्यतीत्यर्थः । अस्त्वेवम्, प्रकृते किमायातमित्यत आह **भावे प्रत्यये च कर्तुर्लकारेणानुपस्थितेरिति** । तत्र भावस्यैव तद्वाच्यत्वादिति भावः । **अत एवेति** । लकारवाच्यस्यैव कर्मकर्तुः कर्मवत्त्वविधानादेव

किं तु कर्मणि स्यात् । **पच्यते ओदनः, भिद्यते काष्ठमिति** । यद्यप्ययं प्रयोगः सिद्धान्ते इष्ट एव तथापि पच्यते ओदनेन भिद्यते काष्ठेनेति भावे न स्यादिति बोध्यम् । कर्मशब्देनात्र कर्मस्थक्रिया लक्ष्यत इत्याह **कर्मस्थयेति** । कर्मकारकस्थयेत्यर्थः । 'कर्तरि शप्' इत्यतः कर्तरीत्यनुवर्त्य प्रथमया विपरिणम्यते, स च विशेष्यस्तदाह **तुल्यक्रियः कर्तेति** । **कार्यातिदेशोऽयमिति** । यद्यपि शास्त्रातिदेशेऽपि लक्ष्यं सिध्यति, तथापि शास्त्रस्यापि कार्यार्थतया मुख्यत्वात्कार्यातिदेश एवाश्रितः । **भावे लकारे इति** । तत्र कर्तुरनभिहितत्वादिति भावः । **द्विलकारकादिति** । 'व्यत्ययो बहुलं लिङ्याशिष्यङ्' इति संहितया पाठेऽनुस्वारस्य परसवर्णेन जाते लकारे तस्योपरि लद्वयमित्यर्थः । तेन लकारवाच्यः कर्ता कर्मवदित्यर्थलाभाद्यगादिकमेव भवति, न तु द्वितीयेत्यभिमतसिद्धिः । यत्र लकारवाच्यः कर्ता तत्रैव कर्मवत्त्वमिति व्युत्पादनस्य फलमाह **अत एवेति** । **न भवन्तीति** । लकारेणैव कर्मकर्तुरुपस्था-

ननु पचिभिद्योः कर्मस्था क्रिया विक्लित्तिर्द्विधाभवनं च । सैवेदानीं कर्तृस्था न तु तत्तुल्या । सत्यम्, कर्मत्वकर्तृत्वावस्थाभेदोपाधिकं तत्समानाधिकरणक्रियाया

कृत्यक्तखलर्थाः प्रत्ययाः कर्मणि विहिताः कर्मकर्तरि न भवन्ति, तस्य लकारवाच्यत्वाभावेन कर्मवत्त्वस्य तत्राप्रवृत्तेरित्यर्थः । एतच्च भाष्ये स्पष्टम् । ननु 'सिनोतेर्ग्रासकर्मकर्तृकस्य' इति निष्ठानत्ववार्तिके सिनो ग्रासः स्वयमेवेति भाष्ये कथमुदाहृतम् । क्तप्रत्ययस्य कर्मकर्त्रर्थेऽभावादिति चेद् उच्यते, अत एव भाष्याद् 'निष्ठा' इति सूत्रविहितकर्मार्थकक्तप्रत्ययस्यैव कर्मकर्तर्यभाव इति विज्ञायते । सिनो ग्रासः स्वयमेवेत्यत्र तु गत्यर्थाकर्मकेत्यादिना कर्तरि विहितः क्तप्रत्ययः कर्मकर्तरि भवत्येवेति शब्देन्दुशेखरे विस्तरः । भेत्तव्यं कुसूलेनेति । पुरुषप्रयत्नमनपेक्ष्य कुसूलकर्तृका भिदिक्रियेत्यर्थः । शङ्कते नन्विति । इदानीमिति । कर्मणः कर्तृत्वविवक्षादशायामित्यर्थः । न तु तत्तुल्येति । तुल्यत्वस्य भेदघटितत्वादिति भावः । अर्धाङ्गीकारेण परिहरति सत्यमिति । विक्लित्तिर्द्विधाभवनं च कर्मस्थमेव संप्रति कर्तृस्थमिति युक्तम् । तथापि तयोस्तुल्यत्वाभावस्तु नेत्यर्थः । कर्मत्वेति । कर्मत्वकर्तृत्वे ये अवस्थे धर्मविशेषौ

न्तक्तृत्यादीनां प्रसक्तिर्नास्ति, उक्तार्थानामप्रयोगात् । लविधेः पूर्वं तु सुतरां नास्ति, लकारोपस्थाप्यकर्तुरभावेन कर्मवत्त्वाभावादिति भावः । अत्रेदं बोध्यम्—कृत्यक्तखलर्था इत्यत्र क्तग्रहणं त्यक्तुमुचितम् तस्य कर्मकर्तरि इष्टत्वात्, भिन्नः कुसूलः स्वयमेवेति । वक्ष्यति च स्वयमपि 'सिनोतेर्ग्रासकर्मकर्तृकस्य' इति वार्तिके सिनो ग्रासः स्वयमेवेति । ननु 'गत्यर्थाकर्मक-' इत्यत्राविवक्षितकर्माणोऽकर्मका इति न गृह्यते, दत्तवान् पक्कवान् इत्यर्थे दत्तः पक्व इत्यापत्तेरिति चेत् । अत्राहुः—'सिनोतेर्ग्रासकर्मकर्तृकस्य' इति निष्ठातकारस्य नकारविधानसामर्थ्यादविवक्षितकर्माणोऽपि क्वचिद् गृह्यन्ते । अन्यथा निष्ठातकारस्तत्र न लभ्येत, तेन सिनो ग्रासः स्वयमेव, भिन्नः कुसूलः स्वयमेवेत्यादि सङ्गच्छते इति । अत्र केचिद्वदन्ति—लकारवाच्यस्यैव कर्तुः कर्मवत्त्वे 'कर्मवत्कर्मणा-' इत्यत्र वद्ग्रहणं व्यर्थम् । न च कर्तुः कर्मसंज्ञायां भावे लकारो न स्यादित्युक्तमिति वाच्यम्, कर्मणः कर्तृत्वविवक्षायां धातुरकर्मक इत्यकर्मकात्कर्तरीव भावे लकारस्य निर्बाधत्वात् । लकारवाच्यस्य कर्मसंज्ञायामपि केवलकर्तुस्तदनभ्युपगमात् । न हि भावे लकारः कर्तारं वक्ति । न च वत्करणाभावे कर्तुः कर्मसंज्ञायां कर्तृव्यपदेशाभावाद् नमते दण्ड इत्यत्र 'न दुहस्नुनमाम्-' इति यको निषेधेऽपि शब् न स्याद्वत्करणे कृते तु कर्तृकार्यमपि स्यादिति वाच्यम्, एकसंज्ञाधिकारादन्यत्र संज्ञाद्वयसमावेशादिष्टसिद्धेरिति । न तु तत्तुल्येति । तुल्यत्वं हि सादृश्यम्, तच्च भेदनिबन्धनम् । न च प्रकृते भेदोऽस्ति । कर्मणः कर्तृत्वविवक्षायां कर्मस्थफलरूपक्रियाया एव

भेदमाश्रित्य व्यवहारः। कर्मणा इति किम्—करणाधिकरणाभ्यां तुल्यक्रिये पूर्वोक्ते साध्वसिरित्यादौ मा भूत्। किं च कर्तृस्थक्रियेभ्यो मा भूत्। गच्छति ग्रामः। आरोहति हस्ती। 'अधिगच्छति शास्त्रार्थः स्मरति श्रद्दधाति वा।'

तयोर्भेदः स एव उपाधिः निमित्तं यस्य तथाविधं कर्मत्वकर्तृत्वसमानाधिकरणक्रियाभेदमाश्रित्य तुल्यत्वव्यवहार इत्यर्थः। वास्तवभेदाभावेऽपि औपाधिकभेदात्कर्मस्थक्रियातुल्यक्रियत्वं कर्मकर्तुरिति भावः। **करणाधिकरणाभ्यामिति**। असिना छिनत्ति स्थाल्यां पचतीत्यत्र करणाधिकरणयोर्यो व्यापारः स एव असिश्छिनत्ति स्थाली पचतीत्यत्र कर्तृस्थ इति तत्रापि कर्मवत्त्वं स्यात्। तन्निवृत्त्यर्थं कर्मणेति पदमित्यर्थः। ननु 'कर्मवत्कर्मणा—' इत्यत्र 'धातोरेकाचः—' इत्यतो धातोरित्यनुवर्तते। धातोर्वाच्यया क्रियया तुल्यक्रिय इत्यर्थः। करणत्वाद्यवस्थायां वस्तुतः सन्नपि असिस्थाल्योर्व्यापारो न धातूपात्त इति नोक्तदोष इत्यस्वरसादाह **किं चेति**। **गच्छति ग्राम इति**। मार्गस्य अविषमनिष्कण्टकतया प्रत्यासन्नतया च श्रमं विना प्राप्त्याश्रयो भवतीत्यर्थः। **आरोहति हस्तीति**। अङ्कुशाघातादिहस्तिपकव्यापारं विना स्वयमेव न्यग्भवन् आरोहणाश्रयो भवतीत्यर्थः। **अधिगच्छति शास्त्रार्थः। स्मरति श्रद्दधाति वेति**। पूर्वार्धमिदम्। 'यत्कृपालेश-

---

कर्तृस्थत्वात्। तथा च सूत्रमिदमसमञ्जसमिति भावः। वास्तविकभेदाभावेऽप्यौपाधिकभेदोऽस्तीत्याह **कर्मत्वेति**। कर्मत्वकर्तृत्वावस्थयोर्भेदस्तद्धेतुकौपाधिकमवस्थाभेदसमानाधिकरणं क्रियाभेदमाश्रित्येत्यर्थः। एवं चावस्थाभेदेन क्रियाभेदात्कर्मस्थक्रियातुल्यक्रियत्वं कर्तुरस्तीति भावः। **करणाधिकरणाभ्यामिति**। तुल्यक्रियः कर्तेत्येतावत्युच्यमाने असिना छिनत्ति स्थाल्यां पचतीत्यादौ करणाधिकरणयोर्यो व्यापारः स एवेदानीमसिश्छिनत्ति स्थाली पचतीत्यादौ कर्तृस्थ इत्यतिप्रसङ्गः स्यात्, तन्माभूदित्यर्थः। न च कर्मत्वावस्थायां विक्लित्त्यादिरिव करणत्वाद्यवस्थायामपि असिः स्थाल्योर्व्यापारो वस्तुतः सन्नपि धातुना नोपात्त इति कथमतिप्रसङ्ग इति वाच्यम्, सादृश्यप्रतियोगिक्रियाया धातूपात्तत्वेनाविशेषितत्वात्। न ह्येतस्मिन्सूत्रे धातूपात्तक्रियया तुल्यक्रिय इत्युक्तमस्ति येनातिप्रसङ्गो न भवेत्। ननु तुल्यक्रियः कर्ता कर्मवद्भवतीत्युक्ते केनेत्याकाङ्क्षायामनेककारकोपस्थितावपि कर्मवदिति प्रत्यासत्त्या कर्मणेति लभ्यत एवेत्यत आह **किं चेति**। अधिगच्छतीत्यादिश्लोकस्योत्तरार्धं तु 'यत्कृपालेशतस्तस्मै नमोऽस्तु गुरवे सदा'। ननु फलं व्यापारश्च धात्वर्थः, स एव क्रियाशब्दवाच्यः, तत्र व्यापाराश्रयः कर्ता, फलाश्रयस्तु कर्म। एवं च पचिभिदिप्रभृतीनां गमिरुहिप्रभृतीनां च सकर्मकत्वे फलस्य कर्मनिष्ठत्वे च तुल्ये कर्तृस्थभावका गम्यादय इति कथं

---

१ 'वशतः' इति क्वचित् पाठः।

यत्र कर्मणि क्रियाकृतो विशेषो दृश्यते यथा पक्वेषु तण्डुलेषु, यथा वा छिन्नेषु काष्ठेषु, तत्र कर्मस्था क्रिया, नेतरत्र। न हि पक्वापक्वतण्डुलेष्विव गतागतग्रामेषु वैलक्षण्यमुपलभ्यते। करोतिरुत्पादनार्थः। उत्पत्तिश्च कर्मस्था। तेन करिष्यते घट इत्यादि। यत्नार्थत्वे तु नैतत्सिध्येत्, ज्ञानेच्छादिवद्यत्नस्य कर्तृस्थत्वात्।

तस्तस्मै नमोऽस्तु गुरवे सदा।' इत्युत्तरार्धम्। गुरुकृपालेशादेव श्रमं विना स्वयमेव शास्त्रार्थः अधिगच्छति निश्चयविषयो भवति, स्मृतिविषयो भवति, श्रद्धाविषयो भवतीत्यर्थः। अत्र कर्मकर्तुः ग्रामादेः कर्तृस्थक्रियावत्त्वेन कर्मस्थक्रियावत्त्वाभावाद् न कर्मवत्त्वम्। अतो न कर्मकार्यं यगादि, किंतु कर्तृकार्यं शबाद्येवेति भावः। ननु कर्मकर्तुः ग्रामादेः प्राप्त्याश्रयत्वेन कर्मस्थक्रियत्वमस्त्येवेत्यत आह **यत्रेति**। यत्र क्रियाकृतो विशेषो वैलक्षण्यं दृश्यते प्रत्यक्षमुपलभ्यते, तत्र कर्मणि विद्यमाना क्रिया कर्मस्थक्रियेत्युच्यते इत्यन्वयः। तदुदाहृत्य दर्शयति **यथा पक्वेषु तण्डुलेष्विति**। तण्डुलावस्थापेक्षया विक्लित्तिकृतो विशेषो दृश्यते इति शेषः। अन्यत्रापि क्रियाकृतं वैलक्षण्यमुदाहृत्य दर्शयति **यथा वा छिन्नेषु काष्ठेष्विति**। अच्छिन्नापेक्षया वैलक्षण्यं दृश्यते इति शेषः। गच्छति ग्राम इत्यादौ तु नैवमित्याह **न हीति। ग्रामेष्विति**। उपलक्षणमिदम् पक्वापक्वतण्डुलेषु यथा क्रियाकृतं वैलक्षण्यमुपलभ्यते तथा गतागतग्रामे आरूढानारूढहस्तिनि अधिगतानधिगते स्मृतास्मृते श्रद्धिताश्रद्धिते च शास्त्रार्थे क्रियाकृतवैलक्षण्यं न दृश्यते इत्यर्थः, ग्रामगमनादौ कर्तर्येव श्रमादिवैलक्षण्यदर्शनादिति भावः। ननु ज्ञानेच्छयोरिव यत्नस्यापि कर्तृस्थत्वात् तद्वाचिनः कृञोऽपि कर्ता न कर्मवत्स्यात्। ततश्च क्रियते घटः स्वयमेवेति यगादिः न सिध्येदित्याशङ्क्य कृञो न यत्नार्थत्वमित्याह **करोतिरुत्पादनार्थ इति**। उत्पत्त्यनुकूलव्यापारार्थक इत्यर्थः। एतच्च भूवादिसूत्रे भाष्ये स्पष्टम्। करोतेरुत्पादनार्थकत्वे तु कर्मस्थक्रियत्वं तत्कर्तुरुपपादयति **उत्पत्तिश्च कर्मस्थेति**। उत्पन्ने अनुत्पन्ने च वैलक्षण्यस्य प्रत्यक्षत्वादिति भावः। **तेनेति**। कृञः कर्तुः कर्मस्थक्रियत्वेनेत्यर्थः। तथा च क्रियते घटः स्वयमेवेत्यत्र यक्, तासि तु चिण्वदिट्पक्षे

ज्ञातव्या इत्यत आह **यत्र कर्मणीति। ग्रामेष्विति**। आरूढानारूढहस्तिषु अधिगतानधिगतशास्त्रार्थेष्वित्यादावपि वैलक्षण्यं नोपलभ्यत इति बोध्यम्। **कारिष्यते इति**। 'स्यसिच्सीयुट्–' इति वैकल्पिकश्चिण्वदिट्। पक्षे 'ऋद्धनोः स्ये' इतीट् करिष्यते। एवं लृङि अकारिष्यत अकरिष्यत। सिचश्चिण्वदिटि अकारिष्ट। पक्षे अकृत। सीयुटश्चिण्वदिटि कारिषीष्ट। पक्षे कृषीष्ट। तासि तु कारिता कर्ता। यक्चिणोस्तु क्रियते घटः स्वयमेव। अकारीत्यादि। **नैतत्सिध्येदिति**। 'कर्मव-

१—'कारिष्यते' इति क्वचित् पाठः।

एतेनानुव्यवस्यमानेऽर्थे इति व्याख्यातम् । कर्तृस्थत्वेन यगभावाच्छ्यनि कृत ओल्लोपे च रूपसिद्धेः । ताच्छील्यादावयं चानश्, न त्वात्मनेपदम् । 'सकर्मकाणां

कारिता, तदभावे तु कर्ता इति सिद्धवत्कृत्याह **करिष्यते घट इत्यादीति** । चिण्वदिट्पक्षे कारिष्यते इति रूपम्। तदभावपक्षे तु 'ऋद्धनोः स्ये' इति इट्, करिष्यते । सीयुटश्चिण्वदिटि कारिषीष्ट, तदभावे तु कृषीष्ट । लुङि अकारि अकृत। **नैतदिति** । कर्मवत्त्वं न सिध्येदित्यर्थः। यतते इति चत्सकर्मकत्वमेव न स्यादित्यपि बोध्यम्। **एतेनेति** । ज्ञानस्य कर्तृस्थत्वव्युत्पादनेनेत्यर्थः। **अनुव्यवस्यमानेऽर्थे इति** । अर्थे स्वयमेव निश्चयविषयतां संपद्यमाने इत्यर्थः । **व्याख्यातमिति** । समर्थितमित्यर्थः । कथं समर्थितमित्यत आह **कर्तृस्थत्वेन यगभावादिति** । अनुव्यवसायो निश्चयः, तत्र कर्मकर्ता अर्थः, स न कर्मस्थक्रियः, अर्थे अनुव्यवसायकृतवैलक्षण्याभावात्। किंतु कर्तृस्थक्रिय एव, अनुव्यवसायकर्तरि देवदत्ते हर्षादिदर्शनात् । ततश्च कर्मवत्त्वाभावाच्च यक् । यकि तु कित्त्वाद् 'घुमास्थागापाजहातिसाम्-' इति ईत्वे अनुव्यवसीयमान इति स्यादित्यर्थः। ननु यगभावे कथं यकारश्रवणमित्यत आह **श्यनीति** । 'षो अन्तकर्मणि' इति धातोरनुव्यवपूर्वादुपसर्गवशेन निश्चयवृत्तेः आने कृते श्यनि 'ओतः श्यनि' इत्योकारलोपे अनुव्यवस्यमान इति रूपसिद्धिरित्यर्थः । ननु कर्मवत्त्वाभावे 'भावकर्मणोः' इत्यात्मनेपदाभावात् कथमिह लटः शानच् । तस्यात्मनेपदत्वादित्यत आह **ताच्छील्यादाविति** । 'ताच्छील्यवयोवचनशक्तिषु चानश्' इत्यनेन चानशित्यर्थः । तस्य च लादेशत्वाभावेन आत्मनेपदत्वाभावात् कर्मवत्त्वाभावेऽपि कर्मकर्तरि प्रवृत्तिर्निर्बाधा, तदाह **न त्वात्मनेपदमिति** । ननु अन्योन्यं स्पृशतः स्वयमेव यज्ञदत्तदेवदत्तावित्यत्रापि कर्मवत्त्वाद्यगादि

त्कर्मणा-' इति कर्मवत्त्वं न सिध्येदित्यर्थः । एतेन पचति पाकं करोतीति विवरणादाख्यातस्य यत्ने शक्तिरिति नैयायिकोक्तिः परास्ता । करोतेर्यत्नार्थत्वे तु यतते इतिवत्सकर्मकतापि न स्यादिति । **एतेनेति** । ज्ञानस्य कर्तृस्थत्वाभ्युपगमेनेत्यर्थः । **यगभावादिति** । सति तु यक्यनुव्यवसीयमान इति स्यादिति भावः । **ओल्लोप इति** । 'ओतः श्यनि' इत्यनेन । ननु कर्मवत्त्वाभावे कथमिह शानजित्यत आह **ताच्छील्यादाविति** । **न त्विति** । शानच् न भवतीत्यर्थः । देवदत्तयज्ञदत्तावन्योन्यं स्पृशत इत्यत्र तयोरेव कर्मत्वं कर्तृत्वं चास्तीति कर्मस्थक्रियायाः कर्तृस्थत्वात्कर्मवद्भावप्राप्तिमाशङ्कयाह **सकर्मकाणामिति** । न चात्र देवदत्तो यज्ञदत्तं स्पृशति यज्ञदत्तस्तु देवदत्तमिति क्रियाभेदोऽवश्यमाश्रयितव्यः । तथा च स्वनिष्ठां क्रियां प्रति कर्तृत्वम् इतरक्रियां प्रति तु कर्मत्वं भवति । अन्यथा द्वयोरपि कर्तृत्वमेव स्यात्,

प्रतिषेधो वक्तव्यः (वा १८७३)। अन्योन्यं स्पृशतः। अजा ग्रामं नयति।

स्यात्। तत्र हि स्पृशिः संयोगानुकूलव्यापारार्थकः। उभावपि कर्तारौ कर्मभूतौ च। स्पर्शनक्रियाया एकत्वेऽपि आश्रयभेदात्तद्भेदमाश्रित्य यज्ञदत्तनिष्ठां स्पर्शनक्रियां प्रति देवदत्तस्य कर्मत्वम्। एवं देवदत्तनिष्ठां स्पर्शनक्रियां प्रति यज्ञदत्तस्य कर्मत्वम्। एवं कर्तृत्वमप्युभयोर्ज्ञेयम्। एवं च उभयोः कर्तृत्वकर्मत्वसत्त्वादेकस्मिन् कर्तरि कर्मणि वा या स्पृशिक्रिया सैवेतरस्मिन् कर्तरि कर्मणि वा वर्तते इति कर्मवत्त्वं स्यात्, आश्रयनिबन्धनं भेदमाश्रित्य तुल्यक्रियत्वोपपत्तेः। स्पृष्टास्पृष्टयोरन्योन्यसंयोगकृतहर्षादितदभावदर्शनाच्चेत्यत आह **सकर्मकाणां प्रतिषेध इति**। एककर्मकाणां छिदिभिदिप्रभृतीनां कर्मणः कर्तृत्वविवक्षया अकर्मकाणां कर्तुः कर्मवत्त्वमुक्तम्। ये तु द्विकर्मकाः कर्मणः कर्तृत्वविवक्षायामपि सकर्मका धातवः तेषां धातूनां, कर्मकर्तुः कर्मवत्त्वप्रतिषेधो वक्तव्य इत्यर्थः। **अन्योन्यं स्पृशत इति**। कर्मवत्त्वे तु यकि तङि च स्पृश्येते इति स्यादिति भावः। 'सकर्मकाणां प्रतिषेधः—' इत्यस्य उदाहरणान्तरमाह **अजा ग्रामं नयतीति**। अजा ग्रामं स्वयमेव प्राप्नोतीत्यर्थः। अत्र नयनं प्रत्यजायाः कर्मणः कर्तृत्वविवक्षायामपि ग्राममादाय सकर्मकत्वान्न कर्मवत्त्वमिति भावः। वस्तुतस्तु गते अगते च ग्रामे वैलक्षण्याभावादेवात्र कर्मवत्त्वस्याप्राप्तिरिति नेदमस्य वार्तिकस्योदाहरणम्। अत एव भाष्ये अन्योन्यमाश्लिष्यतः, अन्योऽन्यं

इमौ गावौ स्पृशत इत्यत्र यथा। एवं च कर्मस्थक्रियायाः कर्तृस्थत्वाभावात्कर्मवद्भावो न प्राप्नोति। न च संयोगस्य द्विष्ठत्वात्कर्मस्थफलस्य कर्तृस्थत्वाच्चास्त्येवेति शङ्क्यम्, तत्तन्निरूपितसंयोगस्य भिन्नत्वात्। अन्यथा फलव्यापारयोरेकाश्रयत्वे सकर्मकत्वमेव न लभ्येत। किं च रुहिगम्योः कर्तृस्थक्रियत्वादारोहति हस्ती, गच्छति ग्राम इत्यत्र कर्मवद्भावो नेति भाष्यकैयटादिसंमतम्। तथा च संयोगरूपफलस्य सर्वत्र तुल्यतया रुहिगमिभ्यां स्पृशेर्वैषम्यं दुरुपपादमिति नात्र कर्मवत्त्वप्रसक्तिरित्युदाहरणान्तरमाह **अजा ग्रामं नयतीति**। इह प्रतिषेधाभावे यक् स्यात् क्रियाफलस्याकर्तृगामित्वेऽप्यात्मनेपदं स्यादिति भावः। नन्विहापि कर्मणि क्रियाकृतो विशेषो नोपलभ्यत इति कर्मस्थक्रियत्वं दुरुपपादमिति चेत्। अत्राहुः—क्रियाकृतविशेषोपलम्भानुपलम्भवदुद्देश्यतापि नियामिका। यत्र कर्मस्थांशस्योद्देश्यता सा कर्मस्थक्रिया, यत्र तु व्यापारांशस्य सा कर्तृस्थेति। तथा हि—दर्शनारोहणाभ्यां विषये न्यग्भूते च विशेषानुपलम्भात्कर्तृस्थता। उद्देशानुरोधाच्च अहं पश्येयमित्युद्देशो न त्वयं विषयो भवत्विति। एवमहमुपरि गच्छेयमित्युद्देशो न तु हस्तिनो न्यग्भावो भवत्विति। ऊर्ध्वदेशसंयोगानुकूलव्यापारविशेष उपरि गमनं तदेव रुहेरर्थो न तु न्यग्भावमात्रम्। वृक्षस्य

'दुहिपच्योर्बहुलं सकर्मकयोरिति वाच्यम्' (वा १८७६)। २७६७ **न दुहस्नुनमां यक्चिणौ।** (३-१-८९) एषां कर्मकर्तरि यक्चिणौ न स्तः। दुहेरनेन यक एव निषेधः, चिण् तु विकल्पिष्यते। शप्, लुक्। गौः पयो दुग्धे। २७६८ **अचः कर्मकर्तरि।** (३-१-६२) अजन्ताच्च्लेश्चिण्वा

स्पृशतः, अन्योऽन्यं संगृह्णीतः इत्येवोदाहृतमिति शब्देन्दुशेखरे स्पष्टम्। **दुहिपच्योरिति।** कर्मवत्त्वमिति शेषः। अनयोर्द्विकर्मकत्वादेकस्य कर्मणः कर्तृत्वविवक्षायामपि अन्यकर्मणा सकर्मकत्वात्पूर्ववार्तिकेन कर्मवत्त्वनिषेधे प्राप्ते प्रतिप्रसवोऽयम्। **न दुह।** दुह स्नु नम् एषां द्वन्द्वः। **कर्मकर्तरीति।** एतत्तु नानुवृत्तिलभ्यम्, पूर्वत्रानुपलम्भात्। किंतु 'कर्मवत्कर्मणा तुल्यक्रियः' इति समभिव्याहारलभ्यमेव। 'अचः कर्मकर्तरि' इत्यतो मण्डूकप्लुत्या तदनुवृत्तिर्वा। **दुहेरनेनेति।** 'न दुहस्नुनमाम्–' इत्यनेन दुहेः कर्मकर्तरि यक एव निषेधः। चिण्तु 'दुहश्च' इति वक्ष्यमाणसूत्रेण विकल्पितो वक्ष्यते इत्यर्थः। कर्मकर्तरि तशब्दे परे दुहेश्चिण्वेति तदर्थः। चिण्तु विकल्पेनेष्यते इति क्वचित्पाठः। दुग्धे इत्यत्र प्रक्रियां दर्शयति **शप्, लुगिति।** दुहेः कर्मकर्तरि यकि निषिद्धे शप् प्रवर्तते। तस्य 'अदिप्रभृतिभ्यः–' इति लुगित्यर्थः। **गौः पयो दुग्धे इति।** गौः स्वयमेव पय उत्सृजतीत्यर्थः। कर्मकर्तृभूतायां गवि लट्। स्वरितेत्त्वेऽपि भावकर्मणोः इत्यात्मनेपदमेव। 'न दुह–' इति न यक्। गां पयो दुग्धे इति तु नोदाहृतम्, 'गौणे कर्मणि दुह्यादेर्लादयो मताः'

शाखां हस्ताभ्यामवनमयत्यपि भूमिष्ठे पुरुष आरोहतीत्यप्रयोगात्। अत एव हि 'यद्वितुपरं छन्दसि' इत्यत्र भाष्यं हद्विर्गत्यर्थ इति। अत एव चारोहन्ति हस्तिनं हस्तिपकास्तानारोहयति महामात्र इत्यादिप्रयोगेष्वणौ कर्तुर्णौ कर्मत्वं संगच्छते। पचिभिद्योस्तु विक्लित्तिर्द्विधाभवनरूपो विशेषः कर्मणि दृष्टस्तदुद्देशेनैव कारकव्यापार इति कर्मस्थक्रियत्वात्पच्यते ओदनः, भिद्यते काष्ठमित्यत्र कर्मवद्भावो भवत्येव। अजां ग्रामं नयतीत्यत्रापि कर्मस्थांशस्य संयोगस्योद्देश्यता न तु व्यापारांशस्येति कर्मवद्भावे प्राप्ते प्रतिषेधोऽयमावश्यक इति दिक्। **दुहिपच्योरिति।** द्विकर्मकत्वादनयोरेकस्य कर्मणः कर्तृत्वविवक्षायामपि सकर्मकत्वान्निषेधे प्राप्तेऽयमारम्भः। **गौः पयो दुग्धे इति।** अत्र कर्मवद्भावेनात्मनेपदं नित्यं 'गौणे कर्मणि दुह्यादेः' इत्युक्तत्वाद् मुख्यकर्मणः कर्तृत्वविवक्षायां पयो गां दुग्धे इति नोदाहृतमित्याहुः। एवं च 'प्रधाने नीहृकृष्वहाम्' इत्युक्तत्वात् तुल्यन्यायेन न्यादीनां मुख्यकर्मण एव कर्तृत्वविवक्षेति फलितम्। **अचः कर्म।** 'चिण् ते पदः' इत्यतश्चिण्तेशब्दावनुवर्तेते, 'दीपजन–' इत्यतोऽन्यतरस्यामिति च तदाह **अजन्तादित्यादि।** अचः किम्, अभेदि

स्यात्कर्मकर्तरि तशब्दे परे। अकारि, अकृत। २७६१ दुहश्च। (३-१-६३) अदोहि। पक्षे क्सः, 'लुग्वा-' (सू २३६५) इति पक्षे लुक्। अदुग्ध, अधुक्षत। उदुम्बरः फलं पच्यते। 'सृजियुज्योः श्यंस्तु' (वा १८७७)।

इत्युक्तेः। **अचः कर्मकर्तरि**। 'च्लेः सिच्' इत्यतः च्लेरिति 'चिण् ते पदः' इत्यतः चिणते इति, 'दीपजन-' इत्यतः अन्यतरस्यामिति चानुवर्तते। 'धातोरेकाचः-' इत्यतोऽनुवृत्तस्य धातुग्रहणस्य अचा विशेषितत्वात्तदन्तविधिः, तदाह **अजन्तादित्यादिना**। **अकारीति**। कटः स्वयमेवेति शेषः कर्मकर्तरि लुङ्। च्लेश्चिण्। वृद्धिः। रपरत्वम्। 'चिणो लुक्' इति तशब्दस्य लुक्। **अकृतेति**। चिणभावपक्षे 'ह्रस्वादङ्गात्' इति सिचो लोपः। **दुहश्च**। अच इतिवर्जं पूर्वसूत्रं तत्रानुवृत्तं यत्तत्सर्वमिहानुवर्तते। कर्मकर्तरि तशब्दे परे दुहेश्चिण्वा स्यादित्यर्थः स्पष्ट इति न व्याख्यातम्। अनुवृत्तिसौकर्यार्थमेव पूर्वसूत्रं प्रकृतदुहधातावनुपयुक्तमप्युपन्यस्तम्। **अदोहीति**। दुहेः कर्मकर्तरि लुङ्। स्वयमेव गौः पय इति शेषः। चिण्पक्षे लघूपधगुणः। चिणभावपक्षे आह **पक्षे क्स इति**। 'शल इगुपधात्-' इत्यनेनेति भावः। **लुग्वेति**। 'लुग्वा दुहदिहलिहगुहाम्-' इति क्सस्य पाक्षिको लुगित्यर्थः। अथ दुहिपच्योरित्यत्र पचेरुदाहरति **उदुम्बरः फलं पच्यत इति**। उदुम्बरवृक्षं फलं पचति कालविशेष इत्यत्र द्विकर्मकः पचिः। इह तु उदुम्बरो वृक्षः स्वयमेव कालविशेषमनपेक्ष्य फलं पकाश्रयं करोतीत्यर्थः। अत्र उदुम्बरस्य गौणकर्मणः कर्तृत्वेन विवक्षायां फलेन प्रधानकर्मणा सकर्मकत्वात् 'सकर्मकाणां प्रतिषेधः' इति कर्मवत्त्वस्य प्रतिषेधे प्राप्ते 'दुहिपच्योः-' इति कर्मवत्त्वस्य प्रतिप्रसवाय यगादिकमिति भावः। वस्तुतस्तु भाष्ये द्विकर्मकेषु पचेरपरिगणनान्न द्विकर्मकत्वमिति कारकाधिकारे प्रपञ्चितमस्माभिः। तथा च कर्मकर्तरि फलं पच्यते इत्यत्र फलस्यैव कर्मतया तस्य कर्तृत्वविवक्षायां पचेरकर्मकत्वात् 'सकर्मकाणाम्-' इति प्रतिषेधस्याप्रसक्तेः प्रतिप्रसवविधिरयं व्यर्थ इति यद्यपि। तथाप्यत्र मते उदुम्बरः फलं पचतीत्यत्र कर्तृ-

---

काष्ठम्। अत्र नित्यं चिण्। कर्मकर्तरि किम्, अकारि घटः कुलालेन। अत्रापि नित्यमेव। **दुहश्च**। कर्मकर्तरीत्येव। अदोहि गौर्गोपेनेत्यत्र तु नित्यम्। **उदुम्बरः फलमिति**। कालः उदुम्बरं फलं पचतीति स्थिते गौणकर्मण उदुम्बरस्य कर्तृत्वविवक्षायामिह कर्मवद्भावः। ननु द्विकर्मकेषु पचेरप्रामाणिकः पाठ इति ये वदन्ति तेषामयं ग्रन्थः कथं संगच्छत इति चेत्। अत्राहुः—उदुम्बरः फलं पचतीत्यत्र 'कर्मवत्कर्मणा-' इत्यस्याप्राप्तौ दुहिपच्योरित्यनेन कर्मवद्भावो बहुलं विधीयते सृजियुज्योरिवेति न काप्यनुपपत्तिरिति। **सृजियुज्योः श्यंस्तु**। श्यनो नित्त्वमाद्युदा-

अनयोः सकर्मकयोः कर्ता बहुलं कर्मवद्यगपवादश्च श्यन्वाच्य इत्यर्थः। 'सृजेः श्रद्धोपपन्ने कर्तर्येवेति वाच्यम्' (वा २०५४)। सृज्यते स्रजं भक्तः। श्रद्धया निष्पादयतीत्यर्थः। असर्जि। युज्यते ब्रह्मचारी योगम्। 'भूषाकर्मकिरादिसनां

लकारे पचेः कर्तृस्थक्रियत्वात् कर्मस्थक्रियत्वाभावादुदुम्बरः फलं पच्यत इति कर्मकर्तरि 'कर्मवत्कर्मणा–' इति कर्मवत्त्वस्याप्राप्तौ 'दुहिपच्योः–' इति कर्मवत्त्वस्य बहुलं पचेरपूर्वविधिरित्यन्यत्र विस्तरः। 'सृजियुज्योः श्यंस्तु' इति वार्तिकम्। अनयोः सकर्मकयोः इत्यादि तद्भाष्यम्। अत्र सृजियुज्योर्दैवादिकयोर्न ग्रहणम्। तयोरकर्मकतायां उक्तत्वात्। किंतु 'सृज विसर्गे' इति तौदादिकस्य 'युजिर्योगे' इति रौधादिकस्य च ग्रहणम्, तत्र विसर्ग उत्पादनम्, यथा प्रजाः सृजतीति। योगः संयोजनम्, यथा अश्वं युनक्तीति, रथादिना संयोजयतीति गम्यते। **सृजेः श्रद्धोपपन्ने इति।** श्रद्धायुक्ते मुख्यकर्तर्येव उक्तो विधिरित्यर्थः। तत्र मुख्यकर्तरि अत्यन्ताप्राप्तं कर्मवत्त्वमिह बहुलं विधीयते। 'युजेस्तु कर्मकर्तर्येव उक्तविधिः' इति भाष्यात्तत्रापि कर्मणि क्रियाकृतवैलक्षण्याभावादप्राप्तं कर्मवत्त्वमिह बहुलं विधीयते। कर्मवत्त्वे सति यकि प्राप्ते तदपवादः श्यन्विधीयते। तेन 'ञ्नित्यादिर्नित्यम्' इत्याद्युदात्तत्वं सिध्यति। यकि तु 'तास्यनुदात्तेत्' इत्यादिना लसार्वधातुकानुदात्तत्वे प्रत्ययस्वरेण यक उदात्तत्वं स्यात्। **सृज्यते स्रजं भक्त इति।** अत्र मुख्यकर्तरि लकारः। कर्मवत्त्वादात्मनेपदम्। यगपवादः श्यन्। **श्रद्धया निष्पादयतीत्यर्थ इति।** धातूनामनेकार्थत्वादिति भावः। सृज्यते स्रजं भक्त इत्यत्र यदा तु निष्पादयतीत्येवार्थः, नतु श्रद्धयेति तदा सृजति स्रजमित्येव भवति। अथ युजेरुदाहरति **युज्यते ब्रह्मचारी योगमिति।** अत्र कर्मकर्तरि यगपवादः श्यन्निति भाष्यम्। योगश्चित्तवृत्तिनिरोधो योगशास्त्रप्रसिद्धः। ब्रह्मचर्यं स्त्रीसङ्गराहित्यम्, तद्योगाङ्गम् इति च योगशास्त्रप्रसिद्धम्। स योगो ब्रह्मचारिणं युनक्ति–आत्मदर्शनेन संयोजयतीति कर्तृलकारे संयोजनक्रियायां योगो मुख्यकर्ता, ब्रह्मचारी तु कर्मेति स्थितिः। तत्र कर्मणो ब्रह्मचारिणः कर्तृत्वविवक्षायां युज्यते ब्रह्मचारी योगमिति कर्मकर्तरि ब्रह्मचारिणि लकारः, कर्मवत्त्वादेव यगपवादः श्यन्। ब्रह्मचारी प्राणायामाभ्यासादिश्रमबाहुल्यं विना स्वयमेव योगेन संबध्यते इत्यर्थः। तत्र ब्रह्मचारिणि कर्मकर्तरि धात्वर्थसंबन्धः अनुयोगितया वर्तते। योगे तु प्रतियोगितया वर्तत इति स्थितिः। तत्र यद्यपि प्रतियोगिनो योगात् 'सहयुक्तेऽप्रधाने' इति तृतीयया भवितव्यम्, तथापि युजेः प्रतियोगितावच्छिन्नसंबन्धोऽर्थः।

सार्थम्। यकि तु 'तास्यनुदात्तेत्–' इत्यादिना लसार्वधातुकानुदात्तत्वे कृते यक उदात्तत्वं श्रूयेत। **श्रद्धोपपन्न इति।** अश्रद्धायुक्ते कर्तरि तु यगेव। **भूषाकर्मेति।**

चान्यत्रात्मनेपदात्' (वा १८८०) । भूषावाचिनां किरादीनां सन्नन्तानां च यक्चिणौ चिण्वदिट् च नेति वाच्यमित्यर्थः । अलङ्कुरुते कन्या । अलमकृत । अवकिरते हस्ती । अवाकीर्ष्ट । गिरते । अगीर्ष्ट । आद्रियते । आदृत । किरादिस्तुदाद्यन्तर्गणः । चिकीर्षते कटः । अचिकीर्षिष्ट । इच्छायाः कर्तृस्थत्वेऽपि करोतिक्रियापेक्षमिह कर्मस्थक्रियत्वम् । २७७० न रुधः । (३-१-६४)

तत्र प्रतियोगित्वं फलम्, संबन्धो व्यापारः । प्रतियोगित्वरूपफलाश्रयत्वाद् द्वितीयेति समाहितं शब्देन्दुशेखरे । अत्र भाष्यप्रयोगादेव योगाद् द्वितीयेत्यन्ये । भूषाकर्मेति वार्तिकम् । भूषाकर्म, किरादि, सन् एषां द्वन्द्वः । अन्यत्रेति प्रथमान्तात्स्वार्थे त्रल् । आत्मनेपदाद् अन्यत्वमेकार्थमिति लभ्यते । भूषा कर्म क्रिया येषां वाच्यतया ते भूषाकर्माणो धातवः, भूषणक्रियावाचिनामिति यावत्, तदाह **भूषावाचिनामित्यादिना । अलंकुरुते कन्येति** । स्वयमेव अन्यप्रयत्नं विना भूषणक्रियावतीत्यर्थः । अत्र भूषार्थकत्वात् कर्मकर्तरि तङेव, न तु यक् । **अलमकृतेति** । अत्र तङेव न तु चिण् । लुङि तु अलङ्कृतेत्येव । न तु चिण्वदिटौ । **अवकिरते हस्तीति** । हस्तिनमवकिरति कुसुमादिरित्यत्र मुख्यकर्तरि लकारः । तत्र हस्ती कर्म । तस्य कर्तृत्वविवक्षायां स्वयमेव पुरुषप्रयत्नं विना वृक्षादिसमीपं गच्छन् पुष्पादिभिः अवकीर्णवान् भवतीत्यर्थः । अत्रापि तङेव, न तु यगादि । **अवाकीर्ष्टेति** । 'लिङ्सिचोरात्मनेपदेषु' इति वेट् । **गिरते इति** । ओदनं स्वयमेवेति शेषः । 'गॄ निगरणे' अयं किरादिः । **आद्रियते इति** । 'दृङ् आदरे' अयमपि किरादिः । शप्रत्यये 'रिङ् शयग्लिङ्क्षु' इति रिङ् । अतिथिमाद्रियते इति मुख्यकर्तरि । आद्रियतेऽतिथिरिति कर्मकर्तरि स्वयमेव आदरणाश्रय इत्यर्थः । अत्र यद्यपि शे यकि च न विशेषः । तथापि न्याय्यः श एव, यको निषिद्धत्वात् । स्वरे वा विशेषः । तङ् तु ङित्त्वादेव सिद्धः । आतिथेरभिहितत्वात् प्रथमेति विशेषः । **आदृतेति** । चिणोऽनेन निषेधे 'ह्रस्वादङ्गात्' इति सिचो लोपः । 'उश्च' इति कित्त्वम् । अथ सन्नन्तस्योदाहरति **चिकीर्षते कट इति** । स्वयमेव कर्तुमिच्छाविषय इत्यर्थः । नन्विच्छायाः पुरुषरूपकर्तृनिष्ठत्वात् कटरूपकर्मनिष्ठत्वाभावाद् इच्छायां सत्यामसत्यां च कटे कर्मणि वैल-

---

कर्मशब्दः क्रियावाचीत्याह **भूषावाचिनामिति । अन्यत्रेति** । आत्मनेपदादन्यस्य निषेधः, आत्मनेपदमेव भवतीत्यर्थस्तदेतदाह **यक्चिणाविति । अवाकीर्ष्टेऽति** । 'लिङ्सिचौ–' इति वेट् । **आद्रियत इति** । तुदादित्वाच्छे 'रिङ् शयग्लिङ्क्षु' इति रिङि इयङ् । **आदृतेति** । 'उश्च' इति कित्त्वम् । 'ह्रस्वादङ्गात्' इति सिचो लोपः । **न रुधः** । 'चिण् ते पदः' इत्यतश्चिणनुवर्तते । 'अचः कर्मकर्तरि' इत्यतो-

अस्माच्च्लेश्चिण्न । अवारुद्ध गौः । कर्मकर्तरीत्येव । अवारोधि गौर्गोपेन । २७७१ तपस्तपःकर्मकस्यैव । (३ । १-८८) कर्ता कर्मवत्स्यात् । विध्यर्थमिदम् । एवकारस्तु व्यर्थ एवेति वृत्त्यनुसारिणः । तप्यते तपस्तापस । अर्जयतीत्यर्थः । 'तपोऽनुतापे च' (सू २७६०) इति चिण्निषेधात्सिच् । अतप्त । तपःकर्मकस्य इति किम्-उत्तपति सुवर्णं सुवर्णकारः । 'न दुहस्नुनमां यक्चिणौ' (सू २७६७)

क्षणयादर्शनाच्च कर्मस्थक्रियत्वाभावादिह कर्मवत्त्वस्याप्रसक्तेस्तन्निषेधो व्यर्थ इत्यत आह **इच्छाया इति । न रुधः** । 'च्लेः सिच्-' इत्यतः च्लेरिति 'चिण्ते पदः' इत्यतश्चिणिति चानुवर्तते, तदाह **अस्माच्च्लेश्चिण् नेति । अवारुद्ध गौरिति** । स्वयमेवेति शेषः । **कर्मकर्तरीत्येवेति** । 'अचः कर्मकर्तरि' इत्यतस्तदनुवृत्तेरिति भावः । **अवारोधि गौर्गोपेनेति** । इह गोः कर्मणः कर्तृत्वविवक्षाया अभावान्न चिण्निषेध इति भावः । **तपस्तपःकर्मकस्यैव** । आद्यं तप इति षष्ठ्यन्तम् । तपःकर्मकस्यैव तपधातोरिति लभ्यते । 'कर्तरि शप्' इत्यतः कर्तरीत्यनुवृत्तं प्रथमया विपरिणम्यते । 'कर्मवत्कर्मणा-' इत्यतः कर्मवदित्यनुवर्तते इति मत्वा सूत्रशेषं पूरयति **कर्ता कर्मवदिति । विध्यर्थमिदमिति** । एतच्चानुपदमेव उदाहरणव्याख्यावसरे स्पष्टीभविष्यति । ननु विध्यर्थत्वे एवकारो व्यर्थ इत्यत आह **एवकारस्त्विति । तप्यते तपस्तापस इति** । अत्र तपिरर्जनार्थक इत्याह **अर्जयतीत्यर्थ इति** । प्राजापत्यचान्द्रायणादिकृच्छ्रात्मकं तपः संपादयतीत्यर्थः । मुख्यकर्तरि लः । संपादनस्य तापसात्मककर्तृस्थत्वात् तपोरूपकर्मस्थत्वाभावात् 'कर्मवत्कर्मणा-' इत्यप्राप्तं कर्मवत्त्वमनेन सूत्रेण विधीयते । तेन यगात्मनेपदादि । यदा तु तदपि दुःखजननात्मके संतापे वर्तते तदा तापसं तपस्तपतीत्येव भवति, दुःखयतीत्यर्थः । अत्र मुख्यकर्तृ तपः । तापसस्तु कर्म । अत्रापि दुःखजननव्यापारस्य तपोरूपकर्तृस्थतया तापसरूपकर्मस्थत्वाभावात् 'कर्मवत् कर्मणा-' इत्यनेन कर्मवत्त्वं न भवति । तपःकर्मकत्वाभावादनेनापि न कर्मवत्त्वम् । अतो न यगादिकर्मकार्यम् । अथ लुङि अतप्तेत्यत्र कर्मवत्त्वाच्चिणमाशङ्क्याह **तपोऽनुतापे च इति । चिण्निषेधात् सिजिति** । तस्य 'झलो झलि' इति लोपे परिनिष्ठितमाह **अतप्तेति । उत्तपति सुवर्णं सुवर्णकार इति** अत्र तपःकर्मकत्वाभावान्न कर्मवत्त्वमिति

ऽनुवर्तनादाह **कर्मकर्तरीत्येवेति । अतप्तेति** । तपस्तापस इत्यनुषज्यते । **न दुहस्नु** । ननु दोग्धिपर्यायत्वेन स्नौतेरपि द्विकर्मकत्वाद्गोरूपकर्मणः कर्तृत्वविवक्षायामपि पयोरूपकर्मणो विद्यमानत्वात्सकर्मकाणां प्रतिषेधेन यक्चिणोः प्राप्तिरेव नास्तीति चेत् । अत्राहुः—वत्सादियोगेन क्षीरप्रस्रवणानुकूला उत्कण्ठा स्नुधातोरर्थः । सा च

प्रस्नुते। प्रास्नाविष्ट, प्रास्नोष्ट। नमते दण्डः। अनंस्त। अन्तर्भावितण्यर्थोऽत्र नमिः। 'यक्चिणोः प्रतिषेधे हेतुमण्णिश्रिब्रूञामुपसंख्यानम्' (वा १८८१)।

भावः। भाष्ये तु यकारादिदं सूत्रं नियमार्थमित्युक्तमिति शब्देन्दुशेखरे प्रपञ्चितमेतत्। वृत्त्यनुसारिणा इत्यनेन भाष्यविरोधः सूचित इत्यलम्। 'दुहिपच्योर्बहुलम्' इति कर्मवत्त्वविधिस्थदुहिप्रसङ्गाद् 'न दुहस्नुनमाम्–' इति सूत्रमुपन्यस्तं प्राक्। इदानीं सिंहावलोकनन्यायेन स्नुनमोरुदाहर्तुं पुनः सूत्रमुपन्यस्यति **न दुहस्नुनमां यक्चिणाविति**। तत्र स्नुधातोरुदाहरति **प्रस्नुते इति**। स्नुधातुः क्षीरप्रस्रवणविषयोत्कण्ठीकरणे वर्तते। वत्सो गां प्रस्नौतीति मुख्यकर्तरि लकारे वत्सो गां क्षीरप्रस्रवणविषये उत्कण्ठयतीत्यर्थः। **अन्तर्भावितण्यर्थोऽत्र स्नुधातुः**। अत्र गौः कर्म। उत्कण्ठनव्यापारस्तु कर्तृभूतवत्सनिष्ठः। उत्कण्ठा तु गोरूपकर्मनिष्ठा। गोः कर्मणः कर्तृत्वविवक्षायां तु प्रस्नुते गौः, स्वयमेव क्षीरप्रस्रवणविषये उत्कण्ठावतीत्यर्थः। तत्र उत्कण्ठा पूर्वं कर्मगता। संप्रति तु कर्तृगता। उत्कण्ठाकृतं च वैलक्षण्यं प्रस्रवणं दृश्यत एव। ततश्च कर्मस्थक्रियत्वात् कर्मवत्त्वेन यकि प्राप्ते अनेन निषेधः। **प्रास्नाविष्टेति**। अत्र कर्मवत्त्वात् प्राप्तश्चिण् न। किंतु चिण्वदिटौ पक्षे स्तः। चिण्वदिडभावे तु 'स्नुक्रमोः–' इति नियमाद्वलादिलक्षण इण्न, तदाह **प्रास्नोष्टेति**। णम उदाहरति **नमते दण्ड इति**। नमति दण्डं कश्चित्। नमयतीत्यर्थः। कर्मणः कर्तृत्वविवक्षायां तु नमते दण्डः। अत्र कर्मवत्त्वेऽपि न यक्। **अनंस्तेति**। अत्र कर्मवत्त्वेऽपि न चिण्। ननु णमधातोः प्रह्वीभावार्थकस्याकर्मकत्वात् कर्मवत्त्वाप्रसक्तेर्यक्चिणोर्न प्रसक्तिरित्यत आह **अन्तर्भावितण्यर्थोऽत्र नमिरिति**। धातूनामनेकार्थकत्वादिति भावः। **यक्चिणोरिति**। 'न दुहस्नुनमाम्–' इति यक्चिणोः प्रतिषेधसूत्रे दुहस्नुनमां हेतुमण्णिश्रिब्रूञामिति च वाच्यमित्यर्थः।

गोनिष्ठा। स्नु प्रस्रवणे इत्यत्रापि करणे ल्युट्। प्रस्नूयतेऽनेनेति प्रस्रवणं सा चोत्कण्ठा।—'स्वयं प्रदुग्धेऽस्य गुणैरुपस्नुता वसूपमानस्य वसूनि मेदिनी' इति प्रयोगे उपस्नुता उत्कण्ठितेत्यर्थः। वत्सो गां प्रस्नौति उत्कण्ठयति। अन्तर्भावितण्यर्थोऽत्र स्नौतिः। गोः कर्तृत्वविवक्षायां प्रस्नुते गौरिति। **प्रास्नाविष्टेति**। चिण्वदिट्। न च चिणि निषिद्धे चिण्वदिडपि न स्यादिति शङ्क्यम्, चिण्वदित्यनेन हि चिणीव कार्यमतिदिश्यते। न च चिण् नेत्युक्त्या सोऽतिदेशो निषेद्धुं शक्यते येन चिण्वदिटो निषेधः स्यात्। **प्रास्नोष्टेति**। 'स्नुक्रमोरनात्मनेपदनिमित्ते' इति नियमाद्वलादिलक्षण इट् न। **नमते दण्ड इति**। इह नमितानमितयोर्विशेषदर्शनादुद्देश्यत्वसंबन्धाच्च कर्मस्थक्रियत्वमस्ति कर्मस्थांशस्य नमनस्य उद्देश्यता न तु तदनुकूलव्यापारस्येति

कारयते। अचीकरत। उच्छ्रयते दण्डः। उदशिश्रियत। चिण्वदिट् तु स्यादेव। कारिष्यते। उच्छ्रायिष्यते। ब्रूते कथा। अवोचत। भारद्वाजीयाः पठन्ति—'णिश्रन्थिग्रन्थिब्रूञात्मनेपदाकर्मकाणामुपसंख्यानम्' (वा १८८२)। पुच्छमुदस्यति उत्पुच्छयते गौः। अन्तर्भावितण्यर्थतायाम् उत्पुच्छयते गाम्। पुनः कर्तृत्व-

---

कारयते इति। स्वयं देवदत्त इति शेषः। करोति देवदत्त, तं प्रेरयति यज्ञदत्त इति ण्यन्तान्मुख्यकर्तरि लकारः। अत्र ण्यन्तकर्मणो देवदत्तस्य यज्ञदत्तप्रेरणमनपेक्ष्य कर्तृत्वविवक्षायां कर्मकर्तरि लकारः। कर्मवत्त्वेऽपि तङेव, न यगिति भावः। **अचीकरतेति**। अत्र कर्मवत्त्वेऽपि न चिण्, 'णिश्रि–' इति चङेव। **उच्छ्रयते दण्ड इति**। स्वयमेवेति शेषः दण्डमुच्छ्रयति कश्चिदिति मुख्यकर्तरि लकारः। तत्र कर्मणो दण्डस्य कर्तृव्यापारमनपेक्ष्य कर्तृत्वविवक्षायां कर्मकर्तरि लकारः। कर्मवत्त्वेऽपि न यक्, तङेव। **उदशिश्रियतेति**। कर्मवत्त्वेऽपि चिणभावाद् 'णिश्रि–' इति चङ्। ननु कारिष्यते इत्यत्र कथं चिण्वदिटौ। ण्यन्तस्याजन्तस्य उपदेशाभावादित्यत आह **चिण्वदिट् तु स्यादेवेति**। 'स्यसिच्सीयुट्तासिषु–' इत्यत्र हि उपदेशे अजन्तस्येति नार्थः। किंतु उपदेशे योऽच् तदन्तस्येत्यर्थः। तथा च णिजन्तस्योपदेशाभावेऽपि णेरुपदेशसत्त्वान्न दोष इति भावः। **उच्छ्रायिष्यते इति**। श्रिञ उपदेशे योऽच् तदन्तत्वाच्चिण्वदिटौ। **ब्रूते कथेति**। स्वयमेवेति शेषः। कथां ब्रवीति कश्चिदिति मुख्यकर्तृलकारे कथा कर्म, तस्य पुरुषप्रयत्नाविवक्षायां कर्मकर्तरि लकारः। कर्मवत्त्वात् तङ्, न यक्। **अवोचतेति**। कर्मवत्त्वेऽपि न चिण्। किंतु 'ब्रुवो वचिः' 'अस्यतिवक्तिख्यातिभ्योऽङ्' 'वच उम्' इति भावः। उच्चारणेन शब्देषु प्राकट्यरूपविशेषदर्शनात् कर्मस्थक्रियत्वं बोध्यम्। **णिश्रन्थीति**। ण्यन्तस्य श्रन्थेः ग्रन्थेः ब्रूञ आत्मनेपदविधायकर्मकस्य च यक्चिणोः प्रतिषेधो भारद्वाजीयाभिमत इत्यर्थः। अत्र णि इति सामान्यस्य ग्रहणम्। न तु हेतुमण्णिच एव। ततश्च णिजन्तस्यापि न यक्चिणाविति मत्वाह **पुच्छमुदस्यति उत्पुच्छयते गौरिति**। 'पुच्छादुदसने' इति णिङ्। नन्वत्र उदसने पुच्छं कर्म। गौर्मुख्यकर्त्री। न तु कर्मकर्त्री। ततश्च नात्र यक्चिणोः प्रसक्तिरित्यत आह **अन्तर्भावितण्यर्थतायामिति**। उदस्यतीत्यस्य उदासयतीत्यन्तर्भावितण्यर्थताश्रयणे उत्पुच्छयते गां देवदत्त इत्यत्र गौः कर्म। तस्य गोरूपकर्मणः प्रेरयितृपुरुषप्रयत्नानपेक्षया कर्तृत्वविवक्षायां कर्मकर्तरि लकारे उत्पुच्छयते गौरिति

कर्मवद्भावस्य प्राप्तिरस्तीति भावः। **अचीकरतेति**। चिणः प्रतिषेधे 'णिश्रि–' इति चङ्। **णिश्रन्थीति**। णेः सामान्यग्रहणस्य फलमाह **पुच्छमुदस्यती-**

विवक्षायाम् उत्पुच्छयते गौः । उदपुपुच्छत । यक्चिणोः प्रतिषेधाच्छप्चङौ । श्रन्थिग्रन्थ्योराधृषीयत्वाण्णिजभावपक्षे ग्रहणम् । ग्रन्थति ग्रन्थम् । श्रन्थति मेखलां देवदत्तः । ग्रन्थते ग्रन्थः । अग्रन्थिष्ट । श्रन्थते । अश्रन्थिष्ट । क्रैयादिकयोस्तु श्रथीते ग्रथीते स्वयमेव । विकुर्वते सैन्धवाः । वल्गन्तीत्यर्थः । 'वेः शब्दकर्मणः' (सू २७०७) 'अकर्मकाच्च' (सू २७०८) इति तङ् । अन्तर्भावितण्यर्थस्य पुनः प्रेषणत्यागे विकुर्वते सैन्धवाः । व्यकारिष्ट व्यकारिषाताम् व्यकारिषत । व्यकृत व्यकृषाताम् व्यकृषत । २७७२ **कुषिरञ्जोः प्राचां श्यन् परस्मैपदं च** । (३-१-९०) । अनयोः कर्मकर्तरि न यक् । किं तु श्यन्परस्मै-

---

भवतीत्यर्थः । स्वयमेव पुच्छमुदस्यति गौरिति बोधः । **उदपुपुच्छतेति** । अत्र न चिण् । **शप्चङाविति** । उत्पुच्छयते गौरित्यत्र यकः प्रतिषेधात् शप् । उदपुपुच्छतेत्यत्र चिणः प्रतिषेधाच्चङित्यर्थः । ननु 'श्रन्थ मोक्षणे, ग्रन्थ ग्रथने' इति श्रन्थिग्रन्थ्योः चौरादिकतया णिग्रहणेनैव सिद्धेः पुनर्ग्रहणं व्यर्थमित्यत आह **श्रन्थिग्रन्थ्योरिति** । **ग्रन्थति ग्रन्थमिति** । रचयतीत्यर्थः । **श्रन्थति मेखलां देवदत्त इति** । विस्रंसयतीत्यर्थः । देवदत्त इत्युभयत्रान्वेति । अत्र कर्मणो ग्रन्थस्य मेखलायाश्च कर्तृत्वविवक्षायां ग्रन्थते ग्रन्थः, श्रन्थते मेखलेति च भवति । स्वयमेव ग्रन्थरचनाश्रयः स्रंसनाश्रयश्चेत्यर्थः । तत्र कर्मवत्त्वेऽपि न यगिति भावः । अग्रन्थिष्ट अश्रन्थिष्टेत्यत्र च न चिण् । **क्रैयादिकयोस्त्विति** । कर्मवत्त्वेऽपि तयोर्यकि निषिद्धे श्नाविकरण इति भावः । आत्मनेपदविधावकर्मको यः, तमुदाहरति **विकुर्वते सैन्धवा इति** । सैन्धवा अश्वाः । अत्र विपूर्वः कृञ् वल्गने वर्तते, उपसर्गवशात्, तदाह **वल्गन्तीति** । शब्दं कुर्वन्तीत्यर्थः । धात्वर्थेनोपसंग्रहादकर्मकोऽयम् । मुख्यकर्तरि लकारः । **वेरिति** । 'वेः शब्दकर्मणः' इत्यनन्तरं पठितेन 'अकर्मकाच्च' इति सूत्रेण परगामिन्यपि फले तङित्यर्थः । नन्वस्याकर्मकतया अश्वानां कर्मकर्तृत्वाभावान्न यकः प्रसक्तिरित्यत आह **अन्तर्भावितेति** । विपूर्वकः कृञ् शब्दं कुर्वाणस्य प्रेरणे यदा वर्तते, तदा विकुर्वते सैन्धवानिति भवति । अश्वान् शब्दाययतीत्यर्थः । तत्र सैन्धवानां कर्मणां पुरुषप्रेरणाविवक्षया कर्तृत्वविवक्षायां विकुर्वते सैन्धवा इति भवति । वल्गन्तीत्यर्थः । अत्र सैन्धवानां कर्मकर्तृणां कर्मवत्त्वेऽपि न यगित्यर्थः । **व्यकारिष्टेति** । चिणि निषिद्धे स्यन्तत्वाभावाच्चङभावे सिचश्चिण्वदिटि वृद्धिरिति भावः । चिण्वदिडभावपक्षे आह **व्यकृतेति** । 'ह्रस्वादङ्गात्' इति

त्यादि । 'पुच्छभाण्ड-' इति णिङ् । आत्मनेपदविधौ योऽकर्मकस्तमुदाहरति **विकुर्वते सैन्धवा इति** । **कुषिरञ्जोः** । 'न दुहस्नुनमाम्-' इत्यतो नेति वर्तते, तदाह

पदं च। आत्मनेपदापवादः। कुष्यति, कुष्यते वा पादः। रज्यति, रज्यते वा वस्त्रम्। यगविषये तु नास्य प्रवृत्तिः। कोषिषीष्ट। रङ्क्षीष्ट।

इति कर्मकर्तृतिङ्प्रकरणम्।

सिचो लोपः। **कुषिरञ्जोः। अनयोरिति**। 'कुष निष्कर्षे, रञ्ज रागे' इत्यनयो- रित्यर्थः। **कर्मकर्तरीति**। 'अचः कर्मकर्तरि' इत्यतो मण्डूकप्लुत्या तदनुवृत्तेरिति भावः। 'न दुहस्नुनमाम्–' इत्यतो नेति यगिति चानुवर्तते, तदाह **न यगिति। किंतु श्यनिति**। यग्विषये इत्यर्थः। एवं च यग्विषयादन्यत्र न श्यनः प्रवृत्तिः। न यगित्यनुक्त्वा श्यनो विधाने तु यग्विषयादन्यत्रार्धधातुकेऽपि श्यन् स्यादिति भावः। प्राचांग्रहणाद्विकल्पः, तदाह **कुष्यति, कुष्यते वा पाद इति**। स्वयमेवेति शेषः। कुष्णाति पादं देवदत्त इति मुख्यकर्तृलकारे पादः कर्म। तस्य पुरुषप्रयत्न- मनपेक्ष्य कर्तृत्वविवक्षायां श्यनि परस्मैपदे च कुष्यतीति रूपम्। तदुभयाभावे यकि आत्मनेपदे च कुष्यते इति रूपमिति भावः। यक्श्यनोः स्वरे विशेषः। श्यनि कुष्यन्ती वधूरित्यत्र 'शप्श्यनोर्नित्यम्' इति नित्यं नुम्। यकि तु 'आच्छीनद्योः–' इति विकल्पः स्यात्। **रज्यति, रज्यते वा वस्त्रमिति**। अन्तर्भावितण्यर्थतायां दैवादिकत्वात् श्यनि रज्यति वस्त्रमित्यत्र रञ्जयतीत्यर्थः। मुख्ये कर्तरि लः। कर्मणः कर्तृत्वविवक्षायां तु रज्यति, रज्यते वा वस्त्रमिति भवतीत्यर्थः। **यगविषये तु नास्त्येवेति**। श्यनिति शेषः। यकं प्रतिषिध्य तत्स्थाने श्यनो विधिसामर्थ्यादि- त्यर्थः। **कोषिषीष्टेति**। आर्धधातुकत्वेन यगविषयत्वान्न श्यन्। तत्संनियोग- शिष्टत्वात् परस्मैपदं च श्यनभावे सति न भवतीति भावः। **रङ्क्षीष्टेति**। रञ्जेः सीयुटि जस्य कुत्वेन गः। तस्य चर्त्वेन कः। अनुस्वारपरसवर्णौ। अत्र कर्मकर्तृ-

---

न यक्। किं तु श्यन्निति। तस्मिन्नेव विषय इति भावः। 'न गिरा गिरेति ब्रूयात्' इत्यादौ गिरं कृत्वा गेयमित्यत्र गिरापदं प्रतिषिध्य गि(गिरं)रापदं विधीयमानं गिरापदस्थान एव यथा भवत्येवमिहापि यकः प्रतिषेधं कृत्वा विधीयमानः श्यन् तदीयस्थान एव भवत्यतो व्याचष्टे **यगविषये तु नास्येति**। श्यना संनियोगशिष्टं परस्मैपदं श्यनभावे न भवतीत्यात्मनेपदमेवोदाहरति। **कोषिषीष्टेति**। चुकुषे। कोषिष्यते। अकोषि। अकोषिष्यत। ररञ्जे। रङ्क्ष्यते। अरञ्जि। अरङ्क्ष्यत इत्याद्यपि ज्ञेयम्। श्यन्पक्षे कुष्यन्तीत्यत्र नित्यं नुम्। यक्पक्षे तु 'आच्छीनद्योः–' इति विकल्पः। स्वरे विशेषोऽप्यस्त्येव। इह प्रकरणे भिद्यते काष्ठं स्वयमेवेति वृत्त्यादौ प्रयुज्यते। तत्र स्वयंशब्दः करणार्थको ज्ञेयः। आत्मना करणेनेति। कर्मत्वे तु कर्मणि लः स्यात्। स्पष्टं चेदं कैयटादौ। इति तत्त्वबोधिन्यां कर्मकर्तृप्रक्रियाप्रकरणम्।

अथ लकारार्थप्रकरणम् ॥ ६४ ॥

२७७३ अभिज्ञावचने लृट्। (३-२-११२) स्मृतिबोधिन्युपपदे भूतानद्यतने धातोर्लृट् स्यात्। लङोऽपवादः। स्मरसि कृष्ण गोकुले वत्स्यामः। एवं बुध्यसे चेतयसे इत्यादियोगेऽपि। तेषामपि प्रकरणादिवशेन स्मृतौ वृत्तिसम्भवात्। २७७४ न यदि। (३-२-११३) यद्योगे उक्तं न। अभिजानासि कृष्ण यद्वने अभुञ्ज्महि। २७७५ विभाषा साकाङ्क्षे। (३-२-११४) उक्तविषये लृड् वा स्याद् लक्ष्यलक्षणभावेन साकाङ्क्षश्चेद्धात्वर्थः। स्मरसि कृष्ण

प्रकरणे सर्वत्र पच्यते ओदनः स्वयमेवेति, भिद्यते काष्ठं स्वयमेवेत्यादौ स्वयंशब्दस्य आत्मना करणेनेत्यर्थः, न त्वात्मना कर्त्रेति, तथा सति कर्मण्येव लः स्यादिति 'णेरणौ-' इति सूत्रे कैयटे स्पष्टम्।

इति श्रीवासुदेवदीक्षितविदुषा विरचितायां सिद्धान्तकौमुदीव्याख्यायां बालमनोरमाख्यायां कर्मकर्तृप्रक्रिया समाप्ता।

अथ लकारार्थप्रक्रिया निरूप्यते। **अभिज्ञावचने लृट्।** अभिज्ञा स्मृतिः, सा उच्यते बोध्यते अनेनेति विग्रहः, तदाह **स्मृतिबोधिन्युपपदे इति।** स्मृतिबोधकपदे समीपे प्रयुज्यमाने सतीत्यर्थः। भूते इत्यधिकृतम्। 'अनद्यतने लङ्' इत्यतः अनद्यतने इत्यनुवर्तते, तदाह **भूतानद्यतने इति। लङ इति।** अनद्यतने लङित्यस्यापवाद इत्यर्थः। **स्मरसीति।** हे कृष्ण गोकुले अवसामेति यत् तत् स्मरसीत्यर्थः। अत्र वाक्यार्थः कर्म। कृतं गोकुलवासं स्मरसीति यावत्। **एवमिति।** स्मरसीति पदयोग इव बुध्यसे इत्यादिस्मृतिबोधकपदयोगेऽपि लृडित्यर्थः। ननु बुध्यस्यादेः स्मृतित्वेन रूपेण स्मृत्यर्थकत्वाभावात्कथमिह लृडित्यत आह **तेषामपीति।** पर्यवसानगत्या स्मृतिबोधकत्वात्तद्योगेऽपि लृट्। एतदर्थमेव वचनग्रहणमिति भावः। **न यदि।** यदीति सप्तमीति मत्वाह **यद्योगे इति। उक्तं नेति।** अभिज्ञावचने इति लृड् न भवतीत्यर्थः। **अभिजानासीति।** वने अभुञ्ज्महीति यत् तत् स्मरसीत्यर्थः। **विभाषा। उक्तविषये इति।** अभिज्ञा-

---

अभिज्ञा। भूते इत्यधिक्रियते। 'अनद्यतने लङ्' इत्यतः अनद्यतन इति वर्तते। अभिज्ञा स्मृतिः, सा उच्यते बोध्यतेऽनेनेति विग्रहस्तदाह **स्मृतिबोधिनीत्यादि। वत्स्याम इति।** अवसामेत्यर्थः। पश्य मृगो धावतीत्यत्र वाक्यार्थरूपमृगकर्तृकधावनमिव स्मरसीत्यत्र गोकुलाधिकरणकास्मत्कर्तृकभूतानद्यतनवासो वाक्यार्थः कर्म। कृष्णेति संबोधनं स्मरणक्रियायां विशेषणम्। तथा च पूर्वोक्तनिवासकर्मकं कृष्णसंबन्धकं स्मरणमिति फलितोऽर्थः। **न यदि।** लृटः प्रतिषेधे उत्सर्गो लङ्।

वने वत्स्यामस्तत्र गाश्चारयिष्यामः । वासो लक्षणं चारणं लक्ष्यम् । पक्षे लङ् । यच्छब्दयोगेऽपि 'न यदि' (सू २७७४) इति बाधित्वा परत्वाद्विकल्पः । 'परोक्षे लिट्' (सू २१७१) चकार । उत्तमपुरुषे चित्तविक्षेपादिना पारोक्ष्यम् । 'सुप्तोऽहं किल विललाप' 'बहु जगद पुरस्तात्तस्य मत्ता किलाहम्' । 'अत्यन्तापह्नवे लिड् वक्तव्यः' (वा २०८४) । कलिङ्गेष्ववात्सीः । नाहं कलिङ्गान् जगाम ।

बोधिन्युपपदे इत्यर्थः । **लक्ष्यलक्षणभावेनेति** । ज्ञाप्यज्ञापकभावेनेत्यर्थः । अत्र व्याख्यानमेव शरणम् । **स्मरसीति** । पूर्वं वने अवसाम, तत्र वने गा अचारयाम इति यत् तद् हे कृष्ण स्मरसीत्यर्थः । अत्र यद् इत्यस्य गम्यत्वेऽपि तस्य प्रयोगाभावान्न यद्योगः । **वासो लक्षणमिति** । चारणस्येति शेषः । उभयत्रापि लृड्विकल्पः । अभिज्ञावचनयोगस्य अविशिष्टत्वादिति भावः । न च यद्योग एव 'विभाषा साकाङ्क्षे' इति विकल्पोऽस्त्विति भ्रमितव्यम्, यदि च अयदि चायं विकल्प इति भाष्यात्तदाह **यच्छब्दयोगेऽपीति** । 'परोक्षे लिट्' इति प्राग् व्याख्यातमपि विशेषविवक्षया स्मार्यते । अहमर्थस्य प्रत्यक्षत्वात् परोक्षत्वाभावात् कथमस्य लिट उत्तमपुरुष इत्यत आह **उत्तमपुरुषे चित्तेति । सुप्त इति** । सुप्तत्वादहं विललापेत्यर्थः । अत्र स्वापाच्चित्तविक्षेपः । **बहु जगदेति** । मत्तत्वात्तस्य पुरस्तादहं बहु जगदेत्यर्थः । अत्र उन्मादाच्चित्तविक्षेपः । आदिना व्यासङ्गसंग्रहः । **अत्यन्तापह्नवे इति** । अपरोक्षार्थमिदम् । **कलिङ्गेष्ववात्सीरिति** । अतस्त्वं न सहवासयोग्य इति प्रश्नः । 'अङ्गवङ्गकलिङ्गेषु सौराष्ट्रमगधेषु च । तीर्थयात्रां विना यातः पुनः संस्कारमर्हति ।' इति वचनादिति भावः । नाहं कलिङ्गान् जगामेत्युत्तरम् । कलिङ्गशब्दस्य जनपदविशेषवाचित्वाद् बहुवचनम् । अत्र तद्देशगमनोत्तरकालिकवासविषयकप्रश्ने कारणीभूतगमनस्यैवापलापा-

---

वासो लक्षणमिति । प्रसिद्धत्वाज्ज्ञापकमित्यर्थः । **चारणं लक्ष्यमिति** । सहसा बुद्ध्यनारोहाज्ज्ञाप्यम् । **पक्षे लङिति** । वने अवसाम । गा अचारयाम । **यच्छब्दयोगेऽपीति** । अत एव 'न यदि' इति योगात्पूर्वं 'विभाषा साकाङ्क्षे' इति न कृतमिति भावः । **अत्यन्तापह्नव इति** । अपह्नवोऽपलापस्तत्र आत्यन्तिकत्वं नामेत्थं यदभियुक्तस्तद्धेतोरप्यपह्नुतिः । **नाहमित्यादि** । कलिङ्गो नाम निषिद्धो देशः । 'अङ्गवङ्गकलिङ्गेषु सौराष्ट्रमगधेषु च । तीर्थयात्रां विना गत्वा पुनःसंस्कारमर्हति' इति स्मरणात्तस्मिन्देशे त्वया गतं चिरं स्थितमिति केनचित्कश्चिदुक्तः सन्नाह नाहं कलिङ्गाञ्जगामेति । न केवलमवस्थानमेव निषिध्यते किं तर्हि तद्धेतुभूतं गमनमपीति भवत्यत्यन्तापह्नवः । यदा तु कलिङ्गेष्वगम इत्युक्तः सन्गमनमेवापलपति न तदा-

२७७६ हशश्वतोर्लङ् च। (३-२-११६) अनयोरुपपदयोर्लिड्विषये लङ् स्यात्। चाल्लिट्। इति ह अकरोच्चकार वा। शश्वद् अकरोच्चकार वा। **२७७७ प्रश्ने चासन्नकाले।** (३-२-११७) प्रष्टव्यः प्रश्नः। आसन्नकाले पृच्छ्यमानेऽर्थे लिड्विषये लङ्लिटौ स्तः। अगच्छत्किम्। जगाम किम्। अनासन्ने तु कंसं जघान किम्। **२७७८ लट् स्मे।** (३-२-११८) लिटोऽपवादः। यजति स्म युधिष्ठिरः। **२७७९ अपरोक्षे च।** (३-२-११९) भूतानद्यतने लट् स्यात्स्मयोगे। एवं स्म पिता ब्रवीति। **२७८० ननौ पृष्टप्रतिवचने।** (३-२-१२०) अनद्यतने परोक्ष इति निवृत्तम्। भूते लट् स्यात्। अकार्षीः किम्। ननु करोमि भोः। **२७८१ नन्वोर्विभाषा।** (३-२-१२१) नशब्दे नुशब्दे च लङ् वा स्यात्। अकार्षीः किम्। न करोमि। नाकार्षम्। अहं नु

इत्यन्तापह्नवो ज्ञेयः। कलिङ्गेष्ववात्सीरित्यत्र 'अकर्मकधातुभिर्योगे देशः कालो भावः—' इति कर्मसंज्ञायाः पाक्षिकत्वान्न द्वितीयेति कारकाधिकारे निरूपितम्। **हशश्वतोर्लङ् च।** स्पष्टम्। **प्रश्ने चासन्नकाले।** प्रश्ने इत्यनेन प्रश्नविषयो विवक्षित इत्याह **प्रष्टव्यः प्रश्न इति।** अर्थे इत्यनन्तरं वर्तमानाद्धातोरिति शेषः। प्रयोक्तृदृष्टिपथातिक्रान्तत्वमनासन्नकालत्वम्। वृत्तौ तु पञ्चवर्षातीतकालः अनासन्नकाल इत्युक्तम्। **लट् स्मे।** स्मेत्यव्ययम्। तद्योगे लिड्विषये लट् स्यादित्यर्थः। **यजति स्मेति।** स्मशब्दो भूतकालद्योतकः। **अपरोक्षे च। एवं स्मेति।** पिता एवमुक्तवानित्यर्थः। **ननौ पृष्ट। निवृत्तमिति।** व्याख्यानादिति भावः। अकार्षीः किमिति प्रश्नः। ननु करोमीत्युत्तरम्। अकार्षमित्यर्थः। नन्विति संबोधने। **नन्वोर्विभाषा।** न नु अनयोर्द्वन्द्वः, तदाह **नशब्दे नुशब्दे चेति। लङ् वा स्यादिति।** भूते इति शेषः। अकार्षीः किमिति प्रश्नः। न करोमि ना-

---

त्यन्तापह्नव इति लङेव भवति, न कलिङ्गेष्वगच्छमिति **प्रश्ने च।** प्रश्ने भूतानद्यतनपरोक्षे इति वर्तते। प्रश्न इत्यत्र कर्मणि नङित्याह **प्रष्टव्य इति। आसन्नेति।** पञ्चवर्षाभ्यन्तरमासन्नकालं पञ्चवर्षातीतं तु विप्रकृष्टकालमित्याहुः। **पृच्छ्यमान इति।** आसन्नकालिके भूतानद्यतनपरोक्षार्थवृत्तिधात्वर्थे प्रष्टव्ये सतीत्यर्थः। प्रश्ने किम्, भूतानद्यतनपरोक्षे लिडेव। जगाम चैत्रः। **लट् स्मे।** स्मे इत्यव्ययं भूतकालद्योतकम्। **ननौ।** पृष्टस्य प्रतिवचनमिति विग्रहः। समाहारद्वन्द्वे तूभयत्र स्यात्, इष्यते च प्रतिवचने एव लट्, तदाह **ननु करोमीति।** न च पृष्टग्रहणं व्यर्थं यावता प्रश्नपूर्वकमेव प्रतिवचनं भवतीति वाच्यम्, विरुद्धमपि वचनं प्रतिवचनं वचनाभिमुख्यमपि प्रतिवचनमिति पृष्टग्रहणं कर्तव्यमिति कैयटे स्थितत्वात्। **नन्वोः।**

करोमि। अहं न्वकार्षम्। **२७८२ पुरि लुङ् चास्मे। (३-२-१२२)** अनद्यतनग्रहणं मण्डूकप्लुत्यानुवर्तते। पुराशब्दयोगे भूतानद्यतने विभाषा लुङ्, चाल्लट्, न तु स्मयोगे। पक्षे यथाप्राप्तम्। वसन्तीह पुरा छात्राः अवात्सुः अवसन् ऊषुर्वा। अस्मे किम्—यजति स्म पुरा। भविष्यतीत्यनुवर्तमाने— **२७८३ यावत्पुरानिपातयोर्लट्। (३-३-४)** यावद् भुङ्क्ते। पुरा भुङ्क्ते। निपातावेतौ निश्चयं द्योतयतः। निपातयोः किम्—यावद्दास्यते तावद्भोक्ष्यते। करणभूतया पुरा यास्यति। **२७८४ विभाषा कदाकर्ह्योः। (३-३-५)** भविष्यति लट् वा स्यात्। कदा कर्हि वा भुङ्क्ते भोक्ष्यते भोक्ता वा। **२७८५**

कार्षमित्युत्तरम्। अहं नु करोमि, अहं न्वकार्षमिति च। 'तर्के नु स्यात्' इत्यमरः। **पुरि लुङ् चास्मे।** अस्मे इति च्छेदः। पुरेत्याकारान्तमव्ययम्। पुरीति तस्य सप्तम्येकवचनम्। आत इति योगविभागादाल्लोपः। **मण्डूकप्लुत्येति।** अत्र व्याख्यानमेव शरणम्। **चाल्लडिति।** तथा च लुङ् लट् च वेति फलितम्। **पक्षे इति।** एतदुभयाभावपक्षे इत्यर्थः। **यथाप्राप्तमिति।** अनद्यतनपरोक्षभूते लिट्। परोक्षत्वाविवक्षायां तु लङित्यर्थः। 'अभिज्ञावचने—' इत्यारभ्य एतदन्ता विषयस्तृतीयस्य द्वैतीयीकाः। अथ तृतीयस्य तार्तीयीका विषया वक्ष्यन्ते।

भविष्यतीत्यनुवर्तमाने इति। 'भविष्यति गम्यादयः' इति सूत्रादिति भावः। **यावत्पुरा।** यावत् पुरा इति द्वे पदे। अनयोः प्रयुज्यमानयोर्लट् स्यादित्यर्थः। लुडादेरपवादः। **निश्चयं द्योतयत इति।** 'यावत्तावच्च साकल्येऽवधौ मानेऽवधारणे' इत्यमरः। **यावद्दास्यते तावद्भोक्ष्यते इति।** यत्परिमाणकं तत्परिमाणकमित्यर्थः। 'यत्तदेतेभ्यः परिमाणे वतुप्' इति वतुबन्तत्वेन निपातत्वाभावान्न लडिति भावः। **करणभूतयेति।** पुरा यास्यतीति प्रत्युदाहरणान्तरम्। पुर्शब्दस्य पुरेति तृतीयान्तमिदम्। तत्स्फोरणाय करणभूतयेत्युक्तम्। **विभाषा**

भूत इत्येव। पक्षे लुङ्। अस्मे तु लङ्। **पक्षे यथाप्राप्तमिति।** लुङ्लटोरभावपक्षे लङ्, पारोक्ष्ये तु लिडित्यर्थः। **भविष्यतीति।** 'भविष्यति गम्यादयः' इति सूत्रात्। **यावत्पुरा।** लक्षणप्रतिपदोक्तपरिभाषाऽनित्येति निपातग्रहणेन ज्ञाप्यते। **यावद् भुङ्क्त इति।** निश्चितं भोक्ष्यत इत्यर्थः। **यावद्दास्यत इति।** अनद्यतनभविष्यति तु यावद्दाता तावद्भोक्तेति प्रत्युदाहर्तव्यम्। **विभाषा।** ननु 'अनद्यतने र्हिलन्यतरस्याम्' इत्यनद्यतने किमोर्हिल्विहितस्ततश्च कर्हियोगे लुटैव भाव्यमिति कथमुदाह्रियते कर्हि भोक्ष्यत इति। अत्राहुः—भविष्यत्सामान्ये भोक्ष्यते इति लृट्। कर्हियोगे तु अनद्यतनावगतिर्लक्षणयेति। **भोक्ता वेति।** ननु भवि-

किंवृत्ते लिप्सायाम् । (३-३-६) किंवृत्तं विभक्त्यन्तम् । भविष्यति लड् वा स्यात् । कं कतरं कतमं वा भोजयसि, भोजयिष्यसि, भोजयितासि वा । लिप्सायां किम्—कः पाटलिपुत्रं गमिष्यति । २७८६ **लिप्स्यमानसिद्धौ च** । (३-३-७) लिप्स्यमानेनान्नादिना स्वर्गादेः सिद्धौ गम्यमानायां भविष्यति लड् वा स्यात् । योऽन्नं ददाति, दास्यति, दाता वा, स स्वर्गं याति, यास्यति, याता वा । २७८७ **लोडर्थलक्षणे च** । (३-३-८) लोडर्थः प्रैषादिर्लक्ष्यते येन तस्मिन्नर्थे वर्तमानाद्धातोर्भविष्यति लड् वा स्यात् । कृष्णश्चेद् भुङ्क्ते त्वं

कदाकर्ह्योः । भविष्यति लड् वा स्यादिति शेषपूरणम् । लडभावपक्षे लुट्लृटौ यथाप्राप्तम्, तदाह **कदा कर्हि वा भुङ्क्ते भोक्ष्यते भोक्ता वेति** । न च कर्हियोगे लडभावपक्षे लुडेवोचितः, न तु लृट् । 'अनद्यतने र्हिलन्यतरस्याम्' इति र्हिलन्तकर्हियोगविरोधादिति वाच्यम्, लृडुदाहरणस्य कदायोगमात्रविषयत्वादित्याहुः । **किंवृत्ते लिप्सायाम्** । किंशब्देन वृत्तं निष्पन्नं किंवृत्तमित्यभिप्रेत्याह **विभक्त्यन्तमिति** । **लड् वेति** । लडभावे तु लुड्लृटौ यथाप्राप्तम् । किंवृत्तशब्देन विभक्त्यन्तडतरडतमान्तानामेव ग्रहणमिति वृत्तिः । तेन कदादियोगे भविष्यति लट् । 'यद्वृत्तान्नित्यम्' इति सूत्रभाष्यरीत्या तु किंवृत्तानां सर्वेषां कदेत्यादीनामपि ग्रहणमिति युक्तम् । **कं कतरं कतमं वेति** क्षुधितमन्नलिप्सुमिति शेषः । **लिप्स्यमानसिद्धौ च** । **लड् वेति** । पक्षे यथाप्राप्तम् । लिप्स्यमानसिद्धौ लिप्सायाः सत्त्वेऽप्यकिंवृत्तार्थमिदमिति मत्वोदाहरति **योऽन्नमिति** । योऽन्नं ददाति स स्वर्गं याति योऽन्नं दास्यति स स्वर्गं यास्यति । योऽन्नं दाता स स्वर्गं यातेत्यन्वयः । **लोडर्थलक्षणे च** । **लोडर्थः प्रैषादिरिति** । विधिनिमन्त्रणामन्त्रणाधीष्टसंप्रश्नप्रार्थनेषु इत्यनुवृत्तौ 'लोट् च' इति लोड्विधानादिति भावः । **कृष्णश्चेदिति** । कृष्णभोजनकाले त्वं गाश्चारयेत्यर्थः । अत्र कृष्णभोजनं लोडर्थस्य गोचार-

---

ण्यत्सामान्येऽयं लड्विहितस्तस्य लुटा सह कथं विकल्पो विषयभेदादिति चेत् । अत्राहुः—'अनद्यतने लुट्' इत्यत्र 'विभाषा कदा–' इत्यादीनि कानिचित्सूत्राणीष्टानुरोधेनानुवर्तन्ते तेन लुड्विषयेऽपि लड् भवति न त्वनद्यतने लुटा लड् बाध्यत इति । **किंवृत्ते** । किमा वृत्तं किंवृत्तम् । केचित्तु यद्यपि कदाकुत्रेत्याद्यपि किं वृत्तं तथापि तन्न गृह्यते, अनभिधानात् । तेन कदा भोजयिष्यसीत्यादौ भविष्यति लड् नेत्याहुः । **लिप्स्यमान** । लिप्स्यमानसिद्धौ लिप्सायाः सत्त्वात्पूर्वेण सिद्धेऽप्यकिंवृत्तार्थमिदमिति ध्वनयन्नुदाहरति **योऽन्नमिति** । **लोडर्थ** । लोडर्थस्य लक्षणमिति षष्ठीतत्पुरुषः । कृष्णभोजनं लोडर्थस्य गोचारणप्रैषस्य लक्षणम् । भोजनकाले गोचारणं त्वया कर्तव्य-

गाश्चारय। पक्षे लुड्लृटौ। २७८८ **लिङ् चोर्ध्वमौहूर्तिके।** (३-३-९) ऊर्ध्वं मुहूर्ताद्भव उर्ध्वमौहूर्तिकः। निपातनात्समास उत्तरपदवृद्धिश्च। ऊर्ध्वमौहूर्तिके भविष्यति लोडर्थलक्षणे वर्तमानाद्धातोर्लिङ्लटौ वा स्तः। मुहूर्तादुपरि उपाध्यायश्चेदागच्छेत्, आगच्छति, आगमिष्यति, आगन्ता वा अथ त्वं छन्दोऽधीष्व। २७८९ **वर्तमानसामीप्ये वर्तमानवद्वा।** (३-३-१३१) समीपमेव सामीप्यम्। स्वार्थे ष्यञ्। 'वर्तमाने लट्' (सू २१२१) इत्यारभ्य

त्प्रैषस्य लक्षणम्, परिच्छेदकमिति यावत्। **पक्षे लुड्लृटाविति।** कृष्णश्चेद्भोक्ता, भोक्ष्यते वा, त्वं गाश्चारयेत्युदाहार्यम्। **लिङ् चोर्ध्वमौहूर्तिके।** ऊर्ध्वमिति विभक्तिप्रतिरूपकमव्ययम्। ऊर्ध्वं मुहूर्ताद् भव इति विग्रहः। केचित्तु ऊर्ध्वमिति द्वितीयान्तम्, 'अकर्मकधातुभिर्योगे-' इति कर्मत्वादित्याहुः। **ऊर्ध्वमौहूर्तिक इति।** ऊर्ध्वमुहूर्तशब्दाद् भवार्थे कालाट्ठञिति भावः। ननु तद्धितार्थेत्यत्र दिक्संख्ये इत्यनुवृत्तेः समानाधिकरणाधिकाराच्चात्र कथं समास इत्यत आह **निपातनादिति।** पूर्वपदे आदिवृद्धिमाशङ्क्याह **उत्तरपदवृद्धिश्चेति।** निपातनादित्यनुषज्यते। **ऊर्ध्वमौहूर्तिके इति।** मुहूर्तादूर्ध्वकालीने इत्यर्थः। इदं च लोडर्थलक्षण इत्यत्रान्वेति **लिङ्लटाविति।** चाल्लट् समुच्चीयते इति भावः। **वा स्त इति।** पक्षे लुड्लृटौ यथाप्राप्तम्। **छन्द इति।** वेदमित्यर्थः।

इति तृतीयस्य तृतीये भविष्यतीत्यधिकारस्था लविषयः।

अथास्मिन्नेव तृतीयपादे कतिपयान् विधीनाह **वर्तमानसामीप्ये। स्वार्थे ष्यञिति।** अस्मादेव निर्देशात् चतुर्वर्णादेराकृतिगणत्वाद्वेति भावः। **इत्यारभ्येति।** तृतीयस्य द्वितीये 'वर्तमाने लट्' इत्यारभ्य आपादसमाप्तेः 'उणादयो बहुलम्,' इति तृतीयपादादिमसूत्रात् प्राग् वर्तमानाधिकारः। तस्मिन्नधिकारे येन विशेषणेन याभ्यः प्रकृतिभ्यो वर्तमाने प्रत्यया विहिताः ते सर्वे तेनैव विशेषणेन ताभ्यः प्रकृतिभ्यो वर्तमानसमीपकाले भूते भविष्यति च वा भवन्तीत्यर्थः। अत्र भूते भविष्यति चेत्यार्थिकम्, तयोरेव वर्तमानसामीप्यसत्त्वात् कदा आगतोऽसीत्या-

---

मित्यर्थः। **पक्षे लुडिति। कृष्ण इति।** कृष्णश्चेद् भोक्ता कृष्णश्चेद्भोक्ष्यते त्वं गाश्चारयेत्यर्थः। **लिङ् चोर्ध्वं।** कालाट्ठञ्। 'तद्धितार्थोत्तरपद-' इत्यत्र 'दिक्संख्ये-' इत्यनुवर्तनादिह समासो दुर्लभ इत्याशङ्कायामाह **निपातनादिति। वर्तमान। स्वार्थे ष्यञिति।** अस्मादेव सामीप्य इति निर्देशात्ष्यञि सिद्धे 'चतुर्वर्णादिभ्यः' इति वार्तिकं प्रपञ्चार्थमित्याहुः। न चात्र 'पूरणगुण-' इति निषेधात्षष्ठीसमासो न प्राप्नोतीति वाच्यम्, अनेनैव निर्देशेन तन्निषेधस्यानित्यत्वाभ्युपगमात्। तेन बुद्धिमान्द्य-

'उणादयो बहुलम्' (सू ३१६९) इति यावद्येनोपाधिना प्रत्यया उक्तास्ते तथैव वर्तमानसमीपे भूते भविष्यति च वा स्युः । कदा आगतोऽसि ? अयमागच्छामि, अयमागमम् । कदा गमिष्यसि । एष गच्छामि गमिष्यामि वा । २७६० आशंसायां भूतवच्च (३-३-१३२) वर्तमानसामीप्य इति नानुवर्तते । भविष्यति काले भूतवद्वर्तमानवच्च प्रत्यया वा स्युराशंसायाम् । देवश्चेदवर्षीद् वर्षति

गतं प्रति प्रश्नः । अयमागच्छामीत्युत्तरम् । अव्यवहितपूर्वकाले आगतवानस्मीत्यर्थः । वर्तमानसमीपकाले भूते लट् । अयमित्यनेन आगमनकालीनं प्रस्वेदपरिकरबन्धादियुक्तं रूपं निर्दिश्यते इदानीमागमनं सूचयितुम् । **आगममिति** । वर्तमानवत्त्वाभावे भूते लुङ् । कदा गमिष्यसीति गमनात्प्राक् प्रश्ने, एष गच्छामि इत्युत्तरम् । अव्यवहितोत्तरकाले गमिष्यामीत्यर्थः । एष इति तु अयमितिवद् व्याख्येयः । वर्तमानकालसमीपे भविष्यति लट् । **गमिष्यामि वेति** । वर्तमानवत्त्वाभावे भविष्यति लृट् । **आशंसायां भूतवच्च । नानुवर्तते इति** । अत्र व्याख्यानमेव शरणम् । अप्राप्तस्य प्रियस्य प्राप्तीच्छा आशंसा । सा च भविष्यद्विषयैव । भूते इच्छाविरहात्, तदाह **भविष्यति काले इति । देवश्चेदिति** । देवः पर्जन्यः, अवर्षीचेद् धान्यमवाप्स्म । वर्षति चेद् वपामः । वर्षिष्यति चेद् वप्स्याम इत्यन्वयः भूतवद्भावाद्

मित्यादि सिद्धम् । **येनोपाधिनेति** । धातुविशेषाद्युपाधिना । तथा हि पूङ्यजोः शानन्विहितः स ताभ्यामेव धातुभ्यां भवति न तु धात्वन्तरात् । तच्छीलादिविशिष्टे कर्तरि 'अलंकृञ्–' इत्यारभ्य 'भ्राजभास–' इति यावद् ये इष्णुजादय उक्तास्तेऽपि कृञादिभ्यो धातुभ्यस्तस्मिन्नुपाधौ सत्येव भवन्ति । कदा आगतोऽसीति भूतकालेन प्रश्नवाक्यम्, आगच्छामीत्युदाहरणे भूतकालाभिव्यक्तयेऽयमिति प्रयोगस्त्विदानीमेवागममिति वर्तमानसमीपभूतकालद्योतनाय । तेन ह्यागमनाविनाभूतं यद् रूपं धूलीधूसरताप्रस्वेदादियुक्तं तत्प्रतिनिर्दिश्यते । एवं कदा गमिष्यसीति भविष्यत्कालेन प्रश्नवाक्यम् । गच्छामीत्युदाहरणे भविष्यत्कालाभिव्यक्तये एष इति प्रयोगस्तु इदानीमेव गमिष्यामीति वर्तमानसमीपभविष्यत्कालद्योतनाय । तेन हि गमनाऽविनाभूतं यद् रूपं परिकरबन्धादियुक्तं तत्प्रतिनिर्दिश्यते । न च कदेति प्रश्ने उत्तरवाक्ययोः कालानुपादानादसंगतिः शङ्क्या, उत्तरत्रायमेषशब्दाभ्यामिदानीमिति कालावगमात् । सामीप्ये किम्, कदा आगतो भवान् । अस्मान्मासात्पूर्वस्मिन्मासे आगच्छम् । एतच्च सूत्रमाकरे प्रत्याख्यातम् । गङ्गासमीपे गङ्गात्वारोपवद्वर्तमानसमीपे वर्तमानत्वारोपसंभवात् । **आशंसायाम्** । आशंसनमाशंसा अप्राप्तस्य प्राप्तुमिच्छा । आशंसायां वर्तमानत्वेऽपि तद्विषयस्य वर्षादेर्भविष्यत्कालसंबन्धाद्भविष्यतीत्युक्तम् । आशंसायां किम्, गमिष्यति ।

वर्षिष्यति वा धान्यमवाप्स्म वपामो वप्स्यामो वा। सामान्यातिदेशे विशेषानतिदेशः, तेन लङ्लिटौ न। २७६१ क्षिप्रवचने लृट्। (३-३-१३३) क्षिप्रपर्याये उपपदे पूर्वविषये लृट् स्यात्। वृष्टिश्चेत्क्षिप्रमाशु त्वरितं वा यास्यति। शीघ्र वप्स्यामः। नेति वक्तव्ये लृड्ग्रहणं लुटोऽपि विषये यथा स्यात्। श्वः शीघ्रं वप्स्यामः। २७६२ आशंसावचने लिङ्। (३-३-१३४) आशंसावाचिन्युपपदे भविष्यति लिङ् स्यान्न तु भूतवत्। गुरुश्चेदुपेयादाशंसेऽधीयीय। आशंसे क्षिप्रमधीयीय। २७६३ नानद्यतनवत्क्रियाप्रबन्धसामीप्ययोः।

भविष्यति लुङ्, अवर्षीदिति अवाप्स्मेति च भवति। वपधातोर्लुङि उत्तमपुरुषबहुवचने अवाप्स्मेति भवति। वृष्टिवापयोरुभयोरप्याशंसाविषयत्वादुभयत्रापि लुङ्। वर्तमानवत्त्वपक्षे तु लट्। तदुभयाभावे तु लृट्। ननु भूतवत्त्वपक्षे लङ्लिटावपि कुतो न स्यातामित्यत आह **सामान्यातिदेशे इति**। भूतत्वसामान्ये विहितस्यातिदेशादनद्यतनभूतत्वविशेषविहितयोर्लङ्लिटोर्नातिदेश इत्यर्थः। एतच्च भाष्ये स्पष्टम्। **क्षिप्रवचने लृट्**। वचनग्रहणात् क्षिप्रपर्याये इति लभ्यते, तदाह **क्षिप्रपर्याये इति**। **पूर्वविषये इति**। आशंसायामित्यर्थः। 'आशंसायां भूतवच्च' इत्यस्यापवादः। ननु क्षिप्रवचने नेत्येतावतैव आशंसायां क्षिप्रपर्याये उपपदे भविष्यति न भूतवद् न वर्तमानवदिति लाभाल्लृड्ग्रहणमनर्थकमित्यत आह **नेति वक्तव्ये इति**। क्षिप्रवचने नेत्युक्ते 'सामान्यातिदेशे विशेषानतिदेशः' इति न्यायेन भविष्यत्सामान्ये विहितस्य लृट एव निषेधः स्यात्, न तु लुटः, तस्य अनद्यतनभविष्यद्विशेषविधानात्। लृड्ग्रहणे तु उक्तविषये लृडेव स्यात्, न तु लकारान्तरमिति लाभाल्लुटोऽपि विषये लृडेवेति लभ्यत इत्यर्थः। **श्वः शीघ्रं वप्स्याम इति**। अनद्यतनत्वद्योतनाय श्वश्शब्दः। अत्र न लुडिति भावः। **आशंसावचने** लिङ्। आशंसायाः प्राप्तीच्छाया भूते असंभवाद् भविष्यतीति लभ्यत इति मत्वाह **भविष्यतीति**। 'आशंसायां भूतवच्च' इत्यस्यापवादः, तदाह **न तु भूतवदिति**। **गुरुश्चेदिति**। गुरुरुपेयाच्चेत् क्षिप्रमधीयीयेत्याशंसे इत्यन्वयः। क्षिप्रयोगेऽपि परत्वाल्लिङेव न तु

क्षिप्रवचने। वचनग्रहणं स्वरूपग्रहणनिरासार्थम्, तदाह **क्षिप्रपर्याय इति**। **पूर्वविषय इति**। आशंसायामित्यर्थः। तेन पूर्वलकारापवादोऽयम्। **आशंसावचने** भूतवर्तमानवत्प्रत्यययोरपवादः। न भूतवदिति न वर्तमानवदित्यपि बोध्यम्। **आशंसेऽधीयीयेति**। एवं प्रार्थये अधीयीय इच्छामो वयमधीयीमहीत्यादि ज्ञेयम्। **क्षिप्रमिति**। क्षिप्रयोगेऽपि परत्वाल्लिङिति भावः। **नानद्यतन**। भूतानद्यतने लङ्विहितो भविष्यत्यनद्यतने तु लुट् तौ चानयोरर्थयोर्निषिध्येते, तदाह

(३-३-१३५) क्रियायाः सातत्ये सामीप्ये च गम्ये लङ्लुटौ न। यावज्जीवमन्नमदाद्दास्यति वा। सामीप्यं तुल्यजातीयेनाव्यवधानम्। येयं पौर्णमास्यतिक्रान्ता तस्यामग्नीनाधित, सोमेनायष्ट। येयममावास्याऽऽगामिनी तस्यामग्नीनाधास्यते, सोमेन यक्ष्यते। २७६४ भविष्यति मर्यादावचनेऽवरस्मिन् (३-३-१३६) भविष्यति काले मर्यादो-क्ताववरस्मिन्प्रविभागेऽनद्यतनवन्न। योऽयमध्वा गन्तव्य आपाटलिपुत्रा-

---

लुङिति भावः। नानद्यतनवत्। क्रियायाः प्रबन्धः सातत्यम्, तदाह **क्रियायाः सातत्ये इति**। अनद्यतनवदित्यनेन अनद्यतने भूते भविष्यति च विहितौ लङ्-लुटौ विवक्षितौ, तदाह **लङ्लुटौ नेति**। अनद्यतने भूते लङ् न भवति। भवि-ष्यत्यनद्यतने तु लुट् नेत्यर्थः। क्रियासातत्ये लङ्निषेधमुदाहरति **यावज्जीवमन्न-मदादिति**। लुङि 'गातिस्था-' इति सिचो लुक्। सामीप्ये उदाहरिष्यन्नाह **सामी-प्यमिति**। **येयमिति**। पौर्णमास्या उपरि कृष्णपक्षे कतिपयाहोरात्रैः व्यव-धानेऽपि सामीप्यमस्त्येव, पौर्णमास्यन्तरेण सजातीयेन व्यवधानाभावात्। **आधि-तेति**। धाधातोर्लुङि 'स्थाघ्वोरिच्च' इति धाधातोरित्त्वं सिचः कित्त्वं च। 'ह्रस्वा-दङ्गात्' इति सिचो लोपः। **सोमेनायष्टेति**। येयं पौर्णमास्यतिक्रान्ता तस्या-मित्यनुषज्यते। अथ क्रियासातत्ये लुटो निषेधमुदाहरति **येयममावास्येति**। **सोमेन यक्ष्यते इति**। येयममावास्या आगामिनी तस्यामित्यनुषज्यते। **भवि-ष्यति मर्यादा**। अवरस्मिन्निति च्छेदः। **अनद्यतनवन्नेति**। लुट् नेत्यर्थः। अक्रियाप्रबन्धार्थमिति भाष्यम्। असामीप्यार्थं चेति कैयटः। **योऽय-मिति**। कस्मिंश्चिज्जनपदविशेषे वसतः पाटलिपुत्राख्यं नगरविशेषं जिगमिषोरिदं वाक्यम्। मध्येमार्गं कौशाम्बी नाम काचिन्नगरीति स्थितिः। तत्र आपाटलिपुत्राद्

लङ्लुटौ नेति। एवं च भूते लुङ् भविष्यति तु लृङित्याशयेनोदाहरति **अन्नम-दाद् दास्यतीत्यादि**। **अग्नीनिति**। आहवनीयादीन्। **भविष्यति मर्यादा**। अक्रियाप्रबन्धार्थमसामीप्यार्थं चेदं वचनम्। नानद्यतनवदित्यनुवर्तते इत्याह **अन-द्यतनवन्नेति**। लुडत्र नेत्यर्थः। इह सूत्रे देशकृता मर्यादा उत्तरत्र कालकृता, तत्र विशेषं वक्ष्यति **तस्य यदवरमिति**। पाटलिपुत्रावधिकमार्गस्य यदवरं कौशा-म्ब्याः सकाशादित्यर्थः। कौशाम्ब्याः पूर्वमिति यावत्। भविष्यति किम्, योऽध्वा अतिक्रान्त आपाटलिपुत्रात्तस्य यदवरं कौशाम्ब्यास्तत्र सक्तूनपिबाम। मर्यादावचने इति किम्, योऽध्व गन्तव्यो निरवधिकस्तस्य यदवरं कौशाम्ब्यास्तत्र सक्तून्पा-स्यामः। अवरस्मिन्निति किम्, योऽध्वा गन्तव्य आपाटलिपुत्रात्तस्य यत्परं कौशा-

त्तस्य यदवरं कौशाम्ब्यास्तत्र सक्तून्पास्यामः । २७९५ कालविभागे चानहोरात्राणाम् । (३-३-१३७) पूर्वसूत्रं सर्वमनुवर्तते । अहोरात्रसम्बन्धिनि विभागे प्रतिषेधार्थमिदम् । योगविभाग उत्तरार्थः । योऽयं वत्सर आगामी तस्य यदवरमाग्रहायण्यास्तत्र युक्ता अध्येष्यामहे । अनहोरात्राणां किम्-योऽयं मास आगामी तस्य योऽवरः पञ्चदशरात्रस्तत्राध्येतास्महे । २७९६ परस्मिन्

योऽयं गन्तव्योऽध्वा तस्य अध्वनो मध्यवर्तिन्याः कौशाम्ब्या यदवरं पूर्वप्रदेशः तत्र सक्तून् श्वःप्रभृति पास्याम इति योजना। अत्र कौशाम्ब्या इति मर्यादा गम्यते। अवरमित्यनेन अवरत्वं गम्यते। अत्र भविष्यत्यनद्यतने लुड् न, किंतु लृडेवेति भावः। **कालविभागे। पूर्वसूत्रमिति**। 'भविष्यति मर्यादावचनेऽवरस्मिन्' इति सूत्रमित्यर्थः। ननु कालमर्यादायामपि पूर्वसूत्रेणैव सिद्धमित्यत आह **अहोरात्रेति**। तथा च अहोरात्रसंबन्धिनि प्रविभागे 'भविष्यति मर्यादावचने' इत्युक्तविधिर्न भवतीत्यर्थः। ननु 'भविष्यति मर्यादावचनेऽवरस्मिन् कालविभागे चानहोरात्राणाम्' इत्येकमेव सूत्रं कुतो नेत्यत आह **योगविभाग उत्तरार्थ इति**। इदमुत्तरसूत्रे स्पष्टीभविष्यति। **योऽयं वत्सर आगामीति**। कालतो मर्यादायामुदाहरणम्। **आग्रहायण्या इति**। मार्गशीर्षपौर्णमास्या इत्यर्थः। **युक्ता इति**। नियमयुक्ता इत्यर्थः। **अध्येष्यामहे इति**। अत्र न लुट्, किंतु लृडेवेति भावः। **पञ्चदशरात्र इति**। पञ्चदश रात्रयो यस्य पक्षस्येति बहुव्रीहिः। 'अच्प्रत्यन्ववपूर्वात्' इत्यत्र अजिति योगविभागादच्समासान्तः। यद्वा पञ्चदशानां

म्ब्यास्तत्र सक्तून्पातास्मः। **कालविभागे च**। कालविभागः कालविशेषः। अनहोरात्राणामिति संबन्धषष्ठी। **पूर्वसूत्रमिति**। तदयमर्थः—मर्यादोक्तौ कालविशेषाद्यदवरं तस्मिन्प्रविभागे भविष्यत्यनद्यतनवन्न, स चेत्कालविभागः अहोरात्रसंबन्धी न चेदित्यर्थः। इह कालविभागे सत्यवरस्मिन्ननद्यतनवन्नेत्युक्ते कस्मादित्यपेक्षायामर्थात्कालविशेषादिति लभ्यत इत्येके। केचित्तु कालविभाग इति पञ्चम्यर्थे सप्तमीत्याहुः। **उत्तरार्थ इति**। 'परस्मिन्विभाषा' इति सूत्रे कालमर्यादाया एवानुवृत्तिर्यथा स्यात्। भविष्यतीति किम्, यः संवत्सरोऽतीतस्तस्य यदवरं मासात्तत्र पयोऽपिबाम। मर्यादायामिति किम्, यो निरवधिः समयस्तस्य यदवरं मासात्तत्र पयः पातास्मः। **पञ्चदशरात्र इति**। नन्वत्र 'संख्यापूर्वं रात्रम्–' इति क्लीबत्वेन भाव्यम्। न च पञ्चदश रात्रयो यस्मिन्पक्षे इति बहुव्रीह्याश्रयणात्पुँल्लिङ्गः सिद्ध इति वाच्यम्, 'अहःसर्वैकदेश–' इत्यच्प्रत्ययस्याभावप्रसङ्गादिति चेत्। सत्यम्। अत एव हि भाष्यप्रयोगात्क्लीबत्वं नेत्याहुः। **परस्मिन्**। 'भविष्यत्यनद्यतनवन्न' इति विक-

१ 'मास' इति क्वचित् पाठः।

विभाषा। (३-३-१३८) अवरस्मिन्वर्जं पूर्वसूत्रद्वयमनुवर्तते। अप्राप्तविभाषेयम्। योऽयं संवत्सर आगामी तस्य यत्परमाग्रहायण्यास्तत्राध्येष्यामहे, अध्येतास्महे। 'लिङ्निमित्ते लृङ् क्रियातिपत्तौ' (सू २२२१)। भविष्यतीत्येव। सुवृष्टिश्चेदभविष्यत्तदा सुभिक्षमभविष्यत्। २७९७ भूते च। (३-३-१४०) पूर्वसूत्रं सम्पूर्णमनुवर्तते। २७९८ वोताप्योः। (३-३-१४१) वा आ उताप्योः इति छेदः। 'उताप्योः—' (२८०१) इत्यतः प्राग्भूते लिङ्निमित्ते लृङ् वेत्यधिक्रियते। पूर्वसूत्रं तु 'उताप्योः' इत्यादौ प्रवर्तते इति विवेकः। २७९९ गर्हायां लडपिजात्वोः। (३-३-१४२) आभ्यां योगे लट् स्यात् कालत्रये गर्हायाम्। लुङादीन्परत्वादयं बाधते। अपि जायां त्यजसि,

---

रात्रीणां समाहारः पञ्चदशरात्रः। 'अहःसर्वैकदेश—' इत्यच्समासान्तः। 'संख्यापूर्वं रात्रं क्लीबम्' इति तु 'लिङ्गमशिष्यं लोकाश्रयत्वाल्लिङ्गस्य' इति वचनान्न भवति। **परस्मिन्विभाषा। अनुवर्तते इति।** तथा च भविष्यति काले मर्यादोक्तौ परस्मिन् विभागे अनद्यतनवद्वेति फलितम्। 'लिङ्निमित्ते लृङ् क्रियातिपत्तौ' इति व्याख्यातं भूधातुनिरूपणे। **भूते च।** अधिकारोऽयम्। **अनुवर्तते इति।** तथा च लिङ्निमित्ते लृङ् क्रियातिपत्तौ भूत इत्यधिक्रियते इति फलितमिति भावः। **वोताप्योः।** अयमप्यधिकारः। वा आ उताप्येरिति छेदः। भूते इति लिङ्निमित्ते लृङिति चानुवर्तते, तदाह **उताप्योरित्यतः प्रागिति।** उताप्योः समर्थयोरित्यतः प्रागित्यर्थः। नन्वनेन 'उताप्योः—' इत्यतः प्राग् भूते लिङ्निमित्ते लृङ्वेत्यधिकाराक्रान्तत्वाद् भूते चेति पूर्वमधिकारसूत्रं निर्विषयमित्यत आह **पूर्वसूत्रं त्विति।** 'उताप्योः समर्थयोर्लिङ्' इत्यारभ्य 'इच्छार्थेभ्यो विभाषा' इत्यतः प्राग् 'भूते च' इति पूर्वमधिकारसूत्रं प्रवर्तत इत्यर्थः। इमावधिकारौ यत्र लिङ्विधिस्तत्रैव प्रवर्तेते, न तु लडादिविधौ, लिङ्निमित्ताभावात्। **गर्हायाम्।** अपि जातु अनयोर्द्वन्द्वः। अत्र 'वोताप्योः—' इति भूते लिङ्निमित्ते लृङ् वा इत्यधिकारो न संबध्यते।

त्वेन निषिध्यते। **वर्ज्यमिति।** णिजन्ताद् 'अचो यत्' इति कर्मणि यत्। वर्जमिति पाठे तु 'द्वितीयायां च' इति णमुल्। अनहोरात्राणामित्येव। योऽयं वत्सर आगामी तस्य यत्परं पञ्चदशरात्रात्तत्र पयः पातास्म इत्यादि। **लिङ्निमित्त इति।** अतिपत्तिरनिष्पत्तिः। **भूते च।** लिङ्निमित्ते लृङ् स्याद् भूते भविष्यति च क्रियातिपत्तौ। अद्यतनानद्यतनसाधारणं भूतसामान्यमिह ज्ञेयम्। अस्योदाहरणानि 'उताप्योः समर्थयोर्लिङ्' इत्यारभ्य 'समानकर्तृकेषु तुमुन्' इति विहाय सप्तसूत्र्यां बोध्यानि। ततः प्राचीनेषु 'वोताप्योः' इत्यनेन विकल्पोक्तेः। **लृङ् वेति।**

जातु गणिकामाधत्से, गर्हितमेतत्। २८०० विभाषा कथमि लिङ् च। (३-३-१४३) गर्हायामित्येव। कालत्रये लिङ्, चाल्लट्। कथं धर्मं त्यजेः त्यजसि वा। पक्षे कालत्रये लकाराः। अत्र भविष्यति नित्यं लृङ्, भूते वा। कथं नाम तत्रभवान्धर्ममत्यक्ष्यत्। २८०१ किंवृत्ते लिङ्लृटौ। (३-३-१४४)

लङ्विधानेन तद्विषये लिङ्निमित्ताभावात्। **कालत्रये इति**। वर्तमाने भूते भविष्यति चेत्यर्थः। भविष्यतीति निवृत्तम्। अतः कालसामान्ये लडिति भावः। **परत्वादिति**। अनवकाशत्वाच्चेत्यपि द्रष्टव्यम्। अपि जायामित्यत्र जातु गणिकामित्यत्र च अपिजातुशब्दौ निन्दाद्योतकौ, तदाह **गर्हितमेतदिति**। **विभाषा कथमि लिङ् च। गर्हायामित्येवेति**। अनुवर्तत एवेत्यर्थः। कालत्रये लिडिति शेषपूरणम्। भविष्यतीति निवृत्तमिति भावः। **चाल्लडिति**। समुच्चीयते इति शेषः। तथा च कथमित्यस्मिन् प्रयुज्यमाने कालत्रये गर्हायां लिङ्लटौ वा स्त इति फलितम्। **कथं धर्मं त्यजेरिति**। त्यक्तवान् त्यक्ष्यसि त्यजसि वेत्यर्थः। गर्हितमेतदिति कथंशब्दाद्गम्यते। लटि उदाहरति **त्यजसि चेति**। उक्तोऽर्थः। **पक्षे इति**। विभाषाग्रहणाल्लिङ्लटोरभावपक्षे भूते वर्तमाने भविष्यति च कालत्रये लिड्लङ्लुङ्लड्लुड्लृट इत्यर्थः। **अत्रेति**। अत्र उक्तविषये भविष्यति काले क्रियाया अनिष्पत्तौ गम्यमानायां 'लिङ्निमित्ते लृङ् क्रियातिपत्तौ' इति नित्यमेव लृङ्, कथमो गर्हायाश्च लिङ्निमित्तस्य सत्त्वादित्यर्थः, विशेषविहितत्वादिति भावः। **भूते वेति**। 'वोताप्योः—' इति भूते लिङ्निमित्ते लृङ् वेति अधिकृतत्वादुक्तविषये भूतकाले लृङ् वेत्यर्थः। भविष्यति नित्यं लृङित्यत्रोदाहरति **कथं नामेति**। तत्रभवानिति समुदायः पूज्यवाची। वेदप्रामाण्याभ्युपगन्तेति यावत्। एवंविधः कथं धर्ममत्यक्ष्यत्, तत्त्यागस्य गर्हितत्वादिति भावः। **किंवृत्ते लिङ्-**

लिङ्निमित्ते भूत एवायं विकल्पः, भविष्यति तु नित्यमेव लृङ्। **गर्हायाम्**। अत्र 'वोताप्योः' इति न संबध्यते। वर्तमाने लडुक्तः कालत्रये तु न प्राप्नोतीति विधिरर्थम्। **कालत्रय इति**। कालविशेषानुपादानादिति भावः। **परत्वादिति**। निरवकाशत्वादित्यपि बोध्यम्। **अपि जायामिति**। त्यक्ष्यसि अत्याक्षीरित्यादिविषयेऽपि त्यजसीत्यादि लडेव प्रयुज्यत इति भावः। एवं यो जायां तत्याज अत्यजत् अत्याक्षीत् त्यक्ता त्यक्ष्यतीत्यादिविषयेऽपि यो जायामपि त्यजति जातु गणिकामाधत्ते इति लडेव कालत्रयलकारापवादतया प्रयोक्तव्यः। लिङ्निमित्ताभावादिह क्रियातिपत्तौ लृङ् न भवति। **कालत्रये लकारा इति**। परोक्षानद्यतनभूते लिट् कथं धर्मं तत्यक्थ। भूतानद्यतने लङ् कथं धर्ममत्यजः। भूतसामान्ये लुङ् अत्याक्षीः।

गर्हायामित्येव। विभाषा तु नानुवर्तते। कः कतरः कतमो वा हरिं निन्देत्, निन्दिष्यति वा। लृङ् प्राग्वत्। **२८०२ अनवक्लृप्त्यमर्षयोरकिंवृत्तेऽपि।** (३-३-१४५) गर्हायामिति निवृत्तम्। अनवक्लृप्तिरसंभावना। अमर्षोऽक्षमा। न सम्भावयामि न मर्षये वा भवान्हरिं निन्देत्, निन्दिष्यति वा। कः कतरः कतमो वा हरिं निन्देत्, निन्दिष्यति वा। लृङ् प्राग्वत्। **२८०३ किंकिलास्त्यर्थेषु लृट्।** (३-३-१४६) अनवक्लृप्त्यमर्षयोरित्येतद् 'गर्हायां च' (सू २८०६) इति यावदनुवर्तते। किंकिलेति समुदायः क्रोधद्योतक उपपदम्। अस्त्यर्था अस्तिभवतिविद्यतयः। लिङोऽपवादः। न श्रद्दधे न मर्षये वा किंकिल

लृटौ। नानुवर्तते इति। व्याख्यानादिति भावः। विभक्त्यन्तं डतरडतमान्तं च किंशब्दनिष्पन्नं किंवृत्तमित्युक्तम्। तस्मिन्प्रयुज्यमाने गर्हायां लिङ्लृटौ स्त इत्यर्थः। सर्वलकाराणामपवादाविति वृत्तिः। **लृङ् प्राग्वादिति।** भविष्यति नित्यं लृङ्, भूते वेति प्रागुक्तमिहाप्यनुसंधेयमित्यर्थः। लिङ्निमित्तस्य किंवृत्तस्य गर्हायाश्च सत्त्वादिति भावः। **अनवक्लृप्त्यमर्ष। निवृत्तमिति।** व्याख्यानादिति भावः। अनवक्लृप्त्यमर्षयोः लिङ्लृटोश्च यथासंख्यं नेष्यते, अल्पाच्तरस्य अमर्षशब्दस्य पूर्वनिपातत्यागादिति वृत्तिः। **न सम्भावयामीति।** अकिंवृत्ते उदाहरणम्। भवान् हरिं निन्देदिति यत् तत् न संभावयामि न मर्षये वेत्यन्वयः। किंवृत्ते उदाहरति **कः कतर इति। लृङ् प्राग्वदिति।** भविष्यति नित्यं लृङ् भूते वेत्युक्तमिहाप्यनुसंधेयमित्यर्थः। **किंकिल।** किंकिलेति समुदायस्य अस्त्यर्थानां च द्वन्द्वः। **यावदिति।** 'गर्हायां च' इत्यतः प्रागित्यर्थः। किंकिलेत्यस्मिन् अस्त्यर्थेषु च प्रयुज्यमानेषु अनवक्लृप्त्यमर्षयोर्लृट् स्यादित्यर्थः। पूर्वसूत्रेण लिङ्लृटोः प्राप्तौ लृडर्थमिदम्, तदाह **लिङोऽपवाद इति। न श्रद्धे**

भविष्यत्यनद्यतने लुट् त्यक्तासि। भविष्यत्सामान्ये लृट् कथं धर्मं त्यक्ष्यसीत्यादि। **अत्रेति।** क्रियातिपत्ताविति ज्ञेयम्। **किंवृत्त।** लिङ्लृटौ कालत्रये स्तः। **नानुवर्तत इति।** एवं चास्मिन्विषये निन्दति निन्दिष्यत्यनिन्ददिति कालत्रये लकाराः पक्षे न भवन्तीति भावः। **प्राग्वदिति।** क्रियातिपत्तौ भविष्यति नित्यं लृङ्। भूते वेत्यर्थः। **अनवक्लृप्त्यमर्षयोः।** लिङ्लृटावनुवर्तेते तौ च कालत्रये भवतस्तेन सर्वलकाराणामपवादौ। किंवृत्तस्यानधिकारादेवाविशेषादुभयोर्भविष्यतीत्यकिंवृत्तेऽपीति न कर्तव्यम्। पूर्वनिपातार्हस्याल्पाचः परनिपातो यथासंख्यनिवृत्त्यर्थः। **लृङ् प्राग्वदिति।** भूते वा भविष्यति नित्यमित्यर्थः। नाहं भावयामि चैत्रो हरिमनिन्दिष्यदित्याद्युदाहर्तव्यम्। **किंकिलास्त्यर्थेषु।** लिङ्लृटोः प्राप्तयोरिह लृड्ग्रहणा-

त्वं शूद्रान्नं भोक्ष्यसे । अस्ति भवति विद्यते वा शूद्रीं गमिष्यसि । अत्र लृङ् न । २८०४ जातुयदोर्लिङ् । (३-३-१४७) लृटोऽपवादः । 'यदायद्योरुपसंख्यानम्' (वा २२७९) । जातु यद्यदा यदि वा त्वादृशो हरिं निन्देन्नावकल्पयामि न मर्षयामि । लृङ् प्राग्वत् । २८०५ यच्चयत्रयोः । (३-३-१४८) यच्च यत्र वा त्वमेवं कुर्याः न श्रद्दधे न मर्षयामि । २८०६ गर्हायां च ।

इति । न संभावयामीत्यर्थः । त्वं शूद्रान्नं भोक्ष्यसे इति यत् तत् न श्रद्दधे न मर्षये वा किंकिलेत्यन्वयः । किंकिलेति क्रोधं द्योतयति । अस्तीति । शूद्रस्य स्त्री शूद्री । तां गमिष्यसीत्यस्ति भवति विद्यते वेत्यन्वयः । अत्र लृङ् नेति । भविष्यति नित्यं लृङ्, भूते वेत्युक्तमिह न संभवति, अत्र लिङो विषयभावेन लिङ्निमित्तविरहात् । जातुयदोर्लिङ् । जातु यद् अनयोः प्रयोगे अनवक्लृप्त्यमर्षयोर्लिङ् स्यादित्यर्थः । यदिति विभक्तिप्रतिरूपकमव्ययम् । अनवक्लृप्त्यमर्षयोरकिंवृत्तेऽपीति लिङ्लृटौ प्राप्तौ लिङेवेत्यर्थमिदम्, तदाह लृटोऽपवाद इति । यदायद्योरिति । यदायद्योः प्रयोगेऽपि उक्तविषये लिङ उपसंख्यानमित्यर्थः । जात्वादिशब्दा उदाहरणे अनवक्लृप्त्यमर्षद्योतकाः । त्वादृशो हरिं निन्देदित्येतद् नावकल्पयामि न मर्षयामि वेत्यन्वयः । नावकल्पयामीत्यस्य न संभावयामीत्यर्थः । लृङ् प्राग्वदिति । भविष्यति नित्यं लृङ् भूते वेत्युक्तमिहाप्यनुसंधेयमित्यर्थः, जात्वादियोगस्य अनवक्लृप्त्यमर्षयोश्च लिङ्निमित्तत्वादिति भावः । यच्चयत्रयोः । यच्चेति समुदाये यत्रशब्दे च प्रयुज्यमाने अनवक्लृप्त्यमर्षयोर्लिङ् स्यादित्यर्थः । लृटोऽपवादः । योगविभागस्तु उत्तरसूत्रे अनयोरेवानुवृत्त्यर्थः । उदाहरणे यच्चेति यत्रेति च अनवक्लृप्त्यमर्षद्योतकौ । त्वमेवं कुर्या इत्येतद् न श्रद्दधे न मर्षयामि

क्लिङ् निवर्तत इत्याशयेनाह लिङोऽपवाद इति । अस्ति भवतीति । त्वत्कर्तृकं शूद्रागमनमस्तीत्यादिरर्थः । लृङ् नेति । लिङो निवृत्तत्वेन तन्निमित्तत्वाभावात् । जातुयदोर्लिङ् । अनवक्लृप्त्यमर्षयोरिति वर्तते । तथा च 'अनवक्लृप्त्यमर्षयोः' इति लिङ्लृटोः प्राप्तयोर्वचनमिदं लृटो बाधनार्थम्, तदाह लृटोऽपवाद इति । अयं कालत्रये । लृङ् प्राग्वदिति । क्रियातिपत्तौ भूते वा भविष्यति नित्यमित्यर्थः । जातु भवान् हरिमनिन्दिष्यदित्याद्युदाहर्तव्यम् । अगर्हार्थमिदम् । गर्हायां तु जातुयोगे लडुक्तः । यच्चयत्रयोः । 'अनवक्लृप्त्यमर्षयोः' इति वर्तते । यथासंख्यमिह नेष्यते । अयमपि लिङ्लृटोरपवादः । योगविभागस्तु उत्तरसूत्रद्वये यच्चयत्रयोरेवानुवृत्तिर्यथा स्यादित्येतदर्थः । क्रियातिपत्तौ लृङ् प्राग्वत् । यच्च यत्र वा त्वमेवमकरिष्यो न श्रद्दधे न मर्षयामीत्यादि । गर्हायां च । कालत्रयेऽयं भवतीति सर्वलकारापवादः ।

(३-३-१४९) अनवक्लृप्त्यमर्षयोरिति निवृत्तम् । यच्चयत्रयोर्योगे गर्हायां लिङेव स्यात् । यच्च यत्र वा त्वं शूद्रं याजयेः अन्याय्यं तत् । २८०७ चित्रीकरणे च । (३-३-१५०) यच्च यत्र वा त्वं शूद्रं याजयेः आश्चर्यमेतत् । २८०८ शेषे लृडयदौ । (३-३-१५१) यच्चयत्राभ्यामन्यस्मिन्नुपपदे चित्रीकरणे गम्ये धातोर्लृट् स्यात् । आश्चर्यमन्धो नाम कृष्णं द्रक्ष्यति । अयदौ किम्–आश्चर्यं यदि मूकोऽधीयीत । २८०९ उताप्योः समर्थयोर्लिङ् । (३-३-१५२) बाढमित्यर्थेऽनयोस्तुल्यार्थता । उत अपि वा हन्यादयं हरिः । समर्थयोः किम्–उत दण्डः पतिष्यति । अपिधास्यति द्वारम् । प्रश्नः प्रच्छादनं च गम्यते । इतः प्रभृति लिङ्निमित्ते क्रियातिपत्तौ भूतेऽपि नित्यो

वेत्यन्वयः । अत्रापि भविष्यति नित्यं लृङ्, भूते वेत्युक्तमनुसंधेयम्, लिङ्निमित्तस्य सत्त्वात् । **गर्हायां च । निवृत्तमिति** । व्याख्यानादिति भावः । 'यच्चयत्रयोः' इति लिङिति चानुवर्तते, तदाह **यच्चयत्रयोर्योगे इति । लिङेवेति** । न तु लकारान्तरमित्यर्थः । उदाहरणे यच्चेति यत्रेति च गर्हाद्योतकम् । त्वं शूद्रं याजयेरिति यत् तदन्याय्यमित्यन्वयः । लृङ् प्राग्वत् । **चित्रीकरणे च ।** यच्चयत्रयोः प्रयोगे आश्चर्ये गम्ये लिङेव स्यात्, न तु लकारान्तरमित्यर्थः । उदाहरणे यच्चेति यत्रेति चाश्चर्यद्योतकम् । त्वं शूद्रं याजयेरिति यत् तदाश्चर्यमित्यन्वयः । **शेषे लृडयदौ** । यच्चयत्राभ्यामन्यः शेषः, तदाह **यच्चयत्राभ्यामन्यस्मिन्निति** । यदिभिन्ने इति शेषः । **लृट् स्यादिति** । न तु लकारान्तरमित्यर्थः । **आश्चर्यमिति** । अन्धः कृष्णं द्रक्ष्यतीत्याश्चर्यमित्यन्वयः । नामेत्यव्ययमाश्चर्यद्योतकम् । **मूक इति** । मूकोऽधीयीत इत्याश्चर्यमित्यन्वयः । यदीत्याश्चर्यद्योतकम् । **उताप्योः** । समौ अर्थौ ययोरिति विग्रहः । शकन्ध्वादित्वात्पररूपम् । एकार्थकयोरित्यर्थः । कमर्थमादायानयोरेकार्थकत्वमित्यत आह **बाढमिति । तथा च** बाढार्थकयोः उत अपि इत्यनयोः प्रयोगे लिङ् स्यान्न तु लकारान्तरमित्यर्थः ।

लिङेव स्यादिति । गर्हायां 'विभाषा कथमि–' इति लट् प्राप्तस्तत्रैव **'किंवृत्ते–'** इति लट् प्राप्तस्तयोरपवादो यच्चयत्रयोर्योगे विहितोऽयं लिङिति भावः । लृङ् प्राग्वत् । यच्च यत्र वा त्वं शूद्रमयाजयिष्यस्तदन्याय्यमित्यादि । **चित्रीकरणे च** । अयमपि कालत्रये लृङ् प्राग्वत् । यच्च यत्र वा त्वं शूद्रमयाजयिष्य आश्चर्यमेतत् । **शेषे** । सर्वलकारापवादः । **स्रोऽधीयीतेति** । यदायद्योरुपसंख्यानाद् 'जातुयदोः–' इति लिङ् । लिङ्निमित्ताभावादिह लृङ् न । **उताप्योः** । धातोर्लिङ् स्यात्कालत्रये । **भूतेऽपि नित्य इति** । वाग्रहणस्य निवृत्तत्वाद् भविष्यतीव भूतेऽपि नित्यं लृङ् ।

वह । २८१० कामप्रवेदनेऽकच्चिति । (३-३-१५३) स्वाभिप्रायाविष्करणे गम्यमाने लिङ् स्यान्न तु कच्चिति । कामो मे भुञ्जीत भवान् । अकच्चितीति किम्-कच्चिज्जीवति । २८११ सम्भावनेऽलमिति चेत्सिद्धाप्रयोगे । (३-३-१५४) अलमर्थोऽत्र प्रौढिः । सम्भावनमित्यलमिति च प्रथमया सप्तम्या च विपरिणम्यते । सम्भावनेऽर्थे लिङ् स्यात्, तच्चेत्सम्भावनमलमिति

उत अपि वेति । उत हन्यादयं हरिः, अपि हन्यादयं हरिरित्यन्वयः । उतापी वाढमित्यर्थकौ । गम्यते इति । उत दण्डः पतिष्यतीत्यत्र उतशब्देन प्रश्नो गम्यते । अपिधास्यति द्वारमित्यत्र अपिना धाधातोः प्रच्छादनार्थकत्वं गम्यत इत्यर्थः । इतः प्रभृतीति । 'वोताप्योः' इति मर्यादायामाङ् । 'उताप्योः' इत्यतः प्राग् भूते लिङ्निमित्ते लृङ् वेत्यधिक्रियते । 'उताप्योः–' इत्यादिसूत्रेषु भूते 'लिङ्निमित्ते लृङ् क्रियातिपत्तौ' इत्येवाधिक्रियते इत्युक्तम् । एवं च 'उताप्योः–' इति सूत्रप्रभृति लिङ्निमित्ते क्रियातिपत्तौ भूते लृङित्येवाधिक्रियते, न तु वाग्रहणम् । अतो नित्यमेवात्र विषये क्रियातिपत्तौ भूते भविष्यति च लृङित्यर्थः । कामप्रवेदनेऽकच्चितीति । अकच्चितीति च्छेदः, तदाह न तु कच्चितीति । सर्वलकारापवादः । अभिप्राय इच्छा । काम इति । भवान् भुञ्जीतेति मे कामः, इच्छेत्यर्थः । अत्र लिङ्निमित्तस्य सत्त्वात् क्रियातिपत्तौ भूतेऽपि नित्यं लिङ् । प्रश्न एवायं कामप्रवेदनद्योतक इति प्रासिः । अत्र कच्चिच्छब्दस्य इच्छार्थकत्वाभावादिच्छार्थेष्विति वक्ष्यमाणं नात्र प्रवर्तते । संभावने । अलमर्थोऽत्र प्रौढिरिति । पर्याप्तिरित्यर्थः । विपरिणम्यते इति । संभावने इति यत् सप्तम्यन्तं तद् आवर्त्य प्रथमया संभावनमिति च विपरिणम्यते । यत्तु अलम् इति प्रथमान्तं तद् आवर्त्य सप्तम्या अलमि इति च विपरिणम्यत इत्यर्थः । छान्दसं विभक्तिव्यत्ययमाश्रित्येति शेषः । तथा च संभावने इति सप्तम्यन्तं संभावनमिति प्रथमान्तं च लभ्यते । तथा अलम् इति प्रथमान्तम् अलमि इति सप्तम्यन्तं च लभ्यते । तत्र संभावने इति सप्तम्यन्तमर्थनिर्देशपरम्, तदाह संभावनेऽर्थे लिङ् स्यादिति । उत्कटान्यतरकोटिकं

कदाहनिष्यदस्युं राजा । नाहन् न हनिष्यतीति गम्यते । कामप्रवेदने । लिङ् स्यादिति । कालत्रये सर्वलकारापवादः । कच्चिज्जीवतीति । कामो मे इत्यनुषञ्जनीयम् । 'वर्तमानसामीप्ये–' इति लट् । संभावनेऽल । प्रौढिरिति । पर्याप्तिरित्यर्थः । प्रथमया सप्तम्या चेति । संभावने इति सप्तम्यन्तं प्रथमया विपरिणम्यते । अलमिति प्रथमान्तं सप्तम्येति संबन्धः । संभावनेऽर्थे इति । ननु प्रथमया विपरिणमितत्वात्कथमत्र सप्तम्यर्थलाभ इति चेत् । अत्राहुः—संभावनेऽलमि-

सिद्धाप्रयोगे सति । अपि गिरिं शिरसा भिन्द्यात् । सिद्धाप्रयोगे किम्-अलं कृष्णो हस्तिनं हनिष्यति । २८१२ विभाषा धातौ सम्भावनवचनेऽयदि । (३-३-१५५) पूर्वसूत्रमनुवर्तते । संभावनेऽर्थे धातावुपपदे उक्तेऽर्थे लिङ् वा स्यात् , न तु यच्छब्दे । पूर्वेण नित्यं प्राप्ते वचनम् । सम्भावयामि भुञ्जीत भोक्ष्यते वा भवान् । अयदि किम्-सम्भावयामि यद् भुञ्जीथास्त्वम् । २८१३ हेतुहेतुमतोर्लिङ् । (३-३-१५६) वा स्यात् । कृष्णं नमेच्चेत्सुखं

ज्ञानं संभावनमित्युच्यते । संभावनमिति प्रथमान्तं तु अलमिति प्रथमान्तेन विशेष्यते । इतिर्हेतौ, तदाह तच्चेदिति । तत्संभावनम् अलं पर्याप्तिहेतुकं चेदित्यन्वयः । सिध्यतेर्गत्यर्थकाद् 'मतिबुद्धि-' इति वर्तमाने कर्मणि क्तः सिद्धशब्दः । सिद्धे गम्यमानेऽप्यलमर्थे अप्रयोगो यस्य स सिद्धाप्रयोगः, तस्मिन्निति विग्रहः । अलमि इति सप्तम्यन्तमत्र विशेष्यसमर्पकं संबध्यते । अलंशब्दप्रयोगं विनापि तदर्थे गम्यमाने इति यावत्, तदाह सिद्धाप्रयोगे सतीति । अलमिति शेषः । अपि गिरिमिति । बलवन्तं पुरुषमधिकृत्य अत्युक्तिरियम् । प्रायेण शिरसा गिरिं भेत्तुमयं समर्थ इत्यर्थः । गिरिभेदसंभावनस्य सामर्थ्यहेतुकत्वद्योतकः अपिशब्दः । अत्र लिङ्निमित्तसत्त्वान्न क्रियातिपत्तौ भूते लृङ् । 'अलमिति संभावने सिद्धाप्रयोगश्चेत्' इति सुवचम् । विभाषा धातौ । अयदीति छेदः, तदाह न तु यदिति । लिङभावे लृट्, 'शेषे लृडयदौ' इत्यतस्तदनुवृत्तेः । संभावयामीति । प्रायेण भोक्तुं समर्थ इत्यर्थः । हेतुहेतुमतोर्लिङ् । पूर्वसूत्राद्विभाषानुवृत्तिं मत्वाह वा स्यादिति ।

त्यावर्त्य द्वितीयस्यैव विपरिणामात्सर्वेष्टसिद्धिरिति । संभावनं क्रियासु योग्यताध्यवसायः । अलमितीति । तच्च संभावनं समर्थ इति चेद् भवति तदा लिङ् स्यादित्यर्थः । सिद्धेति । सिद्धः अप्रयोगो यस्य तस्मिन्नलमि सति । यत्रालंशब्दो न प्रयुज्यते तदर्थस्तु गम्यते तत्रेति फलितोऽर्थः । मनोरमायां तु 'अलमिति संभावने सिद्धाप्रयोगश्चेत्' इति सूत्रयितुमुचितमित्युक्तम् । तत्र सिद्धस्याप्रयोग इति विग्रहः । कस्याप्रयोग इत्याकाङ्क्षायामर्थादलंशब्दस्येति बोध्यम् । अपि गिरिमिति । संभावनाद्योतकोऽपिशब्दो गिरिविदारणे पर्याप्त इति संभवनात्र गम्यते । कालसामान्येऽयं लिङ् । लृङ् प्राग्वत् । अपि गिरिं शिरसाऽभेत्स्यत् । अलमिति चेत् किम्, प्रायेण गमिष्यति । विभाषा धातौ । संभावनमुच्यते येन तत्संभावनवचनं तस्मिन्धातौ । संभावनार्थकधातावित्यर्थः । भुञ्जीथास्त्वामिति । अत्र पूर्वेण नित्यो लिङ् । धातौ किम्, संभावनवचने स्वरूपग्रहणं माभूत् । कृते तु संभावनवचने तद्वाचकधातोरप्रयोगादिह विभाषा न भवति । भुञ्जीत भवान् । पूर्वेणात्र नित्यो लिङ् । हेतुहेतु ।

यायात्। कृष्णं नंस्यति चेत् सुखं यास्यति। 'भविष्यत्येवेष्यते' (वा २२७५) नेह-हन्तीति पलायते। २८१४ इच्छार्थेषु लिङ्लोटौ। (३-३-१५७) इच्छामि भुञ्जीत भुङ्क्तां वा भवान्। एवं कामये प्रार्थये इत्यादियोगे बोध्यम्। 'कामप्रवेदने इति वक्तव्यम्' (वा २२७६) नेह-इच्छन्करोति।

पक्षे लृट्। हेतुभूते फलभूते वाऽर्थे वर्तमानद्धातोर्लिङ् वा स्यादिति यावत्। **भविष्यत्येवेति**। लिङ्क्त्यनुवर्तमाने पुनर्लिङ्ग्रहणादिति भावः। **हन्तीतीति**। इतिर्हेतौ वर्तमानकालिकहननाद्धेतोरित्यर्थः। अत्र लिङ्निमित्तसत्त्वाद् भविष्यति तु क्रियातिपत्तौ भूते च लृङ्। **इच्छार्थेषु लिङ्लोटौ**। इच्छार्थकधातुषु प्रयुज्यमानेषु लिङ्लोटौ स्तः। सर्वलकारापवादः। असमानकर्तृकविषयमिदम्। समानकर्तृकेषु तु 'लिङ् च' इति वक्ष्यते। **इच्छामीति**। भुञ्जीत भवानिति इच्छामीत्यन्वयः। **कामप्रवेदने इति**। परं प्रति स्वाभिप्रायाविष्करणे 'इच्छार्थेषु लिङ्लिटौ' इति विधिरित्यर्थः। **इच्छन् करोतीति**। परं प्रति स्वाभिप्रायाविष्करणाभावान्न लिङ्लोटाविति भावः।

विभाषेत्यस्यानुवर्तनादाह **वा स्यादिति। नमेच्चेदिति**। कृष्णनतिः सुखप्राप्तौ हेतुः। **भविष्यत्येवेति**। लिङित्यनुवर्तमाने पुनर्लिङ्ग्रहणं कालविशेषप्रतिपत्त्यर्थमिति भावः। **हन्तीत्यादि**। ननु 'लक्षणहेत्वोः क्रियायाः' इति हन्तेः शतृप्रत्ययः स्याद् हननस्य पलायने हेतुत्वात्। मैवम्। 'देवत्रातो गलो ग्राह इति योगे च सद्विधिः। मिथस्ते न विभाष्यन्ते गवाक्षः संशितव्रतः' इति 'शाच्छोरन्यतरस्याम्' इति सूत्रे भाष्ये व्यवस्थापितत्वात्। व्याख्यातं च कैयटेन तत्रैव सूत्रे देवत्रात इति संज्ञा। तत्र 'नुदविदोन्दत्राघ्राह्रीभ्योऽन्यतरस्याम्' इति न णत्वं भवति देवत्राण इति। किं तु देवत्रात इत्येव। 'ग्रो यङि' 'अचि विभाषा' इति प्राण्यङ्गे नित्यं लत्वम्। गलः। विषवाचके गर इत्यत्र न भवति। 'विभाषा ग्रहः' इति णप्रत्ययो जलचरे भवति, ग्राहः ज्योतिषि न, ग्रहः। 'लक्षणहेत्वोः–' इति सूत्रे 'नन्वोर्विभाषा' इत्यतो विभाषेत्यनुवर्त्य व्यवस्थितविभाषाश्रयणादितिशब्दयोगे सद्विधिः शतृशानचौ न भवतः। हन्तीति पलायते। वातायने गवाक्षः। अन्यत्र त्वच् न भवति, गोक्षः। संशितव्रत इति बहुव्रीहिः। अत्र 'शाच्छोरन्यतरस्याम्' इति संशात इतीत्वविकल्पो न भवति। अन्यत्र तु शातः, शितः। ते पूर्वोक्तत्वादिविधयो मिथः परस्परम् एकविषये न विकल्प्यन्ते, तत्तद्विधायकसूत्रे व्यवस्थितविभाषाश्रयणादिति भावः। क्रियातिपत्तौ तु भूते भविष्यति च नित्यं लृङ्। यद्यवर्षिष्यत् सस्यमुदपत्स्यत। **इच्छार्थेषु लिङ्लोटौ**। एषूपपदेषु धातोरेतौ स्तः। सर्वलकाराणामपवादः। 'लिङ् च' इत्यनेन समानकर्तृकेषु लिङो विधानादिह लिङ्लोटावसमानकर्तृकेषु भवत इति बोध्यम्। **इच्छन् करोतीति**। अत्रानभिधानात् 'समानकर्तृकेषु–' इति तुमुन

२८१५ लिङ् च । (३-३-१५९) समानकर्तृकेषु इच्छार्थेषु लिङ् । भुञ्जीयेतीच्छति । २८१६ इच्छार्थेभ्यो विभाषा वर्तमाने । (३-३-१६०) लिङ् स्यात्पक्षे लट् । इच्छेत् । इच्छति । कामयेत । कामयते । 'विधिनिमन्त्रण-' (सू २२०८) इति लिङ् । विधौ यजेत । निमन्त्रणे इह भुञ्जीत भवान् । आमन्त्रणे इहासीत । अधीष्टे पुत्रमध्यापयेद्भवान् । संप्रश्ने किं भो वेदमधीयीय उत तर्कम् । प्रार्थने भो भोजनं लभेय । एवं लोट् । २८१७ प्रैषातिसर्गप्राप्तकालेषु कृत्याश्च । (३-३-१६३) लोट् च । प्रैषो विधिः ।

'कामप्रवेदनेऽकच्चिति' इति सूत्रं तु प्रकरणादिना यत्र कामप्रवेदनम्, नत्विच्छार्थकमुपपदमस्ति तद्विषयमिति बोध्यम् । इत उत्तरसूत्रं 'समानकर्तृकेषु तुमुन्' इति तु कृदधिकारे व्याख्यास्यते । लिङ् च । समानकर्तृकेष्विति इच्छार्थेष्विति चानुवर्तते, तदाह समानेत्यादि । भुञ्जीयेतीच्छतीति । अत्र भोक्तुरेव इषिकर्तृत्वात्समानकर्तृकत्वम् । समानकर्तृकेषु इच्छार्थेष्विति लोटो निवृत्त्यर्थमिदं सूत्रम् । क्रियातिपत्तौ तु भविष्यति नित्य लृङ्, भूते चेत्यधिकारः संपूर्णः । इच्छार्थेभ्यो । लिङित्येवानुवर्तते । समानकर्तृकेष्विति तु निवृत्तम् । तत् सूचयन्नुदाहरति इच्छेत्, इच्छतीति । 'विधिनिमन्त्रण-' इति भूधातौ व्याख्यातमपि सूत्रकमप्राप्तत्वात् स्मारितम् । एवं लोडिति । लोट् चेति विध्यादिषु विहितो लोडप्येवमुदाहर्तव्य इत्यर्थः । प्रैषातिसर्ग । लोट् चेति । पूर्वसूत्रोपात्तो लोट् चकारात्समुच्चीयते । कृत्यसंज्ञकाः प्रत्ययाः वक्ष्यमाणा लोट् च प्रैषादिषु भवन्तीत्यर्थः । प्रैषे अतिसर्गे च कृत्यप्रत्ययमु-

---

न । ननु 'कामप्रवेदनेऽकच्चिति' इत्यनेनैव लिङः सिद्धत्वादिह लिङ्ग्रहणं मास्तु लोडेव विधीयतामिति चेन्न । लोटा लिङो बाधा माभूदिति लिङ्ग्रहणस्यात्रावश्यकत्वात् । न चैवम् 'इच्छार्थेषु लोट् च' इत्येव सूत्र्यतामिति वाच्यम्, चकारेण लिङोऽनुकर्षे तत्संबद्धस्य विभाषाग्रहणस्यानुकर्षणप्रसक्त्या लकारान्तरमपि स्यादिति । न चैवमपि कामप्रवेदन इत्युपसंख्यानादनेनैव सिद्धे 'कामप्रवेदनेऽकच्चिति' इति सूत्रं मास्त्विति वाच्यम्, यत्रार्थप्रकरणादिना कामप्रवेदनं गम्यते इच्छार्थकमुपपदं नास्ति तदर्थं तदारम्भात् । लिङ् च । 'समानकर्तृकेषु तुमुन्' इत्यनेन 'इच्छार्थेषु लिङ्लोटौ' इति विहितयोर्लिङ्लोटोर्बाधे प्राप्ते लिङः प्रतिप्रसवार्थं सूत्रम् । न चात्र वासरूपविधिना लिङ्लोटोर्नित्यं बाधा नेति शङ्क्यम्, क्ल्युट्तुमुन्खलर्थेषु तदभावात् । अथापि वासरूपविधिः स्यात् । एवमपि लिङेव यथा स्याल्लोड् माभूदित्येवमर्थं तदारब्धव्यमेव । क्रियातिपत्तौ लृङ् प्राग्वत् । इच्छार्थेभ्यः । इच्छार्थेभ्यः किम्, पचति गच्छति । प्रैषातिसर्ग । प्रैषो विधिरिति । विधिग्रहणे कर्तव्ये प्रैषग्रहणं शिष्यबुद्धिवैश-

अतिसर्गः कामचारानुज्ञा । भवता यष्टव्यम् । भवान्यजताम् । चकारेण लोटोऽनुकर्षणं प्राप्तकालार्थम् । २८१८ लिङ् चोर्ध्वमौहूर्तिके । (३-३-१६४) प्रैषादयोऽनुवर्तन्ते । मुहूर्तादूर्ध्वं यजेत यजताम् यष्टव्यम् । २८१९ स्मे लोट् । (३-३-१६५) पूर्वसूत्रस्य विषये । लिङः कृत्यानां चापवादः । ऊर्ध्वं मुहूर्ताद्यजतां स्म । २८२० अधीष्टे च । (३-३-१६६) स्मे उपपदेऽधीष्टे लोट् स्यात् । त्वं स्माध्यापय । २८२१ लिङ् यदि । (३-३-१६८) यच्छब्दे

दाहरति **भवता यष्टव्यमिति** । भावे तव्यप्रत्ययः । लोटमुदाहरति **भवान् यजतामिति** । ननु चकारेण लोटोऽनुकर्षणं व्यर्थम्, प्रैषस्य विधिरूपतया अतिसर्गस्य आमन्त्रणरूपतया च 'लोट् च' इत्यनेनैव सिद्धेरित्यत आह **चकारेणेति** । प्राप्तकाले यथा, गुरुणा भोक्तव्यम् । गुरुर्भुञ्जीत । भोजनं प्राप्तावसरमित्यर्थः । प्राप्तकाले च कृत्याश्च, इत्युक्तौ तु निमन्त्रणादिष्वपि कृत्याः स्युः । अतः प्रैषादिग्रहणम् । **लिङ् चोर्ध्वमौहूर्तिके** । 'लोडर्थलक्षणे च' इत्युत्तरमेतज्जातीयकमेव सूत्रं लिङ्लङ्लुङ्लृङ्विधायकं प्राक् पठितम् । तत्र ऊर्ध्वमौहूर्तिकशब्दो व्याख्यातः । **प्रैषादय इति** । तथा च मुहूर्तादुपरितनकालके धात्वर्थे विधीयमानाद्धातोः प्रैषातिसर्गप्राप्तकालेषु लिङ् च स्याद् लोट् कृत्याश्चेत्यर्थः । क्रमेण लिङादीनुदाहरति **मुहूर्तादूर्ध्वं यजेत यजतां यष्टव्यमिति** । अत्र प्राप्तकाले अप्राप्तस्य लिङो विधिः, विध्यादिसूत्रे लिङ्विधौ प्राप्तकालस्य ग्रहणाभावात् । प्रैषातिसर्गयोस्तु विध्यादिसूत्रेणैव लिङ् सिध्यति । लिङ एवात्र विधौ तु, तेन लोटः कृत्यानां च बाधः स्यात् । अतश्चकारेण तेषामपि विधिरिति ज्ञेयम् । **स्मे लोट्** । **पूर्वसूत्रेति** । तथा च मुहूर्तादुपरितनकाले प्रैषातिसर्गप्राप्तकालेषु लोडेव स्यात्, न तु लिङ् कृत्याश्चेत्यर्थः, तदाह **लिङः कृत्यानां चापवाद इति** । **अधीष्टे च** । **लोट् स्यादिति** । अधीष्टे विहितस्य लिङोऽपवादः । अधीष्टं सत्कारपूर्वको व्यापार इत्युक्तम् । त्वं स्माध्यापयेति गुरुं प्रत्युक्तिः । 'स्मे लोडधीष्टे च' इत्येकसूत्रत्वेन सिद्धे

चार्थमित्याहुः । **लोटोऽनुकर्षणमिति** । 'लोट् च' इति योगस्येदमेव प्रयोजनम्, एकयोगत्वे तु लिङोऽप्यनुकर्षणं स्यात् । **प्राप्तकालार्थमिति** । प्रैषातिसर्गयोः पूर्वेणैव सिद्धत्वादिति भावः । **लिङ् चोर्ध्वं** । प्राप्तकालविशेषेऽप्राप्तस्य लिङो विधानार्थमिदं सूत्रम् । प्रैषातिसर्गयोस्तु पूर्वेण प्राप्त एव लिङ् । लोट् कृत्यानां कालविशेषेऽस्मिन् लिङा बाधा माभूदिति चकारः । **पूर्वसूत्रस्य विषय इति** । प्रैषादय ऊर्ध्वमौहूर्तिके इति चानुवर्तत इति भावः । **अधीष्टे च** । लिङोऽपवादः । योगविभागस्तु ऊर्ध्वमौहूर्तिकाननुवृत्त्यर्थः । **लिङ् यदि** । **कालसमयवेलासु चेति**

उपपदे कालसमयवेलासु च लिङ् स्यात्। कालः समयो वेला वा यद् भुञ्जीत भवान्। २८२२ **अर्हे कृत्यतृचश्च**। (३-३-१६९) चाल्लिङ्। त्वं कन्यां वहेः। २८२३ **शकि लिङ् च**। (३-३-१७२) शक्तौ लिङ् स्यात्। चात्कृत्याः। भारं त्वं वहेः। 'माङि लुङ्' (सू २२१९)। मा कार्षीः। कथं मा भवतु, मा भविष्यतीति? नायं माङ् किं तु माशब्दः। २८२४ **धातुसंबन्धे प्रत्ययाः**। (३-४-१) धात्वर्थानां संबन्धे यत्र काले प्रत्यया उक्तास्ततोऽन्यत्रापि

योगविभागस्तु ऊर्ध्वमौहूर्तिक इत्यनुवृत्तिनिवृत्त्यर्थः। 'कालसमयवेलासु तुमुन्' इत्युत्तरसूत्रं तु कृदधिकारे व्याख्यास्यते। **लिङ् यदि**। कालसमयवेलास्वित्यनुवर्तते। सर्वलकारापवादः। तुमुनपवादश्च। भुञ्जीत भवानिति यत् तस्य कालः **समयो वेला** वेत्यन्वयः। **अर्हे कृत्यतृचश्च**। **चाल्लिङिति**। योग्ये कर्तरि गम्ये कृत्याः तृच् लिङ् चेत्यर्थः। **त्वं कन्यां वहेरिति**। कन्याविवाहस्य योग्य इत्यर्थः। **शकि लिङ् च**। शक् इति भावे क्विबन्तम्। शक्तौ गम्यमानायामित्यर्थः। **भारं त्वं वहेरिति**। वोढुं शक्त इत्यर्थः। माङि लुङिति व्याख्यातमपि क्रमप्राप्तं विशेषविवक्षया पुनः स्मार्यते। ननु सर्वलकारापवादोऽयमित्युक्तम्। एवं सति मा भवतु मा भविष्यतीति कथमिति शङ्कते **कथमिति**। परिहरति **नायं माङिति**। **किं त्विति**। ङकारानुबन्धविनिर्मुक्तस्यापि अव्ययेषु पाठादिति भावः। न च माशब्दमादाय मा भवानित्यादिप्रयोगसत्त्वे 'माङि लुङ्' इति व्यर्थमिति वाच्यम्, सर्वलकारविषये 'न माङ्योगे' इत्यडाड्रहितलुङन्तप्रयोगार्थं तदावश्यकत्वात्। **धातुसंबन्धे**। धातुशब्देन धात्वर्थो लक्ष्यते। धात्वोः संबन्ध इति विग्रहः,

---

उपपदेष्विति वचनविपरिणामेन संबध्यते। **तुमुनोऽपवादः**। **यद्भुञ्जीतेति**। यत्कालः पचतीत्यत्र तु न, प्रैषादीनामनुवृत्तेः। **अर्हे**। योग्ये कर्तरि गम्यमाने कृत्यतृचो भवन्ति। त्वया कन्या वोढव्या। वहनीया। त्वं कन्यां वोढा। **कन्यां वहेरिति**। कन्योद्वहने योग्यस्त्वमित्यर्थः। नन्वर्हे किमर्थं कृत्यतृचो विधीयन्ते। यावता सामान्येन विहितत्वादनर्हेऽपि भविष्यन्तीति चेत्। अत्राहुः—अर्हतायां योत्सायमप्राप्तो लिङ् विधीयते, तेन तु लिङा बाधा माभूदिति कृत्यतृचोर्विधानम्। न च वासरूपविधिना समीहितसिद्धिः। स्त्र्यधिकारादूर्ध्वं तदप्रवृत्तेरिति। **धातुसंबन्धे**। इह धात्वोर्विशेषणविशेष्यभावादिसंबन्धोऽनुपपन्नः, स्वार्थस्मारणेनोपक्षीणत्वात्। पदार्थसंसर्गो वाक्यार्थः, कारकविशिष्टा क्रिया चेति स्वीकारात् शब्दानुगमादृते न शाब्दोऽस्ति प्रत्यय इत्यवष्टभ्य शाब्दबोधे शब्दोऽपि भासते इत्यभ्युपगमेऽपि शब्दस्य स्वार्थं प्रत्येव प्रकारत्वं न तु शब्दान्तरं प्रति। तथा च धातुसंबन्धो वाक्येन न बुध्यते

स्युः । तिङन्तवाच्यक्रियायाः प्राधान्यात्तदनुरोधेन गुणभूतक्रियावाचिभ्यः

संबन्धस्य द्विनिष्ठत्वात् । तथा च धात्वर्थयोः संबन्धे सति प्रत्ययाः स्युरिति लब्धम् । कस्मिन्नर्थे इत्याकाङ्क्षायां काले इति गम्यते, 'वर्तमाने लट्' इत्यारभ्य तत्तत्कालविशेषेष्वेव प्रत्ययविधिदर्शनात् । तत्र तत्तद्विधिभिरेव तत्तत्कालविशेषे प्रत्ययसिद्धेस्ततोऽन्यस्मिन्काले इति गम्यते, तदाह **धात्वर्थानामित्यादिना** । धात्वर्थयोरित्यर्थः । उदाहरणबहुत्वाभिप्रायं बहुवचनम् । 'वर्तमानसामीप्ये वर्तमानवद्वा' इत्यादिसूत्रे यत्र काले ये प्रत्यया उक्ताः ते धात्वर्थयोः सम्बन्धे गम्ये ततोऽन्यस्मिन्नपि काले स्युरिति यावत् । तथा च वसन् ददर्शेत्यत्र लडादेशः शतृप्रत्ययो भूतकाले इति सिद्धं भवति । ननु 'वसन् ददर्श' इत्यत्र भूते लडिव वर्तमाने लिडित्यपि स्यादित्यत आह **तिङन्तेति** । वसन् ददर्शेत्यादौ तिङन्तवाच्या दर्शनादिक्रिया प्रधानम् । वासादिक्रिया तु दर्शनादिक्रियार्थत्वाद् गुणभूता । अतः प्रधानभूतदर्शनादिक्रियानुसारेण गुणभूतवासादिक्रियावाचिभ्य एव इह प्रत्ययाः काला-

---

इति तस्य वाक्यार्थत्वासंभवाद्धातुशब्देन धात्वर्थो लक्ष्यते । ननु 'धातोः कर्मणः समानकर्तृकात्–' इति सन्विधौ कर्मत्वं समानकर्तृकत्वं च धातोरर्थद्वारकं विशेषणमाश्रितं तथेहापि धात्वोरर्थद्वारकः संबन्धोऽस्त्विति चेत् । मैवम् । तथा हि सति परस्परसंबन्धार्थबोधकानेकधातुप्रयोग एव प्रत्ययाः स्युस्ततश्च गोमानासीत् गोमान् भवितेत्यादि न सिध्येत् । न ह्यत्र 'वसन् ददर्श' इत्यत्र वर्तमानकालो वसिरिव वर्तमानकालोऽस्तिः प्रयुज्यते । न चाप्रयुज्यमानस्य धात्वन्तरेण संबन्धोऽस्ति । अर्थयोः संबन्धाभ्युपगमे धातुद्वयाभावेऽपि धात्वर्थद्वयस्य सत्त्वाद् गोमानासीदित्यादौ नानुपपत्तिः । तदेतदभिप्रेत्याह **धात्वर्थानामिति** । विषयबहुत्वापेक्षं बहुवचनम् । एकैकविषयापेक्षायां तु धात्वर्थयोरिति बोध्यम् । एतच्च मनोरमानुसारेण व्याख्यातम् । केचित्तु धात्वोरर्थद्वारकसंबन्धेऽभ्युपगते गोमानासीद्भवितेत्यादि न सिध्येदिति मनोरमोक्तं चिन्त्यमेव । 'तत्करोति तदाचष्टे' इत्यत्रेव 'तदस्यास्त्यस्मिन्–' इत्यत्राप्येकत्ववर्तमानत्वयोरविवक्षितत्वात् प्रकृतसूत्रानपेक्षयैव तत्सिद्धेः । न ह्यत्र मतुब्विधौ वर्तमाने लडित्यादाविव कालविशेषपरिग्रहोऽस्तीत्याहुः । तद्भाष्यकैयटाद्यननुगुणम् । तथा हि भाष्ये प्रत्यय इत्यनुवर्तमाने पुनरत्र प्रत्ययग्रहणं किमर्थमित्याक्षिप्य अधातुप्रत्ययानामपि संबन्धे साधुत्वं यथा स्याद् गोमानासीद् भविता वेति समाहितम् । कैयटेन तु 'तदस्यास्त्यस्मिन्निति–' मतुप् प्रत्ययो वर्तमानसत्ताविशिष्टप्रकृत्यर्थयुक्तो विहित इत्युक्तम् । तथा च मतुब्विधावस्तीत्यत्र एकत्वस्याविवक्षितत्वेऽपि वर्तमानत्वं विवक्षितमिति तद्ग्रन्थबलादवगम्यते । किं च दण्डिनमानयेत्युक्ते वर्तमानसत्ताविशिष्टदण्डयुक्त एवानीयते नान्यः ।

प्रत्ययाः । वसन्ददर्श । भूते लट् । अतीतवासकर्तृकर्तृकं दर्शनमर्थः । सोमयाज्यस्य पुत्रो भविता । सोमेन यक्ष्यमाणो यः पुत्रस्तत्कर्तृकं भवनम् । २८२५

न्तरेषु विधीयन्त इत्यर्थः। **भूते लडिति** । एवं च उषित्वा ददर्शेत्यर्थः, तदाह **अतीतेति** । अतीतवासे कर्ता कर्ता यस्येति विग्रहः । 'सप्तमीविशेषणे बहुव्रीहौ' इति ज्ञापकाद्व्यधिकरणपदो बहुव्रीहिः । उदाहरणान्तरमाह **सोमयाजीति** । सोमेन इष्टवान्यः स सोमयाजी । 'करणे यजः' इति भूते विहितो णिनिरिह भवितेत्यनद्यतनभविष्यल्लुडन्तप्रधानक्रियानुसारेण अनद्यतनभविष्यति बोध्यः, तदाह **सोमेन यक्ष्यमाण इति । भवनमिति** । उत्पत्तिरित्यर्थः । गोमानासीदित्यप्युदाहार्यम् । अत्र गौरस्यास्तीति अस्तिक्रियायां वर्तमानायां तदस्यास्तीति विहितो मतुब् गौरस्यासीदिति भूतायामस्तिक्रियायां भवति, धात्वर्थद्वयसंबन्धस्य सत्त्वात् । एतेन अर्थद्वारके धात्वोः संबन्धे इत्यपि व्याख्यानं परास्तम् । तथा सति परस्परसंब-

---

तथा च आसीद् भवितेति तिङन्तपदानुरोधेन गोमानित्यत्र गावोऽस्यासन् गावोऽस्य भवितार इत्यतीतानागतसत्ताविशिष्टप्रकृत्यर्थयुक्ते मतुप्प्रत्ययः प्रकृतसूत्रेणैव विधीयते, न तु तदुक्तरीत्या लभ्यत इति दिक् । ननु तत्तद्विधिवाक्यैरेव स्वविषये प्रत्ययाः सिद्धाः किमनेन सूत्रेणेत्यत आह **यत्र काल इति** । 'वर्तमानसामीप्ये–' इत्यारभ्य कालान्यत्वं प्रायेण प्रतिपाद्यते तदेव नेह गृह्यत इति भावः । वनानि पश्यन् ययावित्यादौ वर्तमानभूतकालादिप्रत्ययेषु को वा स्वकालात्प्रच्युतो भवतीत्याकाङ्क्षायामाह **तिङ्वाच्येति** । प्रधानानुरोधेन गुणस्य नयनमुचितं न तु विपरीतमिति भावः । **प्रत्यया इति** । कालान्तरभाजो भवन्तीत्यर्थः । **भूते लडिति** । एवं चोषित्वा ददर्शेत्यर्थः । **अतीतेति** । अतीतवासकर्ता कर्ता यस्य दर्शनस्येति बहुव्रीहिः । **सोमयाजीति** । 'करणे यजः' इति भविष्यति णिनिः । अतएवाह **सोमेन यक्ष्यमाण इति** । एवं च पश्यन् ययावित्यत्र दृशेर्भूते लट् । दृष्ट्वा ययावित्यर्थः । 'निवेदयिष्यतो मनो न विव्यथे' इत्यत्र तु वेदयतेर्भूते लृट् तस्य 'लृटः सद्वा' इति शतृप्रत्ययः, निवेदनं कृतवत इत्यर्थ इत्याद्यूह्यम् । स्यादेतत्—भावि कृत्यमासीदित्यत्र सूत्ररीत्या भाविशब्दस्य भूतकालत्वे स्वीकृते सत्यतीतं भवनमित्यर्थादासीच्छब्दस्याप्येककर्तृकमतीतं भवनमित्यर्थाद् भाव्यासीच्छब्दयोर्युगपत्प्रयोगो न स्याद् । भाविशब्दार्थस्य आसीच्छब्देनैव लाभात् । ततश्चैतावन्तं कालं भावितया व्यवहृतं तदिदानीमासीदित्यर्थोऽत्रावश्यं स्वीकर्तव्यः । स्वीकृते तु गोमानासीदित्यत्रापि गोमानिति व्यवहारविषय आसीदित्यर्थोऽस्तु 'वसन् ददर्श–' इत्यादौ भूते लक्षणया यथायथं लडादिः स्वीकर्तव्यः । सोमयाजीत्यत्र तु भूत एव णिनिप्रत्यये जातेऽपि भवितेति लुडन्तसम-

क्रियासमभिहारे लोट् लोटो हिस्वौ वा च तध्वमोः । (३-४-२)

पौनःपुन्ये भृशार्थे च द्योत्ये धातोर्लोट् स्यात्तस्य च हिस्वौ स्तः । तिङामपवादः ॥

न्धार्थबोधकधातुद्वयप्रयोगे प्रत्यया इत्यर्थलाभाद् गोमानासीदित्यत्र मतुबनापत्तेः । नहि धात्वोरिह प्रयोगोऽस्ति । धात्वर्थयोः सम्बन्धे इत्यर्थाभ्युपगमे तु गोमानासीदित्यत्र धातुद्वयप्रयोगाभावेऽपि धात्वर्थद्वयस्य सत्त्वादासीदित्यर्थे मतुब् निर्बाध इत्यन्यत्र विस्तरः । **क्रियासमभि** । अत्र चत्वारि वाक्यानि । तत्र क्रियासमभिहारे लोडिति प्रथमं वाक्यम् । पौनःपुन्यं भृशार्थश्च क्रियासमभिहार इत्युक्तम् । क्रियासमभिहारे इति धात्वर्थविशेषणम् । क्रियासमभिहारविशिष्टक्रियावृत्तेर्धातोरिति ते लभ्यते । लोट् तु द्योतकः, तदाह **पौनः पुन्ये भृशार्थे च द्योत्ये इति** । क्रियासमभिहारविशिष्टक्रियावृत्तेर्धातोर्लोडिति यावत् । सर्वलकारापवादः । लोटो हिस्वा वेति द्वितीयं वाक्यं व्याचष्टे **तस्येति** । पूर्ववाक्यविहितस्य लोटो हिस्वावादेशौ स्त इत्यर्थः । **तिङा-मपवाद इति** । अपवादावित्यर्थः । प्रत्येकाभिप्रायमेकवचनम् । ननु हिस्वयोरुभयोरपि लादेशत्वात् परस्मैपदत्वं स्यात् । तथा सति हेः परस्मैपदत्वं स्वादेशस्य त्वात्मनेपदत्वमितीष्टा व्यवस्था न सिध्येत् । अस्य स्वादेशस्य तङ्प्रत्याहारान्तर्गतत्वाभावेन 'तङानावात्मनेपदम्' इत्यस्याप्रवृत्तेः । 'तिप्तस्झि–' इत्यादिसूत्रोपात्तेषु तादृशेष्वेव तत्संज्ञाप्रवृत्तेः । किं च अनयोर्हिस्वयोः 'तिप्तस्झि–' इति सूत्रानन्तर्भूत-

---

भिव्याहारे सति सोमयाजीति व्यवहरिष्यमाण इत्यध्याहारेण गिरिर्भविष्यदर्थे लक्षणया वा प्रयोगो भवेदिति किमनेन सूत्रेणेति चेत् । अत्राहुः—अध्याहारलक्षणाप्रयुक्तक्लेशं विनैव प्रायशो निर्वाहार्थः सूत्रारम्भः । न हि भावि कृत्यमासीदित्यादौ क्वचिदध्याहारादिकमगत्या भवतीति सर्वत्र तत्स्वीकर्तुमुचितमिति । **क्रियासमभि-हारे । द्योत्य इति** । क्रियासमभिहारो धातोरेवार्थः । लोट् तु द्योतक इति भावः । **तस्य च हिस्वौ स्त इति** । ननु लोड् इत्यनेन तिङो लक्षयित्वा तिङामेव हिस्वौ विधीयेताम् । तथा सति तिङन्तत्वात्पदत्वं लभ्यत इति गुणोऽप्यस्ति । वा च तध्वमोरिति वाक्यशेषोऽपि स्वरसतः संगच्छते । अन्यथा येन नाप्राप्तिन्यायेन हिस्वयोस्तिङपवादत्वे सति तध्वमोः स्थाने तयोर्विकल्पेन विधानासंभवादुक्तवाक्यशेषो दुरुपपाद इति चेत् । अत्राहुः—लोट्शब्दस्य तिङ्लक्षणा न न्याय्या असंजातविरोधित्वेनोपक्रमस्य प्राबल्याद्विषयसप्तम्याश्रयणेन वाक्यशेषस्योपपन्नत्वाच्च । किं च तिङामादेशत्वे तिप्सिप्मिपां स्थाने विहितस्य हेः स्थानिवद्भावेन पित्त्वाद् ङित्त्वाभावेन लुनीहीत्यत्र 'ई हल्यघोः' इतीत्वं न स्यात् । ब्रूहीत्यत्र 'ब्रुव ईट्' इतीडागमे ब्रवीहि इति स्यात् । तृण्ढीत्यत्र तु 'तृणह इम्' इतीमागमे तृणेढीति स्यात् । किं च लादेशानामेव परस्मै-

तौ च हिस्वौ क्रमेण परस्मैपदात्मनेपदसंज्ञौ स्तस्तिङ्संज्ञौ च। तध्वमोर्विषये तु हिस्वौ वा स्तः। पुरुषैकवचनसंज्ञे तु नानयोरतिदिश्येते। हिस्वविधानसाम-

---

र्थ्यात्तिङ्त्वं च दुर्लभमित्यत आह **तौ चेति**। लोटो हिस्वाविति द्वितीयवाक्ये तावत्क्रियासमभिहारे लोडिति प्रथमवाक्याद् लोडित्यनुवृत्तं स्थानषष्ठ्या विपरिणतं तृतीयं वाक्यं संपद्यते। तत्र हि लोटो हिस्वौ इति द्वितीयवाक्याद् हिस्वावित्यनुवृत्तं धर्मपरमाश्रीयते। तथा च लोडादेशौ हिस्ववद्भवत इति लभ्यते। कौ भवत इत्याकाङ्क्षायां पूर्ववाक्योपस्थितौ हिस्वाविति गम्यते। ततश्च याविमौ तिङन्तभूतौ हिस्वावुक्तौ तौ प्रसिद्धलोडादेशतिङन्तभूतहिस्ववद् भवत इति तृतीयं वाक्यं पर्यवस्यति। तिङन्तभूतहिस्वयोस्तावत् क्रमात् परस्मैपदत्वमात्मनेपदत्वं तिङ्त्वं च प्रसिद्धम्। अत प्रकृतं हिस्वौ क्रमात् परस्मैपदात्मनेपदसंज्ञौ स्तः तिङ्संज्ञौ चेत्यर्थः। तिङ्त्वात्पदत्वसिद्धिः। ननु वा च तध्वमोः इति तध्वमोर्हिस्वादेशविकल्पविधिरनुपपन्नः। लोडादेशभूतहिस्वयोस्तिङपवादतया लोटस्तध्वमोरप्रसक्तेरित्यत आह **तध्वमोर्विषये त्विति**। स्थानषष्ठीमाश्रित्य लोडादेशतध्वमोः स्थाने हिस्वावित्यर्थ इति न भ्रमितव्यम्, येनोक्तदोषः स्यात्। किंतु विषयविषयिभावः षष्ठ्यर्थः। तथा च तध्वमोर्विषये लोटो हिस्वौ, पक्षे तध्वमाविति फलतीत्यर्थः। अत्र मध्यमपुरुषबहुवचनमेव तशब्दो गृह्यते। व्याख्यानाद् ध्वंसाहचर्याच्च। ननु हिस्वयोरनयोर्मध्यमपुरुषैकवचनत्वस्याप्यतिदेशाद् युष्मत्सामानाधिकरण्ये एकत्वे च सत्येव हिस्वौ स्याताम्।

पदात्मनेपदसंज्ञे न तु लादेशतिङादेशानामिति सर्वेषां तिङां द्वावपि हिस्वौ पर्यायेण स्यातां न तु तिबादीनां हिस्तवां स्व इति पदव्यवस्थया। ततश्च लकारस्यैवादेशौ हिस्वौ न तु तिङामित्यवश्यं स्वीकर्तव्यमिति। नन्वेवं द्वयोरपि 'लः परस्मैपदम्' इति परस्मैपदसंज्ञा स्यात्ततश्च परस्मैपदेभ्य एव हिस्वौ स्यातामत आह **तौ चेति**। अयं भावः—लोटो हिस्वौ इति वाक्ये 'क्रियासमभिहारे लोट्–' इति वाक्याल्लोडित्यनुवर्तते तच्च हिस्वावित्यस्य विशेषणम्। न च हिस्वौ लोटौ भवत इति सामर्थ्याल्लोड्धर्मकावित्यर्थः संपद्यते। तत्रापि मुख्यलोट्संबन्धिनो धर्मस्य प्रत्ययत्वस्यातिदेशो व्यर्थः। स्थानिवत्त्वेनैव तत्सिद्धेः किं तु स्थानिवद्भावलब्धलोड्व्यपदेशकौ तिङ्भूतौ यौ हिस्वौ तयोरेव धर्म इहातिदिश्यते। केचित्तु क्रियासमभिहारे लोडित्यनन्तरं लाघवात्तस्य हिस्वाविति वक्तव्ये लोड्ग्रहणसामर्थ्याल्लोड्धर्मकावेव हिस्वौ लोटः स्थाने भवत इत्यर्थः संपद्यते। तथा च पूर्वोक्तरीत्या तिङ्भूतौ यौ हिस्वौ तयोरेव धर्म इहातिदिश्यत इति सिद्धमिष्टम्। एवं च लोटो हिस्वाविति वाक्ये पूर्ववाक्याल्लोड्ग्रहणं नानुवर्तनीयमित्याहुः। **तिङ्संज्ञौ चेति**। तेन पदत्वं 'तिङ्ङतिङः' इति च भवति। हिस्व-

र्थ्यात्। तेन सकलपुरुषवचनविषये परस्मैपदिभ्यो हिः कर्तरि। आत्मनेपदिभ्यः स्वो भावकर्मकर्तृषु। **२८२६ समुच्चयेऽन्यतरस्याम् (३-४-३)** अनेक-

---

तथा च 'इमौ हिस्वौ सर्वेषां पुरुषाणां सर्वेषां च वचनानामिष्येते' इति भाष्यमनुपपन्नमित्यत आह **पुरुषैकवचनसंज्ञे त्विति।** हिस्वयोर्मध्यमपुरुषसंज्ञा एकवचनसंज्ञा च नातिदिश्यते इत्यर्थः। कुत इत्यत आह **हिस्वविधानेति।** यदि हिस्वयोर्मध्यमपुरुषैकवचनसंज्ञे स्याताम्, तर्हि युष्मत्सामानाधिकरण्ये एकत्वे च सत्येव लोटो हिस्वौ स्याताम्, अन्यत्र तु यथायथं तिबाद्यादेशाः स्युः। तथा सति लोटो हिस्वविधानमनर्थकं स्यात्। अतो न पुरुषवचनातिदेश इत्यर्थः। **तेनेति।** हिस्वयोः पुरुषवचनातिदेशाभावेन क्रमात् परस्मैपदात्मनेपदसंज्ञालाभेन चेत्यर्थः। **सकलेति।** सकलपुरुषवचनविषये हिर्भवति। स च भवन् परस्मैपदिभ्य एव कर्तर्येव भवति, न त्वात्मनेपदिभ्यो भावकर्मकर्तृष्वित्यर्थः, शेषात्कर्तरि परस्मैपदमित्युक्तेरिति भावः। **आत्मनेपदिभ्यः स्व इति।** 'अनुदात्तङित आत्मनेपदम्, भावकर्मणोः' इत्यादिसूत्रविषयेभ्यो धातुभ्यो भावकर्मकर्तृषु लोटः स्व एव भवतीत्यर्थः। अनयोरल क्रमात् परस्मैपदात्मनेपदसंज्ञाविष्यभावे तु लादेशत्वेन उभयोः परस्मैपदत्वात् कर्तर्येव परस्मैपदमात्मनेपदिभ्योऽपि स्यादिति भावः। **समुच्चये।**

विधान इति। यदि हि पुरुषवचनसंज्ञे अपि स्यातां तर्हि युष्मत्सामानाधिकरण्ये एकत्वे च सत्येव हिस्वाभ्यां भाव्यं तत्र च व्यर्थो हिस्वविधिरिति भावः। **हिः कर्तरीति। स्वो भावकर्मकर्तृष्विति।** उक्तं च कैयटेनापि—हिशब्दस्य कर्ता वाच्यः स्वशब्दस्य तु भावकर्मकर्तार इति। अत्र नव्याः—अल्पे ह्रस्वे इत्यादौ कप्रत्ययवत्क्रियासमभिहारे लोडयं स्वार्थिक एव। न त्वस्मिल्लोटि 'लः कर्मणि च–' इत्याद्यर्थोऽभ्युपेयः, प्रयोजनाभावात्। यदि तु हिशब्दस्य कर्ता अर्थः स्यात् (तर्हि) पुनः पुनरतिशयेन वा यानं यान्तस्यार्थ इति वक्ष्यमाणग्रन्थः स्वरसतो न संगच्छेत। याहियाहीत्यादौ तु कर्त्रादिप्रतीतिर्यातीत्यादिसमभिव्याहारेण सुलभैव। यथा एधांचक्रे इत्यत्र तङादेशात्प्रागेव आमः परस्य लेर्लुक्यामन्ते संख्याप्रतीत्यभावेऽपि चक्रे इत्यनुप्रयोगवशेन एककर्तृका वृद्धिरूपा क्रियेत्यविद्यमानापि संख्या प्रतीयते, तथैव हिस्वान्तेष्वपि कालकारकसंख्याप्रतीतिर्यातीत्याद्यनुप्रयोगबलेन भवतीत्याहुः। स्यादेतत्—'क्रियासमभिहारे हिस्वौ लोड्वा च तध्वमोः' इति सूत्रमस्तु। तथा च हिस्वौ लोटौ न भवत इति लोड्धर्मकावित्यर्थः पूर्वोक्तरीत्या स्यादिति सर्वेष्टसिद्धौ किमनेन लोट इति षष्ठ्यन्तकरणेनेति चेत्। अत्राहुः—हिस्वयोर्यदि लोट्स्थानिकत्वं न स्वीक्रियते तर्हि तयोर्लोडादेशत्वाभावेन 'ई हल्यघोः' इत्यादिप्रवृत्त्या लुनीहीत्यादिसिद्धावपि हिस्वा-

क्रियासमुच्चये द्योत्ये प्रागुक्तं वा स्यात् । **२८२७ यथाविध्यनुप्रयोगः पूर्वस्मिन् । (३-४-४)** आद्ये लोड्विधाने लोट्प्रकृतिभूत एव धातुरनुप्रयोज्यः । **२८२८ समुच्चये सामान्यवचनस्य । (३-४-५)** समुच्चये लोड्विधौ

समभिहार इति पदरहितं 'क्रिया लोट् लोटो हिस्वौ वा च तध्वमोः' इति पूर्वसूत्रमनुवर्तते । क्रियेति लुप्तषष्ठीबहुवचनान्तं समुच्चय इत्यत्रान्वेति, तदाह **अनेकक्रियासमुच्चये द्योत्ये इति** । एवं च कारकसमुच्चयमाश्रित्य नास्य प्रवृत्तिः **प्रागुक्तमिति** । धातोर्लोट् तस्य हिस्वौ प्रसिद्धहिस्वधर्मकौ, तध्वमोर्विषये वा इत्युक्तमित्यर्थः । **यथाविध्यनुप्रयोगः** । 'क्रियासमभिहारे–' इति, 'समुच्चयेऽन्यतरस्याम्' इति च लोड्विधी उक्तौ । तयोर्मध्ये यत्पूर्वसूत्रं 'क्रियासमभिहारे–' इति तदेतत्पूर्वशब्देन परामृश्यते, तदाह **आद्ये लोड्विधाने इति** । विधिमनतिक्रम्य यथाविधि । यस्याः प्रकृतेः लोड्विहितः तस्या अनुप्रयोग इति लभ्यते, तदाह **लोट्प्रकृतिभूत एवेति** । अत्रानुप्रयोगः पश्चात्प्रयोगः, न त्वव्यवहितत्वं विवक्षितम्, लुनीहि लुनीहि इत्येवायं लुनातीति भाष्यप्रयोगाल्लिङ्गात् । **समुच्चये**

न्तस्य लोडन्तत्वं न सिध्येत् । तथा च हन्त चेत्यनुदात्तविकल्पो न स्यात् । हन्त प्रलुनीहिप्रलुनीहीत्ययं लुनाति । एवं च लोडन्तत्वलाभार्थं लोटो हिस्वाविति विधीयते । यदि तु हिस्वौ लोडित्युक्तेऽपि लोड्वद्भावाश्रयेण लोट्कार्यं हन्त चेति स्वरविकल्पः सिध्यतीति ब्रूषे तर्हि स्थानिवद्भावलब्धलोड्धर्मकौ हिस्वावित्यर्थस्यानाश्रयणाल्लोडादेशकार्याणि परस्मैपदात्मनेपदसंज्ञादीन्यपि न सिध्यन्ति । तथा च पूर्वोक्तदोषस्तदवस्थः स्यात् । लोट् लोटो हिस्वौ इत्युक्ते तु स्थानिवद्भावेन हिस्वयोर्लोट्त्वाल्लोडन्तकार्यं स्वरविकल्पः सिध्यति, 'क्रियासमभिहारे लोट्' इति वाक्याल्लोडित्यनुवर्त्य हिस्वौ लोडिति प्रागेव व्याख्यातत्वाल्लोडादेशवद्भावेन परस्मैपदात्मनेपदसंज्ञादीन्यपि सिध्यन्तीति । **समुच्चये** । चिनोतर्भावे 'एरच्' इत्यच् । **प्रागुक्तमिति** । धातोर्लोट् लोटो हिस्वौ तध्वमोर्विषये वेत्यर्थः । **यथाविध्यनु** । पूर्वस्मिन्क्रियासमभिहारविषये । अत्र संख्याकारकादीनां हिस्वान्तादप्रतीतेस्तद्बोधनायानुप्रयोगो न्यायत एव प्राप्तस्तदनुवादेन यथाविधीति नियम्यते । तथा च पक्षे प्राप्तस्य नियमनायाहियाहीति गच्छतीत्यादि न भवति । यद्यप्यन्यत्र 'इन्हन्पूषार्यम्णां शौ' इत्यादौ नियमशब्देन परिसंख्या व्यवह्रियते 'सर्वनामस्थाने च–' इत्यादिना शौ तद्भिन्ने च दीर्घे प्राप्ते शेरन्यत्र तु तन्निवृत्तिपरत्वात्तथापीह कदाचिद्यातीत्यस्य कदाचिद्गच्छतीत्यस्यानुप्रयोगे प्राप्ते यथाविधीत्ययमप्राप्तांशपरिपूरणाय 'व्रीहीनवहन्ति' इत्यादिवद्विधीयत इति नियमविधिरेवायम् । एतेन मीमांसकप्रसिद्धनियमविधिः शब्दशास्त्रेऽप्रसिद्ध इति वदन्तः

१ 'लोडन्त' इति क्वचित् पाठः ।

सामान्यार्थकस्य धातोरनुप्रयोगः स्यात् । अनुप्रयोगाद्यथायथं लडादयस्तिबादयश्च । ततः संख्याकालयोः पुरुषविशेषार्थस्य चाभिव्यक्तिः । 'क्रियासमभिहारे द्वे वाच्ये' (वा ४११५) । याहि याहीति याति । पुनः पुनरतिशयेन वा यानं ह्यन्तस्यार्थः । एककर्तृकं वर्तमानं यानं यातीत्यस्य । इतिशब्दस्त्वभेदान्वये तात्पर्यं ग्राहयति । एवं यातः यान्ति । यासि याथः याथ । यात यातेति यूयं यात ।

सामान्यवचनस्य । उच्यतेऽनेनेति वचनः । सामान्यवाचिन इत्यर्थः । फलितमाह सामान्यार्थकस्येति । समुच्चीयमानक्रियासामान्यवाचिन इत्यर्थः । अनुप्रयोगादिति । अनुप्रयुज्यमानादित्यर्थः । तत इति । अनुप्रयुज्यमानधातुप्रकृतिकलडादिभिरित्यर्थः । हिस्वाभ्यां तु न संख्याकारकाद्यभिव्यक्तिः तथा च भाष्यम्, 'हिस्वान्तमव्यक्तपदार्थकं तेनापरिसमाप्तोऽर्थः' इत्यादि । 'क्रियासमभिहारे द्वे वाच्ये' इति वार्तिकं द्विरुक्तप्रक्रियायां व्याख्यातम् । इदमाद्यसूत्रविहितलोडन्तविषयमिति भाष्ये स्पष्टम् । क्रियासमभिहारे लोटमुदाहरति याहि याहीति यातीति । भाष्ये इतिशब्दस्य दर्शनादिति भावः । ह्यन्तस्येति । याहि याहीत्यस्येत्यर्थः । एककर्तृकमिति । यातीति यानकर्तुस्तदेकत्वस्य च प्रतीतेरित्यर्थः। अभेदान्वये इति । तथा च पुनः पुनरतिशयेन वा यानं तदात्मकमेककर्तृकं वर्तमानं यानमिति बोधः । तिङन्तेषु सर्वत्र क्रियाविशेष्यक एव बोध इति सिद्धान्तादेवमुक्तिः । एवमिति । याहि याहीति यातः । याहि याहीति यान्तीत्यादिसकलपुरुषवचनेषूदाहार्यमित्यर्थः । याहि याहीति ययौ । याहि याहीति याता । याहि याहीति यास्यति । याहि याहीति यातु । लोटमध्यमपुरुषबहुवचनतादेशविषये लोटो हिभावविकल्प उक्तः—वा च तध्वपरास्ताः । द्वे वाच्ये इति । वार्तिकमिदं द्विरुक्तप्रक्रियायां व्याख्यातम् । इतिशब्दस्त्विति । ननु इति शब्देन व्यवधानाद्यातीत्यस्यानुप्रयोगत्वं कथमिति चेत् । अत्राहुः—अनुशब्दस्येहानुवादित्वमात्रपरत्वाद्व्यवहितविपरीतप्रयोगयोरिष्टापत्तिः । एतच्च भाष्यकारीयोदाहरणसूत्रप्रत्याख्यानाभ्यां निर्णीयते । न च 'समुच्चये सामान्यवचनस्य' इति विशेषस्योक्तत्वात्सूत्रैकदेशस्य पूर्वस्मिन्निति पदस्य वैयर्थ्यमस्तु नाम । यथाविध्यनुप्रयोग इति तु यथाविधीति नियमार्थं स्वीकर्तव्यमेव, अन्यथा याहि याहीति गच्छतीत्यादि स्यादिति वाच्यम् , यस्माल्लोड्विधिस्तत्प्रकृतिकतिङन्तस्यैवोपस्थितत्वेनानुप्रयोक्तुमर्हत्वान्न तूपस्थितपरित्यागेन यत्किंचिद्धातुप्रकृतिकतिङन्तस्यानुप्रयोगार्हतेति । अतएव 'स्वं रूपं शब्दस्य–' इत्यपि सूत्रं प्रत्याख्यातं भाष्यकारेण । 'अग्नेर्ढक्' इत्यादौ विधिवाक्यगतस्याग्न्यादिवाचकाग्निशब्दादेरुपस्थितत्वात् तत्परित्यागेनानुपस्थितवह्न्यादिशब्देभ्यो ढगादिर्न भवेदिति । एवं चास्मिन्प्रत्याख्याते यथाविध्यनु-

याहि याहीत्ययासीत् । अयास्यद्वा । अधीष्वाधीष्वेत्यधीते । ध्वंविषये पक्षे अधीध्वमधीध्वमिति यूयमधीध्वम् । समुच्चये तु सक्तून्पिब, धानाः खादेत्यभ्यवहरति अन्नं भुङ्क्ष्व, दाधिकमास्वादयस्वेत्यभ्यवहरते । तध्वमोस्तु पिबत, खादतेत्यभ्यवहरत । भुङ्ग्ध्वमास्वादयध्वमित्यभ्यवहरध्वम् । पक्षे हिस्वौ । अत्र

मोरिति । तत्र हिभावपक्षे याहि याहीति यूयं यातेति सिद्धवत्कृत्य अभावपक्षे आह **यात यातेति यूयं यातेति** । याहि याहीत्ययात् । याहि याहीति यायात् । लुङ्याह **याहि याहीत्ययासीदिति** । लृङि उदाहरति **अयास्यद्वेति** । याहि याहीत्ययास्यदिति लृङि रूपम् । यास्यति वेति पाठे लृटि उदाहरणम् । क्रमस्तु न विवक्षितः । **पक्षे इति** । ध्वंविषये स्वादेशाभावपक्षे इत्यर्थः । **यूयमधीध्वम् इति** । लोण्मध्यमपुरुषबहुवचनम् । भावकर्मणोस्तु भूयस्व भूयस्वेति भूयते । पच्यस्व पच्यस्वेति पच्यत इत्युदाहार्यम् । अथ 'समुच्चये सामान्यवचनस्य' इत्यस्योदाहरति **समुच्चये त्विति** । **अभ्यवहरतीति** । पानं द्रवद्रव्यस्य दन्तसंमर्दनं विना भक्षणम् । खादनं तु कठिनद्रव्यस्य चर्वणम् । तयोः सामान्यरूपमभ्यवहरणम्, यथाकथंचिद् भक्षणात्मकत्वात् । **पक्षे हिस्वाविति** । तध्वमोर्विषये कदाचिद् हिस्वादेशौ पक्षे इत्यर्थः । पिब खादेत्यभ्यवहरेत्युदाहार्यम् । **अत्रेति** ।

प्रयोगसूत्रे मीमांसकप्रसिद्धनियमविधेः स्थितोदाहरणमन्यदन्वेषणीयमिति दिक् । **एवमिति** याहियाहीति यातः याहियाहीति यान्तीत्येवमूह्यमित्यर्थः । **पक्षे इति** । 'वा च तध्वमोः' इत्युक्तत्वाद् हिस्वाभावपक्ष इत्यर्थः । तध्वमोरित्यत्र तशब्देन मध्यमपुरुष बहुवचनं गृह्यते ध्वंसाहचर्यात् । यद्यपि ध्वमित्यस्यात्मनेपदत्वमस्तीति तत्साहचर्येण प्रथमपुरुषैकवचनस्य ग्रहणं प्राप्नोति, तथापि बहुवचनत्वमध्यमत्वरूपधर्माभ्यां मध्यमपुरुषबहुवचनमेव गृह्यत इत्याशयेनोदाहरति **यातयातेति यूयमिति** । अस्यापि लोट्। लङ्त्वात् 'तस्थस्थमिपाम्–' इति यात इत्यत्र थस्य तादेशः । विध्यादिलोड्विषये त्वनुप्रयोगेऽपि थस्य तादेशप्रवृत्तेर्यूयं यातेत्यनुप्रयोक्तव्यम् । **अधीध्वमधीध्वमिति** । 'सवाभ्याम्–' इत्यम् । **अधीध्वे इति** । विध्यादिलोड्विषये तु अधीध्वमित्येवानुप्रयोक्तव्यम् । भावकर्मणोस्तु भूयस्वभूयस्वेति भूयते । पच्यस्वपच्यस्वेति पच्यते इत्याद्युह्यम् । 'समुच्चयेऽन्यतरस्याम्' इति सूत्रे क्रियासमभिहारे इत्यननुवर्तनाद् द्वित्वमकृत्वैवोदाहरति **सक्तून् पिब धानाः खादेति** । **अभ्यवहरथेति** । विध्यादिलोड्विषये तु अभ्यवहरतेत्यनुप्रयोक्तव्यम् । एवम् अभ्यवहरध्वे इत्यत्राप्युक्तविषये अभ्यवहरध्वमित्यनुप्रयोक्तव्यम् । **पक्षे हिस्वाविति** । पिब खादेत्यभ्यवहरथ । भुङ्क्ष्व आस्वादयस्वेत्यभ्यवहरध्वे इत्युदाहार्यम् ।

---

१ 'स्वदध्वम्' इति क्वचित् पाठः ।

समुच्चीयमानविशेषाणामनुप्रयोगार्थेन सामान्येनाभेदान्वयः। पक्षे सक्तूनिपबति। धानाः खादति। अत्तं भुङ्क्ते। दाधिकमास्वादयते। एतेन—

'पुरीमवस्कन्द लुनीहि नन्दनं मुषाण रत्नानि हरामराङ्गनाः।
विगृह्य चक्रे नमुचिद्विषा बली य इत्थमस्वास्थ्यमहर्दिवं दिवः॥'

इति व्याख्यातम्। अवस्कन्दनलवनादिरूपा सूतानयतनपरोक्षा एककर्तृका अस्वास्थ्यक्रियेत्यर्थात्। इह पुनः पुनरवस्कन्देत्यादिरर्थ इति व्याख्यानं भ्रममूलकमेव, द्वितीयसूत्रे क्रियासमभिहारे इत्यस्याननुवृत्तेः, लोडन्तस्य द्वित्वापत्तेश्च। पुरीमवस्कन्देत्यादि मध्यमपुरुषैकवचनमित्यपि केषांचिद् भ्रम एव।

पिब खादेत्यभ्यवहरतीत्यादौ समुच्चीयमानपानखादनादिक्रियाविशेषाणामनुप्रयुज्यमानधातुवाच्याभ्यवहरणात्मकक्रियासामान्येन अभेदान्वय इत्यर्थः। पक्षे सक्तूनिति। समुच्चये लोडभावपक्षे अनुप्रयोगोऽपि सामान्यवचनस्य नास्तीति भावः।

एतेनेति। 'समुच्चयेऽन्यतरस्याम्' इति 'समुच्चये सामान्यवचनस्य' इति च सूत्रद्वयेन तदुदाहरणप्रदर्शनेन च पुरीमवस्कन्देत्यादि माघकाव्यस्थं श्लोकवाक्यं व्याख्यातमित्यर्थः। बली रावणो नमुचिद्विषा इन्द्रेण सह[2] विगृह्य विरोधं प्राप्य पुर्याः अमरावत्या अवस्कन्दनं पीडनम्, नन्दनवनस्य लवनम्, रत्नानां मोषणम्, अमराङ्गनानां हरणम् इत्येवंप्रकारेण अहर्दिवं अहन्यहनि अस्वास्थ्यं चक्रे कृतवानित्यन्वयः। इत्थंशब्द इतिपर्यायः अवस्कन्दनादिक्रियाविशेषाणाम् अस्वास्थ्यक्रियासामान्ये अभेदं ग्राहयति। फलितमाह अवस्कन्दनलवनादीति। आदिना मोषणं हरणं च गृह्यते। भ्रममूलकत्वमुपपादयति द्वितीयसूत्रे इति। अननुवृत्तेरिति। भाष्ये तदनुवृत्तेरनुक्तत्वादिति भावः। तदनुवृत्त्यभ्युपगमे बाधकमाह लोडन्तस्येति। 'समुच्चयेऽन्यतरस्याम्' इति सूत्रे क्रियासमभिहारे इत्यनुवृत्तौ अवस्कन्देत्यादिलोडन्तानां 'क्रियासमभिहारे द्वे वाच्ये' इति द्वित्वापत्तेरित्यर्थः। भ्रम एवेति।

लवनादीति। आदिशब्देन मोषणहरणे ग्राह्ये। अनुवृत्त्यभ्युपगमे बाधकमाह लोडन्तस्येति। भ्रम एवेति। पुरुषांशे वचनांशे च। लोडंशे तु प्रमैवेति भावः। एवमुक्तोदाहरणेषु हिस्वान्तेषु तिङन्तत्वं यथायथं परस्मैपदात्मनेपदान्तत्वं च सिद्धं पुरुषवचनसंज्ञे तु विधानसामर्थ्याद्धिस्वयोर्न स्त इत्युक्तमिति सर्वेष्टसिद्धिः।

इति श्रीपरमहंसपरिव्राजकाचार्यश्रीवामनेन्द्रस्वामिचरणारविन्दसेवकज्ञानेन्द्रसरस्वतीकृतौ सिद्धान्तकौमुदीव्याख्यायां तत्त्वबोधिन्याख्यायां तिङन्तं संपूर्णम्।

---

१ 'स्वदते' इति क्वचित् पाठः। २ 'सह' इति क्वचिन्नास्ति।

पुरुषवचनसंज्ञे इह नेत्युक्तत्वात्।

इति लकारार्थप्रकरणम्

मध्यमपुरुषांशे एकवचनांशे च अम एवेत्यर्थः। कुत इत्यत आह **पुरुषवचनसंज्ञे इह नेत्युक्तत्वादिति**। अत्र भाष्ये हिस्वान्तयोरनभिव्यक्तसंख्याकालकत्वात्तदभिव्यक्तये अनुप्रयोगस्य न्यायत एव प्राप्तत्वादनुप्रयोगविधिर्मास्तु इत्युक्तम्। एवं च 'तानीमानि क्षुद्राण्यसकृदावर्तीनि भूतानि भवन्ति जायस्व म्रियस्वेत्येतत् तृतीयं स्थानम्' इति श्रुतौ 'समुच्चयेऽन्यतरस्याम्' इति लोटो हिस्वावेव भवतः, न त्वनुप्रयोगः। तत्र जननमरणक्रिययोरेव विवक्षिततया संख्याकालाभिव्यक्तेरविवक्षितत्वेन तत्रानुप्रयोगस्य प्रयोजनाभावात्। एतेन 'आ च सत्यलोकादावीचेर्जायस्व म्रियस्व इति विपरिवर्तमानमात्मानं जीवलोकं चालोक्यास्मिन् संसारे नित्याशुचिदुःखात्मकं प्रसंख्यानमुपवर्तते' इति वाचस्पत्यग्रन्थेऽपि जायस्व म्रियस्वेति व्याख्यातम्। न चात्र 'समुच्चयेऽन्यतरस्याम्' इत्यत्र क्रियासमभिहारे इत्यस्यानुवृत्तेरुक्तत्वात् कथमिह पौनःपुन्यावगतिरिति वाच्यम्, आ च सत्यलोकादावीचेः विपरिवर्तमानम् इति समभिव्याहारेण तदुपपत्तेः। उदाहृतश्रुतौ तु पौनःपुन्यं असकृत्पदगम्यमित्यदोषः। कल्पतरुग्रन्थे तु जायस्व म्रियस्वेत्यत्र 'क्रियासमभिहार—' इति सूत्रेण लोडित्युक्तम्। तत्तु द्वित्वापत्तेरुपेक्ष्यमिति शब्देन्दुशेखरे प्रपञ्चितम्।

इति श्रीवासुदेवदीक्षितविदुषा विरचितायां सिद्धान्तकौमुदीव्याख्यायां
बालमनोरमाख्यायां लकारार्थप्रक्रियानिरूपणं समाप्तम्।

अकाराद्यनुक्रमेण

कौमुद्या भ्वादिप्रभृतिलकारार्थप्रकरणान्तसूत्रसूचिका

पृष्ठम्	सूत्रम्
	अ
५५५	अकर्मकाच्च १ । ३ । २६
५६२	अकर्मकाच्च १ । ३ । ३५
५६५	अकर्मकाच्च १ । ३ । ४५
११९	अकृत्सार्वधातुक ७ । ४ । २५
१६२	अक्ष्णोऽन्यतरस्यां ३ । १ । ७५
६१८	अचः कर्मकर्तरि ३ । १ । ६२
११४	अचस्तास्वत्थल्य ७ । २ । ६१
३६२	अचि विभाषा ८ । २ । २१
२१	अजादेर्द्वितीयस्य ६ । १ । २
१११	अजेर्व्यघञपोः २ । ४ । ५६
४५२	अज्झनगमां सनि ६ । ४ । १६
३७१	अञ्जेः सिचि ७ । २ । ७१
२९४	अड्गार्ग्यगालवयोः ७ । ३ । ९९
५८६	अणावकर्मकाच्चि १ । ३ । ८८
६८	अत आदेः ७ । ४ । ७०
२९०	अत उत्सार्वधा ६ । ४ । ११०
९६	अत उपधायाः ७ । २ । ११६
८०	अत एकहल्म ६ । ४ । १२०
१७	अतो दीर्घो ७ । ३ । १०१
४१	अतो येयः ७ । २ । ८०
१३१	अतो लोपः ६ । ४ । ४८
१५२	अतो ल्रान्तस्य ७ । २ । २
६६	अतो हलादेर्लघोः ७ । २ । ७
३५	अतो हेः ६ । ४ । १०५
४५५	अत्र लोपोऽभ्या ७ । ४ । ५८
२९०	अत्स्मृदृत्वरप्रथ ७ । ४ । ९३
२९७	अदभ्यस्तात् ७ । १ । ४
२५८	अदः सर्वेषाम् ७ । ३ । १००
२५७	अदिप्रभृतिभ्यः २ । ४ । ७२
६४६	अधीष्टे च ३ । ३ । १६६
५६१	अधेः प्रसहने १ । ३ । ३३
३६	अनद्यतने लङ् ३ । २ । १११
२९	अनद्यतने लुट् ३ । ३ । १५
६३९	अनवक्लृप्त्यम ३ । ३ । १३५
२९७	अनितेः ८ । ४ । १९
१०	अनुदात्तङित १ । ३ । १२
२३८	अनुदात्तस्य चर्दु ६ । १ । ५९
२५९	अनुदात्तोपदेश ६ । ४ । ३७
५१९	अनुनासिकस्य ६ । ४ । १५
११९	अनुपर्यभिनि ८ । ३ । ७२
५८१	अनुपसर्गाज्ज्ञः १ । ३ । ७६
५६४	अनुपसर्गाद्वा १ । ३ । ४३
१७४	अनुविपर्यभि ८ । ३ । ७२
५६६	अनोरकर्मकात् १ । ३ । ४९
६२९	अपरोक्षे च ३ । २ । ११९
५६४	अपह्नवे ज्ञः १ । ३ । ४४
५५२	अपाच्चतुष्पा ६ । १ । १४२
५८१	अपाद्वदः १ । ३ । ७३
६२७	अभिज्ञावचने ३ । २ । ११२

पृष्ठम्	सूत्रम्
५८३	अभिप्रत्यतिभ्यः १ । ३ । ८०
२५२	अभ्यस्तस्य च ६ । १ । ३३
१०४	अभ्यासस्यास ६ । ४ । ७८
२६०	अभ्यासाच्च ७ । ३ । ५५
२४	अभ्यासे चर्च ८ । ४ । ५४
४७५	अयङ्यि क्ङिति ७ । ४ । २२
१३५	अयामन्ताल्वाय्ये ६ । ४ । ५५
३१०	अर्तिपिपर्त्योश्च ७ । ४ । ७७
३६५	अर्तिह्रीव्लीरी ७ । ३ । ३६
६४७	अर्हे कृत्यतृचश्च ३ । ३ । १६९
९२	अवाच्चालम्बना ८ । ३ । ६८
५६७	अवाद्ग्रः १ । ३ । ५१
५०९	अशनायोदन्य ७ । ४ । ३४
३४८	अश्नोतेश्च ७ । ४ । ७२
५१०	अश्वक्षीरवृषलव ७ । १ । ५१
६०	असंयोगाल्लिट् कित् १ । २ । ५
२४	असिद्धवदत्राभात् ६ । ४ । २२
४८	अस्तिसिचोऽपृक्ते ७ । ३ । ९६
२९१	अस्तेर्भूः २ । ४ । ५२
१५	अस्मद्युत्तमः १ । ४ । १०७
२६६	अस्यतिवक्ति ७ । ४ । ५२
३३९	अस्यतेस्थुक् ७ । ४ । १७
	आ
५६४	आङ उद्गमने १ । ३ । ४०
५५०	आङो दोऽनास्य १ । ३ । २०
५५६	आङो यमहनः १ । ३ । २८
३१४	आ च हौ ६ । ४ । ११७
६९	आडजादीनाम् ६ । ४ । ७२
२६	आडुत्तमस्य पिच्च ३ । ४ । ९२

पृष्ठम्	सूत्रम्
२०८	आत औ णलः ७ । १ । ३४
५०	आतः ३ । ४ । ११०
५५	आतो ङितः ७ । २ । ८१
५९९	आतो युक्चिण्कृतोः ७ । ३ । ३३
२०८	आतो लोप इटि ६ । ४ । ६४
७२	आत्मनेपदेष्वनतः ७ । १ । ५
५५६	आत्मनेपदेष्वन्य २ । ४ । ४४
२५३	आत्मनेपदेष्वन्य ३ । १ । ५४
१००	आदिर्ञिटुडवः १ । ३ । ५
२०७	आदेच उपदेशे ६ । १ । ४५
५२	आनि लोट् ८ । ४ । १६
४५५	आप्ज्ञप्यृधामीत् ७ । ४ । ५५
५६	आमः २ । ४ । ८१
६९	आमेतः ३ । ४ । ९०
५८	आम्प्रत्ययवत्कृञो १ । ३ । ६३
१३०	आयादय आर्ध ३ । १ । ३१
२९	आर्धधातुकं शेषः ३ । ४ । ११४
२७	आर्धधातुकस्येड्व ७ । २ । ३५
२६१	आर्धधातुके २ । ४ । ३५
१३१	आर्धधातुके ६ । ४ । ४६
६३३	आशंसायां ३ । ३ । १३२
६३४	आशंसावचने ३ । ३ । १३४
३२	आशिषि लिङ् ३ । ३ । १७३
२७७	आहस्थः ८ । २ । ३५
	इ
४५०	इको झल् १ । २ । ९
४५३	इङश्च २ । ४ । ४८
६४५	इच्छार्थेभ्यो वि ३ । ३ । १६०
६४४	इच्छार्थेषु लिङ् ३ । ३ । १५७

पृष्ठम्	सूत्रम्
५६	इजादेश्च गुरुमतो ३ । १ । ३६
८८	इट ईटि ८ । २ । २८
७१	इटोऽत् ३ । ४ । १०६
४६०	इट् सनि वा ७ । २ । ६६
२१६	इडत्त्यर्तिव्ययय ७ । २ । ६६
६६	इणः षीध्वंलुङ् ८ । ३ । ७८
२८०	इणो गा लुङि २ । ४ । ४५
२७८	इणो यण् ६ । ४ । ८१
५५०	इतरेतरान्यो १ । ३ । १६
३७	इतश्च ३ । ४ । १००
८२	इदितो नुम्धातोः ७ । १ । ५८
३००	इद्दरिद्रस्य ६ । ४ । ११४
८६	इरितो वा ३ । १ । ५७
२३७	इषुगमियमां ७ । ३ । ७७
	ई
४७५	ई घ्राध्मोः ७ । ४ । ३१
४०७	ई च गणः ७ । ४ । ६७
२६७	ईडजनोर्ध्वे च ७ । २ । ७८
२६७	ईशः से ७ । २ । ७७
३१३	ई हल्यघोः ६ । ४ । ११३
	उ
१५६	उतश्च प्रत्यया ६ । ४ । १०६
६४१	उताप्योः समर्थ ३ । ३ । १५२
२७१	उतो वृद्धिर्लुकि ७ । ३ । ८६
४७०	उत्परस्यात ७ । ४ । ८८
५६६	उदश्चरः सकर्म १ । ३ । ५३
५५४	उदोऽनूर्ध्वकर्मणि १ । ३ । २४
३१०	उदोष्ठ्यपूर्वस्य ७ । १ । १०२
५५५	उद्विभ्यां तपः १ । ३ । २७

पृष्ठम्	सूत्रम्
११५	उपदेशेऽत्वतः ७ । २ । ६२
८४	उपधायां च ८ । २ । ७८
३६६	उपधायाश्च ७ । १ । १०१
५६४	उपपराभ्याम् १ । ३ । ३६
५११	उपमानादाचारे ३ । १ । १०
२६२	उपसर्गप्रादुर्भ्यां ८ । ३ । ८७
१४६	उपसर्गस्यायतौ ८ । २ । १६
६१	उपसर्गात्सुनोति ८ । ३ । ६५
६८	उपसर्गादसमासे ८ । ४ । १४
५६०	उपसर्गाद्ध्रस्व ऊहतेः ७ । ४ । २३
३७५	उपात्प्रतियत्नवै ६ । १ । १३६
५६८	उपाद्यमः स्वकरणे १ । ३ । ५६
५५४	उपान्मन्त्रकरणे १ । ३ । २५
४४४	उभौ साभ्यासस्य ८ । ४ । २१
६०	उरत् ७ । ४ । ६६
३६०	उर्ऋत् ७ । ४ । ७
२०६	उश्च १ । २ । १२
१६६	उषविदजागृभ्यो ३ । १ । ३८
४३	उस्यपदान्तात् ६ । १ । ९६
	ऊ
२०३	ऊदुपधाया गोहः ६ । ४ । ८९
२७३	ऊर्णोतेर्विभाषा ७ । २ । ६
२७५	ऊर्णोतेर्विभाषा ७ । ३ । ९०
	ऋ
२१६	ऋच्छत्यृताम् ७ । ४ । ११
४६०	ऋतश्च ७ । ४ । ९२
३४५	ऋतश्च संयोगादेः ७ । २ । ४३
२१५	ऋतश्च संयोगादे ७ । ४ । १०
२५६	ऋतेरीयङ् ३ । १ । २९

पृष्ठम्	सूत्रम्
११५	ऋतो भारद्वाजस्य ७ । २ । ६३
२४०	ऋदृशोऽङि गुणः ७ । ४ । १६
२०५	ऋद्धनोः स्ये ७ । २ । ७०
	ॠ
२२६	ॠत इद्धातोः ७ । १ । १००
	ए
६४	एकाच उपदेशे ७ । २ । १०
२१	एकाचो द्वे प्रथमस्य ६ । १ । १
६८	एत ऐ ३ । ४ । ९३
२७६	एतेर्लिङि ७ । ४ । २४
३३	एरुः ३ । ४ । ८६
२१०	एर्लिङि ६ । ४ । ६७
	ओ
४२७	ओः पुयण्ज्यपरे ७ । ४ । ८०
३२६	ओतः श्यनि ७ । ३ । ७१
	क
५४४	कण्ड्वादिभ्यो यक् ३ । १ । २७
१३५	कमेर्णिङ् ३ । १ । ३०
५४८	कर्तरि कर्मव्यति १ । ३ । १४
१५	कर्तरि शप् ३ । १ । ६८
५११	कर्तुः क्यङ् ३ । १ । ११
५६३	कर्तृस्थे चाशरीरे १ । ३ । ३७
५२७	कर्मणो रोमन्थ ३ । १ । १५
६११	कर्मवत्कर्मणा ३ । १ । ८७
५२७	कष्टाय क्रमणे ३ । १ । १४
६४२	कामप्रवेदने ३ । ३ । १५३
५११	काम्यच्च ३ । १ । ९
६३६	कालविभागे ३ । ३ । १३७
१३१	कास्प्रत्ययादाम ३ । १ । ३५
४४	किदाशिषि ३ । ४ । १०४
३६२	किरतौ लवने ६ । १ । १४०
४५०	किरश्च पञ्चभ्यः ७ । २ । ७५
६३६	किंकिलास्त्य ३ । ३ । १४६
६३८	किंवृत्ते लिङ् ३ । ३ । १४४
६३१	किंवृत्ते लिप्सा ३ । ३ । ६
६२५	कुषिरजोः प्राचां ३ । १ । ९०
६२	कुहोश्चुः ७ । ४ । ६२
५६	कृञ्चानुप्रयुज्यते ३ । १ । ४०
१७५	कृपो रो लः ८ । २ । १८
११२	कृसृभृवृस्तुद्रुस्रु ७ । २ । १३
४५	क्ङिति च १ । १ । ५
५०६	क्यचि च ७ । ४ । ३३
५०६	क्यस्य विभाषा ६ । ४ । ५०
१४७	क्रमः परस्मैपदेषु ७ । ३ । ७६
६६०	क्रियासमभिहारे ३ । ४ । २
४४१	क्रीङ्जीनां णौ ६ । १ । ४८
५५१	क्रीडोऽनुसंपरिभ्य १ । ३ । २१
३७६	क्र्यादिभ्यः श्ना ३ । १ । ८१
६१४	क्षिप्रवचने लृट् ३ । ३ । १३३
१६१	क्सस्याचि ७ । ३ । ७२
	ग
५६०	गन्धनावक्षेपण १ । ३ । ३२
२०२	गमहनजनखन ६ । ४ । ९८
२३७	गमेरिट् परस्मै ७ । २ । ५८
६४०	गर्हायां च ३ । ३ । १४९
६३७	गर्हायां लडपि ३ । ३ । १४२
२८३	गाङ्कुटादिभ्यो १ । २ । १
२८१	गाङ् लिटि २ । ४ । ४९

पृष्ठम् सूत्रम्

४८ गातिस्थाघुपाभूभ्यः २ । ४ । ७७
२७५ गुणोऽपृक्ते ७ । ३ । ९१
४६७ गुणो यङ्लुकोः ७ । ४ । ८२
२१६ गुणोऽर्तिसंयोगाद्योः ७ । ४ । २९
१३० गुपूधूपविच्छि ३ । १ । २८
२३० गुप्तिज्किद्भ्यः ३ । १ । ५
५८० गृधिवञ्च्योः १ । ३ । ६९
२४९ ग्रहिज्यावयि ६ । १ । १६
३८४ ग्रहोऽलिटि दीर्घः ७ । २ । ३७
४७१ ग्रो यङि ८ । २ । २०

घ

२८३ घुमास्थागापाज ६ । ४ । ६६
१९१ घ्वसोरेद्धाव ६ । ४ । ११९

च

२६५ चक्षिङः ख्याञ् २ । ४ । ५४
१३९ चङि ६ । १ । ११
४७० चरफलोश्च ७ । ४ । ८७
४७५ चायः की ६ । १ । २१
१५० चिणो लुक् ६ । ४ । १०४
६०३ चिण्णमुलोर्दीर्घो ६ । ४ । ९३
३२९ चिण् ते पदः ३ । १ । ६०
५९५ चिण्भावकर्मणोः ३ । १ ६६
६४१ चिन्त्रीकरणे ३ । ३ । १५०
३९५ चिस्फुरोर्णौ ६ । १ । ५४
३८३ च्छ्वोःशूडनुना ६ । ४ । १९
४७ च्लि लुङि ३ । १ । ४३
४७ च्लेः सिच् ३ । १ । ४४

ज

३२० जनसनखनां ६ । ४ । ४२
३२७ जनिवध्योश्च ७ । ३ । ३५
४७१ जपजभदहदश ७ । ४ । ८६
३१३ जहातेश्च ६ । ४ । ११६
२६८ जाग्रोऽविचिण्ण ७ । ३ । ८५
६४० जातुयदोर्लिङ् ३ । ३ । १४७
४३६ जिघ्रतेर्वा ७ । ४ । ६
२९९ जुसि च ७ । ३ । ८३
३०८ जुहोत्यादिभ्यः २ । ४ । ७५
१०९ जॄस्तम्भु ३ । १ । ५८
३२७ ज्ञाजनोर्जा ७ । ३ । ७९
५४८ ज्ञाश्रुस्मृदृशां सनः १ । ३ । ५७
५०० ज्वरत्वरस्रिव ६ । ४ । २०

झ

९५ झलो झलि ८ । २ । २६
९५ झषस्तथोर्धोऽधः ८ । २ । ४०
७१ झस्य रन् ३ । ४ । १०५
४२ झेर्जुस् ३ । ४ । १०८
१६ झोऽन्तः ७ । १ । ३

ट

५४ टित आत्मनेपदा ३ । ४ । ७९

ढ

१६० ढो ढे लोपः ८ । ३ । १३

ण

९६ णलुत्तमो वा ७ । १ । ९१
३८६ णिचश्च १ । ३ । ७४
१३६ णिश्रिद्रुस्रुभ्यः ३ । १ । ४८
५७१ णेरणौ यत्कर्म १ । ३ । ६७
१३६ णेरनिटि ६ । ४ । ५१
९८ णो नः ६ । १ । ६५

पृष्ठम्	सूत्रम्
४४४	णौ गमिरबोधने २ । ४ । ४६
१३८	णौ चङ्युपधाया ७ । ४ । १
४२६	णौ च संश्चङोः ६ । १ । ३१
४४१	णौ च संश्चङोः २ । ४ । ५१
	त
१०	तङानावात्मने १ । ४ । १००
४२५	तत्प्रयोजको १ । ४ । ५५
२८६	तनादिकृञ्भ्य उः ३ । १ । ७९
३७३	तनादिभ्यस्तथासोः २ । ४ । ७९
१६४	तनूकरणे तक्षः ३ । १ । ७६
५९८	तनोतेर्यकि ६ । ४ । ४४
४५८	तनोतेर्विभाषा ६ । ४ । १७
६२२	तपस्तपःकर्म ३ । १ । ८८
५९८	तपोऽनुतापे च ३ । १ । ६५
३४	तस्थस्थमिपां ३ । ४ । १०१
९९	तस्मान्नुड् द्विहलः ७ । ४ । ७१
१३	तान्येकवचनद्वि १ । ४ । १०२
३१	तासस्त्योर्लोपः ७ । ४ । ५०
१७६	तासि च क्लृपः ७ । २ । ६०
१२	तिङस्त्रीणि १ । ४ । १०१
१५	तिङ्शित्सार्व ३ । ४ । ११३
९	तिप्तस्झिसिप्थ ३ । ४ । ७८
३०२	तिप्यनस्तेः ८ । २ । ७३
४३६	तिष्ठतेरित् ७ । ४ । ५
१६५	तीषसहलुभ ७ । २ । ४८
३५०	तुदादिभ्यः शः ३ । १ । ७७
२७२	तुरुस्तुशम्यमः ७ । ३ । ९५
३३	तुह्योस्तातङाशि ७ । १ । ३५
३७०	तृणह इम् ७ । ३ । ९२

पृष्ठम्	सूत्रम्
१२८	तृफलभजत्रपश्च ६ । ४ । १२२
५२	ते प्राग्धातोः १ । ४ । ८०
	थ
८१	थलि च सेटि ६ । ४ । १२१
५५	थासः से ३ । ४ । ८०
	द
२३४	दंशसञ्जस्वञ्जां ६ । ४ । २५
३१५	दधस्तथोश्च ८ । २ । ३८
४५६	दम्भ इच्च ७ । ४ । ५६
२२८	दयतेर्दिगि लिटि ७ । ४ । ९
१४८	दयायासश्च ३ । १ । ३७
२९०	दश्च ८ । २ । ७५
५६७	दाणश्च सा १ । ३ । ५५
२०९	दाधा घ्वदाप् १ । १ । २०
३२१	दिवादिभ्यः श्यन् ३ । १ । ६९
३२४	दीङो युडचि ६ । १ । ६३
३०	दीधीवेवीटाम् १ । १ । ६
१५०	दीपजनबुध ३ । १ । ६१
२७९	दीर्घ इणः किति ७ । ४ । ६९
४६८	दीर्घोऽकितः ७ । ४ । ८३
१४०	दीर्घो लघोः ७ । ४ । ९४
६१९	दुहश्च ३ । १ । ६३
४४३	दोषो णौ ६ । ४ । ९०
१७०	द्युतिस्वाप्योः संप्र ७ । ४ । ६७
१७०	द्युद्भ्यो लुङि १ । ३ । ९१
६०	द्विर्वचनेऽचि १ । १ । ५९
२६२	द्विषश्च ३ । ४ । ११२
	ध
६४७	धातुसंबन्धे प्रत्ययाः ३ । ४ । १

पृष्ठम्	सूत्रम्
४४७	धातोः कर्मणः ३ । १ । ७
४६७	धातोरेकाचो ३ । १ । २२
८४	धात्वादेः षः सः ६ । १ । ६४
६८	धि च ८ । २ । २५
१५६	धिन्विकृण्व्योर च ३ । १ । ८०
	न
५०६	नः क्ये १ । ४ । १५
४७२	न कवतेर्यङि ७ । ४ । ६३
५४६	न गतिहिंसार्थेभ्यः १ । ३ । १५
६१८	न दुहस्नुनमां ३ । १ । ८९
२४०	न दृशः ३ । १ । ४७
५०२	न धातुलोप १ । १ । ४
६२९	ननौ पृष्टप्रतिवचन ३ । २ । १२०
२७३	न न्द्राः संयोगादयः ६ । १ । ३
६२९	नन्वोर्विभाषा ३ । २ । १२१
५८७	न पादम्याङ्य १ । ३ । ८९
५१	न माङ्योगे ६ । ४ । ७४
५२९	नमोवरिवश्चित्रङः ३ । १ । १९
६२७	न यदि ३ । २ । ११३
६२१	न रुधः ३ । १ । ६४
३४६	न लिङि ७ । २ । ३९
४७५	न वशः ६ । १ । २०
१७२	न वृद्भ्यश्चतुर्भ्यः ७ । २ । ५९
२५१	नव्योः लिटि ६ । १ । ४६
८३	न शसददवादि ६ । ४ । ११६
३१७	नशेः षान्तस्य ८ । ४ । ३६
४०३	नाग्लोपिशास्वृ ७ । ४ । २
६३४	नानद्यतनव ३ । ३ । १३५
५६९	नानोर्ज्ञः १ । ३ । ५८
३१६	नाभ्यस्तस्याचि ७ । ३ । ८७
५८५	निगरणचलनार्थे १ । ३ । ८७
३७४	नित्यं करोतेः ६ । ४ । १०८
४७०	नित्यं कौटिल्ये ३ । १ । २३
३५	नित्यं ङितः ३ । ४ । ९९
४२९	नित्यं स्मयतेः ६ । १ । ५७
३८२	निरः कुषः ७ । २ । ४६
५६०	निसमुपविभ्यो १ । ३ । ३०
२३९	निसस्तपतावनासेव ८ । ३ । १०२
४७३	नीग्वञ्चुस्रंसु ७ । ४ । ८४
४७३	नुगतोऽनुनासि ७ । ४ । ८५
८९	नेटि ७ । २ । ४
३३९	नेट्यलिटि रधेः ७ । १ । ६२
९७	नेर्गदनदपतपद ८ । ४ । १७
५५०	नेर्विशः १ । ३ । १७
६०५	नोदात्तोपदेशस्य ७ । ३ । ३४
	प
१९६	पतः पुम् ७ । ४ । १९
६३६	परस्मिन्विभाषा ३ । ३ । १३८
१९	परस्मैपदानां ३ । ४ । ८२
९३	परिनिविभ्यः ८ । ३ । ७०
५५०	परिव्यवेभ्यः १ । ३ । १८
५८४	परेर्मृषः १ । ३ । ८२
२३९	परेश्च ८ । ३ । ७४
१८	परोक्षे लिट् ३ । २ । ११५
१९८	पाघ्राध्मास्था ७ । ३ । ७८
३०	पुगन्तलघूपधस्य ७ । ३ । ८६
५२९	पुच्छभाण्डचीवरा ३ । १ । २०
६३०	पुरि लुङ् चास्मे ३ । २ । १२२

पृष्ठम्	सूत्रम्
१६९	पुषादिद्युताद्य्लृ ३ । १ । ५५
५६९	पूर्ववत्सनः १ । ३ । ६२
२२	पूर्वोऽभ्यासः ६ । १ । ४
५५४	प्रकाशनस्थेयाख्य १ । ३ । २३
४४२	प्रजने वीयतेः ६ । १ । ५५
५६९	प्रत्याङ्भ्यां श्रुवः १ । ३ । ५९
६२९	प्रश्ने चासन्नकालि ३ । २ । ११७
१४	प्रहासे च मन्यो १ । ४ । १०६
९२	प्राक्सितादड्व्य ८ । ३ । ६३
५८४	प्राद्वहः १ । ३ । ८१
६४५	प्रैषातिसर्ग ३ । ३ । १६३
५७०	प्रोपाभ्यां युजे १ । ३ । ६४
५६४	प्रोपाभ्यां सम १ । ३ । ४२
३७८	प्वादीनां ह्रस्वः ७ । ३ । ८०
	फ
१९३	फणां च सप्तानां ६ । ४ । १२५
	ब
३४६	बभूथाततन्थ ७ । २ । ६४
५२८	बाष्पोष्मभ्या ३ । १ । १६
४३९	बिभेतेर्हेतुभये ६ । १ । ५६
५८५	बुधयुधनशजने १ । ३ । ८६
२७७	ब्रुव ईट् ७ । ३ । ९३
२७६	ब्रुवः पञ्चानामा ३ । ४ । ८४
२७७	ब्रुवो वचिः २ । ४ । ५३
	भ
६०६	भञ्जेश्च चिणि ६ । ४ । ३३
२३	भवतेरः ७ । ४ । ७३
६३५	भविष्यति मर्या ३ । ३ । १३६
५४८	भावकर्मणोः १ । ३ । १३
५६५	भासनोपसंभाषा १ । ३ । ४७
३०९	भियोऽन्यतरस्याम् ६ । ४ । ११५
४३९	भियो हेतुभये ७ । ३ । ४०
४३९	भीस्म्योर्हेतुभये १ । ३ । ६८
३०८	भीह्रीभृहुवां ३ । १ । ३९
५७०	भुजोऽनवने १ । ३ । ६६
१९	भुवो वुग्लुङ्लि ६ । ४ । ८८
६३७	भूते च ३ । ३ । १४०
४८	भूसुवोस्तिङि ७ । ३ । ८८
३१२	भृञामित् ७ । ४ । ७६
५२१	भृशादिभ्यो भु ३ । १ । १२
३५०	भ्रस्जो रोपधयो ६ । ४ । ४७
३८८	भ्राजभासभाष ७ । ४ । ३
	म
३३६	मस्जिनशोर्झलि ७ । १ । ६०
४७	माङि लुङ् ३ । ३ । १७५
२३०	मान्बधदान्शा ३ । १ । ६
३९३	मितां ह्रस्वः ६ । ४ । ९२
५८०	मिथ्योपपदात् १ । ३ । ७१
१७०	मिदेर्गुणः ७ । ३ । ८२
३२४	मीनातिमिनोति ६ । १ । ५०
४६०	मुचोऽकर्मकस्य ७ । ४ । ५७
५३०	मुण्डमिश्र ३ । १ । २१
२९३	मृजेर्वृद्धिः ७ । २ । ११४
३६	मेर्निः ३ । ४ । ८९
३६१	म्रियतेर्लुङ्लिङो १ । ३ । ६१
१३५	म्वोश्च ८ । २ । ६५
	य
४६९	यङि च ७ । ४ । ३०

पृष्ठम्	सूत्रम्
४७६	यञोऽचि च २ । ४ । ७४
४७८	यञो वा ७ । ३ । ९४
६४०	यच्चयत्रयोः ३ । ३ । १४८
६५३	यथाविध्यनुप्रयोगः ३ । ४ । ४
२११	यमरमनमातां ७ । २ । ७३
५५७	यमो गन्धने १ । २ । १५
३४०	यसोऽनुपसर्गात् ३ । १ । ७१
४६८	यस्य हलः ६ । ४ । ४९
६३०	यावत्पुरा ३ । ३ । ४
४०	यासुट् परस्मै ३ । ४ । १०३
३०४	यीवर्णयोर्दी ७ । ४ । ५३
१४	युष्मद्युपपदे १ । ४ । १०५
३७४	ये च ६ । ४ । १०८
१४६	ये विभाषा ६ । ४ । ४३
	र
२३४	रञ्जश्च ६ । ४ । २६
३३६	रधादिभ्यश्च ७ । २ । ४५
१२९	रधिजभोरचि ७ । १ । ६१
४३३	रभेरशब्लिटोः ७ । १ । ६३
४५३	रलो व्युपधाद्धलादेः १ । २ । २६
३४८	राधो हिंसायाम् ६ । ४ । १२३
५०२	राल्लोपः ६ । ४ । २१
२०५	रिङ्शयग्लिङ्क्षु ७ । ४ । २८
३१	रि च ७ । ४ । ५१
४७४	रीगृदुपधस्य च ७ । ४ । ९०
४९०	रुग्रिकौ च लुकि ७ । ४ । ९१
४४८	रुदविदमुष १ । २ । ८
२९४	रुदश्च पञ्चभ्यः ७ । ३ । ९८
२९४	रुदादिभ्यः सार्वे ७ । २ । ७६

पृष्ठम्	सूत्रम्
३६७	रुधादिभ्यः श्नम् ३ । १ । ७८
४४१	रुहः पोऽन्यतर ७ । ३ । ४३
	ल
५	लः कर्मणि च ३ । ४ । ६९
१०	लः परस्मैपदम् १ । ४ । ९९
२८६	लङः शाकटायनस्य ३ । ४ । १११
६२९	लट् स्मे ३ । २ । ११८
४३३	लभेश्च ७ । १ । ६४
९	लस्य ३ । ३ । ७७
४१	लिङः सलोपोऽ ७ । २ ७९
७१	लिङः सीयुट् ३ । ४ । १०२
४४	लिङाशिषि ३ । ४ । ११६
६४५	लिङ् च ३ । ३ । १५९
६३२	लिङ् चोर्ध्व ३ । ३ । ९
६४६	लिङ् चोर्ध्वमौ ३ । ३ । १६४
५१	लिङ्निमित्ते ३ । ३ । १३९
६४६	लिङ्यदि ३ । ३ । १६८
१२६	लिङ्सिचावात्मने १ । २ । ११
३४६	लिङ्सिचोरात्मने ७ । २ । ४२
५९	लिटस्तझयोरेशि ३ । ४ । ८१
२१	लिटि धातो ६ । १ । ८
२४९	लिटि वयो यः ६ । १ । ३८
१९	लिट् च ३ । ४ । ११५
२५७	लिट्यन्यतरस्यां २ । ४ । ४०
२४५	लिट्यभ्यासस्यो ६ । १ । १७
१५०	लिड्यङोश्च ६ । १ । २९
२५३	लिपिसिचिह्वश्च ३ । १ । ५३
६३१	लिप्स्यमानसिद्धौ ३ । ३ । ७
४२९	लियः संमानन १ । ३ । ७०

पृष्ठम्	सूत्रम्	पृष्ठम्	सूत्रम्
४३७	लीलोर्नुग्लुका ७ । ३ । ३९	२१२	वाऽन्यस्य संयो ६ । ४ । ६८
२०४	लुग्वा दुहदिह ७ । ३ । ७३	१४७	वा भ्राशभ्लाश ३ । १ । ७०
४७	लुङ् ३ । २ । ११०	२६५	वा लिटि २ । ४ । ५५
२६१	लुङि च २ । ४ । ४३	३५४	विज इट् १ । २ । २
३७	लुङ्लङ्लृङ् ६ । ४ । ७१	२८९	विदांकुर्वन्त्वि ३ । १ । ४१
२५९	लुङ्सनोर्घस्लृ २ । ४ । ३७	२८८	विदो लटो वा ३ । ४ । ८३
२९	लुटः प्रथमस्य २ । ४ । ८५	३७	विधिनिमन्त्र ३ । ३ । १६१
१७६	लुटि च १ । ३ । ९३	५५०	विपराभ्यां जेः १ । ३ । । १९
४७०	लुपसदचरजप ३ । १ । २४	६३८	विभाषा कथमि ३ । ३ । १४३
३१	लृट् शेषे च ३ । ३ । १३	६३०	विभाषा कदाकर्ह्योः ३ । ३ । ५
३४	लोटो लङ्वत् ३ । ४ । ८५	५८४	विभाषाऽकर्म १ । ३ । ८५
३२	लोट् च ३ । ३ । १६२	२११	विभाषा घ्राधेट् २ । ४ । ७८
६३१	लोडर्थलक्षणे च ३ । ३ । ८	६०६	विभाषा चिण्ण ७ । १ । ६९
४६६	लोपः पिबतेरी ७ । ४ । ४	३४५	विभाषा चेः ७ । ३ । ५८
१५६	लोपश्चास्यान्य ६ । ४ । १०७	६४३	विभाषा धातौ ३ । ३ । १५५
३१४	लोपो यि ६ । ४ । ११८	२१०	विभाषा धेट्श्व्योः ३ । १ । ४९
५२५	लोहितादिडा ३ । १ । १३	३२४	विभाषा लीयतेः ६ । १ । ५१
	व	२८२	विभाषा लुङ्लृ २ । ४ । ५०
२७८	वच उम् ७ । ४ । २०	५६६	विभाषा विप्र १ । ३ । ५०
२४६	वचिस्वपि ६ । १ । १५	४३४	विभाषा वेष्टिचे ७ । ४ । ९६
८८	वदव्रजहलन्त ७ । २ । ३	२५४	विभाषा श्वेः ६ । १ । ३०
२६०	वमोर्वा ८ । ४ । २३	६२७	विभाषा साका ३ । २ । ११४
६३२	वर्तमानसामी ३ । ३ । १३१	२३९	विभाषा सृजिद ७ । २ । ६५
४	वर्तमाने लट् ३ । २ । १२३	१४८	विभाषेटः ८ । ३ । ७९
२५०	वश्चास्यान्यतर ६ । १ । ३९	५८१	विभाषोपपदेन १ । ३ । ७७
५२५	वा क्यषः १ । ३ । ९०	५६८	विभाषोपयमने १ । २ । १६
५५७	वा गमः १ । २ । १३	२७४	विभाषोर्णोः १ । २ । ३
४४३	वा चित्तविरागे ६ । ४ । ९१	५६३	वृत्तिसर्गतायनेषु १ । ३ । ३८
१९७	वा जॄभ्रमुत्र ६ । ४ । १२४	१७२	वृद्भ्यः स्यसनोः १ । ३ । ९२

पृष्ठम्	सूत्रम्
२३०	वृतो वा ७ । २ । ३८
२६४	वेः पादविहरणे १ । ३ । ४१
५६१	वेः शब्दकर्मणः १ । ३ । ३४
२३६	वेः स्कन्देरनिष्ठायाम् ८ । ३ । ७३
३७८	वेः स्कभ्नातेर्नि ८ । ३ । ७७
२५०	वेञः ६ । १ । ४०
२४६	वेञो वयिः २ । ४ । ४१
५५८	वेत्तेर्विभाषा ७ । १ । ७
६२	वेश्च स्वनो ८ । ३ । ६६
६३७	वोताप्योः ३ । ३ । १४१
४३७	वो विधूनने जुक् ७ । ३ । ३८
५६६	व्यक्तवाचां समु १ । ३ । ४८
१७८	व्यथो लिटि ७ । ४ । ६८
५८४	व्याङ्परिभ्यो १ । ३ । ८३

श

पृष्ठम्	सूत्रम्
६४७	शकि लिङ् च ३ । ३ । १७२
२००	शदेः शितः । १ । ३ । ६०
४४१	शदेरगतौ ७ । ३ । ४२
५२८	शब्दवैरकलहा ३ । १ । १७
३३८	शमामष्टानां ७ । ३ । ७४
७६	शर्पूर्वाः खयः ७ । ४ । ६१
१६१	शल इगुपधा ३ । १ । ४५
४३५	शाच्छासाह्वा ७ । ३ । ३७
३०३	शास इदङ्हलोः ६ । ४ ३४
२४८	शासिवसि ८ । ३ । ६०
३०३	शा हौ ६ । ४ । ३५
२७०	शीङः सार्वधातुके ७ । ४ । २१
२७०	शीङो रुट् ७ । १ । ६
३११	शृदॄप्रां ह्रस्वो वा ७ । ४ । १२
३६५	शे मुचादीनाम् ७ । १ । ५६
१२	शेषात्कर्तरि १ । ३ । ७८
१५	शेषे प्रथमः १ । ४ । १०८
६४१	शेषे लृडयदौ ३ । ३ । १५१
५३	शेषे विभाषाऽक ८ । ४ । १८
२६१	श्नसोरल्लोपः ६ । ४ । १११
३६८	श्नान्न लोपः ६ । ४ । २३
३००	श्नाभ्यस्तयोरातः ६ । ४ । ११२
२२२	श्रुवः शृ च ३ । १ । ७४
२१७	श्र्युकः किति ७ । २ । ११
३३३	श्लिष आलिङ्गने ३ । १ । ४६
३०८	श्लौ ६ । १ । १०
२५५	श्वयतेरः ७ । ४ । १८

ष

पृष्ठम्	सूत्रम्
१४७	ष्ठिवुक्लम्वाचमां ७ । ३ । ७५

स

पृष्ठम्	सूत्रम्
१६७	सः स्यार्धधातुके ७ । ४ । ४६
४६५	सः स्विदि ८ । ३ । ६२
३४०	संयसश्च ३ । १ । ७२
३८५	सत्यापपाश ३ । १ । २५
६१	सदिरप्रतेः ८ । ३ । ६६
१६६	सदेः परस्य लिटि ८ । ३ । ११८
१३०	सनाद्यन्ता धातवः ३ । १ । ३२
४४६	सनि ग्रहगुहोश्च ७ । २ । १२
४५२	सनि च २ । ४ । ४७
४५६	सनि मीमाघुर ७ । ४ । ५४
४५४	सनीवन्तर्ध ७ । २ । ४६
२३१	सन्यङोः ६ । १ । ६
१४०	सन्यतः ७ । ४ । ७६

पृष्ठम्	सूत्रम्
१५४	सन्लिटोर्जेः ७ । ३ । ५७
१३६	सन्वल्लघुनि चङ् ७ । ४ । ९३
५७०	समः क्ष्णुवः १ । ३ । ६५
५६७	समः प्रतिज्ञाने १ । ३ । ५२
५५३	समवप्रविभ्यः १ । ३ । २२
३७५	समवाये च ६ । १ । १३८
५६७	समस्तृतीयायुक्तात् १ । ३ । ५४
६५२	समुच्चयेऽन्य ३ । ४ । ३
६५२	समुच्चये सामान्य ३ । ४ । ५
५८१	समुदाङ्भ्यो १ । ३ । ७५
५५७	समोगम्यृच्छि १ । ३ । २९
३७५	संपरिभ्यां करो ६ । १ । १३७
५६५	संप्रतिभ्यामनाध्या १ । ३ । ४६
६४२	संभावनेऽलमि ३ । ३ । १५४
५६२	संमाननोत्संज १ । ३ । ३६
२१८	सर्तिशास्त्यर्ति ३ । १ । ५६
६६	सवाभ्यां वामौ ३ । ४ । ९१
१९८	सहिवहोरोद ६ । ३ । ११२
५५	सार्वधातुकमपित् १ । २ । ४
१६	सार्वधातुकार्ध ७ । ३ । ८४
५८८	सार्वधातुके यक् ३ । १ । ६७
२३०	सिचि च पर ७ । २ । ४०
११८	सिचि वृद्धिः पर ७ । २ । १
४७१	सिचो यङि ८ । ३ । ११२
५०	सिजभ्यस्तविदि ३ । ४ । १०९
४४१	सिध्यतेरपारलौ ६ । १ । ४९
३०३	सिपि धातो रुर्वा ८ । २ । ७४
१६८	सिवादीनां वाड् ८ । ३ । ७१
५२९	सुखादिभ्यः कर्तृ ३ । १ । १८
३७५	सुट्कात्पूर्वः ६ । १ । १३५
४१	सुट् तिथोः ३ । ४ । १०७
३४४	सुनोतेः स्यसनोः ८ । ३ । ११७
५०५	सुप आत्मनः क्यच् ३ । १ । ८
२९५	सुविनिर्दुर्भ्यः ८ । ३ । ८८
२४०	सृजिदृशोर्झल्यम ६ । १ । ५८
९४	सेधतेर्गतौ ८ । ३ । ११३
३५	सेर्ह्यपिच्च ३ । ४ । ८७
३२२	सेऽसिचिकृत ७ । २ । ५७
१९८	सोढः ८ । ३ । ११५
३७७	स्तन्भुस्तुन्भु ३ । १ । ८२
९१	स्तन्भेः ८ । ३ । ६७
४३०	स्तम्भुसिवुसहां ८ । ३ । ११६
३२१	स्तुसुधूञ्भ्यः ७ । २ । ७२
४६४	स्तौतिण्योरेव ८ । ३ । ६१
२२८	स्थाध्वोरिच्च १ । २ । १७
९३	स्थादिष्वभ्यासेन ८ । ३ । ६४
१४७	स्नुक्रमोरनात्मने ७ । २ । ३६
५६०	स्पर्धायामाङः १ । ३ । ३१
४४१	स्फायो वः ७ । ३ । ४१
३६०	स्फुरतिस्फुलत्योर्नि ८ । ३ । ७६
४६१	स्मिपूङ्रञ्ज्वशां ७ । २ । ७४
६४६	स्मे लोट् ३ । ३ । १६५
४७	स्मोत्तरे लङ् च ३ । ३ । १७६
२६	स्यतासी लृलुटोः ३ । १ । ३३
५६२	स्यसिच्सीयुट् ६ । ४ । ६२
४२७	स्रवतिश्रृणोति ७ । ४ । ८१
४७४	स्वपिस्यमिव्येञां ६ । १ । १९
९४	स्वरतिसूति ७ । २ । ४४

पृष्ठम्	सूत्रम्
११	स्वरितञितः १ । ३ । ७२
३४३	स्वादिभ्यः श्नुः ३ । १ । ७३
४३५	स्वापेश्चङि ६ । १ । १८
	ह
६८	ह एति ७ । ४ । ५२
५५७	हनः सिच् १ । २ । १४
४१६	हनस्तोऽचिण्णलोः ७ । ३ । ३२
२६१	हनो वध लिङि २ । ४ । ४२
२६१	हन्तेर्जः ६ । ४ । ३६
३७८	हलः श्नः ३ । १ । ८३
४५१	हलन्ताच्च १ । २ । १०
२२	हलादिः शेषः ७ । ४ । ६०
६२६	हशश्वतोर्लङ् च ३ । २ । ११६
३६२	हिंसायां प्रतेश्च ६ । १ । १४१
२४७	हिनुमीना ८ । ४ । १५
२५८	हुझल्भ्यो हेर्धिः ६ । ४ । १०१
२ २	हुश्नुवोः सार्वधा ६ । ४ । ८७
४२५	हेतुमति च ३ । १ । २६
६४३	हेतुहेतुमतोर्लिङ् ३ । ३ । १५६
३४७	ह्रेरचङि ७ । ३ । ५६
१२२	ह्म्यन्तक्षणश्वस ७ । २ । ५
२२	ह्रस्वः ७ । ४ । ५६
२०२	ह्रस्वादङ्गात् ८ । २ । २७
४३५	ह्वः संप्रसारणम् ६ । १ । ३२

भ्वादिप्रभृतिलकारार्थप्रकरणान्तवार्तिकसूचिका

वार्तिकम्	सूत्रम्
अ	
अड्भ्यासव्यवायेऽपि	२५५३
अत्यन्तापह्नवे	२७७५
अदेः प्रतिषेधः	२७५३
अधिकरणाच्चेति वक्त	२६६४
अनाचमिकमि	२७६३
अन्तःशब्दस्याङ्कि	२२३१
अर्तिश्रुदृशिभ्य	२७०१
अर्थवेदयोरप्या	२६७७
अश्ववृषयोर्मै	२६६२
आ	
आख्यानात्कृत	२५७३
आगमेः क्षमा	२६८७
आङः प्रतिज्ञायामुप	२६८६
आङि चम इति	२३२०
आङि नुप्रच्छ्योः	२६८८
आचारेऽवगल्भ	२६६५
आदिखाद्योर्न	२७५३
आशङ्कायां सन्व	२६२२
आशिषि नाथः	२२५६, २६८७
इ	
इण्वदिकः	२४६२, २६०७, २६१५
इण्वोर्त्वाभ्यां	२३६०
इर इत्संज्ञा वाच्या	२२६८
इषेस्तकारे श्यन्प्रत्यया	२५६०
ई	
ईर्ष्यतेस्तृतीयस्येति	२६०७, २६०८

वार्तिकम्	सूत्रम्
ईहायामेव	२६६१
उ	
उपसर्गादस्यत्यू	२७०१
उपाद्देवपूजा	२६६२
उस्योमाङ्क्ष्वाटः	२६६७
ऊ	
ऊर्णोतेराम्नेति	२४४५
ऋ	
ऋदुपधेभ्यो लिटः	२२८६, २३३५
ओ	
ओजसोऽप्सरसो	२६६५
क	
कण्ड्वादेस्तृतीय	२६७८
कमेश्च्लेश्चङ् वक्तव्यः	२३१८
कास्यादीनां चेति	२५८३
कितेर्व्याधिप्रतीकारे	२३६४
किरतेर्हर्षजीविका	२६८७
कृञोऽसुट	२५५३
क्ङिति रमागमं	२५३५
क्ङ्यजादौ	२४७३
क्रियासमभिहारे	२८२८
क्षीरलवणयोर्लालसायाम्	२६६२
ग	
गुपेर्निन्दायाम्	२३६४
च	
चयो द्वितीयाः	२४३७
चीवरादर्जने	२६७६
ज	
ज्योतिरुद्गमने	२७१३
ण	
णिश्रन्थिग्रन्थि	२७७१
ण्यल्लोपावियङ्	२३१३
त	
तनिपतिदरिद्रा	२६२१
तपसः परस्मै	२६७१
तिजेः क्षमायाम्	२३६४
द	
दम्भेश्च	२५३३
दरिद्रातेरार्धधातुके	२४८३
दानेरार्जवे	२३६४
दुरः षत्वणत्वयोः	२२३१
दुहिपच्योर्बहुलम्	२७६६
ध	
धूञ्प्रीञोर्नुग्वक्तव्यः	२५७२
धेट उपसंख्यानम्	२७५५
प	
परस्परोप	२६८२
पराङ्गकर्मका	२६८६
पातेर्णौ लुग्वक्तव्यः	२५८६
पुच्छादुदसने	२६७६
प्रतिषेधे हसादीना	२६८१
प्रलम्भशाभि	२५६१
फ	
फेनोच्चति	२६७२
ब	
बधेश्चित्तविकारे	२३६४
भ	
भविष्यत्येवेष्यते	२८१३

वार्तिकम्	सूत्रम्
भाण्डात्समाचयने	२६७६
भूषाकर्मकिरादिसनां	२७६९
म	
मस्जेरन्त्यात्पूर्वो	२५४१
मानेर्जिज्ञासायाम्	२३९४
मान्तप्रकृतिक	२६६०
य	
यदाययोरुपसं	२८०४
र	
रञ्जेर्णौ मृगरमणे	२६०५
राधो हिंसायां	२६२३
रीगृत्वत इति	२६४५
ल	
लुङि वा	२४८३
लोहितडाज्भ्यः	२६६९
व	
वर्जने कशाम्	२४३८
वलादावार्धधातुके	२२९२
वस्त्रात्समाच्छादने	२६७७
वा लिप्सायामिति	२६९२
विदिप्रच्छिस्वरतीनामु	२७००
वुग्युटावुवङ्य	२१८३, २५०७
व्रताद्भोजनतन्निवृत्त्योः	२६७७
श	
शाप उपालम्भे	२६८८
शस्य यो वा	२४३७
शानेर्निशाने	२३९४
शिक्षेर्जिज्ञासायाम्	२६८७
शीलिकामिभक्षा	२९१३
श्वयतेर्लिटथ	२४१०
स	
सकर्मकाणां प्रतिषेधो	२७६६
सत्रकक्षकष्टकृच्छ्र	२६७०
समोऽकूजने	२६८७
सर्वप्रातिपदिकानां क्यचि	२६६२
सर्वप्रातिपदिकेभ्यः	२६६५
संस्थानत्वं नमः	२४६३
सिज्लोप एकादेशे	२२६६
सुडपि हर्षादिष्वेव	२६८८
सुदिनदुर्दिन	२६७३
सुब्धातुष्ठिवु	२२८९
सूचिसूत्रिमूत्र्य	२६३०
सृजियज्योः श्यंस्तु	२७६१
सृजेः श्रद्धोपपन्ने	२७६९
स्पृशमृश	२४०७
स्वञ्जेरुपसंख्यानम्	२३९७
स्वरदीर्घयलोपेषु	२२९२
स्वराद्यन्तोपसर्गा	२७३५
स्वाङ्गकर्मकाच्चेति	२६९४
ह	
हनुचलने इति	२६७१
हन्तेर्हिंसायां	२६४३
हरतेरप्रतिषेधः	२६८१
हरतेर्गताच्छील्ये	२६८७
हलिकल्योरदन्तत्वं	२६७७
हल्यादिभ्यो ग्रहणे	२६७७
हेतुमण्णिश्रि	२७७१

भ्वादिप्रभृतिलकारार्थप्रकरणान्तपरिभाषासूचिका ।

परिभाषा	सूत्रम्
६८ अनुदात्तेत्त्वलक्षणं	२३२६, २४३५, २५१३
३८ एकदेशविकृतमनन्य	२४४०
१० कार्यमनुभवन्हि कार्यी	२६२१
६१ पुरस्तादपवादा	२५१४
१२७ पूर्वत्रासिद्धीयमद्वित्वे	२४४६, २४७७, २६७७
१०२ प्रकृतिग्रहणे यङ्लुग	२६५१
११५ लक्षणप्रतिपदो	२३५३
९२ लुग्विकरणालुग्विकर	२३५३
५६ वार्णादाङ्गं बलीयः	२२९०, २३८७
१३२ श्तिपा शपानुबन्धेन	२२४६, २६५०, २६५१
९५ संज्ञापूर्वकविधे	२५४७
४० सकृद्गतौ	२४७१
१२९ संप्रसारणं तदाश्रयं	२५७९
१११ सामान्यातिदेशे	२७९०

अकाराद्यनुक्रमेण धातुसूचिका ।

धातुः	गणः
अ	
७९२ अक	भ्वा० प० से०
८७ अकि	,, आ० ,,
६५४ अक्षू	,, प० वे०
७९३ अग	,, ,, से०
१४६ अगि	,, ,, ,,
१०९ अघि	,, आ ,,
१९२७ अङ्क	चु० उ० ,,
१९२८ अङ्ग	,, ,, ,,
८६२ अचि (पा०)	भ्वा० ,, ,,
८६२ अचु (पा०)	,, ,, ,,
२३० अज	,, प० ,,
१७८६ अजि	चु० उ० ,,
२९५ अट	भ्वा० प० से०
२५४ अट्ट	,, आ० ,,
१५६१ अट्ट	चु० उ० ,,
२६१ अठि	भ्वा० आ० ,,
३५८ अड	,, प० ,,
३४८ अड्ड	,, ,, ,,
४४४ अण	,, ,, ,,
११७९ अण	दि० आ० ,,
३८ अत	भ्वा० प० ,,
६१ अति	,, ,, ,,
१०११ अद	,, अ०
६२ अदि	,, से०
१०७० अन	,, ,,
११७५ अन (पा०)	दि० आ० से०
१८८ अन्चु	भ्वा० प० ,,
८६२ अन्चु	,, उ० ,,
१७३९ अन्चु	चु० ,, ,,

धातुः	गणः		
१४५८ अन्जू	रु०	प०	वे०
१६२५ अन्ध	चु०	उ०	से०
३७८ अबि	भ्वा०	आ०	,,
३८५ अभि (पा०)	,,	,,	,,
५५६ अभ्र	भ्वा०	प०	,,
४६५ अम	,,	,,	,,
१७२१ अम	चु०	उ०	,,
४७४ अय	भ्वा०	आ०	,,
१६४४ अर्क	चु०	उ०	,,
२०४ अर्च	भ्वा०	प०	,,
१८०१ अर्च	चु०	उ०	,,
२२४ अर्ज	भ्वा०	प०	,,
१७२६ अर्ज	चु०	उ०	,,
१६०५ अर्थ	,,	आ०	,,
५५ अर्द	भ्वा०	प०	,,
१८२६ अर्द	चु०	उ०	,,
४१५ अर्ब	भ्वा०	प०	,,
५८४ अर्व	,,	,,	,,
७४० अर्ह	,,	,,	,,
१७३२ अर्ह	चु०	उ०	,,
१८३१ अर्ह	चु०	उ०	,,
५१५ अल	भ्वा०	प०	,,
५१५ अल (पा०)	भ्वा०	उ०	,,
६०० अव	,,	प०	,,
१५२३ अश	क्र्या०	प०	,,
१२६४ अशू	स्वा०	आ०	वे०
८८६ अष (पा०)	भ्वा०	उ०	से०
८८६ अस	,,	,,	,,
१०६५ अस	अ०	प०	,,

धातुः	गणः		
१६१८ अंस	चु०	उ०	,,
१२०६ असु	दि०	प०	से
१२७२ अह	स्वा०	,,	,,
६३५ अहि	भ्वा०	आ०	,,
१७६८ अहि	चु०	उ०	,,
आ			
२०६ आछि	भ्वा०	प०	,,
१२६० आप्लृ	स्वा०	,,	अ०
१८४० आप्लृ	चु०	उ०	,,
१०२१ आस	अ०	आ०	,,
इ			
१०४७ इक्	अ०	प०	अ०
१४० इख	भ्वा०	,,	से०
१४१ इखि	,,	,,	,,
१४३ इगि	,,	,,	,,
१०४६ इङ्	अ०	आ०	अ०
३१८ इट	भ्वा०	प०	से०
१०४५ इण्	अ०	,,	अ०
६३ इदि	भ्वा०	,,	से०
१४४८ (ञि) इन्धी	रु०	आ०	,,
१३५७ इल	तु०	प०	,,
१६६१ इल	चु०	उ०	,,
५८७ इवि	भ्वा०	प०	,,
११२७ इष	दि०	,,	,,
१३५१ इष	तु०	,,	,,
१५२५ इष	क्र्या०	,,	,,
ई			
६१० ईक्ष	भ्वा०	आ०	,,
१४२ ईखि	,,	प०	,,

धातुः	गणः
११४३ ईङ्	दि० आ० अ०
१८२ ईज	भ्वा० ,, से०
१०१६ ईज	अ० ,, ,,
१६६८ ईड	चु० उ० ,,
१०१८ ईर	अ० आ० ,,
१८११ ईर	चु० उ० ,,
५१० ईर्क्ष्य	भ्वा० प० से०
५११ ईर्ष्य	,, ,, ,,
१०२० ईश	अ० आ० ,,
६११ ईष	भ्वा० ,, ,,
६८४ ईष	,, प० ,,
६३२ ईह	,, आ० ,,
उ	
६५७ उक्ष	भ्वा० प० ,,
१२८ उख	भ्वा० प० ,,
१२८ उखि	,, ,, ,,
६५३ उङ्	,, आ० अ०
१२२३ उच	दि० प० से०
२१५ उछि	भ्वा० ,, ,,
१२६४ उछि	तु० ,, ,,
२१६ उछी	भ्वा० ,, ,,
१२६५ उछी	तु० ,, ,,
१३०४ उज्झ	,, ,, ,,
३३८ उठ	भ्वा० ,, ,,
१५२४ उध्रस (पा०)	क्र्या० प० ,,
१७४३ उध्रस (पा०)	चु० उ० ,,
१४५७ उन्दी	रु० प० ,,
१३२० उम्भ	तु० ,, ,,

धातुः	गणः
१३०३ उब्ज	,, ,, ,,
१३१९ उभ	,, ,, ,,
२० उर्द	भ्वा० आ० ,,
५६६ उर्वी	,, प० ,,
१५४२ उलडि (पा)	चु० उ० ,,
६६६ उष	भ्वा० प० ,,
७३६ उहिर्	,, ,, ,,
ऊ	
३३८ ऊठ (पा०)	,, ,, ,,
१८८६ ऊन	चु० उ० ,,
४८३ ऊयी	भ्वा० आ० ,,
१५४६ ऊर्ज	चु० उ० से०
१०३६ ऊर्णुञ्	अ० उ० ,,
६८३ ऊष	भ्वा० प० ,,
६४८ ऊह	,, आ० ,,
ऋ	
९३६ ऋ	भ्वा० प० अ०
१०९८ ऋ	जु० ,, ,,
१३०२ ऋच	तु० ,, से०
१२९६ ऋच्छ	,, ,, ,,
१७६ ऋज	भ्वा० आ० ,,
१७७ ऋजि	,, ,, ,,
१४६७ ऋणु	त० उ० ,,
१२४५ ऋधु	दि० प० ,,
१२७१ ऋधु	स्वा० ,, ,,
१३१६ ऋन्फ	तु० ,, ,,
१३१५ ऋफ	,, ,, ,,
१२८७ ऋषी	,, ,, ,,

धातुः	गणः		
ऋ			
१४९७ ॠ	क्र्या०	„	„
ए			
१७६ एजृ	भ्वा०	आ०	„
२३४ एजृ	„	प०	„
२६७ एठ	„	आ०	„
२ एध	„	„	„
६१८ एपृ	„	„	„
ओ			
१२१ ओखृ	„	प०	„
४५४ ओणृ	„	„	„
१५४२ ओलडि	चु०	उ०	„
क			
९० कक	भ्वा०	आ०	„
९४ ककि	„	„	„
१२० कख	„	प०	„
७८४ कखे	„	„	„
७९१ कगे	भ्वा०	प०	से०
१६८ कच	„	आ०	„
१६९ कचि	„	„	„
३२० कटी	„	प०	„
२९४ कटे	„	„	„
३३३ कठ	„	„	„
२६४ कठि	„	आ०	„
१८४८ कठि	चु०	उ०	„
३६० कड	भ्वा०	प०	„
१३८० कड	तु०	„	„
२८२ कडि	भ्वा०	आ०	„

धातुः	गणः		
३६० कडि (पा०)	„	प०	„
१५८२ कडि	चु०	उ०	„
३४९ कड्ड	भ्वा०	प०	„
४४९ कण	„	„	„
७९४ कण	„	„	„
१७१६ कण	चु०	उ०	„
३७ कत्थ	भ्वा०	आ०	„
१९१५ कत्र	चु०	उ०	„
१८५२ कथ	„	„	„
७० कदि	भ्वा०	प०	„
७७२ कदि	„	आ०	„
४६० कनी	„	प०	„
३७५ कपि	„	आ०	„
३८० कबृ	„	„	„
४४३ कमु	„	„	„
२२८ कर्ज	„	प०	„
१९२४ कर्ण (पा०)	चु०	उ०	„
१९१५ कर्त (पा०)	„	„	„
५९ कर्द	भ्वा०	प०	„
४२० कर्ब	„	„	„
५८१ कर्व	„	„	„
४९७ कल	„	आ०	„
१६०४ कल	चु०	उ०	„
१८६६ कल	चु०	उ०	से०
४९८ कल्ल	भ्वा०	आ०	„
१०२४ कश (पा०)	अ०	„	„
६८५ कष	भ्वा०	प०	„
८६० कस	„	„	„

	धातुः			गणः
१०२४	कस (पा०)	अ०	आ०	,,
१०२४	कसि	,,	,,	,,
६६७	काक्षि	भ्वा०	प०	,,
१७०	काचि	,,	आ०	,,
१८८१	काल (पा०)	चु०	उ०	,,
६४७	काशृ	भ्वा०	आ०	,,
११६२	काशृ	दि०	,,	,,
६२३	कासृ	भ्वा०	,,	,,
११०१	कि	जु०	प०	अ०
३०१	किट	भ्वा०	,,	से०
३१९	किट	,,	,,	,,
९९३	कित	,,	,,	,,
१३५३	किल	तु०	,,	,,
१६४१	कीट	चु०	उ०	,,
५२४	कील	भ्वा०	प०	,,
१०४२	कु	अ०	प०	अ०
९१	कुक	भ्वा०	आ०	से०
९५१	कुङ्	,,	,,	अ०
१४०१	कुङ्	तु	,,	,,
१८४	कुच	भ्वा०	प०	से०
८५७	कुच	,,	,,	,,
१३६८	कुच	तु०	,,	,,
१९९	कुजु	भ्वा०	,,	,,
१३६६	कुट	तु०	,,	,,
१६९९	कुट (पा०)	चु०	आ०	,,
१६७९	कुटुम्ब (पा)	चु०	आ०	,,
१५५८	कुट्ट	,,	उ०	,,
१७०३	कुट्ट	,,	आ०	,,

	धातुः			गणः
३४२	कुठि	भ्वा०	प०	,,
१५८४	कुठि (पा०)	चु०	उ०	से०
१३८३	कुड	तु०	प०	,,
३२२	कुडि	भ्वा०	,,	,,
१५८३	कुडि	चु०	उ०	,,
२७०	कुडि	भ्वा०	आ०	,,
१३३५	कुण	तु०	प०	,,
१८९४	कुण	चु०	उ०	,,
१६९८	कुत्स	,,	आ०	,,
१११८	कुथ	दि०	प०	,,
१५१४	कुथ (पा०)	क्र्या०	,,	,,
४३	कुथि	भ्वा०	,,	,,
१५३९	कुद्रि	चु०	उ०	,,
१८५	कुन्च	,,	,,	,,
१५१५	कुन्थ	क्र्या०	,,	,,
१२३३	कुप	दि०	,,	,,
१७८०	कुप	चु०	,,	,,
४२६	कुबि	भ्वा०	प०	,,
१६५६	कुबि	चु०	उ०	,,
१६५६	कुभि (पा०)	,,	,,	,,
१८७८	कुमार	,,	,,	,,
१३४१	कुर	तु०	प०	,,
२१	कुर्द	भ्वा०	आ०	,,
८४२	कुल	,,	प०	,,
१७६६	कुशि	चु०	उ०	,,
१५१८	कुष	क्र्या०	प०	,,
१२१८	कुस	दि०	प०	से०
१७६४	कुसि	चु०	उ०	,,

धातुः			गणः
१७१२ कुस्म	,,	आ०	,,
१६०१ कुह	,,	,,	,,
१४०१ कूङ् (पा)	तु०	प०	,,
२२३ कूज	भ्वा०	प०	,,
१७०२ कूट	चु०	आ०	,,
१८६१ कूट	,,	उ०	,,
१६८६ कूण	,,	आ०	,,
१८६६ कूण	चु०	उ०	से०
५२५ कूल	भ्वा०	प०	,,
१२५३ कृञ्	स्वा०	उ०	अ०
१४७२ (डु) कृञ्	त०	,,	,,
१३८२ कृड	तु०	प०	से०
१४३५ कृती	,,	,,	,,
१४४८ कृती	रु०	,,	,,
१८७० कृप	चु०	उ०	,,
१७४६ कृपिः	चु०	,,	,,
७६२ कृपू	भ्वा०	आ०	वे०
५६८ कृवि	,,	प०	से०
१२२७ कृश	दि०	,,	,,
६६० कृष	भ्वा०	,,	अ०
१२८६ कृष	तु०	उ०	,,
१४०६ कॄ	,,	प०	से०
१४६६ कॄ	क्रया०	,,	,,
१४८५ कॄञ्	,,	उ०	,,
१६५४ कॄत	चु०	,,	,,
१८६२ केत (पा)	,,	,,	,,
३६८ केपृ	भ्वा०	आ०	,,
५३७ केलृ	,,	प०	,,

धातुः			गणः
६१६ कै	,,	,,	अ०
८०० क्नथ	,,	,,	से०
११११ क्नसु	दि०	,,	,,
१४८० क्नूञ्	क्रया०	उ०	,,
४८५ क्नूयी	भ्वा०	आ०	,,
५५५ क्मर	,,	प०	,,
८०१ क्रथ	,,	,,	,,
७७३ क्रद (पा०)	,,	आ०	,,
७१ क्रदि	भ्वा०	प०	,,
७७३ क्रदि	चु०	आ०	,,
१७२८ (आङः) क्रन्द	चु०	उ०	,,
७७१ क्रप	भ्वा०	आ०	,,
४७३ क्रमु	,,	प०	,,
१४७३ (डु) क्रीञ्	क्रया०	उ०	अ०
३५० क्रीडृ	भ्वा०	प०	से०
१३६४ क्रुड	तु०	,,	,,
११८६ क्रुध	दि०	,,	अ०
१८६ क्रुञ्च	भ्वा०	,,	से०
८५६ क्रुश	,,	,,	अ०
८०२ क्लथ	,,	,,	से०
७७४ क्लद (पा०)	,,	आ०	,,
७२ क्लदि	भ्वा०	प०	,,
७७४ क्लदि	,,	आ०	,,
१६५६ क्लप (पा०)	चु०	उ०	,,
१२०७ क्लमु	दि०	प०	,,
१५ क्लिदि	भ्वा०	आ०	,,
७३ क्लिदि	,,	प०	,,
१२४२ क्लिदू	दि०	,,	वे०

धातुः	गणः		
११६१ क्लिश	,,	आ०	से०
१५२२ क्लिशू	क्रया०	प०	वे०
३८१ क्लीबृ	भ्वा०	आ०	से०
६५८ क्लुङ् (पा०)	,,	,,	अ०
५०६ क्लेवृ (पा०)	,,	,,	से०
६०७ क्लेश	,,	,,	,,
४५० क्वण	,,	प०	,,
८४६ क्वथे	,,	,,	,,
७६६ क्षजि	,,	आ०	,,
१४६५ क्षणु	त०	उ०	,,
८१६ क्षपिः (पा०)	भ्वा०	प०	,,
१६२१ क्षपि	चु०	उ०	,,
१२०६ क्षमू	दि०	प०	वे०
४४२ क्षमूष्	भ्वा०	आ०	,,
८५१ क्षर	,,	प०	से०
१५६७ क्षल	चु०	उ०	,,
२३६ क्षि	भ्वा०	प०	अ०
१२७६ क्षि	स्वा०	प०	,,
१४०७ क्षि	तु०	,,	,,
२३७ क्षिज	भ्वा०	प०	से०
१४६६ क्षिणु	त०	उ०	से०
११२१ क्षिप	दि०	प०	अ०
१२८५ क्षिप	तु०	उ०	,,
१६४१ क्षिप	चु०	,,	से०
३८२ क्षीबृ	भ्वा०	आ०	,,
५६७ क्षीवु	,,	प०	,,
१५०६ क्षीष्	क्र्या०	,,	अ०
१०३६ (टु) क्षु	अ०	,,	से०

धातुः	गणः		
१४४३ क्षुदिर्	रु०	उ०	अ०
११६० क्षुध	दि०	प०	,,
७५१ क्षुभ	भ्वा०	आ०	से०
१२३६ क्षुभ	दि०	प०	,,
१५१६ क्षुभ	क्रया०	,,	,,
१३४४ क्षुर	तु०	,,	,,
५६८ क्षेवु	भ्वा०	,,	,,
६१३ क्षै	,,	,,	अ०
१८७६ क्षोट	चु०	उ०	से०
१०३७ क्ष्णु	अ०	प०	,,
४८६ क्ष्मायी	भ्वा०	आ०	,,
५२० क्ष्मील	,,	प०	,,
७४४ (ञि)क्ष्विदा(पा०)	भ्वा०	आ०	,,
११४४ (ञि) क्ष्विदा	दि०	प०	,,
५३६ क्ष्वेलृ	भ्वा०	प०	,,
ख			
१५३१ खच	क्रया	,,	,,
२३२ खज	भ्वा०	,,	,,
२३३ खजि	,,	,,	,,
३०६ खट	,,	,,	,,
१६३३ खट्ट	चु०	उ०	,,
१५८० खड	,,	,,	,,
२८३ खडि	भ्वा०	आ०	,,
१५८१ खडि	चु०	उ०	,,
५० खद	भ्वा०	प०	,,
८७८ खनु	भ्वा०	उ०	से०
२२६ खर्ज	,,	प०	,,
६० खर्द	,,	,,	,,

धातुः			गणः
४२१ खर्ब	,,	,,	,,
५८२ खर्व	,,	,,	,,
५४५ खल	,,	,,	,,
११५३ खव (पा०)	क्र्या०	,,	,,
६८६ खष	भ्वा.	,,	,,
४६ खाद	,,	,,	,,
३०२ खिट	,,	,,	,,
११७० खिद	दि.	आ.	अ.
१४३६ खिद	तु.	प.	से.
१४४९ खिद	रु.	आ.	अ.
९५४ खुङ् (पा.)	भ्वा	,,	,,
२०० खुजु	,,	प.	से.
१३८७ खुड (पा.)	तु.	,,	,,
१५८५ खुडि	चु.	उ.	,,
१३४२ खुर	तु.	प.	,,
२२ खुर्द	भ्वा.	आ.	,,
१८७५ खेट	चु.	उ.	,,
१८७५ खेड (पा.)	,,	,,	,,
५३८ खेलृ	भ्वा.	प.	,,
५०६ खेवृ (पा.)	,,	आ.	,,
९१२ खै	,,	प.	अ.
१८७५ खोड (पा.)	चु.	उ.	से.
५५२ खोर्ऋ	भ्वा.	प.	,,
५५१ खोलृ	,,	,,	,,
१०६० ख्या	अ.	,,	अ.
ग			
२४६ गज	भ्वा.	,,	से.
१६४८ गज	चु.	उ.	,,
२४७ गजि	भ्वा.	प.	,,

धातुः			गणः
७७७ गड	,,	,,	,,
६५ गडि	,,	,,	,,
३६१ गडि	भ्वा.	प.	से.
१८५४ गण	चु.	उ.	,,
५२ गद	भ्वा.	प.	,,
१८६१ गदी	चु.	उ.	,,
१६८५ गन्ध	चु.	आ.	,,
९८२ गम्लृ	भ्वा.	प.	अ.
२२६ गर्ज	,,	,,	से.
१६६५ गर्ज (पा.)	चु.	उ.	से.
५७ गर्द	भ्वा.	प.	,,
१६६५ गर्द (पा.)	चु.	उ.	,,
१६६५ गर्ध (पा.)	,,	,,	,,
४२२ गर्ब	भ्वा.	प.	,,
५८३ गर्व	,,	,,	,,
१९०७ गर्व	चु.	आ.	,,
६३६ गर्ह	भ्वा.	,,	,,
१८४६ गर्ह	चु.	उ.	,,
५४६ गल	भ्वा.	प.	,,
१७०० गल	चु.	आ.	,,
३९२ गल्भ	भ्वा.	,,	,,
६३७ गल्ह	,,	,,	,,
१८८४ गवेष	चु.	उ.	,,
११०६ गा	जु.	प.	अ.
९५० गाङ्	भ्वा.	आ.	,,
४ गाधृ	,,	,,	से.
६४९ गाहू	,,	,,	वे.
१३९९ गु	तु.	प.	अ.
९४९ गुङ्	भ्वा.	आ.	अ.

धातुः	गणः
१३६६ गुज	तु. प. से.
२०३ गुजि	भ्वा. ” ”
१५८४ गुठि (पा.)	चु. उ. ”
१३७० गुड	तु. प. ”
१५८४ गुडि	चु. उ. ”
१८६५ गुण	” ” ”
२४ गुद	भ्वा. आ. ”
११२० गुध	दि. प. से.
१५१७ गुध	क्र्या. ” ”
१३१८ गुन्फ	तु. ” ”
९७० गुप	भ्वा. आ. ”
१२३४ गुप	दि. प. ”
१७७२ गुप	चु. उ. ”
३९५ गुपू	भ्वा. प. वे.
१३१७ गुफ	तु. ” से.
१३९६ गुरी	” आ. ”
२३ गुर्द	भ्वा. ” ”
१६६६ गुर्द	चु. उ. ”
५७४ गुर्वी	भ्वा. प. ”
८९६ गुहू	भ्वा. उ. वे.
१६९५ गूर	चु. आ. से.
११५४ गूरी	दि. ” ”
९३७ गृ	भ्वा. प. अ.
१७०८ गृ	चु. आ. से.
२४८ गृज	भ्वा. प. ”
२४९ गृजि	” ” ”
१२४६ गृधु	दि. ” ”
१८९९ गृह	चु. आ. ”
६५० गृहू	भ्वा. आ. वे.

धातुः	गणः
१४१० गॄ	तु. प. से.
१४९८ गॄ	क्र्या. ” ”
३६९ गेपृ	भ्वा. आ. ”
५०२ गेवृ	” ” ”
६१४ गेषृ	” ” ”
९१७ गै	भ्वा. प. अ.
१८७७ गोम	चु. उ. से.
२५७ गोष्ट	भ्वा. आ. ”
३६ ग्रथि	” ” ”
१५१३ ग्रन्थ	क्र्या. प. ”
१८२६ ग्रन्थ	चु. उ. ”
१८३९ ग्रन्थ	” ” ”
१७५० ग्रस	चु. उ. से.
६३० ग्रसु	भ्वा. आ. ”
१५३३ ग्रह	क्र्या. उ. ”
१८९३ ग्राम	चु. ” ”
१९७ ग्रुचु	भ्वा. प. ”
६३१ ग्लसु	” आ. ”
६५१ ग्लह	” ” ”
१९८ ग्लुचु	” प. ”
२०१ ग्लुन्चु	” ” ”
३६६ ग्लेपृ	” आ. ”
३७० ग्लेपृ	” ” ”
५०३ ग्लेवृ	” ” ”
६१४ ग्लेषृ (पा.)	” ” ”
९०३ ग्लै	” प. अ.
घ	
१५९ घघ	” ” से.

धातुः	गणः
७६३ घट	भ्वा. आ. से०
१७२४ घट	चु. उ. ”
१७६७ घट	” ” ”
१७६८ घटि	” ” ”
२५९ घट्ट	भ्वा. आ. ”
१६३१ घट्ट	चु. उ. ”
६५२ घष (पा.)	भ्वा. आ. ”
७१५ घस्लृ	” प. अ.
४३४ घिणि	” आ. से.
९५२ घुङ्	” ” अ.
७४६ घुट	” ” से.
१३८५ घुट	तु. प. ”
४३७ घुण	भ्वा. आ. ”
१३३८ घुण	तु. प. ”
४३५ घुणि	भ्वा. आ. ”
१३४५ घुर	तु. प. ”
६५२ घुषि	भ्वा. आ. ”
६५३ घुषिर्	” प. ”
१७२७ घुषिर्	चु० उ० से०
११२५ घूरी	दि० आ० ,,
४३८ घूर्ण	भ्वा० आ० ,,
१३३९ घूर्ण	तु० प० ,,
९३८ घृ	भ्वा० प० अ०
१०९९ घृ	जु० प० अ०
१६५१ घृ	चु० उ० से०
४३६ घृणि	भ्वा० आ० ,,
१४६९ घृणु	त० उ० ,,
७०८ घृषु	भ्वा० प० ,,
९२६ घ्रा	,, अ० ,,

धातुः	गणः
ङ	
९५४ ङुङ्	भ्वा० आ० से०
च	
९३ चक	,, ,, से०
७८३ चक	भ्वा० प० ,,
१०७४ चकासृ	अ० ,, ,,
१५९५ चक्क	चु० उ० ,,
१०१७ चक्षिङ्	अ० आ० अ०
१७२२ चट	चु० उ० से०
२९४ चटे (पा०)	भ्वा० प० ,,
२७८ चडि	,, आ० ,,
७९६ चण	,, प० ,,
८६५ चते	,, उ० ,,
६८ चदि	,, प० ,,
८६६ चदे	,, उ० ,,
१८४१ जन (पा०)	चु० ,, ,,
१९० चन्चु	भ्वा० प० ,,
३९९ चप	,, ,, ,,
१६२७ चप (पा०)	चु० उ० ,,
१६२० चपि	,, ,, ,,
४६९ चमु	भ्वा० प० ,,
१२७४ चमु	स्वा० ,, ,,
४७८ चय	भ्वा० आ० ,,
५५९ चर	भ्वा० प० से०
१७४६ चर	चु० उ० ,,
१०८१ चर्करीतं	अ० प० ,,
७१७ चर्व	भ्वा० ,, ,,
१२९९ चर्च	तु० ,, ,,
१७१३ चर्च	चु० उ० ,,

धातुः	गणः
४२५ चर्व	भ्वा० प० से०
५७६ चर्व	,, ,, ,,
८३२ चल	,, ,, ,,
१३५६ चल	तु० प० ,,
१६०८ चल	चु० उ० ,,
८१२ चलिः	भ्वा० प० ,,
८८६ चष	,, उ० ,,
७२६ चह	,, प० ,,
१६२७ चह	चु० उ० ,,
१८६७ चह	,, ,, ,,
८८० चायृ	भ्वा० उ० ,,
१७६५ चि	चु० ,, ,,
१६३० चिञ्	,, ,, ,,
१२५१ चिञ्	स्वा० ,, अ०
३१५ चिट	भ्वा० प० से०
१६७४ चित	चु० आ० ,,
१५३५ चिति	,, उ० ,,
३६ चिती	भ्वा० प० ,,
१६१७ चित्र	चु० उ० ,,
१२७७ चिरि	स्वा० प० ,,
१३५५ चिल	तु० ,, ,,
५३३ चिल्ल	भ्वा० ,, ,,
१८२८ चीक	चु० उ० ,,
३८४ चीभृ	भ्वा० आ० ,,
१७७५ चीव	चु० उ० ,,
८७६ चीवृ	भ्वा० उ० ,,
१५६६ चुक	चु० उ० ,,
५१३ चुच्य (पा०)	भ्वा० प० ,,
१६१३ चुट	चु० उ० से०

धातुः	गणः
१३७७ चुट	तु० प० से०
१६६० चुटि	चु० उ० ,,
१५६० चुट्ट	चु० ,, ,,
१३६२ चुड	तु० प० ,,
३२५ चुडि	भ्वा० ,, ,,
३४७ चुड्ड	,, ,, ,,
१५६२ चुद	चु० उ० ,,
४०३ चुप	भ्वा० प० ,,
४२६ चुबि	,, ,, ,,
१६३६ चुबि	चु० उ० ,,
१५३४ चुर	,, ,, ,,
१६०२ चुल	,, ,, ,,
५३१ चुल्ल	भ्वा० प० ,,
११५८ चूरी	दि० आ० ,,
१५५२ चूर्ण	चु० उ० ,,
१६४२ चूर्ण	चु० ,, ,,
६७३ चूष	भ्वा० प० ,,
१३२४ चृती	तु० ,, ,,
१८२१ चृप (पा०)	चु० उ० ,,
५३६ चेलृ	भ्वा० प० ,,
२५६ चेष्ट	,, आ० ,,
१७४७ च्यु	चु० उ० ,,
६५५ च्युङ्	भ्वा० आ० अ०
४० च्युतिर्	भ्वा० प० से०
१७४७ च्युस (पा०)	चु० उ० ,,

छ

धातुः	गणः
१६२२ छजि	चु० ,, ,,
१८३४ छद	,, ,, ,,
१६३५ छद	,, ,, ,,

धातुः	गणः
१५७७ छदि	चु० उ० से.
८१३ छदिर्	भ्वा० प० ,,
४७० छमु	भ्वा० प० ,,
१५८६ छर्द	चु० उ० ,,
८६० छष	भ्वा० उ० से०
१४४० छिदिर्	रु० ,, अ०
१६२४ छिद्र	चु० ,, से०
१३७८ छुट	तु० प० ,,
१३८८ छुट (पा०)	,, ,, ,,
१४१८ छुप	,, ,, अ०
१३७२ छुर	,, ,, से०
१४४५ (उ) छृदिर्	रु० उ० ,,
१८२१ छृदी	चु० ,, ,,
१८२१ छृप (पा०)	चु० ,, ,,
१६३४ छेद	,, ,, ,,
११४६ छो	दि० प० अ०
ज	
१०७१ जक्ष	अ० प० से०
२४२ जज	भ्वा० ,, ,,
२४३ जजि	,, ,, ,,
३०५ जट	,, ,, ,,
११०५ जन	जु० प० ,,
११४९ जनी	भ्वादि० आ० से०
३९७ जप	प० प० ,,
१७१७ जभि	चु० उ० ,,
३८८ जभी	भ्वा० आ० ,,
४७१ जमु	,, प० ,,
७१६ जर्ज	,, ,, ,,
१२९८ जर्ज	तु० ,, ,,

धातुः	गणः
१५४३ जल	चु० उ० से.
८३३ जल	भ्वा० प० ,,
३९८ जल्प	,, ,, ,,
६८८ जष	,, ,, ,,
१६६७ जसि	चु० उ० ,,
१६६९ जसु	चु० ,, ,,
१७१९ जसु	,, ,, ,,
१२११ जसु	दि० प० ,,
१०७२ जागृ	अ० ,, ,,
५६१ जि	भ्वा० प० अ०
९४६ जि	,, ,, ,,
१७९४ जि	चु० उ० से०
४७२ जिमु (पा०)	भ्वा० प० ,,
१२७८ जिरि	स्वा० ,, ,,
५९४ जिवि	भ्वा० ,, ,,
६९७ जिषु	,, ,, ,,
५६२ जीव	,, ,, ,,
१५७ जुगि	,, ,, ,,
१३७९ जुट	तु० ,, ,,
१३२६ जुड	,, ,, ,,
१६४७ जुड	चु० उ० ,,
३२ जुतृ	भ्वा० आ० ,,
१३२६ जुन (पा०)	तु० प० ,,
१८३५ जुष	चु० उ० ,,
१२८८ जुषी	तु० आ० ,,
११५६ जूरी	दि० ,, ,,
६८१ जूष	भ्वा० प० ,,
३८९ जृभि	,, आ० ,,
१४९४ जॄ	क्र्या० प० ,,

धातुः	गणः
१८१५ जॄ	चु० उ० से.
११३० जॄष्	दि० प० ,,
६१६ जेषृ	भ्वा० आ० ,,
६४४ जेहृ	,, ,, ,,
६१४ जै	,, प० अ०
१६२५ ज्ञप	चु० उ० से०
८११ ज्ञा	भ्वा०प०अ०
१५०७ ज्ञा	क्र्या० ,, ,,
१७३३ ज्ञा	चु० उ० से०
१४९९ ज्या	क्र्या० प० अ०
९५६ ज्युङ्	भ्वा० आ० ,,
९४७ ज्रि	,, प० ,,
१८१६ ज्रि	चु० उ० से०
७७६ ज्वर	भ्वा० प० से०
८०४ ज्वल	,, ,, ,,
८३१ ज्वल	,, ,, ,,
झ	
३०६ झट	,, ,, ,,
४७२ झमु	,, ,, ,,
१३०० झर्झ	तु० ,, ,,
७१८ झर्झ	भ्वा० ,, ,,
६८९ झष	,, ,, ,,
८९१ झष	,, उ० ,,
१४९४ झॄ (पा०)	क्र्या० प० ,,
११३१ झॄष्	दि० ,, ,,
ट	
१६३९ टकि	चु० उ० ,,
८३४ टल	भ्वा० प० ,,
१०३ टिकृ	,, आ० ,,
१०४ टीकृ	भ्वा. आ. से.
८३५ ट्वल	,, प० ,,
ड	
१६७७ डप	चु० आ० ,,
१६७२ डिप	,, उ० ,,
१६७८ डिप	,, आ० ,,
१३७१ डिप	तु० प० ,,
१२३२ डिप	दि० ,, ,,
९६८ डीङ्	भ्वा० आ० ,,
११३५ डीङ्	दि० ,, ,,
ढ	
९८ ढौकृ	भ्वा० ,, ,,
ण	
६६२ णक्ष	,, प० ,,
१३४ णख	,, ,, ,,
१३५ णखि	,, ,, ,,
३१० णट	,, ,, ,,
७८१ णट	,, ,, ,,
५४ णद	भ्वा० प० से०
१७७९ णद	चु० उ० ,,
१५२० णभ	क्र्या० प० ,,
७५२ णभ	भ्वा० आ० ,,
१२४० णभ	दि० प० ,,
९८१ णम	भ्वा० ,, अ०
४८० णय	,, आ० से०
८३८ णल	,, प० ,,
११९४ णश	दि० ,, वे०
६२७ णस	भ्वा० आ० से०
११६६ णह	दि० उ० अ०

धातुः	गणः
६२५ णासृ	भ्वा० आ० से०
६५६ णिक्ष	,, प० ,,
१०२६ णिजि	अ० आ० ,,
१०६३ णिजिर्	जु० उ० अ०
६६ णिदि	भ्वा० प० से०
८७१ णिदृ	,, उ० ,,
१३६० णिल	तु० प० ,,
५६० णिवि	भ्वा० ,, ,,
७२२ णिश	भ्वा० ,, ,,
१०२५ णिसि	अ० आ० ,,
६०१ णीञ्	भ्वा० उ० अ०
५६६ णीव	,, प० से०
१०३५ णु	अ० प० ,,
१२८२ णुद	तु० उ० अ०
१४२६ णुद	,, प० ,,
१३६७ णू	,, ,, से०
८७२ णेदृ	भ्वा० उ० ,,
६१७ णेषृ	,, आ० ,,
त	
११७ तक	,, प० ,,
११८ तकि	,, ,, ,,
६६५ तक्ष	,, ,, ,,
६५५ तक्षू	,, ,, वे०
१४६ तगि	भ्वा० प० से०
३०८ तट	,, ,, ,,
१५७६ तड	चु० उ० ,,
१८०२ तड	,, ,, ,,
२८० तडि	भ्वा० आ० ,,
१६७६ तत्रि	चु० ,, ,,
१४६३ तनु	त० उ० से.
१८४१ तनु	चु० ,, ,,
१६१ तन्चु	भ्वा० प० ,,
१४५६ तन्चू	रु० ,, वे०
११५६ तप	दि० आ० अ०
६८५ तप	भ्वा० प० ,,
१८१६ तप	चु० उ० से०
१२०२ तमु	दि० प० ,,
४७६ तय	भ्वा० आ० ,,
१७८१ तर्क	चु० उ० ,,
२२७ तर्ज	भ्वा० प० ,,
१६८२ तर्ज	चु० आ० ,,
५८ तर्द	भ्वा० प० ,,
१५६८ तल	चु० उ० ,,
१७३० तसि	,, ,, ,,
१२१२ तसु	दि० प० ,,
४८६ तायृ	भ्वा० आ० ,,
१२६६ तिक	स्वा० प० ,,
१०५ तिकृ	भ्वा० आ० ,,
१२६७ तिग	स्वा० प० ,,
६७१ तिज	भ्वा० आ० ,,
१६५३ तिज	चु० उ० ,,
३६२ तिपृ	भ्वा० आ० अ०
११२३ तिम	दि० प० से
५३४ तिल	भ्वा० ,, ,,
१३५४ तिल	तु० ,, ,,
१६०७ तिल	चु० उ० ,,
५३४ तिल्ल (पा०)	भ्वा० प० ,,
१०६ तीकृ	भ्वा० आ० से०

धातुः	गणः		
१६१२ तीर	चु०	उ०	से.
५६५ तीव	भ्वा०	प०	,,
२४४ तुज	,,	,,	,,
१५६६ तुज (पा०)	चु०	उ०	,,
२४५ तुजि	भ्वा०	प०	,,
१५६६ तुजि	चु०	उ०	,,
१७५६ तुजि	,,	,,	,,
१३७६ तुट	तु०	प०	,,
१३८६ तुड	,,	,,	,,
२७६ तुडि	भ्वा०	आ०	,,
३५१ तुडृ	,,	प०	,,
१३३२ तुण	तु०	,,	,,
१६४३ तुत्थ	चु०	उ०	,,
१२८१ तुद	तु०	,,	अ०
४०५ तुन्प	भ्वा०	प०	से०
१३१० तुन्प	तु०	,,	,,
४०६ तुन्फ	भ्वा०	,,	,,
१३१२ तुन्फ	तु०	,,	,,
४०४ तुप	भ्वा०	,,	,,
१३०६ तुप	तु०	,,	,,
४०८ तुफ	भ्वा०	,,	,,
१३११ तुफ	तु०	,,	,,
१६५८ तुबि	चु०	उ०	,,
४२८ तुबि	भ्वा०	प०	,,
७५३ तुभ	,,	आ०	,,
१५२१ तुभ	क्या०	प०	,,
१२४१ तुभ	दि०	,,	,,
११०२ तुर	जु०	,,	,,
५७० तुर्वी	भ्वा०	,,	,,
१५६६ तुल	चु०	उ०	से.
११८४ तुष	दि०	प०	अ०
७१० तुस	भ्वा०	,,	से०
७३७ तुहिर्	,,	,,	,,
३५१ तूडृ (पा०)	भ्वा०	प०	से०
१६६० तूण	चु०	आ०	,,
११५२ तूरी	दि०	,,	,,
५२७ तूल	भ्वा०	प०	,,
६७४ तूष	,,	,,	,,
१४६८ तृणु	त०	उ०	,,
१४४६ (उ) तृदिर्	रु०	,,	,,
१३०८ तृन्फ	तु०	प०	,,
१३५० तृन्हू	तु०	प०	वे०
११६५ तृप	दि०	,,	,,
१२७१ तृप (पा०)	स्वा०	,,	से०
१८२० तृप	चु०	उ०	,,
१३०७ तृप	तु०	प०	,,
१३०७ तृफ (पा०)	,,	,,	,,
१२२८ (ञि) तृषा	दि०	,,	,,
१४५५ तृह	रु०	,,	,,
१३४८ तृहू	तु०	,,	वे०
६६६ तॄ	भ्वा०	,,	से०
२३१ तेज	,,	,,	,,
३६३ तेपृ	,,	आ०	,,
४६६ तेवृ	,,	,,	,,
६८६ त्यज	,,	प०	अ०
६७ त्रकि	,,	आ०	से०
६६० त्रक्ष	,,	प०	से०
१५५ त्रख (पा०)	,,	,,	,,

धातुः	गणः
६६ त्रदि	भ्वा. प. से.
८१६ त्रपि (पा०)	,, प० से०
३७४ त्रपूष्	,, आ० वे०
१७४२ त्रस	चु० उ० से०
१११७ त्रसी	दि० प० ,,
१५५ त्रिखि (पा०)	भ्वा० ,, ,,
१७६२ त्रिखि	चु० उ० ,,
१३७५ त्रुट	तु० प० ,,
१६६६ त्रुट	चु० आ० ,,
४०७ त्रुन्प	भ्वा. प. से.
४११ त्रुन्फ	,, ,, ,,
४०६ त्रुप	,, ,, ,,
४१० त्रुफ	,, ,, ,,
६६५ त्रैङ्	,, आ. अ.
६६ त्रौकृ	,, ,, से.
६५६ त्वक्षू	,, प. वे.
१५० त्वगि	,, ,, से.
१३०१ त्वच	तु. ,, ,,
१६२ त्वञ्चु	भ्वा. ,, ,,
७७५ (ञि) त्वरा	,, आ. ,,
१००१ त्विष	,, उ. अ.
५५४ त्सर	,, प. से.
थ	
१३८७ थुड	तु. ,, ,,
५७१ थुर्वी	भ्वा. ,, ,,
द	
६०८ दक्ष	,, आ. ,,
७७० दक्ष	,, ,, ,,
१२७६ दघ	स्वा. प. ,,
१६२६ दण्ड	चु. उ. से.
१७ दद	भ्वा. आ. ,,
८ दध	,, ,, ,,
१२७० दम्भु	स्वा. प. ,,
९८९ दन्श	भ्वा. ,, अ.
१२०३ दमु	दि. ,, से.
४८१ दय	भ्वा. आ. ,,
१०७३ दरिद्रा	अ. प. ,,
५४८ दल	भ्वा. प. ,,
१७५२ दल	चु. उ. ,,
८१६ दलि (पा.)	भ्वा. प. ,,
१६७५ दशि	चु. आ. ,,
१७६५ दशि	,, उ. ,,
१६७६ दस (पा.)	,, आ. ,,
१६७६ दसि	चु. आ. से.
१७८७ दसि	,, उ. ,,
१२१३ दसु	दि. प. ,,
९९१ दह	भ्वा. ,, अ.
१०९१ (डु) दाञ्	जु. उ. ,,
९३० दाण्	भ्वा. प. ,,
९९४ दान	,, उ. से.
१०५९ दाप्	अ. प. अ.
१२७६ दाश	स्वा. प. से.
८८२ दाशृ	भ्वा. उ. ,,
८९४ दासृ	,, ,, ,,
५९२ दिवि	,, प० ,,
११०७ दिवु	दि. ,, ,,
१७०७ दिवु	चु. आ. ,,
१७२५ दिवु	,, उ. ,,

धातुः	गणः
१२८३ दिश	तु. उ. अ.
१०१५ दिह	अ. ,, ,,
६०१ दीक्ष	भ्वा.आ.से.
११३४ दीङ्	दि. आ.अ.
१०७६ दीधीङ्	अ. ,, से.
११५० दीपी	दि. ,, ,,
९४४ दु	भ्वा.प. अ.
१२५६ (टु) दु	स्वा. ,, ,,
१९३० दुःख	चु. उ. से.
१६०० दुल	,, ,, ,,
५७२ दुर्वी	भ्वा. प. ,,
११८५ दुष	दि. ,, अ.
१०१४ दुह	अ. उ. ,,
७३८ दुहिर्	भ्वा.प. से.
११३३ दूङ्	दि. आ. ,,
१२८० दृ	स्वा. प. अ.
१४११ दृङ्	तु. आ. ,,
१३१४ दृन्फ	,, प. से.
११९६ दृप	दि. ,, वे.
१८२१ दृपः (पा०)	चु. उ. से.
१३१३ दृप	तु. प. ,,
१३१२ दृफ (पा०)	,, ,, ,,
१८२३ दृभ	चु. उ. ,,
१३२३ दृभी	तु. प. ,,
१८२२ दृभी	चु. उ. ,,
९८८ दृशिर्	भ्वा. प. अ.
७३३ दृह	,, ,, से.
७३४ दृहि	,, ,, ,,
८०८ दॄ	,, ,, ,,

धातुः	गणः
१४९३ दॄ	क्र्या. प. से.
९६२ देङ्	भ्वा. आ. अ.
५०० देवृ	,, ,, से.
९२४ दैप्	,, प. अ.
११४८ दो	दि. ,, ,,
१०४० द्यु	अ. ,, ,,
७४१ द्युत	भ्वा. आ. से.
९०५ द्यै	,, प. अ.
४६६ द्रम	,, ,, से.
१०५४ द्रा	अ. ,, अ.
६७० द्राक्षि	भ्वा. ,, से.
१२४ द्राखृ	,, ,, ,,
११४ द्राघृ	,, आ. ,,
२८७ द्राडृ	,, ,, ,,
६४६ द्राहृ	,, ,, ,,
९४५ द्रु	,, प. अ.
१३३७ द्रुण	तु. ,, से.
११९७ द्रुह	दि. ,, वे.
१४८१ द्रूञ्	क्र्या. उ. से.
७८ द्रेकृ	भ्वा. आ. ,,
९०६ द्रै	,, प. अ.
१०१३ द्विष	अ. उ. ,,
९३३ द्वृ	भ्वा. प. अ.
ध	
१५९४ धक्क	चु. उ. से.
४५३ धणिः (पा०)	भ्वा. प. ,,
११०४ धन	जु. ,, ,,
५९७ धवि	भ्वा. ,, ,,
१०९२ (डु) धाञ्	जु. उ. अ.

धातुः	गणः		
६०१ धावु	भ्वा.	उ.	से.
१४०६ धि	तु.	प.	अ.
६०३ धिक्ष	भ्वा०	आ.	से.
५९३ धिवि	”	प.	”
११०३ धिष	जु.	”	”
११३६ धीङ्	दि.	आ.	अ.
६०२ धुक्ष	भ्वा.	”	से.
१२५५ धुञ्	स्वा.	उ.	अ.
५७३ धुर्वी	भ्वा.	प.	से.
१३९८ धू	तु.	”	”
१२५५ धूञ् (पा०)	स्वा.	उ.	वे.
१४८७ धूञ्	क्र्या.	”	”
१८३६ धूञ्	चु.	”	से.
३९६ धूप	भ्वा.	प.	”
१७७३ धूप	चु.	उ.	”
११५३ धूरी	दि.	आ.	”
१६४० धूश (पा०)	चु.	उ.	”
१६४० धूष (पा०)	”	”	”
१६४० धूस	”	”	”
९६० धृङ्	भ्वा.	आ.	अ.
१४१२ धृङ्	तु.	”	”
२१७ धृज	भ्वा.	प.	से.
२१८ धृजि	”	”	”
९०० धृञ्	”	उ.	अ.
१८५१ धृष	चु.	”	से.
१२६९ (ञि) धृषा	स्वा.	प.	”
१४९४ धॄ (पा०)	क्र्या.	”	”
१९१४ धेक्क	चु.	उ.	”
९०२ धेट्	भ्वा.	प.	अ.

धातुः	गणः		
५५३ धोर्ऋ	भ्वा.	प.	से.
९२७ ध्मा	”	”	अ.
९०८ ध्यै	”	”	”
२१९ ध्रज	”	”	से.
२२० ध्रजि	”	”	”
४५९ ध्रण	”	”	”
१५२४ (उ) ध्रस	क्र्या.	”	”
१७४३ (उ) ध्रस	चु.	उ.	”
६७१ ध्राक्षि	भ्वा.	प.	”
१२५ ध्राखृ	”	”	”
११४ ध्राघृ (पा०)	”	आ.	”
२८८ ध्राडृ	”	”	”
९४२ ध्रु	”	प.	अ.
१४०० ध्रु	तु.	”	”
१४०० ध्रुव (पा०)	”	”	से.
७९ ध्रेकृ	भ्वा.	आ.	”
९०७ ध्रै	”	प.	अ.
२२१ ध्वज	”	”	से.
२२२ ध्वजि	”	”	”
४५३ ध्वण	”	”	”
८१६ ध्वनँ	”	”	”
८२८ ध्वन	”	”	”
१८९० ध्वन	चु.	उ.	”
८१६ ध्वनि (पा०)	भ्वा.	प.	”
७५५ ध्वन्सु	”	आ.	”
६७२ ध्वाक्षि	”	प.	”
९३९ ध्वृ	”	”	अ.

न

धातुः	गणः		
१५९३ नक्क	चु.	उ.	से.

धातुः	गणः		
१५४५ नट	चु.	उ.	से.
१७९२ नट	,,	,,	,,
६७ (टु) नदि	भ्वा.	प.	,,
५६ नर्द	,,	,,	,,
१८०३ नल	चु.	उ.	से.
६ नाथृ	भ्वा.	आ.	,,
७ नाधृ	,,	,,	,,
१८८६ निवास	चु.	उ.	,,
१६८७ निष्क	,,	आ.	,,
५२२ नील	भ्वा.	प.	,,
१११६ नृती	दि.	,,	,,
८०९ नॄ	भ्वा.	,,	,,
१४९५ नॄ	क्र्या.	,,	,,
प			
६६५ पक्ष (पा०)	भ्वा०	प०	से०
१५५० पक्ष	चु०	उ०	,,
९९६ (डु) पचष्	भ्वा०	,,	अ०
१७४ पचि	,,	आ०	से०
१६५२ पचि	चु०	उ०	,,
२९६ पट	भ्वा०	प०	,,
१७५३ पट	चु०	उ०	,,
१८५७ पट	,,	,,	,,
३३० पठ	भ्वा०	प०	,,
२८१ पडि	,,	आ०	,,
१६१५ पडि	चु०	उ०	,,
४३९ पण	भ्वा०	आ०	,,
११५९ पत (पा०)	दि०	,,	,,
१८६२ पत	चु०	उ०	,,
८४५ पत्लृ	भ्वा०	प०	,,

धातुः	गणः		
१५५४ पथ (पा०)	चु०	उ०	से.
१५७५ पथि	,,	,,	,,
८४७ पथे	भ्वा०	प०	,,
११६९ पद	दि०	आ०	अ०
१८९८ पद	चु०	,,	से०
४४० पन	भ्वा०	,,	से०
४७६ पय	,,	,,	,,
१९३९ पर्ण	चु०	उ०	,,
२९ पर्द	भ्वा०	आ०	,,
४१२ पर्प	भ्वा.	प.	से.
४१६ पर्ब	,,	,,	,,
५७७ पर्व	,,	,,	,,
८३९ पल	,,	,,	,,
१८८२ पल्पूल	चु.	उ.	,,
१७२० पश	,,	,,	,,
१८६३ पष	चु.	उ.	,,
१६१६ पसि	,,	,,	,,
९२५ पा	भ्वा.	प.	अ.
१०५६ पा	अ.	,,	,,
१९११ पार	चु.	उ.	से.
१६०९ पाल	,,	,,	,,
१४०५ पि	तु.	प.	अ.
१५७६ पिच्छ	चु.	उ.	से.
१५६७ पिज (पा०)	,,	,,	,,
१०२८ पिजि	अ.	आ.	,,
१५६० पिजि	चु.	उ.	,,
१७५८ पिजि	,,	,,	,,
३११ पिट	भ्वा.	प.	,,
३३९ पिठ	,,	,,	,,

धातुः	गणः		
२७४ पिडि	भ्वा.	आ.	से.
१६७० पिडि	चु.	उ.	,,
५८८ पिवि	भ्वा.	प.	,,
१४३७ पिशि	तु.	,,	,,
१४५२ पिष्लृ	रु.	,,	अ.
१५६८ पिस	चु.	उ.	से.
१७६३ पिसि	,,	,,	,,
७१९ पिसृ	भ्वा.	प.	,,
११४१ पीङ्	दि.	आ.	अ.
१५४४ पीड	चु.	उ.	से.
५२१ पील	भ्वा.	प.	,,
५६३ पीव	,,	,,	,,
१३६७ पुट	तु.	,,	,,
१७५४ पुट	चु.	उ.	,,
१९१३ पुट	चु.	उ.	से.
१७६३ पुटि	,,	,,	,,
१५५९ पुट्ट	चु.	,,	,,
१३८४ पुड	तु.	प.	,,
३२६ पुडि (पा०)	भ्वा.	,,	,,
१३३३ पुण	तु.	प.	,,
१६३७ पुण (पा०)	चु.	उ.	,,
१११९ पुथ	दि.	प.	,,
१७७६ पुथ	चु.	उ.	,,
४४ पुथि	भ्वा.	प.	,,
१३४६ पुर	तु.	प.	से.
५७६ पुर्व	भ्वा.	,,	,,
८४१ पुल	,,	,,	,,
१६०१ पुल	चु.	उ.	,,
१६३७ पुल	,,	,,	,,

धातुः	गणः		
७०० पुष	भ्वा.	प.	से.
११८२ पुष	दि.	,,	अ.
१५२९ पुष	क्र्या.	,,	से.
१७५१ पुष	चु.	उ.	,,
११२२ पुष्प	दि.	प.	,,
१६३८ पुंस	चु.	उ.	,,
१५९० पुस्त	,,	,,	,,
९६६ पूङ्	भ्वा.	आ.	,,
१६४३ पूज	चु.	उ.	,,
१४८२ पूञ्	क्र्या.	,,	,,
४८४ पूयी	भ्वा.	आ.	,,
११५१ पूरी	दि.	,,	,,
१८०४ पूरी	चु.	उ.	,,
१६३७ पूर्ण (पा०)	,,	,,	,,
५२८ पूल	भ्वा.	प.	,,
६७५ पूष	,,	,,	,,
१०८६ पृ (पा०)	जु.	,,	अ.
१२५८ पृ	स्वा.	,,	,,
१४०२ पृङ्	तु.	आ.	,,
१८०८ पृच	चु.	उ.	से.
१०३० पृची	अ.	आ.	,,
१४६२ पृची	रु.	प.	,,
१०२८ पृजि (पा०)	अ.	आ.	,,
१३२८ पृड	तु.	प.	,,
१३२९ पृण	,,	,,	,,
१५५४ पृथ	चु.	उ.	,,
७०५ पृषु	भ्वा.	प.	,,
१०८६ पॄ	जु.	,,	,,
१४८९ पॄ	क्र्या.	,,	,,

धातुः	गणः		
१५४८ पॄ	चु.	उ.	से.
५४१ पेलृ	भ्वा.	प.	,,
५०४ पेवृ	,,	आ.	,,
६१५ पेषृ	,,	,,	,,
७२० पेसृ	भ्वा.	प.	,,
९२० पै	,,	,,	अ.
४५८ पैणृ	,,	,,	से.
४८८ (ओ) प्यायी	,,	आ.	,,
९६४ प्यैङ्	,,	,,	अ.
१४१३ प्रच्छ	तु.	प.	,,
७६५ प्रथ	भ्वा.	आ.	से.
१५५३ प्रथ	चु.	उ.	,,
७६६ प्रस	भ्वा.	आ.	,,
१०६१ प्रा	अ.	प.	अ.
११४४ प्रीङ्	दि.	आ.	,,
१४७४ प्रीञ्	क्र्या.	उ.	,,
१८३७ प्रीञ्	चु.	उ.	से.
९५७ प्रुङ्	भ्वा.	आ.	अ.
३२४ प्रुड	,,	प.	से.
७०३ प्रुषु	भ्वा.	,,	,,
१५२७ प्रुष	क्र्या.	,,	,,
६१६ प्रेषृ	,,	आ.	,,
४५८ प्रैणृ (पा०)	भ्वा.	प.	,,
८६७ प्रोथृ	भ्वा.	उ.	से.
६४२ प्लिहृ	,,	आ.	,,
१५०३ प्ली	क्र्या.	प.	अ.
९५८ प्लुङ्	भ्वा.	आ.	,,
१११५ प्लुष	दि.	प.	से.
१२१६ प्लुष	,,	,,	,,

धातुः	गणः		
१५२८ प्लुष	क्र्या.	प.	से.
७०४ प्लुषु	भ्वा.	,,	,,
१०५५ प्सा	अ.	,,	अ.
फ			
११६ फक्क	भ्वा.	,,	से.
८२१ फण	,,	,,	,,
५३० फल	,,	,,	,,
५१६ (ञि) फला	,,	,,	,,
१३६० फुल	तु.	,,	,,
५३२ फुल्ल	भ्वा.	,,	,,
५४२ फेलृ	,,	,,	,,
ब			
४५६ बण (पा०)	,,	,,	,,
५१ बद	,,	,,	,,
९७३ बध	,,	आ.	,,
१५४७ बध	चु.	उ.	,,
१५४७ बन्ध (पा०)	,,	,,	,,
१५०८ बन्ध	क्र्या.	प.	अ.
४१८ बर्ब	भ्वा.	,,	,,
६३८ बर्ह	,,	आ.	,,
१६६५ बर्ह	चु.	उ.	,,
१७७० बर्ह	,,	,,	,,
८४० बल	भ्वा.	प.	,,
१६२६ बल	चु.	उ.	,,
६३९ बल्ह	भ्वा.	आ.	,,
१७७१ बल्ह	चु.	उ.	,,
१६८४ बस्त	चु.	आ.	,,
२८६ बाडृ	भ्वा.	आ.	,,
५ बाधृ	भ्वा०	आ०	से०

धातुः	गणः
६४५ बाहृ	भ्वा. आ. से.
३१७ बिट	,, प० ,,
६० बिदि	,, ,, ,,
१३५९ बिल	तु० ,, ,,
१६०६ बिल	चु० उ० ,,
११९ बुक्क	भ्वा० प० ,,
१७१४ बुक्क	चु० उ० ,,
१५८ बुगि	भ्वा० प० ,,
८५८ बुध	भ्वा० ,, ,,
११७२ बुध	दि० आ० अ०
८७५ बुधिर्	भ्वा० उ० से०
८७६ (उ) बुन्दिर्	,, ,, ,,
१२१९ बुस	दि० प० ,,
१५९१ बुस्त	चु० उ० ,,
७३५ बृह	भ्वा० प० ,,
७३६ बृहि	,, ,, ,,
१७६९ बृहि	चु० उ० ,,
७३६ बृहिर् (पा०)	भ्वा० प० ,,
१३४७ बृहू (पा०)	तु० ,, वे
६४३ बेहृ (पा०)	भ्वा० आ० से०
१०४४ ब्रूञ्	अ० उ० ,,
१६६४ ब्रूस	चु० ,, ,,
भ	
८६३ भक्ष (पा०)	भ्वा० ,, ,,
१५५७ भक्ष	चु० ,, ,,
९९८ भज	भ्वा० ,, अ०
१७३४ भज	चु० ,, से०
१७६० भजि	,, ,, ,,
३०७ भट	भ्वा० प० ,,

धातुः	गणः
७८० भट	भ्वा. प. से.
२७३ भडि	,, आ० ,,
१५८८ भक्ष	चु० उ० से०
४४७ भण	भ्वा० प० ,,
१२ भदि	,, आ० ,,
१४५३ भञ्जो	रु० प० अ०
१६८३ भर्त्स	चु० आ० से०
५८० भर्व	भ्वा० प० ,,
४९५ भल	,, आ० ,,
१७०१ भल	चु० ,, ,,
४९६ भल्ल	भ्वा० ,, ,,
६९५ भष	,, प० ,,
११०० भस	जु० ,, ,,
१०५१ भा	अ० प० अ०
१८८७ भाज	चु० उ० से०
४४१ भाम	भ्वा० आ० ,,
१८७३ भाम	चु० उ० ,,
६१२ भाष	भ्वा० आ० ,,
६२४ भासृ	भ्वा० आ० ,,
६०६ भिक्ष	,, ,, ,,
६४ भिदि (पा०)	,, प० ,,
१४३९ भिदिर्	रु० उ० अ०
१०८४ (ञि) भी	जु० प० ,,
१४५४ भुज	रु० ,, ,,
१४१७ भुजो	तु० ,, ,,
१७४८ भुवः	चु० उ० से०
१ भू	भ्वा० प० ,,
१८४५ भू	चु० आ० ,,
६८२ भूष	भ्वा० प० ,,

धातुः	गणः
१७३१ भूष	चु० उ० से०
१७८ भूजी	भ्वा० आ० ,,
८९८ भृञ्	भ्वा० उ० अ०
१०८७ (डु) भृञ्	जु० उ० ,,
१३९५ भृड	तु० प० से०
१७८८ भृशि	चु० उ० ,,
१२२४ भृशु	दि० प० ,,
१४९१ भॄ	क्र्या० प० से०
८८३ भेषृ	भ्वा० उ० ,,
६२८ भ्यस	,, आ० ,,
८९२ भ्रक्ष	,, उ० ,,
४५२ भ्रण	,, प० ,,
७५६ भ्रंशु (पा०)	,, आ० ,,
१२२५ भ्रंशु	दि० प० ,,
७५६ भ्रंसु	भ्वा० आ० ,
८५० भ्रमु	,, प० ,,
१२०५ भ्रमु	दि० ,, ,,
१२८४ भ्रस्ज	तु० उ० अ०
१८१ भ्राजृ	भ्वा० आ० से०
८२३ (टु) भ्राजृ	,, ,, ,,
८२४ (टु) भ्राशृ	,, ,, ,,
१५०५ भ्री	क्र्या० प० अ०
१६६१ भ्रूण	चु० आ० से०
१८० भ्रेजृ	भ्वा० आ० ,,
८८४ भ्रेषृ	भ्वा० उ० ,,
८९३ भ्लक्ष	,, ,, ,,
८२५ (टु) भ्लाशृ	,, आ० ,,
८८५ भ्लेषृ	,, उ० ,,

धातुः	गणः
म	
८६ मकि	भ्वा. आ० से.
१३२ मख	,, प० ,,
१३३ मखि	,, ,, ,,
१४८ मगि	,, ,, ,,
१११ मघि	,, आ० ,,
१६० मघि	,, प० ,,
१७१ मच	,, आ० ,,
१७३ मचि	,, ,, ,,
३३२ मठ	,, प० ,,
२६३ मठि	,, आ० ,,
२७२ मडि	,, ,, ,,
३२१ मडि	भ्वा० प० ,,
१५८७ मडि	चु० उ० से०
४४८ मण	भ्वा० प० ,,
१६८० मन्त्रि	चु० आ० ,,
४६ मथि	भ्वा० प० ,,
८४८ मथे	,, ,, ,,
१७०६ मद	चु० आ० ,,
१३ मदि	भ्वा० ,, ,,
८१५ मदी	,, प० ,,
१२०८ मदी	दि० ,, ,,
११७६ मन	दि० आ० अ०
१४७१ मनु	त० ,, से०
४२ मन्थ	भ्वा० प० ,,
१५११ मन्थ	क्र्या० प० ,,
५५८ मभ्र	भ्वा० प० ,,
४७७ मय	,, आ० ,,

धातुः	गणः		
१६५० मर्च	चु॰	उ॰	से.
४१९ मर्ब	भ्वा॰	प॰	,,
५७८ मर्व	,,	,,	,,
४९३ मल	भ्वा॰	आ॰	,,
४९४ मल्ल	,,	,,	,,
५९९ मव	,,	प॰	,,
५०८ मव्य	,,	,,	,,
७२४ मश	,,	,,	,,
६९२ मष	,,	,,	,,
१२२१ मसी	दि॰	प॰	,,
१०२ मस्क	भ्वा॰	आ॰	,,
१४१५ (टु) मस्जो	तु॰	प॰	अ॰
७३० मह	भ्वा॰	,,	से॰
१८६८ मह	चु॰	उ॰	,,
६३४ महि	भ्वा॰	आ॰	,,
१८०० महि	चु॰	उ॰	,,
१०६२ मा	अ॰	प॰	अ॰
६६९ माक्षि	भ्वा॰	,,	से॰
१०८८ माङ्	जु॰	आ॰	अ॰
११४२ माङ्	दि॰	आ॰	अ॰
९७२ मान	भ्वा॰	,,	से॰
१७१० मान	चु॰	आ॰	,,
१८४४ मान	चु॰	उ॰	,,
१६१८ मार्ग	,,	,,	,,
१८४७ मार्ग	चु॰	,,	,,
१६४९ मार्ज	,,	,,	,,
८९५ माहृ	भ्वा॰	,,	,,
१२९७ मिच्छ	तु॰	प॰	,,
१७५७ मिजि	चु॰	उ॰	,,
१२५० (डु) मिञ्	स्वा॰	,,	अ॰

धातुः	गणः		
८६८ मिथृ (पा॰)	भ्वा॰	उ.	से॰
७४३ (ञि) मिदा	,,	आ॰	,,
१२४३ (ञि) मिदा	दि॰	प॰	,,
१५४१ मिदि	चु॰	उ॰	,,
८६८ मिदृ	भ्वा॰	,,	,,
८६८ मिधृ (पा॰)	,,	,,	,,
१३६४ मिल	तु॰	प॰	,,
१४२९ मिल	,,	उ॰	,,
५८९ मिवि	भ्वा॰	प॰	,,
७२३ मिश	भ्वा॰	प॰	,,
१९२१ मिश्र	चु॰	उ॰	,,
१३५२ मिष	तु॰	प॰	,,
६९९ मिषु	भ्वा॰	,,	,,
९९२ मिह	,,	,,	अ॰
१८२५ मी	चु॰	उ॰	,,
११३७ मीङ्	दि॰	आ॰	,,
१४७६ मीञ्	क्र्या॰	उ॰	,,
४६८ मीमृ	भ्वा॰	प॰	से॰
५१७ मील	,,	,,	,,
५६४ मीव	,,	,,	,,
१७४४ मुच	चु॰	उ॰	,,
१७२ मुचि	भ्वा॰	आ॰	,,
१४३० मुच्लृ	तु॰	उ॰	अ॰
२५० मुज	भ्वा॰	प॰	से॰
२५१ मुजि	,,	,,	,,
१३७४ मुट	तु॰	,,	,,
१६१४ मुट	चु॰	उ॰	,,
२६५ मुठि	भ्वा॰	आ॰	,,
३२३ मुड	,,	प॰	,,
२७५ मुडि	,,	आ॰	,,

धातुः			गणः
३२६ मुडि	भ्वा०	प०	से.
१३३४ मुण	तु०	,,	,,
१६ मुद	भ्वा०	आ०	,,
१७४१ मुद	चु	उ०	,,
१३४३ मुर	तु०	,,	,,
२१२ मुर्छा	भ्वा०	,,	,,
५७५ मुर्वी	,,	,,	,,
१५३० मुष	क्या०	,,	,,
१२२० मुस	दि०	,,	,,
१६३२ मुस्त	चु०	उ०	,,
११६८ मुह	दि०	प०	वे०
६६७ मूङ्	भ्वा०	आ०	से०
१६०६ मूत्र	चु०	उ०	,,
५२६ मूल	भ्वा०	प०	,,
१६०३ मूल	चु०	उ०	,,
६७६ मूष	भ्वा०	प०	,,
६६४ मृक्ष	,,	,,	,,
१६०० मृग	चु०	आ०	,,
१४०३ मृङ्	तु०	,,	अ०
१८४६ मृजू	चु०	उ०	वे०
१०६६ मृजूष्	अ०	प०	,,
१३२७ मृड	तु०	,,	से०
१५१६ मृड	क्या०	,,	,,
१३३१ मृण	तु०	,,	,,
७६७ मृद	भ्वा०	आ०	,,
१५१५ मृद	क्या०	प०	,,
८७४ मृधु	भ्वा०	उ०	,,
१४२५ मृश	तु०	प०	अ०
११६४ मृष	दि०	उ०	से०

धातुः			गणः
१८५० मृष	चु०	उ	स.
७०७ मृषु	भ्वा०	प०	,,
१४६२ मॄ	क्या०	,,	,,
६६१ मेङ्	भ्वा०	आ०	अ०
८६६ मेथृ (पा०)	,,	उ०	से०
८६६ मेदृ	,,	,,	,,
८७० मेधृ	,,	,,	,,
८६६ मेथृ (पं०)	,,	,,	,,
३७१ मेपृ	,,	आ०	,
५०५ मेवृ	,,	,,	,,
६२६ म्ना	भ्वा०	प०	अ०
६६४ म्रक्ष (पा०)	,,	,,	से०
१६६१ म्रक्ष	चु०	उ०	,,
१६५ म्रुचु	,,	,,	,,
१६३ म्रुन्चु	,,	,,	,,
२०२ म्रेडृ	,,	,,	,,
१६६ म्लुचु	,,	,,	,,
१६४ म्लुन्चु	,,	,,	,,
२०५ म्लेच्छ	,,	,,	,,
१६६३ म्लेच्छ	चु०	उ०	,,
२६२ म्लेट्ट	भ्वा०	प०	,,
५०६ म्लेवृ	,,	आ०	,,
६०४ म्लै	,,	प०	अ०
य			
१६६३ यक्ष	चु०	आ०	से०
१००२ यज	भ्वा०	उ०	अ०
१७२६ यत	चु०	,,	से०
३० यती	भ्वा०	आ०	,,
१५३६ यत्रि	चु०	उ०	,,

धातुः			गणः
६८० यभ	भ्वा०	प०	अ०
६८४ यम	,,	,,	,,
८१६ यमः	भ्वा०	प०	से०
१६१६ यम	चु०	उ०	,,
१२१० यसु	दि०	प०	,,
१०४६ या	अ०	,,	अ०
८६३ (टु)याचृ	भ्वा०	उ०	से०
१०३३ यु	अ०	प०	,,
१७११ यु	चु०	आ०	,,
१५६ युगि	भ्वा०	प०	,,
२१४ युछ	,,	,,	,,
११७७ युज	दि०	आ०	अ०
१८०७ युज	चु०	उ०	से०
१४४४ युजिर्	रु०	,,	अ०
१४७६ युञ्	क्र्या०	,,	,,
३१ युतृ	भ्वा०	आ०	से०
११७३ युध	दि०	,,	अ०
१२३५ युप	,,	प०	से०
६८० यूष	भ्वा०	,,	,,
२६१ योटृ	,,	,,	,,
र			
१७३७ रक	चु०	उ०	,,
६५८ रक्ष	भ्वा०	प०	,,
१२६ रख	,,	,,	,,
१३७ रखि	,,	,,	,,
१७३८ रग(पा०)	चु०	उ०	,,
१४४ रगि	भ्वा०	प०	,,
७८५ रगे	,,	,,	,,
१७३८ रघ(पा०)	चु०	उ०	,,

धातुः			गणः
१०७ रघि	भ्वा०	आ०	से.
१७६ रघि	चु०	उ०	,,
१८६५ रच	,,	,,	,,
२६७ रट	भ्वा०	प०	,,
३३४ रट	,,	,,	,,
३३४ रठ(पा०)	,,	,,	,,
४४५ रण	,,	,,	,,
७६५ रण	भ्वा०	प०	से०
८१६ रणि(पा०)	,,	,,	,,
५३ रद	,,	,,	,,
११६३ रध	दि०	,,	वे०
६६६ रन्ज	भ्वा०	उ०	अ०
११६७ रन्ज	दि०	,,	,,
४०१ रप	भ्वा०	प०	से०
४११ रफ	,,	,,	,,
४१४ रफि	,,	,,	,,
३७६ रबि	,,	आ०	,,
६७४ रभ	,,	,,	अ०
३८५ रभि(पा०)	,,	,,	से०
८५३ रमु	,,	,,	अ०
४८२ रय	,,	,,	से०
५६६ रवि	,,	प०	,,
७१३ रस	,,	,,	,,
१६३१ रस	चु०	उ०	,,
७३१ रह	भ्वा०	प०	,,
१६२८ रह	चु०	उ०	,,
१८५६ रह	,,	,,	,,
७३२ रहि	भ्वा०	प०	,,
१७६६ रहि	चु०	उ०	,,

धातुः		गणः		
१०५७	रा	अ०	प०	अ०
१२२	राखृ	भ्वा०	,,	से०
११२	राघृ	,,	अ०	,,
८२२	राजृ	,,	उ०	,,
११८०	राध:	दि०	प०	अ०
१२६२	राध	स्वा०	,,	,,
६२६	रासृ	भ्वा०	आ०	से०
१४०४	रि	तु०	प०	अ०
१२७५	रि	स्वा०	,,	,,
१५५	रिख(पा०)	भ्वा०	,,	से०
१५४	रिगि	,,	,,	,,
१८१७	रिच	चु०	उ०	,,
१४४१	रिचिर्	रु०	उ०	अ०
१३०६	रिफ	तु०	प०	से०
५६५	रिवि	भ्वा०	,,	अ०
१४२०	रिश	तु०	,,	अ०
६६४	रिष	भ्वा०	,,	से०
१२३१	रिष	दि०	,,	,,
१३०६	रिह(पा०)	तु०	,,	,,
१५००	री	क्या०	,,	अ०
११३८	रीङ्	दि०	अ०	,,
१०३४	रु	अ०	प०	से०
६५६	रुङ्	भ्वा०	आ०	,,
६४५	रुच	,,	,,	,,
१८०५	रुज	चु०	उ०	,,
१४१६	रुजो	तु०	प०	अ०
७४७	रुट	भ्वा०	आ०	से०
१६७१	रुट(पा०)	चु०	उ०	,,
१७८४	रुट	,,	,,	,,

धातुः		गणः		
३२७	रुटि	भ्वा०	प०	से.
३३६	रुठ	,,	,,	,,
३२७	रुठि(पा०)	,,	,,	,,
३४५	रुठि	,,	,,	,,
३२७	रुडि(पा०)	,,	,,	,,
१०६७	रुदिर्	अ०	,,	,,
११७४	(अनो)रुध	दि०	आ०	अ०
१४३८	रुधिर्	रु०	उ०	अ०
१२३६	रुप	दि०	प०	से०
१४१६	रुश	तु०	,,	अ०
१७८६	रुशि	चु०	उ०	से०
६६३	रुष	भ्वा०	प०	,,
११३०	रुष	दि०	,,	,,
१६७१	रुष	चु०	उ०	से०
१७६१	रुसि	,,	,,	,,
८५६	रुह	भ्वा०	प०	अ०
१६१०	रूक्ष	चु०	उ०	से०
१६३३	रूप	चु०	उ०	से०
६७८	रूष	भ्वा०	प०	,,
८०	रेकृ	,,	आ०	,,
८६४	रेटृ	,,	उ०	,,
३७२	रेपृ	,,	,,	,,
३८५	रेभृ	,,	,,	,,
५०७	रेवृ	,,	,,	,,
६२०	रेषृ	,,	,,	,,
६०६	रै	,,	प०	अ०
३५६	रोड़ृ	,,	,,	से०
३५५	रौड़ृ	,,	,,	,,

धातुः		गणः		
	ल			
१६६७	लक्ष	चु०	आ०	से.
१५३८	लक्ष	,,	उ०	,,
१३८	लख	भ्वा०	प०	,,
१३९	लखि	,,	,,	,,
१७३८	लग	चु०	उ०	,,
१४५	लगि	भ्वा०	प०	,,
७८६	लगे	,,	,,	,,
३०८	लघि	,,	आ०	,,
१७६१	लधि	चु०	उ०	,,
१७९७	लघि	,,	,,	,,
२०६	लछ	भ्वा०	प०	,,
२३८	लज	,,	,,	,,
१५४३	लज(पा०)	चु०	उ०	,,
१६२०	लज	,,	,,	,,
२३९	लजि	भ्वा०	प०	,,
१५६६	लजि(पा०)	चु०	उ०	,,
१७८५	लजि	चु०	,,	से०
१६२०	लजि(पा०)	,,	,,	,,
१२९०	(ओ) लजी	तु०	आ०	,,
२९८	लट	भ्वा०	प०	,,
३५९	लड	,,	,,	,,
१५४०	लड	चु०	उ०	,,
८१४	लडि:	भ्वा०	प०	से०
१८०१	लडि	चु०	उ०	,,
१५४२	(ओ)लडि(पा०)	,,	,,	,,
४०२	लप	भ्वा०	प०	,,
३७७	लबि	,,	आ०	,,
३७९	लबि	,,	,,	,,
९७५	(डु)लभष्	भ्वा.	आ.	अ०
४१७	लर्ब	,,	प०	से०
३५९	लल(पा०)	,,	,,	,,
१६८८	लल	चु०	आ०	,,
८८८	लष	भ्वा०	उ०	,,
७१४	लस	,,	प०	,,
१७२९	लस	चु.	उ.	,,
१२९१	(ओ)लस्जी	तु०	आ०	,,
१०५८	ला	अ०	प०	अ०
१२३	लाखृ	भ्वा०	,,	से०
११३	लाघृ	,,	आ०	,,
२०७	लाछि	,,	प०	,,
२४०	लाज	,,	,,	,,
२४१	लाजि	,,	,,	,,
१९३६	लाभ	चु०	उ०	,,
१३६५	लिख	तु०	प०	,,
१५५	लिगि	भ्वा०	,,	,,
१७४०	लिगि	चु०	उ०	,,
१४३३	लिप	तु०	,,	अ०
११७९	लिश	दि०	आ०	,,
१४२१	लिश	तु०	प०	,,
१०१६	लिह	अ०	उ०	,,
१८१२	ली	चु०	,,	,,
१५०१	ली	क्या०	प०	,,
११३९	लीङ्	दि०	आ०	,,
१५६७	लुजि(पा०)	चु०	उ०	से०
१७५९	लुजि	चु०	,,	,,
३१४	लुट	भ्वा०	प०	,,
७४८	लुट	चु.	आ.	से.

धातुः			गणः		
१३८१	लुट	तु.	प०	से०	
१७५५	लुट	चु.	उ.	,,	
३२८	लुटि	भ्वा.	प.	,,	
३३७	लुठ	,,	,,	,,	
७४९	लुठ	,,	आ.	,,	
१२२२	लुठ	दि.	प.	,,	
३२८	लुठि(पा०)	भ्वा.	,,	,,	
३४३	लुठि	,,	,,	,,	
३४६	लुठि	,,	,,	,,	
३४१	लुड(पा०)	,,	,,	,,	
३२८	लुडि(पा०)	,,	,,	,,	
१५६३	लुण्ठ	चु.	उ.	,,	
४५	लुथि	भ्वा.	प.	,,	
१८७	लुञ्च	,,	,,	,,	
१२३७	लुप	दि.	,,	,,	
१४३१	लुप्लृ	तु.	उ.	अ.	
४२७	लुबि	भ्वा.	प.	से.	
१६५७	लुबि	चु.	उ.	,,	
१२३८	लुभ	दि.	प.	,,	
१३०५	लुभ	तु.	,,	,,	
१४८३	लूञ्	क्या.	प.	,,	
६७७	लूष	भ्वा.	प.	,,	
१६१०	लूष	चु.	उ.	,,	
३७३	लेपृ	भ्वा.	आ.	,,	
७६	लोकृ	,,	,,	,,	
१७७७	लोकृ	चु.	उ.	,,	
१६४	लोचृ	भ्वा.	आ०	,,	
१७७८	लोचृ	चु.	उ.	,,	
३५७	लोडृ	भ्वा.	प.	,,	

धातुः			गणः		
२५८	लोष्टृ	भ्वा०	आ.	से०	
	व				
८८	वकि	,,	आ.	,,	
९५	वकि	,,	,,	,,	
६३६	वक्ष	भ्वा.	प.	से.	
१३०	वख	,,	,,	,,	
१३१	वखि	भ्वा.	,,	से.	
१४७	वगि	,,	,,	,,	
११०	वघि	,,	आ.	,,	
१०३६	वच	अ.	प.	अ.	
१८४३	वच	चु.	उ.	से.	
२५२	वज	भ्वा.	प.	से.	
१६१७	वज	चु.	उ.	,,	
७७९	वट	भ्वा.	प.	,,	
१८५८	वट	चु.	उ.	,,	
१९१९	वट	,,	,,	,,	
३००	वट	भ्वा.	प.	,,	
१५८६	वटि	चु.	उ.	,,	
१९१९	वटि(पा०)	,,	,,	,,	
३३१	वठ	भ्वा.	प.	,,	
२६२	वठि	,,	आ.	,,	
२७१	वडि	,,	,,	,,	
१५८६	वडि(पा०)	चु.	उ.	,,	
४४६	वण	भ्वा.	प.	,,	
१५५१	वण	चु.	उ.	,,	
१००९	वद	भ्वा.	प.	,,	
१८४२	वद	चु.	उ.	,,	
११	वदि	भ्वा.	आ.	,,	
४६२	वन	,,	प.	,,	

धातुः		गणः	
४६३ वन	भ्वा॰	आ॰	से॰
८०३ वन	,,	,,	,,
८०३ वनु (पा॰)	,,	,,	,,
१४७० वनु	त.	आ.	,,
१८६ वन्चु	भ्वा.	प.	,,
१७०४ वन्चु	चु.	आ	,,
१००३ (डु)वप्	भ्वा.	उ.	अ
५५७ वभ्र	,,	प.	से.
८४६ (टु)वम्	,,	,,	,,
४७५ वय	भ्वा.	आ.	से.
१८५३ वर	चु.	उ.	,,
१६२ वर्च	भ्वा.	पा.	,,
१५५१ वर्ण (पा॰)	चु.	उ.	,,
१६३८ वर्ण	,,	,,	,,
१६२५ वर्ध	,,	,,	,,
६१३ वर्ष	भ्वा.	आ.	से.
६४० वर्ह	,,	,,	,,
४६१ वल	,,	,,	,,
८१६ वलि (पा॰)	,,	प.	,,
१५७१ वलक	चु.	उ.	,,
१६१६ वल्क	,,	,,	,,
१४३ वल्ग	भ्वा.	प.	,,
३८१ वल्भ	,,	आ.	,,
४८२ वल्ल	,,	,,	,,
६४१ वल्ह	,,	,,	,,
१०८० वश	अ.	प.	,,
६८१ वष	भ्वा.	,,	,,
१००५ वस	,,	,,	अ.
१०२३ वस	अ.	आ.	से.
१७४५ वस	चु.	उ.	से॰
१८४२ वस	,,	,,	,,
१२१४ वसु	दि.	प.	,,
१०१ वस्क	भ्वा.	आ.	,,
१००४ वह	भ्वा.	प.	अ.
६३३ वहि	,,	आ.	से.
१०५० वा	अ.	प.	अ.
६६८ वाञ्छि	भ्वा.	,,	से.
२०८ वाक्षि	,	,,	,,
१८८३ वात	चु.	उ.	,,
११६० वावृतु (पा॰)	दि.	प.	,,
११६३ वाशृ	दि.	आ.	,,
१८८५ वास	चु.	उ.	,,
६४५ वाहृ (पा॰)	भ्वा.	आ.	,,
१४४२ विचिर्	रु.	उ.	अ.
१४२३ विच्छ	तु.	प.	से.
१७७४ विच्छ	चु.	उ.	,,
१०६४ विजिर्	जु.	उ.	अ.
१२८६ (ओ)विजी	तु.	आ.	से.
१४६० (ओ)विजी	रु.	प.	,,
३१६ विट	भ्वा.	,,	,,
३३ विथृ	,,	आ.	,,
१०६४ विद	अ.	प.	,,
११७१ विद	दि.	आ.	अ.
१४५० विद	रु.	आ.	अ.
१७०६ विद	चु.	आ.	से.
१४३२ विद्लृ	तु.	उ.	अ.
१३२५ विध	,,	प.	से.
१३५८ विल	,,	,,	,,

धातुः	गणः		
१६०५ विल	चु.	उ.	से.
१४२४ विश	तु.	प.	अ.
१५२६ विष	क्र्या.	,,	,,
६९८ विषु	भ्वा.	,,	,,
१०९५ विष्लृ	जु.	उ.	अ.
१६८६ विष्क	चु.	आ.	से.
१९४० विष्क	,,	उ.	,,
१२१७ विस	दि.	प.	,,
१०४८ वी	अ०	,,	अ.
१९०३ वीर	चु.	आ.	से.
१२१५ वुस(पा०)	दि.	प.	,,
९२ वृक	भ्वा.	आ.	,,
६०४ वृक्ष	,,	,,	,,
१५०९ वृङ्	क्र्या.	आ.	,,
१०२९ वृजि(पा०)	अ.	,,	,,
१०२९ वृजी	,,	,,	,,
१४६१ वृजी	रु.	प.	,,
१८१३ वृजी	चु.	उ.	,,
१२५४ वृञ्	स्वा.	,,	,,
१८१४ वृञ्	चु.	उ.	से.
१३३० वृण	तु.	प.	”
७५८ वृतु	भ्वा.	आ.	”
११६० वृतु	दि.	”	”
१७८२ वृतु	चु.	उ.	”
७३९ वृधु	भ्वा.	आ.	”
१७८३ वृधु	चु.	उ.	”
१२२६ वृश	दि.	प.	”
१७०५ वृष	चु.	आ.	”
७०६ वृषु	भ्वा.	प.	”

धातुः	गणः		
१३४७ वृहू	तु.	प.	वे.
१४९० वॄ	क्र्या.	”	से.
१४८६ वॄञ्	”	उ.	”
१००६ वेञ्	भ्वा.	”	अ.
८७७ वेणृ	”	”	से.
३४ वेथृ	”	आ.	”
८७७ वेनृ (पा.)	”	उ.	”
३६७ (टु) वेपृ	भ्वा.	आ.	”
१८८१ वेल	चु.	उ.	”
५३५ वेलृ	भ्वा.	प.	”
५४० वेल्ल	”	”	”
१०७७ वेवीङ्	अ.	आ.	”
२५५ वेष्ट	भ्वा.	आ.	”
६४३ वेह्	”	”	”
९२१ (ओ) वे	”	प.	अ.
१२९३ व्यच	तु.	”	से.
७६४ व्यथ	भ्वा.	आ.	”
११८१ व्यध	दि.	प.	अ.
८८१ व्यय	भ्वा.	उ.	से.
१९३२ व्यय	चु.	”	”
१११४ व्युष	दि.	प.	”
१२१५ व्युष	”	प.	”
१२१५ व्युस (पा.)	दि.	प.	”
१००७ व्येञ्	भ्वा.	उ.	अ.
२५३ व्रज	”	प.	से.
४५१ व्रण	”	”	”
१९३७ व्रण	चु.	उ.	”
१२९२ (ओ) व्रश्चू	तु.	प.	वे.
१५०४ व्री	क्र्या.	”	अ.

धातुः	गणः		
११४० व्रीड्	दि.	आ.	अ.
११२६ व्रीड	"	प.	से.
१३६३ व्रुड	तु.	प.	"
१५०२ व्ली	क्र्या.	"	अ.

श

धातुः	गणः		
११८७ शक	दि.	उ.	"
८६ शकि	भ्वा.	आ.	से.
१२६१ शक्लृ	स्वा.	प.	अ.
१६५ शच	भ्वा.	आ.	से.
२९९ शट	"	प.	"
३४० शठ	"	"	"
१५६४ शठ	चु.	उ.	"
१६६२ शठ	"	आ.	"
१८५५ शठ	"	उ.	"
२७९ शडि	भ्वा.	आ.	"
७९७ शण	"	प.	"
८५५ शद्लृ	"	"	अ.
१४२८ शद्लृ	तु.	"	"
१००० शप	भ्वा.	उ.	"
११६८ शप	दि	"	"
१७१५ शब्द	चु.	"	से.
१६९६ शम	चु.	आ.	"
१२०१ शमु	दि.	प.	"
८१८ शमो	भ्वा.	प.	"
१५५६ शम्ब	चु.	उ.	"
४२३ शर्ब	भ्वा.	प.	"
५८५ शर्व	"	"	"
४९० शल	"	आ.	"
८४३ शल	भ्वा.	प.	से.
३९० शल्भ	भ्वा.	आ.	से.
७२५ शव	"	प.	"
७२६ शश	"	"	"
६९० शष	"	"	"
६२६ (आङ्) शसि	"	आ.	"
७२७ शसु	"	प.	"
७२८ शंसु	"	"	"
१२६ शाखृ	"	"	"
२८९ शाडृ	"	आ.	"
९९५ शान	"	उ.	"
१०२२ (आङ्) शासु	अ.	आ.	"
१०७५ शासु	"	प.	"
६०५ शिक्ष	भ्वा.	आ.	"
१५५ शिखि (पा.)	"	प.	"
१६१ शिघि	"	"	"
१०२७ शिजि	अ.	आ.	"
१२४६ शिञ्	स्वा.	उ.	अ.
३०३ शिट	भ्वा.	प.	से.
१३६२ शिल	तु.	"	"
६८७ शिष	भ्वा.	"	अ.
१८१८ शिष	चु.	उ.	से
१४५१ शिष्लृ	रु.	प.	अ.
१७९० शीक	चु.	उ.	से.
१८२७ शीक	"	"	"
७५ शीकृ	भ्वा.	आ.	"
१०३२ शीङ्	अ.	"	"
३८३ शीभृ	भ्वा.	"	"
५२३ शील	"	प.	"
१८७९ शील	चु.	उ.	"

धातुः	गणः
१८३ शुच	भ्वा. प. से.
११६५ शुचिर्	दि. उ. ”
५१३ शुच्य	भ्वा. प. ”
३४१ शुठ	” ” ”
१६४५ शुठ	चु. उ. से.
३४१ शुठि (पा०)	भ्वा. प. ”
३४४ शुठि	” ” ”
१६४६ शुठि	चु. उ. ”
११९१ शुध	दि. प. अ.
१३३६ शुन	तु. ” से
७४ शुन्ध	भ्वा. ” ”
१८३३ शुन्ध	चु. उ. ”
४३३ शुन्भ	भ्वा. प. ”
१३२२ शुन्भ	तु. ” ”
४३२ शुभ	भ्वा. ” ”
७५० शुभ	” आ. ”
१३२१ शुभ	तु. प. ”
१६१६ शुल्क	चु. उ. ”
१६११ शुल्ब	” ” ”
११८३ शुष	दि. प. अ.
१६०२ शूर	चु. आ. से.
११५७ शूरी	दि. ” ”
१६१२ शूर्प	चु. उ. ”
५२६ शूल	भ्वा. प. ”
६७६ शूष	” ” ”
७६० शृधु	” आ. ”
८७३ शृधु	” उ. ”
१७३५ शृधु	चु. ” ”
१४८८ शॄ	क्र्या.प. ”
५४३ शेलृ	भ्वा. प. से.
५०६ शेवृ (पा०)	” आ. ”
९१८ शै	” प. अ.
११४५ शो	दि. ” ”
४५५ शोणृ	भ्वा. ” से.
२९० शौटृ	” ” ”
४१ श्च्युतिर्	” ” ”
५१८ श्मील	” ” ”
९६३ श्यैङ्	” आ. अ.
८४ श्रकि	भ्वा० आ० से०
१५१ श्रगि	,, प० ,,
७९८ श्रण	,, ,, ,,
१५७८ श्रण	चु० उ० ,,
७९९ श्रथ	भ्वा० प० ,,
१५४६ श्रथ	चु० उ० ,,
१८२४ श्रथ	,, ,, ,,
१८७१ श्रथ	,, ,, ,,
३५ श्रथि	भ्वा० आ० ,,
१५१० श्रन्थ	क्र्या० प० ,,
१५१२ श्रन्थ	,, ,, ,,
१८३८ श्रन्थ	चु० उ० ,,
३९३ श्रन्भु	भ्वा० आ० ,,
१२०४ श्रमु	दि० प० ,,
९१० श्रा	भ्वा० ,, अ०
१०५३ श्रा	अ० ,, ,,
८९७ श्रिञ्	भ्वा० उ० से०
७०१ श्रिषु	,, प० ,,
१४७५ श्रीञ्	क्र्या उ० अ०
९४२ श्रु	भ्वा० प० ,,

धातुः	गणः		
६१६ श्रै	भ्वा०	प०	अ०
४५६ श्रोणृ	,,	,,	से०
८५ श्लकि	,,	आ०	,,
१५२ श्लगि	भ्वा०	प०	,,
८०० श्लथ	भ्वा०	प०	,,
१२७ श्लाखृ	,,	,,	,,
११५ श्लाघृ	,,	आ०	,,
११८६ श्लिष	दि०	प०	अ०
१५७४ श्लिष	चु०	उ०	से०
७०२ श्लिषु	भ्वा०	प०	,,
७७ श्लोकृ	,,	आ०	,,
४५७ श्लोणृ	,,	प०	,,
६६ श्वकि	,,	आ०	,,
१६६ श्वच	,,	,,	,,
१६७ श्वचि	भ्वा०	आ०	से०
१५६५ श्वठ	चु०	उ०	,,
१८५६ श्वठ	,,	,,	,,
१५६५ श्वठि (पा०)	,,	,,	,,
१६२४ श्वभ्र	,,	,,	,,
१६२३ श्वर्त	,,	,,	,,
५४६ श्वल	भ्वा०	प०	,,
१५७० श्वल्क	चु०	उ०	,,
५५० श्वल्ल	भ्वा०	प०	,,
१०६६ श्वस	अ०	,,	,,
१०१० (टुओ) श्वि	भ्वा०	,,	,,
७४२ श्विता	,,	आ०	,,
१० श्विदि	,,	,,	,,
ष			
७८६ षगे	,,	प०	,,
१२६८ षघ	स्वा०	प०	से०
१६३ षच	भ्वा०	आ०	,,
९९७ षच	,,	उ०	,,
३१३ षट	,,	प०	,,
१६३४ षट्ट	चु०	उ०	,,
४६४ षण	भ्वा०	प०	,,
१४६४ षणु	त०	उ०	,,
१८३२ (आङः) षद	चु०	,,	,,
८५४ षद्लृ	भ्वा०	प०	अ०
१४२७ षद्लृ	तु०	,,	,,
९८७ षन्ज	भ्वा०	,,	,,
१५५५ षन्व	चु०	उ०	से०
४०० षप	भ्वा०	प०	,,
८२६ षम	,,	,,	,,
२२५ षर्ज	,,	,,	,,
४२४ षर्ब	,,	,,	,,
५८६ षर्व	,,	,,	,,
५४७ षल	,,	,,	,,
१०७८ षस	अ०	,,	,,
२०२ षस्ज	भ्वा०	प०	से०
१०७९ षस्ति	अ०	,,	,,
८५२ षह	भ्वा०	आ०	,,
११२८ षह	दि०	प०	,,
१८१० षह	चु०	उ०	,,
१५६९ षान्त्व	,,	,,	,,
१४३४ षिच	तु०	,,	अ०
१२४८ षिञ्	स्वा०	,,	,,
१४७७ षिञ्	क्र्या०	,,	,,
३०४ षिट	भ्वा०	प०	से०

धातुः	गणः
४७ षिध	भ्वा० प० से०
११६२ षिधु	दि० ,, अ०
४८ षिधू	भ्वा० ,, वे०
४३१ षिभि (पा०)	,, ,, से०
४३० षिभु (पा०)	,, ,, ,,
१३६३ षिल	तु० ,, ,,
५६० षिवि (पा०)	भ्वा० ,, ,,
११०८ षिवु	दि० ,, ,,
६४१ षु	भ्वा० ,, अ०
१०४१ षु	अ० ,, ,,
१२४७ षुञ्	स्वा० उ० ,,
१५६२ षुट्ट	चु० ,, से०
१३४० षुर	तु० प० ,,
११२६ षुह	दि० ,, ,,
१४०८ षू	तु० ,, ,,
१०३१ षूङ्	अ० आ० वे०
११३२ षूङ्	दि० ,, ,,
२५ षूद	भ्वा० आ० से०
१७१८ षूद	चु० उ० ,,
४३१ षृम्भु	भ्वा० प० ,,
४३० षृभु	,, ,, ,,
५४३ षेलृ (पा०)	,, ,, ,,
५०१ षेवृ	,, आ० ,,
६१५ षै	,, प० अ०
११४७ षो	दि० प० अ०
७८२ ष्टक	भ्वा० ,, से०
७६० ष्टगे	भ्वा० ,, ,,
४६१ ष्टन	,, ,, ,,
३८६ ष्टभि	,, आ० ,,
८३० ष्टम	भ्वा० प० से०
१२६५ ष्टिघ	स्वा० आ० ,,
३६४ ष्टिपृ	भ्वा० ,, ,,
११२४ ष्टिम	दि० प० ,,
११२५ ष्टीम	,, ,, ,,
१७५ ष्टुच	भ्वा० उ० अ०
१०४३ ष्टुञ्	अ० उ० अ०
१६७३ ष्टुप	चु० उ० से०
३६४ ष्टुभु	भ्वा० आ० ,,
३६५ ष्टेपृ	,, ,, ,,
६२२ ष्टै	,, प० अ०
६११ ष्ट्यै	,, ,, ,,
६६१ ष्ट्रक्ष	,, ,, से०
८३६ ष्ठल	भ्वा० प० ,,
६२८ ष्ठा	,, ,, अ०
५६० ष्ठिवु	,, ,, से०
१११० ष्ठिवु	दि० ,, ,,
१११२ ष्णसु	,, ,, ,,
१०५२ ष्णा	अ० ,, अ०
१२०० ष्णिह	दि० ,, वे०
१५७२ ष्णिह	चु० उ० से०
१०३८ ष्णु	अ० प० ,,
११११ ष्णुसु	दि० ,, ,,
११६६ ष्णुह	,, ,, वे०
६२३ ष्णै	भ्वा० ,, अ०
६४८ ष्मिङ्	,, आ० ,,
१५७३ ष्मिङ् (पा०)	चु० उ० से०
१०० ष्वक्क	भ्वा० आ० ,,
६७६ ष्वञ्ज	,, आ० अ०

धातुः	गणः		
१८ ष्वद	चु०	उ०	से
१८०६ ष्वद	,,	,,	,,
१०६८ (ञि) ष्वप्	अ०	प०	अ०
७४४ (ञि) ष्विदा	भ्वा०	आ०	से०
९७८ (ञि) ष्विदा	,,	प०	,,
११८८ (ञि) ष्विदा	दि०	,,	अ०
११८८ ष्विदा	दि०	प०	अ०

स

धातुः	गणः		
१८९२ सङ्केत	चु०	उ०	से०
१९२२ सङ्ग्राम	चु०	आ०	,,
१९०६ सत्र	,,	उ०	,,
१८८८ समाज	,,	उ०	,,
१२२१ समी (पा०)	दि०	प०	,,
१२६३ साध	स्वा०	,,	अ०
१८८० साम	चु०	उ०	से०
१५५६ साम्ब (पा०)	,,	,,	,,
१८६९ सार	,,	,,	,,
१९२९ सुख	,,	,,	,,
१८७४ सूच	,,	,,	,,
१९०८ सूत्र	,,	,,	,,
६६६ सूर्क्ष	भ्वा०	प०	,,
५०९ सूर्क्ष्य	,,	,,	,,
९३५ सृ	,,	,,	अ०
१०९९ सृ	जु०	,,	,,
११७८ सृज	दि०	आ०	,,
१४१४ सृज	तु०	प०	,,
९८३ सृप्लृ	भ्वा०	,,	,,
८१ सेकृ	,,	आ०	से०
९७९ स्कन्दिर्	,,	प०	,,

धातुः	गणः		
३८७ स्कभि	भ्वा०	आ०	से०
१४७८ स्कुञ्	क्र्या०	उ०	अ०
९ स्कुदि	भ्वा	आ०	से०
७६८ स्खद	,,	,,	,,
८२० स्खदिर्	,,	प०	,,
५४४ स्खल	भ्वा०	प०	,,
८१६ स्खलि (पा०)	,,	,,	,,
१८६० स्तन	चु०	उ०	,,
१२५२ स्तृञ्	स्वा०	,,	अ०
१३४९ स्तृहू	तु०	प०	वे०
१४८४ स्तॄञ्	क्र्या०	उ०	से०
१८९७ स्तेन	चु०	,,	,,
१९२३ स्तोम	,,	,,	,,
९१० स्त्यै	भ्वा०	प०	अ०
१३८८ स्थुड	तु०	,,	से०
१९०४ स्थूल	चु०	आ०	,,
१४ स्पदि	भ्वा०	,,	,,
३ स्पर्ध	,,	,,	,,
८८७ स्पश	,,	उ०	,,
१६८१ स्पश	चु०	आ०	,,
१२५९ स्पृ	स्वा०	प०	अ०
१४२२ स्पृश	तु०	,,	,,
१८७२ स्पृह	चु०	उ०	से०
१३९० स्फर (पा०)	तु०	प०	,,
४८७ स्फायी	भ्वा०	आ०	,,
१५७२ स्फिट (पा०)	चु०	उ०	,,
१६३५ स्फिट्ट	,,	,,	,,
२६० स्फुट	भ्वा०	आ०	,,
१३७३ स्फुट	तु०	प०	,,

धातुः	गणः		
१७२३ स्फुट	चु०	उ०	से०
१५३७ स्फुटि (पा०)	,,	,,	,,
३२६ स्फुटि (पा०)	भ्वा०	प०	,,
३२६ स्फुटिर	,,	,,	,,
१३६१ स्फुड	तु०	,,	,,
१५३७ स्फुडि	चु०	उ०	,,
१३८६ स्फुर	तु०	प०	,,
२१३ स्फुर्छा	भ्वा०	,,	,,
१३६० स्फुल	तु०	,,	,,
२३५ (टुओ)स्फूर्जा	भ्वा०	,,	,,
१५७३ स्मिट	चु०	उ०	से०
५१६ स्मील	भ्वा०	प०	,,
८०७ स्मृ	,,	,,	अ०
६३३ स्मृ	,,	,,	,,
१२५६ स्मृ (पा०)	स्वा०	,,	,,
७६१ स्यन्दू	भ्वा०	आ०	वे०
१६६४ स्यम	चु०	,,	से०
८२६ स्यमु	भ्वा०	प०	,,
८३ स्रकि	,,	आ०	,,
३६३ स्रम्भु (पा०)	,,	,,	से०
७५७ स्रम्भु	,,	,,	,,
७५४ स्रंसु	,,	,,	,,
११०६ स्रिवु	दि०	प०	,,
९४० स्रु	भ्वा०	,,	अ०
८२ स्रेकृ	,,	आ०	से०
८१७ स्वन	,,	प०	,,
८२७ स्वन	,,	,,	,,
१८६४ स्वर	चु०	उ०	,,
१९ स्वर्द	भ्वा०	आ०	,,

धातुः	गणः		
२८ स्वाद	भ्वा०	आ०	से०
१८०६ स्वाद (पा०)	चु०	उ०	,,
९३२ स्वृ	भ्वा०	प०	वे०
ह			
३१२ हट	,,	,,	से०
३३५ हठ	,,	,,	,,
९७७ हद	,,	आ०	अ०
१०१२ हन	अ०	प०	,,
४६७ हम्म	भ्वा०	,,	से०
५१२ हय	,,	,,	,,
५१४ हर्य	,,	,,	,,
८३७ हल	,,	,,	,,
७२१ हसे	,,	,,	,,
१०९० (ओ) हाक्	जु०	,,	अ०
१०८९ (ओ) हाङ्	,,	आ०	,
१२५७ हि	स्वा०	प०	से०
८६१ हिक	भ्वा०	उ०	से०
३१७ हिट (पा०)	,,	प०	,,
२६८ हिडि	,,	आ०	,,
१३६१ हिल	तु०	प०	,,
५९१ हिवि	भ्वा०	,,	,,
१६८६ हिष्क (पा०)	चु०	आ०	,,
१४५६ हिसि	रु०	प०	,,
१८३० हिसि	चु०	उ०	,,
१०८३ हु	जु०	प०	अ०
२६६ हुडि	भ्वा०	आ०	से०
२७७ हुडि	,,	,,	,,
३५२ हुडृ	भ्वा०	प०	,,
२११ हुर्छा	,,	,,	,,

धातुः	गणः	धातुः	गणः
८४४ हुल	भ्वा० प० से०	८०६ ह्मल	भ्वा० प० से०
३५३ हूडृ	,, ,, ,,	७८७ ह्रगे	,, ,, ,,
१०९७ हृ	जु० ,, अ०	७११ ह्रस	,, ,, ,,
८९९ हृञ्	भ्वा उ० ,,	२६ ह्राद	,, आ० ,,
१२२९ हृष	दि० प० से०	१०८५ ह्री	जु० प० अ०
७०९ हृष	भ्वा० ,, ,,	२१० ह्रीच्छ	भ्वा० ,, से०
१५३२ हेठ	क्या० ,, ,,	६२२ ह्रेषृ	,, आ० ,,
२६६ हेठ	भ्वा० आ० ,,	७८८ ह्लगे	भ्वा० प० से०
७७८ हेड	,, प० ,,	१६५९ ह्लप	चु० उ० ,,
२८४ हेडृ	,, आ० ,,	७१२ ह्लस	भ्मा० प० ,,
६२१ हेषृ	,, ,, ,,	२७ ह्लादी	,, आ० ,,
२८५ होडृ	,, ,, ,,	८०५ ह्वल	भ्वा० प० से०
३५४ होडृ	,, प० ,,	९३१ ह्वृ	,, ,, अ०
१०८२ ह्नुङ्	अ० आ० अ०	१००८ ह्वेञ्	,, उ० ,,

सौत्रधातवः ।

धातुः	सूत्रम्	धातुः	सूत्रम्
ऋति	२४२२	स्कुन्भुः	२५५५
तुः	२४४४	स्तन्भुः	,,
दभिः (वा)		स्तन्भुः	,,
स्कन्भुः	२५५५		

व्याकरणचन्द्रोदय

पं० चारुदेव शास्त्री

व्याकरणचन्द्रोदय अब सम्पूर्ण पाँच खण्डों में प्रकाशित हो चुका है। प्रथम खण्ड कारक-निरूपणात्मक है। द्वितीय कृत्तद्धित-विषयक है। तृतीय तिङ-व्याख्यान-परक है और चतुर्थ स्त्रीप्रत्यय-सुप्-अव्ययार्थ-निदर्शक है। पञ्चम खण्ड शिक्षा-संज्ञा-परिभाषा-सन्धि-लिङ्ग-निरूपक है। प्रक्रिया-ग्रंथ होते हुए भी यह कृति व्याक्रियाप्रधान है। लक्ष्यलक्षणे व्याकरणम्—यह सर्वसम्मत व्याकरण का स्वरूप माना जाता है। तो भी पूर्व विद्यमान व्याकृतिग्रंथों में लक्ष्य का अत्यल्प उपादान है। पुरानी शैली से लिखे गये वृत्ति आदि ग्रंथों में एक-दो लक्ष्यों में लक्षण (सूत्र) की प्रवृत्ति को दिखाने से वृत्तिकारादि अपने को कृतार्थ मानते हैं। नूतन रीति से लिखे गये व्याकरण ग्रंथों में प्रयोगों के उदाहरण देने का प्रयत्न तो है, पर वे उदाहरण या तो स्वयं घटित होते हैं, या भट्टिकाव्यादि से उठाये जाते हैं, जहाँ व्याकरण सिखाने के लिये वे घड़े गये हैं और जिनमें अनेकानेक ऐसे हैं जो साहित्य में कहीं भी प्रयुक्त नहीं हुए, अतः अव्यवहार्य हैं। इस वर्ग के विद्वान् भूल जाते हैं कि व्याकरण अन्वाख्यान-स्मृति है—व्याक्रियन्त पदानीह क्रियन्ते नूतनानि न।

इस कृति का वाग्व्यवहार सिखाना प्रधान लक्ष्य है। प्रक्रिया इस साध्य में साधनमात्र है। व्यवहार उपकार्य है, प्रक्रिया उपकारक। अतः इस कृति में जहां सूत्रादि की विशद व्याख्या की गई है, सूत्रादि की प्रवृत्ति द्वारा सरल, शङ्कासमाधान सहित, क्रम-बद्ध रूपसिद्धि दी गई है, वहां वैदिक-लौकिक उभय-विध वाङ्मय से शतशः वाक्य उद्धृत किये हैं जो व्याकरण-व्युत्पादित उस-उस लक्ष्य को प्रयोगावतीर्ण दिखाते हुए उसकी साधुता को यथेष्ट रूप से प्रमाणित करते हैं और व्यवहार सिखाने में अत्यन्तोपकारक हैं।

स्थान-स्थान पर अपेक्षित नूतनार्थोपन्यास, पूर्वमतसमीक्षा, संक्षिप्त वैया-करणोक्तिविशदीकरण, यथासंभव अष्टाध्यायीगतसूत्रक्रमाश्रयण, आदि असा-मान्य धर्म इस कृति को अन्य कृतियों से पृथक् करते हैं और इसकी मौलिकता की ओर संकेत करते हैं।

प्रथम खण्ड (कारक व समास)	(Ed. 1969)	8.00
द्वितीय खण्ड (कृत व तद्धित)	(Ed. 1970)	22.50
तृतीय खण्ड (तिङन्त)	(Ed. 1971)	40.00
चतुर्थ खण्ड (स्त्रीप्रत्यय-सुप्-अव्ययार्थ)	(Ed. 1972)	20.00
पंचम खण्ड (संज्ञा-परिभाषा-सन्धि-लिङ्गानुशासन)	(Ed. 1973)	55.00

आकार डिमाई :: कुल पृष्ठ २,३३२ :: कपड़े की जिल्द सहित

मोतीलाल बनारसीदास

दिल्ली :: वाराणसी :: पटना